वैयाकरणसिद्धान्तकौमुदी

(चतुर्थः भागः)

बालमनोरमा-तत्त्वबोधिनी-शेखर-सुबोधिनी-चन्द्रकला-समलङ्कृता

(कृदन्तप्रभृति समाप्तिपर्यन्ता)

म० म० पं० गिरिधरशर्मा चतुर्वेदः

म० म० पं० परमेश्वरानन्दशर्मा भास्करः

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

श्रीभट्टोजिदीक्षितविरचिता

वैयाकरण-सिद्धान्त-कौमुदी

(कृदन्तप्रभृतिसमाप्तिपर्यन्ता)

श्रीवासुदेवदीक्षितप्रणीतया **बालमनोरमया**
श्रीज्ञानेन्द्रसरस्वतीविरचितया **तत्त्वबोधिन्या** च
समलङ्कृता

चतुर्वेदोपाह्व महामहोपाध्याय **श्रीगिरिधरशर्मणा**
महामहोपाध्याय **श्रीपरमेश्वरानन्दशर्मणा** च
संशोध्य सम्पादिता

मोतीलाल बनारसीदास
दिल्ली :: वाराणसी :: पटना

© मोतीलाल बनारसीदास
भारतीय संस्कृति ग्रन्थमाला के प्रमुख प्रकाशक एवं पुस्तक-विक्रेता
मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७
शाखाएं : १. चौक, वाराणसी-१ (उ० प्र०)
२. अशोक राजपथ, पटना-४ (बिहार)

पुनर्मुद्रण : दिल्ली, १९७९

मूल्य : रु० २५.०० (सजिल्द)
रु० १५.०० (अजिल्द)

This book has been published on the paper supplied through the Govt. of India at concessional rate.

श्री नरेन्द्र प्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहर नगर, दिल्ली-७ द्वारा प्रकाशित तथा श्री शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५ फेस १, इंडस्ट्रियल एरिया, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित।

वैयाकरणसिद्धान्तकौमुद्याः

उत्तरार्धे

कृदन्ते कृत्यप्रकरणम् ॥ ६५ ॥

२८२९ धातोः । (३-१-९१) आ तृतीयसमाप्तेरधिकारोऽयम् ।

अथ कृदन्तप्रक्रिया निरूप्यन्ते । तदेवं 'प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः' इति प्रतिज्ञातेषु तृतीयाध्यायस्थप्रत्ययेषु प्रथमपादे 'प्रत्ययः, परश्च' इत्यारभ्य 'कुषिरजोः प्राचां श्यन्–' इत्यन्तैः सूत्रैर्विहिताः कतिचित्प्रत्यया निरूपिताः । अथ तदुत्तरसूत्रविहितान् निरूपयितुमुपक्रमते **धातोः । आ तृतीयेति** । आ

समस्तजगतामीशौ जगदानन्दकारकौ ।
जगतीजनकौ वन्दे पार्वतीपरमेश्वरौ ॥

'कृदतिङ्' इति तिङ्भिन्नप्रत्ययस्य कृत्संज्ञाकरणात् कृतां तिङ्ज्ञानाधीनज्ञानत्वात्तिङ्निरूपणानन्तरमेव कृतां निरूपणमुचितमिति तिङो निरूप्य कृतो निरूपयितुमाह **धातोरिति** । ननु तिङ्निरूपणात्प्रागेव 'स्पृशोऽनुदके क्विन्' 'ऋत्विग्दधृग्–' इत्यादिना क्विन्नादिनिरूपणं कृतमिति कथमियं भवदुक्तसंगतिः संगच्छत इति चेत् । अत्राहुः—क्विन्नादिनिरूपणस्य तत्र प्रासङ्गिकत्वात्, प्राधान्येन च कृतामत्रैव निरूपणान्नोक्तशङ्कावकाश इति । यद्यपि 'धातोरेकाचो हलादेः–' इति सूत्राद्धातोरित्यनुवर्तत एव तथापि आर्धधातुकसंज्ञाया आश्रितशब्दव्यापारत्वलाभाय पुनर्धातोरिति ग्रहणं कृतम् । अन्यथा 'आर्धधातुकं शेषः' इत्यनेन तिङ्शिद्भिन्नस्य धातोर्विहितप्रत्ययमात्रस्यार्धधातुकसंज्ञायां लूभ्यां पूभ्यामित्यादाविड्गुणौ स्यातां धातोर्विहितत्वेन भ्यामादेरार्धधातुकत्वात्, पुनर्धातुग्रहणे कृते तु तव्यत्तव्यादय इव धातोरित्येवमविधानाद् भ्यामादेरार्धधातुकत्वं नेति दिक् । 'प्राग्लादेशाद्धात्वधिकारः' इति पक्षोऽयुक्त इत्याशयेनाह **आ तृतीयसमाप्तेरिति** । तृतीयाध्यायसमाप्तिपर्यन्तमित्यर्थः । प्राग्लादेशादिति पक्षे तु 'तिङ्शित्सार्वधातुकम्' इत्यत्र धातोरित्यधिकाराभावात् शित्प्रत्ययमात्रस्य सार्वधातुकत्वेन शसोऽपि सार्वधातुकत्वे 'सार्वधातुकमपित्' इति ङित्वे च हरीनित्यादौ 'घेर्ङिति' इति गुणः स्यादिति ज्ञेयम् । स्यादेतत्—धातोर्लकारे सति

'तत्रोपपदं सप्तमीस्थम्' (सू ७८१)। 'कृदतिङ्' (सू ३७४)। २८३ **वाऽसरूपोऽस्त्रियाम्**। (३-१-९४) परिभाषेयम्। अस्मिन्धात्व

तृतीयाध्यायपरिसमाप्तिरित्यर्थः। एतच्च भाष्ये स्पष्टम्। **तत्रोपपदं सप्तमीस्थम् इति। कृदतिङ् इति**। व्याख्यातं प्राक्। **वाऽसरूपोऽस्त्रियाम्**। असरूप इति छेदः। **परिभाषेयमिति**। अधिकारत्वे स्वरितत्वकल्पनागौरवादिति भावः। असरूप इति लिङ्गनिर्देशः। यत्र असरूपप्रत्ययो विधास्यते तत्र वेत्युपतिष्ठते। वेत्यतः प्राग् बाधक इति शेषः। असरूपो वा बाधको भवतीति यावत्। कस्य बाधको वेत्याकाङ्क्षायाम् उत्सर्गस्येत्यर्थाल्लभ्यते। फलितमाह

तस्मिन् परतो नित्यत्वात्करिष्यतीत्यादौ प्रथमं स्यप्रत्ययप्रवृत्तौ तिबाद्यप्रसङ्गः, यत्र तु तिबाद्याश्रयो विकरणस्तत्रैव व्यवधानाभावाद्भवतीत्यादौ तिबादयः स्युरिति चेत्। मैवम्, 'विकरणेभ्यो नियमो बलीयान्' इति स्वीकारात्। अथवा विहितविशेषणाश्रयणेन धातोर्विहितस्य लस्येति व्याख्यानादिष्टसिद्धिः। नन्वेवं विहितविशेषणाश्रयणे 'विद्लृ लाभे' इत्यस्माद्धातोर्विहितस्य लटः शब्विकरणव्यवायेऽपि 'विदो लटो वा' इति णलादयः स्युरिति चेत्। अत्र हरदत्तः—धातुनाऽत्र विहितं विशेष्यते विदिना त्वानन्तर्यमिति। तथा चायमर्थः संपद्यते—धातोर्विहितस्य विदोऽनन्तरस्य लटो णलादय इत्यभ्युपगमाद् वेत्तेरेव विहितस्य लटो णलादयो भवन्ति न तु विन्दतेर्लट इति दिक्। विधेयानिर्देशात्स्वरितत्वाच्चाधिकारसूत्रमिदमित्याह **अधिकारोऽयमिति। तत्रोपपदमित्यादि**। एतेन कृत्संज्ञोपपदसंज्ञयोरिह विधानसौष्ठवाय द्वितीयो धात्वधिकार आवश्यक इति ध्वनितम्। अयं भावः यदि द्वितीयधात्वधिकारो न स्यात्तदा पूर्वधात्वधिकारेऽपि कृदुपपदसंज्ञे स्याताम्। इष्टापत्तौ तु सप्तमीनिर्दिष्टमात्रस्योपपदत्वेन 'च्लि लुङि' इत्यादौ लुङन्ते उपपदे च्लिरित्येवमनिष्टोऽर्थः प्रसज्येत। तिङ्भिन्नधात्वधिकारप्रत्ययस्य कृत्संज्ञायां करिष्यतीत्यादौ स्यप्रत्ययस्य कृत्त्वेन 'कृत्तद्धित–' इति प्रातिपदिकत्वादौत्सर्गिकमेकवचनमिति सर्वसंमतत्वेन सुप्रत्ययप्रसङ्गाच्च, तस्मादधिकारविशेषे अनयोः संज्ञयोर्विधानार्थमयमधिकार इति। **वासरूपोऽस्त्रियाम्**। अपवादेन नित्यं बाधे प्राप्ते क्वचिदुत्सर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रम्। अतएव 'अचो यत्' 'ऋहलोर्ण्यत्' इत्याद्यपवादविषये तव्यदादयोऽपि प्रयुज्यन्ते—भव्यम्, भवितव्यम्। कार्यम्, कर्तव्यम्, करणीयम्। वाच्यम्, वक्तव्यमित्यादि। **परिभाषेति**। अधिकारसूत्रमिति स्वीकृते तु स्त्र्यधिकारेण विच्छेदाद्वासरूपसूत्राप्रवृत्त्या आसित्वा भुङ्क्ते, आस्यते भोक्तुमित्यादिरूपाणि न सिध्यन्ति। इह हि भोजनार्थत्वादासनस्य पूर्वकालता गम्यते, क्त्वाप्रत्ययश्च तुमर्थाधिकाराद्भावे भवति

हारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात्स्त्र्यधिकारोक्तं विना

स्मिन् धात्वधिकारे इत्यादिना । स्त्रीशब्दः स्वर्यते, तदाह **स्त्र्यधिकारोक्तं विनेति** । 'स्त्रियां क्तिन्' इति वक्ष्यमाणस्त्र्यधिकारस्थमपवादं विनेत्यर्थः । स्त्र्यधिकारस्थस्तु असरूपः प्रत्यय उत्सर्गस्य नित्यमेव बाधक इति भावः । 'ण्वुल्तृचौ' इत्युत्सर्गः । 'इगुपधज्ञाप्रीकिरः कः' इत्यपवादः । तद्विषये ण्वुल्तृचावपि भवतः । विक्षिपः । विक्षेपकः । विक्षेप्ता । असरूप इति किम्, 'कर्मण्यण्' इत्युत्सर्गः । 'आतोऽनुपसर्गे कः' इत्यपवादः । स तु सरूपत्वान्नित्यं बाधक एव । गोदः । कम्बलदः । 'नानुबन्धकृतमसारूप्यम्' इति वचनाद् अनुबन्धो न सारूप्यप्रतिबन्धकः । अस्त्रियां किम्, 'स्त्रियां क्तिन्' इत्युत्सर्गः । 'अ प्रत्ययात्' इति प्रत्ययान्ताद्विहितः अकारप्रत्ययः तस्य अपवादः । स बाधक एव भवति । चिकीर्षा । व्यावक्रोशी व्यावकुष्टिः इत्यत्र तु 'कर्मव्यतिहारे णच् स्त्रियाम्' इति णच् क्तिनो बाधको वा भवत्येव । अस्त्रियामिति निषेधस्तु नास्ति, तस्य णचः 'स्त्रियाम्' इत्यधिकारोक्तत्वाभा-

---

लकारोऽपि तत्रैवेति समानविषयत्वादुभयोर्बाध्यबाधकभावः स्यात् । किं च वर्णात्कार इत्युत्सर्गः, स च 'रादिफः' इत्यनेन बाध्येत । न चेष्टापत्तिः, 'रकारादीनि नामानि शृण्वतो मम पार्वति' इत्यादिप्रयोगविरोधात् । अमुमेवार्थं मनसि निधाय हरदत्तादिभिः पारिभाषिकमित्युक्तम् । एतेन 'शकि लिङ् च' इति ज्ञापकाद्वासरूपविधेरनित्यत्वेन स्त्र्यधिकारादूर्ध्वेषु क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति सिद्धान्तः संगच्छत इति दिक् । 'वासरूप–' इत्यत्राऽसरूप इति च्छेदः । अन्यथा लाघवे विशेषाभावेनासंदेहाय सरूपो नेति ब्रूयादित्याशयेनाह **असरूप इति** । असरूप इति किम्, 'कर्मण्यण्' इत्युत्सर्गः । 'आतोऽनुपसर्गे कः' इत्यपवादः । स तूत्सर्गस्य नित्यं बाधको यथा स्यात् । गोदः । कम्बलदः । न च कृतेऽप्यसरूपग्रहणे अणकयोरप्यसरूपत्वादिष्टसिद्धिरिति वाच्यम्, 'नानुबन्धकृतमसारूप्यम्' इति सिद्धान्तात् । अस्त्रियामित्यत्र स्त्रीशब्दः स्वर्यते स्वरितेन चाधिकारावगतिरित्याशयेनाह **स्त्र्यधिकारोक्तं विनेति** । तेन 'स्त्रियां क्तिन्' इत्युत्सर्गम् 'अप्रत्ययात्' इत्यपवादो नित्यं बाधते । चिकीर्षा । जिहीर्षा । नन्वस्त्रियामित्यत्र स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञाय स्वरितेनाधिकारावगतिरित्यादिव्याख्यां विहाय स्त्रियामभिधेयायां वासरूपविधिर्नेति स्त्रियामित्येवं शब्दमुच्चार्य विहिते वासरूपविधिर्नेति वा व्याख्यायतामिति चेत् । अत्राहुः—स्त्रियां वाच्यायामिति पक्षे लव्या लवितव्येति यतो विषये तव्यो न स्यात्, द्वयोरपि इह स्त्रीवाचकत्वात् । स्त्रियामिति शब्दोच्चारणपक्षे तु व्यावक्रोशी व्यावकुष्टिरिति कर्मव्यतिहारे णचो विषये क्तिन स्यात् । द्वयोरपि स्त्रियामित्युच्चार्य विधानात् । ततश्च स्त्र्यधिकारोक्तं

२८३१ **कृत्याः ।** (३-१-९५) अधिकारोऽयं ण्वुलः प्राक् । २८३२ **कर्तरि कृत् ।** (३-४-६७) कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते २८३३ **तयोरेव कृत्यक्तखलर्थाः ।** (३-४-७०) एते भावकर्मणोरेव स्युः । २८३४ **तव्यत्तव्यानीयरः ।** (३-१-९६) धातोरेते प्रत्ययाः स्युः । तकाररेफौ स्वरार्थौ । एधितव्यम् एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं

यात् । **कृत्याः ।** कृत्यसंज्ञका इत्यर्थः । ततश्च 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च, अर्हे कृत्यतृचश्च, शकि लिङ् च' इत्यादिषु प्रवर्तते । **ण्वुलः प्रागिति ।** 'ण्वुल्तृचौ' इत्यतः प्रागित्यर्थः । एतच्च भाष्ये स्पष्टम् । **कर्तरि कृत् ।** अर्थनिर्देशोऽयम् । **इति प्राप्ते इति ।** वक्ष्यमाणतव्यदादिप्रत्ययानां कृत्संज्ञकत्वात्तेषां कर्तरि प्राप्तावित्यर्थः । **तयोरेव कृत्यक्तखलर्थाः ।** 'लः कर्मणि च भावे च-' इति सूत्रोपात्ते भावकर्मणी तच्छब्देन परामृश्येते, तदाह **एते भावकर्मणोरेवेति ।** न तु कर्तरीति भावः । वैशेषिकत्वादेव सिद्धे एवकारस्तु तव्यदादीनां कृत्संज्ञकतया प्राप्तकर्त्रर्थकत्वस्याभावमनुवदन् कृत्यसंज्ञया वैशेषिकया कृत्संज्ञाया अबाधं गमयति । **तव्यत्तव्यानीयरः ।** तव्यत् तव्य अनीयर् एषां द्वन्द्वः । **प्रत्ययाः स्युरिति ।** ते कृत्संज्ञकाः कृत्यसंज्ञकाश्च इत्यपि ज्ञेयम् । **स्वरार्थाविति ।** 'तित्स्वरितम्' इति 'उपोत्तमं रिति' इति च स्वरविशेषार्थावित्यर्थः । निरनुबन्धकस्य तु तव्यस्य प्रत्ययस्वरेण आद्युदात्तत्वमेवेति बोध्यम् । भावे उदाहरति **एधितव्यमिति ।** त्वत्कर्तृका एधनक्रियेत्यर्थः । ननु 'लः कर्मणि च-' इत्यत्र असत्त्वभूतस्यैव भावस्य ग्रहणम्, तिङ्वाच्यभावनाया असत्त्वरूपताया उक्तत्वात् । ततश्च तस्य भावस्य अस-

---

विनेति व्याख्यैव ज्यायसीति दिक् । **कृत्याः ।** अत्र प्रत्यय इत्यादिवत्कृत्य इत्यधिकारेणापीष्टसिद्धेर्बहुवचनमनुक्तप्रत्ययसमुच्चयार्थम्, तेन केलिमरादयो ज्ञापकसिद्धा इति नोपसंख्येया इत्याहुः । **ण्वुलः प्रागिति ।** 'ण्वुल्तृचौ' इत्यतः प्रागित्यर्थः । 'रोगाख्यायां ण्वुल् बहुलम्' इति नावधिः, प्रत्यासत्तिन्यायात् । अवधिविशेषे ज्ञापकं तु 'अर्हे कृत्यतृचश्च' इत्यत्र कृत्यात्पृथक् तृचो ग्रहणमेव । न चैवं तृचोऽकृत्यत्वेपि ण्वुलः कृत्यत्वं दुर्वारं स्यात्, इष्टापत्तौ तु 'तयोरेव-' इति भावकर्मणोरेव ण्वुल् स्यान्न तु कर्तरीति वाच्यम्, भाष्ये एव ण्वुलः कृत्यत्वमाशङ्क्य योगापेक्षं ज्ञापकमिति सिद्धान्तितत्वात् । वृत्तिकारस्तु सूत्रे प्राग् ण्वुल इति प्रचिक्षेप । **तयोरेव ।** तच्छब्देन भावकर्मणी परामृश्येते एवकारस्तु कर्त्रयोगव्यवच्छेदार्थस्तदाह **भावकर्मणोरेवेति ।** यद्यप्येतत्तक्रकौण्डिन्यन्यायेनैव लभ्यते, तथापि स्पष्टप्रतिपत्त्यर्थमेवकार इत्येके । तन्न्यायस्यानित्यत्वज्ञापनार्थमित्यन्ये । **स्वरार्थाविति ।** तकारः 'तित्स्वरितम्'

क्लीबत्वं च चेतव्यश्चयनीयो वा धर्मस्त्वया। 'वसेस्तव्यत्कर्तरि णिच्च' (वा १६२०)। वसतीति वास्तव्यः। 'केलिमर उपसंख्यानम्' (वा १११६)। पचेलिमा माषाः, पक्तव्याः। भिदेलिमाः सरलाः, भेत्तव्याः। कर्मणि प्रत्ययः। वृत्तिकारस्तु 'कर्मकर्तरि चायमिष्यते' इत्याह। तद्भाष्यविरुद्धम्। २८३५ कृत्यचः। (८-४-२९) उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रयाणीयम्। अचः किम्-प्रमग्नः। 'निर्विण्णस्योपसंख्यानम्' (वा २००४)। अचः परत्वाभावादप्राप्ते वचनम्। परस्य णत्वम्, पूर्वस्य ष्टुत्वम्, निर्विण्णः। २८३६ णेर्विभाषा। (८-४-३०) उपसर्गस्थान्नि-

---

त्वरूपस्यात्र 'तयोरेव कृत्य-' इति तच्छब्देन परामर्शात्तव्यदादीनामसत्त्ववाचितया लिङ्गसंख्यान्वयोऽनुपपन्न इत्यत आह भावे औत्सर्गिकमेकवचनमिति। 'एकवचनम्, द्विबहु, द्विबहुवचने' इति सूत्रपाठमभ्युपगम्य द्वित्वबहुत्वाभावे एकवचनमिति भाष्यसिद्धान्तादिति भावः। क्लीबत्वं चेति। 'एकश्रुतिः स्वरसर्वनाम, लिङ्गसर्वनाम नपुंसकम्' इति 'दाण्डिनायन-' इति सूत्रस्थभाष्यादिति भावः। कर्मण्युदाहरति चेतव्य इति। 'वसेस्तव्यत् कर्तरि णिच्च' इति वार्तिकम्। वास्तव्य इति। वसेत्यर्थः। णित्वादुपधावृद्धिः। केलिमर इति। धातोरित्येव। भावकर्मणोरेवेदम्। केलिमरि ककारेफावितौ। भिदेलिमा इति। कित्वान्नोपधागुणः। सरला वृक्षविशेषाः। तद्भाष्येति। भाष्ये भिदेलिमा इत्युदाहृत्य भेत्तव्या इत्येव विवरणादिति भावः। कृत्यचः। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादनोत्परः' इत्यत उपसर्गादिति च। उपसर्गस्थादिति विवक्षितम्। कृतीत्यनन्तरं विद्यमानस्येति शेषः। अच इति पञ्चमी, तदाह उपसर्गस्थादिति। असमानपदत्वादप्राप्तौ वचनम्। 'अट्कुप्वाङ्नुम् व्यवायेऽपि' इत्यनुवर्तते. तदाह प्रयाणीयमिति। निर्विण्णस्येति। नस्य ण इत्युपसंख्यानमित्यर्थः। अचः परत्वाभावादिति। विदेः क्तप्रत्यये 'रदाभ्याम्-' इति दकारादुत्तरस्य तकारस्य पूर्वदस्य च नत्वे निर्विन्न इति स्थिते नकारस्य अचः परत्वाभावात् 'कृत्यचः' इति अप्राप्ते णत्वे इदं णत्ववचनमित्यर्थः। नकारेण व्यवधानाच्च णत्वस्याप्राप्तिर्बोध्या। पूर्वस्येति। नस्य

इति स्वरितत्वार्थः। केलिमरस्तु 'उपोत्तमं रिति' इति मध्योदात्तार्थः। कृत्यचः। उपसर्गादित्यनुवर्तते रषाभ्यामिति च। तत्र तात्स्थ्यात्ताच्छब्द्यमित्याह उपसर्गस्थादिति। कृत्स्थस्य नस्येति। अच उत्तरस्येत्यस्य कृतो विशेषणत्वे तु प्रयापणमित्यादौ न स्यादिति भावः। प्रमग्न इति। 'टुमस्जो शुद्धौ' 'ओदितश्च' इति निष्ठानत्वम्, तस्यासिद्धत्वात् 'स्कोः-' इति सलोपे 'चोः कुः'। निर्विण्णस्येति।

मित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात् । प्रयापणीयम्, प्रयापनीयम् । विहितविशेषणं किम्—यका व्यवधाने यथा स्यात्, प्रयाप्यमाणं पश्य । 'णत्वे दुर उपसर्गत्वं न' इत्युक्तम्, दुर्यानम्, दुर्यापनम् । २८३७ **हलश्चेजुपधात्** । (८-४-३१) हलादेरिजुपधा-

---

णत्वे ष्टुत्वेन णत्वमित्यर्थः । तथा च द्विणकारकं रूपम् । **णेर्विभाषा** । 'कृत्यचः' इत्यनुवर्तते । 'रषाभ्यां नो णः' इति च । णेरिति कृतो विहितविशेषणम्, तदाह **उपसर्गस्थादित्यादिना । प्रयापणीयमिति** । याधातोर्णौ पुकि याप इत्य-स्माद् ण्यन्तादनीयरि णेर्लोपे अनेन णत्वविकल्पः । **यकेति** । यापि इत्यस्माद् ण्यन्तात् कर्मणि लटः शानचि 'आने मुक्' इति मुगागमे यकि णिलोपे प्रयाप्यमाण-शब्दे णत्वविकल्प इष्यते । णेः परो यः कृत् तत्स्थस्य नस्य णत्वविकल्प इत्युक्तौ तु कृतः शानचो यका व्यवहितत्वेन णिचः परत्वाभावात् तत्स्थस्य नस्य णत्वविकल्पो न स्यात् । तदर्थं णेरिति विहितविशेषणमाश्रितमित्यर्थः । भाष्ये तु ण्यन्तात्परो यः कृत् इत्यंशेऽप्यट्कुप्वाङ्नुमित्याद्यनुवर्त्य यकारव्यवधानेऽपि णत्वविकल्पः सम-र्थितः । **णत्वे दुर इति** । 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इत्यनेनेति भावः । ततश्च दुर उपसर्गत्वाभावात् ततः परे कृत्स्थनकारे सूत्रद्वयमपि न प्रवर्तते इत्यभिप्रेत्य उदाहरति **दुर्यानं दुर्यापनमिति** । यातेर्ण्यन्ताद् ल्युटि णिलोपे दुर्यापनमिति रूपम् । **हलश्चेजुपधात्** । हलन्तादिति नार्थः, इजुपधस्य हलन्त-त्वाव्यभिचारात् । किंतु हलादेरिति विवक्षितम्, तदाह **हलादेरिजुपधादिति** । परस्येति शेषः । प्रोहणीयमित्यादिप्रत्युदाहरणे तु 'कृत्यचः' इति नित्यमेव णत्वम् ।

विदेः क्तस्य 'रदाभ्याम्–' इति नत्वं पूर्वस्य दस्य च । **प्रयापणीयमिति** । या प्रापणे । णिचि 'अर्तिह्री–' इति पुक् 'णेरनिटि' इति णिलोपः । **प्रयाप्यमाण-मिति** । यातेर्णिचि पुकि ण्यन्तस्य धातुत्वेन वर्तमाने कर्मणि लटि लटः शानच् तस्य शित्त्वेन 'तिङ्शित्–' इति सार्वधातुकत्वे 'सार्वधातुके यक्' इत्यनेन यकि कृते 'णेरनिटि' इति णिलोपे 'आने मुक्' इति मुगागमे णत्वे च सिध्यति रूपम् । विहित-विशेषणाकरणे तु यका व्यवधानेन ण्यन्तात्परत्वाभावान्न सिध्यति । न चाड्व्यवा-येऽपीति भविष्यतीति वाच्यम्, रषाभ्यां परस्य नस्येत्यंशे तस्मादिति निर्दिष्टपरि-भाषया प्रापितस्याव्यवधानस्य रामाणामित्यादिसिद्धये व्यवायेऽपीति योगविभागेन बाधे सति आदर्शेनेत्यादावतिप्रसङ्गे प्राप्ते अट्कुप्वाङित्यंशो नियमार्थः । आङ्ग्रहणं तु पदव्यवायेऽपीति निषेधं बाधितुमिति स्थितम् । 'णेर्विभाषा' इत्यत्र तु ण्यन्तकृतो-रव्यवधानस्यापेक्षा कथमङ्ग्रहणेन निवार्येति भावः । **हलश्च** । इजुपधस्य हलन्तत्वा-

स्कृन्नस्याचः परस्य णो वा स्यात्। प्रकोपणीयम्, प्रकोपनीयम्। हलः किम्—प्रोहणीयम्। इजुपधात् किम्—प्रवपणीयम्। **२८३८ इजादेः सनुमः** (८-४-३२) सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो यः कृत्तत्स्थस्यैव। प्रेङ्खणीयम्। इजादेः किम्—'मगि सर्पणे' प्रमङ्गनीयम्। नुम्ग्रहणमनुस्वारोपलक्षणम्। 'अट्कुप्वाङ्—' (सू २१७) इति सूत्रेऽप्येवम्। तेनेह न—प्रेन्वनम्। इह तु स्यादेव। प्रोम्भणम्। **२८३९ वा निंसनिक्षनिन्दाम्।**

इजादेः। 'णेर्विभाषा' इति निवृत्तम्। 'कृत्यचः' इत्यनुवर्तते, 'हलश्चेजुपधात्' इत्यतो हल इति च। प्रकृतिविशेषणत्वात् तदन्तविधिः। तथा च सुनमो हलन्ताद् इजुपधात् परस्य कृत्स्थस्य णः स्यादिति लभ्यते। एवं च प्रेङ्खणीयमित्यादौ 'कृत्यचः' इत्येव सिद्धेरिदं नियमार्थमित्याह **सनुमश्चेदिति।** कृत्स्थस्यैवेत्यनन्तरं णत्वमिति शेषः। **प्रेङ्खणीयमिति।** इखधातुरिदित्वात्सनुम्। ननु 'इवि प्रीणने' इति धातोर्ल्युटि तस्यानादेशे प्रेन्वनमित्यत्रापि णत्वं स्यात्, सनुमोऽस्य इजादित्वाद्धलन्तत्वाच्चेत्यत आह **नुंग्रहणमित्यादि।** अनुस्वारश्च सर्व एव गृह्यते, न तु नुंस्थानिक एव, अविशेषात्। तदाह **इह त्विति। प्रोम्भणमिति।** इह उम्भधातुः स्वाभाविकानुस्वारवानेव, न तु नुंस्थानिकानुस्वारवानिति भावः। **वा निंस।** 'कृत्यचः' कृतीत्यनुवृत्तम्। अच इति च निवृत्तम्, तदाह

व्यभिचाराद्धल इत्यनेन तदादित्वं लक्ष्यत इत्याह **हलादेरिति। प्रकोपणीयमिति।** कुप क्रोधे। **प्रोहणीयमिति।** ऊह वितर्के। अत्र 'कृत्यचः' इति नित्यमेव णत्वम्। एवं प्रवपणीयमित्यत्रापि। डुवप् बीजसंताने। **इजादेः सनुमः।** 'कृत्यचः' इत्येव सिद्धे नियमार्थमिदमित्याह **सनुमश्चेदित्यादि।** इह हल इत्यनुवृत्तं तदन्तपरं न तु तदादिपरम्। इजादेर्हलादित्वासंभवात्तदाह **हलन्तादिति। विहित इति।** यदि तु विहितविशेषणं न व्याख्यायेत तर्हि नियमार्थता न लभ्येत, णिजन्ताद्विहितस्यापि कृत्स्थनकारस्य णिलोपे कृते हलन्तात्परत्वेन 'णेर्विभाषा' इति विकल्पं बाधितुं विधेः संभवात्। इष्टापत्तौ तु अणिजन्तप्रकृतिकानीयर्प्रत्ययान्तं प्रेङ्खणीयमित्याद्युदाहरणं न स्यात्, किं तु णिजन्तप्रकृतिकमेवोदाहरणं स्यात्। किं च अस्य सूत्रस्य नियमार्थत्वाभावात्प्रमङ्गनीयमित्यत्र 'कृत्यचः' इत्यनेन णत्वं स्यात्, अतो विहितविशेषणमवश्यं स्वीकार्यमिति दिक्। नन्वेवमपि नियमार्थता न लभ्यते, प्रेन्वनमित्यत्र विध्यर्थत्वसंभवात्, नुम्नकारेण व्यवधानात् 'कृत्यचः' इत्यस्याप्राप्तेरित्यत आह **नुम्ग्रहणमिति।** 'अट्कुप्वाङ्—' इति सूत्र इवात्रापि नुमानुस्वारो लक्ष्यत इति विध्यर्थत्वमिह न शङ्कनीयमिति भावः। **प्रोम्भणमिति।** उम्भ

(८-४-३३) एषां नस्य णो वा स्यात्कृति परे । प्रणिंसितव्यम्, प्रनिंसितव्यम् । २८४० न भाभूपूकमिगमिप्यायीवेपाम् । (८-४-३४) एभ्यः कृन्नस्य णो न । प्रभानीयम् । प्रभवनीयम् । 'पूञ एवेह ग्रहणमिष्यते' (वा ५०११) । पूङस्तु प्रपवणीयः सोमः । 'ण्यन्तभादीनामुपसंख्यानम्' (वा ५०१२) । प्रभापनीयम् । 'ख्शाञः शस्य यो वा' (वा १५८४) इत्युक्तं णत्वप्रकरणोपरि तद्बोध्यम् । यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वम् । प्रख्यानीयम् । २८४१ कृत्यल्युटो बहुलम् । (३-३-११३) स्नान्त्यनेन स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः । २८४२ अचो यत् । (३-१-९७) अजन्ताद्धातोर्यत्स्यात् । चेयम् । जेयम् । अज्ग्रहणं शक्यमकर्तुम् । योगविभागोऽप्येवम् । तव्यदादिष्वेव यतोऽपि सुपठत्वात् । २८४३

एषां नस्येति । न भाभू । प्रभानीयमिति । इह 'कृत्यचः' इति प्राप्तं णत्वं नेति भावः । णत्वप्रकरणोपरीति । इदं 'चक्षिङः ख्याञ्' इति सूत्रे भाष्ये स्पष्टम् । प्रख्यानीयमिति । इह यत्वस्यासिद्धतया शकारेण व्यवधानात् 'कृत्यचः' इति णत्वं नेति भावः । कृत्यल्युटो । याभ्यः प्रकृतिभ्यो येष्वर्थेषु विहिताः ततोऽन्यत्रापि स्युरित्यर्थः । स्नानीयमिति । करणे अनीयर् । दानीय इति । संप्रदाने अनीयर् । भाष्ये तु 'कृतो बहुलमिति वक्तव्यम्' इत्युक्त्वा पादाभ्यां ह्रियते पादहारकः । कर्मणि ण्वुल् । श्वोऽग्नीनाधास्यमानेन । अनद्यतने भविष्यति लुडित्युदाहृतम् । अचो यत् । शक्यमकर्तुमिति । 'ऋहलोर्ण्यत्'

पूरण इत्यस्माद्भावे ल्युट् । वा निंस । 'कृत्यचः' इत्यतोऽनुवर्तनादाह कृति पर इति । ण्यन्तभादीनामिति । ण्यन्तस्य प्रकृत्यन्तरत्वादप्राप्ते वचनम् । 'ह्रेरचङि' इति सूत्रे अचङीति पर्युदासेन प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणमिति ज्ञापनादेतत्सिद्धमिति केचिदाहुस्तदसत्, ज्ञापनं तु कुत्वमात्रविषयकमिति भाष्यादौ सिद्धान्तितत्वात् । अचो यत् । धातोरिति वर्तते । अज्ग्रहणं च धातोर्विशेषणं विशेषणेन तदन्तविधिस्तदाह अजन्तादिति । शक्यमकर्तुमिति । अत्र केचिदज्ग्रहणमजन्तभूतपूर्वादपि यथा स्यादित्येवमर्थमपेक्षितम् । तेन दित्स्य धित्स्यमित्यत्र यति कृते 'यतोऽनावः' इत्याद्युदात्तत्वं सिध्यति, ण्यति कृते तु 'तित्स्वरितम्' इति प्रसज्येत । न च दित्स्यं धित्स्यमित्यत्र 'ऋहलोः—' इति ण्यतः प्रसक्तिरेव नास्तीति वाच्यम्, आर्धधातुकविवक्षायामेव अतो लोपे कृते हलन्तत्वेन तत्संभवादित्याहुः । तदापाततः, आर्धधातुके विवक्षिते यद्यतो लोपः स्यात्तदा हीदं संभवेत्, लोपस्तु आर्धधातुके पर एवोचितः । अन्यथा परनिमित्तत्वाभावेन स्थानिवत्त्वाभावे णण्यन्तीत्य-

ईद्यति । (६-४-६५) यति परे आत ईस्स्यात् । गुणः, देयम् । ग्लेयम् । 'तकिशसिचतियतिजनिभ्यो यद्वाच्यः' (वा १६२२) तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जनेर्यद्विधिः स्वरार्थः, ण्यतापि रूपसिद्धेः । न च वृद्धिप्रसङ्गः, 'जनिवध्योश्च' (सू २५१२) इति निषेधात् । 'हनो वा यद्वधश्च वक्तव्यः' (वा १६२३) । वध्यः । पक्षे वक्ष्यमाणो ण्यत्, घात्यः ।

इति अहलन्ताद् विशेष्य ण्यतो विहितत्वेन हलन्तेभ्यो यत्प्रत्ययस्याप्रवृत्तिरित्यर्थः । वासरूपविधिस्तु सत्त्वात्र भवति । **योगविभागोऽप्येवमिति** । कर्तुमशक्य इत्यर्थः । कुत इत्यत आह **तव्यदादिष्वेवेति** । तव्यत्तव्यानीयर्यत इत्येकसूत्रत्वेनैव पठितुं शक्यत्वादित्यर्थः । **ईद्यति । आत इति ।** 'आतो लोप इटि च' इत्यतस्तदनुवृत्तेरिति भावः । **गुण इति** । दाधातोः 'अचो यत्' इति यति आत ईत्वे 'सार्वधातुकार्धधातुकयोः' इति गुण इति भावः । **ग्लेयमिति** । 'ग्लै हर्षक्षये' इति धातोर्यति 'आदेचः–' इत्यात्त्वे ईत्वे गुण इति भावः । **तकिशसीति** । तकि, शसि, चति, यति, जनि एषां पञ्चानां द्वन्द्वः । इका निर्देशः । 'ऋहलोर्ण्यत्' इत्यस्यापवादः । 'तक हसने, शसु हिंसायां, चते याचने, यती प्रयत्ने, जनी प्रादुर्भावे' इति धातवः । अत्र सर्वत्र अकर्मकेभ्यो भावे प्रत्ययः । सकर्मकेभ्यस्तु कर्मण्यपीति विवेकः । ननु 'अर्हे कृत्यतृचश्च' इत्यर्हेऽपि जनेर्ण्यताऽपि जन्यमिति रूपसिद्धेः जनिग्रहणं व्यर्थमित्यत आह **स्वरार्थ इति ।** 'यतोऽनावः' इत्याद्युदात्तार्थ इत्यर्थः । ननु ण्यति उपधावृद्धिः स्यात्, अतस्त-

---

दावुपधावृद्धिप्रसङ्गादिति भावः । **सुपठत्वादिति** । द्वये धातवोऽजन्ता हलन्ताश्च । तत्र हलन्ताण्ण्यतं वक्ष्यतीति परिशेषादजन्तादेव यद्भविष्यतीति भावः । **तकिशसीति** । तक हसने । शसु हिंसायाम् । चते याचने । यत्तु केचिच्छंसीति सानुस्वारं पठन्ति तदुपेक्ष्यम् । 'ईडवन्दवृशंसदुहां ण्यतः' इति सूत्राविरोधेन शंसेर्ण्यत एव स्वीकर्तव्यत्वात् । **हनो वा यदिति** । हन्तेर्वा यत्स्यात्, यत्संनियोगेन वधादेशस्तु नित्य एव । यद्यपि वधमर्हतीति वध्य इति 'शीर्षच्छेदाद्यच्च' इत्यतो यदित्यनुवर्तमाने 'दण्डादिभ्यः–' इति तद्धितेन यतापि सिध्यति तथाप्यसिवध्यो मुसलवध्य इति समासो न सिध्येत् । कृति पुनः 'कर्तृकरणे कृता–' इति सिध्यति । न चासिवधमर्हतीति विग्रहे कृतसमासादेव तद्धितोऽस्त्विति वाच्यम्, दण्डादिषु केवलस्य वधशब्दस्य पाठात्प्रत्ययविधौ तदन्तविधेश्च प्रतिषेधात्स्वरे भेदाच्च । असिवधशब्दाद्यति हि सति 'तित्स्वरितम्' इति स्वरितः प्रसज्येत । कृदन्तेन समासे तु कृदुत्तरपदप्रकृतिस्वरेण वध्यशब्द आद्युदात्तः । अतएव वध्यशब्देन तद्धितान्तेन सह सुप्सुपेति समास

२८४४ पोरदुपधात् । (३-१-९८) पवर्गान्ताददुपधाद्यत्स्यात् । ण्यतोऽपवादः । शप्यम् । लभ्यम् । 'नानुबन्धकृतमसारूप्यम्' । अतो न ण्यत् । तव्यदादयस्तु स्युरेव । **२८४५ आङो यि ।** (७-१-६५) आङः परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते । नुमि कृते अदुपधत्वाभावाद् ण्यदेव ।

दभावार्थमिह जनेर्वृद्धिविधिरस्त्वित्याशङ्क्य निराकरोति **न च वृद्धिप्रसङ्ग इति** । कुत इत्यत आह **जनिवध्योरिति** । **हनो वेति** । हनधातोर्यद्वा स्यात् । प्रकृते-र्वधादेशश्चेत्यर्थः । **पक्षे इति** । यदभावपक्षे इत्यर्थः । **घात्य इति** । ण्यति 'हनस्तोऽचिण्णलोः' इति नस्य तः । कुत्वम् । उपधावृद्धिः । वधादेशस्तु यत्संनियोगशिष्टत्वान्नेति भावः । **पोरदुपधात्** । ननु शप्यं लभ्यमित्यत्र 'ऋहलोर्ण्यत्' इति कदाचिद् ण्यदपि स्यात् । यत्ण्यतोरसारूप्येण 'वाऽसरूप–' इत्यस्य प्रवृत्ते-रित्यत आह **नानुबन्धकृतमसारूप्यमिति** । वाऽसरूपसूत्रे भाष्ये स्थितमिदम् । अनुबन्धविनिर्मुक्तस्यैव असारूप्यं विवक्षितमित्यर्थः । प्रकृते च यत्ण्यतोरनुबन्ध-रहितयोः सारूप्याद् वासरूपविधेरप्रवृत्तेः शप्यमित्यादौ ण्यदपवादे यदेवेति भावः । **आङो यि** । 'इदितो नुम् धातोः' इत्यतो नुमिति 'लभेश्च' इत्यतो लभेरिति चानुवर्तते, तदाह **आङः परस्येति** । **विवक्षिते इति** । यीति विषयसप्तमीति भाष्ये स्पष्टम् । विवक्षिते इत्यस्य प्रयोजनमाह **नुमि कृते इति** । यत्प्रत्यये

इत्यपि न वाच्यम् । अन्तोदात्तत्वप्रसङ्गादिति दिक् । **घात्य इति** । 'हनस्तोऽचिण्णलोः' इति तत्वम्, 'हो हन्तेः–' इति कुत्वम् । **पोरदुपधात्** । पोः किम्, पाक्यम् । अदुपधात्किम्, कोप्यम् । तपरकरणं किम्, आप्लृ व्याप्तौ, आप्यम् । **नानुबन्धेति** । अनुबन्धानामनवयवत्वात् तत्कृतमसारूप्यं नाश्रीयते । एकान्तत्वपक्षेऽपि 'ददातिदधात्योर्विभाषा' इति विभाषाग्रहणाल्लिङ्गान्नाश्रीयते । अन्यथा अनु-बन्धकृतादसारूप्यादेव शविषये णो भविष्यतीति किं तेन विभाषाग्रहणेन । ततश्च पक्षद्वयेऽपि शप्यमित्यादौ ण्यन्न भवतीति भावः । एतच्च ददातीत्यादिसूत्रे विभाषा-ग्रहणमनुबन्धानामनेकान्तत्वपक्षे शविषये णस्याप्राप्तौ विभाषा, एकान्तत्वपक्षे तु प्राप्तविभाषेति पक्षद्वयसाधारणं विभाषाग्रहणं लिङ्गं मनोरमायामेकान्तत्वपक्ष एवोपन्य-स्तमिति तदनुसारेणेहाप्युक्तम् । अनेकान्तत्वपक्षे त्वसाधारणं लिङ्गम् 'उदीचां माङः–' इति सूत्रे माङो ग्रहणम् । मेङ इत्यत्र हि सत्यपि ङकारानुबन्धे तस्यानवयवत्वाद् एजन्तत्वमविहतमिति 'आदेच उपदेशे–' इत्यात्वस्वीकारादिति दिक् । **ण्यदेवेति** । तेन 'तित्स्वरितम्' इति स्वरिते सति आलभ्य इत्यत्र समासान्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण स्वरितान्तत्वमिष्टं सिध्यति, यति तु 'यतोऽनावः' इत्याद्युदा-

आलम्भ्यो गौः । **२८४६ उपात्प्रशंसायाम्।** (७-१-६६) उपलम्भ्यः साधुः। स्तुतौ किम्-उपलब्धुं शक्य उपलभ्यः । **२८४७ शकिसहोश्च ।** (३-१-९९) शक्यम् । सह्यम्। **२८४८ गदमदचरयमश्चानुपसर्गे।** (३-१-१००) गद्यम् । मद्यम् । चर्यम् । 'चरेराङि चागुरौ' (वा ११२५) । आचर्यो देशः, गन्तव्य इत्यर्थः । अगुरौ किम्–आचार्यो गुरुः । यमेर्नियमार्थम्, सोपसर्गान्मा भूदिति । प्रयाम्यम् । निपूर्वात्स्यादेव, 'तेन तत्र न भवेद्विनिय-

---

विवक्षिते तत्प्रवृत्तेः प्रागेव नुमि कृते अदुपधत्वाभावाद्यत्प्रत्ययस्याप्रवृत्तेर्ण्यदेवेत्यर्थः । यति परे नुमित्यर्थे तु अदुपधत्वाद् यदेव स्याद् न तु ण्यदिति भावः । **आलम्भ्यो गौरिति ।** यद्यपि यत्ण्यतोर्न रूपभेदः, तथापि ण्यति कृते तित्स्वरितम्। इति स्वरितत्वम्। यति तु 'यतोऽनावः' इत्याद्युदात्तत्वमिति स्वरभेदः फलम् । **उपात्प्रशंसायाम् ।** उपात्परस्य लभेर्नुम् स्याद् यादौ प्रत्यये विवक्षिते प्रशंसायां गम्यमानायामित्यर्थः । **उपलम्भ्यः साधुरिति** । समीपे प्राप्य इत्यर्थः । साधुशब्दात् प्रशंसा गम्यते । इहापि नुमि कृते अदुपधत्वाभावाद् ण्यदेव, स्वरे विशेषः पूर्ववत् । **शकिसहोश्च ।** पञ्चम्यर्थे षष्ठी। आभ्यां यदित्यर्थः । ण्यतोऽपवादः । **गदमद** । गद, मद, चर, यम् एषां चतुर्णां द्वन्द्वः । अनुपसर्ग इति सप्तमी पञ्चम्यर्थे । एभ्यो ऽनुपसर्गेभ्यो यदित्यर्थः । ण्यतोऽपवादः । उपसर्गाद् ण्यदेव । प्रगाद्यमित्यादि । **चरेराङि चागुराविति** । वार्तिकमिदम् । आङि उपसर्गे सत्यपि चरेर्यत्स्यादगुरौ इत्यर्थः । **आचार्यो गुरुरिति** । शुश्रूषणीय इत्यर्थः । ननु 'पोरदुपधात्' इत्येव सिद्धे यमेरिह ग्रहणं व्यर्थमित्यत आह **यमेर्नियमार्थमिति ।** अनुपसर्गादेव यमेर्यदिति नियमार्थमित्यर्थ । तत्फलमाह **सोपसर्गान्मा भूदिति ।** ननु 'अनियम्यस्य नायुक्तिः' इत्यत्र 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादौ च निपूर्वाद्यमेः कथं

त्त्वेनोत्तरपदाद्युदात्तत्वं प्रसज्येत, तच्चानिष्टमिति भावः । **उपात्प्रशंसायाम् ।** यादौ प्रत्यये विवक्षित उपपूर्वाल्लभेर्नुम् स्यात्प्रशंसायाम् । सा चेह गम्यमानतया विशेषणम् । धात्वर्थस्तु प्राप्तिरेव, तेन यस्य प्राप्तिर्यस्माद्वा प्राप्तिः प्रशंसाहेतुर्भवति तदिहोदाहरणम् । विपरीतं तु प्रत्युदाहरणम् । इहापि यादौ प्रत्यये विवक्षित इत्यर्थान्नुमि कृते ण्यति सत्यन्तस्वरितत्वं भवति । यति तु सत्युत्तरपदाद्युदात्तत्वं स्यात् । प्राचा तु स्वरे विशेषमनालोच्य 'पोरदुपधात्' इति यतमेव स्वीकृत्य यति परे नुमिति व्याख्यातं तदाकरविरोधादुपेक्ष्यमित्याहुः । **गदमद** । व्यत्ययेन पञ्चम्यर्थे सप्तमी । एभ्योऽनुपसर्गेभ्यो यत्स्याद् ण्यतोऽपवादः । अनुपसर्गे किम्, 'न नैषधे कार्यमिदं निगाद्यम' इति श्रीहर्षः । **यमेरिति ।** 'पोरदुपधात्' इत्यनेनैव सिद्धेरिति भावः ।

म्यम्' (वा १९३०) इति वार्तिकप्रयोगात्। एतेन 'अनियम्यस्य नायुक्तिः' 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादि व्याख्यातम्। नियमे साधुरिति वा।

२८४६ अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु । (३-१-१०१) वदेर्नञ्युपपदे 'वदः सुपि-' (सू २८२४) इति यत्क्यपोः प्राप्तयोर्यदेव, सोऽपि गर्हायामेवेत्युभयार्थं निपातनम्। अवद्यं पापम्। गर्ह्ये किम्-अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं च।

'आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥' इति स्मृतेः।

पण्या गौः, व्यवहर्तव्येत्यर्थ। पाण्यमन्यत्। स्तुत्यर्हमित्यर्थः।

यत्। अनुपसर्गादिति निषेधादित्यत आह **निपूर्वात्स्यादेवेति**। यदिति शेषः। कुत इत्यत आह **तेन तत्रेति**। प्रकारान्तरेण समाधत्ते **नियमे साधुरिति वेति**। 'यमः समुपनिविषु च' इति निपूर्वाद्यमेर्भावे अप्प्रत्यये नियमशब्दः। नियमे साधुरित्यर्थे 'तत्र साधुः' इति प्राग्घितीये यत्प्रत्यये नियम्यशब्दो व्युत्पाद्य इत्यर्थः। **अवद्यपण्य**। अवद्य, पण्य, वर्य एषां द्वन्द्वात्प्रथमाबहुवचनम्। गर्ह्य, पणितव्य, अनिरोध एषां द्वन्द्वात्सप्तमीबहुवचनम्। अवद्यादयस्त्रयः क्रमाद् गर्ह्यादिषु त्रिष्वर्थेषु निपात्यन्ते इत्यर्थः। ननु 'वदः सुपि-' इत्येव सिद्धे अवद्यग्रहणं व्यर्थमित्यत आह **नञ्युपपदे इति**। यत्क्यपोः स्वरे विशेषः, संप्रसारणतदभावौ चेति भावः। **अवद्यं पापमिति**। गर्हितत्वादवाच्यमित्यर्थः। **अनुद्यं गुरुनामेति**। अत्र नञि उपपदे 'वदः सुपि' इति क्यपि 'वचिस्वपियजादीनां किति' इति संप्रसारणे रूपम्। वचनानर्हमित्यर्थः। अत्र गर्हाया अप्रतीतेः यदेवेति न नियम इति भावः। ननु गुरुनाम्नः अगर्ह्यत्वात् कथं वचनानर्हत्वमित्यत आह **तद्धि न गर्ह्यं वचनानर्हं चेति**। कुत इत्यत आह **आत्मनामेति**। **पण्या गौरिति**।

नियमे साधुरिति। 'यमः समुपनिविषु च' इति वैकल्पिकेऽप्प्रत्यये कृते 'तत्र साधुः' इति तद्धितो यदित्यर्थः। यद्यप्यस्मिन्पक्षे 'कृत्यानां कर्तरि वा' इत्यस्याप्रवृत्तेः कर्तरि तृतीया दुर्लभा तथापि त्वयेति तेनेति च करणत्वविवक्षया तृतीयेति स्थितस्य गतिर्बोध्या। केवलायतं कृत्वा निशब्देन समास इत्यपरे। यद्वा 'यमोऽपरिवेषणे मित्' इति मतमाश्रित्य 'पर्यवसितं नियमयन्' इत्यादाविव मित्त्वं स्वीकृत्य ण्यन्ताद्यद् बोध्यः। अथ वा संज्ञापूर्वकविधेरनित्यत्वाद् ण्यस्यैव वृद्धिर्न प्रवृत्तेति दिक्। एवं च वार्तिकप्रयोगोऽप्यन्यथासिद्ध इति तद्बलेन निपूर्वाद्यदिति न कल्पनीयमिति भावः। **अनुद्यमिति**। अत्र वदेः क्यबेव भवति, यजादित्वात्संप्रसारणम्, 'नलोपो नञः', 'तस्मान्नुडचि'। **व्यवहर्तव्येति**। यद्यपि पणितव्यशब्दोऽर्थद्वयसाधारणस्तथापि

अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यत् । शतेन वर्या कन्या । वृत्यान्या । २८५० वह्यं करणम् । (३-१-१०२) वहन्त्यनेनेति वह्यं शकटम् । करणं किम्-वाह्यम्, वोढव्यम् । २८५१ अर्यः स्वामिवैश्ययोः । (३-१-१०३) 'ऋ गतौ' अस्माद्यत् । ण्यतोऽपवादः । अर्यः स्वामी वैश्यो वा । अनयोः किम्-आर्यो ब्राह्मणः, प्राप्तव्य इत्यर्थः । २८५२ उपसर्या काल्या प्रजने ।

पणधातोर्व्यवहारार्थकाद् यन्निपात्यते इति भावः । यद्यपि 'पण व्यवहारे स्तुतौ च' इति धातोः अर्थद्वयमस्ति, तथापि पण्यशब्दस्य प्रयोगबलेन व्यवहर्तव्य एव रूढत्वादिह व्यवहारार्थक एव गृह्यते, तदाह **व्यवहर्तव्येति** । क्रेतव्येत्यर्थः । **पाण्यमन्यदिति** । ण्यति उपधावृद्धिरिति भावः । व्यवहर्तव्यादन्यदित्यर्थः, तदाह **स्तुत्यर्हमिति** । **अप्रतिबन्ध इति** । अनियम इत्यर्थः । **वृङो यदिति** । 'वृङ् संभक्तौ' इति क्र्यादिकस्यैवात्र ग्रहणम्, न तु 'वृञ् वरणे' इत्यस्य, अनिरोधरूपार्थस्य संभक्तिवाचित्व एव सामञ्जस्यादिति भावः । **शतेन वर्या कन्येति** । पुरुषशतेन परिग्रहीतुमर्हा, अनेनैव वरणीयेति नियमो नास्तीत्यर्थः । **वृत्या अन्येति** । अनुरूपेण वरणीयेत्यर्थः । 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि तुक् । अत्र अनियमस्य अप्रतीते र्न यत् । अत्र वर्याशब्दस्य स्त्रीलिङ्गस्य ग्रहणात्पुंसि वार्या ऋत्विज इति वृत्तिः । **वह्यं करणम्** । वहेः करणे यद् निपात्यते । ण्यतोऽपवादः । **अर्यः स्वामिवैश्ययोः** । **अस्माद्यदिति** । निपात्यत इति

निपातनस्येह रूढ्यर्थत्वाद्व्यवहर्तव्य एवायं निपात्यते । उक्तं च हरिणा—'धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च । अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्' इति । अनुबन्धविकाराणां नियमस्य च प्राप्त्यर्थमिति पूर्वेणान्वयः । **शतेनेति** । शतशब्दोऽनियतपरः । कन्यायां वरणे वरयितॄणां नियमो नास्तीत्यर्थः । **वर्येति** । संभक्तव्येत्यर्थः । वृङ् संभक्ताविस्यस्येदं निपातनम्, तत्रैवानिरोधरूपस्यार्थस्य संभवादिति भावः । अनिरोधेष्वित्यस्यानुक्तौ वृञोऽपि स्यादिति ध्वनयति **वृत्येति** । 'एतिस्तुशास्-' इत्यादिना वृञः क्यप् । इह सूत्रेऽवद्यादीनि निर्विभक्तिकानि पृथक्पदानि तत्र वर्याशब्दष्टाबन्तोऽनुक्रियते । न त्वयं द्वन्द्वेन असन्तेन निर्देशः । तेन वर्येति स्त्रियमेव निपात्यते । आश्रया तु वृङः 'ऋहलोर्ण्यत्', वार्या ऋत्विजः । ऋत्विजामपि यज्ञमात्रे वरणीयत्वादनिरोधोऽस्ति, क्रीतत्वं तु नास्तीति ण्यदेव भवति । एतच्च वृत्तिकारमतम् । न चात्र 'एतिस्तु-' इति क्यप् शङ्क्यः । तत्र वृञ एव ग्रहणं न तु वृङ इति सिद्धान्तात् । भट्टिस्तु द्वन्द्वाज्जसा निर्देश इति मत्वा पुंल्लिङ्गेऽपि यतं प्रायुङ्क्त 'सुग्रीवो मम वर्योऽसौ' इति । **वाह्यमिति** । वहनकर्मेत्यर्थः । **उपसर्या** । उप-

(३-१-१०४) गर्भग्रहणे प्राप्तकाला चेदित्यर्थः। उपसर्या गौः। गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः। प्रजने काल्या इति किम्-उपसार्या काशी। प्राप्तव्येत्यर्थः। २८५३ **अजर्यं संगतम्** । (३-१-१०५) नञ्पूर्वाज्जीर्यतेः कर्तरि यत् संगतं चेद्विशेष्यम्। न जीर्यतीत्यजर्यम्। 'तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्' इति भट्टिः। 'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध, इत्यत्र तु संगतमिति विशेष्यमध्याहार्यम्। संगतं किम्-अजरिता कम्बलः। भावे तु संगतकर्तृकेऽपि ण्यदेव। अजार्यं संगतेन। २८५४ **वदः सुपि क्यप् च** । (३-१-१०६) उत्तरसूत्रादिह भाव इत्यपकृष्यते। वदेर्भावे क्यप् स्याच्चाद्यद्-

---

शेषः। **ण्यतोऽपवाद इति**। 'ऋहलोः-' इति प्राप्तस्य ण्यतोऽपवाद इत्यर्थः। यति ऋकारस्य गुणे रपरत्वम्, तदाह **अर्यः स्वामीति**। **आर्यो ब्राह्मण इति**। ण्यति वृद्धौ रपरत्वमिति भावः। **उपसर्या**। प्रजननं प्रजनो गर्भग्रहणम्, भावे घञ्, 'जनिवध्योश्च' इति वृद्धिनिषेधः। कालः प्राप्तोऽस्याः काल्या, 'तदस्य प्राप्तम्-' इत्यनुवर्तमाने 'कालाद्यत्' इति यत्। चेदित्यध्याहार्यम्, तदाह **गर्भग्रहणे प्राप्तकाला चेदिति**। गर्भग्रहणे प्राप्तकाला स्त्रीपशुव्यक्तिः विवक्षिता चेद् उपसर्या इति निपात्यते। उपपूर्वात् सृधातोः यदिति फलितम्। ण्यतोऽपवादः। **अजर्यम्**। **कर्तरि यदिति**। 'कर्तरीति वक्तव्यम्' इति वार्तिकम्। निपातनात् कर्तरीति लभ्यत इति तदाशयः। **संगतमिति**। संगतं संगमः। **न जीर्यतीत्यजर्यमिति**। मित्रत्वमिति शेषः। जरितृ न भवतीत्यर्थः। अत्र भट्टिप्रयोगमाह **तेनेति**। हे राम तेन आर्येण अजर्यम् अनश्वरं संगतं संगमं द्रुतं कुरु इत्यन्वयः। ननु 'मृगैरजर्यं जरसा' इत्यत्र संगतशब्दाभावात् कथं यदित्यत आह **मृगैरित्यादि**। कालिदासकाव्यमिदम्। **अजरितेति**। तृजन्तम्। अत्र संगतशब्दाभावान्न यदिति भावः। **भावे त्विति**। भावस्य संगतकर्तृकत्वेपि संगतस्य प्रत्ययवाच्यत्वाभावाद् न यदित्यर्थः। **वदः सुपि**।

पूर्वात्सरतेः सर्तेर्वा यन्निपात्यते। कालः प्राप्तोऽस्याः काल्या। 'तदस्य प्राप्तम्' इति वर्तमाने 'कालाद्यत्' इति यत्। प्रजननं प्रजनो गर्भग्रहणम्। भावे घञ् 'जनिवध्योश्च' इति वृद्धिनिषेधः। **उपसार्येति**। कर्मणि ण्यत्। **कर्तरि यदिति**। 'तयोरेव-' इति भावे प्राप्ते कर्तरि यन्निपात्यत इति भावः। **संगतं चेदिति**। नपुंसके भावे क्तः। **विशेष्यमिति**। इहाजर्यमिति समुदायस्य संगतं वाच्यमित्यर्थो न ग्राह्यः, पर्यायाणां युगपत्प्रयोगासंभवेनाजर्यं सतां संगतमिति प्रयोगानापत्तेः। तेन संगतमिति भट्टिप्रयोगानुपपत्तेश्च। **वदः**। सकर्मकत्वाद्भावे कृत्यप्रत्ययो दुर्लभः 'लः कर्मणि-' इति सूत्र इव 'तयोरेव-' इत्यत्रापि सकर्मकेभ्यः कर्मणि अकर्मकेभ्य एव

नुपसर्गे सुप्युपपदे । ब्रह्मोद्यम्, ब्रह्मवद्यम् । ब्रह्म वेदः, तस्य वदनमित्यर्थः । कर्मणि प्रत्ययाविमावित्येके । उपसर्गे तु ण्यदेव । अनुवाद्यम् । अपवाद्यम् । २८५५ भुवो भावे । (३-१-१०७) क्यप्स्यात् । ब्रह्मणो भावो ब्रह्मभूयम् । सुपीत्येव, भव्यम् । अनुपसर्गे इत्येव, प्रभव्यम् । २८५६ हनस्त च । (३-१-१०८) अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यात्तकारश्चान्तादेशः । ब्रह्मणो हननं ब्रह्महत्या । स्त्रीत्वं लोकात् । २८५७ एतिस्तुशास्वृदृजुषः क्यप् । (३-१-१०९) एभ्यः क्यप्स्यात् । २८५८ ह्रस्वस्य पिति कृति तुक् । (६-१-७१) इत्यः । स्तुत्यः । 'शास इदङ्हलोः' (सू २४८६) । शिष्यः । वृ इति वृञो ग्रहणं न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः ।

उत्तरेति । 'भुवो भावे' इत्युत्तरसूत्राद्भावे इत्यपकृष्यते इत्यर्थः । भूधातोरकर्मकत्वेन उत्तरसूत्रे भावग्रहणस्य वैयर्थ्यादिति भावः । अनुपसर्गे इति । 'वदः सुप्यनुपसर्ग-ग्रहणम्' इति भाष्यादिति भावः । ब्रह्मोद्यमिति । वदेः क्यपि 'वचिस्वपि-' इति संप्रसारणम् । वस्तुतस्तु नेह भावग्रहणमपकृष्यते । तत्र भावग्रहणमुत्तरार्थमिति भाष्यादिति मतमनुसृत्याह कर्मणि प्रत्ययावित्येके इति । क्यब्यतावित्यर्थः । भुवो भावे । ब्रह्मभूयमिति । कित्त्वान्न गुणः । क्लीबत्वं लोकात् । भव्यमिति । भाव इत्यर्थः । अत्र सुबुपपदत्वाभावाद् यदेव, गुणः, 'वान्तो यि-' इत्यवादेशः । प्रभव्य-मिति । प्रभाव इत्यर्थः । हनस्त च । अन्तादेश इति । प्रकृतेरिति शेषः । भावे किम् ? घात्यो वृषलः । अनुपसर्गे किम् ? प्रघातः । निरुपपदं हत्येति तु असाध्वेव । एतिस्तु । एति, स्तु, शास्, वृ, दृ, जुष् एषां षण्णां समाहारद्वन्द्वात्पञ्चमी । सुप्यनुपसर्गे भाव इति निवृत्तम्, तदाह एभ्यः क्यप्स्यादिति । ह्रस्वस्य । स्पष्टमिति न व्याख्यातम् । इत्य इति । इणः क्यपि तुक् । उपेयमित्यत्र तु ईङो दैवादिकाद्यत् । वृञो

भावे इति सिद्धान्तात् । अत आह भाव इत्याकृष्यत इति । 'भुवो भावे' इत्य-त्रानुपसर्ग इत्यनुवर्तनाद् निरुपसर्गस्य भवतेरकर्मकत्वात् 'तयोरेव कृत्य-' इति भावे कृत्यप्रत्ययसिद्धौ भावग्रहणस्य वैयर्थ्यशङ्कायां भावग्रहणमुत्तरार्थमिति भाष्ये स्थितं तद्भाष्यस्वारस्यग्राहिणां मतमाह कर्मणीति । अनुपसर्ग इति । सुपि किम्, 'हनस्तो चिण्णलोः' । घातः । अनुपसर्गे किम्, प्रघातः, भावे घञ् । एतिस्तु । एभ्य इति सुप्यनुपसर्गे भावे इति च निवृत्तमिति भावः । एतीतीण एव ग्रहणं नेङिकोः । तयोरधिपूर्वयोरेव ग्रहणादेतीति निर्देशानुपपत्तेः । तथा च रक्षार्थं वेदाना-मध्येयं व्याकरणमिति भाष्ये यदेव प्रयुक्तः । केचित्तु 'इणवदिक इति वक्तव्यम्' इति वचनादिकोऽपि भवतीत्यधीत्यामातेत्युदाहरन्ति । इत्य इति । कथं तर्हि उपेयमिति

आस्त्यः। जुष्यः। पुनः क्यब्ग्रहणमिह परस्यापि ण्यतो बाधनार्थं। अवश्यस्तुत्यः। 'शंसिदुहिगुहिभ्यो वा' (वा १८३५) इति काशिका। शस्यम्, शंस्यम्। दुह्यम्, दोह्यम्। गुह्यम्, गोह्यम्। 'प्रशस्यस्य श्रः' (सू २००६) 'ईडवन्दवृशंसदुहां ण्यतः' (सू ३७०२) इति सूत्रद्वयबलाच्छंसेः सिद्धम्। इतरयोस्तु मूलं मृग्यम्। 'आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्' (वा १६२५)। अञ्जू व्यक्तिम्रक्षणादिषु, बाहुलकात्करणे क्यप्, 'अनिदिताम्—' (सू ४१५) इति नलोपः, आज्यम्। २८५६ ऋदुपधाच्चाक्लृपिचृतेः (३-१-११०)

ग्रहणमिति। वार्तिकमिदम्। न वृङ इति। 'वृङ् संभक्तौ' इति ङितः क्रैयादिकस्य न ग्रहणमित्यर्थः। वार्या ऋत्विज इति। अवश्यं भजनीया इत्यर्थः। अत्र 'वृङ् संभक्तौ' इत्यस्माद् ण्यदित्यर्थः। अवश्यपण्यवर्या इति निपातनसिद्धो यत्तु न, अत्र निरोधस्य नियमस्य विवक्षितत्वात्। ननु 'वदः सुपि–' इत्यतः अनुवृत्त्यैव सिद्धे क्यब्ग्रहणमिह व्यर्थम्। न च चकारानुकृष्टयतोऽप्यनुवृत्तिनिवृत्तये क्यब्ग्रहणमिति वाच्यम्, चकारस्य अस्वरितत्वेन 'भुवो भावे' इत्याद्युत्तरसूत्रेष्वनुवृत्त्यभावादित्यत आह क्यब्ग्रहणमिह परस्यापीति। 'ओरावश्यके' इति विहितस्येत्यर्थः। वेति काशिकेति। वा क्यप्। तदभावे हलन्तत्वाद् ण्यत्। भाष्ये त्वेतन्न दृश्यते इति भावः। शस्यम्, शंस्यमिति। क्यप्पक्षे 'अनिदिताम्–' इति नलोपः। दुह्यमिति। क्यप्पक्षे कित्वान्न गुणः। अत्र शंसिदुहिगुहिभ्यो वा' इत्यस्य भाष्ये अदर्शनेऽपि शंसेरर्थतृक्यपौ प्रामाणिकावित्याह प्रशस्यस्येति। 'प्रशस्यस्य श्रः' इति निर्देशबलात् शंसेः क्यप्सिद्धः। 'ईडवन्दवृशंसदुहां ण्यतः' इत्याद्युदात्तत्वविधौ शंसेर्ण्यदन्तत्वानुवादबलाद् ण्यत्सिद्धः। ततश्च शस्यं शंस्यमिति रूपद्वयं सिद्धम्। इतरयोस्तु दुहिगुह्योः क्यब्विकल्पे मूलं नास्तीत्यर्थः। उपसंख्यान-

ईङ् गताविति दैवादिकाण्ण्यत्। न वृङ इति। 'ईडवन्द–' इति ज्ञापकात् तत्र हि ईडवन्दिभ्यां साहचर्यादात्मनेपदिनो वृङ एव ग्रहणमिति भावः। परस्यापीति। 'ओरावश्यके' इति प्राप्तस्य ण्यस्यावकाशोऽवश्यलाव्यमिति आवश्यकविवक्षायां स्तुत्य इत्यादौ क्यपोऽवकाशः अवश्यस्तुत्य इत्यादावुभयप्राप्तौ 'विप्रतिषेधे परम्–' इति ण्यत्स्यात् तन्माभूदिति पुनः क्यब्ग्रहणमिति भावः। आङ्पूर्वादञ्जेरिति। ननु ण्यत्येव नलोपः कस्मान्नोक्त इति चेन्न। कुत्वप्रसङ्गात्तित्स्वरप्रसङ्गाच्च। तस्मात्क्यबन्त एवाज्यशब्दः। नन्वेवमवग्रहः प्राप्नोति। न चेष्टापत्तिः, 'आज्यं किमासीत्' इत्यादौ पदकारैस्तदकरणादिति चेत्। अत्र भाष्यम्—न लक्षणेन पदकारा अनुवर्त्याः पदकारैस्तु लक्षणमनुवर्त्यमिति। सत्यपि अवान्तरपदत्वे 'ऋत्विजम्', 'पूर्वेभिः' इत्या-

वृत् वृत्यम्। वृध् वृध्यम्। क्लृपिचृत्योस्तु कल्प्यम्, चर्त्यम्। तपरकरणं किम्—कृत् कीर्त्यम्। अनित्यण्यन्ताश्चुरादय इति णिजभावे क्यप्। णिजन्तात्तु यदेव। २८६० ई च खनः। (३-१-१११) चात्क्यप्। आद्गुणः ६६। खेयम्। इ चेति ह्रस्वः सुपठः। २८६१ भृञोऽसंज्ञायाम्। (३-१-११२)

मिति। क्यप इति शेषः। आज्यमिति। न चाङ्पूर्वकत्वे पदपाठे अवग्रहः स्यादिति वाच्यम्, इष्टापत्तेः। पदकाराणामवग्रहाभावस्त्वप्रामाणिक एव। पदपाठस्याधुनिकत्वाद् इति भाष्ये स्पष्टम्। एवं च अस्मद्रियगित्यस्य द्रियगित्यवग्रहः अप्रामाणिक एव। अस्मद्रि अक् इत्येवावग्रहो युक्तः, अस्मच्छब्दस्य टेरद्र्यादेशविधानाद् इत्याद्यूह्यम्। ऋदुपधाच्चाक्लृपिचृतेः। क्लृप्चृती वर्जयित्वा ऋदुपधाद्धातोः क्यबित्यर्थः। ननु तपरकरणमिह व्यर्थमित्यत आह अनित्यण्यन्ता इति। णिजन्तात्तु यदेवेति। 'अचो यत्' इत्यनेनेति भावः। ई च खनः। चात् क्यबिति। खनेः क्यप् स्यात् प्रकृतेः ईकारोऽन्तादेशश्चेत्यर्थः। ह्रस्वः सुपठ इति। ह्रस्वस्य इकारस्य आद्गुणेन खेयमिति सिद्धेरिति भावः।

दाविव संप्रदायानुरोधेन क्वचिदवग्रहो न क्रियते इत्यादि तदाशयः। क्लृपिचृत्योस्त्विति। कृपू सामर्थ्ये। चृती हिंसाग्रन्थनयोः। कल्प्यमिति। कृपेर्लत्वस्यासिद्धत्वाद् ऋलृवर्णयोः सावर्ण्यविधानाच्च ऋदुपधत्वम्। ह्रस्वः सुपठ इति। दीर्घं पठतः सूत्रकृतस्त्वयमाशयः—दीर्घनिर्देश इ इ इति प्रश्लेषार्थस्तत्र द्वितीय इकारो 'ये विभाषा' इत्यात्वबाधनार्थः। अन्यथा 'ये विभाषा' इत्यस्यावकाशः, खायते। खन्यते। इत्वस्यावकाशो यस्मिन् पक्षे आत्वं नास्ति। आत्वपक्षे तु उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्याद् 'ये विभाषा' इत्यत्र हि ये इति विषयसप्तमी। तथा च यकारादौ बुद्धिस्थे एव प्राप्तमात्वमन्तरङ्गम्। ईकारस्तु क्यपा सह विधानाद् बहिरङ्गः। तथा चान्तरङ्गस्यात्वस्य बाधनाय प्रश्लेषेण द्वितीय इकारविधिरावश्यक इति ई चेति दीर्घोच्चारणं कृतमिति। दीर्घं प्रत्याचक्षाणस्य भाष्यकृतस्त्वयमाशयः। इत्वमन्तरङ्गं परनिमित्तमनपेक्ष्य विधानात्, क्यप्संनियोगशिष्टं हि तद्। आत्वं तु बहिरङ्गं ये इति परसप्तम्याश्रयणात्। एवं च इत्वेनात्वबाधो न्याय्य एवेति दीर्घो न पठनीयः। ह्रस्वपाठे मात्रालाघवमस्तीति तदनुरोधेन ये इति परसप्तम्याश्रयणमपि युक्तमिति। स्यादेतत्—इ चेति ह्रस्वादेशाभ्युपगमे तस्यादेशस्य पूर्वेण सह आद्गुणे तस्यासिद्धतया 'ह्रस्वस्य पिति—' इति तुक् स्यात्, 'षत्वतुकोरसिद्धः' इति षत्वे तुकि च कर्तव्ये एकादेशशास्त्रस्यासिद्धत्वस्वीकारात्। अतो दीर्घ एव विधेय इति चेत्। मैवम्। पदान्तपदाद्योरादेशोऽसिद्धो न त्वन्योऽपीति सिद्धान्तात्। अन्यथा वृक्षे छत्रमित्यत्र कथाद्-

भृत्याः कर्मकराः। भर्तव्या इत्यर्थः। क्रियाशब्दोऽयं न तु संज्ञा। समश्च बहुलम्। संभृत्याः। संभार्याः। असंज्ञायामेव विकल्पार्थमिदं वार्तिकम्। असंज्ञायां किम्-भार्या नाम क्षत्रियाः। अथ कथं भार्या वधूरिति। इह हि 'संज्ञायां समज-' (सू ३२७६) इति क्यपा भाव्यम्। संज्ञापर्युदासस्तु पुंसि चरितार्थः। सत्यम्। बिभर्तेर्भृ इति दीर्घान्तात् क्र्यादेर्वा ण्यत्। क्यप् तु भरतेरेव। 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषया २८६२ मृजेर्विभाषा। (३-१-११३) मृजेः क्यब्वा स्यात्। पक्षे ण्यत्। मृज्यः। २८६३ चजोः कु घिण्ण्यतोः।

भृञोऽसंज्ञायाम्। क्यबिति शेषः। भृत्याः कर्मकरा इति। भृत्यर्थं कर्म कुर्वाणा इत्यर्थः। 'कर्मणि भृतौ' इति कृत्स्थः। भर्तव्या इति। वेतनदानेन परार्थे कर्मणि प्रेषयितव्या इत्यर्थः। ननु भृत्यशब्दस्य कर्मकरेषु रूढत्वात्संज्ञाशब्दत्वमेवेत्यत आह क्रियाशब्द इति। भार्या नाम क्षत्रिया इति। क्षत्रियविशेषेषु रूढः संज्ञाशब्दोऽयमिति भावः। अथ कथं भार्येति। क्यपा भवितव्यमित्याक्षेपः। ननु वध्वां भार्याशब्दस्य संज्ञाशब्दत्वाद् 'भृञोऽसंज्ञायाम्' इत्यस्याप्रवृत्तेरयमाक्षेपोऽनुपपन्न इत्यत आह इह हीति। 'स्त्रियां क्तिन्' इत्यतः स्त्रियामित्यनुवृत्तौ 'व्रजयजोर्भावे क्यप्।' 'संज्ञायां समजनिषद-' इति सूत्रेण क्यप् स्यादित्यर्थः। ननु संज्ञायां भृञः क्यब्विधौ 'भृञोऽसंज्ञायाम्' इत्यत्र असंज्ञायामिति व्यर्थमित्यत आह संज्ञापर्युदासस्त्विति। समाधत्ते सत्यमिति। 'डु भृञ् धारणपोषणयोः' इति जुहोत्यादौ ह्रस्वान्तो ड्वित् ञिच्च। 'भृ भर्त्सने, भरणेऽपि' इति क्र्यादौ दीर्घान्तः। आभ्याम् 'ऋहलोर्ण्यत्' इति ण्यदेवेत्यर्थः। क्यप् तु भरतेरेवेति। 'भृञ् भरणे' इति भ्वादौ ह्रस्वान्तो ञित्। अस्यैव 'संज्ञायां समजनिषद-' इत्यत्र 'भृञोऽसंज्ञायाम्' इत्यत्र च भृञ्ग्रहणेन ग्रहणम्। न तु डुभृञो जौहोत्यादिकस्य। न च क्रैयादिकस्य निरनुबन्धकस्य दीर्घान्तस्येति भावः, कुत इत्यत आह तदनुबन्धकेति। 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषयेत्यर्थः। बिभर्तेः क्यबभावे बीजमिदम्। क्रैयादिकस्य दीर्घान्तत्वाद् न क्यब् इति बोध्यम्। मृजेर्विभाषा।

गुणस्यासिद्धतया छे चेति ह्रस्वाश्रयो नित्यस्तुक् स्यात्। इष्यते तु दीर्घात्पदान्ताद्वेति वैकल्पिक इति दिक्। 'भृञोऽसंज्ञायाम्' इत्यसंज्ञाग्रहणसामर्थ्याद्भार्येत्यत्र सूत्रान्तरेणापि क्यब् न भविष्यतीत्यत आह पुंसि चरितार्थ इति। भार्या नाम क्षत्रिया इत्यत्रेत्यर्थः। तदनुबन्धेति। डुभृञ् इत्यनेकानुबन्धत्वाद् बिभर्तेः क्यपोऽप्रसङ्ग इति भावः। मृजेर्विभाषा। ऋदुपधत्वान्नित्यं क्यपि प्राप्तेऽयमारम्भः। चजोः।

(७-३-५२) चस्य जस्य च कुत्वं स्याद् घिति ण्यति च प्रत्यये परे। ['निष्ठायामनिट इति वक्तव्यम्' (वा ४९९१) । तेनेह न। गर्ज्यम्]। 'मृजेर्वृद्धिः' (सू २४७३)। मार्ग्यः। **२८९४ न्यङ्क्वादीनां च।** (७-३-५३) कुत्वं स्यात्। न्यङ्कुः। 'नावञ्चेः' (उ सू १७) इत्युप्रत्ययः। **२८९५ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।** (३-१-११४) एते सप्त क्यबन्ता निपात्यन्ते। राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः। यद्वा लतात्मकः सोमो राजा स सूयते कण्ड्यतेऽत्रेत्यधिकरणे क्यन्निपातनाद्दीर्घः। राजसूयः, राजसूयम्। अर्धर्चादिः सरत्याकाशे सूर्यः। कर्तरि क्यन्निपातनादुत्वम्। यद्वा 'षू प्रेरणे' तुदादिः। सुवति कर्मणि लोकं प्रेरयति क्यपो रुट्। मृषोपपदाद्वदेः कर्मणि नित्यं क्यप्। मृषोद्यम्। विशेष्यनिघ्नोऽयम्। 'उरुच्छाय-सौन्दर्यगुणा मृषोद्याः'। रोचतेः रुच्यः। गुपेरादेः कत्वं च संज्ञायाम्।

क्यप्पक्षे उदाहरति **मृज्य इति**। कित्त्वान्न गुणः। **चजोः कु घिण्ण्यतोः**। कु इत्यविभक्तिको निर्देशः। चजोर्घिण्ण्यतोश्च यथासंख्यं तु न, 'तेन रक्तं रागात्' इति घञि जस्य कुत्वनिर्देशात्। **राजसूय। राज्ञेति।** क्षत्रियेणेत्यर्थः। **अभिषवेति।** ग्रावभी रसनिष्पत्त्यर्थं सोमलतानां कुट्टनमभिषवः, तत्प्रणाडिकया निष्पादयितव्यो यज्ञविशेषो राजसूय इत्यन्वयः। **यद्वेति।** लताविशेषात्मकः सोमः राजशब्देन विवक्षितः, राजानं क्रीणातीत्यादौ तथा प्रसिद्धेः। स राजा सूयते अभिषूयते अत्र यज्ञविशेषे इति व्युत्पत्त्या राजसूय इत्यन्वयः। 'कर्तरि कृत्' इत्यधिकारात् कथमधिकरणव्युत्पत्तिरित्यत आह **अधिकरणे क्यबिति।** कुत इत्यत आह **निपातनादिति।** ननु षुञ्धातोः क्यपि कथं दीर्घः। 'अकृत्सार्वधातुकयोः—' इत्यस्य कृत्यप्रवृत्तेरित्यत आह **निपातनाद्दीर्घ इति।** निपातनादित्युभयत्रान्वेति। **उत्वमिति।** तस्य रपरत्वे 'हलि च' इति दीर्घ इत्यपि बोध्यम्। **मृषोद्यमिति।** क्यपि 'वचिस्वपि—' इति संप्रसारणम्। **रोचतेरिति।** रुचधातोः क्यपि रुच्य

यथासंख्यं नेह विवक्षितं 'तेन रक्तं रागात्' इति लिङ्गादिति कैयटहरदत्तादिभिरुक्तं तदालोच्याह **चस्य जस्य चेत्यादि।** घिति ण्यति च चस्य कुत्वं घिति ण्यति च जस्य कुत्वमिति विवेकः। **न्यङ्कुरिति।** 'कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः' इत्यमरः। **राजसूय। यद्वेति।** राजानं क्रीणन्ति इत्यादौ तथादर्शनादिति भावः। षुञ् अभिषव इत्यस्य ह्रस्वान्तत्वादाह **निपातनाद्दीर्घ इति।** निपातनं च रूढ्यर्थमपि। तेनाद्यपक्षे अश्वमेधादौ द्वितीयपक्षे ज्योतिष्टोमादौ च नातिप्रसङ्गः। **उत्वमिति।** तस्य रपरत्वाद् 'हलि च' इति दीर्घ इति भावः। **नित्यं क्यबिति।**

सुवर्णरजतभिन्नं धनं कुप्यम्। गोप्यमन्यत्। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः कर्मकर्तरि। शुद्धे तु कर्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः। २८६६ भिद्योद्ध्यौ नदे। (३-१-११५) भिदेरुज्झेश्च क्यप्। उज्झेर्धत्वं च। भिनत्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। नदे किम्-भेत्ता। उज्झिता। २८६७ पुष्यसिध्यौ नक्षत्रे। (३-१-११६) अधिकरणे क्यप्निपात्यते। पुष्यन्त्यस्मिन्नर्थाः पुष्यः। सिध्यन्त्यस्मिन्सिध्यः। २८६८ विपूयविनीयजित्या मुञ्जकल्कहलिषु। (३-१-११७) पूङ्नीजिभ्यः क्यप्। विपूयो मुञ्जः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्कः। पिष्ट ओषधिविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। बलेन क्रष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठं हलिः। अन्यत्तु विपव्यम् विनेयम् जेयम्। २८६९ प्रत्यपिभ्यां ग्रहेः। (३-१-११८) 'छन्दसीति वक्तव्यम्' (वा १९४४)। प्रतिगृह्यम्।

इति रूपमित्यर्थः। **गुपेरिति**। गुप्धातोः क्यप् प्रकृतेरादिवर्णस्य ककारश्च संज्ञायां निपात्यते इत्यर्थः। सुवर्णरजतभिन्नं धनं कुप्यमिति ज्ञेयम्। तथा च 'हेमरूपे कृताकृते' इत्युक्त्वा अमर आह 'ताभ्यां यदन्यत्तत्कुप्यम्' इति। **कृष्ट इति**। कृष्टप्रदेशे ये स्वयं पच्यन्ते फलन्ति ते कृष्टपच्या इत्यर्थः। **कर्मकर्तरीति**। अत्र कर्मकर्तरि क्यबित्यर्थः। निपातनादिति भावः। **शुद्धे त्विति**। मुख्यकर्मणि तु ण्यति उपधावृद्धौ 'चजोः' इति कुत्वे कृष्टपाक्य इति रूपमित्यर्थः। **न व्यथते अव्यथ्य इति**। अत्र निपातनात् कर्तरि क्यबिति भावः। **भिद्योद्ध्यौ नदे। क्यबिति**। नदविशेषे कर्तरि निपात्यते इति शेषः। **पुष्यसिध्यौ**। निपात्येते इति शेषः, नक्षत्रविशेष गम्ये इत्यर्थः। **विपूय**। विपूय, विनीय, जित्य एते यथाक्रमं मुञ्जकल्कहलिषु क्यबन्ता निपात्यन्ते। तदाह **पूङित्यादिना**। न्यादिसाहचर्यात् औवादिकस्यैव पूधातोर्ग्रहणमिति भावः। कल्कः शोधकद्रव्यम्। **पापमिति वेति**। कल्कशब्दस्य शोधनीये पापे-

---

तेन 'वदः सुपि क्यप् च' इति यत्प्रत्ययो नेति भावः। **भिद्योद्ध्यौ। क्यबिति**। कर्तरीति शेषः। **उद्ध्य इति**। 'तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम्' इति रघुः। **पुष्यसिध्यौ**। नक्षत्रे किम्, पोषणं सेधनम्। अधिकरणे ल्युट्। पुष्यसिध्ययोः पर्यायत्वेऽपि स्वरूपपरत्वात्सूत्रे द्वन्द्वः। 'पुष्ये तु सिध्यतिष्यौ' इत्यमरः। **पापमिति वेति**। 'तपो न कल्कोऽध्ययनं न कल्कः' इत्युपक्रम्य 'तान्येव भावोपहतानि कल्कः' इति भारते दर्शनात् 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि' इति कोशाच्चेति भावः। **वक्तव्यमिति**। वृत्तिकृता तु सूत्रे प्रक्षिप्तम्। क्यप

अपिगृह्यम्। लोके तु प्रतिग्राह्यम् अपिग्राह्यम्। २८७० **पदास्वैरिबाह्यापक्ष्येषु च** (३-१-११९) अवगृह्यं प्रगृह्यं वा पदम्। अस्वैरी परतन्त्रः। गृह्यकाः शुकाः। पञ्जरादिबन्धनेन परतन्त्रीकृता इत्यर्थः। बाह्यायाम्-ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशात्पुंनपुंसकयोर्न। पक्षे भवः पक्ष्यः। दिगादित्वाद्यत्। आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः। २८७१ **विभाषा कृवृषोः।** (३-१-१२०) क्यप्स्यात्। कृत्यम्। वृष्यम्। पक्षे—२८७२ **ऋहलोर्ण्यत्।** (३-१-१२४) ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात्। कार्यम्। वर्ष्यम्। २८७३ **युग्यं च पत्रे।** (३-१-१२१) पत्रं वाहनम्। युग्यो गौः। अत्र क्यप्कुत्वं च निपात्यते। २८७४ **अमावस्यदन्यतरस्याम्।**

ऽपि प्रसिद्धत्वादिति भावः। हलिशब्दस्य विवरणम् **कृष्टसमीकरणार्थमिति।** **प्रत्यपिभ्यां ग्रहेः। छन्दसीति।** वार्तिकमिदम्। वृत्तिकृता तु सूत्रे प्रक्षिप्तम्। ननु छान्दसस्य किमर्थमिहोपन्यास इत्यत आह **लोके त्विति। पदास्वैरिबाह्यापक्ष्येषु च।** पद, अस्वैरि, बाह्या, पक्ष्य एष्वर्थेषु ग्रहेः क्यबित्यर्थः। **अवगृह्यं प्रगृह्यं वा पदमिति।** समस्तपदस्य अवान्तरपदविच्छेदः अवग्रहः। 'अप्रावेत्यादिपदमितिशिरस्कं प्रग्रहः' इति प्रातिशाख्ये प्रसिद्धम्। 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रोदाहरणं च प्रगृह्यम्। **विभाषा कृवृषोः।** पञ्चम्यर्थे षष्ठी। कृञः ऋदन्तत्वाद् नित्यं ण्यति प्राप्ते, वृषेः ऋदुपधत्वाद् नित्यं क्यपि प्राप्ते च, क्यब्विकल्पोऽयम्। **पक्षे इति।** क्यबभावपक्षे विशेषो वक्ष्यते इत्यर्थः। **ऋहलोर्ण्यत्।** पञ्चम्यर्थे षष्ठी। तदाह **ऋवर्णान्तादिति। युग्यं च**

उदाहरणं तु छन्दस्येव। मतान्तरे न प्रतिगृह्यं तस्मान्नापि गृह्यम् **लोके त्विति।** ण्यदेवेति भावः। **पदास्वैरि।** एष्वर्थेषु ग्रहेः क्यप् स्यात्। **अवगृह्यमिति।** यस्य पदस्यावग्रहः क्रियते तत्पदम्। अवग्रहः विच्छेदः। अवान्तरपदसंज्ञां सूचयितुं पदपाठकाले किंचित्कालमवसानम्। **प्रगृह्यमिति।** यस्य प्रग्रहस्तत्पदम्। प्रग्रहस्तु प्रकृतिभावापरपर्यायभावे परस्परमचोरसंनिकर्षः। यस्य प्रगृह्यसंज्ञा विहिता तत्प्रगृह्यमिति वृत्तिः। यद्यपि पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा न तु पदस्य तथाप्यवयवधर्मस्य समुदाये उपचारो बोध्यः। अवगृह्यप्रगृह्यशब्दौ प्रातिशाख्यादिषु पदविशेषपरतया निरूढौ। **अस्वैरीति।** स्वेन ईरितुं शीलमस्य स्वैरी स्वतन्त्रः। 'स्वादीरेरिणोः' इति वृद्धिः। नञ्पूर्वस्तु अस्वैरी। **गृह्यका इति।** 'अनुकम्पायाम्' इति कन्। 'गृह्यकाः पक्षिमृगादयश्छेकास्ते गृह्यकाश्च ते' इत्यमरः। **विभाषा कृ।** करोतेः ण्यत्प्राप्ते वृषेस्तु ऋदुपधत्वान्नित्यं प्राप्तेऽयमारम्भः। **पत्रं वाहनमिति।** पतत्यनेनेत्यर्थे

(३-१-१२२) अमोपपदाद्वसेरधिकरणे ण्यत् । वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते । अमा सह वसतोऽस्यां चन्द्रार्कावमावास्या, अमावस्या । 'ऋहलो-र्ण्यत्' (सू २८७२)। 'चजोः–' (सू २८६३) इति कुत्वम् । पाक्यम् । 'पाणौ सृजेर्ण्यद्वाच्यः' (वा १९४६) ऋदुपधलक्षणस्य क्यपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः । 'समवपूर्वाच्च' (वा १९४७) समवसर्ग्या । २८७५ **न क्वादेः** । (७-३-५९) क्वादेर्धातोश्चजोः कुत्वं न । गर्ज्यम् । वार्तिककारस्तु

पत्त्रे । क्यबन्तं निपात्यते । ण्यतोऽपवादः । **युग्यो गौरिति** । शकटादिना योक्तव्य इत्यर्थः । क्यपि कुत्वं निपातनात् । **पत्त्रं वाहनमिति** । पतन्ति गच्छन्त्यनेनेत्यर्थे 'दाम्नीशस–' इत्यादिना करणे ष्ट्रन् । ण्यति तु योग्यमिति स्यात् । **अमावस्यद्** । **अधिकरणे इति** । निपातनलभ्यमिदम् । अमेत्यस्य विवरणम् **सहेति** । 'ऋहलो-र्ण्यत्' इत्यनुपदमेव प्राक् प्रसङ्गाद् व्याख्यातमपि सूत्रक्रमात् पुनरुपात्तम् । **कुत्वमिति** । पचेर्ण्यति 'चजोः–' इति कुत्वमिति भावः । ननु पाणौ सृजेर्ण्यदिति व्यर्थम्, 'ऋहलोः' इत्येव सिद्धेरित्यत आह **ऋदुपधलक्षणस्येति** । 'ऋदुपधाच्चाक्लृपिचृतेः' इति ण्यदपवादस्य क्यपो बाधनार्थमित्यर्थः **पाणिसर्ग्या रज्जुरिति** । ण्यति 'चजोः' इति कुत्वम् । **समवपूर्वाच्चेति** । वार्तिकमिदम् । सृजेर्ण्यदिति शेषः । **न क्वादेः** । कुः आदिर्यस्येति विग्रहः । चजोः कु इत्यनुवर्तते, तदाह **क्वादेरिति** । कवर्गादे-रित्यर्थः । **वार्तिककारस्त्विति** । 'चजोः कु घिण्ण्यतोः' इति सूत्रे 'निष्ठायाम-

---

'दाम्नीशस–' इत्यादिना करणे ष्ट्रन् । **युग्यो गौरिति** । यद्यपि 'तद्वहति रथयुग-प्रासङ्गम्' इति तद्धितयतापि इदं सिध्यति तथापि ण्यतं व्यावर्तयितुमिदं सूत्रम् । अन्यथा हि योग्यो गौरिति स्यात् । अन्ये त्वाहुः—युग्यो हस्तीति हि वृत्तावुदाहृतं तत्तु तद्धितेन न सिध्यति । न हि हस्ती युगं वहति । कृता तु सिध्यति । युज्यते संबध्यते ह्यसौ कुथादिनेति, ततश्चात्र वैयर्थ्यशङ्कैव नास्तीति दिक् । **वृद्धौ सत्या-मिति** । तेन 'अमावास्याया वा' इति विहितस्तद्धितो ह्रस्वपक्षेऽपि सिध्यति एकदेश-विकृतस्यानन्यत्वात् । यदि तु यत्प्रत्ययान्तस्येदं पाक्षिकं निपातनमित्याश्रीयेत तदा यता मुक्तेऽधिकरणे ण्यदेव तावद् दुर्लभः । अथापि बाहुलकाल्लभ्येत । एवमपि ण्यदन्तमनूद्य विहितस्तद्धितो यदन्तान्न स्यादिति दिक् । **ऋहलोः** । पञ्चम्यर्थे षष्ठी । ऋ इति ऋधातोर्न ग्रहणं किं तु ऋवर्णस्य, हला साहचर्यात्परं कार्यमिति निर्देशाद् 'ईडवन्द–' इत्यादिलिङ्गाच्च । 'ऋहलोः–' इत्येतदनुवर्तमानस्य धातोर्विशेषणं विशे-षणेन तदन्तविधिस्तदेतदाह **ऋवर्णान्तादित्यादि** । अत्रेदमवधेयम्—मूलपुस्तकेषु सर्वत्र 'विभाषा कृवृषोः' इत्यत्र पक्षे ण्यद् भवतीति वक्तुम् 'ऋहलोर्ण्यत्' इति सूत्रं

'चजोः–' (सू २८६१) इति सूत्रे 'निष्ठायामनिटः' इति पूरयित्वा 'न क्वादेः' इत्यादि प्रत्याचख्यौ। तेन अर्जितर्जिप्रभृतीनां न कुत्वम्। निष्ठायां सेट्त्वात्। प्रचुरलुञ्चुप्रभृतीनां तु क्वादित्वेऽपि कुत्वं स्यादेव। सूत्रमते तु यद्यपि विपरीतं प्राप्तम्। तथापि 'यथोत्तरं मुनीनां प्रामाण्यम्'। **२८७६ अजिव्रज्योश्च।** (७-३-६०) न कुत्वम्। समाजः। परिव्राजः। **२८७७ भुजन्युब्जौ पाण्युपतापयोः।** (७-३-६१) एतयोरेतौ निपातौ। भुज्यते अनेनेति भुजः पाणिः। 'हलश्च' (सू ३३००) इति घञ्। न्युब्जन्त्यस्मिन्निति न्युब्जः। उपतापो रोगः। पाण्युपतापयोः किम्-भोगः समुद्गः। **२८७८ प्रयाजानुयाजौ यज्ञाङ्गे।** (७-३-६२) एतौ निपात्यौ यज्ञाङ्गे। पञ्च प्रयाजाः।

निटः' इति पूरितम्। तथा च निष्ठायां यः अनिट् तद्धात्ववयवयोः चजोः कु स्याद् घिति ण्यति चेत्यर्थः फलति। तथा 'न क्वादेः' इति सूत्रम् 'अजिव्रज्योश्च' इति सूत्रं 'यजयाचरुचप्रवचर्चश्च' इत्यत्र याचरुचग्रहणं च न कर्तव्यमिति प्रत्याचख्यावित्यर्थः। किं तत इत्यत आह **तेनेति**। सूत्रमते अर्जितर्जिप्रभृतीनां ण्यति कुत्वं स्यात्, 'न क्वादेः' इति निषेधस्य तत्राप्रवृत्तेरिति भावः। तदेवं सूत्रमते अतिव्याप्तिमुक्त्वा अव्याप्तिमाह **प्रचुग्लुञ्चुप्रभृतीनामिति**। तेषां कवर्गादित्वेऽपि ण्यति प्रोक्यमित्यादौ कुत्वमिष्टं स्यादेव वार्तिकमते 'न क्वादेः' इति निषेधस्य प्रत्याख्यातत्वात्। सूत्रमते तु 'न क्वादेः' इति निषेधात् प्रोक्यमित्यादौ कुत्वमिष्टं न स्यादित्यव्याप्तिरिति भावः। नन्विदं वार्तिकं विपरीतफलमपि संमतत्वाद् ग्राह्यमेव। विरोधे विकल्पस्य वक्तुं शक्यत्वादिति शङ्कते **सूत्रमते तु यद्यपीति**। परिहरति **तथापीति**। **यथोत्तरमिति**। अयं वैयाकरणसमयः। **अजिव्र-**

पठित्वा पश्चाद् 'युग्यं च पत्रे' 'अमावस्यदन्यतरस्याम्' इति पठितम्। मनोरमायां तु सूत्रपाठक्रमेण 'युग्यं च पत्रे', 'अमावस्यदन्यतरस्याम्' इति व्याख्याय पश्चाद् 'ऋहलोः–' इति सूत्रं व्याख्यातं तथवात्रापि व्याख्यातमिति। **गर्ज्यमिति**। गर्ज शब्दे 'ऋहलोः–' इति ण्यति 'चजोः–' इति कुत्वे प्राप्तेऽयं निषेधः। **कुत्वं स्यादेवेति**। 'उदितो वा' इति क्त्वायामिड्विकल्पाद् 'यस्य विभाषा' इति निष्ठायामनिट्त्वादिति भावः। **विपरीतमिति**। सूत्रकारमते प्रचुग्लुञ्चुप्रभृतीनां 'न क्वादेः' इति कुत्वं न भवति, वार्तिककारमते तु निष्ठायामनिट्त्वात् 'चजोः–' इति कुत्वं भवतीति परस्परविरुद्धमित्यर्थः। **यथोत्तरमिति**। तथा च वार्तिकानुरोधेन कुत्वं स्वीकर्तव्यमिति भावः। **समाज इति**। अज गतिक्षेपणयोरित्यस्माद्घञि 'चजोः–' इति कुत्वे प्राप्तेऽयं निषेधः। एवं व्रजेरपि। **न्युब्ज इति**। उब्ज आर्जवे।

त्रयोऽनुयाजाः । यज्ञाङ्गे किम्–प्रयागः अनुयागः । २८७९ **वञ्चेर्गतौ** । (७–३–६३) कुत्वं न । वञ्च्यम् । गतौ किम्–वङ्क्यं काष्ठम् । कुटिलीकृतमित्यर्थः । २८८० **ओक उचः के** । (७–३–६४) उचेर्गुणकुत्वे निपात्येते के परे । ओकः शकुन्तवृषलौ । इगुपधलक्षणः कः । घञा सिद्धे अन्तोदात्तार्थमिदम् । २८८१ **एय आवश्यके** । (७–३–६५) कुत्वं न अवश्यपाच्यम् । २८८२ **यजयाचरुचप्रवचर्चश्च** । (७–३–६६) ण्ये कुत्वं न । याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यं ग्रन्थविशेषः । 'ऋच्' अर्च्यम् । ऋदुपधत्वेऽप्यत एव ज्ञापकाण्ण्यत् । 'त्यजेश्च' त्याज्यम् । 'त्यजिपूज्योश्च' इति काशिका । तत्र पूजेर्ग्रहणं चिन्त्यम् । भाष्यानुक्तत्वात् । 'ण्यत्प्रकरणे त्यजेरुपसंख्यानम्' । इति

ज्योश्च । इत्यादि स्पष्टम् । **वञ्चेर्गतौ** । **कुत्वं नेति** । शेषपूरणमिदम् । 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणस्य 'न क्वादेः' इत्यतो नेत्यस्य चानुवृत्तेरिति भावः । **एय आवश्यके** । **कुत्वं नेति** । शेषपूरणमिदम् । आवश्यकेऽर्थे यो ण्यः तस्मिन् परे 'चजोः कु घिण्ण्यतोः' इति कुत्वं नेत्यर्थः । **यजयाच** । **ण्ये कुत्वं नेति** । शेषपूरणमिदम् । यज, याच, रुच, प्रवच, ऋच् एषां द्वन्द्वात् षष्ठी । एषां ण्ये परे 'चजोः कु घिण्ण्यतोः' इति कुत्वं नेत्यर्थः । ननु अर्च्यमित्यत्र कथं ण्यत् । 'ऋदुपधाच्चाक्लृपिचृतेः' इति ऋदुपधत्वलक्षणस्य क्यपो ण्यदपवादत्वादित्यत आह **ऋदुपधत्वेऽपीति** । **त्यजिपूज्योश्चेति** । ण्ये कुत्वं नेति शेषः ।

निपूर्वस्यास्य जस्य कुत्वाभावो दस्य च वकारो निपात्यते । **घञा सिद्धे इति** । उच समवाय इत्यस्माद्घञि 'चजोः–' इति कुत्वे लघूपधगुणे च ओक इति रूपं सिध्यति, परं तु 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वमनिष्टं स्यादिति भावः । **एय आवश्यके** । अवश्यंभाव आवश्यकम् । मनोज्ञादित्वाद् वुञ् । अव्ययानां भमात्रे टिलोपः । **अवश्यपाच्यमिति** । 'आवश्यकाधमर्ण्ययोर्णिनिः' 'कृत्याश्च' इति ण्यत् । आवश्यकशब्दोऽर्थद्योतनार्थो न तु प्रयोगार्थः । तेनार्थप्रकरणादिगम्येऽपि तस्मिन् ण्यत्कत्वाभावश्च भवति । यथा 'अशोच्यानन्वशोचस्त्वम्' इति । केचित्तु शोचितुमर्हाः शोच्याः, न शोच्या अशोच्या इति भगवद्गीतास्विदं व्याचक्षते तच्चिन्त्यम् । 'अर्हे *कृत्यतृचश्च' इति ण्यति 'चजोः–' कुत्वप्रसङ्गात् । 'चजोः–' इति कुत्वं 'निष्ठायामनिटः'* इति वार्तिकमते तु सम्यगेवेति दिक् । **यज** । यज देवपूजादौ । टुयाचृ याच्ञायाम् । रुच दीप्तौ । प्रपूर्वो वच परिभाषणे । ऋच स्तुतौ । **ग्रन्थविशेष इति** । तथा च संज्ञेयमिति 'वचोऽशब्दसंज्ञायाम्' इत्यस्याप्रसक्तानिषेधोऽयमिति भावः । **ज्ञापकादिति** । सरूपत्वाद्वासरूपविधिना ण्यद्भवेदिति न शङ्कनीयमिति भावः ।

हि भाष्यम् । २८८३ वचोऽशब्दसंज्ञायाम् । (७-३-६७) वाच्यम् । शब्दाख्यायां तु वाक्यम् । २८८४ प्रयोज्यनियोज्यौ शक्यार्थे । (७-३-६८) प्रयोक्तुं शक्यः प्रयोज्यः, नियोक्तुं शक्यो नियोज्यो भृत्यः । २८८५ भोज्यं भक्ष्ये । (७-३-६९) भोग्यमन्यत् । 'ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्' । लाप्यम् । दभिर्धातुष्वपठितोऽपि वार्तिकबलात्स्वीकार्यः । दाभ्यः । २८८६ ओरावश्यके । (३-१-१२५) उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यम्भावे द्योत्ये । लाव्यम् । पाव्यम् । २८८७ आसुयुवपिरपिलपित्रपिचमश्च ।

वचोऽशब्दसंज्ञायाम् । वचधातोर्ण्ये कुत्वं न शब्दसंज्ञां वर्जयित्वेत्यर्थः । वाच्यमिति । वस्त्विति शेषः । अशब्दसंज्ञायामित्यस्य प्रयोजनमाह शब्दाख्यायां तु वाक्यमिति । 'एकतिङ् वाक्यम्' इति संज्ञाशब्दोऽयमिति भावः । प्रवाच्यमित्यत्र तु ग्रन्थविशेषसंज्ञात्वेऽपि नायं कुत्वनिषेधस्य निषेधः, 'यजयाच-' इत्यत्र प्रवचेति विशिष्योपादानाद् असंज्ञायामित्यस्य प्रपूर्वाद्वचेरन्यत्र चरितार्थत्वात् । एतदभिप्रायेणैव प्रवाच्यं ग्रन्थविशेष इत्युक्तं प्राक् । प्रयोज्यनियोज्यौ । शक्यार्थे ण्ये कुत्वाभावो निपात्यते । 'शकि लिङ् च' इति कृत्यानां शक्यार्थेऽपि विहितत्वाद् ण्यदन्तस्य शक्यार्थकत्वमपि । भोज्यं भक्ष्ये । भक्ष्ये गम्ये ण्ये भुजेः कुत्वाभावो निपात्यते । इति प्रासङ्गिकम् । अथ प्रकृतम् । लपिदभिभ्यां चेति । वार्तिकमिदम् 'ऋहलोर्ण्यत्' इति सूत्रस्थम् । 'पोरदुपधात्' इति प्राप्तस्य ण्यदपवादस्य यतोऽपवादः । ओरावश्यके । लाव्यं पाव्यमिति । 'अचो ञ्णिति' इति वृद्धौ 'वान्तो यि-' इत्यवादेशः । आसुयुवपि । आसु, यु, वपि, रपि,

---

वाक्यमिति । 'तिङ्सुबन्तचयो वाक्यम्' । भोज्यम् । भक्ष्यमिहाभ्यवहार्यमात्रं विवक्षितं न तु खरविशदमभ्यवहार्यम् । तेन भोज्या यवागूरित्यपि भवतीत्याहुः । भोग्यमन्यदिति । पालनीयमुपभोग्यं चेत्यर्थः । लपिदभिभ्यां चेति । 'पोरदुपधात्' इति प्राप्तस्य यतोऽपवादः । जयादित्यस्तु 'आसुयुवपिरपि-' इति सूत्रे लपिं प्रक्षिप्य रपिलपिचपीति पठित्वाऽनुक्तसमुच्चयार्थेन चकारेण दभेः संग्रह इत्युक्तवान् तत्र वैषम्येण व्याख्यानं निर्बीजं भाष्यविरोधश्च स्पष्ट एवेति बोध्यम । स्वीकार्य इति । 'कास्यनेकाच आम्वक्तव्यश्चुलुम्पाद्यर्थम्' इति वार्तिकबलाद्यथा चुलुम्पादिभ्य आम् स्वीक्रियते तद्वदिति भावः । तथा च प्रयुज्यते—'न ता नशन्ति न दभाति तस्करः' 'विष्णुर्गोपा अदाभ्यः' इत्यादि । लाव्यमिति । आवश्यके उपपदे इति व्याख्याने तु नेदं सिध्यतीति भावः । कश्चित्तु लाघवं प्रत्यनादराद् व्यतिसे इत्यादौ व्यतिशब्दवद् द्योतितार्थस्यापि प्रयोगो दृश्यते । अवश्यलाव्यम् । अत्रोपपदसमासासंभवेऽपि

(३-१-१२६) 'षुञ्' आसाव्यम्। 'यु मिश्रणे' याव्यम्। वाप्यम्। राप्यम्। श्राप्यम्। आचाम्यम्। २८८८ **आनाय्योऽनित्ये**। (३-१-१२७) आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते। दक्षिणाग्निविशेष एवेदम्। स हि गार्हपत्यादानीयतेऽनित्यश्च सततमप्रज्वलनात्। आनेयोऽन्यः घटादिः, वैश्यकुलादानीतो दक्षिणाग्निश्च। २८८९ **प्रणाय्योऽसंमतौ**। (३-१-१२८) संमतिः प्रीतिविषयीभवनं कर्मव्यापारः। तथा भोगेष्वादरोऽपि संमतिः। प्रणाय्यश्चोरः।

त्रपि, चम् एषां समाहारद्वन्द्वः। ण्यदिति शेषः। **आसाव्यमिति**। आङ्पूर्वस्य सुञो ग्रहणमिति भावः। **आनाय्योऽनित्ये**। अनित्ये इति छेदः। **दक्षिणाग्निविशेष एवेति**। वार्तिकमिदम्। **स हीति**। दक्षिणाग्निर्हि अग्निहोत्रार्थमहरहः गार्हपत्यादेः प्रणीयत इत्यर्थः, एतेन आङ्पूर्वकस्य नयतेरर्थ उक्तः। **अनित्यश्चेति**। गार्हपत्यवन्नित्यधारणाभावादिति भावः। तदाह **सततमप्रज्वलनादिति**। सततं धारणाभावादित्यर्थः। प्रणीतस्य दक्षिणाग्नेस्तत्तत्कर्मणि समाप्ते लौकिकत्वमुक्तं कल्पसूत्रेषु 'अप्रवृत्ते कर्मणि लौकिकं संपद्यते' इति। ततश्च पुनः पुनः प्रणयनाद् अनित्यत्वं दक्षिणाग्नेरिति बोध्यम्। यद्यप्याहवनीयस्यापि पुनः पुनः प्रणयनमस्ति, तथापि 'दक्षिणाग्निविशेष एव' इति वार्तिकान्नाहवनीयस्य ग्रहणमित्यर्थः। विशेषग्रहणान्नित्यधारणपक्षे दक्षिणाग्निरिह न गृह्यते इति सूचितम्, गतश्रियां दक्षिणाग्नेरपि नित्यधार्यत्वात्। 'गतश्रियो नित्यधार्या अग्नयः' इति वचनादित्यलं पल्लवितेन। **वैश्यकुलादानीत इति**। दक्षिणाग्निं प्रकृत्य हि श्रूयते—'अहरहरेवैनं वैश्यकुलादाहरन्' इति। तथाविधदक्षिणाग्नौ वाच्ये आनेयशब्द एवेति भावः। **प्रणाय्योऽसंमतौ**। असंमतौ गम्यायां प्रणाय्य इति निपात्यते। तत्र असंमतिशब्दैकदेशं संमतिशब्दं विवृणोति **संमतिः प्रीतिविषयीभवनमिति**। तच्च कर्मनिष्ठमित्याह **कर्म-**

मयूरव्यंसकादेराकृतिगणत्वात्समासः। **आसु। षुञ्। आसाव्यमिति**। षुञ् अभिषव इत्ययं गृह्यते न तु षु प्रसवैश्वर्ययोरिति। 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादिति भावः। **यु मिश्रण इति**। युञ् बन्धन इति तु न गृह्यते सानुबन्धकत्वादिति भावः। अत्र युप्रभृतीनां द्वन्द्वं कृत्वा पश्चादासुशब्देन द्वन्द्वः। तेन 'अल्पाच्तरम्' इति युशब्दस्य न पूर्वनिपातः शङ्क्यः। इहाद्ययोः 'अचो यत्' इत्यनेन रपित्रपिचमां तु 'पोरदुपधात्' इत्यनेन यत्प्रत्यये प्राप्तेऽयमारम्भः। अनित्यमात्रे यदि प्रयोगस्तर्हि घटादावतिप्रसङ्ग इत्यत आह **दक्षिणाग्निविशेष इत्यादि**। **वैश्यकुलादेरिति**। दक्षिणाग्नेर्हि योनिर्विकल्प्यते वैश्यकुलाद्विसवतो आष्ट्राद्वा गार्हपत्याद्वेति। **कर्मव्यापार इति** तथा चायमर्थः—लोकानां या प्रीतिस्तद्विषयीभवनं

प्रीत्यनर्ह इत्यर्थः। प्रणाय्योऽन्तेवासी। विरक्त इत्यर्थः। प्रणेयोऽन्यः। २८६० **पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु।** (३-१-१२९) मीयतेऽनेन पाय्यं मानम्। ण्यत् धात्वादेः पत्वं च। 'आतो युक्–' (सू २७६१) इति युक्। सम्यङ् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः। ण्यदायादेशः समो दीर्घश्च निपात्यते। निचीयतेऽस्मिन्धान्यादिकं निकाय्यो निवासः। अधिकरणे ण्यत् आय् धात्वादेः कुत्वं च निपात्यते। धीयतेऽनया समिदिति धाय्या ऋक्। २८६१ **क्रतौ कुण्डपाय्यसञ्चाय्यौ।**

व्यापार इति। तथेति। भोगेषु सुखदुःखानुभवेषु आसक्तिरपि संमतिरित्यर्थः। एवंविधा संमतिर्न भवतीति असंमतिरिति फलितम्। **प्रणाय्यश्चोर इति।** ण्यति वृद्धौ आयादेशः। **पाय्यसांनाय्य।** पाय्य, सांनाय्य, निकाय्य, धाय्य एषां द्वन्द्वात्प्रथमाबहुवचनम्। मान, हविः, निवास, सामिधेनी एषां द्वन्द्वात्सप्तमी। मानादिषु गम्येषु क्रमात् पाय्यादयो निपात्यन्ते। **मीयते अनेनेति।** माधातोः करणे ण्यत्, धात्वादेर्मकारस्य पत्वं च निपात्यते इत्यर्थः। **आत इति।** ण्यति 'मीनाति–' इत्यात्वे कृते, आतो युगिति भावः। **ण्यदिति।** संपूर्वाद् नीधातोः कर्मणि निपात्यत इत्यर्थः। **आयादेश इति।** सम्नी य इति स्थिते आयादेशो निपात्यते इत्यन्वयः। **निवास इति।** कुसूलादिरित्यर्थः। **अधिकरणे इति।** चिञ्धातोरधिकरणे ण्यन्निपात्यते इत्यन्वयः। **आय् इति।** अचूपरकत्वाभावाद् आयादेशोऽप्राप्तो निपात्यते इत्यन्वयः। **धाय्या ऋगिति।** धाधातोः करणे ण्यति आयादेशो निपात्यते

यस्मिन्नास्ति चोरादौ सोऽसंमतिरिति। वस्तुतस्तु प्रीतिविषयीभवनापेक्षया लाघवात्प्रीतिरेव संमतिः सा यस्मिन् चोरादौ नास्ति लोकानां सोऽसंमतिः। यद्वा संमतिः प्रीतिविषयेषु यस्य नास्ति स विरक्तोऽसंमतिः। तन्त्रेणार्थद्वयमपि गृह्यते। **पाय्यसान्नाय्य।** चतुर्षु अर्थेषु चत्वारो निपात्यन्ते। पीयतेऽनेनेति माङः करणे ण्यत्। मेयमन्यत्। **हविर्विशेष इति।** 'ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायाम्' इति विहितो दधिपयोरूपः। **धीयते अनयेति।** अत्र सर्वा सामिधेनी न धाय्या किं तु समिध्यमानवतीं समिद्धवतीं चान्तरेण विकृतिषु प्रक्षिप्यमाणा 'पृथुपाजा अमर्त्यः' इत्यादिकैव। अयं च विशेषो निपातनस्य रूढ्यर्थत्वाल्लभ्यते। नन्वेवं निपातनात्सामिधेनीविशेषवाचकत्वे सामिधेनीग्रहणं व्यर्थमिति चेत्। अत्राहुः—सूत्रे सामिधेनीग्रहणं प्रयोगविशेषोपलक्षणार्थम्। तथा चासामिधेन्यामपि दृश्यते 'धाय्याः शंसति' इति। न हि शस्त्रेण समित् प्रक्षिप्यते। **क्रतौ कुण्डपाय्य।** कुण्डशब्दे तृतीयान्ते उपपदे पिबतेरधिकरणे यत्प्रत्ययो युगागमश्च निपात्यते। नन्वत्र

(३-१-१३०) कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः । सञ्चीयतेऽसौ सञ्चाय्यः । २८९२ **अग्नौ परिचाय्योपचाय्यसमूह्याः ।** (३-१-१३१) अग्निधारणार्थे स्थलविशेष एते साधवः । अन्यत्र तु परिचेयम् उपचेयम् संवाह्यम् । २८९३ **चित्याग्निचित्ये च ।** (३-१-१३२) चीयतेऽसौ

इति भावः । सामिधेन्यो नाम समिदाधानार्था ऋग्विशेषाः । तत्र 'समिध्यमानो अध्वरे' इति ऋच उपरि प्रक्षेप्या 'पृथुपाजा अमर्त्यः' इत्याद्या ऋक्प्रसिद्धा । **क्रतौ कुण्डपाय्य** । क्रतुविशेषे गम्ये एतौ निपात्येते । **कुण्डेनेति** । अत्सरुकैः चमसैरित्यर्थः । सामान्येनैकवचनम् । 'यदत्सरुकैश्चमसैर्भक्षयन्ति तदेषां कुण्डम्' इति श्रुतिः । **कुण्डपाय्य इति** । सत्रविशेषात्मकः क्रतुः । कुण्डेनेति तृतीयान्ते उपपदे अधिकरणे ण्यत् । आतो युक् । **संचाय्य इति** । संपूर्वात् चिञः कर्मणि ण्यत् आयादेशश्च निपात्यते इति भावः । संचाय्यो नाम क्रतुविशेषः क्वचिच्छाखायामन्वेषणीयः । **अग्नौ परिचाय्य** । अग्नौ गम्ये परिचाय्य उपचाय्य, समूह्य एते निपात्यन्ते । अग्निशब्द इष्टकारचितस्थण्डिलविशेषे वर्तते, 'इष्टकाभिरग्निं चिनोति' इति श्रुतेः । इष्टकाकृतचयनेन अग्न्याख्यं स्थण्डिलं निष्पादयेदित्यर्थः । 'ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दाँसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो यन्मृदा चिनोति तस्मादग्निरुच्यते' इति वाक्यशेषाच्च, तदाह **अग्निधारणेति** । तत्र परिपूर्वादुपपूर्वाच्च चिञः कर्मणि ण्यत् आयादेशश्च निपात्यते । संपूर्वस्य वहेस्तु कर्मणि ण्यति संप्रसारणम्, दीर्घश्च निपात्यते । 'समूह्यं चिन्वीत पशुकामः परिचाय्यं चिन्वीत ग्रामकामः' इति तैत्तिरीयश्रुतौ परिचाय्यसमूह्यौ प्रसिद्धौ । उपचाय्यस्त्वग्निः क्वचिच्छाखायामन्वेषणीयः । **चित्याग्निचित्ये च** । चित्यश्च अग्निचित्या चेति द्वन्द्वः ।

ण्यदेव निपात्यतां प्रकृतत्वात् । एवं च 'आतो युक् चिण्कृतोः' इति सिद्धत्वाद् युक् च न निपातनीय इति लाघवमस्तीति चेत् । मैवम् । तित्स्वरप्रसङ्गात् । इष्यते तु 'यतोऽनावः' इत्याद्युदात्तः कृदुत्तरपदप्रकृतिस्वरः । तथा च प्रयुज्यते । प्रणाय्याद् कुण्डपाय्य इति । संपूर्वाच्चिनोतेस्तु ण्यदायौ निपात्येते । क्रतौ किम्, कुण्डपानम् । संचेयम् । **अग्नौ परि** । अग्निरिह न ज्वलनः किं तु तद्धारणार्थमिष्टकाचयनेन निर्मितं स्थलं तदाह **स्थलविशेष इति** । **एते साधव इति** । स्थलविशेषेऽभिधेये परिपूर्वाच्चिनोतेः ण्यदायादेशयोः संपूर्वस्य वहेस्तु संप्रसारणदीर्घयोश्च निपातनादिति भावः । **चित्योऽग्निरिति** । चिनोतेः कर्मणि क्यप् । यतोऽपवादः । इह सूत्रे अग्नावित्यनुवर्तते तच्च चित्यशब्दस्यैव विशेषणं न द्वितीयस्य । तस्य भावार्थक्त्वे-

चित्योऽग्निः। अग्नेश्चयनमग्निचित्या। 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (सू २८१७) त्वया गन्तव्यम् गमनीयम् गम्यम्। इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः 'स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्न' इति ज्ञापयति। तेन 'क्तल्युट्तुमुन्खलर्थेषु न-' इति सिद्धम्। 'अर्हे कृत्यतृचश्च' (सू २८२२)। स्तोतुमर्हः स्तुत्यः स्तुतिकर्म। स्तोता स्तुतिकर्ता। लिङा बाधा मा भूदिति कृत्यतृचोर्विधिः।

अग्नौ निपात्येते। **चित्योऽग्निरिति**। कर्मणि ण्यत् तुक् च निपात्यते। **अग्नेश्चयनमिति**। अग्निशब्दे षष्ठ्यन्ते उपपदे चिणो ण्यत् तुक् च स्त्रीत्वं लोकात्। 'प्रैषातिसर्ग-' इति व्याख्यातमपि स्मार्यते। **गम्यमिति**। 'पोरदुपधात्' इति ण्यदपवादः यत्। ननु सामान्येन भावकर्मणोर्विहितानां कृत्यानां प्रैषादिषु तदभावे च सिद्धेः प्रैषादिषु कृत्यविधिर्व्यर्थ इत्यत आह **लोटा बाधा इति**। इह प्रैषादिषु कृत्यविध्यभावे लोट् चेति प्रैषादिषु लोटा विशेषविहितेन कृत्यानां बाधः स्यात्, कृत्यानां प्रैषाद्यभावे भावकर्मणोश्चरितार्थत्वात्। अतः प्रैषादिषु कृत्यानां लोटा बाधनिवृत्तये पुनः कृत्यविधिरित्यर्थः। ननु वासरूपविधिनैव लोटा प्रैषादिषु कृत्यानां बाधो न भविष्यतीत्यत आह **स्त्र्यधिकारादूर्ध्वमिति** 'स्त्रियां क्तिन्' इत्यत ऊर्ध्वमित्यर्थः। 'प्राक् स्त्रियाः वासरूपविधिः' इति भाष्यम्। ननु स्त्र्यधिकारादूर्ध्वं वासरूपविधेरप्रवृत्तौ 'स्त्रियां क्तिन्' इति सामान्यविहितस्य क्तिनः 'षिद्भिदादिभ्योऽङ्' इति विशेषविहितस्य नित्यबाधः स्यात्, ततः क्षमा क्षान्तिः, भिदा भित्तिरित्यादि न स्यादित्यत आह **क्वचिन्नेति**। क्वचिदित्यस्यानिर्धारणादाह **तेन क्तल्युट्तुमुन्खलर्थेषु नेति। सिद्धमिति**। एषु वासरूपविधिर्नास्तीत्यर्थः। 'स्त्र्यधिकारात् प्राग् वासरूपविधिः, न तु तत ऊर्ध्वम्' इति भाष्यस्य क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीत्यत्र संकोच इति भावः। अत्र व्याख्यानमेव शरणम्। **अर्हे कृत्यतृचश्चेति**। प्राग्व्याख्यातेति विशेषविवक्षया स्मार्यते। 'लिङ्यदि' इत्यतो लिङनुकर्षार्थश्चकार इत्युक्तं प्राक्। ननु अर्हे अनर्हे च सामान्यविधानादेव अर्हेऽपि कृत्यतृचोः

नाभिवाचकत्वासंभवात्। अग्नेरन्यत्र चेयमित्येव। शब्दकौस्तुभादौ तु अग्निचित्येत्यत्र भावे यकारप्रत्ययस्तुक् च निपात्यते न तु क्यप्। तेनान्तोदात्तत्वं भवति। क्यपि तु कृते क्यपः पित्वादनुदात्तत्वे धातुस्वरेण चित्य इवाद्युदात्तः स्यादिति स्थितम्। ननु वासरूपविधिना कृत्या अपि भविष्यन्तीत्यत आह **स्त्र्यधिकारादूर्ध्वमित्यादि। क्तल्युडिति**। हसितं हसनं छात्रस्य। 'नपुंसके भावे क्तः' 'ल्युट् च' इत्यनयोर्विषये भावे इति घञ्न। इच्छति भोक्तुम्। अत्र 'इच्छार्थेषु लिङ्लोटौ' इति लोण्न। लिङ् तु भवत्येव। 'समानकर्तृकेषु तुमुन्' 'लिङ् च' इति वचनात्। ईष-

२८९४ भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। (३-४-६८)
एते कृत्यान्ताः कर्तरि वा निपात्यन्ते। पक्षे तयोरेवेति सकर्मकात्कर्मणि, अकर्मकात्तु भावे ज्ञेयाः। भवतीति भव्यः। भव्यमनेन वा। गायतीति गेयः साम्नामयम्। गेयं सामानेन वा इत्यादि। 'शकि लिङ् च' (सू २८२३)।

सिद्धयोः पुनस्तद्विधिर्व्यर्थः, इत्यत आह **लिङा बाधेति**। अर्हे चेत्येतावत्येव उक्ते चकारानुकृष्टस्य लिङ एवार्हे विधिः स्यात्। तथा च अर्हे कृत्यतृचोर्विधिर्न स्यात्, अर्हे विशेषविहितेन लिङा बाधात्, अनर्हे कृत्यतृचोश्चरितार्थत्वात्। वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वं न प्रवर्तते इत्युक्तमेव। अतो लिङा बाधा मा भूदिति कृत्यतृचोर्विधिरित्यर्थः। **भव्यगेय। कर्तरि वेति।** 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुवृत्तं वेत्यनेन संबध्यते। तथा च कर्तरि वा एते निपात्यन्ते। अन्यत्र नेति फलति। तत्र अन्यत्रेत्यस्यानिर्धारणादाह **पक्षे इति**। अन्यत्रापि न सर्वत्र, किंतु 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रेण सकर्मकात् कर्मणि अकर्मकाद्भावे एते कृत्या ज्ञेया इत्यर्थः। 'तयोरेव कृत्य–' इति सूत्रे 'लः कर्मणि च' इत्यस्मात्सकर्मकेभ्यः कर्मणि अकर्मकेभ्यो भावे इत्यनुवर्तते इति भावः। **भवतीति भव्य इति**। कर्तरि अचो यत्। **भव्यमनेन वेति**। भावे यत्। **गेयः साम्नामयमिति**। गाधातोः कर्तरि यत्। 'ईद्यति' इति प्रकृतेः ईत्वम्। गुणः। साम्नां कर्मणामनभिहितत्वात् कृद्योगे षष्ठी। कर्तुरभिहितत्वात् प्रथमा। **गेयं सामानेनेति**। कर्मणि यत् सकर्मकत्वात्। न तु भावे। कर्तुरनभिहितत्वात्तृतीया। कृद्योगषष्ठी तु कृत्ययोगे कर्तरि वैकल्पिकी, 'कृत्यानां कर्तरि वा' इत्युक्तेः। **इत्यादीति**। प्रवचनीयो गुरुर्वेदस्य। प्रवक्तेत्यर्थः। कर्तरि अनीयर्। प्रवचनीयो वेदो गुरुणेति वा। उपस्थानीयः शिष्यो गुरोः, उपस्थानीयो गुरुः शिष्येणेति वा। जन्योऽसौ। जायते इत्यर्थः। जन्यमनेनेति वा। आप्लवतेऽसौ आप्लाव्यः। 'ओरावश्यके' इति कर्तरि ण्यत्। आप्लाव्यमनेनेति वा। आपतत्यसौ आपात्यः। 'ऋहलोः–' इति कर्तरि ण्यत्। आपात्यमनेन वा। शकि लिङ् च' इत्यपि व्याख्यातं प्राक्। विशेषविवक्षया सूत्रक्रमादिहोपन्यस्तम्।

त्यानः। 'आतो युच्' इति युच्। अत्र 'ईषद्दुःसुषु–' इति खल् न। **लिङा बाधेति**। चकारेण 'लिङ् यदि' इत्यतो लिङनुकृष्यत इति भावः। **भव्य**। 'तयोरेव–' इति नियमात्कर्तर्यप्राप्ते वचनम्। **साम्नामिति**। कर्मणि षष्ठी। **इत्यादीति**। प्रवक्तीति प्रवचनीयो गुरुः स्वाध्यायस्य। प्रवचनीयो गुरुणा स्वाध्यायः। उपस्थानीयः शिष्यो गुरोः। उपस्थानीयो गुरुः शिष्येण। जायते जन्यः जन्यमनेन वा।

चारकृत्याः । वोढुं शक्यो वोढव्यः । वहनीयो वाह्यः । लिङा बाधा मा भूदिति कृत्योक्तिः । लाघवादनेनैव ज्ञापनसंभवे प्रैषादिसूत्रे 'कृत्याश्च' इति सुत्यजम् । अर्हे कृत्यतृचोर्ग्रहणं च ।

इति कृत्यप्रकरणम् ।

अथ पूर्वकृदन्तप्रकरणम् ॥ ६६ ॥

२८९५ ण्वुल्तृचौ । (३-१-१३३) धातोरेतौ स्तः । 'कर्तरि कृत्' (सू २८३२) इति कर्त्रर्थे । 'युवोरनाकौ (सू १२४७) । कारकः । कर्ता । वोढुमर्हो वोढा । कारिका । कर्त्री । 'गाङ्कुटा-' (सू २४६१) इति ङित्त्वम् ।

नन्विह चकारानुकृष्टकृत्यविधिर्व्यर्थः । शक्तौ अशक्तौ च भावकर्मणोः सामान्यतः कृत्यविधित एव शक्तावपि सिद्धेरित्यत आह लिङा बाधेति । 'शकि लिङ्' इत्येतावत्येवोक्ते शक्तौ विशेषविहितेन लिङा कृत्यानां बाधः स्यात्, अशक्तौ कृत्यानां चरितार्थत्वाद् वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वं नेत्युक्तमेवेति भावः । लाघवादिति । इह चकारमात्रेण वासरूपविधेः स्त्र्यधिकारादूर्ध्वम् अनित्यताज्ञापनं संभवति । अतः 'प्रैषातिसर्ग-' इति सूत्रे कृत्यग्रहणेन 'अर्हे कृत्यतृचश्च' इत्यत्र कृत्यतृज्ग्रहणेन च तज्ज्ञापनाश्रयणे गौरवमिति भावः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कृत्यप्रकरणं समाप्तम् ।

अथ कृदन्तप्रकरणम् । ण्वुल्तृचौ । अनयोर्वर्तमानकालादन्यत्र न प्रयोग

आप्लवते आप्लाव्यः । ण्यत् आप्लाव्यमनेन वा । शकि लिङ् चेति । वोढव्य इति । वह प्रापणे इत्यस्मात्तव्यः । हस्य 'हो ढः' इति ढत्वे 'झषस्तथोः-' इति धत्वे 'ष्टुना ष्टुः' इति ष्टुत्वे 'ढो ढे लोपः' 'सहिवहोः-' इत्यवर्णस्यौत्वम् । अत्र ढलोपे कर्तव्ये ष्टुत्वमसिद्धमिति न शङ्क्यम्, आश्रयासिद्धत्वात् । बाधा माभूदिति । कृत्यानामिति शेषः । कृत्योक्तिरिति । कृत्यानुकर्षकचकारोक्तिरित्यर्थः । लाघवादिति । इह हि चकारमात्रेण । इति तत्त्वबोधिन्यां कृत्यप्रकरणं समाप्तम् ।

ण्वुल्तृचौ । णकारो वृद्ध्यर्थः । लकारो 'लिति' इति स्वरार्थः । तृचश्चकारस्तु 'तुरिष्ठेमेयस्सु', 'तुश्छन्दसि' इत्यादौ सामान्यग्रहणविघातार्थः । 'चितः' इत्यन्तोदात्तार्थस्तु न भवति, 'आद्युदात्तश्च' इत्यनेनैव सिद्धेः । एवं च 'अप्तृन्-' इति सूत्रे तृन्तृचोः पृथग्ग्रहणं विहाय अप्तृस्वसृ इत्येव सुवचमित्येके । अन्ये तु सामान्यग्रहणेऽपि क्वचिद्विशेषस्यैव ग्रहणं भवतीति ज्ञापनार्थम् 'अप्तृन्-' इति सूत्रे तृन्-

कुटिता । अङ्गिणादित्युक्तेर्न ङित्त्वम् । कोटकः । 'विज इट्' (सू २५३६)। विजिता । 'हनस्तोऽचिण्णलोः' (सू २५७४)। घातकः 'आतो युक्-' (सू २७६१) दायकः । 'नोदात्तोपदेशस्य-' (सू १७६३) इति न वृद्धिः । शमकः । दमकः । अनिटस्तु नियामकः 'जनिवध्योश्च' (सू २५१२)। जनकः । 'वध हिंसायाम्' वधकः । 'रधिजभोरचि' (सू २३०२)। रन्धकः । जम्भकः । 'नेट्यलिटि रधेः' (सू २५१६)। रधिता, रद्धा । 'मस्जिनशोः-' (सू २५१७) इति नुम् । मङ्क्ता । नंष्टा, नाशिता । 'रभेरशब्लिटोः' (सू २५८१)

इति भाष्यम् । **वोढुमर्ह इति ।** 'अर्हे कृत्यतृचश्च' इत्युक्तेरिति भावः । **वोढेति ।** वहेः तृच्यनुदात्तत्वादिडभावे ढत्वधत्वष्टुत्वढलोपेषु 'सहिवहोः-' इत्योत्त्वम् । कुटितेत्यत्र लघूपधगुणमाशङ्क्याह **गाङिति** । तर्हि ण्वुलि कोटक इत्यत्रापि गुणो न स्यादित्यत आह **अङ्गिणादित्युक्तेरिति** । विजितेत्यत्र लघूपधगुणमाशङ्क्याह **विज इडिति** । इति ङित्त्वमिति शेषः । **विजितेति** । ङित्त्वान्न गुणः । **अनिटस्त्विति** । तस्यानुदात्तोपदेशत्वादिति भावः । जनक इत्यत्रोपधावृद्धिमाशङ्क्य वृद्धिनिषेधं स्मारयति **जनिवध्योश्चेति** । **वध हिंसायामिति** । धात्वन्तरं भौवादिकम्, भ्वादेराकृतिगणत्वात् । नन्वयं हन्तेर्वधादेशः । तथा सति 'जनिवध्योश्च' इति वृद्धिनिषेधसूत्रे वधिग्रहणवैयर्थ्याद् वधादेशस्यादन्ततया अल्लोपस्य स्थानिवत्त्वादेव वृद्ध्यभावसिद्धेः । **वधक इति** । 'जनिवध्योश्च' इति वृद्धिनिषेधः । रन्धकः जम्भक इत्यत्र इदित्त्वाभावादप्राप्ते नुमि तद्विधिं स्मारयति **रधिजभोरचीति** । रधितेत्यत्र 'रधिजभोः-' इति नुममाशङ्क्याह **नेट्यलिटि रधेरिति । रधिता रद्धेति** । 'रधादिभ्यश्च' इति वेट् । मस्ज् तृ इति स्थिते आह **मस्जिनशोरिति** । नुम्विधिरयम् । **मङ्क्तेति** । मस्ज् तृ इति स्थिते 'मस्जेरन्त्यात् पूर्वो नुम् वाच्यः' इति सकारादुपरिजकारात् । प्राङ् नुम् । मसन्ज् तृ इति स्थिते 'स्कोः-' इति सलोपः, जस्य कुत्वेन गः, तस्य चर्त्वेन कः, अनुस्वारः,

---

तृचोरुभयोर्ग्रहणम् । तेन कोपधग्रहणेन तद्धितवुग्ग्रहणमित्येतत्सिद्धमित्याहुः । **वोढेति ।** 'अर्हे कृत्यतृचश्च' इति तृच्, ढत्वादयस्तु वोढव्य इत्यत्रैवात्राप्यूह्याः । **रधितेति ।** 'रधादिभ्यश्च' इति वेट् । **रद्धेति** । इह 'नेट्यलिटि-' इति निषेधाप्रवृत्तावपि 'रधि-' इत्यनेन अच्परत्वाभावान्नुम्न । **मङ्क्तेति** । टुमस्जो शुद्धौ । अस्मात् तृच् 'मस्जि-' इति नुम् अन्त्यात्पूर्वः । 'स्कोः-' इति सलोपः । जस्य कुत्वे चर्त्वम् । अनुस्वारपरसवर्णौ । 'बहूनां समवाये द्वयोर्द्वयोः संयोगः' इति पक्षे तु नुमागमस्याच्परत्वेऽपि 'स्कोः-' इति सलोपो भवत्येवेति ज्ञेयम् । **नंष्टेति** । रधादित्वादिडभावपक्षे नुम् ।

रम्भकः। रब्धा। 'लभेश्च' (सू २५८२)। लम्भकः। लब्धा। 'तीषसह-' (सू २३४०)। एषिता, एष्टा। सहिता, सोढा। दरिद्रातेरालोपः। दरिद्रिता। 'ण्वुलि न'। दरिद्रायकः। 'कृत्यल्युटः-' (सू २८७१) इत्येव सूत्रमस्तु। यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थात्। एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थम्। पादाभ्यां ह्रियते पादहारकः। कर्मणि ण्वुल्। क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः' (वा ४४२२-४४२३)। प्रक्रन्ता। कर्तरि इति किम्-प्रक्रमितव्यम्। आत्मनेपद इति किम्-संक्रमिता। अनन्यभावे विषयशब्दः। तेन 'अनुपसर्गाद्वा' (सू २७१६) इति विकल्पार्हस्य

परसवर्णेन ङ इति भावः। **नंष्टा, नशितेति**। रधादित्वाद्वेट्। इडभावपक्षे 'मस्जिनशोः-' इति नुमि ननश् तृ इति स्थिते 'व्रश्च-' इति शस्य षः। नस्यानुस्वारः। ष्टुत्वम्। **रभेरशब्लिटोरिति**। नुम्विधिरयम्। **लब्धेति**। 'झषस्तथो-' इति तस्य धः, जश्त्वेन भस्य बः, **तीषसहेति**। इड्विकल्पोऽयम्। **सोढेति**। ढत्वधत्वष्टुत्वढलोपाः। 'सहिवहोः-' इत्योत्वम्। **दरिद्रातेरालोप इति**। 'दरिद्रातेरालोपो वक्तव्यः-' इत्यनेनेति भावः। **ण्वुलि नेति**। 'दरिद्रातेर्ण्वुलि आल्लोपो नेत्यर्थः। 'न दरिद्रायके लोपः' इति वार्तिकादिति भावः। **दरिद्रायक इति**। 'आतो युक्' इति भावः। पादाभ्यां ह्रियते पादहारक इत्यत्र कर्मणि ण्वुलं साधयितुमाह **कृत्यल्युट इत्येवेति**। 'कृत्यल्युटः' इत्येतावतैव पुनर्वचनबलाद् येष्वर्थेषु ते कृत्यल्युटो विहिताः, ततोऽन्येष्वप्यर्थेषु भवन्तीत्यर्थलाभाद् बहुलग्रहणं योगविभागार्थम्, कृत्प्रत्यया येष्वर्थेषु विहिताः ततोऽन्यत्रापि क्वचिद् भवन्तीति। एवं च कर्मण्यपि ण्वुल् सिध्यतीत्यर्थः। 'कृतो बहुलम्' इति वार्तिकं तु एतद्योगविभागसिद्धकथनपरमिति भावः। **क्रमेरिति**। आत्मनेपदविषयात् क्रमेः परस्य कर्तरि कृतो नेडित्यर्थः। 'स्नुक्रमोः-' इति सूत्रस्थमिदं वार्तिकम् **प्रक्रन्तेति**। 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदविषयोऽयम्। नन्वेवं सति क्रमितेत्यत्र कथमिडित्यत आह—**अनन्यभावे विषयशब्द इति**। वर्तते इति शेषः। आत्मनेपदाविनाभाव इति यावत्। क्रमेः कर्तर्यात्मनेपदिन इति फलितम्। **तेनेति**। क्रमितेत्यत्र क्रमेः 'अनुपसर्गाद्वा' इत्यात्मनेपदविकल्पविधानाद् नित्यमात्मनेपदित्वाभावाद् इण्निषेधो नेत्यर्थः। मता-

---

लब्धेति। 'झषस्तथोः-' इति धः, भकारस्य जश्त्वम्। 'लभेश्च' इति नुम् तु न भवति, अचीत्यनुवर्तनात्। **ण्वुलि नेति**। 'सनि ण्वुलि ल्युटि च न' इति वचनात्। **योगविभागेनेति**। 'कृत्यल्युटो बहुलम्' इति सूत्रे कृतो बहुलमित्येवाकारे स्थितम्। तथा च योगविभागं विनैव सर्वेष्टसिद्धिरित्याहुः। **प्रक्रन्तेति**। 'प्रोपाभ्यां

न निषेधः। क्रमिता। तदर्हत्वमेव तद्विषयत्वम्। तेन क्रन्तेत्यपीति केचित्। 'गमेरिट्—' (सू २४०१) इत्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयति। संजिगमिषिता। एवं 'न वृद्भ्यश्चतुर्भ्यः' (२३४८)। विवृत्सिता। यङन्तात्ण्वुल्। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। पापचकः। यङ्लुगन्तात्तु पापाचकः।

२८९६ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। (३-१-१३४) नन्द्यादेर्ल्यु-

---

न्तरमाह—**तदर्हत्वमेवेति**। आत्मनेपदार्हत्वमेवात्मनेपदविषयत्वम्। ततश्च आत्मनेपदपक्षे इण्निषेधे सति क्रन्तेति रूपम्। आत्मनेपदाभावपक्षे तु क्रम इटि क्रमितेति रूपमिति केचिदाहुरित्यर्थः। अत्र पक्षे विषयपदस्य न प्रयोजनमित्यस्वरसः। ननु संजिगमिषितेत्यत्र सनः कथमिट्, गमेरनिट्त्वपाठात् सनः परस्मैपदपरत्वाभावेन 'गमेरिट् परस्मैपदेषु' इत्यस्याप्रवृत्तेरित्यत आह **गमेरिडित्यत्रेति**। **एवमिति**। 'न वृद्भ्यश्चतुर्भ्यः' इत्यत्रापि परस्मैपदग्रहणमनुवृत्तं तङानयोरभावं लक्षयतीत्यर्थः। **विवृत्सितेति**। वृतेः सनि रूपम्। 'हलन्ताच्च' इति कित्वान्न गुणः। **यङन्तादिति**। पचिधातोर्यङन्तात् पापच्येत्यस्माद् ण्वुलित्यर्थः। तस्य अकादेशे 'यस्य हलः' इति यकारलोपे अतो लोपे पापच् अक इति स्थिते उपधावृद्धिमाशङ्क्याह **स्थानिवत्त्वान्न वृद्धिरिति**। **यङ्लुगन्तात्त्विति**। यङः संघातस्य लुकः अजादेशत्वाभावेन स्थानिवत्त्वासंभवादुपधावृद्धिर्निर्बाधा। 'न धातुलोप–'इति निषेधस्तु न, यङ्लुकः अनैमित्तिकत्वाद् उपधावृद्धेरिग्लक्षणत्वाभावाच्च। **नन्दिग्रहि**। नन्दि, ग्रहि, पच एषां द्वन्द्वः। नन्दिग्रहिपचाः आदिर्येषामिति विग्रहः। आदिशब्दस्य प्रत्येकमन्वयः फलति। ल्यु, णिनि, अच् एषां द्वन्द्वात् प्रथमा। यथासंख्यमन्वयः। तदाह **नन्द्यादेरित्यादि**। नन्दि इति ण्यन्तग्रहणम्।

समर्थाभ्याम्' इति क्रमेरात्मनेपदविषयता। **अनन्यभावे विषयशब्द इति**। तदन्याविषयत्वे सति तद्विषयत्वमनन्यभावः। तथा च विकल्पार्हस्य क्रमेः परस्मैपदात्मनेपदोभयप्राप्तिविषयत्वान्निषेधो नेति भावः। **संजिगमिषितेति**। संपूर्वाद्गमेः सन् 'सन्यङोः' इति द्वित्वे हलादिःशेषे 'सन्यतः' इत्यभ्यासस्येत्वम्। 'आर्धधातुकस्य–' इति सन इट्, षत्वम्, सन्नन्तात्तृच् पुनरिट्। **अल्लोपस्येति**। प्राचा तु 'न धातुलोप–' इति सूत्रे इक इत्यनुवृत्तेर्वृद्धेरनिषेधः पापाचक इत्युक्तम्, तन्न। यङन्ते अल्लोपस्य स्थानिवत्त्वेन वृद्धेः प्राप्त्यभावात्। ननु यङ्लुकि पापाचकरूपाभिप्रायेण तथोक्तम्। तत्र हि आकारविशिष्टस्यैव यङो लुगिति सर्वसंमतत्वेन स्थानिवत्त्वाभावादिति चेत्। मैवम्। एवं तर्हि आर्धधातुकस्य धात्ववयवलोपनिमित्तत्वाभावेन यङ्लुगन्ते 'न धातुलोप–' इति निषेधस्य प्रसक्त्यभावात्। **नन्दिग्रहि**। द्वन्द्वान्ते श्रूयमाण आदिशब्दः प्रत्येकं

ग्रहादेर्णिनिः पचादेरच् स्यात्। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। मधुं सूदयतीति मधुसूदनः। विशेषेण भीषयते इति विभीषणः। लवणः। नन्द्यादिगणे निपातनाण्णत्वम्। ग्राही स्थायी। मन्त्री। विशयी। वृद्ध्यभावो निपातनात्। विषयी। इह षत्वमपि। परिभावी, परिभवी। पाक्षिको वृद्ध्यभावो निपात्यते। पचादिराकृतिगणः। 'शिवशमरिष्टस्य करे' (सू ३४८१) 'कर्मणि घटोऽठच्' (सू १८३६) इति सूत्रयोः करोतेर्घटेश्चाच्प्रयोगात्। अच्प्रत्यये परे यङ्लुग्विधानाच्च। केषांचित्पाठस्त्वनुबन्धासञ्जनार्थः। केषां-

---

तदाह नन्दयतीति नन्दन इति। ल्युोरनादेशः, 'णेरनिटि' इति णिलोपः। मधुं सूदयतीति। मधुरसुरविशेषः। तं सूदयति हन्तीति मधुसूदनः। ल्युः अनादेशः णिलोपः। 'सात्पदाद्योः' इति न षत्वम्। नन्द्यादयो वृत्तौ पठिताः। तत्र केचिद् ण्यन्ताः केचिदण्यन्ताः। सूत्रे 'ग्रह उपादाने' इत्यस्य ग्रहीति इका निर्देशः। सौत्रत्वाद् 'ग्रहिज्या-' इति संप्रसारणं न। ग्राहीति। ग्रहधातोरदुपधाण्णिनिः। नकारादिकार उच्चारणार्थः। उपधावृद्धिः। विशयीति। विपूर्वात् 'शीङ् स्वप्ने' इति धातोर्णिनिः। गुणायादेशौ। 'अचोऽञ्णिति' इति वृद्धिमाशङ्क्याह—वृद्ध्यभाव इति। विषयीति। 'षिञ् बन्धने' अस्मात्कृतषत्वाण्णिनिः। गुणायादेशौ। नन्विह कथं न वृद्धिः, कथं च षत्वं पदादित्वादित्यत आह—षत्वमपीति। निपातनाद् वृद्ध्यभावः षत्वं चेत्यर्थः। परिभावी परिभवी इत्यत्र णित्वान्नित्यवृद्धिमाशङ्क्याह-पाक्षिक इति। ग्रहादयो वृत्तौ पठिताः। पचादिराकृतिगण इति। पच वप इत्यादिकतिपयधातून् पठित्वा आकृतिगण इति गणपाठे वचनादिति भावः। गणपाठे आकृतिगणत्ववचनाभावेऽप्याह-शिवशमेति। सूत्रे करशब्दस्य पचादिगणेऽपठितस्य कृञः अच्प्रत्ययान्तस्य 'कर्मणि घटः' इति सूत्रे घटेरचि घटशब्दस्य च प्रयोगदर्शनादित्यर्थः। अच्प्रत्यय इति। यङन्तादच्प्रत्यये परे 'यङोऽचि च' इति यङो लुग्विधीयते। नहि पचादिगणे यङन्तं पठितमस्ति। अतोऽपि पचादेराकृतिगणत्वं विज्ञायते इत्यर्थः। पचा-

---

संबध्यते, तदाह नन्द्यादेर्ल्युरित्यादि। मधुसूदन इति। मधुं दैत्यं सूदयतीति विग्रहः। षूद क्षरणे। इह अर्दिसूदिभ्यां कर्मण्यणि प्राप्ते नन्द्यादिपाठाद् ल्युः। विभीषण इति। 'भियो हेतुभये षुक्'। ग्राहीति। णिनेर्णित्वादुपधावृद्धिः। स्थायीति। आतो युक्। मन्त्रीति। मन्त्रीति चुरादाविदित्पाठान्नुम्, 'णेरनिटि' इति लोपः। विषयीति। षिञ् बन्धने 'धात्वादेः-' इति षस्य सत्वे 'आदेशप्रत्यययोः' इति प्राप्तस्य षत्वस्य 'सात्पदाद्योः' इति निषेधादाह इह षत्वमपीति। निपातनादित्यनुषज्यते। 'परिनिविभ्यः-' इति सूत्रे सितसयेति क्तान्ताजन्तसिनो-

चित्प्रपञ्चार्थः। केषांचिद्बाधकबाधनार्थः। पचतीति पचः। नदट् चोरट् देवट् इत्यादयष्टितः। नदी। चोरी। देवी, दीव्यतेः 'इगुपध--' (सू २८९७) इति कः प्राप्तः। जारभरा। श्वपचा। अनयोः 'कर्मण्यण्' (सू २९१३) प्राप्तः। न्यङ्क्वादिषु पाठाच्छ्वपाकोऽपि 'यङोऽचि च' (२६५०) इति गुणवृद्धिनिषेधः। चेक्रियः। नेन्यः। लोलुवः पोपुवः। मरीमृजः। 'चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति वक्तव्यम्' (वा ३४३०)। आगागमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो 'हलादिः शेषः' (सू २१७९) च न।

देराकृतिगणत्वे नदट् चोरट् इत्यादीनां तत्र पाठो व्यर्थ इत्यत आह **केषांचिदिति।** टकारानुबन्धासञ्जनार्थ इत्यर्थः। नन्वेवमपि वद चल इत्यादीनां अनुबन्धरहितानां तत्र किमर्थः पाठ इत्यत आह **केषांचित्प्रपञ्चार्थ इति। बाधकेति।** जारभर श्वपच इत्यादौ पचाद्यजपवादस्य कर्मण्यणो बाधनार्थं भरपचादीनां पाठ इति भाष्यम्। देवः सेव इत्यादौ 'इगुपधज्ञाप्रीकिरः कः' इति विशिष्य विहितस्य कस्य बाधनार्थं च। तदेतदुपपादयति-**नदडित्यादि**। ननु पचादिगणे श्वपचशब्दस्य बाधकबाधनार्थत्वे श्वपाक इति कथमित्यत आह **न्यङ्क्वादिषु पाठाच्छ्वपाकोऽपीति**। कदाचिदणप्रत्ययः कुत्वं चेत्यर्थः। चेक्रियः, मरीमृज इत्यादौ प्रक्रियां दर्शयति **यङोऽचि चेति**। क्रीञादिधातोरचि यङो लुगित्यर्थः। द्वित्वादौ चेक्री अ इत्यादिस्थितौ आह-**न धातुलोप इति। चेक्रिय इति।** गुणाभावे संयोगपूर्वत्वाच्च यण्। **नेन्य इति।** 'एरनेकाचः-' इति यण्। **लोलुव इति।** उवङ्। यणु न, 'ओः सुपि' इत्युक्तेः। **मरीमृज इति।** अत्र 'न धातुलोपे-' इति निषेधाद् मृजेर्वृद्धिः। **चरिचलीति।** एषाम् अच्प्रत्यये परे द्वित्वम्, अभ्यासस्य आगागमश्चेत्यर्थः। ननु चराचर इत्यत्राभ्यासे रेफादाकारस्य ह्रस्वः स्यात्, हलादिशेषेण तत्र रेफस्यापि निवृत्तिः स्यादित्यत आह **आगागमस्येति**। ह्रस्वत्वे सत्यागागमे दीर्घोच्चारणं व्यर्थम्, अगागमस्यैव विधातुं शक्यत्वात्। तथा हलादिशेषेण रेफस्य निवृत्तौ ह्रस्वत्वेऽपि सवर्णदीर्घेण चाचर इति सिद्धेः दीर्घोच्चारणं हलादिशेषाभावं गमयतीत्यर्थः।

तेर्भेद्धणारिणण्यन्तसिनोतेर्निपातनं विना षत्वं दुर्लभमिति भावः। **जारभरेत्यादि**। जारं बिभर्ति, श्वानं पचतीति विग्रहः। **श्वपाकोऽपीति।** कर्मण्यणापि पक्षे भवतीति भावः। **चेक्रिय इति।** संयोगपूर्वत्वाद् 'एरनेकाचः-' इति न यण्। **लोलुव इति।** इह सुबभावाद् 'ओः सुपि' इति यणेनेति 'अचि श्नुधातु-' इत्युवङ्। **मरीमृज इति।** 'रीगृदुपधस्य च' इति रीगागमो हलादिःशेषश्च नेति। सति तु हलादिःशेषे आगमस्य आदेशस्य वा विशेषो नास्तीत्यचा चाभ्यासस्येत्येव ब्रूयादिति भावः।

चराचरः। चलाचलः। पतापतः। वदावदः। 'हन्तेर्घत्वं च' (वा ३४३१)। घत्वमभ्यासस्य, उत्तरस्य तु 'अभ्यासाच्च' (सू २४३०) इति कुत्वम्। घनाघनः। 'पाटेर्णिलुक्चोक्च दीर्घश्चाभ्यासस्य'। पाटूपटः। पक्षे चरः। चलः। पतः। वदः। हनः। पाटः। 'रात्रेः कृति--' (सू १००४) इति वा मुम्। रात्रिञ्चरो रात्रिचरः। २८९७ **इगुपधज्ञाप्रीकिरः कः।** (३-१-१३५) एभ्यः कः स्यात्। विपः। लिखः। बुधः। कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति किरः वासरूपविधिना ण्वुल्तृचावपि। क्षेपकः, क्षेप्ता। २८९८ **आतश्चोपसर्गे।** (३-१-१३६) कः स्यात्। 'श्याद्व्यध-' (सू २९०३) इति णस्यापवादः। सुग्लः। प्रज्ञः। २८९९ **पाघ्राध्माधेट्दृशः शः।**

हन्तेरिति। वार्तिकमिदम्। हनधातोरचि घत्वं द्वित्वम् आक् चेत्यर्थः। ननु उत्तरखण्डे 'अभ्यासाच्च' इति कुत्वसिद्धेः किमर्थमिह घत्वविधानमित्यत आह **घत्वमभ्यासस्येति।** इह विधीयत इति शेषः। **पाटेरिति।** वार्तिकमिदम्। पाटेर्णौ पाटि इत्यस्माद् अचि णेर्लुक्, द्वित्वम्। अभ्यासस्य ऊगागमः। अभ्यासस्य आकारस्य हले तस्य दीर्घश्चेत्यर्थः। वृद्धिनिवृत्तये णेर्लुग्विधिः। आगागमे दीर्घोच्चारणाद् हलादिशेषेण टकारस्य न निवृत्तिः, हलादिशेषे तु आद्गुणे पोपट इति रूपस्य उगागमेऽपि सिद्धेः। **इगुपधज्ञा।** 'कॄ विक्षेपे' इत्यस्य इत्वे रपरत्वे च किर् इति रेफान्तम्। इगुपध, ज्ञा, प्री, किर् एषां द्वन्द्वात्पञ्चमी। कित्त्वं गुणनिषेधार्थम्। **ज्ञ इति।** आतो लोपः। **प्रिय इति।** प्रीञ् के इयङ्। **किर इति।** कॄधातोः के इत्वे रपरत्वम्। **आतश्चोपसर्गे। कः स्यादिति।** शेषपूरणम्। उपसर्गे उपपदे आदन्ताद्धातोः कः स्यादिति फलति। **णस्यापवाद इति।** तस्य उपसर्गेऽनुपसर्गे च आदन्तसामान्यविहितत्वाद् इति भावः। **सुग्ल इति।** ग्लैधातोः 'आदेचः-' इत्यात्वे कृते कप्रत्यये आतो लोप इति भावः। **प्रज्ञ इति।** ज्ञाधातोरातो लोपः।

पाटेर्णिलुगिति। 'णेरनिटि' इति लोपे हि प्रत्ययलक्षणन्यायेन पाटूपट इत्यत्रोपधावृद्धिः स्यादिति भावः। इहापि पूर्ववद्ध्रस्वहलादिःशेषयोरभावः। **इगुपध।** इक् उपधा यस्य सः। ज्ञा अवबोधने, प्रीञ् तर्पणे, कॄ विक्षेपे। एषामितरेतरयोगद्वन्द्वे व्यत्ययेन पञ्चम्येकवचने कॄशब्दस्य धात्वनुकरणत्वेन प्रकृतिवदनुकरणमित्यतिदेशाद् 'ॠत इद्धातोः' इति इत्वम्। समाहारद्वन्द्वे तु नपुंसकह्रस्वत्वे सति इत्वं न स्यात्। **ज्ञ इति।** जानातीति ज्ञः, 'आतो लोप इटि च' इत्यालोपः। **पाघ्राध्मा।** पा पाने। पा रक्षणे इत्ययं तु न गृह्यते लुग्विकरणत्वात्। इह सूत्रे उपसर्ग इति केचिदनुवर्तयन्ति तद्बहूनामसंमतम्। तथा च श्रीहर्षः 'फलानि धूमस्य धयानधोमुखान्' इति।

(३-१-१३७) पिबतीति पिबः। जिघ्रः। धमः। धयः। धया कन्या। धेटष्टित्वात् 'स्तनन्धयी' इति खशीव ङीष्प्राप्तः। 'खशोऽन्यत्र नेष्यते' इति हरदत्तः। पश्यतीति पश्यः। 'घ्रः संज्ञायां न' (वा १६६७)। 'व्याघ्रादिभिः—' (सू ७३४) इति निर्देशात्। २६०० **अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च** । (३-१-१३८) शः स्यात्। लिम्पः। विन्दः। धारयः। पारयः। वेदयः। उदेजयः। चेतयः। सातिः

पाघ्रा । अत्र 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इति मत्वाह **पिबतीति पिब इति** । पाधातोः शप्रत्यये तस्य शित्त्वेन सार्वधातुकत्वात् 'पाघ्राध्मा—' इति पिबादेशः। स चादन्त इत्युक्तम्। शप् पररूपम्। **जिघ्र इति**। 'पाघ्रा-' इति घ्राधातोर्जिघ्रादेशः। **धम इति**। ध्माधातोर्धमादेशः। **धय इति**। धेटः शः, शप्, अयादेशः, पररूपमिति भावः। **धया कन्येति**। अत्र धेट्धातुष्टित् स अदन्तो न भवति। यस्त्वदन्तो धयशब्दः, स न टित्। अतोऽत्र 'टिड्ढाणञ्—' इति न ङीबिति भावः। धेटष्टित्वादित्यारभ्य हरदत्तमतम्। **स्तनंधयीतीति**। स्तनशब्दे उपपदे धेट्धातोः 'नासिकास्तनयोः—' इति खशि कृते 'खित्यनव्ययस्य' इति मुमि स्तनन्धयशब्दः। तत्र खशि कृते धेटष्टित्त्वमाश्रित्य यथा 'टिड्ढाणञ्' इति ङीप्, तथा धया कन्येत्यत्रापि ङीप् प्राप्तः। स ङीप् खशोऽन्यत्र नेष्यते इति हरदत्त आहेत्यर्थः। वस्तुतस्तु 'टिड्ढाणञ्—' इति सूत्रे टिदाद्यवयवाकारस्यैव ग्रहणमिति भाष्यविरोधादिदं चिन्त्यम्। न च टित्त्वसामर्थ्यादेव स्तनन्धयीशब्दाद् ङीबिति वाच्यम्, धया कन्येत्यत्रापि ङीप्प्रसङ्गात् खशोऽन्यत्र नेष्यते इत्यत्र प्रमाणाभावात्। तस्मात् स्तनन्धयीत्यप्रामाणिकमेव। तस्य प्रामाणिकत्वे गौरादित्वं कल्प्यम्, ङीष्प्युदात्तनिवृत्तिस्वरप्राप्त्या स्वरे विशेषाभावाद् इति शब्देन्दुशेखरे स्थितम्। दृश

श्रूयते च 'यदा पश्यः पश्यते रुक्मवर्णम्' इति। **अनुपसर्गाल्लिम्पविन्द** । इह लिम्पविन्देति भाविना नुमा सनुम्कौ निर्दिष्टौ। तेन लाभार्थस्यैव विन्देर्ग्रहणं न तु सत्ताद्यर्थकानाम्। **धारय इति**। धृञ् धारणे, धृङ् अवस्थाने। णयन्तयोर्द्वयोरपि ग्रहणम्। अथ कथं 'न मद्यमत्रोत्तरधारयस्य ते' इति श्रीहर्षः। परत्वाद्धि सूत्रधारादिष्विव कर्मण्यणा भाव्यम्। तथा च वार्तिकम् 'अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन' इति। सत्यम्। कर्मणः शेषत्वविवक्षायामणोऽप्राप्त्या शे कृते शेषषष्ठ्यन्तेन समासो भविष्यति। एतेन गङ्गाधरभूधरजलधरादयो व्याख्याताः। **पारय इति**। पार कर्मसमाप्तौ चुरादिर्ण्यन्तः। पॄ पालनपूरणयोरिति वा हेतुमण्ण्यन्तः। **वेदय इति**। विद चेतनाख्यानादिषु चुरादिः, ज्ञानाद्यर्थानामन्यतमो वा हेतु-

सुखार्थः । सौत्रो हेतुमण्ण्यन्तः । सातयः । वासरूपन्यायेन क्विपि सात्पर-मात्मा । सात्वन्तो भक्ताः । षह मर्षणे, चुरादिः । हेतुमण्ण्यन्तो वा । साहयः । अनुपसर्गात् किम्-प्रलिपः । 'नौ लिम्पेर्वाच्यः' (वा १९९८) । निलिम्पा देवाः । 'गवादिषु विन्देः संज्ञायाम्' (वा १९९९) । गोविन्दः । अरवि न्दम् । २९०१ ददातिदधात्योर्विभाषा । (३-१-१३९) शः स्यात् । ददः ।

उदाहरति **पश्य इति** । 'पाघ्रा-' इति पश्यादेशः । **घ्रः संज्ञायां नेति** । घ्राधातोः संज्ञायां शो नेत्यर्थः । कुत इत्यत आह **व्याघ्रादिभिरिति** । अन्यथा व्याजि-घ्रादिभिरिति निर्दिशेदिति भावः । **अनुपसर्गात्** । **शः स्यादिति** । शेषपूरणम् । **लिम्पः विन्द इति** । 'लिप उपदेहे' 'विद्लृ लाभे' इति तुदादौ, ताभ्यां शः, 'शे मुचादीनाम्' इति नुम् । सूत्रे कृतनुमौ लिम्पविन्दौ निर्दिष्टौ । अतस्तौदादिकयो-रेव ग्रहणम् । **धारय इति** । 'धृञ् धारणे' 'धृङ् अवस्थाने' आभ्यां हेतुमण्ण्य-न्ताभ्यां शः, शप्, गुणायादेशौ । **पारय इति** । पृधातोः ण्यन्ताच्छः, शप्, गुणा-यादेशौ । विद वेदनाख्यादिषु । चुरादिण्यन्ताच्छः, शप् गुणायादेशौ । **उदेजय इति** । उत्पूर्वादेजधातोः ण्यन्ताच्छः, शप्, गुणायादेशौ । **चेतय इति** । 'चिती संज्ञाने' ण्यन्ताच्छः, शप्, गुणायादेशौ । एवं सातयः । सादिति रूपं साधयितुमाह **वासरूपन्यायेन** । **क्विबिति** । सातयति सुखयतीत्यर्थे क्विप्, णिलोपः । यद्यपि क्विप् सामान्यविहितः सातेः शप्रत्ययस्तु तदपवादः । तथापि वासरूपविधिना क्विबपि भवतीत्यर्थः । **सात्परमात्मेति** । 'एष ह्येवानन्दयति' इति श्रुतेः । तस्य सुख-यितृत्वावगमादिति भावः । **सात्वन्त इति** । सात् परमात्मा भजनीय एषामित्यर्थे मतुप । 'मादुपधायाः-' इति मस्य वः । 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावान्न जश्त्वम् । **साहय इति** । साहेः शः शप्, गुणायादेशौ । **प्रलिप इति** । इगुपध-लक्षणः कः । **नौ लिम्पेरिति** । वार्तिकमिदम् । नि इत्युपसर्गे उपपदे लिम्पेः शो वाच्य इत्यर्थः । अनुपसर्गादित्युक्तेः पूर्वेणाप्राप्तौ वचनम् । **गवादिष्विति** । वार्तिकमिदम् । गवादिषु उपपदेषु विन्देः शो वाच्य इत्यर्थः । संज्ञायामेवेति नियमा-र्थमिदम् । **गोविन्द इति** । गा उपनिषद्वाचः प्रमाणतया विन्दतीत्यर्थः । **अर-विन्दमिति** । चक्रे नाभिनेम्योरन्तरालप्रोतानि काष्ठानि अराणि तत्सदृशानि दलानि विन्दतीत्यर्थः । कर्मण्यणोऽपवादः शः । **ददातिदधात्योर्विभाषा** ।

मण्ण्यन्तः । इहोदाहरणेषु लिपिविदिभ्यां 'तुदादिभ्यः शः' 'शे मुचादीनाम्' इति नुम् । धार्यादिभ्यस्तु शब्गुणायादेशाः । **अरविन्दमिति** । चक्रस्य नाभिनेम्योरन्तराले स्थितानि काष्ठानि अराः तदाकाराणि दलानि तत्सादृश्यादरास्तान् विन्दति लभते

दधः। पक्षे वक्ष्यमाणो णः। अनुपसर्गादित्येव। प्रदः। प्रधः। २६०२ **ज्वलितिकसन्तेभ्यो णः।** (३-१-१४०) इतिशब्द आद्यर्थः। ज्वलादिभ्यः कसन्तेभ्यो वा णः स्यात्। पक्षेऽच्। ज्वालः, ज्वलः। चालः, चलः। अनुपसर्गादित्येव। उज्ज्वलः। 'तनोतेरुपसंख्यानम्' (वा १६७०)। इहानुपसर्गादिति विभाषेति च न संबध्यते। अवतनोतीत्यवतानः। २६०३ **श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च।** (३-१-१४१) श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात्। श्यैङोऽवस्यतेश्चाऽऽदन्तत्वात्सिद्धे पृथग्ग्रहण-

---

दाञ्, धाञ् आभ्यां शो वा स्यात्। **ददः दध इति।** शः, शप् 'श्लुः' 'श्लौ' इति द्वित्वम्, आतो लोपः। **वक्ष्यमाण इति।** 'श्याद्व्यध-' इत्यनेनेति भावः। **प्रदः प्रध इति।** 'आतश्चोपसर्गे' इति कः। **ज्वलिति। आद्यर्थ इति।** तथा च ज्वल् इति आदिर्येषां ते ज्वलितयः, ते च ते कसन्ताश्चेति ज्वलितिकसन्ताः, तेभ्य इति विग्रहः, तदाह **ज्वलादिभ्य इति।** 'ज्वल दीप्तौ' इत्यारभ्य 'कस गतौ' इत्येवमन्तेभ्य इत्यर्थः। **वा णः स्यादिति।** विभाषेत्यनुवर्तते इति भावः। **पक्षेऽजिति।** इगुपधेभ्यः कः इत्यपि बोध्यम्। **उपसंख्यानमिति।** णस्येति शेषः। **न संबध्यते इति।** अवतान इत्येव भाष्ये उदाहरणादिति भावः। **श्याद्व्यधास्रु।** श्या, आत्, व्यध, आस्रु, संस्रु, अतीण्, अवसा, अवहृ, लिह, श्लिष, श्वस् एषामेकादशानां समाहारद्वन्द्वात्पञ्चमी। अनुपसर्गादिति निवृत्तम्, उत्तरसूत्रेऽनुपसर्गग्रहणात्। एवं च तत्संबद्धं विभाषाग्रहणं च नानुवर्तते, तदाह **नित्यमिति। श्यैङ इति।** श्यैङ्धातोः अवपूर्वकस्य षोधातोश्च कृतात्त्वयोः

इत्यर्थे कर्मण्यणो बाधनायेदम्। **ददातिदधात्योर्विभाषा। ददः दध इति।** श परे 'जुहोत्यादिभ्यः-' इति श्लुः 'श्लौ' इति द्वित्वम्। अपित्सार्वधातुकस्य शस्य ङित्त्वाद् 'आतो लोपः-' इत्यालोपः। **वक्ष्यमाणो ण इति।** 'श्याद्व्यधा-' इति णप्रत्यये आतो युकि। दायः। धायः। **प्रदः प्रध इति।** 'आतश्चोपसर्गे' इति कः। स्यादेतत्—दद दाने, दध धारणे, आभ्यामचि ददो दध इति सिद्धम्। दाधाभ्यामादन्तलक्षणे णप्रत्यये दायो धाय इत्यपि, ततश्चेदं सूत्रं व्यर्थमिति चेत्। सत्यम्। स्वरार्थमिदं सूत्रम्। अददः। अदधः। इह हि अव्ययपूर्वपदप्रकृतिस्वर इष्यते। अजन्तत्वे तु अजकावशक्काविसन्तोदात्तत्वं स्यात्। **इतिशब्द आद्यर्थ इति।** निपातानामनेकार्थत्वादिति भावः। **श्याद्व्यधा।** अनुपसर्गादिति निवृत्तम्। उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। एवं च तत्संबद्धं विभाषाग्रहणमपि निवृत्तं तदाह **नित्यमिति।** इह सूत्रे श्यैङ् गतावित्यस्य आत्वे श्या आत् इति प्रश्लेषो न तु शीङो

मुपसर्गे कं बाधितुम् । अवश्यायः । प्रतिश्यायः । आद्—दायः । धायः । व्याधः । 'स्रु गतौ' आङ्पूर्वः संपूर्वश्च । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः । २६०४ दुन्योरनुपसर्गे । (३-१-१४२) णः स्यात् । दुनोतीति दावः । नीसाहचर्यात्सानुबन्धकाद्दुनोतेरेव णः । द्रवतेस्तु पचाद्यच् , द्रवः । नयतीति नायः । उपसर्गे तु प्रद्रवः । प्रणयः । २६०५ विभाषा ग्रहः (३-१-१४३) णो वा । पक्षेऽच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । 'भवतेश्च' इति

सूत्रे निर्देशः । तयोरादन्तत्वादेव सिद्धे पुनर्ग्रहणम् 'आतश्चोपसर्गे' इति कप्रत्ययबाधनार्थमित्यर्थः । **अवश्यायः प्रतिश्याय इति** । श्यैङः आत्त्वे कृते णः, आतो युक् । **आदिति** । आदन्तस्योदाहरणसूचनम् । **दायः धाय इति** । णे आतो युक् । **व्याध इति** । व्यधेर्णे उपधावृद्धिः । **आस्रावः, संस्राव इति** । णे 'अचोऽञ्णिति' इति वृद्धिः, आवादेशः । **अत्याय इति** । अतिपूर्वादिणधातोर्णे वृद्ध्यायादेशौ । **अवसाय इति** । अवपूर्वात् 'षोऽन्तकर्मणि' इत्यस्माद् णे आत्त्वे आतो युक् । **लेहः श्लेष इति** । णे लघूपधगुणः । **श्वास इति** । णे उपधावृद्धिः । **दुन्योरनुपसर्गे** । दुनोतेः नयतेश्चेत्यर्थः । दवशब्दं साधयितुमाह **नीसाहचर्यादिति** । नीञ्धातुः सानुबन्धकः, तत्साहचर्यात् 'टु दु उपतापे' इति स्वादिगणस्थादेव णप्रत्यय इत्यर्थः । **द्रवतेस्त्विति** । 'द्रु द्रु गतौ' इति भौवादिकाद् निरनुबन्धकात्पचाद्यजित्यर्थः । **विभाषा ग्रहः । व्यवस्थितविभाषेयमिति** । इदं 'शाच्छोः' इति सूत्रे भाष्ये स्पष्टम् । **तेनेति** । जलचरे मत्स्यादौ वाच्ये णप्रत्यये उपधावृद्धौ ग्राह इत्येव भवति । ज्योतिषि सूर्यचन्द्रादौ वाच्ये अच्प्रत्यये

यणादेशेन, नाप्यततेः अच्छब्दान्तानां वायतिप्रभृतीनां, नाप्यकारान्तानां वा प्रश्लेषेण ग्रहणं व्याख्यानादिति भावः । **कं बाधितुमिति** । अन्यथा 'आतश्चोपसर्गे' इति विशेषविहितः कः सामान्यविहितस्य णस्य बाधकः स्यादित्यर्थः । स्रु गतौ । प्राचा तु सूत्रे आश्रु संश्रु इति तालव्यं पठित्वा शृणोतिरुदाहृतस्तदनाकरम् । तथा च प्रयुज्यते—'अनाश्रवावः किमहं कदापि वक्तुं विशेषात्परमस्ति शेषः' इति नैषधादौ । अमरोऽप्याह 'वचने स्थित आश्रवः' इति । यदि तु सूत्रे अस्मिन् शृणोतेर्ग्रहणं स्यात्तर्हि 'ऋदोरप्' इति सामान्यविहितमपं बाधित्वा आङ्पूर्वकाच्छृणोतेर्विशेषविहितो ण एव स्यात् , तथा च आश्रव इति रूपं न स्यात्किंत्वाश्राव इति स्यादिति दिक् । **लेहः श्लेष इति** । 'इगुपधज्ञा–' इति कप्रत्यये गुणो न स्यादिति भावः । **दुनोतेरिति** । टुदु उपतापे इत्यस्मात् । **द्रवतेरिति** । द्रु गतावित्यस्मात् । **द्रव इति** ।

काशिका। भवो देवः संसारश्च। भावाः पदार्थाः। भाष्यमते तु प्राप्त्यर्थाच्चुरादिण्यन्तादच्। भावः। २९०६ गेहे कः। (३-१-१४४) गेहे कर्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहम्। तात्स्थ्याद् गृहा दाराः। २९०७ शिल्पिनि ष्वुन्। (३-१-१४५) क्रियाकौशलं शिल्पं तद्वत्कर्तरि ष्वुन्स्यात्। 'नृतिखनिरञ्जिभ्य एव' (वा १९७१) नर्तकः-नर्तकी। खनकः-खनकी। 'असि अके अने च रञ्जेर्नलोपो वाच्यः' (वा ४०६७)। रजकः-रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्। रञ्जेस्तु 'क्वुन्शिल्पि-

---

ग्रह इत्येव भवतीत्यर्थः। **भवतेश्चेति**। णो वेति शेषः। पक्षे अच्। **काशिकेति**। भाष्ये तु न दृश्यते इति भावः। इयमपि व्यवस्थितविभाषैव, तदाह **भावो देव इति**। महादेव इत्यर्थः। अत्र अजेवेति भावः। **भावाः पदार्था इति**। अत्र ण एवेति भावः। ननु भवतेश्चेति णविकल्पस्य भाष्ये अदर्शनात् कथं भाष्यमते भावशब्द इत्यत आह **भाष्यमते त्विति**। भावयति प्रापयति स्वकार्यमित्यर्थे 'भू प्राप्तौ' इति चुरादिण्यन्ताद् भावि इत्यस्माद् अच्प्रत्यये णिलोपे भावशब्द इत्यर्थः। **गेहे कः**। 'विभाषा ग्रहः' इत्यस्यापवादः। **गृहमिति**। 'ग्रहिज्या-' इति संप्रसारणं पूर्वरूपं च। ननु गृहा दारा इति कथम्। गेहे कर्तर्येव वाच्ये कप्रत्ययविधानादित्यत आह **तात्स्थ्यादिति**। गृहशब्दो गेहस्थे लाक्षणिक इति भावः। **गृहा दारा इति**। 'दारेष्वपि गृहाः' इत्यमरः। **शिल्पिनि ष्वुन्। नृतिखनिरञ्जिभ्य एवेति**। वार्तिकमिदम्। **नर्तकीति**। षित्त्वाद् ङीषिति भावः। 'दंशसञ्जस्वञ्जां शपि' इति सूत्रे 'रजकरजनरजःसूपसंख्यानम्' इति वार्तिकम्। तद्

'दवदावौ वनारण्यवह्नी' इत्यमरः। **काशिकेति**। भाष्ये त्वेतद्वार्तिकं नास्तीति तन्मते भावशब्दोऽप्यसाधुरित्यत आह **भाष्यमते त्विति। गेहे कः**। गेह इति प्रत्ययार्थस्य कर्तुर्विशेषणं नोपपन्नम्। 'गृहपातना संयुक्ते ज्ञः' इति निर्देशादित्यभिप्रेत्याह **गेहे कर्तरीति**। एतत्सूत्रं तु शक्यमकर्तुम्। गृहू ग्रहणे इति भ्वादेरिगुपधलक्षणे कप्रत्यये कृते गृहशब्दस्य सिद्धेः। **तात्स्थ्यादिति**। भवति हि तात्स्थ्यात्ताच्छब्द्यम्। मञ्चाः क्रोशन्तीत्यादौ मञ्चशब्देन पुरुषा अपि व्यपदिश्यन्ते, एवं च गृहशब्दो वेश्मनि मुख्यो दारेषु त्वौपचारिक इत्यर्थः। अत्रेदमवधेयम्—गृहशब्दोऽयमर्धर्चादित्वादुभयलिङ्गः। तत्र नपुंसकलिङ्गोऽभिधेयवचनः, पुँल्लिङ्गस्तु बहुवचनान्त एव। 'गृहाः पुंसि च भूम्न्येव' इत्यमरोक्तेरिति। **शिल्पिनि ष्वुन्**। पूर्वेण साहचर्याच्छिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणं न तूपपदमित्याह **तद्वति कर्तरीति**। **भाष्यमते त्विति**। तथा च षष्ठे 'रजकरजनरजःसूपसंख्यानम्' इति वार्तिकं प्रत्या-

संज्ञयोः' (उ सू १६०) इति क्वुन्। टाप्। रजिका। पुंयोगे तु रजकी। २९०८ गस्थकन्। (३-१-१४६) गायतेस्थकन्स्यात्, शिल्पिनि कर्तरि। गाथकः। २९०९ ण्युट् च। (३-१-१४७) गायनः। टित्वाद्गायनी। २९१० हश्च व्रीहिकालयोः। (३-१-१४८) हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि। जहात्युदकमिति हायनो व्रीहिः। जहाति भावानिति हायनो वर्षम्। जिहीते प्राप्नोतीति वा। २९११ प्रसृल्वः समभिहारे वुन्। (३-१-१४९) समभिहारग्रहणेन साधुकारित्वं लक्ष्यते। प्रवकः। सरकः। लवकः। २९१२ आशिषि च। (३-१-१५०) आशीर्विषया-

---

अर्थतः संगृह्णाति **असि अके अने चेति। रजक इति।** रञ्जेः शिल्पिनि ष्वुनि अकादेशे नलोपः। **रजकीति।** षित्त्वाद् ङीप्। नृतिखनिरञ्जिभ्य एवेति परिगणनाद् 'वेञ् तन्तुसन्ताने' इत्यस्मात् कृतात्त्वात् 'श्याद्व्यध—' इति णप्रत्यये आतो युकि वाय इति सिध्यति। **भाष्यमते तु नृतिखनिभ्यामेवेति।** इदं च 'दंश-सञ्जस्वञ्जां शपि' इति सूत्रे भाष्ये स्पष्टम्। ननु भाष्यमते क्वुनि रजकीति कथमित्यत आह **पुंयोगे तु रजकीति। गस्थकन्।** गः थकशिति च्छेदः। गैधातोः कृतात्वस्य ग इति पञ्चम्यन्तम्, तदाह **गायतेरिति। ण्युट् च।** चकार उक्तसमुच्चये। गायतेर्ण्युट् थकन च शिल्पिनि कर्तरि। **गायन इति।** आत्वे युक्। 'आदेचः—' इत्यात्वस्य अनैमित्तिकत्वेन वृद्ध्यपेक्षया अन्तरङ्गत्वात्। यद्यपि 'गस्थकन् ण्युट् च' इत्येकमेव सूत्रमुचितम्। तथापि ण्युट एवोत्तरसूत्रे अनुवृत्त्यर्थो योगविभागः। **हश्च।** 'ओ हाक् त्यागे' इत्यस्य 'ओ हाङ् गतौ' इत्यस्य च हः इति पञ्चम्यन्तम्, तदाह **हाको हाङश्चेति। प्रसृल्वः। लक्ष्यत इति।** एतच्च

क्याुतं भाष्यकृतोक्तम्। रजकरजनरजःसु कित्वात् सिद्धं कित एवैते औणादिका इति कैयट आह **रजक इति।** 'शिल्पिनि ष्वुन्' इति ष्वुन्। रजनमिति 'रञ्जेः क्युन्' इति क्युन्। रज इति 'भूरञ्जिभ्यां कित्' इत्यसुन् प्रत्यय इत्यादि। **गस्थकन्।** गामादाग्रहणेष्वविशेषेऽपि गै शब्द इत्ययमेवेह गृह्यते न तु गाङ् गताविति। थकन् प्रत्ययो हि गायत्यर्थविषयमेव शिल्पिनमभिधातुं समर्थ इत्याशयेनाह **गायतेरिति। ण्युट् च।** योगविभाग उत्तरत्र अस्यैवानुवृत्त्यर्थः। **गायन इति।** आतो युक्। **जहात्युदकमिति।** उदकादधिकं वर्धनात्। **भावानिति।** भावाः पदार्थाः, तान् जिहीते इति ओहाङ् गतौ 'भृञामित्' इत्यभ्यासस्येत्वम्। **प्रसृल्वः।** पञ्चमीस्थाने व्यत्ययेन जस्। 'ओः सुपि' इति यण्। **लक्ष्यत इति।** भूयः सहचाराद्, यो हि यां क्रियां पुनःपुनरनुभवति स तत्र प्रायेण कौशलं लभते तेन सकृदपि यः सुष्ठु

थेवृसेवुंन्स्यात्कर्तरि । जीवतात्-जीवकः । नन्दतात्-नन्दकः । आशीः प्रयोक्तुर्धर्मः । आशासितुः पित्रादेरियमुक्तिः ।

इति तृतीयाध्यायस्य प्रथमः पादः ।

२९१३ **कर्मण्यण्** । (३-२-१) कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् । उपपदसमासः । कुम्भं करोतीति कुम्भकारः । आदित्यं पश्यतीत्यादावनभिधानान्न । । शीलिकामिभक्ष्याचरिभ्यो णः' (वा १९८०) । अणोऽपवादार्थं वार्तिकम् । मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा । 'ईक्षिक्षमि-

---

भाष्ये स्पष्टम् । प्रु, सृ, लू एषां समाहारद्वन्द्वात्पञ्चमी । **आशिषि च** । **जीवक इति** । आशास्यमानजीवनक्रियाश्रय इत्यर्थः । एवं नन्दकः । **आशीरिति** । आशासनम् अयमित्थं भूयादिति प्रार्थनं शब्दप्रयोक्तृकर्तृकमिति यावत् । तत आशासितुः पित्रादेरियमुक्तिः । इत्थं नन्दकशब्दप्रयोगः । औचित्यादिति भावः ।

इति तृतीयाध्यायस्य प्रथमः पादः ।

अथ तृतीयाध्यायस्य द्वितीयः पादः । **कर्मण्यण्** । **कर्मण्युपपदे इति** । 'तत्रोपपदं सप्तमीस्थम्' इत्यत्र तत्रेत्यनेनेदं लभ्यत इति तत्रैवोक्तम् । प्रत्ययस्तु कर्तर्येव । **उपपदसमास इति** । 'उपपदमतिङ्' इत्यनेनेति भावः । **कुम्भं करोतीति** । अस्वपदो लौकिकविग्रहोऽयम् । कुम्भ अस् कार इत्यलौकिकविग्रहवाक्ये सुबुत्पत्तेः प्रागेव कारशब्देन कृदन्तेन कुम्भ अस् इति षष्ठ्यन्तस्य समास इति प्रागेवोक्तम् । ननु आदित्यं पश्यतीत्यादित्यदर्शः, हिमवन्तं शृणोतीति हिमवच्छ्रावः, ग्रामं गच्छतीति ग्रामगाम इत्यादि स्यादित्यत आह **आदित्यं पश्यतीत्यादावनभिधानान्नेति** । एतच्च भाष्ये स्पष्टम् । **शीलीति** । शीलि, कामि, भक्षि, आचरि एभ्यो णप्रत्ययो वाच्य इत्यर्थः । ननु 'कर्मण्यण्' इत्यणैव सिद्धे किमर्थमिदमित्यत आह **अणोऽपवादार्थमिति** । अणन्तत्वे तु ङीप् स्यात् । तन्निवृत्त्यर्थं णविधानमिति भावः, तदाह **मांसशीलेति** । 'शील समाधौ' इति भ्वादिः । इह तु

करोति तत्र वुन् । यस्तु बहुशोऽपि दुष्टं करोति तत्र नेति भावः । **आशिषि च** । अप्राप्तप्रार्थनमाशीः । सा च प्रयोक्तृधर्मो न प्रत्ययार्थः, 'कर्तरि कृत्' इति कर्त्रर्थे विधानादित्याशयेनाह **आशीर्विषयार्थेत्यादिना** । **जीवतादिति** । जीवनं तव भूयादित्यर्थः । **जीवक इति** । स्त्रियां तु टापि 'आशिषि वुनश्च न' इति निषेधात् 'प्रत्ययस्थात्-' इति इत्वाभावः । जीवका । **कर्मण्यण्** । **उपपदसमास इति** । 'तत्रोपपदम्-' इति कर्मादिवाच्यकुम्भादिवाचकपदस्योपपदसंज्ञायाम् 'उपपदमतिङ्' इति समास इत्यर्थः । **कुम्भकार इति** । अणि कृते 'कर्तृकर्मणोः कृति'

भ्यां च' (वा १९८१) सुखप्रतीक्षा । बहुक्षमा । कथं तर्हि गङ्गाधरभूधरादयः। कर्मणः शेषत्वविवक्षायां भविष्यन्ति । **२९१४ ह्वावामश्च । (३-२-२)** एभ्यः अण् स्यात् । कापवादः । स्वर्गह्वायः । तन्तुवायः । धान्यमायः । **२९१५ आतोऽनुपसर्गे कः । (३-२-३)** आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाण् । 'आतो लोपः' । गोदः । पार्ष्णित्रम् । अनुपसर्गे किम्—गोसन्दायः । 'कविधौ सर्वत्र संप्रसारणिभ्यो डः' (वा १९८४) । ब्रह्म

स्वभावतः सेवने वर्तते । मांसं स्वभावतः सेवमानेत्यर्थः । **मांसकामेति** । मांसं कामयते इति विग्रहः । **मांसभक्षेति** । मांसं भक्षयते इति विग्रहः । **कल्याणाचारेति** । कल्याणमाचरतीति विग्रहः । सर्वत्र टाप् । **ईक्षिक्षमिभ्यामिति** । वार्तिकमिदम् । ण इति शेषः । **कथमिति** । कर्मण्यणि गङ्गाधार इत्यादि स्यादित्याक्षेपः । **कर्मणः शेषत्वेति** । तथा च कर्मोपपदाभावान्नाणिति भावः । **ह्वावामश्च** । 'ह्वेञ् स्पर्धायाम्' 'वेञ् तन्तुसन्ताने' अनयो' कृतात्वयोर्निर्देशः 'माङ् माने' एषां द्वन्द्वात्पञ्चम्येकवचनम् । **एभ्य इति** । कर्मण्युपपदे एभ्यः अण् स्यादित्यर्थः । ननु 'कर्मण्यण्' इत्येव सिद्धे किमर्थमिदमित्यत आह **कापवाद इति** । 'आतोऽनुपसर्गे कः' इत्यस्याणपवादस्य वक्ष्यमाणस्य बाधनार्थमित्यर्थः । माङ्मेङो-रिह ग्रहणम्, नतु 'मा माने' इत्यस्य, अकर्मकत्वात् । **स्वर्गह्वाय इति** । यद्यपि पराभिभवेच्छायां स्पर्धाशां पराभिभवस्य कर्मणो धात्वर्थत्वेनोपसंग्रहादकर्मक इत्युक्तम् । तथापि इहाभिभवेच्छा धात्वर्थः । स्वर्गमभिभवितुं वाञ्छतीत्यर्थः । अन्तरङ्गत्वादात्वे कृते आतो युक् । एवमग्रेऽपि । **आतोऽनुपसर्गे कः** । **पार्ष्णित्रमिति** । पार्ष्णिः

इति षष्ठ्यन्तस्य कुम्भशब्दस्य कारशब्देन समासः । **शेषत्वविवक्षायामिति** । पदसंस्कारपक्षे तु धरतीति धरः, गङ्गाया धर इति कर्मणि या षष्ठी तदन्तेन समास इति सुवचम् । स्यादेतत्—धातोर्विधीयमानस्याणादेः पदविधित्वाभावेन समर्थपरिभाषाया अनुपस्थानात्पश्यति कुम्भं, करोति कटमित्यादावसमर्थादपि धातोरणादयः स्युरिति चेत् । अत्राहुः—कुम्भाद्युपपदे विधीयमानस्याणादेरपि पदाश्रितविधित्वात्समर्थपरिभाषोपस्थानान्नोक्तदोषः । उपोच्चारितं पदं ह्युपपदं पदं च सुप्तिङन्तमिति प्रागेवोक्तत्वादिति । **ह्वावामश्च** । **कापवाद इति** । 'आतोऽनुपसर्गे–' इति प्राप्तिर्बोध्या । **स्वर्गह्वाय इत्यादि** । 'ह्वेञ्वेञोः आदेच–' इत्यात्वे 'आतो युक्–' इति युक् । माङ् माने । मेङ् प्रणिदाने । अनयोरिह ग्रहणं न तु मा माने इत्यस्य अकर्मकत्वात् । कविधानस्य फलमाह **आतो लोप इति** । **पार्ष्णित्रमिति** । पार्ष्णिं त्रायत इति त्रैङ् पालने । **गोसंदाय इति** । अण्, युक् । **प्रसारणिभ्य इति** ।

जिनाति ब्रह्मज्यः। सर्वत्रग्रहणादातश्चोपसर्गे। आह्वः। प्रह्वः। २९१६ सुपि स्थः। (३-२-४) सुपीति योगो विभज्यते। सुप्युपपदे आदन्तात्कः स्यात्। द्वाभ्यां पिबतीति द्विपः। समस्थः। विषमस्थः। ततः 'स्थ'। सुपि तिष्ठतेः कः स्यात्। आरम्भसामर्थ्याद् भावे। आखूनामुत्थानमाखूत्थः। २९१७

पादमूलभागः। तं त्रायते इति विग्रहः। 'त्रैङ् पालने' आत्वे कृते कः। **गोसंदाय इति**। आयातो युक्। **कविधौ सर्वत्रेति**। वार्तिकमिदम्। सर्वत्र कप्रत्ययविधौ संप्रसारणार्हेभ्यः कापवादो डप्रत्ययो वाच्य इत्यर्थः। **ब्रह्मज्य इति**। 'ज्या वयोहानौ' अस्माड्डः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः अत्र कप्रत्यये सति कित्त्वाद् 'ग्रहिज्या-' इति संप्रसारणं प्रसक्तम्। अतो ड एव, न तु कः। **सर्वत्रेति**। उपसर्गे उपपदे आतोऽपि ड एव। न तु 'आतश्चोपसर्गे' इति कः। सर्वत्रग्रहणादित्यन्वयः। अन्यथा अनन्तरस्य विधिरिति न्यायाद् 'आतोऽनुपसर्गे कः' इत्येव बाध्येत न तु 'आतश्चोपसर्गे' इति कप्रत्यय इति भावः। **आह्वः प्रह्व इति**। अत्र 'आतश्चोपसर्गे' इति कं बाधित्वा ड एव। तस्य अकित्त्वाद्यजादिलक्षणं संप्रसारणं न। **सुपि स्थः। योगो विभज्यते इति**। इदं भाष्ये स्पष्टम्। तत्र सुपीत्यंशं व्याचष्टे **सुप्युपपद इति**। इदं केवलोपसर्गे व्यर्थम्, 'आतश्चोपसर्गे' इत्येव सिद्धेः। कर्मण्युपपदेऽप्येतद्व्यर्थमेव, आतोऽनुपसर्गे कः' इत्यारम्भादिति मत्वोदाहरति **द्वाभ्यामिति। तत इति**। सुपीत्यंशस्य व्याख्यानानन्तरं स्थ इत्यंशो व्याख्यायत इत्यर्थः। ननु सुपि इत्यंशेनैव सिद्धे किमर्थमिदमित्यत आह **आरम्भसामर्थ्यादिति**।

प्रसारणमिति संप्रसारणपर्यायः। **जिनातीति**। ज्या वयोहानौ। क्र्यादिभ्य इति श्नाप्रत्यये 'ग्रहिज्या-' इति संप्रसारणे पूर्वरूपे 'हलः' इति दीर्घे च कृते 'प्वादीनाम्-' इति ह्रस्वः। **ब्रह्मज्य इति**। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। पूर्वेण के हि सति कित्वात्संप्रसारणादौ च ब्रह्मजिय इति स्यात्। **आह्वः प्रह्व इति**। के हि सति 'वचिस्वपि-' इत्यादिना ह्वञः संप्रसारणे सति आहुवः प्रहुव इति स्यादिति बोध्यम्। **सुपि स्थः**। सुबिति प्रत्याहारो गृह्यते न तु सप्तमीबहुवचनम्। कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणात्। **आरम्भसामर्थ्यादिति**। कर्तरि पूर्वेणैव सिद्धत्वादिह 'कर्तरि कृत्' इति न संबध्यते, अनिर्दिष्टार्थश्च स्वार्थे धातोः स्वार्थे भाव एव। नन्वेवं 'घञर्थे कविधानम्' इत्यनेन गतार्थतेति चेत्, न, वार्तिकं दृष्ट्वा सूत्रकृतोऽप्रवृत्तेः। किं च 'षष्ठी' इति सूत्रेण पाक्षिकसमासे प्रसक्ते 'उपपदमतिङ्' इति नित्यसमासार्थमिदम्। अत एव ल्युडन्तेनास्वपदविग्रहमाह **आखूनामुत्थानमिति**। नन्वेवं घञर्थे कविधाने 'स्थास्नापाव्यधिहनियुध्यर्थम्' इति वार्तिक स्थाग्रहणं व्यर्थमिति चेत्,

प्रष्ठोऽग्रगामिनि । (८-३-९२) प्रतिष्ठत इति प्रष्ठो गौः,। अग्रतो गच्छतीत्यर्थः। 'अग्र' इति किम् —प्रस्थः। २९१८ **अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः** । (८-३-९७) स्थ इति कप्रत्ययान्तस्यानुकरणम्। षष्ठ्यर्थे प्रथमा। एभ्यः स्थस्य सस्य षः स्यात्। द्विष्ठः। त्रिष्ठः। इत ऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते। तत्रा-

---

कर्तरि 'सुपि' इति पूर्वेण सिद्धरिह 'कर्तरि कृत्' इति नानुवर्तते। आनिर्दिष्टार्थत्वाद् 'गुप्तिज्किद्भ्यः सन्' इत्यादिवत् स्वार्थिकोऽयम्। स्वार्थश्च भाव एवेति भाष्ये स्पष्टम्, नित्योपपदसमासार्थत्वात्। अत एव ल्युडन्तेन अस्वपदविग्रहं दर्शयन्नाह **आखूनामुत्थानम् आखूत्थ इति** । **प्रष्ठोऽग्रगामिनि**। प्रपूर्वात् स्थाधातोः 'आतश्चोपसर्गे' इति कप्रत्यये आतो लोपे प्रस्थशब्दः। सः अग्रगामिनि वाच्ये कृतषत्वः निपात्यते। इण्कवर्गाभ्यां परत्वाभावात् षत्वस्य न प्राप्तिः। **प्रतिष्ठत इति**। अग्रे गच्छतीत्यर्थः, उपसर्गवशात्। **प्रष्ठो गौरिति**। अग्रगामीत्यर्थः। एवं प्रष्ठोऽश्वो इत्यादि। **अम्बाम्ब**। अम्ब, आम्ब, गो, भूमि, सव्ये, अप, द्वि, त्रि, कुशे, कु, शङ्कु, अङ्गु, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि एषामष्टादशानां द्वन्द्वः। अम्बष्ठः, आम्बष्ठः, गोष्ठः, भूमिष्ठः। सव्येष्ठः, निपातनादलुक्। 'हलदन्तात्सप्तम्याः—' इति वा। अपष्ठः। एषु कतिपयेषु इण्कवर्गाभ्यां परत्वाभावात्।[1] षत्वस्य न प्राप्तिः। कतिपयेषु 'सात्पदाद्योः' इति निषेधः प्राप्तः। एवमग्रेऽपि **द्विष्ठ इति**। द्वाभ्यां तिष्ठतीति विग्रहः। एवं त्रिष्ठः, कुशेष्ठः, कुष्ठः, शङ्कुष्ठः अङ्गुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः। परमेष्ठः, निपातनादलुक् 'हलदन्तात्-' इति वा। बर्हिष्ठः। दिविष्ठः पूर्ववदलुक्।

अत्राहुः—अकर्तरि कारके विधानार्थं तत्र स्थाग्रहणमिति। **आखूत्थ इति**। स्था इत्यस्य के परे 'आतो लोपः' इत्यालोपः, 'उदः स्थास्तम्भोः—' इति उदः परस्य सस्य थः, उदो दस्य चर्त्वम्। अत्र प्राचा आखूत्थं वर्तत इति नपुंसके पठितं तदुपेक्ष्यमिति मनोरमायामुक्तम्। भाष्यादौ सर्वत्र पुँल्लिङ्गस्यैवोदाहृतत्वात्। 'ल्युः कर्तरीमनिज् भावे को घोः किः प्रादितोऽन्यतः' इत्यमरकोशे भावे कस्य पुंस्त्वविधानाद् 'भावे नणकचिद्भ्योऽन्ये' इति नपुंसकविधाने कस्य पर्युदासाच्चेति नणकचित्स्य इत्यत्र चकार इत्यस्य स चित् नश्च णश्च कश्च चिश्च नणकचितस्तेभ्योऽन्य इति विग्रहः। **अम्बाम्ब। अप्रत्ययान्तस्येति**। तेन भूमिस्थितं गोस्थानमित्यादौ नेति भावः। प्राचा तु स्थस्य सस्येति व्याख्यातव्ये स्थ सस्येति व्याख्यातं तदाकरविरोधेन कप्रत्ययान्तस्येत्यध्याहृत्य व्याख्येयम्। **द्विष्ठः। त्रिष्ठ इति**। द्वयोस्तिष्ठतीत्यादिविग्रहः। एवमम्बष्ठः आम्बष्ठः गोष्ठः भूमिष्ठः सव्यष्ठः अपष्ठः कुशेष्ठः कुष्ठः शङ्कुष्ठः अङ्गुष्ठः

---

१ 'सव्येऽपि' इति क्वचित्पाठः।

कर्मकेषु सुपीत्यस्य संबन्धः **२९१९ तुन्दशोकयोः परिमृजापनुदोः ।** (३-२-५) तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात् । 'आलस्यसुखाहरणयोरिति वक्तव्यम्' (वा १९८८) तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः । शोकापनुदः सुखस्याहर्ता । अलसादन्यत्र तुन्दपरिमार्ज एव । यश्च संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः । 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा १९८९) । मूलानि विभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । महीध्रः । कुध्रः । गिलतीति गिलः । **२९२० प्रे दाज्ञः ।** (३-२-६) दारूपाज्जानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यादणोऽपवादः । सर्वप्रदः । पथिप्रज्ञः । अनुपसर्ग इत्युक्तेः प्रादन्यस्मिन्सुपि न कः । गोसंप्रदायः । **२९२१ समि ख्यः ।** (३-२-७) गोसंख्यः । २९२२

अभिष्ठः । कप्रत्ययान्तस्येति किम्, भूमिस्थितम् । **इत ऊर्ध्वमिति** । 'तुन्दशोकयोः–' इत्यारभ्येत्यर्थः । **सुपीत्यस्येति** । न तु कर्मणीत्यस्य, असंभवादिति भावः । **तुन्दशोकयोः** । तुन्दशोकयोरिति सप्तमी । परिमृज, अपनुद, अनयोर्द्वन्द्वात्पञ्चम्यर्थे षष्ठी, तदाह **उपपदयोराभ्यामिति** । **तुन्दपरिमृज इति** । तुन्दम् उदरम् । अत्र 'मृजेरजादौ' इति पाक्षिकवृद्धिर्न भवति, व्यवस्थितविभाषाश्रयणादित्याहुः । **मूलानि विभुजतीति** । विमर्दयतीत्यर्थः । 'भुजो कौटिल्ये' तुदादिः । इहोपसर्गबलान्मर्दने वृत्तिः । **महीध्र इति** । महीं धरतीति विग्रहः । कित्त्वान्न गुणः । ऋकारस्य यण् रेफः । अणि तु महीधार इति स्यात् । **कुध्र इति** । कुः पृथ्वी, तां धरतीति विग्रहः । **गिल इति** । 'गॄ निगरणे' अस्मात् कः, कित्त्वान्न गुणः, इत्त्वं रपरत्वम् । 'अचि विभाषा' इति लत्वम् **प्रे दाज्ञः** । प्रे इति सप्तमी पञ्चम्यर्थे । दा, ज्ञा अनयोर्द्वन्द्वात् पञ्चम्येकवचनम् । **प्रोपसृष्टादिति** । प्रेत्युपसर्गपूर्वकादित्यर्थः । सोपसर्गार्थ आरम्भः । **समि ख्यः** । समीति पञ्चम्यर्थे सप्तमी । **गोसंख्य इति** । गाः संचष्ट इति विग्रहः । संपूर्वान् चक्षिङः ख्याञि

मक्षिष्ठः पुञ्जिष्ठः परमेष्ठः बर्हिष्ठः दिविष्ठः अग्निष्ठः । **आभ्यामिति** । परिमृजापनुदोरित्यत्र पञ्चम्यर्थे षष्ठीति भावः । **तुन्दपरिमृज इति** । अत्र मृजेरजादाविति वैकल्पिकी वृद्धिर्व्यवस्थितविभाषया नेत्येके । स्यादेवेत्यन्ये । **मूलविभुजादिभ्य इति** । तादर्थ्ये एषा चतुर्थी । मूलविभुजादिसिद्ध्यर्थमित्यर्थः । **प्रे दाज्ञः** । गामादाग्रहणेष्वविशेषादाह **दारूपादिति** । **पथिप्रज्ञ इति** । पन्थानं प्रकर्षेण जानातीत्यर्थः । **प्रादन्यस्मिन्निति** । प्रशब्दमात्रोपपदे अस्य सूत्रस्य चरितार्थत्वादुपसर्गान्तरे सति 'आतोऽनुपसर्गे–' इत्यनेनापि न भवतीति भावः । **गोसंख्य इति** ।

गापोष्टक्। (३-२-८) अनुपसृष्टाभ्यामाभ्यां टक्स्यात्कर्मण्युपपदे। सामगः-सामगी। उपसर्गे तु सामसंगायः। 'पिबतेः सुराशीध्वोरिति वाच्यम्' (वा १११०)। सुरापी। शीधुपी। अन्यत्र क्षीरपा ब्राह्मणी। सुरां पाति रक्षतीति सुरापा २९२३ **हरतेरनुद्यमनेऽच्।** (३-२-९) अंशहरः। अनुद्यमने किम्-भारहारः। 'शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्' (वा १११२) शक्तिग्रहः। लाङ्गलग्रहः। 'सूत्रे च धार्येऽर्थे' (वा १११३) सूत्रग्रहः। यस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव, सूत्रग्राहः।

रूपम्। 'ख्या प्रकथने' इत्यस्य तु संपूर्वस्य प्रयोगाभावात्, सार्वधातुकमात्रविषयत्वाच्च नेह संबध्यते। **गापोष्टक्।** 'गै शब्दे' 'पा पाने' इत्यनयोः टक् स्यात् कर्मण्युपपदे। **सामग इति।** टकि आतो लोपः। **सामगीति।** टित्त्वान्ङीबिति भावः। **सामसंगाय इति।** सोपसर्गाद् गैधातोः कर्मण्यणि आतो युक्ति रूपम्। **पिबतेरिति।** वार्तिकमिदम्। पाधातोः सुराशीध्वोरुपपदयोः टक् स्यादित्यर्थः। **क्षीरपेति।** क्षीरं पिबतीत्यर्थे सुराशीध्वोरन्यतरत्वाभावाद् 'आतोऽनुपसर्गे कः' इति कप्रत्यये टाप्। **पाति रक्षतीति।** 'पा रक्षणे' इति लुग्विकरणस्य पिबतिग्रहणेन अग्रहणमिति भावः। **हरतेरनुद्यमनेऽच्।** अनुद्यमने विद्यमानात्कर्मण्युपपदे अजित्यर्थः। उद्यमनम् उद्ग्रहणम। **अंशहर इति।** अंशस्य स्वीकर्तेत्यर्थः। **भारहार इति।** भारम् उद्गृह्णातीत्यर्थः। **ग्रहेरुपसंख्यानमिति।** अच्प्रत्ययस्येति शेषः। 'ग्रह उपादाने' अदुपधः। क्वचिद् गृहेरिति तु कृतसंप्रसारणस्य इका निर्देशः। **शक्तिग्रह इति।** अकित्त्वाच्च संप्रसारणम्। **लाङ्गलग्रह इति।** अंकुशग्रह इत्याद्यप्युदाहार्यम्। **सूत्रे चेति।**

गाः संचष्टे इति विग्रहः। चक्षिङः ख्याञ्। ख्या प्रकथन इत्यस्य तु संपूर्वस्य प्रयोगो नास्तीति न्यासकारः। सार्वधातुकमात्रविषयोऽसौ धातुरिति च मनोरमादौ स्थितम्। **गापोष्टक्।** इह गामादाग्रहणेष्वविशेषेऽपि गायतेरेव ग्रहणं न तु गाङ् गतौ गा स्तुतौ इत्यनयोः, अनभिधानात्। **सामगः। सामगीति।** एतेन टकः कित्त्वमालोपार्थं टित्त्वं तु ङीबर्थमिति ध्वनितम्। प्रत्ययाधिकाराट्टकः प्रत्ययत्वेन 'प्रत्ययः' 'परश्च' इति धातोः पर एव स्यादिति 'आद्यन्तौ टकितौ' इत्यस्यात्र आशङ्कैव नास्तीति बोध्यम्। **सामसंगाय इति।** कर्मण्यणि सति 'आतो युक्-' इति युक्। **पिबतेरिति।** 'लुग्विकरणालुग्विकरणयोः-' इति परिभाषालब्धार्थकथनम्, उपपदपरिगणनं तु वाचनिकमेव। **क्षीरपेति।** क्षीरं पिबतीत्यातोऽनुपसर्गे कः। **शक्तीति।** घटग्रहणेनैव सिद्धे घटीग्रहणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थम्। तेन मद्र-

२९२४ वयसि च। (३-२-१०) उद्यमनार्थं सूत्रम्। कवचहरः कुमारः। **२९२५ आङि ताच्छील्ये।** (३-२-११) पुष्पाण्याहरति तच्छीलः पुष्पाहरः। ताच्छील्ये किम्—भारहारः। **२९२६ अर्हः।** (३-२-१२) अर्हतेरच्स्यात्कर्मण्युपपदे अणोऽपवादः। पूजार्हा ब्राह्मणी। **२९२७ स्तम्बकर्णयो रमिजपोः।** (३-२-१३) 'हस्तिसूचकयोरिति वक्तव्यम्' (वा १९९४) स्तम्बे रमते स्तम्बेरमो हस्ती। 'तत्पुरुषे कृति—' (सू ९७२) इति 'हलदन्तात्—' (९६६) इति वा ङेरलुक्। कर्णेजपः सूचकः। **२९२८ शमि धातोः संज्ञायाम्।** (३-२-१४) शम्भवः। शंवदः। पुनर्धातुग्रहणं बाधकविषयेऽपि (अच्) प्रवृत्त्यर्थम्। कृञो हेत्वादिषु टो मा भूत्। शंकरा नाम

वार्तिकमिदम्। सूत्रे कर्मण्युपपदे धारणार्थकाद् ग्रहधातोरजित्यर्थः। **वयसि च।** कर्मण्युपपदे वयसि गम्ये हरतेरजित्यर्थः। ननु 'हरतेरनुद्यमनेऽच्' इत्येव सिद्धे किमर्थमित्यत आह **उद्यमनार्थमिति। आङि ताच्छील्ये।** आङ्पूर्वाद्धरतेः कर्मण्युपपदे अच् स्यात्ताच्छील्ये गम्ये। ताच्छील्यं तत्स्वभावता। **पुष्पाहर इति।** पुष्पाहरणे फलानपेक्षमेव स्वाभाविकी प्रवृत्तिरस्येत्यर्थः। **अर्हः। अणोऽपवाद इति।** यद्यपि अणि अचि च पूजार्हरूपे न विशेषः, अदुपधत्वाभावेन वृद्धेरप्रसक्तेः। तथापि स्त्रियामणन्तत्वे ङीप्स्यात्। तन्निवृत्तये अज्विधिः, तदाह **पूजार्हेति। स्तम्बकर्णयोः।** रम जप अनयोरकर्मकत्वात् कर्मणीति न संबध्यते। जपेः शब्दोच्चारणार्थकस्य धात्वर्थोपसंग्रहादकर्मकत्वं बोध्यम्। दर्भादितृणनिचयः स्तम्बः। **सूचकः।** पिशुनः। हस्तिसूचकयोः किम्? स्तम्बे रन्ता गौः। कर्णे जपिता गुरुः मशको वा। **शमि धातोः।** शमि इति सप्तम्यन्तम्। शमिति सुखार्थकमव्ययम्। तस्मिन्नुपपदे धातोरच् स्यात्संज्ञायाम्। ननु धातुग्रहणं व्यर्थम्। न च रमिजपोरननुवृत्त्यर्थं तदिति वाच्यम्, अस्वरितत्वादेव तदननुवृत्तिसिद्धेरित्यत आह **पुनर्धातुग्रहणमिति।** 'कृञो हेतुताच्छील्यानुलोम्येषु' इति टप्रत्ययः

राज्ञीत्यत्र टच्, द्विषतीताप इत्यत्र 'द्विषत्परयोः—' इति खच् नेति दिक्। **कवचहर इति।** कवचोद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयति। तेनासत्यपि कवचग्रहणे कवचहर इति भवत्येव। **हस्तिसूचकयोरिति।** अन्यत्र तु स्तम्बे रन्ता। कर्णे जपिता। **शमि धातोः।** शमि उपपदे धातुमात्रात्संज्ञायामच् स्यात्। **पुनर्धातुग्रहणमिति।** असति धातुग्रहणे शमि संज्ञायामित्यस्यावकाशः। शंभवः। शंवदः। 'कृञो हेतुताच्छील्य—' इत्यस्यावकाशः। श्राद्धकरः शंकर इत्यत्रोभयप्रसङ्गे परत्वाट्ट एव स्यात्। धातुग्रहणे कृते तु तत्सामर्थ्यादजेव भवति, तदाह **शंकरा**

परिव्राजिका तच्छीला। २९२९ अधिकरणे शेतेः। (३-२-१५) खे शेते खशयः। पार्श्वादिषूपसंख्यानम् (१९९६)। पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरेण शेते उदरशयः। उत्तानादिषु कर्तृषु (१९९८)। उत्तानः शेते उत्तानशयः। अवमूर्धशयः। अवनतो मूर्धा यस्य सः अवमूर्धा अधोमुखः शेते इत्यर्थः। गिरौ डश्छन्दसि(१९९९)गिरिशः। लोके गिरिशयः। कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति। गिरिरस्यास्तीति विग्रहे लोमादित्वाच्छः। २९३० चरेष्टः (३-२-१६) अधिकरणे उपपदे। कुरुचरः। कुरुचरी। २९३१ भिक्षासेनादायेषु च। (३-२-१७) भिक्षां चरतीति भिक्षाचरः। सेनाचरः। आदायेति ल्यबन्तम्। आदायचरः। कथम्। 'प्रेक्ष्य स्थितां सहचरीम्' इति। पचादिषु चरडिति

अच्प्रत्ययबाधको वक्ष्यते, तद्बाधनार्थमित्यर्थः। **अधिकरणे**। सुबन्तेऽधिकरणवाचिन्युपपदे शीङ्धातोरच् स्यादित्यर्थः। **पार्श्वादिष्विति**। अत्राधिकरणवाचिनीति न संबध्यते। तद् ध्वनयन्नुदाहरति **पार्श्वाभ्यामिति**। **उत्तानादिषु कर्तृष्विति**। वार्तिकमिदम्। उत्तानादिशब्देषु कर्तृवाचिषूपपदेषु शीङोऽजित्यर्थः। **गिराविति**। वार्तिकमिदम्। गिरावुपपदे शीङो डप्रत्यय इत्यर्थः। 'अधिकरणे शेते' इत्यचोऽपवादः। "नमो गिरिशाय च शिपिविष्टाय च" इति। शीङो डप्रत्यये डित्वसामर्थ्यादभस्यापि टेर्लोपः। यद्यपि वैदिकप्रक्रियायामेवेदं व्याख्येयम्। तथापि लोके डप्रत्ययस्य न प्रवृत्तिः किं त्वजेवेति प्रदर्शनार्थमिह तद्व्याख्यानमित्यभिप्रेत्य लोके अच्प्रत्ययमुदाहरति **गिरिशय इति**। **कथमिति**। लोके डप्रत्ययासंभवादिति भावः। समाधत्ते **गिरिरस्यास्तीत्यादि**। **चरेष्टः**। ट इति च्छेदः। अधिकरणे उपपदे इति शेषः। 'अधिकरणे शेतेः' इत्यतः तदनुवृत्तेरिति भावः। **कुरुचर इति**। कुरुषु चरतीति विग्रहः। न च 'अकर्मकधातुभिर्योगे–' इति कर्मत्वं शङ्क्यम्, तस्य वैकल्पिकतायाः तत्रैव प्रपञ्चितत्वात्। तत्र अत्रत्यमपि भाष्यं प्रमाणम्। **भिक्षासेना**। भिक्षा, सेना, आदाय एषु चोपपदेषु चरेष्टः स्यादित्यर्थः। **भिक्षां चरतीति**। चरतिरत्र चरणपूर्वक आर्जने वर्तते। चरणेन भिक्षामार्जयतीत्यर्थः। **सेनाचर इति**। सेनां प्रापयतीत्यर्थः। **ल्यबन्तमिति**। अत्र व्याख्यानमेव शरणम्। **आदाय चरतीति**। लब्धं द्रव्यं गृहीत्वा चरतीत्यर्थः।

नाभेत्यादि। अनधिकरणार्थमुपसंख्यानमिति दर्शयति **पार्श्वाभ्यामित्यादिना**। **कुरुचर इति**। कुरुषु देशेषु चरत्यटतीत्यर्थः। **भिक्षासेना**। अनधिकरणार्थ आरम्भः। **भिक्षां चरतीति**। चरतिरत्र चरणपूर्वके अर्जने वर्तते। चरणेन भिक्षामर्जयतीत्यर्थः। **सेनाचर इति**। सेनां चरति प्रविशतीत्यर्थः। **पचादि-**

पाठात्। २९३२ पुरोऽग्रतोऽग्रेषु सर्तेः। (३-२-१८) पुरःसरः। अग्रतःसरः। अग्रमग्रेणाग्रे वा सरतीत्यग्रेसरः। सूत्रेऽग्रे इत्येदन्तत्वमपि निपात्यते। कथं तर्हि 'यूयं तदग्रसरगर्वितकृष्णसारम्' इति। बाहुलकादिति हरदत्तः। २९३३ पूर्वे कर्तरि। (३-२-१९) कर्तृवाचिनि पूर्वशब्द उपपदे सर्तेष्टः स्यात्। पूर्वः सरतीति पूर्वसरः। कर्तरि किम्-पूर्वं देशं सरतीति पूर्वसारः। २९३४ कृञो हेतुताच्छील्यानुलोम्येषु। (३-२-२०) एषु द्योत्येषु करोतेष्टः स्यात्। 'अतः कृकमि-' (सू १६०) इति सः। यशस्करी विद्या। श्राद्धकरः। वचनकरः। २९३५ दिवाविभानिशाप्रभाभास्करान्तानन्ता-

---

कथमिति। अधिकरणे भिक्षासेनादायेषु उपपदेषु च विहितस्य टप्रत्ययस्य सहपूर्वाचरेरसंभवादिति भावः। समाधत्ते **पचादिष्विति**। यद्यपि भिक्षाचर इत्यादौ पचाद्यचि रूपसिद्धिः, तथापि नित्योपपदसमासार्थमज्विधानमित्याहुः। **पुरोऽग्रतः**। पुरस्, अग्रतस्, अग्रे एषूपपदेषु सर्तेः टः स्यादित्यर्थः। **अग्रेसर इति**। ननु समासावयवत्वात्सुपो लुकि अग्रसर इति स्याद् इत्यत आह **सूत्र इति**। **कथमिति**। एदन्तत्वनिपातनात् कथमग्रसरशब्द इत्यर्थः। समाधत्ते **बाहुलकादिति**। **पूर्वे कर्तरि**। कर्तृशब्दः कर्तृवाचिनि गौणः, तदाह **कर्तृवाचिनीति**। **कृञो हेतु**। हेतुः कारणम्। आनुलोम्यम् आराध्यचित्तानुवर्तनम्। **द्योत्येष्विति**। कर्तुरेव प्रत्ययवाच्यत्वादिति भावः। हेत्वादिषूपपदेष्विति तु नार्थः, व्याख्यानात्। कर्मण्युपपदे इत्यपि द्रष्टव्यम्। 'कुप्वोः' इति जिह्वामूलीयमाशङ्क्याह **अतः कृकमीति**। हेतावुदाहरति **यशस्करी विद्येति**। विद्या यशोहेतुः। **श्राद्धकर इति**। श्राद्धक्रियाशील इत्यर्थः। **वचनकर इति**। गुर्वादिवचनानुवर्तीत्यर्थः। **दिवाविभा**। दिवा, विभा, निशा, प्रभा, भास्, कार, अन्त, अनन्त, आदि, बहु, नान्दी, किम्,

---

ष्विति। टविधानं तु 'उपपदमतिङ्' इति नित्यसमासार्थम्। सहचरः। सहचरीत्यत्र तु सुप्सुपेति वैकल्पिकः समासः। **कृञो**। हेतुरिह लौकिको न तु 'तत्प्रयोजको हेतुश्च' इति कृत्रिमः, केवले कृञि तदसंभवात्। **द्योत्येष्विति**। न तु वाच्ये 'कर्तरि कृत्' इत्यस्य बाधापत्तेरिति भावः। हेत्वादिषु क्रमेणोदाहरति **यशस्करीत्यादि**। एषु किम्, कुम्भकारः। इह प्रसिद्धतरत्वाद् अनुबन्धोऽपि करोतिरेव गृह्यते न तु कृञ् हिंसायामिति। हेतुः कारणम्। आनुलोम्यमाराध्यचित्तानुवर्तनम्। **दिवाविभा**। ननु अन्तशब्देन नञ्समासे स्वीकृतेऽपीष्टसिद्धौ सूत्रे त्वन्तशब्दात्पृथगनन्तग्रहणं व्यर्थमिति चेत्। अत्राहुः—स्वरे तु विशेषोऽस्ति। नञ्समासे हि अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः स्यात्, अनन्तशब्दस्योपपदत्वे तु 'गतिकारकोपपदात्कृत्-' इति

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिविबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु। (३-२-२१) एषु कृञष्टः स्यादहेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादित्वात्सः। भास्करः। बहुकरः। बहुशब्दस्य वैपुल्यार्थं संख्यापेक्षया पृथग्ग्रहणम्। लिपिलिबिशब्दौ पर्यायौ। 'संख्या—एककरः। द्विकरः। कस्कादित्वादहस्करः। 'नित्यं समासेऽनुत्तरपदस्थस्य' (सू १२१) इति षत्वम्। धनुष्करः। अरुष्करः 'कियत्तद्बहुषु कृञोऽज्विधानम्।'

लिपि, लिबि, बलि, भक्ति, कर्तृ, चित्र, क्षेत्र, संख्या, जङ्घा, बाहु, अहर्, यद्, तद्, धनुस्, अरुस् एषां सप्तविंशतेर्द्वन्द्वात्सप्तमी। **एष्विति**। उपपदेष्विति शेषः। **अहेत्वादिष्वपीति**। हेतुताच्छील्यानुलोम्येषु अगम्येष्वपीत्यर्थः। हेत्वादिग्रहणस्य अननुवृत्तेरिति भावः। एतेन अहेत्वाद्यर्थमिदं सूत्रमुक्तं भवति। अत्र कर्मणीति सुपीति चानुवृत्तं यथायोगमन्वेति। **दिवाकर इति**। दिवेत्यकारान्तमव्ययमह्नीत्यर्थे। तस्याधिकरणशक्तिप्रधानस्यापि वृत्तिविषये कर्मत्वं बोध्यम्। दिवा अहनि अर्थात् प्राणिनश्चेष्टायुक्तान् करोतीति वा विग्रहः। **विभाकर इति**। विभां करोतीति विग्रहः। **निशाकर इति**। निशां करोतीति विग्रहः। एवं प्रभाकरः। भासः करोति इति विग्रहे 'अतः कृकमि-' इत्यत्रात इति तपरकरणात्सत्वस्याप्राप्तेः 'कुप्वोः—' इति जिह्वामूलीयविसर्गावाशङ्क्याह **कस्कादित्वादिति**। कारकरः, अन्तकरः, आदिकरः इति सिद्धवत्कृत्याह **बहुकर इति**। ननु संख्याग्रहणेनैव सिद्धे बहुग्रहणं व्यर्थमित्यत आह **बहुशब्दस्येति**। वैपुल्यवाचिनस्तस्य न संख्याशब्दत्वमिति 'बहुगणवतुडति संख्या' इत्यत्रोक्तम्। नान्दीकरः किंकर इति सिद्धवत्कृत्याह **लिपिलिबिशब्दस्येति**। तथा च लिपिकरः लिबिकरः क्षेत्रकर इत्यन्तं सिद्धवत्कृत्याह **संख्येति**। उदाहियते इति शेषः। जङ्घाकरः बाहुकर इति सिद्धवत्कृत्य अहस्करशब्दे 'कुप्वोः—' इति जिह्वामूलीयविसर्गावाशङ्क्याह **कस्कादित्वादिति**। नन्वि अहान्तरूपक्षे अहन्शब्दे हन्शब्दस्योत्तरपदतया तद्विसर्गस्य उत्तरपदस्थत्वाद् 'अतः कृकमि–' इत्यस्य न प्राप्तिरिति भावः। धनुष्करशब्दे आह **नित्यं समास इति**। प्रत्ययावयवत्वाद् 'इदुदुपधस्य च' इत्यस्य न प्राप्तिरिति भावः। **कृञोऽज्विधानमिति**। टस्यापवादः। **किंकरेति**। टप्रत्यये तु

कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वमिति। **दिवाकर इति**। दिवा दिवसं करोतीति विग्रहः। दिवाभूता रात्रिरित्यादाविव दिवाशब्दस्य वृत्तिविषये शक्तिमत्परत्वात्। मूलेऽनुक्तान्यपि कानिचिदुदाहरणानि ऊह्यानि। कर एव कारः। प्रज्ञादित्वादण्। कारं करोतीति कारकरः आदिकरः नान्दीकरः किंकरः बलिकरः भक्तिकरः कर्तृकरः

(वा २००२) इति वार्तिकम्। किंकरा। यत्करा। तत्करा। हेत्वादौ टं बाधित्वा परत्वादच्। पुंयोगे ङीष्। किंकरी। २९३६ **कर्मणि भृतौ**। (३-२-२२) कर्मशब्द उपपदे करोतेष्टः स्याद् भृतौ। कर्मकरो भृतकः। कर्मकारोऽन्यः। २९३७ **न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु**। (३-२-२३) एषु कृञष्टो न। हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकार इत्यादि। २९३८ **स्तम्बशकृतोरिन्**। (३-२-२४) 'व्रीहिवत्सयोरिति वक्तव्यम्'

टित्वाद् ङीप्स्यादिति भावः। हेत्वादिषु पूर्वविप्रतिषेधमाश्रित्य 'कृञो हेतु-' इति किङ्करादिषु ट एव। किङ्करीति न्यासकारमतं दूषयितुमाह **हेत्वादाविति**। पूर्वविप्रतिषेधाश्रयणस्य निर्मूलत्वादिति भावः। तर्हि किङ्करीति कथमित्यत आह **पुंयोगे ङीषिति**। **कर्मणि भृतौ**। कर्मणीत्यनुवृत्तौ पुनः कर्मग्रहणं तु कर्मशब्दस्वरूपग्रहणार्थम्। **कर्मकरो भृतक इति**। वेतनं गृहीत्वा यः परार्थं कर्म करोति स भृतक इत्युच्यते। **न शब्दश्लोक**। शब्द, श्लोक, कलह, गाथा, वैर, चाटु, सूत्र, मन्त्र, पद, एषां नवानां द्वन्द्वः। **हेत्वादिष्विति**। 'कृञो हेतुताच्छील्यानुलोम्येषु' इति प्राप्तः टप्रत्ययोऽनेन प्रतिषिध्यते इत्यर्थः। **स्तम्बशकृतोरिन्**।

चित्रकरः क्षेत्रकरः जङ्घाकरः बाहुकर इति। **वार्तिकमिति**। कैयटहरदत्तादिरीत्योक्तम्। माधवस्तु इष्टिरियमित्याह। **पुंयोगे ङीषिति**। यत्तु न्यासकृतोक्तम्—'हेत्वादिषु पूर्वसूत्रेण ट एव भवति तेन किंकरणशीला किंकरीत्युपपन्नं भवति' इति तन्नादर्तव्यम्। परत्वादचा टचो बाधितत्वात्पूर्वविप्रतिषेधस्य निर्मूलत्वाच्चेति भावः। वृत्तौ तु पक्षान्तरमप्युक्तम्, अथवा पचादिषु पाठः करिष्यत इति 'दिवाविभा-' इत्यस्मिन् सूत्रे किमादिग्रहणमपनीय पचादिष्वेव 'कियत्तद्बहुषु कृञः' इति पठितव्यं वार्तिकमपीत्थमेव नेयमिति तस्यायमाशयः। अस्मिन्पक्षे कर्मण्यणं बाधित्वा चरितार्थमिदं वचनं हेत्वादिविवक्षायां परत्वाट्टेन बाध्यते तेन पुंयोगं विनापि किंकरी स्यादेव, पुंयोगविवक्षायां तु निर्विवादो ङीष्, कियत्तद्बहुष्वज्वेति प्रक्रियायां विकल्पोक्तिस्त्वाकरविरुद्धत्वात्कर्मण्यणोऽपि पक्षे प्रसङ्गाच्चायुक्तैव। न चाजभावे 'दिवाविभा-' इति टः स्यादिति वाच्यम्, सूत्रे किमादिग्रहणापनयनस्य हरदत्तादिभिरुक्तत्वात्। अथवा सूत्रे किमाद्यपनयनं मास्त्विति प्रौढिवादेन प्रक्रियाग्रन्थः प्रगृह्य इति स्वीक्रियते। तथा च हेत्वाद्यविवक्षायां कियत्तदिति वार्तिकेनाच्, तद्विवक्षायां तु परत्वाट्ट इति विषयविशेषे व्याख्याभेदात् फलितं विकल्पमाश्रित्य प्रक्रियायामज्वेति प्राचोक्तमिति स्थितस्य गतिः समर्थनीया। **कर्मणि भृतौ**। भृतिर्वेतनम्। कर्मानुवृत्तौ पुनः कर्मग्रहणात्स्वरूपपरतेत्याह **कर्मशब्द इति**। **स्तम्बकरिरित्यादि**। इनो नित्वात्

(वा २००३) स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । व्रीहिवत्सयोः किम्-स्तम्बकारः । शकृत्कारः । २९३९ **हरतेर्दृतिनाथयोः पशौ** । (३-२-२५) दृतिनाथयोरुपपदयोर्हृञ इन्स्यात् पशौ कर्तरि । दृतिं हरति दृतिहरिः । नाथं नासारज्जुं हरतीति नाथहरिः । पशौ किम्-दृतिहरः, नाथहरः । २९४० **फलेग्रहिरात्मम्भरिश्च** । (३-२-२६) फलानि गृह्णाति फलेग्रहिः । उपपदस्य एदन्तत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते । आत्मानं बिभर्तीति आत्मम्भरिः । आत्मनो मुमागमः । भृञ इन् । चात्कुक्षिम्भरिः । चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः । 'ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः' इति मुरारिः । २९४१ **एजेः खश्** । (३-२-२८) ण्यन्तादेजेः खश् स्यात् । २९४२ **अरुर्द्विषदजन्तस्य मुम्** । (६-३-६७) अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्त उत्तरपदे, न

स्तम्बे शकृति च कर्मण्युपपदे कृञ इन् स्यात् । नकार इत् । **व्रीहिवत्सयोरिति** । व्रीहौ वत्से च कर्तरीत्यर्थः । स्तम्बशकृतोर्यथासंख्यमन्वयः । **स्तम्बकरिर्व्रीहिरिति** । स्तम्बं तृणनिचयं करोतीति विग्रहः । **हरतेर्दृतिनाथयोः** । दृतिः चर्मभस्त्रिका दृतिहारः श्वा इति वृत्तिः । नाथशब्दस्य विवरणम्-**नासारज्जुमिति** । नासिकाप्रोतरज्जुमित्यर्थः । **नाथहरिरिति** । नासिकाप्रोतरज्जुके पशुविशेषे रूढोऽयम् । **फलेग्रहिः** । **ग्रहेरिन्निति** । न तु 'गृहू ग्रहणे' इति ऋदुपधादित्यर्थः । **मुमागम इति** । आत्मन्शब्दस्य नलोपे कृते अकारादुपरि मुमित्यर्थः । चकारोऽनुक्तसमुच्चयार्थ इति मत्वाह **चात्कुक्षिम्भरिरिति** । भाष्ये तु 'भृञः कुक्ष्यात्मनोर्मुम् चेति वक्तव्यम्' इति स्थितम् । 'स्यादवन्ध्यः फलेग्रहिः' इति वृक्षपर्याये अमरः । 'उभावात्मम्भरिः कुक्षिम्भरिः स्वोदरपूरके' इति विशेष्यनिघ्नवर्गे । उदरम्भरिशब्दं समर्थयितुमाह **चान्द्रास्त्विति** । **एजेः खश्** । एजेरिति ण्यन्तस्य एजृधातोर्ग्रहणम् । न त्विका निर्देशः, व्याख्यानादिति भावः । खकारशकारावितौ । कर्मण्युपपदे इत्यपि ज्ञेयम् । **अरुर्द्विषत्** । अरुस्, द्विषत्, अजन्त एषां समाहारद्वन्द्वात् षष्ठी । 'अलुगुत्तरपदे' इत्यधिकाराद् उत्तरपदे इति लभ्यते । 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवृत्तम् । खितः प्रत्ययत्वात्तदन्तविधिः । तदाह

कृदुत्तरप्रकृतिस्वरेणोत्तरपदमाद्युदात्तम् । **कुक्षिम्भरिरिति** । एवं च 'गिरिस्तु कनकाचलः कति न सन्ति चाश्मव्रजाः किटिस्तु धरणीधरः कति न सन्ति भूदारकाः । मरुत्तु मलयानिलः कति न सन्ति झञ्झानिलाः प्रभुस्तु विबुधाश्रयः कति न सन्ति कुक्षिम्भराः ॥' इति केषांचित्प्रयोगः प्रामादिक एव । **एजेः खश्** । एजृ कम्पने । एजेरिति ण्यन्तस्य निर्देशो न तु शुद्धस्येका निर्देशः, खशः शित्करणाज्ञि-

व्ययस्य। खिश्वाच्छशादिः। जनमेजयतीति जनमेजयः। 'वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः खश उपसंख्यानम्' (वा २००५)। वातमजा मृगाः। **२१४३ खित्यनव्ययस्य।** (६-३-६६) खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात् ततो मुम्। शुनिन्धयः। तिलन्तुदः। शर्धञ्जहा माषाः। शर्धोऽपानशब्दस्तं जहतीति विग्रहः। जहातिरन्तर्भावितण्यर्थः। **२१४४ नासिकास्तनयोर्ध्माधेटोः।** (३-२-२९) अत्र वार्तिकम्-'स्तनधेटो नासिकायां ध्मश्चेति वाच्यम्'

खिदन्ते उत्तरपदे इति। जनमेजय इति। जनान् एजयतीति विग्रहः। खशः शित्वात्सार्वधातुकत्वं शप्, गुणायादेशौ, पररूपम्, सुपो लुकि, मुम्। **वातशुनीति।** वार्तिकमिदम्। वात, शुनी, तिल, शर्ध एषां द्वन्द्वात्सप्तमी। अज, धेट्, तुद, जहाति एषां द्वन्द्वात्पञ्चमी। यथासंख्यमन्वयः। **वातमजा इति।** वातमजन्तीति विग्रहः। सुपो लुकि मुम्। अथ शुनीं धयतीति विग्रह शुनीशब्दे उपपदे धेटः खशि अयादेशे पररूपे शुनी धय इति स्थिते आह **खित्यनव्ययस्य। ह्रस्वः स्यादिति।** 'इको ह्रस्वोऽङ्यो गालवस्य' इत्यतः तदनुवृत्तेरिति भावः। अत्र ह्रस्वश्रुत्या अच इत्युपस्थितं द्रष्टव्यम्। **ततो मुमिति।** पूर्वं ह्रस्वे कृते ततो मुमित्यर्थः। पूर्वं मुमि कृते तु अजन्तत्वभावाद्ध्रस्वो न स्यादिति भावः। **शर्धञ्जहा माषा इति।** भाष्ये तु मृगा इति पाठः। शर्धः अपानद्वारे स्थितः शब्द इति माधवादयः। **अन्तर्भावितेति।** तथा च शर्धं हापयन्तीति विग्रहः फलितः। भाष्ये तु 'वातशुनी–' इति वार्तिके गर्धेति ति पठितम्। **नासिका।** नासिका, स्तन अनयोः द्वन्द्वात्सप्तमी। ध्मा, धेट् अनयोः द्वन्द्वात्पञ्चम्यर्थे षष्ठी। खशिति शेषः। यथासंख्यमन्वये प्राप्ते आह **अत्र वार्ति-**

शात्। तद्धि सार्वधातुकत्वे सति शप् यथा स्यादिति। न च शुद्धस्य शब्दस्य शपि सत्यसति वा विशेषोऽस्ति। न चोत्तरार्थं शित्त्वमिति वाच्यम्, इहार्थवत्त्वे संभवति केवलोत्तरार्थत्वस्यान्याय्यत्वात्तदेतदाह **ण्यन्तादेजेरिति। अरुर्द्विषत्।** वर्णग्रहणे तदन्तविधेः सिद्धावप्यन्तग्रहणं शुनिंधय इत्यादौ ह्रस्वे कृते मुम्प्रवृत्त्यर्थम्। तथा हि अन्तःशब्दः समीपपरः अचासावन्तश्चेति विग्रहः। निपातनाद्विशेषणस्य परनिपातः। समीपः 'खित्यनव्ययस्य' इति सूत्रेण विहितो योऽच् तदन्तस्य मुमिति व्याख्यायते। एवं च जनमेजय इत्यादौ स्वतो ह्रस्वेऽपि मुम्सिद्धये प्रथमं खितीति ह्रस्वः प्रवर्तनीय इत्यवधेयम्। **शर्धञ्जहा इति।** शर्धनं शर्धः। शृधु कुत्सायाम्। घञ्। तं जहति इति। ननु माषाः शर्धमपानशब्दं त्याजयन्ति न तु स्वतो जहतीत्याशङ्कायामाह **अन्तर्भावितण्यर्थ इति।** यथासंख्यं वारयितुमाह **अत्रेति। धेटष्टित्त्वादिति।**

(वा २००६-७) । स्तनं धयतीति स्तनन्धयः । घेटष्टित्वात्स्तनन्धयी । नासिकन्धमः, नासिकन्धयः । २९४५ **नाडीमुष्ट्योश्च** । (३-२-३०) एतयोरुपपदयोः कर्मणोर्ध्माधेटोः खश् स्यात् । 'यथासंख्यं नेष्यते' । नाडिन्धमः नाडिन्धयः । मुष्टिन्धमः, मुष्टिन्धयः । 'घटीखारीखरीषूपसंख्यानम्' (वा २००८)। -घटिन्धमः, घटिन्धय इत्यादि । खारी परिमाणविशेषः । खरी गर्दभी । २९४६ **उदि कूले रुजिवहोः** । (३-२-३१) उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात् । कूलमुद्रुजतीति कूलमुद्रुजः । कूलमुद्वहः । २९४७ **वहाभ्रे**

कमिति । **घेटष्टित्वादिति** । यद्यपि 'टिड्ढ-' इत्यत्र टिदाद्यन्तं यददन्तं प्रातिपदिकमिति व्याख्यातम् तथापि टित्त्वस्यावयवे अचरितार्थत्वाद् ङीबिति हरदत्तः । अत्र यद्वक्तव्यं तत् 'पाघ्राध्माधेट्दृशः शः' इत्यत्रोक्तम् । **नासिकन्धम इति** । ह्रस्वे कृते मुम् । नासिकायाः ध्मश्चेति चकाराद्धेटश्चेति लभ्यते । तस्योदाहरति **नासिकन्धय इति** । **नाडीमुष्ट्योश्च** । **यथासंख्यं नेष्यत इति** । इदं तु भाष्ये स्पष्टम् । **घटीखारीति** । इत्यादि स्पष्टम् । **उदि कूले** । उदीति दिग्योगपञ्चम्यर्थे सप्तमी । रुजिवहोरिति पञ्चम्यर्थे षष्ठी । 'रुजो भङ्गे' तुदादिः । अत्र रुजेः सकर्मकत्वात् कर्मण्युपपदे इति लब्धम् । तेन कूलं विशेष्यते । न तु उच्छब्दः, तस्य असत्त्ववाचित्वात्, तदाह **उत्पूर्वाभ्यामित्यादि** । **कूलमुद्रुज इति** । सुपो लुकि मुमिति भावः । **वहाभ्रे लिहः** । वहे अभ्रे च कर्मण्युप-

---

अवयवे अचरितार्थत्वादिति भावः । खश्प्रत्ययान्तादेव घेटो ङीबिष्टो नान्यत इति वर्धमानक्षीरस्वामिहरदत्तादयः । तेन 'पाघ्राध्माधेट्-' इति शप्रत्यये 'आतोऽनुपसर्गे कः' इति कप्रत्यये च टाबेव । धया कन्या । गां धयतीति गोधा । अत्र च संप्रदाय एव शरणम् । **नासिकंधम इति** । 'पाघ्राध्मा-' इति ध्मादेशः । **नाडीमुष्ट्योश्च** । **यथासंख्यं नेति** । एतच्चेहैव सूत्रे भाष्ये वृत्तौ च स्थितम् । यत्तु 'यथासंख्यम्' इति सूत्रे नाडीमुष्ट्योरित्युदाहृतं भाष्ये तत्प्राप्तिमात्राभिप्रायेणेत्येके । शब्दकौस्तुभे तु मतभेदेन तद्बोध्यमिति स्थितम् । **घटीखारीखरीष्विति** । जयादित्यस्तु वातशब्दमप्युदाजहार । वातंधमः, वातंधय इति । तत्तु भाष्यादौ न दृश्यत इति मूले एवोपक्षितम् । **उदि कूले** । ननु कूलस्येवोच्छब्दस्यापि सप्तम्यन्तत्वादुपपदत्वं स्यात्तश्च रुजिवहिभ्यां सह यथासंख्यं स्यादिति चेत् । अत्राहुः—नाडीमुष्ट्योरितिवल्लाघवादुत्कूलयोरिति वक्तव्ये उदीति व्यस्तोच्चारणाश्चोपपदम् । एवं चोदीति पञ्चम्याः स्थाने सप्तमी, रुजिवहोरिति तु पञ्चम्याः स्थाने षष्ठीति । एतच्च यथासंख्यसूत्रे कैयटे स्पष्टम् । किं च रुजेः सकर्मकत्वात्कर्मणीत्युपतिष्ठते तेन कूलं विशेष्यते नोच्छब्दः,

लिहः । (३-२-३२) वहः स्कन्धस्तं लेढीति वहंलिहो गौः । अदादित्वाच्छपो लुक् । खशो ङित्वान्न गुणः । अभ्रंलिहो वायुः । २९४८ **परिमाणे पचः ।** (३-२-३३) प्रस्थम्पचा स्थाली । खारिम्पचः कटाहः । २९४९ **मितनखे च ।** (३-२-३४) मितम्पचा ब्राह्मणी । नखम्पचा यवागूः । पचिरत्र तापवाची । २९५० **विध्वरुषोस्तुदः ।** (३-२-३५) विधुन्तुदः मुमि कृते संयोगान्तस्य लोपः । अरुन्तुदः । २९५१ **असूर्यललाटयोर्दृशितपोः ।** (३-२-३६) असूर्यमित्यसमर्थसमासः । दृशिना नञः संबन्धात् । सूर्यं न पश्यन्तीत्यसूर्यम्पश्या राजदाराः । ललाटन्तपः सूर्यः । २९५२ **उग्रम्पश्येरम्मदपाणिन्धमाश्च ।** (३-२-३७) एते निपात्यन्ते । उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश् । उग्रं पश्यतीत्युग्रम्पश्यः । इरोदकं तेन

पदे लिहः खशित्यर्थः । वहशब्दस्य विवरणम्-**स्कन्ध इति । शपो लुगिति ।** खशः शित्त्वेन सार्वधातुकत्वात् कृतस्य शपो लुगित्यर्थः । **परिमाणे पचः ।** परिमाणं प्रस्थादि । तस्मिन् कर्मण्युपपदे पचेः खशित्यर्थः । **खारिम्पच इति ।** 'खित्यनव्ययस्य' इति ह्रस्वः । मुम् । **मितनखे च ।** मिते नखे च कर्मण्युपपदे पचेः खशित्यर्थः । नखानां विक्लित्त्यसंभवादाह **पचिरत्रेति । विध्वरुषोस्तुदः ।** विधु, अरुस्, अनयोः कर्मणोरुपपदयोः तुदः खशित्यर्थः । **विधुंतुद इति ।** विधुश्चन्द्रः तं तुदतीति विग्रहः । राहुरित्यर्थः । अरुस्शब्दे उकारादुपरि मुमि कृते सकारस्य संयोगान्तलोप इत्यर्थः । **अरुन्तुद इति ।** अरुर्मर्म तत्तुदतीति विग्रहः । **असूर्यललाट ।** दृशितपोरिति पञ्चम्यर्थे षष्ठी । असूर्ये ललाटे च कर्मण्युपपदे दृशेस्तपेश्च खशित्यर्थः । **असूर्यमितीति ।** असूर्यंपश्या इत्युदाहरणे असूर्यमित्यसमर्थसमासः सौत्र इत्यर्थः । कुतोऽसामर्थ्यमित्यत आह **दृशिनेति ।** सूर्यं न पश्यन्तीत्यर्थे नञो दृशिनान्वितत्वेन सूर्यशब्देनान्वयाभावादित्यर्थः । **ललाटन्तपः सूर्य इति ।** ललाटं तपतीति विग्रहः । सूर्यं पश्यतो ललाटस्य अवश्यं तापादिति भावः । **उग्रम्पश्य ।** उग्रम्पश्य, इरम्मद, पाणिन्धम एषां द्वन्द्वः । **उग्रम्पश्य इति ।** खशि शप्, पश्यादेशः । इराशब्दस्य विवरणम्-**उदकमिति । इरम्मद**

असत्त्ववाचित्वेनासंभवात् , तदेतदाह **उत्पूर्वाभ्यामित्यादिना । विधुन्तुद इति ।** 'अरुर्द्विषदजन्तस्य ' इत्यु तरात्परो मुम् । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः' इत्यमरः । **अरुन्तुद इति ।** 'अरुन्तुदं तु मर्मस्पृक्' इत्यमरः । 'व्रणोऽस्त्रियामीर्ममरुः' इति च । **असूर्यपश्या इति ।** 'पाघ्राध्मा-' इति पश्यादेशः । गुप्तिपरं चेदम् । एवं नाम राजदारा गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति किं पुनः

माद्यति दीप्यतेऽबिन्धनत्वादिति इरम्मदो मेघज्योतिः । इह निपातनाच्छयच । पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽध्वा । अन्धकाराद्यावृत इत्यर्थः । तत्र हि सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते । २९५३ **प्रियवशे वदः खच्** । (३-२-३८) प्रियंवदः । वशंवदः । 'गमेः सुपि वाच्यः' (वा २००९) । असंज्ञार्थमिदम् । मितङ्गमो हस्ती । 'विहायसो विह इति वाच्यम् (वा २०१०) खच डिद्वा वाच्यः' (वा २०११) । विहङ्गः, विहङ्गमः । भुजङ्गः, भुजङ्गमः । २९५४ **द्विषत्परयोस्तापेः** । (३-२-३९) खच् स्यात् ।

इति । 'खित्यनव्ययस्य' इति ह्रस्वः । मदर्दैवादिकत्वात् श्यनमाशङ्क्याह **निपातनाच्छयन्नेति** । **पाणिन्धम इति** । शपि 'पाघ्रा–' इति धमादेशः । **प्रियवशे** । प्रिये वशे च कर्मण्युपपदे वदधातोः खजित्यर्थः । खशि प्रकृते खज्विधेरुत्तरसूत्रे प्रयोजनं वक्ष्यते । **गमेः सुपि वाच्य इति** । खजिति शेषः । ननु संज्ञायामित्यनुवृत्तौ 'गमश्च' इति वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदं वार्तिकमित्यत आह **असंज्ञार्थमिदमिति** । **विहायस इति** । विहायश्शब्दः आकाशे वर्तते । तस्मिन्नुपपदे गमेः खच् । 'गमश्च' इति वक्ष्यमाणसूत्रेण पूर्ववार्तिकेन वा सिद्धः खच् 'च' इत्यनूद्यते । प्रकृतेर्विहायश्शब्दस्य विहादेशो वाच्यः, स च खच् डिद्वा वाच्य इत्यर्थः । **विहङ्ग इति** । डित्वपक्षे तत्सामर्थ्यादभस्यापि टेर्लोपः । **विहङ्गम इति** । विहायसा गच्छतीति विग्रहः । **भुजङ्गम इति** । भुजैर्गच्छतीति विग्रहः । **द्विषत्परयोः** । 'तप दाहे' चुरादिः, 'तप सन्तापे' भ्वादिः ।

परपुरुषमिति । तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुध्यते । यदा तु सूर्याभावदर्शनमात्रं सूर्येतरचन्द्रादेर्दर्शनं वा विवक्षितं तदा खश् न भवत्यनभिधानादिति न्यासकारादयः । **प्रियवशे वदः खच्** । खकारो मुमर्थश्चकारस्तु 'खचि ह्रस्वः' इति विशेषणार्थ इति वृत्तिः । खे ह्रस्व इत्युच्यमाने एजेः खश् जनमेजय इत्यत्रापि स्यादिति तदाशयः । 'एकानुबन्धग्रहणे द्व्यनुबन्धस्य न ग्रहणम्' इति खशि न भविष्यतीत्यादिना वृत्तिग्रन्थस्यायुक्तत्वमाहुः । खशि प्रकृते प्रत्ययान्तकरणमुत्तरार्थम् । द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथा स्यातां शप् च माभूदिति । नन्वेवमुत्तरत्रैव क्रियतामिति चेत् । सत्यम् । इह करणमन्यतोऽपि क्वचिद् भवतीति ज्ञापनार्थम्, तेन 'गमेः सुपि–' इति नापूर्वं वार्तिकं किं तु ज्ञापकसिद्धमेव । **असंज्ञार्थमिति** । संज्ञायां तु वक्ष्यमाणेन 'गमश्च' इति सूत्रेणैव सिद्धमिति भावः । **विहंगम इति** । विहायसा आकाशेन गच्छतीति विग्रहः । पूर्ववार्तिकेनैक्यमकृत्वा 'खच डिद्वा' इति पृथक्करणसामर्थ्यादन्यत्रापि क्वचिद्भवतीत्याशयेनोदाहरति **भुजंगः, भुजंगम इति** । इह 'गमेः

२९५५ **खचि ह्रस्वः।** (६-४-९४) खच्परे णौ उपधाया ह्रस्वः स्यात्। द्विषन्तं परं वा तापयतीति द्विषन्तपः परन्तपः। घटघटीग्रहणाल्लिङ्गविशिष्टपरिभाषा अनित्या। तेनेह न। द्विषतीं तापयतीति द्विषतीतापः। २९५६ **वाचि यमो व्रते।** (३-२-४०) वाक्शब्द उपपदे यमेः खच्स्याद्व्रते गम्ये। २९५७ **वाचंयमपुरन्दरौ च।** (६-३-६९) वाक्पुरोरमन्तत्वं निपात्यते। वाचंयमो मौनव्रती। व्रते किम्-अशक्त्यादिना वाचं यच्छतीति वाग्यामः। २९५८ **पूःसर्वयोर्दारिसहोः।** (३-२-४१) पुरं दारयतीति पुरन्दरः।

द्वयोरपि एयन्तयोस्तापेरिति निर्देशः। **खच् स्यादिति।** द्विषत्, पर अनयोः कर्मणोरुपपदयोः तापेः खजित्यर्थः। द्विषत् तापि अ इति स्थिते आह **खचि ह्रस्वः।** 'दोषो णौ' इत्यतो णाविति 'ऊदुपधायाः–' इत्यत उपधाया इति चानुवर्तते, तदाह **खच्परे णाविति।** खशि प्रकृते खचो विधिरिह ह्रस्वार्थः णिलोपार्थश्च। खशि तु तदुभयं न स्यात्, खशः शित्वेन सार्वधातुकतया णिलोपासंभवात्। न च इहैव सूत्रे खज्विधीयताम्, पूर्वसूत्रे खशेवानुवर्तताम् इति वाच्यम्, अन्यतोऽपि विधानार्थत्वात्। एवं च 'यमेः सुपि–' इति वार्तिकम् एतल्लब्धार्थकथनपरमेवेत्याहुः। **द्विषन्तप इति।** 'अरुर्द्विषत्–' इति तकारात्प्राग् मुम्। **परन्तप इति।** परः शत्रुः। ननु लिङ्गविशिष्टपरिभाषया द्विषतीशब्देऽप्युपपदे तापेः खचि द्विषतीतप इति स्यात्। द्विषतीताप इत्यणन्तं न स्यादित्यत आह **घटघटीति।** 'शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानम्' इत्यत्र घटग्रहणेनैव लिङ्गविशिष्टपरिभाषया घटीशब्दस्यापि सिद्धे पुनर्घटीग्रहणाद् लिङ्गविशिष्टपरिभाषा अनित्येति विज्ञायते इत्यर्थः। उपपदविधौ लिङ्गविशिष्टपरिभाषा नेति ङ्याप्सूत्रे भाष्याच्चेत्यपि द्रष्टव्यम्। **वाचि यमो व्रते।** इत्यादि वक्तव्यम्। **वाचंयमपुरन्दरौ च। वाक्पुरोरिति।** वाचं यच्छतीति, पुरं दारयतीति च विग्रहे यमेर्दारेश्च खच्। सुपो लुकि वाच् यम, पुर् दार, इति स्थिते वाक्पुरोरमन्तत्वं निपात्यते इत्यर्थः। 'अरुर्द्विषदजन्तस्य–' इति मुमस्तु न प्रसक्तिः। **पूःसर्वयोर्दारिसहोः।** दारिसहोरिति पञ्चम्यर्थे षष्ठी। पुर्शब्दे सर्वशब्दे च कर्मवाचिन्युपपदे दारेः सहेश्च खजित्यर्थः। यथासंख्यमन्वयः। दारीति एयन्तस्य ग्रहणम्। **पुरन्दर इति।** पुरं दारयतीति

सुपि–' इति खच्। **द्विषंतप इति।** 'अरुर्द्विषत्–' इति मुमि कृते संयोगान्तलोपः। **वाचि यमो व्रते। निपात्यत इति।** न चैवं खच् प्रत्ययोऽप्यत्रैव निपात्यतामिति वाच्यम्, व्रतादन्यत्रापि प्रसङ्गात्। यदि तु निपातनबलादेव व्रतविषयता आश्रीयते तत्रैव वा व्रतग्रहणं क्रियते वाचंयमो व्रते पुरंदरश्चेति तदा इह 'वाचि

सर्वंसहः । सहिग्रहणमसंज्ञार्थम् । 'भगे च दारेः' (वा २०१३) इति काशिका । बाहुलकेन लब्धमिदमित्याहुः । भगं दारयतीति भगन्दरः । २९५९ सर्वकूलाभ्रकरीषेषु कषः । (३-२-४२) सर्वंकषः खलः । कूलंकषा नदी । अभ्रंकषो वायुः । करीषंकषा वात्या । २९६० मेघर्तिभयेषु कृञः । (३-२-४३) मेघङ्करः । ऋतिङ्करः । भयङ्करः । भयशब्देन तदन्तविधिः । अभयङ्करः । २९६१ क्षेमप्रियमद्रेऽण् च । (३-२-४४) एषु कृञोऽण्स्यात् । चात्खच् । क्षेमङ्करः, क्षेमकारः । प्रियङ्करः, प्रियकारः । मद्रङ्करः, मद्रकारः । वेति वाच्ये-ऽण्ग्रहणं हेत्वादिषु टो मा भूदिति । कथं तर्हि 'अल्पारम्भः क्षेमकरः' इति । कर्मणः शेषत्वविवक्षायां पचाद्यच् । २९६२ आशिते भुवः करणभावयोः । (३-२-४५) आशितशब्द उपपदे भवतेः खच् । आशितो भवत्यनेनाशितम्भव

विग्रहे दारेः खचि णिलोपे 'खचि ह्रस्वः' इत्युपधाह्रस्वे सुपो लुकि 'वाचंयमपुरन्दरौ च' इति निपातनादमन्तत्वम् । ननु 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' इत्येव सिद्धे सहधातोरिह ग्रहणं व्यर्थमित्यत आह **असंज्ञार्थमिति** । **भगे चेति** । इत्यादि स्पष्टम् **ऋतिङ्कर इति** । ऋतिर्गमनम् । अभयङ्करशब्दं साधयितुमाह **भयशब्देन तदन्तविधिरिति** । इदं च 'येन विधिः—' इत्यत्र भाष्ये स्पष्टम् । **क्षेमप्रिय** । ननु 'क्षेमप्रियमद्रे वा' इति खचो विकल्पविधौ खजभावे 'कर्मण्यण्' इत्यस्य सिद्धत्वादण्ग्रहणं व्यर्थमित्यत आह **वेति वाच्ये इति** । **हेत्वादिष्विति** । 'कृञो हेतुताच्छील्यानुलोम्येषु' इति विहित इत्यर्थः । **कथं तर्हीति** । 'कृञो हेतु—' इत्यस्य अणा बाधात् क्षेमकार इति भवितव्यम् । खचि तु मुम् स्यादित्याक्षेपः । समाधत्ते **कर्मणः शेषत्वेति** । तथा च कर्मोपपदाभावाद् अणभावे चाजिति भावः । क्षेमङ्करीति तु गौरादित्वाद् ङीषित्याहुः । **आशिते** । करणे उदाहरति **आशितो भवत्यनेनेति** । भावे उदाहरति

यमो व्रते' इति सूत्रम्, 'पूःसर्वयोः—' इत्यत्र पुरिदारेरित्यंशश्च शक्यमकर्तुम् । **पूःसर्वयोः** । दॄ विदारणे अयमेव गृह्यते न तु दॄ भये दृङ् आदर इत्येताविति संप्रदायः । असंज्ञार्थमिदम् । संज्ञायां तु 'संज्ञायां भृतॄवृजि—' इति वक्ष्यमाणेन सिध्यतीति भावः । **आशितंभव इति** । यावता ओदनेन अतिथ्यादिर्भोजितो भवति स एवमुच्यते । इह वासरूपविधिना ल्युडपि । आशितभवनम्, घञ् तु बाध्यत एव सरूपत्वादित्याहुः । न चात्र क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति ल्युटो निषेधः शङ्क्यः । यत्र हि घञादेर्बाधकत्वेन क्तल्युडादयः प्रसक्तास्तत्र नित्यं बाधो न तु विकल्पेनेति तस्यार्थः । इह तु ल्युटोऽप्यपवादः खच् । अत्र वासरूपन्यायो निर्बाध एव । एतच्च आशित-

ओदनः। आशितस्य भवनमाशितम्भवः। २९६३ संज्ञायां भृतॄवृजिधारिसहितपिदमः। (३-२-४६) विश्वं बिभर्तीति विश्वम्भरः। विश्वम्भरा। रथन्तरं साम। इह रथेन तरतीति व्युत्पत्तिमात्रम्, न त्ववयवार्थानुगमः। पतिंवरा कन्या। शत्रुंजयो हस्ती। युगन्धरः पर्वतः। शत्रुंसहः। शत्रुन्तपः। अरिन्दमः। दमिः शमनायाम्, तेन सकर्मक इत्युक्तम्। मतान्तरे तु अन्तर्भावितण्यर्थोऽत्र दमिः। २९६४ गमश्च। (३-२-४७) सुतङ्गमः २९६५ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः। (३-२-४८) संज्ञायामिति निवृत्तम्। एषु गमेर्डः स्यात्। डित्वसामर्थ्यादभस्यापि टेर्लोपः। अन्तं गच्छतीत्यन्तग इत्यादि। 'सर्वत्रपन्नयोरुपसंख्यानम्' (वा २०१४)। सर्वत्रगः। पन्न

आशितस्य भवनमिति। संज्ञायाम्। खजिति शेषः भृ, तॄ, वृ, जि, धारि, सहि, तपि, दमि एषामष्टानां समाहारद्वन्द्वात्पञ्चमी। विश्वम्भर इति। विष्णोरियं संज्ञा। विश्वम्भरेति। पृथिव्याः संज्ञा इयम्। रथन्तरमिति। तॄधातो खच्। रथेन तरितृत्वस्य सामविशेषे असंभवादाह इहेति। वृधातोरुदाहरति पतिंवरेति। शत्रुञ्जय इति। जिधातोः खच्। धारीति ण्यन्तग्रहणम्, तस्योदाहरति युगन्धर इति। युगं धारयतीति विग्रहः। 'खचि ह्रस्वः' इत्युपधाह्रस्वः, णिलोपः। शत्रुंसह इति। शत्रून् सहते इति विग्रहः। ह्रस्वादि पूर्ववत्। एवमग्रेऽपि। शत्रुन्तप इति। शत्रून् तपतीति विग्रहः। अरिन्दम इति। अरिषु निग्रहविषये शमयतीत्यर्थः। दमिः शमनायामिति। 'दमु उपशमे' इति धातुपाठे उपशमशब्दे शमेर्ण्यन्ताद् घञ्। तथा च दाम्यतीत्यस्य उपशमयतीत्यर्थश्रवणात् सकर्मकत्वमिति माधवादिमते सकर्मकोऽयमित्यर्थः। मतान्तरे त्विति। 'दमु उपशमे' इत्युपशमार्थस्य दमेरकर्मकत्वमिति हरदत्तादिभिरुक्तमित्यर्थः। गमश्च। संज्ञायां खजिति शेषः। अन्तात्यन्त। इत्यादि

भवनमित्युदाहरतो जयादित्यस्यापि संमतमेवेति दिक्। संज्ञायां भृतॄ। 'विश्वंभरः कैटभजित्'। 'रसा विश्वंभरा स्थिरा' इत्यमरः। व्युत्पत्तिमात्रमिति। तत्फलं तु स्वरावग्रहौ 'रथंतरमाजभारा वसिष्ठः' इत्यत्र हि रथमित्यवगृह्णन्ति। कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वं चाधीयते। अखण्डत्वे त्ववग्रहो न स्यात्फिषस्वरेणाद्युदात्तश्च स्यात्। इत्युक्तमिति। माधवाद्यनुरोधेनेत्यर्थः। मतान्तरे त्विति। हरदत्तादिमत इत्यर्थः। चित्तव्यापारोपरमः शमः, इन्द्रियव्यापारोपरमस्तु दम इत्यादि वेदान्तग्रन्थाश्चेहानुकूलाः। संज्ञायां किम्, कुटुम्बं बिभर्तीति कुटुम्बंभारः। गमश्च। पूर्वसूत्र एव गमिर्नोक्तः उत्तरसूत्रे गमेरेवानुवृत्तिर्यथा स्यात्। भृतॄप्रभृतीनां माभूदिति।

पतितं गच्छतीति पन्नगः । पन्नमिति पद्यतेः क्तान्तं क्रियाविशेषणम् । 'उरसो लोपश्च' (वा २०१५) । उरसा गच्छतीत्युरगः । 'सुदुरोरधिकरणे' (वा २०१६) । सुखेन गच्छत्यत्र सुगः । दुर्गः । 'अन्यत्रापि दृश्यत इति वक्तव्यम्' (वा २०१८) । ग्रामगः । 'डे च विहायसो विहादेशो वक्तव्यः' (वा २०१२) । विहगः । २९९६ आशिषि हनः । (३-२-४९) शत्रुं वध्यात्शत्रुहः । आशिषि किम्-शत्रुघातः । 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' (वा २०१९) । दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण् टकारश्चान्तादेशो वक्तव्य इत्यर्थः । दार्वाघाटः । 'चारौ वा' (वा २०२०) चार्वाघाटः, चार्वाघातः । 'कर्मणि समि च' (वा २०२१) । कर्मण्युपपदे संपूर्वाद्धन्तेरुक्तं वेत्यर्थः । वर्णान्संहन्तीति वर्णसंघाटः । पदसंघाटः । वर्णसंघातः । पदसंघातः । २९९७ अपे क्लेशतमसोः । (३-२-५०) अपपूर्वाद्धन्तेर्डः स्यात् । अनाशीरर्थमिदम् ।

व्यक्तम् । **सर्वत्रपन्नयोरिति** । सर्वत्रशब्दे पन्नशब्दे चोपपदे गमेर्डस्योपसंख्यानमित्यर्थः । **उरस इति** । उरसि उपपदे गमेर्डे उरश्शब्दान्त्यस्य लोपश्चेति वक्तव्यमित्यर्थः । **सुदुरोरिति** । सु, दुर् अनयोरुपपदयोर्गमेर्डः स्याद् अधिकरणे वाच्ये इत्यर्थः । **अन्यत्रापि दृश्यत इति** । अन्येष्वप्युपपदेषु अन्येभ्योऽपि धातुभ्यो डो दृश्यते इत्यर्थः । अनेनैव सिद्धे 'सर्वत्रपन्नयोः' इत्यादि प्रपञ्चार्थमेव । एवं च 'सप्तम्यां जनेर्डः' इत्यत्रापि 'अन्येष्वपि दृश्यते' इति प्रपञ्चार्थमेव । **डे चेति** । विहायसो विह इत्युक्तस्य खज्विषयत्वादिदं वचनम् । **विहग इति** । खचि तु मुमि विहङ्गम इति रूपम् । **आशिषि हनः** । कर्मण्युपपदे हन्तेर्डः स्याद् आशिषि गम्यमानायामित्यर्थः । **शत्रुघात इति** । आशीरभावाड्डाभावे अण् । 'हनस्त-' इति तत्वम् । **दारावाहन इति** । वार्तिकमिदम् । दारौ आहनः अण् अन्तस्येति च्छेदः । अण्संनियोगेन टत्वविधानार्थमिदम् । **चारौ वेति** । वार्तिकमिदम् । चारुशब्दे उपपदे आङ्पूर्वाद्धन्तेः अण्, अन्तस्य टः वा स्यादित्यर्थः । **कर्मणि समि चेति** । वार्तिकमिदम् । **उक्तं वेति** । अण् अन्तस्य ट इत्यर्थः । चाराविस्यस्यानुवृत्तिनिवृत्तये कर्मणीत्युक्तिः । **अपे क्लेशतमसोः** । 'आशिषि हनः' इत्येव सिद्धे किमर्थमिदमित्यत आह **अनाशीरर्थमिति** ।

सुदुरोरिति । कर्मणि तु 'ईषद्दुःसुषु-' इति खलेव । सुखेन गम्यत इति सुगमः पन्थाः । दुर्गमः । **दाराविति** । शब्दापेक्षया पुंल्लिङ्गता, तदाह **दारुशब्दे इति** । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः । टविधानार्थमिदम् । अण् तु 'कर्मण्यण्' इत्येव सिद्धः । 'अलोऽन्त्यस्य' इत्येव सिद्धेऽन्तग्रहणं स्पष्टार्थम् । अन्यथा हि टप्रत्ययः संभा-

क्लेशापहः पुत्रः । तमोऽपहः सूर्यः । २९६८ **कुमारशीर्षयोर्णिनिः** । (३-२-५१) कुमारघाती । शिरसः शीर्षभावो निपात्यते । शीर्षघाती २९६९ **लक्षणे जायापत्योष्टक्** । (३-२-५२) हन्तेष्टक्स्याल्लक्षणवति कर्तरि । जायाघ्नो ना । पतिघ्नी स्त्री । २९७० **अमनुष्यकर्तृके च** । (३-२-५३) जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । अमनुष्य इति किम्-आखुघातः शूद्रः । अथ कथं बलभद्रः प्रलम्बघ्नः, शत्रुघ्नः कृतघ्न इत्यादि । मूलविभुजादित्वात्सिद्धम् । चोरघातो नगरघातो हस्तीति तु बाहुलकादणि । २९७१ **शक्तौ हस्तिकवाटयोः** । (३-२-५४) हन्तेष्टक्स्याच्छक्तौ द्योत्यायाम् । मनुष्यक-

---

कुमारशीर्षयोर्णिनिः । अनयोरुपपदयोः हन्तेर्णिनिः स्यादित्यर्थः । नकारादिकार उच्चारणार्थः । **लक्षणे** । **लक्षणवतीति** । सूत्रे लक्षणशब्दः अर्शआद्यजन्त इति भावः । **जायाघ्नो नेति** । जायाहननसूचकलक्षणवान् पुरुष इत्यर्थः । 'गमहन-' इत्युपधालोपः । **पतिघ्नी स्त्रीति** । पतिहननसूचनलक्षणवतीत्यर्थः । टित्वाद् ङीप् । **अमनुष्य** । अमनुष्यकर्तृके धात्वर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे टगित्यर्थः । **जायाघ्नस्तिलकालक इति** । तिलाकृतिकृष्णबिन्दुरित्यर्थः । पूर्वसूत्रस्य लक्षणवति कर्तरि प्रवृत्तिरिति भावः । **अथ कथमिति** । प्रलम्बघ्नादौ हन्तेर्मनुष्यकर्तृकतया टकोऽसंभवादित्याक्षेपः । समाधत्ते **मूलविभुजादित्वात्सिद्धमिति** । कप्रत्ययेनेति भावः । ननु चोरघातो हस्तीत्यादि कथम्, अमनुष्यकर्तृकत्वेन हन्तेष्टको दुर्वारत्वादित्यत आह **चोरघात इत्यादीति** । **बाहुलकादणीति** । 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादणि समाधेयमिति भावः । **शक्तौ हस्तिकवा-**

च्येत । दार्वाहन्तीति दार्वाघाटः । गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । **कुमारशीर्षयोर्णिनिः** । एतयोः कर्मणोरुपपदयोर्हन्तेर्णिनिः स्यात् । 'सुप्यजातौ-' इत्यादिभिः सिद्धे ताच्छील्यावश्यकाधमर्ण्यविरहेऽपि णिन्यर्थं शिरसः शीर्षभावार्थं वचनम् । **लक्षणवतीति** । सूत्रे लक्षणशब्दोऽर्शआद्यजन्त इति भावः । **जायाघ्न इति** । जायामरणसूचकं पाणिरेखाविशेषादिकं यस्यास्ति स तां हन्तीति गौणो व्यवहारः । एवं पतिघ्नीत्यत्रापि बोध्यम् । **अमनुष्यकर्तृके च** । मनुष्यभिन्नकर्तृकेऽर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे ठक् स्यात् । यद्यप्यमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाहेति प्रागुक्तं तथापीह लक्ष्यानुरोधेन व्याख्यातव्यमित्याशयेनाह **तिलकालक इत्यादि** । नानुबन्धकृतमसारूप्यमिति ठगणोः सारूप्याद्वासरूपविध्यप्रवृत्तेराह **बाहुलकादिति** । **शक्तौ हस्ति** । शक्तौ किम्, विषेण हस्तिनं हन्तीति हस्तिघातः । यद्यपीह शक्तिरस्ति अशक्तस्य कर्तृत्वानुपपत्तेस्तथापि शक्तिग्रहणसामर्थ्यात्प्रकर्षो विज्ञा-

तूकार्थमिदम् । हस्तिघ्नो ना । कवाटघ्नश्चोरः । कपाटेति पाठान्तरम् । **२९७२ पाणिघताडघौ शिल्पिनि । (३-२-५५)** हन्तेष्टक्टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः । पाणिघः । ताडघः । शिल्पिनि किम्-पाणिघातः ताडघातः । 'राजघ उपसंख्यानम्' (वा २०२२) । राजानं हन्ति राजघः । **२९७३ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् । (३-२-५६)** एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन्स्यात् । अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम् । अच्वौ किम्-आढ्यीकुर्वन्त्यनेन । इह प्रतिषेधसामर्थ्याल्ल्युडपि नेति काशिका । भाष्यमते तु ल्युट् स्यादेव ।

टयोः । **हस्तिघ्न इति** । हस्तिनं हन्तुं शक्त इत्यर्थः । एवं कवाटघ्नः । **पाणिघताडघौ** । पाणिना हन्तीति पाणिघः । ताडः ताडनं तेन हन्तीति ताडघः । मल्लादिः । **राजघ उपसंख्यानमिति** । राजघशब्दे उक्तनिपातनस्य उपसंख्याननमित्यर्थः । **आढ्यसुभग** । आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध, प्रिय एषां सप्तानां द्वन्द्वात्सप्तमी । **ख्युन् स्यादिति** । करणे वाच्ये इति शेषः । 'करणाधिकरणयोश्च' इति ल्युडपवादोऽयम् । कर्तरीति तु अत्र न संबध्यते । **आढ्यङ्करणमिति** । सजातयनुवर्तनमिति शेषः । कृञः ख्युन् अनादेशः, 'अरुर्द्विषदजन्तस्य–' इति मुम् । सुभगङ्करणमित्याद्यप्युदाहार्यम् । **आढ्यीकुर्वन्त्यनेनेति** । अत्र च्विप्रत्ययसत्वाद् न ख्युन्निति भावः । ननु ल्युडपवादभूतख्युनभावपक्षे उत्सर्गभूतो ल्युट् कुतो नेत्यत आह **इहेति** । यदि ल्युडपवादख्युनभावे उत्सर्गभूतो ल्युट् स्यात्, तदा ख्युन्विधिरनर्थकः स्यात् । च्व्यन्ते उपपदे ख्युन्ल्युटोः रूपे विशेषाभावात् । न च ख्युनि मुम्, ल्युटि तदभाव इत्यस्ति विशेष इति वाच्यम्, च्विप्रत्ययान्तस्याव्ययत्वेन ख्युनि सत्यपि मुमभावाद् 'अरुर्द्विषदजन्तस्य–' इत्यत्रानव्ययस्येत्यनुवृत्तेः । एवं च 'अच्वौ' इति च्व्यन्ते उपपदे ख्युनः प्रतिषेधसामर्थ्यात् ख्युनभावे ल्युडपि नेति विज्ञायत इति काशिकामतमित्यर्थः । एवं च 'अच्वौ' इति च्व्यन्ते उपपदे ख्युन्प्रति-

---

यते तेन स्वबलेनैव हन्तुं या शक्तिः सा गृह्यते । **कपाटघ्न इति** । कं शिरः पाटयति प्रविशत इति कपाटम् । पाठान्तरे तु अटतेः पचाद्यच् । 'कवं चोष्णे' इत्यत्र योगविभागात्कोः कवादेश इति हरदत्तः । **आढ्यसुभग । च्व्यर्थेष्विति** । अभूततद्भावविषयेष्वित्यर्थः । **आढ्यंकरणमिति** । लिङ्गविशिष्टपरिभाषया आढ्याशब्देऽप्युपपदे यदा ख्युन् तदापि 'खित्यनव्ययस्य' इति ह्रस्वेन एतदेव रूपम् । **आढ्यीकुर्वन्त्यनेनेति** । नन्विह ख्युनोऽभावेऽपि 'करणाधिकरणयोश्च' इति ल्युटा भवितव्यमित्यत आह **प्रतिषेधसामर्थ्यादिति** । तथाहि आढ्यीकरणमिति रूपं

अच्वावित्युत्तरार्थम्। २९७४ **कर्तरि भुवः खिष्णुच्खुकञौ।** (३-२-५७)
आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ स्तः। अनाढ्यः आढ्यो भवतीति आढ्यम्भविष्णुः आढ्यम्भावुकः। 'स्पृशोऽनुदके क्विन्' (सू ४३२)। घृत-

---

षेधः ख्युनभावपक्षे ल्युडभावार्थ इति स्थितम्। **भाष्यमते त्विति।** भाष्ये 'ख्युनि च्विप्रतिषेधानर्थक्यम्। ल्युट्ख्युनोरविशेषात्। मुमर्थमिति चेन्न, अव्ययत्वात्, इत्यादिसंदर्भेण अच्विग्रहणं ख्युन्विधौ प्रत्याख्याय 'अच्वौ' इत्युत्तरार्थमित्युक्तम्। तन्मते तु च्व्यन्ते उपपदे ख्युना मुक्ते ल्युट् स्यादेवेत्यर्थः। **कर्तरि भुवः।** खिष्णुचि खचावितौ। खुकञि खञावितौ। **आढ्यम्भविष्णुरिति।** अनाढ्य आढ्यो भवतीति विग्रहः। **आढ्यम्भावुक इति।** ञित्त्वाद्वृद्धिः। करणग्रहणानुवृत्तिनिवृत्तये कर्तृग्रहणम्। खिष्णुचि इकारस्तु व्यर्थ एव इटा सिद्धेः। अच्वौ किम्? आढ्यी-

---

ल्युट्ख्युनोस्तुल्यम्। न च ख्युनि मुम्ह्रस्वौ स्यातामिति वाच्यम्, अनव्ययस्येति पर्युदासात्। 'ऊर्यादिच्विडाचश्च' इति निपातसंज्ञकत्वेन च्व्यन्तस्य अव्ययत्वात्। न च ख्युनि सति 'उपपदमतिङ्' इति नित्यसमासो लभ्यते, ल्युटि तु नेति वाच्यम्, ल्युट्यपि गतिसमासस्य संभवात्। तस्यापि नित्यसमासत्वात्। न च ङीप्प्रत्यये विशेषः, ल्युटि 'टिड्ढा–' इति सूत्रेण ख्युनि तत्रत्येन ख्युन उपसंख्यानेन च ङीपस्तुल्यत्वात्। नापि स्वरे विशेषः, ल्युटि लित्स्वरेण ख्युनि नित्स्वरेण कृत्स्न उदात्तत्वाविशेषात्। न चोत्तरार्थमच्वावित्युक्तमिति वाच्यम्, केवलोत्तरार्थत्वे हि तत्रैव ब्रूयात्। तदेतदुक्तम् **इह ल्युडपि नेति। भाष्यमते त्विति।** भाष्यवार्तिकस्वरसेन ल्युडिष्ट इति केवलोत्तरार्थत्वं लभ्यते। अतस्तद्विरोधाद् वृत्तिकृन्मतमयुक्तमिति कैयटः। **कर्तरि भुवः। अच्व्यन्तेष्विति।** अच्वावित्यनुवर्तते। अन्यथा आढ्यीभविष्णुः आढ्यीभावुक इति स्यादिति भावः। कर्तृग्रहणं करणानुवृत्तिभ्रमनिरासार्थमुत्तरार्थं चेति प्राञ्चः। वस्तुतस्तु व्यर्थमेव अस्वरितत्वादेवाननुवृत्तिसिद्धेः, उत्तरत्राप्युपयोगो नेति स्पष्टीकरिष्यमाणत्वाच्च। खकारो मुमर्थः। चकारः 'चितः' इत्यन्तोदात्तार्थः। ञकारो वृद्ध्यर्थः। स्यादेतत्—खिष्णुच इकारो मास्तु ख्ष्णुरित्येवोच्यताम्, एवं चकारोऽपि न कर्तव्यः प्रत्ययस्वरेणैवाभिमतसिद्धेः, इकारादित्वसिद्धये इडागमे कृतेऽपि 'आगमा अनुदात्ताः' इति तस्यानुदात्तत्वात्। न च 'कृत्योकेष्णुच्चार्वादयश्च' इति स्वरसूत्रे अस्य ग्रहणं न स्यात्। चकारानुबन्धाभावादिकारस्य लाक्षणिकत्वात्षत्वणत्वयोरसिद्धत्वेनेष्णु इति रूपभावाच्चेति वाच्यम्। कृतेऽपि इकारे 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषया अलंकृञादीष्णुच एव ग्रहणं स्यान्न त्वेतस्य। इकारोच्चारणसामर्थ्यादस्या ग्रहणमिति चेदन्तैवं ख्ष्णुजयमस्तु तत्रेटि कृते चकारानु-

स्पृक्। कर्मणीति निवृत्तम्। मन्त्रेण स्पृशतीति मन्त्रस्पृक्। 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (सू ३७३) व्याख्यातम्। 'त्यदादिषु दृशोऽनालोचने कञ्च' (सू ४२९)। 'समानान्ययोश्चेति वाच्यम्' (वा २०२९) सदृक्, सदृशः। अन्यादृक्, अन्यादृशः। 'क्सोऽपि वाच्यः' (वा २०३०)। तादृक्षः। सदृक्षः। अन्यादृक्षः। **२९७५ सत्सूद्विषद्रुहदुहयुजविदभिदच्छि-**

भविता। **स्पृशोऽनुदके क्विन्निति**। व्याख्यातं हलन्ताधिकारे। **निवृत्तमिति**। अत्र व्याख्यानमेव शरणम्। **समानान्ययोश्चेति**। अनयोरुपपदयोः दृशः क्विन्कञावित्यर्थः। **सदृक्, सदृश इति**। समानो दृश्यते इति न विग्रहः, कर्तर्येव क्विन्विधानात्। किन्तु कर्मकर्तरि क्विन्कञौ। समानः पश्यतीति विग्रहः। समानत्वेन ज्ञानविषयो भवतीत्यर्थे इति भाष्ये स्पष्टम्। 'दृग्दृशवतुषु' इति समानस्य सभाव-विकल्पः। तत्र 'विभाषोदरे' इत्यतो विभाषानुवृत्तेः समानदृक् सदृक् समानदृशः सदृश इति भाष्याच्च **अन्यादृगिति**। 'आ सर्वनाम्नः' इत्यात्वम्। **क्सोऽपीति**। त्यदादिषु समानान्ययो‍श्च दृशेः क्सोऽपि वाच्य इत्यर्थः। **सत्सूद्विष**। सद्, सू, द्विष, द्रुह, दुह, युज, विद, भिद, छिद, जि, नी, राज् एषां द्वन्द्वात्पञ्चम्यर्थे षष्ठी। अनुपसर्गे इत्यस्य निवृत्त्यैव सिद्धे उपसर्गेऽपीति वचनम् अन्यत्र सुब्ग्रहणे उपसर्ग-ग्रहणं नेति ज्ञापनार्थम्। तेन 'वदः सुपि क्यप् च' इति विधिरुपसर्गे न भवतीति

बन्धसामर्थ्यादस्यापि ग्रहणमस्त्विति किमिकारेणेति चिन्त्यमेतत्। न चेह लाघवाभावादिकारोऽस्तु चकार एव मास्त्विति शङ्क्यम्, एकमात्रो ह्रस्वो व्यञ्जनं त्वर्धमात्रकमिति सर्वसंमतत्वात्। यत्तु हरदत्तेनोक्तं षत्वणत्वयोः सामर्थ्यादस्य ग्रहणमिति तदापाततः स्नुजपेक्षया णुजुक्तौ प्रत्युत प्रक्रियालाघवेन षत्वणत्वयोः करणस्योचिततया सामर्थ्यायोगादिति दिक्। **निवृत्तमिति**। ननु स्पृशेः सकर्मकत्वात्कर्मण्युपपद इत्येव प्राप्येत इति चेत्। अत्र प्राञ्चः—पूर्वसूत्रात्कर्तरि इत्यनुवर्तते सा चानुवृत्तिः 'कर्तरि कृत्' इत्यनेनैव कर्तरि क्विनः सिद्धत्वाद्व्यर्था सती कर्तृप्रचयार्था, कर्मण्युपपदे एकः कर्ता करणादौ चापर इत्येवं कर्तृप्रचयस्तथा च सुबन्ते उपपदे इति फलितं भवतीति मन्त्रस्पृगित्यत्रापि सिद्धमिति। वस्तुतस्तु कर्तृग्रहणं व्यर्थमिति पूर्वसूत्र एवोक्तम्। न चेह कर्तृप्रचयार्थं तदावश्यकमिति शङ्क्यम्, मन्त्रस्पृगित्यादेः क्विपापि सिद्धेः। न च क्विपि कुत्वं न स्यादिति वाच्यम्। क्विन्प्रत्ययो यस्मादिति बहुव्रीहि-बलादेव कुत्वसंभवादिति दिक्। **सदृगिति**। तमिवेमं पश्यन्ति जनाः स इवायं पश्यति ज्ञानविषयो भवतीति व्युत्पत्त्या कर्मकर्तरि प्रत्ययो रूढ्यर्थानुगुणत्वात्। **सत्सूद्विष**। षद्लृ विशरणादौ। सू इति द्विषा साहचर्यात्सूतेरादादिकस्य ग्रहणं न

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्। (३-२-६१) एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। उपनिषत्। अण्डसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निविदित्यादि। 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' (वा २०६४)। अग्रणीः। ग्रामणीः। २९७६ **भजो ण्विः।** (३-२-६२) सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्। अंशभाक्। प्रभाक्। २९७७ **अदोऽनन्ने।** (३-२-६८) विट् स्यात्। आममत्ति आमात्। सस्यात्। अनन्ने किम्–अन्नादः। २९७८ **क्रव्ये च।** (३-२-६९) अदेर्विट्। पूर्वेण सिद्धे वचनमण्बाधनार्थम्। क्रव्यात्। आममांसभक्षकः। कथं तर्हि 'क्रव्यादोऽस्रप आशरः' इति। पक्वमांस-

---

भाष्ये स्पष्टम्। **द्युसदिति।** दिवि सीदतीति विग्रहः। 'सात्पदाद्योः' इति न षत्वम्। 'पूर्वपदात्' इति षत्वं तु न भवति, तस्य च्छान्दसत्वाद् 'आदितेया दिविषदः' इत्यत्र सुषामादित्वात् षत्वमित्याहुः। **उपनिषदिति।** 'सदिरप्रतेः' इति षत्वम्। **इत्यादीति।** काष्ठभित्, रज्जुच्छित्। शत्रुजित्, 'ह्रस्वस्य पिति–' इति तुक्। सेनानीः, विराट्। **अग्रग्रामाभ्यामिति।** असमानपदत्वादप्राप्ते णत्वे वचनम्। **भजो ण्विः।** सुपि उपसर्गे चोपपदे भजेर्ण्विरित्यर्थः। **अंशभागिति।** ण्वित्त्वादुपधावृद्धिः। **अदोऽनन्ने। विट् स्यादिति।** शेषपूरणमिदम्। अन्नशब्दभिन्ने सुप्युपपदे अदेर्विट् स्यादिति फलितम् 'जनसनखनक्रमगमो विट्' इति छान्दससूत्राद्विडित्यनुवर्तते। **सस्यादिति।** सस्यमत्तीति विग्रहः। **अन्नाद इति।** कर्मण्यण्। **क्रव्ये च। अदेर्विडिति।** शेषपूरणमिदम्। **अण्बाधनार्थमिति।** क्रव्ये अदेर्विडेव न त्वणित्यर्थलाभादिति भावः। **कथं तर्हीति।** क्रव्ये

तु सुवतिसूयत्योः। युजिर् योगे, युज समाधौ, द्वयोरपि ग्रहणम्। विद ज्ञाने, विद विचारणे, विद सत्तायाम्, त्रयाणामपि ग्रहणम्। विदॢ लाभे इत्यस्य तु न ग्रहणम्। विदेत्यकारस्य विवक्षितत्वात्। **द्युसदिति।** 'पूर्वपदात्–' इति षत्वं तु न भवति छन्दसीत्यनुवृत्तेः। तथा च माघः—'मनस्सु येन द्युसदां न्यधीयत' इति। 'आदितेया दिविषदः' इत्यत्र तु सुषामादित्वात्षत्वमिति माधवादयः। उपनिषदित्यत्र तु 'सदिरप्रतेः' इति षः। **अग्रग्रामाभ्यामिति।** 'स एषां ग्रामणीः' इति निर्देशेन ज्ञापितमेतत्। नीरूपप्रत्ययविषयत्वे चेदम्, तेन कर्मण्यणि णत्वं न भवति। ग्रामनायः। ज्ञापकस्य सामान्यविषयत्वाद् अग्रशब्दोपपदादपि णत्वं तेनाग्रणीरित्यपि सिद्धमित्याहुः। **अदोऽनन्ने। विट् स्यादिति।** 'जनसनखनक्रमगमो विट्' इति पूर्वसूत्रानुवृत्तेः पूर्वसूत्रं त्विह नोपन्यस्तम्। तत्र हि 'छन्दसि सहः' इत्यतश्छन्दसीत्य-

शब्दे उपपदेऽण् । उपपदस्य क्रव्यादेशः, पृषोदरादित्वात् । २९७९ दुहः कब्घश्च । (३-२-७०) कामदुघा । २९८० अन्येभ्योऽपि दृश्यन्ते । (३-२-७५) छन्दसीति निवृत्तम् । मनिन्, क्वनिप्, वनिप्, विच् एते प्रत्ययाः धातोः स्युः । २९८१ नेड्वशि कृति । (७-२-८) वशादेः कृत इयन्न स्यात् । शॄ, सुशर्मा । प्रातरित्वा । २९८२ विड्वनोरनुनासिकस्याऽऽत् । (६-४-४१) अनुनासिकस्य आत्स्यात् । विजायत इति विजावा । ओणृ, अवावा । विच्, रोट् । रेट् । सुगण् । २९८३ क्विप् च । (३-२-७६) अयमपि दृश्यते । 'सत्सूद्विष—' (सू २९७४) इति त्वस्यैव प्रपञ्चः । उखा-

---

उपपदे अदेविडेवेति नियमादणोऽसंभवादित्याक्षेपः । समाधत्ते पक्वमांसशब्द इति । तर्हि पक्वमांसाद इति स्यादित्यत आह उपपदस्य क्रव्यादेश इति । कुत इत्यत आह पृषोदरादित्वादिति । दुहः कब्घश्च । सुप्युपपदे दुहः कप्स्यात् प्रकृतेर्घश्चान्तादेश इत्यर्थः । कामदुघेति । धेनुरिति शेषः । काममपेक्षितं दुग्धे इति विग्रहः । अन्येभ्योऽपि दृश्यन्ते । 'विजुपे छन्दसि' 'आतो मनिन्क्वनिब्वनिपश्च' इत्यधिकारे इदं सूत्रम् । निवृत्तमिति । व्याख्यानादिति भावः । मनिनि अन्यो नकार इत्, इकार उच्चारणार्थः । क्वनिपि वनिपि च पकार इत्, इकार उच्चारणार्थः । नेड्वशि कृति । षष्ठ्यर्थे सप्तम्यौ । वशा कृद्विशेष्यते । तदादिविधिः, तदाह वशादेरिति । सुशर्मेति । शॄधातोर्मनिन् । प्रातरित्वेति । इणधातोः क्वनिप् । विड्वनोरनुनासिकस्याऽऽत् । विड्वनोरिति सप्तमी । अनुनासिकस्य आदिति छेदः । विजावेति । जनेर्वनिप् । जनेर्नकारस्य आकारः । सवर्णदीर्घः । अवावेति । ओणेर्वनिप् । णकारस्य आकारः अवादेशः । विजिति । उदाह्रियते इति शेषः । रोट् रेडिति । 'रुष, रिष हिंसायाम्' विच् । 'वेरपृक्तस्य' इति वलोपः । सुगणिति । गणेर्विच् । क्विप् च । अयमपीति । सर्वधातुभ्यः सोपपदेभ्यः निरुपपदेभ्यश्च छन्दसि लोके च क्विब् दृश्यते इत्यर्थः ।

नुवर्तनात् । कामदुघेति । धेनुरिति शेषः । कामं दोग्धीति विग्रहः । अन्येभ्योऽपि दृश्यन्ते । इह 'विजुपे छन्दसि' इत्यतो विच् प्रत्ययः । 'आतो मनिन्-' इति सूत्रान्मनिनादयश्चानुवर्तन्ते, तदाह मनिन्क्वनिबित्यादि । सुशर्मेति । सुष्ठु शृणातीति विग्रहः । प्रातः एतीति प्रातरित्वा । इणः क्वनिपि 'ह्रस्वस्य पिति-' इति तुक् । अवावेति । अनुनासिकस्य आत्वे अवादेशः । सौ दीर्घनलोपौ । रोट् रेडिति । रुष रिष हिंसायाम् । उपधागुणः । जश्त्वचर्त्वे । वाहभ्रडिति पाठः । वाहाद्वाद् भ्रश्यतीति विग्रहः । वृत्तौ तु वाहभ्रडिति पाठः । वहः स्कन्धः 'अन्येषा-

स्रत् । पर्णध्वत् । वाहभ्रट् । २६८४ अन्तः । (८-४-२०) पदान्तस्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत् । हे प्राण् । 'शास इत्–' (सू २४८६) इतीत्वम् । मित्राणि शास्ति मित्रशीः । 'आशासः क्वौ उपधाया इत्वं वाच्यम्' । (वा ४०७०) आशीः । इत्वोत्वे । गीः । पूः । २६८५ इसन्त्र-

---

नन्वनेनैव सिद्धे 'सत्सूद्विष–' इति सूत्रे व्यर्थमित्यत आह **सत्सूद्विषेति** । 'सत्सूद्विष–' इति सूत्रं तु 'क्विप् च' इत्यस्यैव प्रपञ्च इत्यर्थः । **उखास्रदिति** । उखायाः स्रंसत इति विग्रहः । स्रंसेः क्विप् , 'अनिदिताम्–' इति नलोपः, 'वसुस्रंसु–' इति दत्वम् । एवं पर्णध्वत् । पर्णाद् ध्वंसत इति विग्रहः । **वाहभ्रडिति** । वाहाद् भ्रश्यति इति विग्रहः । व्रश्चादिना षः । **अन्तः** । 'अनितेः' इति सूत्रमनुवर्तते, 'रषाभ्यां नो णः–' इति च । अन्त इति षष्ठ्यर्थे प्रथमा । पदस्यान्तो विवक्षितः । उपसर्गादसमासेऽपि' इत्यत उपसर्गादित्यनुवर्तते । तदाह **पदान्तस्येत्यादिना** । **हे प्राणिति** । प्रपूर्वादनेः क्विबन्तात् संबोधनैकवचनस्य हल्ङ्यादिलोपः, नस्य णः । नलोपस्तु न, 'न ङिसंबुद्ध्योः' इति निषेधात् । **मित्रशीरिति** । मित्राणि शास्तीति विग्रहः । शासेः क्विप् 'शास इदङ्हलोः' इत्युपधाया इत्वम्, 'र्वोरुपधायाः–' इति दीर्घः । मित्रशिषावित्यादौ अपदान्तत्वान्न दीर्घः । **आशासः क्वाविति** । 'आङः शासु इच्छायाम्' इत्यात्मनेपदी । तस्य 'शास इदङ्हलोः' इति इत्वं तु न भवति, अत्र परस्मैपदिन एव शासेर्ग्रहणात् । अन्यथा आशास्ते इत्यादावपि इत्वापत्तेः । अत आशासः क्वाविति विधिः । **इत्वोत्वे इति** । गॄधातोः क्विपि, ॠत इत्त्वे, रपरत्वे, सोर्लोपे, 'र्वोरुपधायाः–' इति दीर्घे गीरिति रूपम् । पॄधातोः क्विपि, 'उदोष्ठ्यपूर्वस्य' इति ॠतः उत्त्वे, रपरत्वे, सुलोपे, उपधादीर्घे पूः इति रूपमित्यर्थः । **इस-**

मपि दृश्यते' इति पूर्वपदान्तस्य दीर्घ इति हरदत्तः । **अन्तः** । अनितेरिति वर्तते *अन्तश्चोत्तरपदापेक्षो गृह्यते नानितेरपेक्षयाऽव्यभिचारादत* आह **पदान्तस्येति** । **हे प्राणिति** । अन प्राणने क्विप् 'अनुनासिकस्य–' इति दीर्घः 'न ङिसंबुद्ध्योः' इति नलोपनिषेधः । अन्यत्र तु नलोपेन भाव्यमिति संबुद्ध्यन्तमुदाहृतम् । **मित्रशीरिति** । लुप्तेऽपि क्विप्प्रत्यये प्रत्ययलक्षणन्यायेन हलादिकित्प्रत्ययपरत्वमस्ति, वर्णाश्रये नास्ति प्रत्ययलक्षणमित्येतद्वर्णप्राधान्य एवेत्युक्तत्वादिति भावः । **आशास इति** । शासु अनुशिष्टौ, आङः शासु इच्छायाम् , आत्मनेपदे 'शास इत्–' इत्यादिना सिद्धे क्वावेव उपधाया इत्वमिति नियमार्थमिदम् । तेन आशास्ते इति सिद्धमित्येके । अन्ये तु विध्यर्थमेवेदं न नियमार्थं प्राप्त्यभावात् । न च 'शास इदङ्हलोः' इति इत्वस्य प्राप्तिरस्तीति वाच्यम् , तत्राङ्साहचर्यात्परस्मैपदिन एव शासेर्ग्रहणात् । यद्यपि 'सर्ति-

न्किषु च। (६-४-९७) एषु छादेर्ह्रस्वः स्यात्। तनुच्छत्। 'अनुनासिकस्य क्वि-' (सू २६६६) इति दीर्घः। 'मो नो धातोः' (सू ३४१)। प्रतान्। प्रशान्। 'च्छ्वोः-' (सू २५६१) इत्यूठ्। अक्षूः। 'ज्वरत्वर-' (सू २६५४) इत्यूट्। जूः जुरौ जुरः। तूः। सूः। ऊठ्, वृद्धिः, जनानवतीति जनौः। जनावौ जनावः। मूः मुवौ मुवः। सुमूः सुम्वौ सुम्वः। 'राल्लोपः' (सू २६५५)। मुर्छा-मूः मुरौ मुरः। धुर्वी-धूः। २६८६ गमः क्वौ। (६-४-४०) अनुनासिकलोपः स्यात्। अङ्गगत्। 'गमादीनामिति वक्तव्यम्'

न्त्रन्। इस्, मन्, त्रन्, क्वि एषां चतुर्णां द्वन्द्वः। 'छादेर्घेऽद्व्युपसर्गस्य' इत्यतः छादेरिति 'खचि ह्रस्वः-' इत्यतो ह्रस्व इति चानुवर्तते, तदाह एषु छादेरिति। अर्थादाकारस्येति गम्यते, अलोऽन्त्यपरिभाषामाश्रित्य इकारस्य ह्रस्वविधौ प्रयोजनाभावात्। एवं च 'ऊदुपधायाः-' इत्यत उपधाया इति नानुवर्तनीयम्, णयन्तस्य छादेर्दकारोपधत्वात्। इस् छदिः, मन् छद्म, त्रन् छत्त्रम्। क्वौ उदाहरति तनुच्छदिति। तनुं छादयतीति विग्रहः। अथ तनेः शमेश्च क्विपि विशेषमाह अनुनासिकस्येति। अक्षूरित्यत आह च्छ्वोरिति। अक्षैर्दीव्यतीति विग्रहे दिव्धातोः क्विपि वकारस्य ऊठि इकारस्य यणिति भावः। ज्वरेति। ज्वरधातोः क्विपि अकारवकारयोरेकस्मिन् ऊठि जूरिति रूपम्। स्त्रिवेः क्विपि इकारवकारयोरूठि स्रूरिति रूपम्। अवधातोः क्विपि अकारवकारयोरूठि ऊरिति रूपम्। वृद्धिरिति। जनानवतीति विग्रहः, अवेः क्विपि, अकारवकारयोरूठि, जन ऊ इति स्थिते, आद्गुणं बाधित्वा 'एत्येधत्यूठ्सु' इति वृद्धिरौकारादेश इत्यर्थः। मूरिति। मवेः क्विपि, अकारवकारयोरूठ्। सुम्वौ सुम्व इति। अनेकाच्त्वाद् गतिपूर्वत्वाच्च यणिति भावः। रादिति। मुर्छाधातोः क्विपि 'राल्लोपः' इति छकारस्य लोपे सुलोपे 'र्वो -' इति दीर्घे मूरिति रूपम्। मुरौ मुर इति। अपदान्तत्वान्नोपधादीर्घः। धुर्वीति। धुर्वीधातोः क्विपि 'राल्लोपः' इति वकारस्य लोपे सुलोपे 'र्वोः-' इति दीर्घे धूरिति रूपमिति भावः। गमः क्वौ। अनुनासिकलोपः स्यादिति। शेषपूरणमिदम्। 'अनुदात्तोपदेश-' इत्यतस्तदनुवृत्तेरिति भावः। झलादिप्रत्ययपरकत्वाभावाद् अनुदात्तोपदेशेत्य-

---

शास्ति-' इति सूत्रे पृथग् योगकरणादर्तेर्लुङि आरत समारतेति पदद्वयेऽप्यङिति सिद्धान्तस्तथाप्युत्तरार्थतया परस्मैपदग्रहणानुवृत्तेरप्याकरे स्पष्टतया परस्मैपदे दृष्टो यः शासिस्तस्मात्परस्याङिति निष्कर्षः। तथा चाशास्ते इत्यत्र इत्वप्रसक्तिरेव नास्तीत्याहुः। वस्तुतस्तु 'आशिषि लिङ्लोटौ', 'क्तियाशीःप्रैषेषु' इत्यादिनिर्देशेनैव सिद्धमिति नेदमपूर्वं वार्तिकम्। ततश्च इत्वं वाच्यमित्यस्य इत्वं व्याख्येयमित्यर्थः। आशिषीत्याद्यु-

(वा ४०७६)। पुरीतत्। संयत्। सुनत्। 'ऊ च गमादीनामिति वक्तव्यं लोपश्च' (वा ४०७३-७४)। अग्रेगूः। अग्रेभ्रूः। २९८७ स्थः क च। (३-२-७७) चात्क्विप्। शंस्थः। शंस्थाः। 'शमि धातोः-' (सू २९२८)

प्राप्तौ वचनम्। **अङ्गगदिति**। अङ्गाख्यं देशं गच्छतीति विग्रहः। क्विपि मकारलोपे तुक्। एवं वङ्गगत्कलिङ्गगदित्यादि। **गमादीनामिति**। कावनुनासिकलोप इति शेषः। **पुरीतदिति**। पुरिः हृदयाख्यः मांसखण्डविशेषः। तं तनोति आच्छादयतीति विग्रहः। हृदयकमलाच्छादको मेदोविशेषः। 'पुरीतता हि हृदयमाच्छाद्यते' इति श्रुतिरिति कर्किभाष्यम्। तनेः क्विपि नकारलोपे तुक्। 'नहिवृतिवृषि-' इति पूर्वपदस्य दीर्घः। **संयदिति**। यमेः क्विप्। मलोपे तुक्। **सुनदिति**। नमेः क्विपि मलोपे तुक्। **ऊ चेति**। गमादीनामुपधाया ऊभावश्चेति वक्तव्यमित्यर्थः। **लोपश्चेति**। चकारादनुनासिकलोपः समुच्चीयते इति भावः। **अग्रेगूरिति**। अग्रे गच्छतीति विग्रहो गमेरकारस्य ऊभावो मलोपश्च 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। **अग्रेभ्रूरिति**। भ्रमेरकारस्य ऊभावः, मलोपश्च। **स्थः क च**। केत्यविभक्तिकम्। स्थ इति पञ्चम्यन्तम्। **चात् क्विबिति**। उपसर्गे अनुपसर्गे च सुबन्ते उपपदे स्थाधातोः कप्रत्ययः स्यात्। क्विप् चेति फलितम्। **शंस्थ इति**। शमित्यव्ययं

कृनिर्देशादिति दिक्। **सुम्वाविति**। 'ओः सुपि' इति यण्। **स्थः क च**। **शंस्था इति**। क्विपि लुप्ते 'घुमास्था-' इति ईत्वं न स्थानिवद्भावस्य। अनल्विधादिति निषेधात्। प्रत्ययलक्षणसूत्रं तु प्रत्ययस्यासाधारणरूपं यत्राश्रीयते तत्रैवेति नियमार्थमिति निष्कर्षात्। यत्तु कैयटेनोक्तम्—ईत्वमवकारादाविति वचनाद्भाष्यकारीयोदाहरणप्रामाण्याद्वा प्रत्ययलक्षणेन ईत्वं नेति। तद् अतृणेडित्यादिसिद्धये प्रत्ययप्राधान्ये अल्विध्यर्थं प्रत्ययलक्षणसूत्रमिति पक्षमभिप्रेत्य तत्राप्यवकारादाविति वचनस्वीकारे सुधीवेति न सिध्येदित्यपरितोषेण पक्षान्तरस्वीकार इति बोध्यम्। ननु नियमार्थमिति निष्कर्षपक्षे तु प्रागुक्तमित्रशीरित्यत्र कथमित्वं भवेदिति चेत्। अत्राहुः—शासः इदिति। ततः अङि नियमार्थमिदम्। अजादौ चेदित्वं स्यादङ्येव नान्यत्रेति हलग्रहणं मास्त्विति ज्ञेयमिति। न चैवमपि हलादौ पिति सार्वधातुके तृणह इमो विधानादतृणेडित्यादि तु नियमपक्षे न सिध्यतीत्यल्विध्यर्थमिति पक्षोऽपि स्वीकार्य इति वाच्यम्, 'उतो वृद्धिः-' इति सूत्राद्धल्ग्रहणमनुवर्त्य तृणहानीत्यत्रानिष्टवारणाय 'नाभ्यस्तस्याचि-' इति सूत्रादचि नेत्यनुवर्त्य व्याख्यानात्। एतच्च रुधादिगण एव व्याख्यातम्। स्यादेतत्—'सुपि स्थः' 'क्विप् च' इति सूत्राभ्यां कक्विपौ सिद्धौ तत्राह **शमीत्यादि**। धातुग्रहणसामर्थ्याद्धि धातुमात्राद्भवन्नच् प्रत्ययो हेत्वादिषु कृत्वं यथा

इत्यवं बाधितुं सूत्रम्। २९८८ सुप्यजातौ णिनिस्ताच्छील्ये। (३-२-७८) अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किम्-ब्राह्मणानामन्त्रयिता। ताच्छील्ये किम्-उष्णं भुङ्क्ते कदाचित्। इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय 'उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानम्' इति पठितम्। हरदत्तमाधवादिभिश्च तदेवानुसृतम्। एतच्च भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेऽपि णिनिः 'स बभूवोपजीवि-

---

सुखे। तत्पूर्वात् स्थाधातोः कप्रत्यये आतो लोपः। **शंस्था इति**। क्विपि रूपम्। सुखं स्थापयतीत्यर्थः। तिष्ठतिरन्तर्भावितण्यर्थः। शंस्था इति भाष्यप्रयोगात् पृषोदरादित्वाच्च 'घुमास्था-' इति ईत्वं न। केचित्तु क चेति चकाराद् विजेवानुकृष्यते इत्याहुः। ननु 'सुपि स्थः' इति कप्रत्यये 'क्विप् च' इति क्विपि च सिद्धे किमर्थमिदमित्यत आह **शमिधातोरित्यचमिति**। अन्यथा धातुग्रहणसामर्थ्यात् कृञो हेत्वादिषु टप्रत्ययमिव शम्पूर्वात् स्थाधातोः कं क्विपं च अच्प्रत्ययो बाधेतेति भावः। **सुप्यजातौ णिनिस्ताच्छील्ये**। 'सुपि स्थः' इत्यतः सुपीत्यनुवृत्तौ पुनः सुब्ग्रहणमुपसर्गेऽपि विधानार्थम्। अन्यथा 'आतोऽनुपसर्गे' इत्यतः अनुपसर्गे इत्यनुवर्तेत। तद् ध्वनयन्नुदाहरति **उष्णभोजीति**। उष्णभोजनशील इत्यर्थः। **उपसर्गभिन्न एवेति**। अनुपसर्गे इत्यनुवर्तते। सुब्ग्रहणं तु 'सत्सूद्विष-' इति सूत्राद् उपसर्गेऽपीत्यनुवृत्तिनिवृत्तये इति भावः। **उत्प्रतिभ्यामिति**। उत्प्रतिभ्यां परे आङि प्रयुज्यमाने सति तत्पूर्वात्सर्तेर्णिनेरुपसंख्यानमिति तदर्थः। उदासारिणी प्रत्यासारिणीत्युदाहरणम्। **भाष्याविरोधादिति**। सुब्ग्रहणमुपसर्गग्रहणानुवृत्तिनिवृत्त्य-

---

बाधते तथा तिष्ठतेः कक्विपावपि बाधेतेति 'स्थः क च' इत्यारम्भ इति भावः। नन्वेवं 'शमि धातोः-' इत्यस्यानन्तरं 'स्थः क च' इति सूत्र्यताम्, चकारेणाचि समुच्चिते सवर्णदीर्घेण शंस्था इति भविष्यति। एवं चोत्सर्गापवादयोः समानदेशतया संदर्भशुद्धिरपि लभ्यते, इत्वाभावार्थं च न यतनीयमिति महल्लाघवमिति चेत्। अत्राहुः—अशंस्था इत्यत्र 'अव्कावशक्तौ' इति सूत्रेणोत्तरपदमन्तोदात्तं स्यात्। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि-' इति शंस्थाशब्दस्याजन्तत्वात्। क्विबन्तेन नञ्समासे तु नञ्पूर्वपदप्रकृतिस्वरः सिध्यतीति। **उष्णभोजीति**। उष्णं भोक्तुं शीलमस्य। **आमन्त्रयितेति**। मन्त्रि गुप्तपरिभाषणे चुरादिराङ्पूर्वः, इदित्वान्नुम्, ताच्छील्यस्य विवक्षितत्वात्तृन्। अत एव 'न लोका-' इति निषेधाद् ब्राह्मणानित्यत्र कर्मणि षष्ठी न कृता। **उपसर्गभिन्न एवेति**। 'सत्सूद्विष-' इति सूत्रे उपसर्गेऽपीत्युक्तत्वादुपसर्गभिन्नस्यैव सुपो लाभायास्मिन्सूत्रे पुनः सुब्ग्रहणं कृतमिति भावः। **भाष्यविरोधादिति**। उक्तं च

नाम्' 'अनुयायिवर्गः' 'पतत्यधो धाम विसारि' 'न वञ्चनीयाः प्रभवोऽनुजीविभिः' इत्यादौ। 'साधुकारिण्युपसंख्यानम्' (वा २०३८) 'ब्रह्मणि वदः' (वा २०३९) अताच्छील्यार्थं वार्तिकद्वयम्। साधुदायी। ब्रह्मवादी। २९८९ **कर्तर्युपमाने**। (३-२-७९) णिनिः स्यात्। उपपदार्थः कर्ता प्रत्ययार्थस्य कर्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्षरावी। अताच्छील्यार्थं

र्थम्, उपसर्गे अनुपसर्गे च सुबन्ते उपपदे धातोर्णिनिरित्येव भाष्ये उदाहृतत्वादिति भावः। तथा च 'उत्प्रतिभ्यामाङि सर्तेः' इति वचनं नादर्तव्यम्। भाष्ये तत्पाठस्तु प्रक्षिप्त एवेति भावः। अत एव 'अनुगादिनः'[1] इति सूत्रप्रयोगश्च संगच्छते इति ज्ञेयम्। उपसर्गभिन्न एव सुपि णिनिरिति मतं शिष्टप्रयोगविरुद्धं चेत्याह **प्रसिद्धश्चोपसर्गेऽपि णिनिरिति**। इत्यादावित्यत्रान्वयः। **साधुकारिणीति**। कृग्ग्रहणं सर्वधातूपलक्षणम्। साधुकारीत्यादिशब्दविषये तत्सिद्ध्यर्थं णिनेरुपसंख्यानमित्यर्थः। साधुशब्दे उपपदे धातोर्णिनिरिति यावत्, भाष्ये साधुकारी साधुदायीत्युदाहरणात्। **ब्रह्मणि वद इति**। णिनेरुपसंख्यानमिति शेषः। ननु 'सुप्यजातौ–' इत्येव सिद्धे किमर्थमिदं वार्तिकमित्यत आह **अताच्छील्यार्थमिति**। **साधुदायीति**। आतो युक्। **ब्रह्मवादीति**। ब्रह्म वेदः। **कर्तर्युपमाने**। **कर्तुरुपमानमिति**। चेदित्यध्याहार्यम्। ननु 'सुप्यजातौ–'

भाष्ये—सुबिति वर्तमाने पुनः सुब्ग्रहणं किमर्थमनुपसर्ग इत्येवं तदभूद् इदं तु सुब्मात्रे यथा स्यादुदासारिण्यः प्रत्यासारिण्य इति। अस्यायमाशयः—'सत्सूद्विष–' इति सूत्रे 'सुपि स्थः' इत्यतः सुपीत्यनुवर्तते, तच्च उपसर्गेतरपरम्, उपसर्गेऽपीति पृथगुक्तेः। तदिहानुवर्तमानमर्थाधिकारादुपसर्गेतरपरमेव स्यादिति निष्कर्षे तु मा भूदिह सुब्ग्रहणम्। उपसर्गेऽपीत्यंशस्याप्यनुवृत्त्या निर्वाहात्। सर्वथापि सुब्मात्रे उपपदे णिनिः न त्वनुपसर्ग एवेति सिद्धान्तः। एतच्च शब्दकौस्तुभे स्पष्टम्। **प्रसिद्धश्चेति**। एवं च पाणिनीयानुसारिणीमिति प्रक्रियाकारप्रयोगोऽपि निर्बाध एव। अमरश्च प्रायुङ्क्त—'लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः' इति दिक्। **साधुकारिणीति**। एतच्च ज्ञापकसिद्धम्। 'आ क्वेः–' इति सूत्रे हि तच्छीलात्पृथक् साधुकारी गृह्यते तच्च ताच्छील्यं विनापि णिनौ सत्येव संगच्छते। **ब्रह्मणि वद इति**। इदं तु वाचनिकमेव। **अताच्छील्यार्थमिति**। एतच्च कैयटहरदत्तादिग्रन्थे स्पष्टम्। यत्तु भट्टवार्तिके ब्रह्मवादिशब्दस्य तच्छीलतद्धर्मतत्साधुकारिपरतया व्याख्यानं कृतम्। आ क्वेरित्यधिकारे तु ब्रह्मणि वदेर्णिनिविधायकं वचनं नास्त्येवेति कथमिदं संगच्छेतेति चेत्। अत्राहुः—भट्टपादानामयमाशयः 'सुप्यजातौ–' इति सूत्रेण

१ 'अनुगादिनष्ठक्' इति क्वचित् पाठः।

जात्यर्थं च सूत्रम् । कर्तरि किम्–अपूपानिव भक्षयति माषान् । उपमाने किम्–उष्ट्रः क्रोशति । २९९० व्रते । (३-२-८०) णिनिः स्यात् । स्थण्डिले[1] शायी । २९९१ बहुलमाभीक्ष्ण्ये । (३-२-८१) पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः । क्षीरपायिण उशीनराः । २९९२ मनः । (३-२-८२) सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी । २९९३ आत्ममाने खश्च । (३-२-८३) स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात् । चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः, पण्डितमानी । 'खित्यनव्ययस्य' (सू

इति सिद्धे किमर्थमिदमित्यत आह अताच्छील्यार्थमिति । व्रते । णिनिः स्यादिति । सुप्युपपदे णिनिः स्याद् व्रते गम्ये इति यावत् । स्थण्डिले शायीति । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् बहुलमाभीक्ष्ण्ये । जातावप्युपपदे प्राप्त्यर्थमिदम् । तद् ध्वनयन्नुदाहरति क्षीरपायिण इति । मनः । दैवादिकस्यैव मनेर्ग्रहणं न तु तानादिकस्य, बहुलग्रहणानुवृत्तेः, तदाह सुपि मन्यतेरिति । मनुतेर्ग्रहणे तु बाधकमुत्तरसूत्रे वक्ष्यते । आत्ममाने खश्च । आत्मनः स्वस्य मानो मननम् आत्ममानः, तदाह स्वकर्मके मनने इति । पण्डितम्मन्य इति । खशः शित्त्वेन सार्वधातुकत्वात् श्यन् । खित्त्वाद् 'अरुर्द्विषत्–' इति मुम् । तानादिकस्य मनेर्ग्रहणे तु उविकरणः स्यात् । कालीमात्मानं मन्यते इत्यर्थे खशि

ताच्छील्ये णिनिः । उपसंख्यानेन ज्ञापकेन वा साधुकारिणि णिनिः । 'आवश्यकाधमर्ण्ययोर्णिनिः' इत्यावश्यके णिनिस्तु तद्धर्मे पर्यवस्यति न त्विह 'आ क्वेः–' इति सूत्रस्य व्यापारोऽस्तीति । ननु ब्रह्मवादिनो वदन्ति इत्यत्र ब्रह्म वेद इति ब्रह्मशब्दस्यापि जातिवाचकत्वात्कथमिह ताच्छील्ये णिनिरिति समर्थनमिति चेत् । अत्र नव्याः—'सुप्यजातौ–' इत्यत्र प्राणिजातिरेव पर्युदस्यते ताच्छील्यसमभिव्याहारात् । ब्राह्मणानामन्त्रयितेति प्रत्युदाहरणानुगुण्याच्चेति न काप्यनुपपत्तिरिति । मनः । बहुलग्रहणानुवृत्तेरिह मन ज्ञान इति देवादिकस्यैव ग्रहणं न तु मनु अवबोधन इति तानादिकस्य । तेन उत्तरसूत्रे खशि श्यन्नेव भवति नतूप्रत्ययस्तदाह मन्यतेरिति । आत्ममाने । मननं मानः, भावे घञ्, आत्मनो मान इति कर्मणि षष्ठ्या समासः । स्वपर्याय आत्मशब्दः प्रत्ययार्थत्वेन सन्निहितकर्ता स्वपदार्थस्तदाह स्वकर्मक इत्यादि । चाण्णिनिरिति । ननु वासरूपविधिना लभ्यत एव णिनिरिति किमर्थश्चकार इति चेत् । अत्राहुः—चकारेणाविच्छेदाय णिनिः समुच्चीयते । तेन 'करणे यजः' इत्यादौ णिनिरेवानुवर्तते, न तु खश्, एवं चोक्तप्रयोजनानुरोधेन चानुकृष्टं नोत्तरत्रेतीह न प्रवर्तते इति । पण्डितमात्मानमिति । एकस्याप्यात्मनः स्वरूपेण कर्तृत्वं

१ 'स्थण्डिलशायी' इत्यन्यत्र पाठः ।

२९४३)। कालिंमन्या । अनव्ययस्य किम्–दिवामन्या । २९४४ इच एकाचोऽम्प्रत्ययवच्च । (६–३–६८) इजन्तादेकाचोऽम्स्यात्स च स्वाद्यम्वत् खिदन्ते परे । 'औतोऽम्शसोः' (सू २५९)। गाम्मन्यः । 'वाऽम्शसोः' (सू ३०२)। स्त्रियम्मन्यः, स्त्रीम्मन्यः । नृ, नरम्मन्यः । भुवम्मन्यः । श्रिय-

---

श्यनि कृते आह **खित्यनव्ययस्येति**। 'स्त्रियाः पुंवत्–' इति पुंवत्त्वं बाधित्वा परत्वाद् ह्रस्व इत्यर्थः । **दिवामन्येति** । अधिकरणशक्तिप्रधानस्यापि दिवाशब्दस्य वृत्तिविषये कर्मत्वं बोध्यम् । **इच एकाचः** । एकाचः अमिति छेदः । अम् च अम् चेत्येकशेषः । एकं विधेयसमर्पकम् । इच एकाचोऽमिति प्रथमं वाक्यम् । इच इत्येकाच इति च पञ्चमी । 'अलुगुत्तरपदे' इत्युत्तरपदाधिकाराद् आक्षिप्तं पूर्वपदम् इचा विशेष्यते । तदन्तविधिः, तदाह **इजन्तादेकाचोऽम् स्यादिति** । मुमोऽपवादः । द्वितीयम् अम्पदं प्रत्ययवदित्येकदेशेन प्रत्ययेन समानाधिकरणं संबध्यते । असामर्थ्येऽपि वतिप्रत्यय आर्षः । अम्प्रत्ययवदिति द्वितीयं वाक्यं संपद्यते । स्वादिप्रत्ययेषु यद् द्वितीयैकवचनं तदेवात्र अमिति[1] विवक्ष्यते, व्याख्यानात्, तदाह **स च स्वाद्यम्वदिति** । एतत्सर्वं भाष्ये स्पष्टम् । **खिदन्ते पर इति** । खिदन्ते उत्तरपदे परत इत्यर्थः । 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवर्तते इति भावः । अम्प्रत्ययवदित्यतिदेशस्य प्रयोजनमाह **औतोम्शसोरिति** । **गाम्मन्य इति** । गामात्मानं मन्यते इत्यर्थे मनेः खशि श्यन्, सुपो लुक्, गोशब्दादम्, अम्प्रत्ययवदित्यतिदेशाद् मकारस्य 'न विभक्तौ–' इति नेत्त्वम् । 'औतोऽम्शसोः' इत्योकारस्य आकार इति भावः । अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह **वाऽम्शसोरिति** । **स्त्रियम्मन्य इति** । स्त्रियमात्मानं मन्यते इत्यर्थे मने खशि श्यन् । सुपो लुक् । स्त्रीशब्दाद् 'वाऽम्शसोः' इति इयङ्विकल्पः । अत्र यकारादकारश्रवणार्थम् अम्-

---

परिण्डतत्वविशिष्टरूपेण च कर्मत्वं बोध्यम् । आत्ममाने किम्, दर्शनीयमानी देवदत्तो यज्ञदत्तस्य । **कालिंमन्येति** । 'स्त्रियाः पुंवत्–' इति प्राप्तं पुंवद्भावं बाधित्वा परत्वाद् ह्रस्वः । यत्त्वत्र 'क्यङ्मानिनोः–' इति प्राप्तः पुंवद्भाव इति प्रसादकृतोक्तं तद्भ्रमसोक्तमेव, मानिन्रूपाभावस्य स्पष्टत्वात् । **दिवामन्येति** । अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिस्वभावात्कर्मत्वम् । **इच एकाचः** । अम्ग्रहणमिहावर्तते, तत एकेन अम् विधीयते परेण प्रत्ययो विशेष्यते तदाह **स्वाद्यम्वदिति** । एवं च 'न विभक्तौ तुस्माः' इति निषेधान्मकारस्य नेत्संज्ञा, अत एव परश्च भवति । 'औतोऽम्शसोः' इत्यत्र शसा साहचर्याद् ङ्याम् गृह्यत इत्युक्त्वादोत आकारश्च भवतीत्याशयेनोदाहरति **गांमन्य इति** । **नरंमन्य इति** । 'ऋतोऽङि–' इत्यादिना गुणः ।

---

1 'अमिति' इति क्वचिन्नास्ति ।

मात्मानं मन्यते श्रिमन्यं कुलम्। भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्वो मुममोर-

---

विधिः। मुमि तु अकारो न श्रूयेत। **स्त्रीम्मन्य इति**। इयङभावपक्षे 'अमि पूर्वः'। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह **नृ, नरम्मन्य इति**। नृ इत्यविभक्तिकम् उदाहरणे नृशब्दस्य समावेशसूचनार्थम्। नरनात्मानं मन्यते इत्यर्थे मनेः खश, श्यन्, सुपो लुक्, नृशब्दादम् अम्प्रत्ययवदित्यतिदेशाद् 'ऋतोऽङि–' इति गुणः। अत्रापि रेफादकारश्रवणार्थः अम्विधिः। मुमि त्वकारो न श्रूयेत। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह **भुवम्मन्य इति**। भुवमात्मानं मन्यते इत्यर्थे मनेः खश्, श्यन्, सुपो लुक्। भूशब्दादम्, अम्प्रत्ययवदित्यतिदेशाद् 'अचि श्नुधातु–' इत्युवङ्। अतिदेशाभावे तु उवङ् न स्यात्, तस्याजादिप्रत्यये विधानात्। **श्रिमन्यमिति**। मनेः खश् श्यन्। अत्र मननक्रियां प्रति कुलत्वेन रूपेण कुलं कर्तृ, तस्यैव कुलस्य अध्यारोपितश्रीत्वेन रूपेण कर्मत्वं चेति स्थितिः। एवं च श्रीशब्दस्य नित्यस्त्रीलिङ्गस्यापि कुले लक्षणया वृत्तेर्नपुंसकत्वम्। यत्र हि प्रातिपदिकस्यैव लक्षणा प्रसिद्धा तत्र पूर्वलिङ्गत्यागः। यथा प्रकृते श्रीशब्दः। यत्र तु पदस्य लक्षणा, न तत्र पूर्वलिङ्गस्यागः, यथा गङ्गायां घोष इत्यादौ इति 'पुंयोगादाख्यायाम्' इति सूत्रे प्रकृतसूत्रे च भाष्यकैयटयोर्मर्यादा स्थिता। एवं च कालिम्मन्यं कुलमित्यत्र कालीशब्दस्य न स्त्रीलिङ्गपरित्यागः, प्रयोगानुसारेण तत्र पदलक्षणाया एवाभ्युपगमात् श्रिमन्यं कुलमित्यत्र तु प्रयोगानुसारात् श्रीशब्दस्य प्रातिपदिकस्यैव लक्षणेति पूर्वलिङ्गपरित्यागाद् नपुंसकलिङ्गत्वमेवाश्रीयते। ततश्च श्रीशब्दस्यात्र नपुंसकत्वात् 'खित्यनव्ययस्य' इति बहिरङ्गं बाधित्वा 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्व एव न्याय्यः। मुमपवादे 'इच एकाचः–' इति अमि कृते तस्य 'स्वमोर्नपुंसकात्' इति लुक्। तथा च श्रिमन्यं कुलमिति सिद्धम्। न च गाम्मन्य इत्यादावपि 'सुपो धातुप्रातिपदिकयोः' इति लुक् स्यादिति वाच्यम्, 'इच एकाचः–' इत्यमः 'सुपो धातु–' इति लुगपवादत्वात्। 'स्वमोर्नपुंसकात्' इति लुकस्तु नायमम्विधिर्बाधकः, मध्येऽपवादन्यायाद् इति प्रकृतसूत्रे भाष्यकैयटयोः स्पष्टम्, तदाह **भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्व**

भाष्यकारेति। अयं भावः—यथा पृष्ठादयः शब्दाः पुंयोगात्स्त्रियां वर्तन्ते पृष्ठी गणिकेति तथेह श्रीशब्दः परित्यक्तस्वलिङ्गः क्लीबः सन् कुले वर्तते, तत्र 'ह्रस्वो नपुंसके–' इति ह्रस्वः, मुम् तु न। अपवादेन अमा बाधात्। 'स्वमोर्नपुंसकात्' इत्यमो लुक्। न चैवं गांमन्य इत्यादावपि 'सुपो धातुप्रातिपदिकयोः' इति लुक् स्यादिति वाच्यम्, अम्विधिसामर्थ्यादेव तद्बाधादित्याहुः। अम्प्रत्ययस्तु 'मध्येऽपवादा–' इति न्यायेन 'सुपो धातुप्रातिपदिकयोः' इति लुकमेव बाधते, न तु 'स्वमोर्नपुंसकात्' इति

भावश्च ॥२९९५ भूते। (३-२-८४) अधिकारोऽयम् । 'वर्तमाने लट्' (सू २१२१) इति यावत्। २९९६ करणे यजः। (३-२-८५) करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि। सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी। २९९७ कर्मणि हनः। (३-२-८६) पितृव्यघाती। कर्मणीत्येतत् 'सहे च' (सू ३००१) इति यावदधिक्रियते। २९९८ ब्रह्मभ्रूणवृत्रेषु क्विप्। (३-२-८७) एषु कर्मसूपपदेषु हन्तेर्भूते क्विप् स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। 'क्विप् च' (सू २९८२) इत्येव सिद्धे नियमार्थमिदम्। ब्रह्मादिष्वेव, हन्तरेव, भूत एव, क्विबेवेति चतुर्विधोऽत्र नियम इति काशिका। ब्रह्मादिष्वेव

इति। 'ह्रस्वो नपुंसके–' इत्यनेनेति शेषः। **मुममोरभावश्चेति**। मुगपवादस्य अमः 'स्वमोर्नपुंसकात्' इति लुकि सति तयोः प्रयोगाभावः फलतीत्यर्थः। **भूते। अधिकारोऽयमिति**। धातोरित्यधिकृतम्। ततश्च भूतार्थवृत्तेर्धातोरित्युत्तरत्रानुवर्तते इति फलति। **वर्तमाने इति**। 'वर्तमाने लट्' इत्यतः प्रागित्यर्थः। अत्र व्याख्यानमेव शरणम्। **करणे यजः। सोमेनेति**। सोमाख्यलताविशेषरसेन यागं कृतवानित्यर्थः। सोमलतारसद्रव्यकेन यागेन अपूर्वमुत्पादितवानिति मीमांसकाः। एतच्च द्वितीयस्य द्वितीये 'द्रव्यसंयोगाच्चोदना पशुसोमयोः' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः। **अग्निष्टोमयाजीति**। अग्निष्टोमाख्ययागेन अपूर्वं भावितवानित्यर्थः। **कर्मणि हनः**। कर्मण्युपपदे भूतार्थाद्धनेर्णिनिः स्यात्। **पितृव्यघातीति**। पितृव्यं हतवानित्यर्थः। 'हनस्तः' इति तः, 'हो हन्तेः–' इति हस्य घः। **ब्रह्मभ्रूणवृत्रेषु क्विप्**। पूर्वसूत्रात्कर्मग्रहणानु-

---

लुकमिति भाष्यादौ स्थितम्। स्यादेतत्—नपुंसकह्रस्वे कृते मुमः प्राप्तिरेव नास्ति, कथमत्रापवादेन अमा बाधादित्युक्तिः संगच्छेत, 'अरुर्द्विषत्–' इति सूत्रे हि अन्तग्रहणस्य समीपवाचित्वेन 'खित्यनव्ययस्य' इति ह्रस्वे कृते पश्चान्मुमिति व्याख्यातत्वात्। सत्यम्। जनमेजय इत्यत्र स्वतःसिद्धेऽपि ह्रस्वे यथा 'खित्यनव्ययस्य' इति पुनर्ह्रस्वो मुमर्थं स्वीक्रियते तथात्रापि भवेदित्यस्त्येव मुमः प्राप्तिरिति। **भूते**। धातोरित्यधिकाराद्धात्वर्थस्य विशेषणमिदम्। भूतेऽर्थे विद्यमानाद्धातोरित्यर्थः। **करणे**। स्वरितत्वाण्णिनिरेवानुवर्तते न तु खश् इत्याह **णिनिः स्यादिति**। सोमेन लताविशेषेण यागं कृतवानित्यर्थः। **अग्निष्टोमेति**। अग्निष्टोमस्तोत्रेण समाप्यमानो यो यागः स लक्षणयाऽग्निष्टोमस्तेनापूर्वं भावितवानित्यर्थः। उक्तं च काशिकायाम् 'अग्निष्टोमः फलभावनायां करणम्' इति। **कर्मणि हनः। पितृव्यघातीति**। अत्र काशिका—'कुत्सितग्रहणं कर्तव्यमिह माभूत् चोरं हतवान्' इति। यद्यपीदं भाष्ये

क्विबेवेति द्विविधो नियम इति भाष्यम् । २९९९ सुकर्मपापमन्त्रपुण्येषु

वृत्तेराह **कर्मस्विति । हन्तेर्भूते इति ।** भूतार्थवृत्तेर्हन्तेरित्यर्थः । **चतुर्विध इति ।** पुनर्विधानलब्धस्य एवकारस्य विनिगमनाविरहाच्चतुर्ष्वपि निवेश इति भावः । तत्र ब्रह्मादिष्वेव हन्तेरिति नियमात् पुरुषं हतवानित्यत्र न क्विप् । ब्रह्मादिषु हन्तेरेवेति नियमाद् ब्रह्म अधीतवानित्यत्र न क्विप् । ब्रह्मादिषु हन्तेर्भूतकाले एवेति नियमाद् ब्रह्म हन्ति हनिष्यति वेत्यत्र न क्विप् । क्विबेवेति नियमाद् ब्रह्म हतवानित्यत्र अण् न भवति, किंतु 'ब्रह्मभ्रूण–' इति क्विबेव । निष्ठा तु भवत्येव, सोपपद-प्रत्ययस्यैव नियमेन व्यावृत्तेः । **द्विविध इति ।** उभयतो नियमोऽयम्–ब्रह्मादिष्वेव

नास्ति तथापि शब्दशक्तिस्वाभाव्यादिदं लभ्यत इत्याहुः । **चतुर्विध इति ।** अय-माशयः—इह सूत्रे श्रुतत्वात्पूर्वं ब्रह्मादय उद्देश्यास्ततोऽनन्तरं प्रकृतित्वाद्धन्तिस्ततः परिशेषाद् भूत इति । क्विप् तु सर्वान्ते निर्देष्टव्यः, विधेयत्वात् । तदेवं वचनव्यक्तिः, ब्रह्मादिषूपपदेषु हन्तेर्भूते क्विबिति । एवं स्थिते यत्रैवकारस्ततोऽन्यत्र नियम इति न्यायेन नियमोऽत्र भवन्ननन्तरे भवति । ततश्च ब्रह्मादिष्वेवेत्यवधारणे हन्तेस्तदनन्तरं निर्दिष्टत्वादुपपदान्तरसंबन्धनिवृत्तिफलो नियमो भवति । ब्रह्मादिषु हन्तेरेव भूते इत्यवधारणे त्वनन्तरत्वाद्विशेषेऽपि प्राथम्यादुपपदनियमो धात्वन्तरनिवृत्तिफलकः, ब्रह्मादिषु हन्तेर्भूते एव क्विबित्यवधारणे तु क्विब्हन्त्योरानन्तर्येऽविशिष्टेऽपि प्राधान्या-त्कालान्तरसंबन्धकवृत्तिफलकः प्रत्ययनियमः । ब्रह्मादिषु हन्तेर्भूते क्विबेवेति वचन-व्यक्तौ प्रत्ययान्तरसंबन्धनिवृत्तिफलकः कालनियमः । सोऽयं प्रकृत्युपपदप्रत्ययकाल-नियमानां विवेकः । अगृह्यमाणविशेषात्तु चतुर्विधस्यापीह ग्रहणम् । तत्र-ब्रह्मादिष्वेव हन्तेरिति प्रकृतिनियमे भूत इत्याश्रयणाद्वर्तमानकाले भविष्यत्काले चोपपदान्तरेऽपि भवत्येव । पुरुषं हन्ति हनिष्यति वा पुरुषहा । 'अरिहयोरिहयोग-विचक्षणः' । अरीन् हन्तीति अरिहा स चासौ योगश्च अरिहयोगस्तत्र विचक्षण इत्यर्थः । प्रकृतिनियमफलं तु पुरुषं हतवान् पुरुषहा इति भूतार्थे प्रयोगाभावः । ब्रह्मादिषु हन्तेरेवेत्युपपदनियमेऽपि भूत इत्याश्रयणाद्वर्तमानभविष्यत्कालयोर्धात्वन्त-रादपि भवत्येव । वृत्रं जयति जेष्यति वा वृत्रजिदिति । उपपदनियमफलं तु वृत्रं जितवान् वृत्रजिदिति प्रयोगाभावः । भूत एव क्विबिति प्रत्ययनियमेऽपि ब्रह्मादिष्वि-त्युक्तेरुपपदान्तरे वर्तमानभविष्यत्कालयोर्हन्तेः क्विब् भवत्येव । पुरुषं हन्ति हनिष्यति वा पुरुषहा अरिहेति प्राग्वत् । प्रत्ययनियमफलं तु ब्रह्माणं हन्ति ब्रह्महेत्यादिप्रयोगा-भावः । भूते क्विबेवेति कालनियमेऽपि ब्रह्मादिष्वित्युक्तेरुपपदान्तरे भूतेऽपि प्रत्ययान्तरं भवत्येव, पितृव्यं हतवान् पितृव्यघाती । इह 'कर्मणि हनः' इति भूते णिनिः ।

कृञः। (३-२-८९) सौ कर्मादिषु च कृञः क्विप्स्यात्। त्रिविधोऽत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। क्विबेवेति नियमात्कर्म कृतवानित्यत्राण् न। कृञ एवेति नियमान्मन्त्रमधीतवान् मन्त्राध्यायः, अत्र न क्विप्। भूत एवेति नियमान्मन्त्रं करोति करिष्यति वेति विवक्षायां न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्, शास्त्रकृत्। भाष्यकृत्। ३००० सोमे सुञः। (३-२-९०) सोमसुत्। चतुर्विधोऽत्र नियम इति

क्विबेवेति च भाष्यमित्यर्थः। एवं च हन्तेरेव भूत एवेति नियमद्वयमुपेक्ष्यमिति भावः। **सुकर्म**। सु, कर्म, पाप, मन्त्र, पुण्य एषां पञ्चानां द्वन्द्वः। **त्रिविध इति**। सुकर्मादिषु भूते कृञः क्विबेवेति, सुकर्मादिषु भूते कृञ एव क्विबिति, सुकर्मादिषु भूत एव कृञ इति त्रिविध इत्यर्थः। **अण् नेति**। क्तवतुस्तु भवत्येव, सोपपद-प्रत्ययस्यैव नियमेन व्यावृत्तेरिति भावः। **स्वादिष्वेवेति**। सुकर्मादिषु पञ्चस्वि-त्यर्थः। **सोमे सुञः**। सोमे कर्मण्युपपदे भूते सुनोतेः क्विबित्यर्थः। **चतुर्विध**

कालनियमफलं तु ब्रह्माणं हतवान् ब्रह्मघातीति प्रयोगाभावः। सोपपदश्च प्रत्ययो नियमेन व्यावर्त्यते, निष्ठा तु भवत्येव वृत्रं हतवानिति। भाष्यकारस्तु प्रकृतिकालनिय-मावेवाशिश्रियत्। तस्यायमाशयः—धातुकालौ हि नेह सूत्रे श्रुतौ किं तु प्रकरण-लक्षणजघन्यप्रमाणेनोपस्थितौ। अतस्तयोरेवोपरोधो न्याय्यो न तूपपदप्रत्यययोः, श्रुत्युपस्थापितत्वात्। एवं न्यायोपष्टब्धेन भाष्येण सह विरोधाद् वृत्तिमतमुपेक्ष्यमेवेति कैयटे स्थितम्। यत्त्विह हरदत्तेनोक्तं धातूपपदविषयं नियमद्वयं भाष्ये प्रदर्शितमिति, तत्र धातुकालविषयमिति वक्तव्ये उपपदग्रहणं प्रामादिकमित्यवधेयम्। **सुकर्म**। **त्रिविध इति**। धातुनियमस्त्विह नेष्यत इति भावः। **क्विबेवेतीति**। भूते क्विबेवेति प्रत्ययान्तरसंबन्धनिवृत्तिफलककालनियमादित्यर्थः। **कृञ एवेतीति**। सुकर्मादिषु कृञ एवेति धात्वन्तरसंबन्धनिवृत्तिफलकोपपदनियमादित्यर्थः। **भूत एवेतीति**। भूत एव क्विबिति कालान्तरसंबन्धनिवृत्तिफलकप्रत्ययनियमादित्यर्थः। **स्वादिष्वेवेतीति**। स्वादिष्वेव कृञ इत्युपपदान्तरसंबन्धनिवृत्तिफलकधातुनियमाभा-वादित्यर्थः। **सोमे सुञः**। इहापि चतुर्विधो नियम इति वृत्तिः। एवमुत्तरसूत्रेऽपि। तत्र भूतकालस्य क्विपि नियतत्वात्सोमं सुतवान् सोमसावः, अग्निं चितवान् अग्निचाय इत्यण् न भवति। सुनोतेः सोम इव उपपदे नियतत्वाच्चिनोतेस्त्वग्नावेवोपपदे निय-तत्वात्। सुरां सुतवान् सुरासुत् इष्टकाश्चितवानिष्टकाचिदिति न भवति, किं तु सुरा-साव इष्टकाचाय इत्यणेव भवति, सोमस्य सुनोतावेव धातोर्नियतत्वात्। अग्नेस्तु चिनोतावेव नियतत्वात्। सोमं क्रीतवान् सोमक्रीः, अग्निं भृतवान् अग्निभृद् इति

काशिका। एवमुत्तरसूत्रेऽपि। ३००१ **अग्नौ चेः।** (३-२-९१) अग्निचित्। ३००२ **कर्मण्यग्न्याख्यायाम्।** (३-२-९२) कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्याद् अग्न्याधारस्थलविशेषस्याख्यायाम्। श्येन इव चितः श्येनचित्। ३००३ **कर्मणीनि विक्रियः।** (३-२-९३) कर्मण्युपपदे विपूर्वात्क्रीणातेरिनि स्यात्। 'कुत्सितग्रहणं कर्तव्यम्' (वा २०४७)। सोमविक्रयी। घृतविक्रयी। ३००४ **दृशेः क्वनिप्।** (३-२-९४) कर्मणि भूत इत्येव। पारं दृष्टवान् पारदृश्वा। ३००५ **राजनि युधि कृञः।** (३-२-९५)

इति। पूर्ववद् व्याख्येयम्। **एवमिति।** 'अग्नौ चेः' इत्युत्तरसूत्रेऽपि चतुर्विधो नियम इत्यर्थः। **अग्नौ चेः।** अग्नौ कर्मण्युपपदे भूतार्थवृत्तेश्चिनोतेः क्विप् स्यादित्यर्थः। **अग्निचिदिति।** अग्न्याख्यं स्थण्डिलविशेषमिष्टकाभिश्चितवानित्यर्थः। **कर्मण्यग्न्याख्यायाम्।** कर्मणीत्यनुवृत्तमुपपदसमर्पकम्। अत्रत्यं तु कर्मणीत्येतत्प्रत्ययार्थसमर्पकम्। तथा चात्र कर्तरीति न संबध्यते, तदाह **कर्मण्युपपदे इत्यादि। चिनोतेरिति।** भूतार्थादित्यपि बोध्यम्। **श्येन इवेति।** श्येनशब्दः श्येनसदृशे लाक्षणिक इति भावः। श्येनाकृतिक इति यावत्। **कर्मणीनि विक्रियः।** इनि इत्यविभक्तिकम्। विपूर्वस्य क्रीञ्धातोर्विक्रिय इति पञ्चम्यन्तम्। **कुत्सितेति।** कुत्सिते कर्मण्युपपदे उक्तविधिर्भवतीत्यर्थः। **सोमविक्रयीति।** सोमद्रव्यं च विक्रीयमाणं विक्रेतुः कुत्सामावहति, तद्विक्रयस्य निषिद्धत्वादिति भावः। **दृशेः क्वनिप्।** 'आतो मनिन्क्वनिब्वनिपश्च, अन्येभ्योऽपि दृश्यन्ते' इत्येव क्वनिपि सिद्धे तत्सहचरितमनिनादिव्यावृत्त्यर्थमिदम्, सोपपदाण्णादिबाधनार्थं च। निष्ठा तु भवत्येव, सोपपदप्रत्ययस्यैवात्र पुनः क्विब्ग्रहणेन निवृत्तेः। पारं दृष्टवान्।

क्विब् न भवति किं तु सोमक्रायः अग्निभार इत्यणेव भवति। भूत एव क्विपो नियतत्वात्सोमं सुनोति सोष्यति वेत्यर्थे क्विब् न भवति। तथा अग्निं चिनोति चेष्यति वेत्यर्थे क्विबभावः, किं त्वणेव। **कर्मण्यग्न्याख्यायाम्। श्येनचिदिति।** समुदायोऽयम् आहवनीयधारणार्थे इष्टकानिर्मितस्थलविशेषे निरूढः। **कर्मणीति। कुत्सितग्रहणमिति।** एतच्च वार्तिकं पुनः कर्मग्रहणसामर्थ्याल्लभ्यते, यत्कर्म क्रियया संबध्यमानं कर्तृकुत्सामावहति तत्रेत्यर्थः। सोमादयश्च विक्रीयमाणाः शास्त्रे प्रतिषेधात्कुत्सावहाः। कुत्सितग्रहणान्नेह धान्यविक्रायः। **दृशेः क्वनिप्।** 'अन्येभ्योऽपि दृश्यन्ते' इति सिद्धे नियमार्थमिदं क्वनिबेव यथा स्यात्तत्सहनिर्दिष्टौ मनिन्वनिपौ माभूतां न वा अणादय इति। सोपपदप्रत्ययस्यैव नियमेन निवर्तनान्निष्ठा तु भवत्येव। **पारं दृष्टवानिति।** एवं स्थिते 'विश्वदृश्वनयना वयमेव' इत्यादौ विश्वं

क्वनिप् स्यात् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान् राजयुध्वा । राजकृत्वा । ३००६ **सहे च** । (३-२-९६) कर्मणीति निवृत्तम् । सहयुध्वा । सहकृत्वा । ३००७ **सप्तम्यां जनेर्डः** । (३-२-९७) सरसिजम् । मन्दुरायां जातो मन्दुरजः । 'ङ्यापोः–' (सू १००१) इति ह्रस्वः । ३००८ **पञ्चम्यामजातौ** । (३-२-९८) जातिशब्दवर्जिते पञ्चम्यन्ते उपपदे जनेर्डः स्यात् । संस्कारजः । अदृष्टजः । ३००९ **उपसर्गे च संज्ञायाम्** । (३-२-९९) 'प्रजा स्यात्सन्ततौ जने' । ३०१० **अनौ कर्मणि** । (३-२-१००) अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात् । पुमांसमनुरुध्य जाता पुमनुजा । ३०११ **अन्येष्वपि दृश्यते** । (३-२-१०१) अन्येष्वप्युपपदेषु जनेर्डः स्यात् । अजः । द्विजो

राजनि युधि कृञः । युधि, कृञ् अनयोः समाहारद्वन्द्वात्पञ्चमी । **क्वनिप् स्यादिति** । राजनि कर्मण्युपपदे भूतार्थाद्युधेः कृञश्च क्वनिबित्यर्थः । ननु युधेरकर्मकत्वात् तत्र कर्मण्युपपदे इत्यस्य कथमन्वय इत्यत आह **युधिरन्तर्भावितेति** । **राजकृत्वेति** । राजानं कृतवानित्यर्थः । **सहे च** । सहशब्दे उपपदे युधिकृञ्भ्यां क्वनिबित्यर्थः । **सप्तम्यां जनेर्डः** । सप्तम्यन्ते उपपदे जनेः भूतार्थाड्ड इत्यर्थः । **सरसिजमिति** । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । 'हलदन्तात्–' इति 'तत्पुरुषे । कृति–' इति वा अलुक् । **मन्दुरज इति** । 'वाजिशाला तु मन्दुरा' इत्यमरः **पञ्चम्यामजातौ** । **जनेरिति** । भूतार्थादिति शेषः । **संस्कारजमिति** । संस्काराज्जातमित्यर्थः । **उपसर्गे च** । जनेर्ड इति शेषः । संज्ञायामिति समुदायोपाधिः । **अनौ कर्मणि** । ननु जनेरकर्मकत्वात्तत्र कर्मण्युपपदे इत्यर्थस्य कथमन्वय इत्यत आह **पुमांसमनुरुध्येति** । अनुरुध्य जननं धात्वर्थ इति भावः । **पुमनुजेति** । पुंस् इति पूर्वपदे संयोगान्तलोप इति भावः । **अन्येष्वपि दृश्यते** । **अज इति** ।

पश्यन्ति विश्वदृश्वानि तानि नयनानि येषां ते विश्वदृश्वनयना इत्येवं क्वनिबन्तस्य लटा विग्रहेऽपि न क्षतिः । प्रत्ययान्तरनिवृत्त्यर्थं सूत्रमित्येवं वृत्तिकारादिभिर्व्याख्यातत्वात् । कालान्तरनिवृत्त्यर्थमिदमिति कैरप्यभियुक्तैरनुक्तत्वादिति दिक् । **राजनि युधि कृञः** । **सहे च** । इदमपि सूत्रद्वयं 'दृशेः क्वनिप्' इतिवन्नियमार्थमिति न्याय्यम् वस्तुतस्तु दृशिग्रहणेन निर्वाहस्यागतिकत्वादियं त्रिसूत्री विधात्रीत्यपि सुवचम् । प्राचां ग्रन्थास्त्विहोदासीना एवेति शब्दकौस्तुभे स्थितम् । **मन्दुरायामिति** । 'वाजिशाला तु मन्दुरा' इत्यमरः । **पुमनुजेति** । इह जनिः सकर्मकः, अनुरोधविशिष्टजननवृत्तित्वात् । **अन्येष्वपि दृश्यते** । 'सप्तम्यां जनेः–' इत्युक्तमसप्तम्यामपि दृश्यत इत्याह **अजः** । **द्विज इति** । न जायत इत्यजः, द्विर्जातो द्विजः, 'जन्मना जायते

ब्राह्मणः। ब्राह्मणजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः, तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्, परितः खाता परिखा। ३०१२ क्तक्तवतू निष्ठा। (१-१-२६) एतौ निष्ठासंज्ञौ स्तः। ३०१३ निष्ठा। (३-२-१०२) भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र 'तयोरेव-' (सू २८३३) इति भावकर्मणोः क्तः। 'कर्तरि कृत्' (सू २८३२) इति कर्तरि क्तवतुः। उकावितौ। स्नातं मया। स्तुतस्त्वया विष्णुः। विष्णुर्विश्वं कृतवान्। ३०१४ निष्ठायामण्यदर्थे। (६-४-६०) ण्यदर्थो भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्।

न जात इत्यर्थः। **द्विजो ब्राह्मण इति।** द्विजाति इत्यर्थः। 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्' इत्यादिस्मृतेरिति भावः। **अपिशब्द इति।** 'सप्तम्यां जनेर्डः' इत्यादिसूत्रेषु डविधिषु यानि विशेषणान्युपात्तानि प्रकृतिविशेषरूपाणि भूते कर्तरीति प्रत्ययार्थविशेषणं च तदतिक्रमार्थ इत्यर्थः। **क्तक्तवतू निष्ठा।** क्त, क्तवतु अनयोर्द्वन्द्वः। निष्ठेति प्रत्येकाभिप्रायमेकवचनम्। **निष्ठा।** भूते इति धातोरिति चाधिकृतम्, तदाह **भूतार्थेत्यादि। भावकर्मणोः। क्त इति।** तथा च क्तप्रत्ययविषये कर्तरीति न संबध्यते इति भावः। **कर्तरि क्तवतुरिति।** कृत्यक्तखलर्थानामेव भावकर्मणोर्विधानादिति भावः। 'तयोरेव कृत्यक्त-' इत्यत्र 'लः कर्मणि-' इत्यस्मात् सकर्मकेभ्यः कर्मणि कर्तरि च अकर्मकेभ्यो भावे कर्तरि चेत्यनुवर्तते। ततश्च अकर्मकेभ्यो भावे क्तः, सकर्मकेभ्यस्तु कर्मणीति व्यवस्था लभ्यते इति मत्वोदाहरति **स्नातं मयेति।** अकर्मकत्वाद् भावे क्तः। **स्तुतस्त्वया विष्णुरिति।** सकर्मकत्वात् कर्मणि क्तः। कर्तरि क्तवतुमुदाहरति **विष्णुर्विश्वं कृतवानिति। निष्ठायामण्यदर्थे। ण्यदर्थो भावकर्मणी इति।** 'ऋहलोः-' इति ण्यतः कृत्यसंज्ञकस्य तयोरेवेति भावकर्मणोरेव प्रवृत्तेरिति भावः। **ततोऽन्य-**

शूद्रः कर्मणा जायते द्विजः' इत्यभियुक्तोक्तेः। 'पञ्चम्यामजातौ' इत्युक्तं जातावपि दृश्यत इत्याह **ब्राह्मणज इति। अपिशब्द इति।** यत्तु 'अन्तात्यन्ताध्व-' इति प्रकरणे 'अन्यत्रापि दृश्यते' इत्युपसंख्यातं तद्भूतकालं विनापि यथा स्यादित्येवमर्थम्। वस्तुतस्तु प्रकृतसूत्रस्थस्यापिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्तद्वार्तिकमनेनैव गतार्थम्। विभावितं चेदम् 'इको गुणवृद्धी' इति सूत्रे जनेर्डं प्रक्रम्य 'गमेरप्ययं डो वक्तव्यः' इति वदता भाष्यकारेण। एवं च प्रकृतसूत्रस्थम् 'अन्येभ्योऽपि दृश्यते' इति वार्तिकमपि गतार्थमिति बोध्यम्। **क्तक्तवतू निष्ठा।** ननु क्तक्तवत्वोः सिद्धयोर्निष्ठेति संज्ञासिद्धिः, सिद्धायां निष्ठासंज्ञायां क्तक्तवत्वोर्विधानमित्यन्योन्याश्रय इति चेत्। अत्राहुः—भाविनी संज्ञाऽत्र विज्ञायत स भूते भवति यस्योत्पन्नस्य निष्ठेति संज्ञा भवति

३०१५ क्षियो दीर्घात्। (८-२-४६) दीर्घात् क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्मणोस्तु क्षितः कामो मया। 'श्र्युकः किति' (सू २३८१) श्रितः, श्रितवान्। भूतः, भूतवान्। स्नुतः। 'ऊर्णोतेर्नुवद्भावो वाच्यः' (वा १७४१)। तेन एकाच्त्वान्नेट्, ऊर्णुतः। नुतः। वृतः। **३०१६ रदाभ्यां निष्ठातो नः पूर्वस्य च दः।** (८-२-४२) रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्। निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च। शॄ, 'ॠत इत्-' (सू

श्रेति। कर्तरीत्यर्थः। क्तवताविति फलितम्। **क्षियो दीर्घः स्यादिति।** क्षिय इति पूर्वसूत्रमनुवर्तते, 'युप्लुवोर्दीर्घश्छन्दसि' इत्यतो दीर्घ इति चेति भावः। **क्षियो दीर्घात्।** दीर्घादिति क्षियो विशेषणम्, तदाह **दीर्घात् क्षिय इति।** दीर्घान्तादित्यर्थः। **निष्ठातस्य न इति।** 'रदाभ्याम्-' इत्यतस्तदनुवृत्तेरिति भावः। **क्षीणवानिति।** क्षिधातोः कर्तरि क्तवतुः, 'निष्ठायामण्यदर्थे' इति दीर्घः, तकारस्य नत्वम्, षात्परत्वाण्णः। **क्षितः कामो मयेति।** क्षपित इत्यर्थः। 'क्षि क्षये' इत्यस्माद् अन्तर्भावितण्यर्थात्कर्मणि क्तः। भावे तु क्षितं कामेनेत्युदाहार्यम्। अत्र ण्यदर्थयोर्भावकर्मणोर्विहिते क्ते दीर्घो न भवति, अण्यदर्थ इत्युक्तेः। दीर्घान्तत्वाभावात् 'क्षियो दीर्घात्' इति नत्वं न। **श्र्युकः कितीति।** श्रित इत्यादौ इण्निषेधस्मारकमिदम्। **स्नुत इति।** 'टु स्नु शब्दे' अस्मात् क्तः। ननु ऊर्णुत इति कथम्? अनेकाच्कत्वेन श्र्युक इति निषेधस्याप्रवृत्तेरित्यत आह **ऊर्णोतेर्नुवदिति।** वार्तिकमिदम्। **रदाभ्याम्।** रदाभ्यामित्यकारावुच्चारणार्थौ, तदाह **रेफदकाराभ्यामिति।** निष्ठायाः त् निष्ठात्, तस्य निष्ठात इति विग्रहः, तदाह **निष्ठातस्येति।** निष्ठातकारस्येत्यर्थः। **नः स्यादिति।** नकारः स्यादित्यर्थः। सूत्रे न इति प्रथमान्तम्। अकार उच्चारणार्थः। **दकारस्य चेति।** नकार इत्यनुषज्यते।

इत्याश्रयणे सामर्थ्याद् क्तक्तवत्वोर्विधानमेतदिति नास्त्युक्तदोष इति। **ण्यदर्थौ भावकर्मणी इति।** यद्यपि याज्या ऋगित्यादौ करणादावपि बाहुलकाण्ण्यद्भवति, तथापि 'तयोरेव-' इति वचनाद्भावकर्मणी एव साक्षादुपात्तोऽर्थ इति स एवेह विवक्षित इति भावः। **क्षियो।** क्षि क्षये, क्षि निवासगत्योः, द्वयोरपि ग्रहणम्। **क्षितः काम इति।** अन्तर्भावितण्यर्थत्वेन सकर्मकत्वात्कर्मणि क्तः। एतच्च 'अक्षितोत सनेदिमम' इति मन्त्रव्याख्यायां माधवग्रन्थे स्पष्टम्। भावे तु क्षितं कामेनेत्याद्युदाहरणीयम्। इण्निषेधसूत्रं स्मारयति **श्र्युकः कितीति।** **स्नुत इति।** टुक्षु शब्दे। **नुत इति।** णु स्तुतौ। **वृत इति।** वृङ् संभक्तौ, वृञ् वरणे। **रदाभ्याम्।** इह रदाभ्यामित्यनेन तकारो विशेष्यते न निष्ठा, तेन चरितमुदितमित्यत्र

२३१०) रपरः, णत्वम्, शीर्णः । बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह-कृतस्यापत्यं कार्तिः । छिन्नः । भिन्नः । **३०१७ संयोगादेरातो धातोर्यण्वतः ।** (८-२-४३) निष्ठातस्य नः स्यात् । द्राणः । स्त्यानः । ग्लानः । **३०१८ ल्वादिभ्यः ।** (८-२-४४) एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः । ज्या, 'ग्रहिज्या-' (सू २४१२) जीनः । 'दुग्वोर्दीर्घश्च' (वा ४८३२) 'दु गतौ' दूनः । 'दु दु उपतापे' इत्ययं तु न गृह्यते, सानुबन्धकत्वात् । 'मृदुतया दुतया' इति भावः । गूनः । 'पूञो विनाशे' (वा ४८३३) । पूना यवाः, विनष्टा इत्यर्थः । पूतमन्यत् । 'सिनोतेर्ग्रासकर्मकर्तृकस्य' (वा ४८३४) । सिनो ग्रासः । ग्रास इति

सूत्रे द इति षष्ठ्यन्तमिति भावः । चरितम् उदितम् इत्यत्र तु नत्वं न, निष्ठातकारस्य इटा व्यवहितत्वेन रदाभ्यां परत्वाभावात् । रेफात्परस्योदाहरति **शॄ इति ।** शॄधातोः क्तप्रत्ययसूचनमिदम् । ननु कृतस्यापत्यं कार्तिः । अत इञ्, आदिवृद्धिः, रपरत्वम् । अत्र निष्ठातकारस्य रेफात् परस्य नत्वं स्यादित्यत आह **बहिरङ्गत्वेनेति ।** दात्परस्योदाहरति **छिन्नो भिन्न इति ।** अत्र निष्ठातकारस्य धात्वन्तदकारस्य च नत्वमिति भावः । **संयोगादेः । निष्ठातस्य नः स्यादिति ।** शेषपूरणमिदम् । **द्राण इति ।** 'द्रा कुत्सायां गतौ' अस्मात् क्तः, नत्वम् णत्वम् । **ग्लान इति ।** 'ग्लै हर्षक्षये' 'आदेचः-' इत्यात्वे नत्वम् । **ल्वादिभ्यः । एकविंशतेरिति ।** क्र्यादिषु प्वादयो द्वाविंशतिः, तेषु आद्यं पूञं विहाय ल्वादिभ्य एकविंशतेरित्यर्थः । **ज्येति ।** धातुसूचनम् । **ग्रहिज्येति ।** संप्रसारणसूचनम् । **जीन इति ।** ज्या त इति स्थिते 'संयोगादेः-' इति निष्ठानत्वस्यासिद्धत्वात् ततः प्रागेव संप्रसारणे पूर्वरूपे च कृते आतः परत्वाभावात् 'संयोगादेरातः-' इति नत्वस्याप्राप्तावनेन नत्वम् । **दुग्वोर्दीर्घश्चेति ।** वार्तिकमिदम् । दु गु आभ्यां परस्य निष्ठातस्य नत्वं प्रकृतेर्दीर्घश्च इत्यर्थः । 'मृदुतया दुतया' इति माघकाव्ये दुतशब्दं साधयितुमाह **टु दु उपतापे इत्यादि । गून इति ।** गुधातोः क्ते दीर्घः । **पूञो विनाशे इति ।** वार्तिकमिदम्

न, तकारस्येटा व्यवहितत्वात्तदेतदाह **परस्य निष्ठातस्येति । बहिरङ्गत्वेनेति ।** निष्ठातकाराद्बहिर्भूततद्धितञित्प्रत्ययमाश्रित्याङ्गस्यादेरचो विधीयमानत्वाद् वृद्धिर्बहिरङ्गेति भावः । **द्राण इति ।** द्रा कुत्सायां गतौ । **ग्लानः । म्लान इति ।** ग्लै म्लै हर्षक्षये । **एकविंशतेरिति ।** क्र्यादिषु प्वादयो द्वाविंशतिः पठ्यन्ते, तत्र पूञं विहाय ल्वादयो ज्ञेयाः । **जीन इति ।** 'हल इति दीर्घः । सिद्धत्वान्नित्यत्वाच्च 'ग्रहिज्या-' इति संप्रसारणे कृते 'संयोगादेरातः-' इत्यस्याप्राप्तिः । **गून इति ।** गु पुरीषोत्सर्गे । **विनष्टा इति ।** धातूनामनेकार्थत्वात्पञ् पवन इत्यस्य विनाशेऽपि

किम्-सिता पाशेन सूकरी। कर्मकर्तृकस्य इति किम्-सितो ग्रासो देवदत्तेन।
३०१६ ओदितश्च (८-२-४५) भुग्नो, भुग्नः। टु ओ श्वि, उच्छूनः। ओ हाक्, प्रहीणः। 'स्वादय ओदितः' इत्युक्तम्। सूनः, सूनवान्। दूनः, दूनवान्। ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्, उड्डीनः। ३०२० द्रवमूर्तिस्पर्शयोः श्यः। (६-१-२४) द्रवस्य मूर्तौ काठिन्ये, स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायाम्। ३०२१ श्योऽस्पर्शे। (८-२-४७) श्यैङो निष्ठा-

---

विनाशार्थात् पूङः परस्य निष्ठातस्य नत्वमित्यर्थः। सिनोतेरिति। वार्तिकमिदम्। कर्मैव कर्ता कर्मकर्ता, ग्रासः कर्मकर्ता यस्य स ग्रासकर्मकर्तृकः, तस्मात् 'षिञ् बन्धने' इत्यस्मात्परस्य निष्ठातस्य नत्वमित्यर्थः। ओदितश्च। ओकारेतो धातोः परस्य निष्ठातस्य नत्वमित्यर्थः। भुग्न इति। नत्वस्यासिद्धत्वाद् जस्य पूर्वं कुत्वम्। ततो नत्वम्। उच्छून इति। उत्पूर्वात् 'टु ओ श्वि' इति धातोः क्तः, यजादित्वात्संप्रसारणम्, पूर्वरूपम्, 'श्वीदितः-' इति नेट्, हल इति दीर्घः, निष्ठानत्वम्। प्रहीण इति। 'घुमास्था-' इति ईत्वम्, नत्वम्, 'कृत्यचः' इति णत्वम्। स्वादय इति। 'षूङ् प्राणिप्रसवे' इत्याद्या नव धातव ओदित इति दिवादिगणे उक्तमित्यर्थः। सून इति। षूङः क्तः, नत्वं 'श्र्युकः क्किति' इति इण्निषेधः। दून इति। 'दूङ् परितापे' अस्मात् क्तः, स्वादित्वेन ओदित्त्वान्नत्वम्। ननु 'डीङ् विहायसा गतौ' इत्यस्य उड्डीन इति कथं रूपम्, सेट्कत्वाद् उगन्तत्वाभावेन 'श्र्युकः क्किति' इति निषेधस्याप्रवृत्तेरित्यत आह ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेडिति। इटि सति निष्ठातस्य ओदितो डीङः परत्वाभावान्नत्वाप्रसक्तेस्तस्य ओदित्सु पाठो व्यर्थः स्यादित्यर्थः। द्रवमूर्ति। 'श्यैङ् गतौ' इत्यस्य कृतात्वस्य श्य इति षष्ठी। द्रवमूर्तिश्च

वृत्तिः। सिनोतेरिति। षिञ्बन्धने। ग्रासरूपं कर्म ग्रासकर्म तत्कर्तृ यस्य सिनोतेस्ततः परस्य निष्ठातस्य नः स्यादित्यर्थः। सितो ग्रास इति। पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनवशाद् बन्धनेऽनुकूलो भवति तदा कर्मण एव कर्तृत्वमिति बोध्यम्। ग्रासेति किमिति। ग्रासकर्मकर्तृकस्येति किमर्थमित्यर्थः। कर्मकर्तृकेति। किमिति। ग्रासकर्मकस्येत्येवास्तु कर्तृपदं किमर्थमित्यर्थः। कर्मपदं विहाय ग्रासकर्तृकस्येत्युक्तौ तु ग्रासेन कण्ठः सित इत्यत्रापि स्यादिति बोध्यम्। भुग्न इति। भुजो कौटिल्ये। नत्वस्यासिद्धत्वाद् झलि परतः कुत्वम्। उच्छून इति। श्वयतेर्यजादित्वात्संप्रसारणे पूर्वरूपे च 'हलः' इति दीर्घः। प्रहीण इति। 'घुमास्था-' इति ईत्वम्। सून इति। षूङ् प्राणिप्रसवे। दून इति। दूङ् परितापे। ओदिन्मध्ये इति। यदि डीङ इट् स्यात्तर्हि धातोः परो निष्ठातकारो न संभवतीति

तस्य नः स्यादस्पर्शेऽर्थे । 'हलः' (सू २२२१) इति दीर्घः । शीनं घृतम् । अस्पर्शे किम्-शीतं जलम् । द्रवमूर्तिस्पर्शयोः किम्-संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः । ३०२२ प्रतेश्च । (६-१-२५) प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायाम् । प्रतिशीनः । ३०२३ विभाषाभ्यवपूर्वस्य । (६-१-२६) श्यः संप्रसारणं वा स्यात् । अभिश्यानम् अभिशीनं घृतम् । अवश्यानः अवशीनो वृश्चिकः । व्यवस्थितविभाषेयम् । तेनेह न, समवश्यानः । ३०२४ अञ्चोऽनपादाने । (८-२-४८) अञ्चो निष्ठातस्य नः स्यान्न त्वपा-

---

स्पर्शश्चेति विग्रहः । मूर्तिवित्यस्य विवरणम् काठिन्य इति । संप्रसारणं स्यादिति । 'ष्यङः संप्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः । तथा च श्यैङः क्ते आत्वे संप्रसारणे पूर्वरूपे शित इति स्थिते श्योऽस्पर्शे । श्यः अस्पर्शे इति च्छेदः । दीर्घ इति । नत्वात्प्रागेव 'हलः' इति दीर्घ इत्युचितम्, नत्वस्य त्रैपादिकत्वात् । शीनं घृतमिति । घनीभूतमित्यर्थः । धातूनामनेकार्थत्वात् । यद्यपि घृतेऽप्यनुष्णस्पर्शोऽस्त्येव । तथापि शीताख्यस्पर्शविशेष एव विवक्षित इति भावः । अस्पर्शे किमिति । श्यैङो निष्ठातस्य नत्वं स्यादित्येतावदेवास्त्वित्यर्थः । शीतं जलमिति । शीतस्पर्शवदित्यर्थः । अत्र 'द्रवमूर्ति–' इति संप्रसारणमेव, न तु निष्ठानत्वमित्यर्थः । एवं च 'द्रवमूर्तिस्पर्शयोः–' इत्यस्य स्पर्शे इदमुदाहरणम् । 'श्योऽस्पर्शे' इत्यस्य तु प्रत्युदाहरणमिति बोध्यम् । सूत्रयोः स्पर्शशब्दः प्रधानभूते गुणभूते च वर्तते । तत्र गुणभूते विशेष्यनिघ्नः । शीता आपः, शीतं जलमित्यादि । यदा तु स्पर्शविशेषो गुणः प्राधान्येन विवक्षितः तदा क्लीबत्वमेव । 'शीतं गुणे' इत्यमरः । संप्रसारणविधौ पृच्छति द्रवमूर्तिस्पर्शयोःकिमिति। संश्यान इति। अत्र स्पर्शस्याप्रतीतेः न संप्रसारणम्। नत्वं तु भवत्येवेति भावः। प्रतेश्च । द्रवमूर्तिस्पर्शाभ्यामन्यत्रापि संप्रसारणप्राप्त्यर्थमिदम्। प्रतिशीन इति । प्रतिगत इत्यर्थः । अत्र 'श्योऽस्पर्शे' इति नत्वम् । विभाषा । श्यैङ इति शेषः । संप्रसारणं वा स्यादिति । शेषपूरणमिदम् । द्रवमूर्तिस्पर्शयोर्नित्यं संप्रसारणे प्राप्ते ततोऽन्यत्राप्राप्ते विभाषेयम् । अभिश्यानं घृतमिति । अत्र द्रवमूर्तौ संप्रसारणविकल्पः । अवश्यानः, अवशीनो वृश्चिक इति । अत्र द्रवमूर्तिस्पर्शाभावेऽपि संप्रसारणविकल्पः । समवश्यान इत्यत्रापि संप्रसारणविकल्पमाशङ्क्याह

नत्वार्थः पाठोऽनर्थकः स्यादिति भावः । न च ओदित्मध्ये पाठसामर्थ्यादिटा व्यवधाने नत्वं भवेदिति वैपरीत्यं किं न स्यादिति शङ्क्यम्, लक्ष्यानुरोधेन इडभावकल्पनाया एव न्याय्यत्वात् । अन्ये तु सत्यपि इडागमे सवर्णदीर्घे चैकादेशस्य पूर्वान्तत्वेन ग्रहणादिटा व्यवधानं नास्त्येवेतीष्टं सिध्यतीत्याहुः । संश्यान इति । श्यैङ

दाने । ३०२५ यस्य विभाषा । (७-२-१५) यस्य क्वचिद्विभाषयेड्विहित-स्ततो निष्ठाया इयन स्यात् । 'उदितो वा' (सू ३३२८) इति क्त्वायां वेट्त्वा-दिह नेट् समक्नः । अनपादाने किम्-उदक्तमुदकं कूपात् । नत्वस्यासिद्ध-त्वाद् 'व्रश्च-' (सू २१४) इति षत्वे प्राप्ते, 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः (वा ४७७३) । वृक्णः । वृक्णवान् । ३०२६ परिस्कन्दः प्राच्यभरतेषु । (८-३-७५) पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते ।

व्यवस्थितेति । अञ्चोऽनपादाने । न त्वपादाने इति । अपादानसमभिव्या-हारे असतीत्यर्थः । यस्य विभाषा । यस्येति । यस्मादित्यर्थः । निष्ठाया इयन स्यादिति । 'श्वीदितः-' इत्यतो निष्ठायामिति 'नेड्वशि-' इत्यतो नेडिति चानुवर्तत इति भावः । नन्वञ्चेर्नित्यं सेट्कत्वात् कथं तस्य क्वचिद्वेट्कत्वमित्यत आह उदितो वेति । समक्न इति । संगत इत्यर्थः । संपूर्वाद् अञ्चुधातोः क्तः 'आर्धधातुकस्येट्-' इति प्राप्तस्य इटो निषेधः । 'अनिदिताम्-' इति नलोपः । चस्य कुत्वम् । उदक्तमुदकं कूपादिति । उद्धृतमित्यर्थः । अत्रापादानसमभिव्याहारसत्त्वाद् नत्वं नेति भावः । 'ओ व्रश्चू छेदने' सस्य श्चुत्वेन निर्देशः, अस्मात्क्तः, 'ग्रहिज्या-' इति संप्रसार-णम्, ऊदित्त्वेन वेट्कत्वादिह 'यस्य विभाषा' इति नेट्, चस्य कुत्वेन कः, 'ओदि-तश्च' इति निष्ठानत्वम्, तस्यासिद्धत्वेन झल्परत्वात् 'स्कोः-' इति सलोपः, णत्वम्, वृक्ण इति रूपमिति स्थितिः । तत्र नत्वस्यासिद्धत्वेन झल्परत्वाद् 'व्रश्च-' इति षत्वं स्यादित्यत आह निष्ठादेशः षत्वेति । तथा च 'व्रश्चभ्रस्जसृजमृजयज-राजभ्राजच्छशां षः' इति षत्वे कर्तव्ये नत्वस्यासिद्धत्वाभावेन झल्परकत्वाभावान्न षत्वमित्यर्थः । स्वरप्रत्ययेड्विधिषूदाहरणानि भाष्ये स्पष्टानि । परिस्कन्दः प्राच्यभरतेषु । 'अपदान्तस्य मूर्धन्यः' इत्यधिकारे इदं सूत्रम् । पूर्वेणेति ।

गताविल्यस्य 'आदेच-' इत्यात्वे 'संयोगादेरातः-' इति निष्ठातस्य नः । यस्य विभाषा । यस्येत्यार्धधातुकापेक्षया षष्ठी । यदीयस्यार्धधातुकस्येत्यर्थः । समक्न इति । अञ्चु गतिपूजनयोः संपूर्वः, नत्वस्यासिद्धत्वात् । झलि परतः कुत्वम् । उदक्तमिति । उद्धृतमित्यर्थः । व्यक्तमित्येतत्तु अञ्जू व्यक्तीत्यस्य न त्वञ्चेः । तेनात्र नत्वाभावः । वृक्ण इति । ओव्रश्चू छेदने, 'ग्रहिज्या-' इति संप्रसारणम् । नत्वस्यासिद्धत्वात् 'स्कोः-' इति सलोपः 'चोः कुः' इति कुत्वं च । ऊदित्त्वेन वेट्कत्वाद् 'यस्य विभाषा' इति निष्ठाया इडभावः । नुड्विधिलादेशविनामेषु वर्णैकदेशस्यापि वर्णत्वेन ग्रहणादृकारैकदेशो रेफो निमित्तमिति 'अट्कुप्वाङ्-' इति नस्य णत्वम् । णत्वस्य विनाम इति प्राचां संज्ञा । 'ऋवर्णान्नस्य णत्वम्-' इति यथाश्रुतपक्षेऽपि णत्वनिषेधार्थं

परिस्कन्दः। 'प्राच्य' इति किम्—परिष्कन्दः परिस्कन्दः। 'परेश्च' (सू २३४४) इति षत्वविकल्पः। 'स्तन्भेः' (सू २२७२) इति षत्वे प्राप्ते—३०२७ **प्रतिस्तब्धनिस्तब्धौ च**। (८-३-११४) अत्र षत्वं न स्यात्। ३०२८ **दिवोऽविजिगीषायाम्**। (८-२-४६) दिवो निष्ठातस्य नः स्यादविजिगीषायाम्। द्यूनः। विजिगीषायां तु द्यूतम्। ३०२९ **निर्वाणोऽवाते**। (८-२-५०) अवाते इति च्छेदः। निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः। ३०३० **शुषः कः**। (८-२-५१) निष्ठात इत्येव। शुष्कः। ३०३१ **पचो वः**। (८-२-५२) पक्वः। ३०३२ **क्षायो मः**। (८-२-५३) क्षामः। ३०३३ **स्त्यः प्रपूर्वस्य**। (६-१-२३)

'परेश्च' इति पूर्वसूत्रम्। परेः परस्य स्कन्देः सस्य षो वा स्यादिति तदर्थः। तेन षत्वविकल्पे प्राप्ते प्राच्यभरतेषु षत्वाभावो निपात्यत इत्यर्थः। **परिस्कन्द इति**। परिपूर्वात् स्कन्देर्निष्ठायास्तकारलोपः। **दिवो**। अविजिगीषायामिति छेदः। **द्यून इति**। स्तुत इत्यर्थः। 'च्छ्वोः–' इत्यूठ्। **विजिगीषायां तु द्यूतमिति**। द्यूतस्य विजिगीषया प्रवृत्तेरिति भावः। **निर्वाणोऽवाते**। **कर्ता नेति**। निरित्युपसर्गपूर्वो वाधातुर्विनाशे वर्तते, उपरमे च। तस्मिन् धात्वर्थे यदि वायुः कर्ता तदा नत्वं नेत्यर्थः। **निर्वाणोऽग्निर्मुनिर्वेति**। नष्ट उपरत इति क्रमेणार्थः। 'गत्यर्थाकर्मक–' इत्यादिना कर्तरि क्तः। **निर्वातो वात इति**। अत्र वातस्य कर्तृत्वान्नत्वं नेति भावः। निर्वाणो दीपो वातेन इत्यत्र तु वातस्य करणत्वेन विवक्षितत्वात्कर्तृत्वाभावाद् नत्वं निर्बाधम्। भावे तु निर्वातं वातेन। **शुषः कः**। **निष्ठात इति**। शुषः परस्य निष्ठातस्य कः स्यादिति फलितम्। **पचो वः**। पचेः परस्य निष्ठातस्य वः स्यादित्यर्थः। **पक्व इति**। वत्वस्यासिद्धत्वात् कुत्वम्। **क्षायो मः**। 'क्षै क्षये' इत्यस्मात् परस्य निष्ठातस्य मः स्यादित्यर्थः। **क्षाम इति**। 'आदेचः–' इत्यात्वम्। 'गत्यर्थाकर्मक–' इति कर्तरि क्तः। क्षीण इत्यर्थः। अन्तर्भावितण्यर्थत्वे

क्षुभ्नादिषु नृमनशब्दपाठादकारं निमित्तीकृत्यापि 'अट्कुप्वाङ्–' इति णत्वं भवत्येवेति दिक्। **परिस्कन्दः**। अचि निपातनम्। अथवा निष्ठातकारस्य लोप इति काशिका। **द्यून इति**। 'च्छ्वोः शूड्–' इत्यूठ्। क्षीण इत्यर्थः। **द्यूतमिति**। विजिगीषया हि तत्राक्षाः पात्यन्ते इति गम्यते विजिगीषा। **निर्वाणोऽवाते**। वा गतिगन्धनयोः, निःपूर्वादस्मान्निष्ठातस्य नत्वे णत्वम्। **वातश्चेत्कर्ता नेति**। एवं च वातेन हेतुना निर्वाणो दीप इत्यत्र निषेधो नेत्याहुः। **निर्वात इति**। 'गत्यर्थाकर्मक–' इति कर्तरि क्तः। नितरां वातो गत इत्यर्थः। **शुष्क इति**। शुष शोषणे।

प्रात्स्त्यः संप्रसारणं स्यान्निष्ठायाम्। ३०३४ **प्रस्त्योऽन्यतरस्याम्**। (८-२-५४) निष्ठातस्य मो वा स्यात्। प्रस्तीमः, प्रस्तीतः। प्रात् किम्—संस्त्यानः। ३०३५ **अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः**। (८-२-५५) ञि फला, फुल्लः। निष्ठातस्य लत्वं निपात्यते। क्तवत्वेकदेशस्यापीदं निपातनमिष्यते, फुल्लवान्। क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः। तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते। क्षीबो मत्तः। कृशस्तनुः। उल्लाघो नीरोगः। अनुपसर्गात् किम्—३०३६ **आदितश्च**। (७-२-१६) आकारेतो निष्ठा इण्न स्यात्। ३०३७ **ति च**। (७-४-८९) चरफलोरत उत्स्यात्तादौ किति। प्रफुल्तः। प्रक्षीबितः। प्रकृशितः।

क्षपित इत्यर्थः। **स्त्यः प्रपूर्वस्य**। स्त्यै इत्यस्य कृतात्वस्य स्त्य इति षष्ठ्यन्तम्। 'ष्यङः संप्रसारणम्' इत्यतः संप्रसारणमिति 'स्फायः स्फी' इत्यतो निष्ठायमिति चानुवर्तते, तदाह **प्रादित्यादि**। संप्रसारणे पूर्वरूपे 'हलः' इति दीर्घे प्रस्ती त इति स्थिते **प्रस्त्योऽन्यतरस्याम्**। प्रस्त्य इति पञ्चमी। प्रपूर्वात्स्त्यैधातोरित्यर्थः। निष्ठातस्य म इति शेषः। **प्रस्तीम इति**। संघीभूत इत्यर्थः। **अनुपसर्गात्**। एते निपात्यन्ते उपसर्गात् परा न चेदित्यर्थः। **लत्वमिति**। 'आदितश्च' इति इडभावः, 'ति च' इत्युत्वं च सिद्धमिति भावः। 'फल निष्पत्तौ' इत्यस्य तु नात्र ग्रहणम्, इडभावस्यापि निपात्यत्वापत्तेः। ननु क्तवतुप्रत्यये फुल्लवानिति कथम्। क्तवतुप्रत्यये क्तस्यानर्थकत्वेन फुल्लशब्देनाग्रहणादित्यत आह **क्तवत्वेकदेशस्यापीति**। **क्षीबादिष्विति**। क्षीबकृशोल्लाघेष्वित्यर्थः। **क्तप्रत्ययस्यैवेति**। न तु क्तवत्वेकदेशस्यापीत्यर्थः। अनर्थकत्वादिति भावः। **तस्येति**। तलोपस्येत्यर्थः। **क्षीबो मत्त इति**। क्षीबेः क्तः, तलोपः, इडभावश्च। **कृशस्तनुरिति**। कृशेः क्तः, इडभावश्च। **उल्लाघो नीरोग इति**। लाघेः क्तः, तलोपः, इडभावश्च। अत्र मत्तादिरेवार्थो निपातनबलात्। **अनुपसर्गात्किमिति**। अत्र प्रफुल्त इति प्रत्युदाहरणं विवक्षन् तत्र विशेषमाह **आदितश्च**। **निष्ठाया इण्न स्यादिति**। 'श्वीदितः—' इत्यतो निष्ठायामिति 'नेड्वशि—' इत्यतो नेडिति चानुवर्तते इति भावः। **ति च**। 'चरफलोश्च' इति सूत्रानुवर्ति

क्षाम इति। क्षै क्षये। 'आदेचः—' इत्यात्वम्। **प्रस्तीमः**। **प्रस्तीत इति**। स्त्यै ष्ट्यै शब्दसंघातयोः। आत्वे कृते 'संयोगादेः—' इत्यस्यासिद्धत्वात्पूर्वं संप्रसारणे पूर्वरूपे च कृते 'हलः' इति दीर्घः, पश्चाद्यण्वत्त्वादन्तस्थयोर्विरहान्न नत्वम्। संस्त्यान इत्यत्र तु भवत्येव। **क्षीबादिष्विति**। क्षीबृ मदे, कृश तनुत्वे, लाघृ शक्तावुत्पूर्वः, एभ्यः क्तः। ननु फुल्ल विकसन इत्यस्मादुल्लाघेश्च पचाद्यचि इतराभ्यामिगुपधलक्षणे

प्रोत्फावितः। कथं तर्हि 'लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति, 'फुल्ल विकसने' पचाद्यच्। सूत्रं तु फुल्लतादिनिवृत्त्यर्थम्। 'उत्फुल्लसंफुल्लयोरुपसंख्यानम्' (वा ४८७५)। ३०३८ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्। (८-२-५६) एभ्यो निष्ठातस्य नो वा। नुन्नः, नुत्तः। विद विचारणे, रौधादिक एव गृह्यते। उन्दिना परेण साहचर्यात्। विन्नः, वित्तः। वेत्तेस्तु विदितः। विद्यतेर्विन्नः। उन्दी—३०३९ श्वीदितो निष्ठायाम्। (७-२-१४) श्वयतेरीदितश्च निष्ठाया इण्न। उन्नः, उत्तः। त्राणः, त्रातः। घ्राणः, घ्रातः। ह्रीणः, ह्रीतः। ३०४० न ध्याख्यापृमूर्च्छिमदाम्। (८-२-५७) एभ्यो निष्ठातस्य नत्वं न।

मत्वाह चरफलोरिति। अत उत्स्यादिति। 'उत्परस्यातः' इत्यतस्तदनुवृत्तेरिति भावः। कितीति। 'दीर्घ इणः किति' इत्यतो मण्डूकप्लुत्या तदनुवर्तते इति भावः। वस्तुतस्तु कितीत्यनुवृत्तिर्निर्मूला निष्फला च। तयोः सेट्कत्वेन निष्ठां विना तकारादिप्रत्ययाभावात्। कथं तर्हीति। प्रफुल्लमित्यस्य सोपसर्गत्वेन निष्ठातस्य लत्वासंभवादिति भावः। समाधत्ते फुल्लेति। ननु फुल्लेः पचाद्यचैव फुल्ल इत्यस्य सिद्धेः फुल्ल इत्यस्य निपातनं व्यर्थमित्यत आह सूत्रं त्विति। उत्फुल्लसंफुल्लयोरिति। निष्ठातस्य लत्वनिपातनमिति शेषः। सोपसर्गार्थं वचनम्। नुदविदोन्द। ह्रीधातोरप्राप्ते इतरेभ्यो नित्यं प्राप्ते नत्वविकल्पोऽयम्। रौधादिक इति। 'विद विचारणे' इत्ययमित्यर्थः। वेत्तेस्त्विति। 'विद ज्ञाने' इत्यस्येत्यर्थः। अयं सेट्, अनिट्केष्वनन्तर्भावात्। तदाह विदित इति। अत्र निष्ठातस्य इटा व्यवहितत्वान्नत्वं नेति भावः। विद्यतेर्विन्न इति। 'विद सत्तायाम्' इत्ययमनिट्, 'रदाभ्याम्–' इति नित्यं नत्वमिति भावः। उन्दीति। उदाहरणसूचनम्। श्वीदितो निष्ठायाम्। श्वि, ईदित् अनयोः समाहारद्वन्द्वात्पञ्चमी। 'नेड्वशि–' इत्यतो नेडित्यनुवर्तते, तदाह श्वयतेरिति। न ध्याख्या। पञ्चम्यर्थे षष्ठी, तदाह

कप्रत्यये च फुल्लादयः सिध्यन्ति तत्किं सूत्रेणेत्यत आह सूत्रं त्विति। निवृत्त्यर्थमित्युपलक्षणम्। फुल्लवानिति रूपस्य 'निष्ठा च द्व्यजनात्' इत्याद्युदात्तस्य च सिद्ध्यर्थमिति बोध्यम्। उत्फुल्लसंफुल्लयोरिति। यद्यपि प्रफुल्ल इतिवत् फुल्लेः पचाद्यचा सिद्धम्, तथापि उत्फुल्तः संफुल्त इति प्रयोगनिवृत्त्यर्थं वचनम्। नुदविदो। 'रदाभ्या–' 'संयोगादेरातः–' इति नित्ये प्राप्ते ह्रीत्यस्याप्राप्ते उभयत्र विभाषेयम्। वेत्तेस्त्विति। तथा च भाष्यम्। 'वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते। विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः' इति। उन्नः, उत्त इति। 'अनिदिताम्–' इति नलोपः। न ध्या। ध्यै चिन्तायाम्। ख्या प्रकथने। पॄ पालनपूरणयोः। मुर्च्छा मोहसमुच्छ्रा-

ध्यातः। ख्यातः। पूर्तः। 'राल्लोपः'। मूर्तः। मत्तः। **३०४१ वित्तो भोगप्रत्यययोः** (८-२-५८) विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते चार्थे। वित्तं धनम्। वित्तः पुरुषः। अनयोः किम्-विन्नः। 'विभाषा गमहन-' (सू २०११) इति क्वसौ वेट्त्वादिह नेट्। **३०४२ भित्तं शकलम्।** (८-२-५९) भिन्नमन्यत्। **३०४३ ऋणमाधमर्ण्ये।** (८-२-६०)

पञ्च इति। **ध्यात इति।** ध्यैधातोः क्तः 'आदेच:-' इत्यात्वम्। अत्र 'संयोगादेरातः-' इति प्राप्तं नत्वं न। **ख्यात इति।** ख्याञादेशपक्षे यणवत्त्वात् 'संयोगादेरातः-' इति प्राप्तं नत्वं न। ख्शादेशस्य शस्य यत्वे तु यस्य णत्वप्रकरणगतस्यासिद्धत्वाद्यणवत्त्वाभावात् 'संयोगादेरातः-' इति नत्वस्य न प्रसक्तिः। स्वतःसिद्धख्याधातोस्तु आर्धधातुके प्रयोगो नास्त्येवेति ख्याग्रहणं व्यर्थमेव। **पूर्त इति।** पृधातोः क्तः 'श्र्युकः किति' इति नेट् 'उदोष्ठ्यपूर्वस्य' इति उत्त्वम्, रपरत्वम्। इह 'रदाभ्याम्-' इति प्राप्तं नत्वं न। मुर्छाधातोः क्ते आह **राल्लोप इति।** छस्य लोप इति भावः। **मूर्त इति।** 'आदितश्च' इति नेट्। छलोपे 'रदाभ्याम्-' इति प्राप्तं नत्वं न। 'हलि च' इति दीर्घः। **मत्त इति।** 'मदी हर्षग्लेपनयोः' अस्मात् क्तः, 'श्वीदितो-' इति नेट्। अत्र 'रदाभ्याम्-' इति प्राप्तं नत्वं न। **वित्तो भोग।** भुज्यत इति भोगो भोग्यम्। प्रतीयते इति प्रत्ययः प्रख्यातः। अत्र विन्दतेरेव ग्रहणमिति भाष्ये स्पष्टम्, तदाह **विन्दतेरिति।** **निपातोयमिति।** 'नुदविदोन्द-' इति प्राप्तस्य पाक्षिकनत्वस्य अभावनिपातनमित्यर्थः। तस्य भोगप्रत्यययोः कदाऽपि नत्वं नेत्यर्थः। **प्रतीते इति।** प्रख्याते इत्यर्थः। **वित्तः पुरुष इति।** प्रख्यात इत्यर्थः। **विन्न इति।** लब्धश्चोरादिरित्यर्थः। अत्र 'यस्य विभाषा' इति इण्निषेधमुपपादयति **विभाषा गमेति।** एकाच इति निषेधाच्चेत्यपि बोध्यम्। **भित्तं शकलम्।** शकले वाच्ये भिदेः क्तस्य नत्वाभावो निपात्यते। शकलत्वजातिविशिष्टे अवयवार्थमनपेक्ष्य रूढोऽयम्। ततश्च भित्तशकलयोः पर्यायत्वाच्च सहप्रयोगः।

ययोः। मदी हर्षे। **पूर्त इति।** 'श्र्युकः किति' इति इण्निषेधः। लोपविधिं स्मारयति **राल्लोप इति।** **मूर्त इति।** 'आदितश्च' इति नेट्। **मत्त इति।** 'श्वीदितः-' इति नेट्। वेत्तेर्ज्ञानार्थकाद्विदेरिट्या भाव्यं सत्तार्थकविदेर्विचारणार्थकविदेश्च भोगप्रत्यययोर्वृत्तिर्न संभवतीत्याशयेनाह **विन्दतेरिति।** विद्लृ लाभ इत्यस्येत्यर्थः। भुज्यत इति भोगः। प्रतीयत इति प्रत्यय इति कर्मसाधनावेताविति व्याचष्टे **भोग्ये प्रतीते चार्थ इति।** **भित्तं शकलम्।** भिदेः क्ते 'रदाभ्याम्-' इति प्राप्तनत्वस्याभावो निपात्यते। 'भित्तं शकलखण्डे वा' इत्यमरः। **भिन्नमन्यदिति।** विदीर्णमित्यर्थः।

ऋधातोः क्ते तकारस्य नत्वं निपात्यते आधमर्ण्यव्यवहारे । ऋतमन्यत् । २०४४ **स्फायः स्फी निष्ठायाम्** । (६-१-२२) स्फीतः । २०४५ **इण्निष्ठायाम्** । (७-२-४७) निरः कुषो निष्ठाया इट् स्यात् । 'यस्य विभाषा' (सू ३०२५) इति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः । २०४६ **वसतिक्षुधोरिट्** । (७-२-५२) आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् । उषितः । क्षुधितः । २०४७ **अञ्चेः पूजायाम्** । (७-२-५३) पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् ।

भिदिक्रियाविवक्षायां तु भित्तं भिन्नमिति भवतीति भाष्ये स्पष्टम् । **ऋणमाधमर्ण्ये** । अधमर्णस्य कर्म आधमर्ण्यम् । **आधमर्ण्यव्यवहारे इति** । स च अन्यदीयं द्रव्यं गृहीतमियता कालेन इयत्या वृद्धया प्रतिदीयते इति संविद्रूपः, तस्मिन्विषये इत्यर्थः । **ऋतमन्यदिति** । सत्यमित्यर्थः । **स्फायः स्फी** । 'स्फायी वृद्धौ' अस्य स्फीभावः स्याद् निष्ठायां परत इत्यर्थः । **इण्निष्ठायाम्** । 'निरः कुषः' इति सूत्रमनुवर्तते, तदाह **निर इति** । ननु 'आर्धधातुकस्येट्–' इत्येव सिद्धे किमर्थमिदं सूत्रमित्यत आह **यस्येति** । कुषधातोः तृजादौ 'निरः कुषः' इति पूर्वसूत्रेण वेट्कत्वाद् 'यस्य विभाषा' इति प्राप्तस्येण्निषेधस्य बाधनार्थं पुनरिह विधानमित्यर्थः । इडित्यनुवर्तमाने पुनरिड्ग्रहणं तु 'स्वरतिसूति–' इत्यतो वाग्रहणानुवृत्तिनिवृत्तये । **वसतिक्षुधोरिट्** । पञ्चम्यर्थे षष्ठी । **क्त्वानिष्ठयोरिति** । 'क्लिशः क्त्वानिष्ठयोः' इत्यतः तदनुवृत्तेरिति भावः । **नित्यमिति** । इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य 'स्वरतिसूति–' इत्यतो वाग्रहणानुवृत्तिनिवृत्त्यर्थत्वादिति भावः । 'एकाच उपदेशे–' इति इण्निषेधबाधनार्थमिदं सूत्रम् । **उषित इति** । यजादित्वात् संप्रसारणम्, 'शासि-

---

ऋणमाधमर्ण्ये । अधमं दुःखप्रदमृणमस्य सोऽधमर्णः, तस्य भाव आधमर्ण्यं तेन व्यवहारविशेषो लक्ष्यते । ततश्च उत्तमर्णेऽपि सिध्यतीत्याशयेन व्याचष्टे **अधमर्णव्यवहार इति** । स व्यवहारो दातृग्रहीत्रोः संबन्धी भवतीत्युत्तमर्णेऽपि प्रयोगो न विरुध्यते । लक्षणायां तु 'धारेरुत्तमर्णः' इति निर्देशो लिङ्गम् । **स्फायः स्फी** । स्फायी वृद्धौ । कथं तर्हि स्फीतिकाम इति । स्फीतमाचष्टे इति ण्यन्तादच इः, अल्लोपणिलोपौ । **यस्येति** । 'निरः कुषः' इति विकल्पितेट्त्वादिति भावः । **उषित इति** । यजादित्वात्संप्रसारणम् । 'शासिवसि–' इति षः । वसतीति शपा निर्देशः स्पष्टार्थः । वस्तेः सेट्कत्वाद्भवितव्यमेवेटा । **क्षुधित इति** । एवं च 'तस्यालमेषा क्षुधितस्य' इति प्रयोगो निर्बाध एवेति क्षुधेर्धातोर्भावे क्विपि 'तारकादित्वादितच्' इति धातुवृत्तिषु यदुक्तं तन्नादर्तव्यम् । समानन्यायतया क्षुधितादावुपयोक्ष्यत इति वा कथंचिन्नेयम् । **अञ्चेः** । उदित्वात् क्त्वायां विकल्पे प्राप्ते निष्ठायां 'यस्य विभाषा' इति

अञ्चितः। गतौ तु अक्तः। **३०४८ लुभो विमोहने। (७-२-५४)** लुभः क्त्वानिष्ठयोर्नित्यमिट् स्यान्न तु गार्ध्ये। लुभितः। गार्ध्ये तु लुब्धः। **३०४९ क्लिशः क्त्वानिष्ठयोः। (७-२-५०)** इड् वा स्यात। 'क्लिश उपतापे' अस्य नित्यं प्राप्ते 'क्लिशू विबाधने' अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः। *क्लिशितः, क्लिष्टः।* **३०५० पूङश्च। (७-२-५१)** पूङः क्त्वानिष्ठयोरिड् वा स्यात्। **३०५१ पूङः क्त्वा च। १-२-२२)** पूङः क्त्वा निष्ठा च सेट् किन्न स्यात्। पवितः, पूतः। क्त्वाग्रहणमुत्तरार्थम्। 'नोपधात्-' (सू ३३२४) इत्यत्र हि क्त्वैव संबध्यते। **३०५२ निष्ठा शीङ्स्वि-**

वसिधसीनां च' इति षः। **अञ्चेः पूजायाम्।** 'उदितो वा' इति क्त्वायां विकल्पे प्राप्ते निष्ठायां तु 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम्। **अञ्चित इति।** 'नाञ्चेः पूजायाम्' इति नलोपनिषेधः। **लुभो विमोहने।** लुभ इति पञ्चमी। 'लुभ विमोहने' तुदादिः। विमोहनं व्याकुलीकरणमिति वृत्तिः। 'लुभ गार्ध्ये' दिवादिः। अत्र तौदादिकस्यैव ग्रहणम्, तस्यैव विमोहनार्थकत्वात्। न तु दैवादिकस्य, तस्य गार्ध्यार्थकत्वात्, तदाह **न तु गार्ध्ये इति।** 'तीषसह-' इति क्त्वायां विकल्पे प्राप्ते निष्ठायां तु 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम्। **लुभित इति।** विमोहित इत्यर्थः। **गार्ध्ये तु लुब्ध इति।** अभिकाङ्क्षावानित्यर्थः। 'मति-बुद्धिपूजार्थेभ्यश्च' इति कर्तरि क्तः। **क्लिशः क्त्वानिष्ठयोः।** इड् वा स्यादिति शेषः। 'स्वरतिसूति-' इत्यतो वेत्यनुवृत्तेरिति भावः। **नित्यं प्राप्त इति।** 'आर्धधातुकस्येड्वलादेः' इत्यनेनेति भावः। **विकल्पे सिद्ध इति।** ऊदित्त्वादिति भावः। **निष्ठायां निषेधे प्राप्ते इति।** 'यस्य विभाषा' इत्यनेनेति भावः। **पूङश्च।** **क्त्वानिष्ठयोरिति।** 'क्लिशः क्त्वानिष्ठयोः' इत्यतस्तदनुवृत्तेरिति भावः। **इड्-वेति।** 'स्वरतिसूति-' इत्यतो वाग्रहणस्य 'इरिनष्ठायाम्' इत्यत इट इत्यस्य चानुवृत्तेरिति भावः। 'श्र्युकः-' इति निषेधे प्राप्ते विकल्पोऽयम्। **पूङः क्त्वा च।** 'न क्त्वा सेट्' इत्यतो न सेड् इत्यनुवर्तते। 'असंयोगात्-' इत्यतः किदिति 'निष्ठा शीङ्-' इत्यतो निष्ठेति च, तदाह **पूङः क्त्वा निष्ठा चेत्यादि।** ननु 'न क्त्वा सेट्'

निषेधे प्राप्ते वचनम्। **अञ्चित इति।** 'नाञ्चेः पूजायाम्' इति नलोपनिषेधः। **अक्त इति।** 'अनिदिताम्-' इति नलोपः। **लुभो।** 'तीषसह-' इति क्त्वायां विकल्पे निष्ठायां निषेधे च प्राप्ते वचनम्। **पूङश्च।** 'श्र्युकः किति' इति निषेधे प्राप्ते वचनम्। **पूङः क्त्वा च।** 'न क्त्वा सेट्' इत्यनेनैव सिद्धे क्त्वाग्रहणमिह व्यर्थमित्यत आह **उत्तरार्थमिति।** **क्त्वैवेति।** न तु निष्ठा, चानुकृष्टत्वादिति

ग्रिमिदिक्ष्विदिधृषः। (१-२-१९) एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः। शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्यितः। शेश्यितवान्। 'आदिकर्मणि निष्ठा वक्तव्या' (वा २०५१) ३०५३ आदिकर्मणि क्तः कर्तरि च। (३-४-७१) आदिकर्मणि यः क्तः स कर्तरि स्यात्। चाद्भावकर्मणोः। ३०५४ विभाषा भावादिकर्मणोः। (७-२-१७) भावे आदिकर्मणि च आदितो निष्ठाया इड् वा स्यात्। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। 'ञि ष्विदा' इति भ्वादिरत्र गृह्यते, ञीद्भिः साहचर्यात्। स्विद्यतेस्तु स्विदित

इत्येव सिद्धे किमर्थमिह क्त्वाग्रहणमित्यत आह क्त्वाग्रहणमुत्तरार्थमिति। तदेवोपपादयति नोपधादित्यत्रेति। तत्र हि क्त्वाप्रत्ययस्यैवानुवृत्तिरिष्टा 'पूङश्च' इत्येवोक्तौ तु 'निष्ठा शीङ्-' इत्यतो निष्ठाग्रहणमेवानुवर्तेतेति भावः। निष्ठा शीङ्। 'न क्त्वा सेट्' इत्यतो न सेडित्यनुवर्तते। 'असंयोगात्-' इत्यतः किदिति च, तदाह एभ्यः सेडिति। शीङिति ङकारस्य फलमाह अनुबन्धेति। यङ्लुकि 'श्तिपा शपा-' इति निषेधार्थ इत्यर्थः। शेश्यितवानिति। अत्र कित्त्वनिषेधाभावात् कित्त्वान्न गुण इति भावः। आदिकर्मणि निष्ठा वक्तव्येति। दीर्घकालव्यासक्तायाः कटाद्युत्पादनक्रियाया आरम्भकालविशिष्टोंश आदिकर्म। तत्र विद्यमानाद्धातोर्निष्ठा वक्तव्येत्यर्थः। तत्र आद्येषु क्रियाक्षणेषु भूतेष्वपि क्रियाया भूतत्वाभावाद् भूते विहिता निष्ठा न प्राप्तेत्यारम्भः। आदिकर्मणि क्तः कर्तरि च। चाद्भावकर्मणोरिति। 'तयोरेव कृत्य-' इत्यतस्तदनुवृत्तेरिति भावः। 'प्रकृतः कटं देवदत्तः,। प्रकृतवान् कटं देवदत्तः' इति भाष्ये उदाहृतम्। आरभ्यमाणकरणक्रियेति बोधः। विभाषा भावादिकर्मणोः। आदितो निष्ठाया इड्वेति। 'आदितश्च-' इत्यत आदित इति 'श्वीदितः-' इत्यत निष्ठाग्रहणं 'नेड्वशि-' इत्यतो नेति चानुवर्तते इति भावः। निषेधस्य वैकल्पिकत्वात्पक्षे इडभ्यनुज्ञायते। प्रस्वेदितश्चैत्र इति। चैत्रकर्तृका आरभ्यमाणप्रस्वेदनक्रियेत्यर्थः। ञीद्भिरिति। ञिः इत् येषां ते ञीतः, तैर्मिदिप्रभृतिभिरिति तदर्थः, स विषयः कित्त्वप्रतिषेधस्येति बोध्यम्। स्विद्यतेस्त्विति।

भावः। शेश्यित इति। 'एरनेकाचः-' इति यण्। आदिकर्मणीति। आद्येषु क्षणेषु भूतेषु सर्वस्याः क्रियाया भूतत्वाभावान्निष्ठा न प्राप्नोतीति वचनम्, आदिकर्मणि क्तस्य कर्तरि विधानार्थं चेत्याहुः। चादिति। अन्यथा तक्रकौण्डिन्यन्यायेन भावकर्मणोर्न स्यादिति भावः। प्रस्वेदित इति। प्रशब्द आदिकर्मद्योतनार्थः, स्वेदितमित्यादि भावे। भ्वादिरत्रेति। 'ञिष्विदा स्नेहनमोचनयोः' इति पठितः। स्विद्यतेस्त्विति। 'ञिष्विदा गात्रप्रक्षरणे' इति दिवादिषु पठितस्य स्विदित इत्येवेति कित्त्व-

इत्येव। 'ञि मिदा' 'ञि ष्विदा' दिवादी भ्वादी च। प्रमेदितः, प्रमेदितवान्। प्रष्वेदितः, प्रष्वेदितवान्। प्रधर्षितः, प्रधर्षितवान्। धर्षितं तेन। सेट् किम्-प्रस्विन्नः। प्रस्विन्नं तेनेत्यादि। ३०५५ **मृषस्तितिक्षायाम्।** (१-२-२०) सेण्निष्ठा किन्न स्यात्। मर्षितः, मर्षितवान्। तितिक्षायां किम्-अपमृषितं वाक्यम्। अविस्पष्टमित्यर्थः। ३०५६ **उदुपधाद्भावादिकर्मणोरन्यतरस्याम्।** (१-२-२१) उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्। द्युतितम्, द्योतितम्। मुदितम्, मोदितं साधुना। प्रद्युतितः, प्रद्योतितः साधुः। प्रमुदितः, प्रमोदितः साधुः। उदुपधात् किम्-विदितम्। भाव-इत्यादि किम्-रुचितं कार्षापणम्। सेट् किम्-कुष्टम्। 'शब्विकरणेभ्य एवेष्यते' (वा ९२१)। नेह-गुध्यतेर्गुधितम्। ३०५७ **निष्ठायां सेटि।** (६-४-५२) णेर्लोपः स्यात्। भावितः, भावितवान्। 'श्वीदितः-' (सू २०३१) इति नेट्। संप्र-

---

'ञि ष्विदा गात्रप्रक्षरणे' इति दैवादिकस्यैव कित्त्वनिषेधविधौ ग्रहणमित्यर्थः। **स्विदित इति।** 'विभाषा भाव-' इति पक्षे इट्। कित्त्वनिषेधविधौ स्विद्यतेर्ग्रहणाभावात् कित्त्वाद्म गुणः। अत्र स्विदादीनाम् 'आदितश्च' इति इट् प्रतिषिध्यते। भावादिकर्मणोस्तु पक्षे इट्। **मृषस्तितिक्षायाम्।** तितिक्षा क्षमा। **सेण्निष्ठा किन्नेति।** शेषपूरणमिदम्। 'निष्ठा शीङ्-' इत्यतो निष्ठेति 'न क्त्वा सेट्' इत्यतः सेणेति 'असंयोगात्-' इत्यतः किदिति चानुवर्तत इति भावः। **उदुपधाद्भावादिकर्मणोः।** भावे उदाहरति **मुदितमित्यादि।** आदिकर्मण्युदाहरति **प्रद्युतितः, प्रद्योतितः साधुरिति।** आदिकर्मणि कर्तरि क्तः। **उदुपधात्किम्-विदितमिति।** 'विद ज्ञाने' इति वेत्ते रूपम्। **गुध्यतेर्गुधितमिति।** 'गुध परिवेष्टने' दिवादिः सेट्कः। **निष्ठायां सेटि। णेर्लोपः स्यादिति।** शेषपूरणमिदम्। 'णेरनिटि' इत्यतो णेरिति 'आतो लोपः-' इत्यस्माल्लोप इति चानुवर्तते इति भावः। अनिटीति निषेधादप्राप्ते आरम्भः। 'टुओ श्वि गतिवृद्ध्योः' अस्मात् क्ते आह **श्वीदित**

निषेधाभावादिति भावः। न च ष्विदेति दैवादिकोऽपि श्वीदिति वाच्यम्, हरदत्तग्रन्थविरोधादिति भावः। अत्र हरदत्तः—ञिष्विदा स्नेहनमोचनयोरिति दिवादिर्गृह्यते, न तु ञिष्विदा अव्यक्ते शब्दे इति भ्वादिरपि, मिदिना साहचर्यादित्याह। तच्चिन्त्यम्। भ्वादिष्वपि मिदेः पठ्यमानत्वात्। तस्मादविशेषादुभयोर्ग्रहणं न्याय्यं तदेतदाह **दिवादी भ्वादी चेति।** स्विदादीनाम् 'आदितश्च' इतीण्निषेधात्सेण्निष्ठा न संभवतीत्यादिकर्मणि निष्ठोदाहृता। **अविस्पष्टमिति।** मृषधातोस्तितिक्षायामेव वृत्तिसत्त्वेऽपि सूत्रस्थतितिक्षाग्रहणमेव ज्ञापयत्यनेकार्था धातव इति। **रुचितमिति।**

सारणम्। शूनः। दीप्तः। गुह्, गूढः। वनु, वतः। तनु, ततः पतेः सनि वेट्कत्वादिडभावे प्राप्ते 'द्वितीया श्रित–' (सू ६८६) इति सूत्रे निपातनादिट्। पतितः। 'सेऽसिचि–' (सू २५०६) इति वेट्कत्वात्सिद्धे कृन्तत्यादीनामीदित्वे-

---

इति नेडिति। संप्रसारणमिति। यजादित्वादिति भावः। संप्रसारणे सति पूर्वरूपे 'हलः' इति दीर्घे 'ओदितश्च' इति निष्ठानत्वे रूपमाह शून इति। यद्यपि मूले 'ओदितश्च' इत्यत्र उच्छून इत्युदाहृतमेव, तथापि विशेषविवक्षया पुनरिहोपन्यासः। अत्र अल्विधित्वेऽपि हल इत्यारम्भसामर्थ्यादेव पूर्वरूपस्य संप्रसारणत्वम्। न च नित्यत्वात्संप्रसारणपूर्वरूपयोः 'श्र्युकः किति' इत्येव निषेधसिद्धेः श्विग्रहणं व्यर्थमिति वाच्यम्, 'श्र्युकः किति' इत्यत्र 'एकाच उपदेशे–' इत्यत उपदेशे इत्युनुवृत्तेः। तथा च उपदेशे उगन्तत्वाभावाद् निषेधाप्राप्तौ श्विग्रहणम्। अत एव स्तीर्त्वेत्यादौ उपदेशे उगन्तत्वमादाय इण्निषेधसिद्धिरित्यलम्। ईदित उदाहरति दीप्त इति। 'दीपी दीप्तौ' दिवादिः। ईदित्वान्नेट्। गूढ इति। ऊदित्वेन वेट्कत्वाद् 'यस्य विभाषा' इति नेट्। ढत्वधत्वष्टुत्वढलोपदीर्घाः। वनु वतः। तनु तत इति। 'उदितो वा' इति क्त्वायां वेट्कत्वाद् 'यस्य विभाषा' इति नेट्। 'अनुदात्तोपदेश–' इति नकारलोपः। पतेः सनीति। 'पत्लृ गतौ' अस्य 'तनिपतिदरिद्राणामुपसंख्यानम्' इति सनि वेट्कत्वाद् 'यस्य विभाषा' इति निष्ठायामिण्निषेधे प्राप्ते इत्यर्थः। पतितशब्दे इटं साधयितुं युक्त्यन्तरमाह सेऽसिचीति। 'कृती छेदने' 'चृती हिंसाश्रन्थनयोः' 'नृती गात्रविक्षेपे' एषामीदित्वं 'श्वीदितः–' इति इण्निषेधार्थमिति वक्तव्यम्। तत्तु न संभवति। एषां 'सेऽसिचि कृतचृतछृदतृदनृतः' इति सकारादौ वेट्कतया 'यस्य विभाषा' इत्येव निष्ठायां नित्यमिण्निषेधसिद्धेः। ततश्च एषामीदित्करणाद् 'यस्य विभाषा' इति इण्निषेधस्य अनित्यत्वं विज्ञायते। एवं च कृतादीनां 'यस्य विभाषा' इति इण्निषेधस्य अभावसंभावनायां 'श्वीदितः–' इति इण्निषेधार्थमीदित्त्वमर्थवत्। तथा च पतितशब्दे 'यस्य विभाषा' इत्यनित्यत्वान्न भवतीत्यर्थः। तेनेति।

रुच दीप्तौ। 'गत्यर्थाकर्मक–' इति कर्तरि क्तः। क्रुष्टमिति। क्रुश आह्वाने रोदने च। व्रश्चादिना षत्वे ष्टुत्वम्। गुधितमिति। गुध परिवेष्टने दिवादिः। संप्रसारणमिति। 'वचिस्वपि–' इत्यनेन। शून इति। टुओश्वि गतिवृद्ध्योः। 'हलः' इति दीर्घः। 'ओदितश्च' इति निष्ठातस्य नः। गूढ इति। 'यस्य विभाषा' इति नेट्, ढत्वधत्वष्टुत्वढलोपदीर्घाः। वतः, तत इति। 'अनुदात्तोपदेश–' इति नलोपः। सनि वेट्कत्वादिति। 'तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः' इति वचनात्। कृन्तत्यादीनामिति। 'श्वीदित–' इति निष्ठायामनिट्कार्यम्, कृती

नानिट्त्वज्ञापनाद्वा। तेन 'धावितमिभराजधिया' इत्यादि | 'यस्य विभाषा' (सू ३०२५) इत्यत्रैकाच इत्येव, दरिद्रितः। ३०५८ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु। (७-२-१८) क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु। द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः, मन्थनदण्डश्च। क्षुब्धो मन्थश्चेत्। स्वान्तं मनः। ध्वान्तं तमः। लग्नं सक्तम्, निष्ठानत्वमपि निपातनात्। म्लिष्टमविस्पष्टम्। विरिब्धः स्वरः। म्लेच्छ, रेभृ अनयोरुपधाया इत्त्व-

---

'यस्य विभाषा' इत्यस्यानित्यत्वज्ञापनेनेत्यर्थः। धावितमिति। 'स्वरतिसूति–' इति धूञो वेट्कत्वेऽपि 'यस्य विभाषा' इति इण्निषेधो नेति भावः। ननु दरिद्राधातोः 'तनिपतिदरिद्राणामुपसंख्यानम्' इति सनि वेट्कत्वाद् 'यस्य विभाषा' इति निष्ठायामिण्निषेधः स्यादित्यत आह यस्य विभाषेत्यत्रेति। क्षुब्धस्वान्त। क्षुब्ध, स्वान्त, ध्वान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ एषामष्टानां द्वन्द्वात्प्रथमाबहुवचनम्। मन्थ, मनः, तमः, सक्त, अविस्पष्ट, स्वर, अनायास, भृश, एषामष्टानां द्वन्द्वात्सप्तमी। यथासंख्यमन्वयः। समुदायेनेति। मन्थादिष्वेते रूढाः। अवयवार्थाभिनिवेशो न कर्तव्य इत्याह द्रवद्रव्येति। अत्र याज्ञिकप्रसिद्धिरेव शरणीकर्तव्या। मन्थनदण्डश्चेति। 'वैशाखमन्थमन्थानमन्थानो मन्थदण्डके' इत्यमरः। क्षुब्ध इति। 'क्षुभ संचलने' अस्मात् क्तः, इडभावो निपात्यते। 'झषस्तथोः–' इति धः, जश्त्वम्। स्वान्तमिति। स्वनधातोः क्तः। 'अनुनासिकस्य क्वि–' इति दीर्घः, निपातनान्नेट्। 'स्वान्तं हृन्मानसं मनः' इत्यमरः। ध्वान्तं तम इति। ध्वनेः क्तः। 'अनुनासिकस्य क्वि–' इति दीर्घः। 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः'। लग्नं सक्तमिति। संबद्धमित्यर्थः। लगेः क्तः, इडभावः। तत्र रदाभ्यां परत्वाभावात् कथं निष्ठानत्वमित्यत आह निष्ठानत्वमपि निपातनादिति। म्लिष्टमविस्पष्टमिति। इडभावे 'व्रश्च–' इति षः। तकारस्य ष्टुत्वेन टः। 'अथ म्लिष्टमविस्पष्टम्' इत्यमरः। विरिब्धः स्वर इति। स्वरविशेष इत्यर्थः। 'रेभृ शब्दे' अस्मात् क्तः, इडभावे 'झषस्तथोर्धः–' इति धः। उभयत्र धातुस्वरूपं प्रदर्शयन्नाह म्लेच्छ रेभृ अनयोरिति। इत्त्वमपीति। इडभावश्चेत्यर्थः।

छेदने, चृती हिंसाग्रन्थनयोः, नृती गात्रविक्षेपे, इत्येतेषामीदित्त्वकरणेन 'यस्य विभाषा' इत्यस्यानित्यत्वज्ञापनाद्वा पतित इति सिद्धमित्यर्थः। क्षुब्ध। क्षुभ संचलने 'झषस्तथोः–' इति धत्वम्। स्वन ध्वन शब्दे। इडभावे 'अनुनासिकस्य क्विझलोः–' इति दीर्घः। लगे सङ्गे, म्लेच्छ अव्यक्ते शब्दे, 'व्रश्च–' इति षत्वे ष्टुत्वम्। रेभृ

मपि निपात्यते।। फाण्टम् अनायाससाध्यः कषायविशेषः। माधवस्तु नवनीत-भावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह। बाढं भृशम्। अन्यत्र तु क्षुभितम्। 'क्षुब्धो राजा' इति त्वागमशास्त्रस्यानित्यत्वात्। स्वनितम्। ध्वनितम्। लगितम्। म्लेच्छितम्। विरेभितम्। फणितम्। बाहितम्। ३०५६ धृषिशसी वैयात्ये। (७-२-१९) एतौ निष्ठायामविनय एवानिटौ स्तः। धृष्टः। विशस्तः। अन्यत्र धर्षितः, विशसितः। भावादिकर्मणोस्तु वैयात्ये धर्षिर्नास्ति। अत एव नियमार्थमिदं सूत्रमिति वृत्तिः। धृषेरादित्वे फलं चिन्त्य-

---

फाण्टमिति। फणेः क्तः, इडभावः, निष्ठातस्य टत्वं च निपात्यते। तस्यासिद्धत्वाद् 'अनुनासिकस्य—' इति दीर्घः। 'अनायासकृतं फाण्टम्' इत्यमरः। वृत्तिक्रमतमाह कषायविशेष इति। 'यदशृतमपिष्टं च कषायमुदकसंसर्गमात्राद्विभक्तरसमीषदुष्णं तत्फाण्टमित्युच्यते' इति वृत्तौ स्थितम्। वेदभाष्ये आहेति। 'तद्वै नवनीतं भवति घृतं वै देवानां फाण्टं मनुष्याणाम्' इति शतपथब्राह्मणव्याख्यावसरे आहेत्यर्थः। बाढं भृशमिति। 'बाहृ प्रयत्ने' अस्मात् क्तः, इडभावः, ढत्वधत्वष्टुत्वढलोपाः। अन्यत्र त्विति। मन्थादेर्वाच्यत्वाभाव इत्यर्थः। धृषिशसी। वियातः अविनीतः, तस्य भावो वैयात्यम्। तत्र 'ञि धृषा प्रागल्भ्ये' इत्यस्य आदित्वादेवेण्निषेधः सिद्धः। 'शसु हिंसायाम्' इत्यस्य तु 'उदितो वा' इति क्त्वायां वेट्कत्वाद् 'यस्य विभाषा' इति इण्निषेधः सिद्धः। अतो नियमार्थमित्याह अविनय एवेति। धृष्टः। विशस्त इति। अविनीत इत्यर्थः। अन्यत्रेति। वैयात्याभावे इत्यर्थः। धर्षित इति। बलात्कृत इत्यर्थः। विशसित इति। हिंसित इत्यर्थः। अत्र वैयात्याभावादिण्निषेधो नेति भावः। ननु धृषेरादित्वाद् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इड्विकल्पे प्राप्ते तदंशे नित्यार्थोऽत्र विधिरस्तु। ततश्च भावादिकर्मभ्यामन्यत्र वैयात्याभावेऽपि 'आदितश्च' इति इण्निषेध एव स्यादित्यत आह भावादिकर्मणोस्त्विति। नास्तीति। अनभिधानादिति भावः। तत्र वृद्धसंमतिमाह अत एवेति। भावकर्मणोर्धृषेरनभिधानादेवेत्यर्थः। अन्यथा धृषेरादित्वाद् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इड्विकल्पे प्राप्ते तदंशे नित्यार्थतया विधानार्थत्वापत्तेरिति भावः। चिन्त्य-

---

शब्दे, फण गतौ। दीर्घः ष्टुत्वम्। बाहृ प्रयत्ने। इडभावे ढत्वधत्वष्टुत्वढलोपाः। अनायासशब्देन तत्साध्यो लक्ष्यत इत्याह अनायाससाध्य इति। क्षुण्णमौषधजातमुष्णोदके प्रक्षिप्य सद्योऽभिषुत्य पूत्वा यत्पीयते तत्फाण्टम्' इत्याहुः। वेदभाष्ये इति। 'तद्वै नवनीतं भवति घृतं देवानां फाण्टं मनुष्याणाम्' इति शतपथ

मिति हरदत्तः । माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह—धृष्टम्, धर्षितम् । प्रधृष्टः, प्रधर्षितः । ३०६० दृढः स्थूलबलयोः । (७-२-२०) स्थूले बलवति च निपात्यते । 'दृह दृहि वृद्धौ', क्तस्येडभावः, तस्य ढत्वम्, हस्य लोपः, इदितो नलोपश्च । दृहितो दृंहितोऽन्यः । ३०६१ प्रभौ परिवृढः ।

मिति । धृषेरादित्वं हि न वैयात्ये आदित्वलक्षणेणिनषेधार्थम् 'धृषिशसी वैयात्ये' इत्येव सिद्धेः । नापि वैयात्यादन्यत्र आदित्वलक्षणेणिनषेधार्थम्, धृषेर्वैयात्य एव इण्निषेधनियमेन ततोऽन्यत्र आदित्वलक्षणनिषेधाभावात् । नापि धृषेर्वैयात्ये भावादिकर्मणोर्विषये 'विभाषा भावादिकर्मणोः' इति इड्विकल्पार्थम्, भावादिकर्मणोर्वैयात्ये धृषेरनभिधानात् । तस्माद् धृषेरादित्वं व्यर्थमिति हरदत्त आहेत्यर्थः । **माधवस्त्विति** । अवैयात्ये भावादिकर्मणोरनभिधाने प्रमाणाभावादिति भावः । तत्र अवैयात्ये भावे उदाहरति **धृष्टम्, धर्षितमिति** । आदिकर्मण्युदाहरति **प्रधृष्टः, प्रधर्षित इति** । **दृढः स्थूलबलयोः** । बलशब्दः अर्शआद्यजन्तो बलवत्परः, तदाह **बलवति चेति** । **तस्येति** । निष्ठातकारस्य ढत्वं निपात्यते इत्यर्थः । **हस्य लोप इति** । निपात्यते इति शेषः । **इदित इति** । अनिदितस्तु नलोपः सिद्ध एवेति भावः । ननु हस्य ढत्वे कृते 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे तस्य ष्टुत्वेन ढत्वे 'ढो ढे—' इति ढलोपे दृढ इति सिद्धम् । ततश्च इडभाव एव निपात्यताम्, न तु हकारलोपो ढत्वं चेति चेत् । मैवम् । तथा हि सति द्रढीयानित्यादौ ढलोपस्यासिद्धत्वेन ऋकारस्य संयोगपरतया लघुत्वाभावाद् 'र ऋतो हलादेर्लघोः' इति रभावो न स्यात् । अत्र हकारलोपस्य ढत्वस्य च निपातने तु ऋकारस्य न संयोगपरकत्वम् । अस्य हलोपस्य साप्तमिकत्वेन असिद्धत्वाभावादिति भाष्ये स्पष्टम् । **प्रभौ**

श्रुतेर्व्याख्यायामित्यर्थः । **अन्यत्र त्विति** । मन्थादेरवाच्यत्वे त्वित्यर्थः । **धृषिशसी** । ञिधृषा प्रागल्भ्ये । शसु हिंसायाम् । अनयोः 'आदितश्च' 'यस्य विभाषा' इति सूत्राभ्यामिट्प्रतिषेधे सिद्धेऽप्यनयोर्वैयात्य एवानिट्त्वं नान्यत्रेति नियमार्थमित्याह **अविनये एवेति** । विरुद्धं यातो वियातः अविनीतस्तस्य भावो वैयात्यम् । ननु धृषेः 'विभाषा भावादिकर्मणोः' इति विकल्पे प्राप्ते नित्यार्थं कस्मान्न भवतीत्याशङ्कायामाह **नास्तीति** । अनभिधानादिति भावः । अत्र प्रमाणमाह **अतएवेति** । **माधवस्त्विति** । एवं च आदित्वस्य फलवत्वाद् हरदत्तोक्तं यच्चिन्त्यं तदेव चिन्त्यमिति भावः । **दृढः स्थूल** । बलमस्यास्तीति बलः, 'अर्श आदिभ्योऽच्' । तदाह **बलवतीति** । स्थूलो मांसलः स च निर्बलोऽपि, बलवांस्तु कृशोऽपि दृढ इति फलितोऽर्थः । **तस्येति** । तकारस्येत्यर्थः । **हस्येति** । ननु 'हो ढः' इति ढत्वे ढोढे

(७-२-२१) 'दृह दृहि वृद्धौ'। निपातनं प्राग्वत्। परिवृहितः परिबृंहितोऽन्यः। ३०६२ कृच्छ्रगहनयोः कषः। (७-२-२२) कषो निष्ठाया इण्न स्यादेतयोरर्थयोः। कष्टं दुःखं तत्कारणं च। 'स्यात्कष्टं कृच्छ्रमाभीलम्'। कष्टो मोहः। कष्टं शास्त्रम्। दुरवगाहमित्यर्थः। कषितमन्यत्। ३०६३ घुषिरविशब्दने। (७-२-२३) घुषिर्निष्ठायामनिट् स्यात्। घुष्टा रज्जुः। अविशब्दने किम्-घुषितं वाक्यम्। शब्देन प्रकटीकृताभिप्रायमित्यर्थः। ३०६४ अर्देः संनिविभ्यः। (७-२-२४) एतत्पूर्वादर्देर्निष्ठाया इण्न स्यात्। समर्णः। न्यर्णः। व्यर्णः।

परिवृढः। प्राग्वदिति। तकारढत्वस्य हलोपस्य चेत्यर्थः। कृच्छ्रगहनयोः। कृच्छ्रशब्दो दुःखे तत्कारणे च वर्तते। कष्टं दुःखं तत्कारणं चेति। 'स्यात् कष्टं कृच्छ्रमाभीलम्' इत्यमरकोशवाक्यम्। दुःखकारणे उदाहरति कष्टो मोह इति। गहने उदाहरति कष्टं शास्त्रमिति। गहनशब्दं विवृणोति दुरवगाहमिति। घुषिरविशब्दने। घुष्टा रज्जुरिति। उत्पादितेत्यर्थः। आयामितेति वा। शब्देन अभिप्रायप्रकाशनं विशब्दनम्, तदाह शब्देनेति। अर्देः संनिविभ्यः। समर्ण इति। सम् अर्द् त इति स्थिते 'रदाभ्याम्—' इति निष्ठातस्य पूर्वदकारस्य

लोपेनैव सिद्धमिति तस्य ढत्वं हस्य लोपश्च न निपात्यतामिति चेन्मैवम्। तथाहि सति ढलोपस्यासिद्धत्वेन द्रढिमेत्यत्र 'र ऋतो हलादेर्लघोः' इति रभावो न स्यात्, परिद्रढय्य गत इत्यत्र 'ल्यपि लघुपूर्वात्' इत्ययादेशो न स्यात्, परिदृढस्यापत्यं पारिदृढी कन्येत्यत्र गुरूपोत्तमलक्षणः ष्यङ् स्यात्। अतोऽसिद्धत्वनिवृत्तये हलोपो निपात्यत इति भाष्यादौ स्थितम्। अतएव 'ढ्रलोपे—' इति सूत्रे अणः किं दृढ इति प्राचो ग्रन्थस्य प्रामादिकतामभिप्रेत्य तृढो वृढ इति प्रत्युदाहृतम्। प्रभौ। निपातनमिति। हलोपे प्रयोजनमपि व्रढिमा परिव्रढय्येत्यादिसिद्धिरिति प्राग्वदेव बोध्यम्। कृच्छ्रगहनयोः। कृच्छ्रं दुःखं तत्कारणं च लक्षणया गृह्यते, कषतिर्हिंसार्थः। कष्टो मोह इति। दुःखहेतुरित्यर्थः। घुषिरवि। घुषिरविशब्दार्थे इति भ्वादिः, घुषिरविशब्दन इति चुरादिः, द्वयोरपि सामान्येन ग्रहणम्। ननु विशब्दनार्थाद्घुषेश्चुरादिणिचा भाव्यं ततश्च णिचो व्यवधानाद् घुषेः परा निष्ठा नास्तीति कथमिण्निषेधप्रसङ्गः, किं च विशब्दने त्विण्निषेधाभावाण्णिच्युपधागुणे 'निष्ठायां सेटि' इति णिलोपे च घोषितं वाक्यमित्यपि स्यादिति चेत्। अत्राहुः—एवं तर्हि विशब्दनप्रतिषेध एव ज्ञापकः विशब्दनार्थस्य चुरादिणिजनित्य इति नास्त्युक्तदोष इति दिक्। अभेः। विशेषेण दूरं विदूरं ततोऽन्यदविदूरं तस्य भाव आविदूर्यम्। ब्राह्मणादित्वात्ष्यञ्। अस्मादेव निर्देशाद् 'न नञ्पूर्वात्तत्पुरुषात्—'

र्दितोऽन्यः। ३०६५ अभेश्चाविदूर्ये। (७-२-२५) अभ्यर्णम्। नातिदूरमासन्नं वा। अभ्यर्दितमन्यत्। ३०६६ णेरध्ययने वृत्तम्। (७-२-२६) णयन्ताद् वृतेः क्तस्येडभावो णिलुक्चाधीयमानेऽर्थे वृत्तं छन्दः, छात्रेण संपादितम्, अधीतमिति यावत्। अन्यत्र तु वर्तिता रज्जुः। ३०६७ श्रुतं पाके। (६-१-२७) श्रातिश्रपयत्योः क्ते शृभावो निपात्यते क्षीरहविषोः पाके। शृतं क्षीरम्, स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः। क्षीरहविर्भ्यामन्यत्तु श्राणं श्रपितं वा।

च नत्वम्, णत्वम्। **अभेश्चाविदूर्ये**। अविदूरस्य भाव आविदूर्यम्। तस्मिन् गम्ये अभेः परः अर्देरनिट्क इत्यर्थः। सामीप्य इत्येव तु नोक्तम्, अनतिदूरस्य असंग्रहापत्तेः। तत्सूचयन्नाह **नातिदूरमिति**। **णेरध्ययने**। **णिलुक् चेति**। णिलोपे तु लघूपधगुणः स्यादिति भावः। **अधीयमान इति**। सूत्रे अध्ययनशब्दः कर्मणि ल्युडन्त इति भावः। **श्रुतं पाके**। 'श्रा पाके' घटादिः। तस्माद्धेतुमण्णिचि पुकि मित्त्वाद्ध्रस्वे श्रपि इति भवतीति स्थितिः। **श्रातिश्रपयत्योरिति**। अणयन्तस्य णयन्तस्य च श्राधातोरित्यर्थः। **क्षीरहविषोरिति**। एतच्च वार्तिकाल्लभ्यते। अणयन्तं व्याचष्टे **स्वयमेव विक्लिन्नमिति**। श्राधातुरणयन्तः पाके वर्तते। पाकश्चात्र विक्लित्तिरेव विवक्षिता। न तु तदनुकूलव्यापारोऽपि। तथा च श्राधातोर्विक्लित्तावकर्मकत्वाद् 'गत्यर्थाकर्मक–' इति कर्तरि क्तः। तथा च क्षीरं विक्लित्त्याश्रय इति फलितम्। ततो णिचि विक्लित्त्यनुकूलव्यापारार्थकपचिना समानार्थकात् श्रपि इत्यस्मात् कर्मणि क्तप्रत्यये फलितमाह **पक्वमिति**। एतच्च भाष्यकैयटयोः स्पष्टम्। 'क्षीराज्यहविषां शृतम्' इत्यमरस्य तु प्रमाद एव, 'क्षीरहविषोः–' इति वार्तिकविरोधात्।

इति निषेधो न भवति। सामीप्य इत्येव तु नोक्तं नातिदूरस्यासंग्रहापत्तेः, तदेतद्ध्वनयन्व्याचष्टे **नातिदूरं मासन्नं वेति**। एवं च सामीप्य इति प्राचो व्याख्यानमुपलक्षणतया नेयमित्याहुः। **णेः**। अधीयत इति अध्ययनम्। 'कृत्यल्युटः' इति बहुलवचनात्कर्मणि ल्युट्। **णिलुक् चेति**। निपात्यत इति शेषः। लोपे हि प्रत्ययलक्षणेन गुणः स्यादिति भावः। **शृतम्**। **श्रातिश्रपयत्योरिति**। श्रा पाके इत्यदादौ पठ्यते चुरादावपि घटादिष्वपि पठ्यते मित्त्वार्थम्। श्रै पाक इति च भ्वादौ तस्यापि कृतात्वस्येह ग्रहणम्। निपातनसामर्थ्याल्लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयत इत्याहुः। **शृभावो निपात्यत इति**। 'ष्यङः संप्रसारणम्–' इति प्रकृतमेव संप्रसारणं न विहितम्। श्रयतेरपि श्रितमेव यथा स्यादिति। अत्र 'विभाषाभ्यवपूर्वस्य' इति विभाषानुवर्तते सा च व्यवस्थिता तेन क्षीरहविषोरेव शृभावो नित्यश्च, अन्यत्र तु नैव भवतीत्याशयेनाह **क्षीरहविषोः पाक इति**।

३०६८ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः । (७-२-२७) एते णिचि निष्ठान्ता वा निपात्यन्ते । पक्षे, दमितः । शमितः । पूरितः । दासितः । स्पाशितः । छादितः । ज्ञापितः । ३०६९ रुष्यमत्वरसंघुषास्वनाम् । (७-२-२८) एभ्यो निष्ठाया इड् वा स्यात् । रुष्टः, रुषितः । आन्तः, अमितः । तूर्णः,

---

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः । 'णेरध्ययने वृत्तम्' इत्यतो णेरित्यनुवर्तते । 'दमु शमु उपशमे' ण्यन्ताभ्यामिडभावो निपात्यते । 'अनुनासिकस्य–' इति दीर्घः । णिलोपस्तु न स्थानिवत्, निपातनाद्दीर्घविधौ तन्निषेधाच्च । दान्तः । शान्तः । 'पूरी आप्यायने' ण्यन्तात् क्तः, इडभावो निपात्यते, णिलोपः, रपरत्वात्त्वम्, णत्वम्, पूर्णः । एतेन 'न ध्याख्यापॄमूर्च्छि–' इत्येव सिद्धे पूर्णग्रहणं व्यर्थमित्यपास्तम्, पूरीधातोर्ण्यन्तात् पूर्णरूपार्थत्वात् । 'दसु उपक्षये' ण्यन्ताद् इडभावो निपात्यते, उपधावृद्ध्यभावश्च, णिलोपः । 'स्पश बाधने' ण्यन्तात् क्त इडभावो निपात्यते उपधावृद्ध्यभावश्च, णिलोपः, स्पष्टम् । 'छद अपवारणे' ण्यन्तात् क्तः । इडभावो वृद्ध्यभावश्च निपात्यते । णिलोपः, 'रदाभ्याम्–' इति नत्वम्, छन्नः । 'ज्ञप मिच्च' इति चुरादिण्यन्तात् क्तः । इडभावो णिलोप इति कैयटः । ज्ञप्तः । **पक्ष इति** निपातनाभावपक्ष इत्यर्थः । **दमितः शमित इति** । अमन्तत्वेन मित्त्वाद्ध्रस्वः । **ज्ञपित इति** । अचौरादिकस्य रूपम् । चौरादिकस्य तु ज्ञपित इत्येव । रुष्यमत्वर । रुषि, अम, त्वर, संघुष्, आस्वन् एषां द्वन्द्वः । णेरिति निवृत्तम् । पञ्चम्यर्थे षष्ठी, तदाह **एभ्य इति** । **वा स्यादिति** । 'वा दान्त–' इत्यतस्तदनुवृत्तेरिति भावः । **रुष्टः, रुषित इति** । 'तीषसह–' इति रुषो वेट्कत्वाद् 'यस्य विभाषा' इति निषेधे प्राप्ते विकल्पोऽयम् । **आन्तः, अमित इति** । 'अम गत्यादिषु' क्तः । इडभावपक्षे 'अनुनासिकस्य–' इति दीर्घः । **तूर्णः, त्वरित इति** । 'ञि त्वरा संभ्रमे' क्तः, इडभावपक्षे 'ज्वरत्वर' इत्यूठ् । 'रदाभ्याम्–' इति नत्वम्, णत्वम् । 'आदितश्च'

अन्यत्रेवाति । शाकादि ज्ञपितमिति णौ मितां ह्रस्वः । **वा दान्त** । शमु दमु उपशमे, पूरी आप्यायने, दिवादिश्चुरादिश्च । दसु उपक्षये, स्पश बाधने, छद अपवारणे । ज्ञपिर्मित्, मित्संज्ञायां मारणतोषणनिशामनेष्वित्युक्तेः । **रुष्य** । रुष रोषे 'तीषसह–' इति विकल्पितेट्कत्वाद् 'यस्य विभाषा' इति नित्ये निषेधे प्राप्ते विकल्पो विधीयते । अम गत्यादिषु । अम रोगे इति चौरादिकस्तु न गृह्यते 'एकाचः–' इत्यधिकारादित्याहुः । **आन्त इति** । 'अनुनासिकस्य–' इति दीर्घः । **तूर्ण इति** । ञित्वरा संभ्रमे, 'ज्वरत्वर–' इत्यूठ् निष्ठानत्वम् । 'आदितश्च' इति निषेधे प्राप्ते विकल्पः । एवं च आदित्त्वस्य फलमात्मनेपदमात्रं तच्च एधत्यादिवद्ध्रस्वानुबन्धत्वेऽपि

त्वनितः । अस्यादित्वे फलं मन्दम् । संघुष्टः, संघुषितः । आस्वान्तः, आस्वनितः ।
३०७० हृषेर्लोमसु । (७-२-२९) हृषेर्निष्ठाया इड् वा स्यात् लोमसु विषये ।
हृष्टं हृषितं लोम । 'विस्मितप्रतिघातयोश्च' (वा ४४१७)। हृष्टो हृषितो मैत्रः ।
विस्मितः प्रतिहतो वेत्यर्थः । अन्यत्र तु 'हृषु अलीके' उदित्वान्निष्ठायां नेट् ।
'हृष तुष्टौ' इट् । ३०७१ अपचितश्च । (७-२-३०) चायेर्निपातोऽयं वा ।
अपचितः, अपचायितः । ३०७२ प्यायः पी । (६-१-२८) पी वा स्यान्निष्ठा-

---

इति नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम् । आदित्त्वस्य तु फलमात्मनेपदमात्रम्, तदाह **अस्य आदित्वे फलं मन्दमिति** । तथा च 'एध वृद्धौ' इत्यादिवद् ह्रस्वानुबन्धत्वमेव न्याय्यमिति भावः । **संघुष्टः, संघुषित इति** । 'घुषिरविशब्दने' इति घुषेः संपूर्वस्य नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम् । **आस्वान्तः, आस्वनित इति** । आङ्पूर्वस्वनेः क्तः । इडभावपक्षे 'अनुनासिकस्य-' इति दीर्घः । 'क्षुब्धस्वान्त-' इति निपातनं तु आङ्पूर्वस्य स्वनेर्न भवति, परत्वादस्यैव विकल्पस्य प्राप्तेरित्याहुः । 'न वा-' इति सूत्रभाष्ये तु संघुषास्वनोर्विषये उभयत्र विभाषेत्युक्तम् । **हृषेर्लोमसु** । लोमसु कर्तृष्विति बोध्यम् । इदं च 'अजर्यम्' इति सूत्रे भाष्ये स्पष्टम् । **हृष्टम्, हृषितं लोमेति** । 'गत्यर्थाकर्मक-' इति कर्तरि क्तः । रोमाञ्चितभूतमित्यर्थः । **विस्मितप्रतिघातयोश्चेति** । वार्तिकमिदम् । 'हृषेर्निष्ठाया इड् वा' इति शेषः । **उदित्वादिति** । 'उदितो वा' इति क्त्वायां वेट्कत्वाद् 'यस्य विभाषा' इति निष्ठायां नेडित्यर्थः । तथा अलीकेऽर्थे हृष्ट इत्येव । मृषोक्तवानित्यर्थः । **इडिति** । 'हृष तुष्टौ' इति धातोः क्ते इडेव भवतीत्यर्थः । हृषितः तुष्ट इत्यर्थः । विस्मितप्रतिघातयोस्तु धातूनामनेकार्थत्वाद् वृत्तिः । तत्र लोमसु विस्मितप्रतिघातयोश्च 'हृषु अलीके' इत्यस्माद् 'यस्य विभाषा' इति नित्यमिण्निषेधे प्राप्ते विभाषेयम्, 'हृष तुष्टौ' इत्यस्मात्तु नित्यमिट्प्राप्तौ विभाषा इति विवेकः । **अपचितश्च** । 'अपपूर्वस्य चिञो ण्यन्तस्य निष्ठायां चिभावो निपात्यते' इति भाष्यम् । तदाह—**चायेर्निपातोऽयमिति** । **प्यायः पी । वा स्यान्निष्ठायामिति** । शेषपूरणमिदम् । 'विभाषाभ्यवपूर्वस्य'

सिध्यत्येवेत्याशयेनाह । **फलं मन्दमिति । संघुष्ट इति** । संपूर्वाद् घुषेर्विशब्दने इटि प्राप्ते विकल्पोऽयम् । अविशब्दनेऽपि संपूर्वस्य परत्वादयं विकल्प एव । **आस्वान्त इति** । आङ्पूर्वस्य स्वनेर्मनोभिधानेऽप्ययमेव विकल्पः स्यात् । आस्वान्तं मनः । आस्वनितं मन इति । **हृषेः** । हृषु अलीके । उदित्वान्निष्ठायामनिट्, हृष तुष्टौ सेट् । उभयोरपि ग्रहणमित्युभयत्र विभाषेयम् । **पीनमिति** । ओदित्वान्निष्ठानत्वम् । **प्यान इति** । 'श्वीदितो निष्ठायाम्' इतीडभावे यलोपः । नन्वे व्यवस्थान्तरमाह

याम्। व्यवस्थितविभाषेयम् । तेन स्वाङ्गे नित्यम्। पीनं मुखम्। अन्यत्र प्यानः, पीनः स्वेदः । 'सोपसर्गस्य न' (वा ४०६२) प्रप्यानः । 'आङ्पूर्वस्यान्धूधसोः स्यादेव' (वा ३४६१) आपीनोऽन्धुः । आपीनमूधः । ३०७३ ह्लादो निष्ठायाम् । (६-४-९५) ह्रस्वः स्यात् । प्रह्लन्नः । ३०७४ द्यतिस्यतिमास्थामित्ति किति । (७-४-४०) एषामिकारोऽन्तादेशः स्यात्तादौ किति । ईत्वदद्भावयोरपवादः । दितः । सितः । मा, माङ्, मेङ्, मितः । स्थितः । ३०७५ शाच्छोरन्यतरस्याम् । (७-४-४१) शितः, शातः । छितः, छातः । व्यवस्थितविभाषात्वाद् व्रतविषये श्यतेर्नित्यम् । संशितं व्रतम् । सम्यक्संपादितमित्यर्थः । संशितो ब्राह्मणः । व्रतविषयकयत्नवानित्यर्थः । ३०७६ दधातेर्हिः । (७-४-

---

इत्यतो विभाषेति 'स्फायः स्फी-' इत्यतो निष्ठायामिति चानुवर्तते इति भावः । **व्यवस्थितविभाषेति** । अत्र व्याख्यानमेव शरणम् । 'सोपसर्गस्य न' इत्यादि भाष्ये स्पष्टम् । **ह्लादो निष्ठायाम् । ह्रस्वः स्यादिति** । शेषपूरणमिदम् । 'खचि ह्रस्वः' इत्यतस्तदनुवृत्तेरिति भावः । **प्रह्लन्न इति** । 'ह्लादी सुखे' क्तः । 'श्वीदितः—' इति नेट् । 'रदाभ्याम्–' इति नत्वम् । **द्यतिस्यति** । एषां चतुर्णां द्वन्द्वात् षष्ठी । 'दो अवखण्डने' इत्यस्य द्यतीति निर्देशः । 'षो अन्तकर्मणि' इत्यस्य तु स्यतीति निर्देशः । इत् ति कितीति च्छेदः । **ईत्वेति** । 'घुमास्था–' इति ईत्वस्य 'दो दद्घोः' इति दद्भावस्य च यथासंभवमपवाद इत्यर्थः । दो धातोरुदाहरति **दित इति । मा माङ् मेङिति** । 'गामादाग्रहणेष्वविशेषः' इति वचनादिति भावः । **शाच्छोः** । 'शो तनूकरणे' 'छो छेदने' अनयोः कृतात्वयोर्निर्देशः । अनयोरिकारोऽन्तादेशो वा स्यात् तादौ कितीत्यर्थः । **व्यवस्थितेति** । एतच्च भाष्ये स्पष्टम् । **दधातेर्हिः । तादौ कितीति** । शेषपूरणमिदम् । 'द्यतिस्यति–' इत्यतस्तदनुवृत्ते-

---

सोपसर्गस्य नेत्यादि । अन्धुः कूपः । **प्रह्लन्न इति** । ह्लादी सुखे, ईदित्वादिड्भावे 'रदाभ्याम्–' इति नत्वम् । **द्यतिस्यति** । दोऽवखण्डने, षोऽन्तकर्मणि, मा माङ् माने, मेङ् प्रणिदाने, ष्ठा गतिनिवृत्तौ । श्तिपा निर्देशो धातुविशेषणार्थः । न हि श्तिपं विना श्यन् सुलभः । यत्तु प्रसादकृतोक्तम् 'श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः' 'दादत्तः सासातः' इति । तन्न । यङ्लुकि हि इष्टा भाव्यं दादितः सासित इति । तत्र ति कितीति वचनान्नास्ति प्रसङ्गः । किं च 'दो दद्घोः' इति विधीयमान आदेशः अनेकाल्त्वात्सर्वस्येति निर्विवादम् । तथा च हन्तेर्यङ्लुगन्तस्य वधादेशवत्साभ्यासस्य प्रवर्तेतेति दादत्त इति त्वदुदाहृतरूपं कथमुक्तिसंभवं लभेतेत्याहुः । **शाच्छो** । शो तनूकरणे । छो छेदने । **दधातेर्हिः** । श्तिपा निर्देशो धेटो निवृत्त्यर्थः । तीत्यनु-

४२) तादौ किति। अभिहितम्। निहितम्। **३०७७ दो दद्घोः।** (७-४-४६) घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति। चर्त्वम्। दत्तः। घोः किम्-दातः। तान्तो वायमादेशः। न चैवं विदत्तमित्यादावुपसर्गस्य 'दस्ति' (सू१०७१) इति दीर्घापत्तिः, तकारादौ तद्विधानात्। दान्तो वा। धान्तो वा। न च दान्तत्वे निष्ठानत्वम्, धान्तत्वे 'झषस्तथोः–' (सू २२८०) इति धत्वं शङ्क्यम्, संनिपातपरिभाषाविरोधात्। **३०७८ अच उपसर्गात्तः।** (७-४-४७)

रिति भावः। **दो दद्घोः।** द इति षष्ठ्यन्तम्, तदाह **दा इत्यस्येति।** दथ् इति च्छेदः, तदाह **दथ् स्यादिति।** तवर्गद्वितीयान्तोऽयमादेशः। **तादौ कितीति।** ति कितीत्यनुवृत्तेरिति भावः। **चर्त्वमिति।** 'खरि च' इति थकारस्य तकार इत्यर्थः। **दात इति।** दाप्दैपो रूपम्। अदाप् इत्युक्तेः घुत्वाभावान्न दद्भावः। **तान्तो वेति।** तवर्गप्रथमान्त इत्यर्थः। नन्वेवं सति विदत्तमित्यादौ दस्तीत्युपसर्गस्य दीर्घत्वापत्तिः, तत्र हि द इति षष्ठी सप्तम्यर्थे। इगन्तोपसर्गस्य दीर्घः स्यात् तकारान्ते ददातौ परत इत्यर्थ इत्याशङ्क्य निराकरोति **न चैवमिति।** आदेशस्य तवर्गप्रथमान्तत्वे सतीत्यर्थः। **तकारादाविति।** 'दस्ति' इत्यत्र द इति षष्ठीतीत्यत्रान्वेति। तथा च इगन्तोपसर्गस्य दीर्घः स्याद् दादेशतकारादावुत्तरपदे इत्यर्थः, उत्तरपदाधिकारात्। ततश्च उत्तरपदस्यात्र तकारादित्वाभावाद् न दीर्घ इति भावः। **दान्तो वा धान्तो वेति।** तवर्गतृतीयान्तो वा चतुर्थान्तो वा अयमादेश इत्यर्थः। **न चेति।** दान्तत्वे निष्ठानत्वम्, धान्तत्वे 'झषस्तथोः–' इति धत्वं च न शङ्क्यमित्यन्वयः। **संनिपातेति।** दान्तादेशस्य धान्तादेशस्य च तकारादिप्रत्ययोपजीव्यतया तद्विघातकनत्वधत्वे प्रति निमित्तत्वासंभवादिति भावः। **अच उपसर्गात्तः।**

वृत्तेर्यङ्लुकि न। दाधितः। अत्रापि प्रसादकृता श्तिपा निर्देशस्य यङ्लुङ्निवृत्त्यर्थत्वाद्दाधीत इति 'घुमास्था–' इतीत्वमुदाहृतम्, तत्पूर्ववदेव हेयम्। **दो दद्घोः।** इहादेशः थान्त एव न तु तदधान्तः, जश्त्वे कृते संहितायास्तुल्यत्वेऽपि प्रक्रियायां दोषादिति प्राञ्चः। तथा चाहुः—'तान्ते दीर्घत्वाख्यो दोषो दान्ते दोषो निष्ठानत्वम्। धान्ते दोषो धत्वाख्यः स्यान्निर्दोषत्वात् थान्तो प्राश्यः' इति तदनुसारेणाह। **दथ् स्यादिति।** **दात इति।** दाप् लवने। अदाबिति निषेधान्न घुत्वम्। इह सर्वे पक्षाः सापवादा इत्याह **तान्तो वेत्यादिना।** **दीर्घापत्तिरिति।** विदत्तमित्यादावुपसर्गस्येत्यर्थः। दस्तीत्यत्र द्वौ पक्षौ दा इत्यस्य य आदेशः स तकारान्तस्तकारादिर्वेति, तत्राद्ये पक्षेऽयं दोषो नान्त्ये इत्याशयेनोक्तदोषं परिहरति। **तकारादाविति।** **निष्ठानत्वमिति।** 'रदाभ्याम्–'इत्यनेन। **सन्निपातेति।** तादिं निमित्तीकृत्य

अजन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति। चर्त्वम्। प्रत्तः। अवत्तः।

'अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते॥'

चशब्दाद्यथाप्राप्तम्। ३०७६ दस्ति। (६-३-१२४) इगन्तोपसर्गस्य

त इत्यत्राकार उच्चारणार्थः। अच इत्यावर्तते, एकमुपसर्गविशेषणम्। द्वितीयं तु स्थानिसमर्पकम्, तदाह **अजन्तादिति**। **घोरिति**। घोरवयवस्येत्यर्थः। **तः स्यादिति**। तकारः स्यादित्यर्थः। ददादेशापवादः। **चर्त्वमिति**। प्र दा त इति स्थिते दकारादाकारस्य तकारादेशे दकारस्य चर्त्वेन तकार इत्यर्थः।

अवदत्तं विदत्तं चेति। भाष्यस्थश्लोकोऽयम्। अत्र आदिकर्मणीत्येतत् प्रदत्तमित्यत्रैव संबध्यते। नायम् 'अच उपसर्गात्तः' इत्यस्य अपवाद इति भ्रमितव्यमित्याह **चशब्दाद्यथाप्राप्तमिति**। तथा चावदत्तादिशब्देषु ददादेशोऽपि कदाचिल्लभ्यते इत्यर्थः। अत एव प्रकृतसूत्रभाष्ये 'अच उपसर्गात्तः' इत्यस्यावकाशः प्रत्तमवत्तम् इति संगच्छते इति भावः। **दस्ति**। 'इकः काशे' इत्यत इक इति 'उपसर्गस्य घञ्यमनुष्ये—' इत्यत उपसर्गस्येति 'ढ्रलोपे—' इत्यतो दीर्घ इति चानुवर्तते।

विहितो यो दान्ताद्यादेशः स तकारविधातकत्वादिविधेर्निमित्तं न भवतीति भावः। **अच उपसर्गात्तः**। तकारादकार उच्चारणार्थः। अच इत्यावर्तते तत्रैकं पञ्चम्यन्तमुपसर्गं विशिनष्टि। अपरं षष्ठ्यन्तं स्थानलाभायेति व्याचष्टे, **अजन्तादित्यादिना**। यद्वा अच इत्यनावृत्तं पञ्चम्यन्तमेवास्तु किं तु द्वितकारकोऽयमादेशस्तेनानेकाल्त्वात्सर्वस्य घोर्भविष्यति, एकतकारो हि 'अलोऽन्त्यस्य' इति बाधित्वा 'आदेः परस्य' इत्यादेरेव स्यादच इति पञ्चमीनिर्देशात्। यद्येवम् 'अपो भि' इत्युत्तरसूत्रेऽपि द्वितकार एवेति सर्वादेशः स्यादिति चेत्। अत्राहुः—पञ्चम्यन्तस्याच इत्यनुवृत्तेरचः परस्य पकारस्यैव भविष्यति तत्रान्त्यस्य संयोगान्तलोपे पूर्वस्य जश्त्वेन सिद्धमिष्टमिति। **अवदत्तमित्यादि**। आदिकर्मणीत्येतत्प्रदत्तमित्यस्यैव विशेषणं नेतरेषामसंभवात्। दातुं प्रक्रान्तमारब्धमिति प्रदत्तमित्यस्यैवार्थः। **इष्यते इति**। तादेशबाधनार्थं निपातनमिष्यत इत्यर्थः। अन्ये तु अवादीनामुपसर्गप्रतिरूपकत्वाश्रयणे ह्यवदत्तं विदत्तमित्यादि सिध्यति, उपसर्गत्वाश्रयणे तु पूर्वोक्तमवत्तमित्यादीति नापूर्वमिदं वचनमित्याहुः। **दस्ति**। 'इकः काशे' इत्यत इक इति 'उपसर्गस्य घञि—' इत्यत उपसर्गस्येति 'ढ्रलोपे पूर्वस्य—' इत्यतो दीर्घ इति चानुवर्तते 'अलुगुत्तरपदे' इत्यतोऽनुवृत्तस्योत्तरपदे इत्यस्य तीति विशेषणं 'यस्मिन्विधिः—' इति तदादिविधिस्तदेतत्सकलम-

दीर्घः स्याद्‌देशो यस्तकारस्तदादावुत्तरपदे । 'खरि च' (सू १२१) इति चर्त्व-माश्रयात्सिद्धम् । नीत्तम् । सूत्तम् । 'घुमास्था–' (सू २४६२) इतीत्वम् । धेट् , धीतम् । गीतम् । पीतम् । 'जनसन–' (सू २५०४) इत्यात्वम् । जातम् । सातम् । खातम् । ३६८० **अदो जग्धिर्ल्यप्ति किति । (२-४-३६)** ल्यपि तादौ किति च । इकार उच्चारणार्थः । घत्वम् । 'झरो झरि–' (सू ७१) । जग्धः 'आदिकर्मणि क्तः कर्तरि च' (सू ३०२३) । प्रकृतः कटं सः । प्रकृतः कटस्तेन । 'निष्ठायामण्यदर्थे' (सू

उत्तरपदे इत्यधिकृतं तीत्यनेन विशेष्यते, तदादिविधिः । द इति षष्ठीति इत्यत्रान्वेति । तथा च दाधातोरादेशोः यस्तकारः तदादौ उत्तरपदे इति लभ्यते, तदाह **इगन्तेत्यादि** । ननु नि दा त इति स्थिते 'अच उपसर्गात्तः' इति दकारादाकारस्य तकारे दकारस्य 'खरि च' इति चर्त्वे प्रकृतसूत्रेण उपसर्गस्य दीर्घे नीत्तमिति रूपं वक्ष्यति । तदयुक्तम् । दीर्घे कर्तव्ये चर्त्वस्यासिद्धत्वे दादेशे तकारादुत्तरपदत्वाभावादित्यत आह **खरि चेति चर्त्वमाश्रयात् सिद्धमिति** । दादेशतकारमाश्रित्य विधीयमाने दीर्घे चर्त्वे नासिद्धम् , चर्त्वसिद्धं तकारमाश्रित्य विधिबलादित्यर्थः । सूत्तमिति तु चिन्त्यम् , 'गतिश्च' इति सूत्रभाष्यवार्तिकयोः सुदत्तमित्यत्र 'अच उपसर्गात्तः' इति तत्वे कर्तव्ये सोरुपसर्गत्वं नेति प्रपञ्चितत्वात् । अथ धेङ्गापाधातुभ्यः क्ते आह **घुमास्थेति । धीतमिति** । 'दधातेर्हिः' इत्यत्र श्लुविकरणग्रहणाच्च हिभावः । **अदो जग्धिः । घत्वमिति** । जग्ध् त इति स्थिते 'झषस्तथोः–' इति तकारस्य धकार इत्यर्थः । **झरो झरि इति** । अनेन पाक्षिको धकारलोप इत्यर्थः । **आदिकर्मणि क्त इति** । व्याख्यातं प्राक् । उदाहरणान्तरविवक्षया पुनरुपन्यासः । **प्रकृतः कटं स इति** । कर्तुमारब्धवानित्यर्थः । कटस्य कर्मणः अनभिहितत्वाद् द्वितीया । कर्तुरभिहितत्वात् तच्छब्दात्प्रथमा । चकाराद्भावे कर्मणि चेत्युक्तम् । तत्र कर्मण्युदाहरति । **प्रकृतः कटस्तेनेति । प्रक्षीणः स इति** । आदिकर्मणि क्तः ।

भिप्रेत्य व्याचष्टे, **इगन्तोपसर्गस्येत्यादिना** । ननु चर्त्वस्यासिद्धत्वाद्दादेशतकारो नास्तीत्यत आह **आश्रयात्सिद्धमिति** । 'अतो रोः–' इत्युत्वं प्रति रुत्ववदिति भावः । **धीतमिति** । 'दधातेर्हिः' इत्यत्र लुग्विकरणस्य निर्देशाद् धेट् पान इति भ्वादेर्हिर्न भवति, नापि दत् 'दो दद्घोः' इति द इत्युपादानादिति भावः । **उच्चारणार्थ इति** । इदित्त्वे तु नुम् स्यादिति भावः । **घत्वमिति** । 'झषस्तथोः–' इत्यनेन 'झरो झरि–' इत्यनेन पाक्षिको धलोप इत्यर्थः । इदानीं क्तार्थान्प्रपञ्चयति **आदिकर्मणीति** । व्याख्यातम् । **प्रकृतः कटमिति** । कटं कर्तुमारब्धवानित्यर्थः ।

३०१४) इति दीर्घः। 'क्षियो दीर्घात्' (सू ३०१२) इति नत्वम्। प्रक्षीणः सः।
३०८१ वाऽऽक्रोशदैन्ययोः। (६-४-६१) क्षियो निष्ठायां दीर्घो वा स्यादाक्रोशे दैन्ये च। क्षीणायुर्भव। क्षितायुर्वा। क्षीणोऽयं तपस्वी, क्षितो वा।
३०८२ निनदीभ्यां स्नातेः कौशले। (८-३-८९) आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये। निष्णातः शास्त्रेषु। नद्यां स्नातीति नदीष्णः। 'सुपि-' (सू २९१६) इति कः। ३०८३ सूत्रं प्रतिष्णातम्। (८-३-९०) प्रतेः स्नातेः षत्वम्। प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातम्। ३०८४ कपिष्ठलो गोत्रे। (८-३-९१) कपिष्ठलो नाम यस्य, कापिष्ठलिः पुत्रः। गोत्रे किम्—कपीनां स्थलं कपिस्थलम्। ३०८५ विकुशमिपरिभ्यः स्थलम्। (८-३-९६) एभ्यः स्थलस्य सस्य षः स्यात्। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्। ३०८६ गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। (३-४-७२) एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च। गङ्गां गतः। गङ्गां प्राप्तः। ग्लानः सः। लक्ष्मीमाश्लिष्टो हरिः। शेषमधिशयितः

वाऽऽक्रोशदैन्ययोः। अण्यदर्थ इत्यनुवर्तते। ण्यदर्थौ भावकर्मणी इत्युक्तम्। आक्रोशे उदाहरति क्षीणायुर्भवेति। 'गत्यर्थाकर्मक-' इति कर्तरि क्तः। दैन्ये उदाहरति क्षीणोऽयं तपस्वीति। कृश इत्यर्थः। निनदीभ्याम्। सस्य षः स्यादिति। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, 'अपदान्तस्य मूर्धन्यः' इत्यप्यधिकृतमिति भावः। निष्णात इति। कुशल इत्यर्थः। नदीष्ण इति। नद्यां कुशलं स्नातीति विग्रहः। सुपीति क इति। 'सुपि स्थः' इत्यत्र सुपीति योगविभागात् क इत्यर्थः। गत्यर्थ। गत्यर्थ, अकर्मक, श्लिष, शीङ्, स्था, आस, वस, जन, रुह, जीर्यति एषां दशानां द्वन्द्वः। 'लः कर्मणि च भावे च-' इत्यतो भावे कर्मणीति 'आदिकर्मणि क्तः कर्तरि च' इत्यतः कर्तरि इति चानुवर्तते, तदाह एभ्य इत्यादिना। कर्तरीत्येवानुवृत्तौ भावकर्मणोर्न स्यादिति तयोरप्यनुवृत्तिः। गङ्गां गत इति। कर्तरि क्तः। गङ्गां प्राप्त इति। 'आप्लृ व्याप्तौ' उपसर्गवशाद्गतौ वर्तते। अकर्मकादुदाहरति ग्लान इति। क्षीण इत्यर्थः। 'संयोगादेः-' इति निष्ठानत्वम्। आश्लिष्ट इति। आलिङ्गितवानित्यर्थः। ननु अकर्मकत्वादेव सिद्धे शीङादीनां पुनर्ग्रहणं व्यर्थमित्यत आह शेषमधिशयित इति। शेषे शयितवा-

---

प्रशब्द आदिकर्मद्योतनार्थः। क्तेनोक्तत्वात्कर्तरि प्रथमा। कर्मण्यनुक्तत्वाद् द्वितीया। प्रकृतः कटस्तेनेति कर्मणि प्रयोगे तु विपर्ययः। नदीष्ण इति। नद्यां स्नातो नदीस्नानेन कुशल इत्यर्थः। गत इति। 'अनुदात्तोपदेश-' इति मलोपः। प्राप्त

वैकुण्ठमधिष्ठितः। *शिवमुपासितः।* *हरिदिनमुपोषितः।* *राममनुजातः।* *गरुडमारूढः।* *विश्वमनुजीर्णः।* पक्षे प्राप्ता गङ्गा तेनेत्यादि। ३०८७ **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः।** (३-४-७६) एभ्योऽधिकरणे क्तः स्यात्। चाद्यथाप्राप्तम्। ध्रौव्यं स्थैर्यम्।

"मुकुन्दस्यासितमिदमिदं यातं रमापतेः।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥"

नित्यर्थः। 'अधिशीङ्स्थासाम्' इति शेषः कर्म। अतो नाकर्मकत्वादिह प्राप्तिरिति भावः। **वैकुण्ठमधिष्ठित इति।** वैकुण्ठे स्थितवानित्यर्थः। 'अधिशीङ्स्थासाम्–' इति वैकुण्ठः कर्म। अतो नाकर्मकत्वादिह प्राप्तिः। **शिवमुपासित इति।** शिवं परिचरितवानित्यर्थः। उपवेशनार्थकत्वे अकर्मकत्वेऽपि इह उपसर्गवशेनार्थान्तरे सकर्मकत्वादकर्मकेत्यनेन न प्राप्तिरिति भावः। **हरिदिनमुपोषित इति।** 'वसतिक्षुधोः–' इति इट्। यजादित्वात्संप्रसारणम्। 'शासि–' इति षः। हरिदिने न भुक्तवानित्यर्थः। 'उपान्वध्याङ्वसः' इति हरिदिनं कर्म। ततश्चाकर्मकत्वाभावादप्राप्तिः। **राममनुजात इति।** अनुकृतवानित्यर्थः। अनुसृत्य जातवानिति वा। ततश्चाकर्मकत्वाभावादप्राप्तिः। **गरुडमारूढ इति।** उपर्याक्रान्तवानित्यर्थः। **विश्वमनुजीर्ण इति।** हतवानित्यर्थः। व्याप्तवानिति वा। अकर्मकत्वाभावादप्राप्तिः। जृधातोः कर्तरि क्तः। 'ॠतः–' इति इत्त्वं रपरत्वं 'हलि च' इति दीर्घः। 'रदाभ्याम्–' इति नत्वम्, णत्वम्। **पक्ष इति।** कर्तरि प्रत्ययाभावपक्षे इत्यर्थः। **क्तोऽधिकरणे च।** ध्रौव्यं गतिः प्रत्यवसानं च अर्थो येषामिति विग्रहः। ध्रौव्यार्थेभ्यो गत्यर्थेभ्यः प्रत्यवसानार्थेभ्यश्चेति यावत्। **चाद्यथाप्राप्तमिति।** कर्मकर्तृभावेष्वपि यथासंभवमित्यर्थः। ध्रौव्यमित्यस्य विवरणम्। **स्थैर्यमिति।** स्थिरीभवनम्, उपवेशनशयनादिक्रियेति यावत्। **मुकुन्दस्यासितमिदमिति।** श्लोकोऽयम्। आस्यते अस्मिन्नित्यासितम्, आसनमित्यर्थः। ध्रौव्यार्थस्योदाहरणमिदम्। **इदं यातं रमापतेरिति।** गत्यर्थस्योदाहरणम्। यायते गम्यते अस्मिन्निति यातं मार्ग इत्यर्थः। **भुक्तमेतदनन्तस्येति।** भुज्यते अस्मिन्निति भुक्तम्। भोजनस्थानमित्यर्थः। 'अधिकरणवाचिनश्च' इति

इति। प्रपूर्व आप्लृ व्याप्तौ, व्याप्तिरपीह सूत्रे गतिशब्देन विवक्षितेति भावः। **ग्लान इति।** ग्लै हर्षक्षये अकर्मकोऽयम्। 'आदेच–' इत्यात्वे 'संयोगादेरातः–' इति नत्वम्। **शेषमिति।** 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम्। **अधिष्ठित इति।** 'द्यतिस्यति–' इति इत्वम्। **उपोषित इति।** 'वसतिक्षुधोः–' इतीट् 'शासिवसि–' इति षत्वम्। **अनुजीर्ण इति।** जृष् वयोहानौ 'ॠत इद्धातोः' 'हलि च' इति दीर्घः। नत्वणत्वे। **मुकुन्दस्येति।** आस्यतेऽस्मिन्नित्यासितमासनमित्यर्थः।

पक्षे आसेरकर्मकत्वात्कर्तरि भावे च । आसितो मुकुन्दः । आसितं तेन । गत्यर्थेभ्यः कर्तरि कर्मणि च । रमापतिरिदं यातः । तेनेदं यातम् । भुजेः कर्मणि, अनन्तेनेदं भुक्तम् । कथं 'भुक्ता ब्राह्मणाः' इति । भुक्तमस्ति एषामिति मत्वर्थीयोऽच् । वर्तमाने इत्यधिकृत्य । ३०८८ ञीतः क्तः । (३-२-१८७) 'ञि ष्विदा' ष्विदणः । 'ञि इन्धी' इद्धः । ३६८६ मतिबुद्धिपूजार्थेभ्यश्च । (३-२-१८८) मतिरिहेच्छा । बुद्धेः पृथगुपादानात् । राज्ञां मतः इष्टः । तैरिष्यमाण इत्यर्थः । बुद्धः । विदितः । पूजितः । अर्चितः । चकारोऽनुक्तसमुच्चयार्थः । 'शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि' इत्यादि । ३०९० नपुंसके भावे

त्रिष्वपि कर्तरि षष्ठी । **पक्षे इति ।** अधिकरणे प्रत्ययाभावपक्षे इत्यर्थः । **आसेरकर्मकत्वादिति ।** ततश्च न कर्मणि क्त इत्यर्थः । **आसितो मुकुन्द इति ।** आसितवानित्यर्थः । **आसितं तेनेति ।** भावे उदाहरणम् । **गत्यर्थेभ्य इति ।** तेषां सकर्मकतया कर्तरि कर्मणि च क्तः, न तु भावे इत्यर्थः, 'लः कर्मणि च' इत्यत्रादर्शनादिति भावः । **भुजेः कर्मणीति ।** भक्षणार्थात्कर्मणि क्तः, न तु भावे, सकर्मकेभ्यो भावे प्रत्ययस्य 'लः कर्मणि–' इत्यत्रादर्शनात् । नापि प्रत्यवसानार्थेभ्यः कर्तरि, अनभिधानादित्यर्थः । **कथमिति ।** भुजेः कर्तरि क्तभावस्योक्तत्वादिति भावः । समाधत्ते— **भुक्तमस्त्येषामिति ।** अत्र गत्यर्थेभ्यो भावेऽपि क्तप्रत्ययोऽस्त्येव, अविशेषात्, 'अजर्यं संगतम्' इति सूत्रे 'अनेकमन्यपदार्थे' इति सूत्रे च भाष्ये गत्यर्थेभ्यो भावे क्तप्रत्ययस्य अभ्युपगमाच्चेति शब्देन्दुशेखरे विस्तरः । **इत्यधिकृत्येति ।** 'वर्तमाने लट्' इत्यतो मण्डूकप्लुत्या अनुवर्तमान इत्यर्थः, चानशादीनां सर्वकालतायाः 'भूते' इति सूत्रे भाष्ये उक्तत्वादित्याहुः । **ञीतः क्तः ।** ञि इत् यस्य तस्माद्वर्तमानक्रियावृत्तेः क्त इत्यर्थः । 'तयोरेव कृत्यक्त–' इति भावकर्मणोरेव भूते विहितः क्तः वर्तमाने न प्राप्नोतीत्यारम्भः । **ष्विदण इति ।** 'आदितश्च' इति नेट् । **इद्ध इति ।** 'श्वीदितः–' इति नेट् । **मतिबुद्धि ।** मति, बुद्धि, पूजा, अर्थ एषामिति विग्रहः । 'वर्तमाने क्त' इति शेषः । 'तयोरेव–' इति भावकर्मणोरेव । **मतः । इष्ट इति ।** इच्छार्थकान्मनेरिषेश्च क्तः । 'तीषसह–' इति वेट्कत्वाद् 'यस्य विभाषा' इति नेट् । **शीलितो रक्षित इति ।** भाष्यस्थश्लोकोऽयम् । **इत्यादीति ।** आदिना 'रुष्टश्च रुषितश्चोभावभिव्याहृत

यायतेऽस्मिन्निति यातं मार्गः । भुज्यतेऽस्मिन्निति भुक्तं भोजनस्थानमित्यर्थः । त्रिष्वपि 'अधिकरणवाचिनश्च' इति कर्तरि षष्ठी । **ष्विदण इति ।** 'आदितश्च' इति नेट् । **इद्ध इति ।** 'श्वीदितः–' इति नेट्, नलोपः । **राज्ञामिति ।** 'क्तस्य च वर्तमाने' इति षष्ठी । **इष्ट इति ।** 'तीषसह–' इति वेट्कत्वाद् 'यस्य विभाषा' इति नेट् ।

क्तः । (३-३-११४) क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात् । जल्पितम् । शयितम् । हसितम् ॥ ३०९१ सुयजोर्ङ्वनिप् । (३-२-१०३) सुनोतेर्यजेश्च ङ्वनिप्स्याद् भूते । सुत्वा सुत्वानौ । यज्वा यज्वानौ । ३०९२ जीर्यतेरतृन् । (३-२-१०४) भूते इत्येव । जरन् जरन्तौ जरन्तः, वासरूपन्यायेन निष्ठाऽपि । जीर्णः जीर्णवान् । ३०९३ छन्दसि लिट् । (३-२-१०५) ३०९४ लिटः कानज्वा । (३-२-१०६) ३०९५ क्वसुश्च । (३-२-१०७) इह भूतसामान्ये छन्दसि लिट् । तस्य विधीयमानौ क्वसुकानचावपि छान्दसा-

---

इत्यपि । हृष्टतुष्टौ तथाकान्तस्तथोभौ संयतोद्यतौ । कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः ।' इति संग्रहः । कष्टशब्दो भविष्यति, अमृतशब्दो वर्तमाने इत्यर्थः । **नपुंसके भावे क्तः। कालसामान्ये इति ।** अस्य वर्तमानाद्यधिकारानन्तर्भावादिति भावः । अकर्मकेभ्य एव नपुंसके भावे क्तः, न तु सकर्मकाद् इति 'छन्दोऽध्ययने वृत्तम्' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । तद् ध्वनयन्नकर्मकेभ्य एवोदाहरति **जल्पितमित्यादि ।** गतं भुक्तमित्यादौ तु अविवक्षितकर्मकत्वाद् अकर्मकत्वं बोध्यम् । अत एव गतं हंसस्य, भुक्तमोदनस्येत्यादौ शेषत्वविवक्षया षष्ठीति दिक् । **सुयजोर्ङ्वनिप् ।** पञ्चम्यर्थे षष्ठी । सुनोतेर्यजेश्च ङ्वनिबित्यर्थः । **भूते इति ।** अस्य भूताधिकारस्थत्वादिति भावः । **सुत्वा सुत्वानाविति ।** ङ्वनिपि ङपावितौ, इकार उच्चारणार्थः । ङित्त्वान्न गुणः । **जीर्यतेरतृन् । भूते इत्येवेति ।** भूतार्थवृत्तेर्जॄधातोरतृन् स्यादित्यर्थः । ऋकारनकारावितौ । अत्प्रत्ययः शिष्यते । **जरन्निति ।** उगित्त्वान्नुम् । **जीर्ण इति ।** 'ॠत इत्–' रपरत्वम् , 'हलि च' इति दीर्घः, निष्ठानत्वम् । **छन्दसि लिट् । लिटः कानज्वा । क्वसुश्च ।** त्रीणीमानि सूत्राणि । अत्र प्रथमसूत्रे भूत इत्यनुवृत्तिमभिप्रेत्य व्याचष्टे **भूतसामान्ये छन्दसि लिडिति ।** अनद्यतनपरोक्षत्वं छन्दसि न विवक्षितमिति भावः । 'लिटः कानज्वा' इति द्वितीयं सूत्रम् । तत्र छन्दसीत्यनु-

---

शीलित इत्यादि । शील समाधौ, रक्ष पालने, क्षमूष् सहने, क्रुश आह्वाने, जुषी प्रीतिसेवनयोः । **सुयजोर्ङ्वनिप् । सुनोतेरिति ।** षुञ् अभिषवे । यद्यपीह षु गतौ, षु प्रसवैश्वर्ययोरिति निरनुबन्धकयोरेव ग्रहणं न्याय्यम् , तथाप्यनभिधानादुभयपदिना साहचर्याद्वा तयोर्ग्रहणं न भवतीति भावः । ङकारः सुनोतेर्गुणप्रतिषेधार्थः । पकारस्तु स्वरार्थस्तुगर्थश्च । **यज्वेत्यादि ।** क्वनिपि कृते त्वत्र 'वचिस्वपि–' इति संप्रसारणं स्यादिति ङ्वनिबुक्तः । **अतृन्निति ।** नकारः स्वरार्थः, ऋ इत् । **जरन्निति ।** ऋकारस्य गुणे रपरोऽकारः 'उगिदचाम्–' इति नुम् । संयोगान्तलोपस्यासिद्धत्वान्न दीर्घः । **छन्दसि लिडिति ।** सूत्रस्यार्थमाह **भूतसामान्ये इति ।** न च

विति त्रिमुनिमतम् । कवयस्तु बहुलं प्रयुञ्जते । 'तं तस्थिवांसं नगरोपकण्ठे' 'श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इत्यादि । ३०१६ वस्वेकाजाद्धसाम् । (७-२-६७) कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट्, नान्येषाम् ।

वर्तते, भूते इति च । छन्दसि भूते लिटः कानजादेशः स्यादित्यर्थः । लिड्ग्रहणं लिण्मात्रस्य ग्रहणार्थम् । तेन 'परोक्षे लिट्' इति यो लिड्विहितः तस्यापि ग्रहणार्थः । अन्यथा 'अनन्तरस्य–' इति न्यायेन प्रकृतस्यैव लिटो ग्रहणं स्यादिति वृत्तौ स्पष्टम् । वाग्रहणं तु पक्षे लिटः श्रवणार्थम्, वासरूपविधिर्लादेशेषु नेति ज्ञापनार्थं वा । तत्प्रयोजनं तु 'भाषायां सदवस–' इत्यत्र अनुपदमेव वक्ष्यते । 'क्वसुश्च' इति तृतीयं सूत्रम् । छन्दसि भूते लिटः क्वसुश्चादेशः स्यादित्यर्थः । योगविभागस्तु उत्तरसूत्रे क्वसोरेवानुवृत्त्यर्थः । इमौ कानच्क्वसू आदेशौ छान्दसाविति अत्रैव भाष्यकैयटयोः स्पष्टम् । तदाह **तस्येत्यादि त्रिमुनिमतमित्यन्तम्** । 'विशाखा पूर्वाह्णापराह्णा–' इति सूत्रभाष्ये तु पपुः आगतं पपिवद्र्प्यमिति प्रयुक्तम् । तेन लोकेऽपि क्वचित् क्वसोः साधुत्वं सूचितम्, तदाह **कवयस्त्विति । तस्थिवांसमिति** । स्थाधातोः लिटः क्वसुः । द्वितीयैकवचने 'अत्वसन्तस्य–' इति दीर्घः । उगित्त्वान्नुम् । **अधिजग्मुष इति** । अधिपूर्वाद्गमेर्लिटः क्वसुः, 'गमहन–' इत्युपधालोपः, शसि वसोः संप्रसारणम्, पूर्वरूपम्, षत्वम् । **वस्वे** । वसु इत्यविभक्तिको निर्देशः । तथा च व्याख्यास्यति वसोरिति । नित्यत्वाद् द्वित्वे कृते एकाच्त्वमेव नेति कथमिट् स्यादित्यत आह **कृतद्विर्वचनानामेकाचामिति** । कृतेऽपि द्वित्वे एकाच एव ये अवशिष्यन्ते तेषामित्यर्थः । 'नेड्वशि कृति' इति निषेधं बाधित्वा क्रादिनियमात् सर्वत्र प्राप्तस्य इटो

'छन्दसि लुङ्लङ्लिटः' इत्यनेन गतार्थता शङ्क्या, धातुसंबन्धाधिकारे हि स विधिः । इदं तु धातुसंबन्धं विनापि भवतीति विशेषात् । अत्र व्याचख्युः—कानचः कित्करणं तितिराण इत्यत्र 'ऋच्छत्यृताम्' इति गुणस्य निषेधार्थं सति प्रतिषेधविषये आरभ्यते । चक्राण इत्यत्र तु 'असंयोगाल्लिट्कित्' इत्येव सिद्धं कित्त्वमिति । **त्रिमुनिमतमिति** । सूत्रकृता छन्दसीति प्रकान्तत्वादुत्तरसूत्रे भाषाग्रहणाच्च भाष्यवार्तिकयोरपि क्वसुकानचोः 'छन्दस्युभयथा' इति वचनात्सार्वधातुकत्वेन 'सार्वधातुकमपित्' इति ङित्त्वादेव आजिवानित्यादौ नलोपादीनां कित्कार्याणामन्यथासिद्धिमाशङ्क्य तितीर्वान् तितिराण इत्यादौ 'ऋच्छत्यृताम्' इति प्राप्तस्य गुणस्य बाधनार्थं कित्करणमिति सिद्धान्तितत्वात् । अतएव कित्करणसामर्थ्याद्भाषायामपि क्वसुकानचौ स्त इति केषांचिदुत्प्रेक्षा नादर्तव्येति हरदत्तमाधवादिग्रन्थे स्पष्टमिति भावः । **कवयस्त्विति** । गतानुगतिकतयेति भावः । **वस्वे** । वस्वित्यविभक्तिको निर्देशस्तथा च व्याख्यास्यति ।

एकाच् , आदिवान्। आरिवान्। आत , ददिवान्। जक्षिवान्। एषां किम्-बभूवान्। ३०९७ भाषायां सदवसश्रुवः। (३-२-१०८) सदादिभ्यो भूतसामान्ये भाषायां लिड् वा स्यात् , तस्य च नित्यं क्वसुः। 'निषेदुषीमासन-

---

नियमोऽयमित्याह। **नान्येषामिति**। **आदिवानिति**। अद भक्षणे। द्वित्व-हलादिशेषाभ्यासदीर्घसवर्णदीर्घेषु कृतेषु कृतद्वित्वोऽप्ययमेकाजेवेति इट्। **आरिवा-निति**। 'ऋ गतौ' 'ऋच्छत्यृताम्' इति गुणे कृते द्वित्वादिषु पूर्ववत् कृतेषु अयमे-काच्। **ददिवानिति**। डु दाञ् दाने। कृते द्वित्वे नायमेकाच्। इरिनमित्तश्चातो लोपो नासति तस्मिन् भवतीति अनेकाजर्थमाग्रहणम्। **जक्षिवानिति**। 'लिट्यन्यतर-स्याम्' इत्यदेर्घस्लादेशः। द्वित्वे कृते नायमेकाजिति घसिग्रहणम्। **भाषायाम्**। सद, वस, श्रु एषां द्वन्द्वात्पञ्चमी। पुंस्त्वमेकवचनं चार्षम्। **तस्य च नित्यं क्व-सुरिति**। वाग्रहणं लिटैव संबध्यते। तस्य क्वसुस्तु नित्य इति भाष्ये स्पष्टम्। पक्षे लुङ् , तस्य भूतसामान्ये विहितत्वात्। वाग्रहणाननुवृत्तौ तु भूतसामान्ये लिडयं नित्यं लुङपवादः स्यात , सरूपत्वात्। अस्य च भूतसामान्ये लिटो न तिङ् , अस्य क्वसोस्तदपवादत्वात्। वासरूपविधिस्तु लादेशेषु नेति 'लिटः कानज्वा' इत्यत्र उक्त-मिति शब्देन्दुशेखरे विस्तरः। **निषेदुषीमिति**। निपूर्वात्सदेर्लिटः क्वसुः द्विवम्

वसोरिति। नित्यत्वाद् द्वित्वे कृते एकाच्त्वमेव नेति कथमिट् स्यादित्यत आह **कृतद्विर्वचनानामेकाचामिति**। कृतेऽपि द्वित्वे एकाच एव ये अवशिष्यन्ते तेषामित्यर्थः। 'नेड्वशि कृति' इति निषेधं बाधित्वा क्रादिनियमात्सर्वत्र प्राप्तस्येटो नियमोऽयमित्याह। **नान्येषामिति**। **आदिवानिति**। अद् भक्षणे द्वित्वहलादि-शेषाभ्यासदीर्घसवर्णदीर्घेषु कृतेषु कृतद्वित्वोऽप्ययमेकाजेवेतीड् भवति। **आरिवानिति**। ऋ गतौ 'ऋच्छत्यृताम्' इति गुणे कृते द्वित्वादिषु पूर्ववत्कृतेष्वयमप्येकाच्। **ददिवानिति**। डुदाञ् दाने। कृते द्वित्वे नायमेकाच् इरिनमित्तश्चातो लोपो नासति तस्मिन्भवतीत्यनेकाजर्थमाद् ग्रहणम्। **जक्षिवानिति**। 'लिट्यन्यतरस्याम्' इत्यदेर्घ-स्लादेशः। द्वित्वे कृते नायमेकाजिति घसिग्रहणम्। अत्र व्याचख्युः—द्वित्वात्पूर्वं परत्वाद् 'घसिभसोर्हलि—' इत्युपधालोपः स्यात्तस्मिंश्च कृतेऽनच्कत्वाद् द्वित्वमेव न स्यात्। न चास्य द्वित्वे कर्तव्ये 'द्विर्वचनेऽचि' इत्यनेन स्थानिवद्भावो निषेधो वा शङ्क्यः, द्वित्वनिमित्तस्याचोऽभावात्। ततश्च नायं कृतद्विर्वचन एकाज् भवतीति घसिग्रहणम्, तत्सामर्थ्यात्तु परत्वादुपधालोपमिडागमो बाधते, कृते त्विडागमे 'गमहन—' इत्युपधालोपस्तस्य चाज्निमित्तत्वेन स्थानिवत्त्वाद् द्वित्वम्। यद्वा 'द्विर्वचनेऽचि' इति निषेधपक्षे तूपधालोपात्प्रागेव द्वित्वं पश्चादुपधालोपः 'शासिवसिघसीनां च' इति षत्वं चर्त्वे चः 'अभ्यासे चर्च' इत्यभ्यासघकारस्य जश्त्वमिति। **निषेदुषीमिति**।

बन्धधीरः' । 'अध्यूषुषस्तामभवज्जनस्य' । शुश्रुवान् । ३०९८ उपेयिवाननाश्वाननूचानश्च । (३-२-१०९) एते निपात्यन्ते । उपपूर्वादिणो भाषायामपि भूतमात्रे लिड् वा, तस्य नित्यं क्वसुः । इट् । उपेयिवान् । 'उपेयुषः स्वामपि मूर्तिमग्र्याम्' । उपेयुषी । उपेत्यविवक्षितम् । ईयिवान् । समीयिवान् । नञ्पूर्वा-

---

'अत एकहल्मध्ये-' इत्येत्वाभ्यासलोपौ वसोः संप्रसारणम्, पूर्वरूपम्, षत्वम् । **अध्यूषुष इति** । अधिपूर्वाद्वसधातोर्लिटः क्वसुः, यजादित्वद्धातोर्वस्य संप्रसारणम् । पूर्वरूपम्, उस् इत्यस्य द्वित्वम्, हलादिशेषः, सवर्णदीर्घः । शसि वसोः संप्रसारणम्, पूर्वरूपम् । **शुश्रुवानिति** । श्रुधातोर्लिटः क्वसुः द्वित्वम् । **उपेयिवान् । इडिति ।** उपपूर्वादिणधातोः लिटः क्वसुः, नित्यत्वाद् द्वित्वम् । वलादिलक्षण इट् 'नेड्वशि कृति' इति प्रतिषिद्धः, स तावत् क्रादिनियमात्पुनरुत्थितः । पुनश्च 'वस्वेकाजाद्घसाम्' इति सूत्रेण एकाचश्च आदन्ताच्च घसेश्च परस्य वसोरिट् स्याद् नान्येभ्य इत्यर्थकेन द्वित्वानन्तरमनेकाच्त्वात् प्रतिषिद्धः, सोऽयमिड् अनेन निपातनेन प्रतिसूयते इति भाष्ये स्पष्टम् । इटि कृते उत्तरखण्डस्य इकारस्य यण् । अभ्यासस्य दीर्घस्तु न निपात्यते । नन्वत्र अपूर्व एव इड् निपात्यतामित्यत आह । **उपेयुषीति** । उगित्वान्ङीपि वसोः संप्रसारणम् । प्रतिप्रसूतो वलादिलक्षण इट् तु न । तन्निमित्तस्य वकारस्य संप्रसारणेन विनाशोन्मुखत्वात् । अत्र अपूर्वस्य इटो निपातने तु अत्रापि इट् स्यादिति भावः । **उपेत्यविवक्षितमिति** । अत्र व्याख्यानमेव शरणम् । **अश्नातेरिति ।** 'अश भोजने' श्नाविकरणः, क्र्यादिः, लिटः क्वसुः, द्वित्वम् 'अत आदेः' इति दीर्घः,

---

षद्लृ विशरणादौ 'लिटि धातोः-' इति द्वित्वे 'अत एकहल्मध्ये-' इत्येत्वाभ्यासलोपौ 'उगितश्च' इति ङीपि 'वसोः-' इति संप्रसारणे वलादित्वाभावान्नेट् । 'सदिरप्रतेः' इति षत्वम् । पुंसि तु निषेदिवान् । **अध्यूषुष इति** । वस निवासे अधिपूर्वः, 'वचिस्वपि-' इति संप्रसारणं द्वित्वहलादिशेषसवर्णदीर्घाः, ङसि भत्वात्संप्रसारणम् । प्रथमैकवचने तु अध्यूषिवान् । **उपेयिवानना । इडिति ।** वलादिलक्षण एवेट् 'नेड्वशि कृति' इति निषिद्धः क्रयादिनियमात्पुनः प्राप्तः 'वस्वेकाजाद्घसाम्' इति सूत्रेण कृतद्वित्वानामेकाचामादन्तानां घसेश्च वसोरिट् स्यान्नान्येषामिति नियच्छता प्रतिषिद्धो नित्यत्वाद् द्वित्वे कृतेऽनेकाच्त्वात् । न च सवर्णदीर्घेणैकाच्त्वम्, 'दीर्घ इणः किति' इत्यभ्यासदीर्घे कृते तत्सामर्थ्यात्सवर्णदीर्घाभाव इति पक्षाश्रयणात् । स एव वलादिलक्षण इड् इह प्रतिप्रसूयते नापूर्वो विधीयते तेन सम्प्रसारणविषये न भवति । अत एवोदाहरति **उपेयुष इति** । सति त्विटि तस्य यणादेशे उपेय्युष इति स्यादिति भावः । **अविवक्षितमिति** । व्याख्यानमेवात्र शरणम् । **ईयिवानिति ।**

दृशातेः क्वसुरिडभावश्च। 'घृतजयधृतेरनाशुषः' इति भारविः। अनुपूर्वाद्वचेः कर्तरि कानच्। वेदस्यानुवचनं कृतवाननूचानः। ३०९९ विभाषा गमहनविद्विशाम्। (७-२-६८) एभ्यो वसोरिड् वा। जगिमवान्, जगन्वान्। जघ्निवान्, जघन्वान्। विविदिवान्, विविद्वान्। विविशिवान्, विविश्वान्। विशिना साहचर्याद्विन्दतेर्ग्रहणम्। वेत्तेस्तु विविद्वान्। 'नेड्वशि कृति' (सू २९८१) इतीयिनिषेधः। 'दृशेश्च' (वा ४४८२)। ददृशिवान्, ददृश्वान्। ३१०० लटः शतृशानचावप्रथमासमानाधिकरणे (३-२-१२४) अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः। शबादि पचन्तं चैत्र पश्य। ३१०१ आने मुक्। (७-२-८२) अदन्तस्याङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं

सवर्णदीर्घः, द्विहल्त्वाभावान्न नुट्। 'अश्नोतेश्च' इत्यपि न नुट्, श्नुविकरणस्यस्यैव तत्र ग्रहणात्। नञ उपपदसमासः। 'नलोपो नञः' 'तस्मान्नुडचि' इति भावः। वचेः कर्तरीति। न तु भावकर्मणोरिति भावः। कानचि यजादित्वात्संप्रसारणं पूर्वरूपं सवर्णदीर्घः। विभाषा गम। 'विभाषा गमहन-' इत्यादि स्पष्टम्। लटः शतृशानचौ। 'वर्तमाने लट्' इति पूर्वसूत्रविहितस्यैव एतौ शतृशानचौ। अनन्तरस्येति न्यायादिति 'वर्तमानसामीप्ये-' इत्यादिभाष्ये स्पष्टम्। शतृप्रत्यये शकारऋकारावितौ। पचन्तमिति। पाकानुकूलव्यापाराश्रयमित्यर्थः, 'क्रियाप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानि' इति सिद्धान्तात। शतुः शित्त्वेन सार्वधातुकत्वात् शपि 'अतो गुणे' इति पररूपम्। शानचि शचावितौ। आने मुक्। 'अङ्गस्य' इत्यधिकृतम् 'अतो येयः, इति पूर्वसूत्रादनुवृत्तेन षष्ठ्या विपरिणतेन अता विशेष्यते। तदन्तविधिः। तदाह अदन्तस्येति। मुकि ककार इत्, उकार उच्चारणार्थः, कित्त्वादन्तावयवः।

इणो द्वित्वे सवर्णदीर्घं बाधित्वा अङ्गत्वाद् 'इणो यण्' इति भवति, वसोरिडागमे हि परत्राजादिप्रत्ययस्य सत्त्वात्। वचेरिति। वच परिभाषणे इत्यस्माद् ब्रुवो वचेर्वा कर्तरि न तु भावकर्मणोः। एतच्च निपातनाल्लभ्यम्। जग्मिवानित्यादि। इटपक्षे 'गमहन-' इत्युपधालोपः। लटः शतृ। सामानाधिकरण्ये सतीति। यद्यप्यादेशरहितस्य लटः प्रयोगाभावात्सामानाधिकरण्यं दुर्लभं तथापि शतृशानचोस्तद्द्वारा स्थानिन्यपि सामानाधिकरण्यं कल्प्यते। शबादीति। शित्त्वेन सार्वधातुकत्वादिति भावः। पचन्तमिति। शतुरुगित्त्वान्नुम्, विक्लित्त्यनुकूलवर्तमानव्यापाराश्रयमित्यर्थः। आने मुक्। 'अतो येयः' इति पूर्वसूत्रादनुवृत्तं पञ्चम्यन्तमप्यत इति पदं षष्ठ्या विपरिणम्यते, आन इति सप्तमीबलात्। न चात इति पञ्चमीबलादान इति सप्तम्यन्तं पदं षष्ठ्या विपरिणम्यतामिति शङ्क्यम्, पञ्चम्याः पूर्वसूत्रे चरितार्थत्वात्सप्तम्याश्चा-

पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचित्। सन्ब्राह्मणः। 'माङ्याक्रोशे इति वाच्यम्'। (वा २१०६) 'मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति'। 'माङि लुङ्' (सू २२११) इति प्राप्ते एतद्वचनसामर्थ्याल्लट्। ३१०२ संबोधने च। (३-२-१२५)। हे पचन्। हे पचमान। ३१०३ लक्षणहेत्वोः क्रियायाः। (३-२-१२६)

अनुवर्तमाने इति 'वर्तमाने लट्' इति पूर्वसूत्रादनुवृत्तस्य लडित्यस्य षष्ठ्या विपरिणामेन उक्तार्थलाभे सतीत्यर्थः। अधिकेति। सूत्रासमानाधिकरणस्यापि अर्थस्य लाभार्थमित्यर्थः। सन् ब्राह्मण इति। 'अस भुवि' शतृप्रत्यये शपो लुक्, श्नसोरल्लोपः। माङीति। माङि प्रयुज्यमाने आक्रोशे गम्ये लटः शतृशानचाविति वक्तव्यमित्यर्थः। माजीवन्निति। न जीवत्ययम् अनुपकारित्वाद् मृतप्राय इत्यर्थः। मा पचमान इत्यप्युदाहार्यम्। 'लटः शतृशानचौ' इत्येव सिद्धेः किमर्थमिदमित्यत आह माङि लुङितीति। संबोधने च। लटः शतृशानचाविति शेषः। प्रथमासमानाधिकरणार्थ आरम्भः। पूर्वसूत्रस्थपुनर्लड्ग्रहणस्य अधिकविधानार्थत्वादेव सिद्धे प्रपञ्चार्थमिदम्। लक्षणहेत्वोः। लक्ष्यते ज्ञाप्यतेऽनेनेति लक्षणम्, ज्ञापकम्, तदाह क्रियायाः परिचायके इति। धात्वर्थस्य लक्षणत्वे हेतुत्वे च द्योत्ये इति यावत्।

चरितार्थत्वात्तदेतदाह अङ्गस्यात इति। प्राचा त्वदन्ताङ्गस्येति व्याख्यातम्। तदयुक्तम्, पचमान इत्यादौ 'अदुपदेशाल्लसार्वधातुकमनुदात्तम्' इति शानचः स्वरस्यासिद्धिप्रसङ्गात्। अदन्ताङ्गस्येति पक्षे हि 'अङ्गभक्तो मुक् स चाङ्गमेव न व्यवदध्यात्' तदवयवमकारं तु व्यवदध्यादेव अकारमात्रभक्तत्वे तु तदवयवत्वान्नास्ति व्यवधानमित्यदोषः। ननु 'स्वरविधौ व्यञ्जनमविद्यमानवदि'ति परिभाषया मुकोऽविद्यमानत्वेन व्यवधानाभावात्स्यादेवानुदात्तत्वमिति चेत्। अत्राहुः—हलः स्वरप्राप्तौ व्यञ्जनमविद्यमानवन्नान्यत्रेत्याकराऊढम्। न चात्र हलः स्वरप्राप्तिरस्तीति प्रकृते परिभाषेयं नोपयुज्यते। अन्यथा मरुत्वानित्यादावपि 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वं स्यादिति दिक्। लडिति। यद्यपि प्रथमान्तं प्रकृतम्, तथापि धातोरित्यधिकारात्पञ्चम्यन्तात्परं प्रथमान्तं षष्ठ्या विपरिणम्यत इति भावः। न च 'वर्तमाने लट्' इत्यत्रैवोक्तरीत्या विपरिणामोऽस्त्विति शङ्क्यम्, प्रत्ययविधौ पञ्चम्याः प्रकल्पकत्वं नास्तीति 'गुप्तिज्किद्भ्यः सन्' इत्यत्र भाष्यकारैः स्वीकृतत्वात्। प्रथमासामानाधिकरण्येऽपीति। उपलक्षणमिदम्। अप्रथमान्तेन सामानाधिकरण्याभावेऽपीत्यर्थः। तेन कुर्वतोऽपत्यं कौर्वतः। कुर्वतो भक्तिः कुर्वद्भक्तिः कुर्वाणभक्तिरिति प्रत्ययोत्तरपदयोरपि सिध्यति। अन्यथा कुर्वतोऽपत्यमित्यादौ तद्धितसमासौ न स्याताम्। लक्षण-

क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्तः । शयाना भुञ्जते यवनाः । अर्जयन्वसति । हरिं पश्यन्मुच्यते । हेतुः फलं कारणं च । 'कृत्यचः' । (सू २८३५) । प्रपीयमाणः सोमः । ३१०४ ईदासः । (७-२-८३) आसः परस्यानस्य ईत्स्यात् । 'आदेः परस्य' (सू ४४) आसीनः । ३१०५ विदेः शतुर्वसुः । (७-१-३६) वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात् । विद्वान्, विदन् । विदुषी । ३१०६ तौ सत् (३-२-१२७) तौ शतृशानचौ सत्संज्ञौ स्तः । ३१०७ लृटः सद्वा । (३-३-१४) । व्यवस्थित-विभाषेयम् । तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य । करिष्यतोऽपत्यं कारिष्यतः । कारिष्यद्भक्तिः ।

कर्तैव प्रत्ययार्थः । **शयाना भुञ्जते यवना इति** । अत्र भोजनकालीनं शयनं भोक्तुर्यवनत्वसूचकम् । हेतावुदाहरति **अर्जयन्वसतीति** । अर्जनाय वसतीत्यर्थः । हेतावुदाहरणान्तरमाह **हरिं पश्यन्निति** । हरिदर्शनेन संसारदुःखान्मुच्यत इत्यर्थः । ननु धनाद्यर्जनस्य वाससाध्यतया कथं तस्य वासहेतुत्वमित्यत आह । **हेतुः फलं कारणं चेति** । इष्टसाधनताज्ञानस्य वासप्रवृत्तौ हेतुतया इष्टस्यार्जनस्यापि वासहेतुत्वमिति भावः । **प्रपीयमाण इति** । अत्र भिन्नपदस्थत्वात् कथं णत्वमित्यत आह **कृत्यच इति** । **ईदासः** । आस इति पञ्चमी । **आनस्येति** । 'आने मुक्' इत्यतस्तदनुवृत्तेरिति भावः । **विदेःशतुर्वसुः । वेत्तेरिति** । 'विद ज्ञाने' इति लुग्विकरणस्यैव ग्रहणम् शतः परस्मैपदत्वाद् विद्यतेर्विन्तेश्चात्मनेपदित्वात् । यद्यपि विन्दतिरुभयपदी तथापि तस्य न ग्रहणम् 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इत्युक्तेरिति भावः । **वा स्यादिति** । 'तुह्योस्तातङ्–' इत्यतस्तदनुवृत्तेरिति भावः । **विदुषीति** । उगित्त्वान्ङीप्, वसोः संप्रसारणम्, पूर्वरूपम्, षत्वम् । **तौ सत्** । 'लटः शतृशानचौ–' इति सूत्रोपात्तौ शतृशानचौ तच्छब्दः परामृशति । तदाह **तौ शतृशानचाविति । लृटः सद्वा** । लृटः शतृशानचौ वा स्त इत्यर्थः । **व्यवस्थितेति** । व्याख्यानादिति भावः । **नित्यमिति** । तेन तिङां निवृत्तिः । अप्रथमासामानाधिकरण्ये उदाहरति **करिष्यन्तमिति** । प्रत्यये परत उदाहरति **करिष्यतोऽपत्यं कारिष्यत इति** । उत्तरपदे उदाहरति **करिष्यद्भक्तिरिति** ।

हेत्वोः । लक्ष्यतेऽनेनेति लक्षणं परिचायकम् । **शयाना इति** । शीङ आत्मनेपदित्वात्परस्य लटः शानच् । अत्र शयनं लक्षणं चिह्नं यवनकर्तृकभोजनस्य न तु फलं नापि कारणमिति हेत्वपेक्षया लक्षणस्य पृथङ्निर्देशः । **अर्जयन्निति** । अर्ज प्रतियत्ने चुरादिः, अर्जनार्थो वास इत्यर्थः । **हरिमिति** । हरिदर्शनं मुक्तौ कारणमित्यर्थः ।

हे करिष्यन्। अर्जयिष्यन्वसति। प्रथमासामानाधिकरण्येऽपि क्वचित्। करिष्यतीति करिष्यन्। ३१०८ पूङ्यजोः शानन्। (३-२-१२८)। वर्तमाने। पवमानः। यजमानः। ३१०९ ताच्छील्यवयोवचनशक्तिषु चानश्। (३-२-१२९) एषु द्योत्येषु कर्तरि चानश्। भोगं भुञ्जानः। कवचं बिभ्राणः। शत्रुं निघ्नानः। ३११० इङ्धार्योः शत्रकृच्छ्रिणि। (३-२-१३०)। आर्म्यां

करिष्यन्ती भक्तिरिति कर्मधारयः। संबोधने उदाहरति **हे करिष्यन्निति**। शयिष्यमाणा भोदयन्ते यवना इति लक्षणे उदाहार्यम्। हेतावुदाहरति **अर्जयिष्यन्वसतीति। प्रथमासामानाधिकरण्येऽपि क्वचिदिति**। अप्रथमासामानाधिकरण्याभावेऽपि क्वचिदित्यर्थः। कदाचिदित्यपि द्रष्टव्यम्। इदं च 'लृट् शेषे च' इति भविष्यदधिकारविहिते लृट्येव प्रवर्तते इति 'अनवक्लृप्त्यमर्ष-' इत्यत्र भाष्ये स्पष्टम्। **पूङ्यजोः शानन्**। पञ्चम्यर्थे षष्ठी। **वर्तमाने इति**। शेषपूरणमिदम्। 'वर्तमाने लट्' इत्यतस्तदनुवृत्तेरिति भावः। लड्ग्रहणं तु निवृत्तम्। ततश्च ण्वुलादिवत्स्वतन्त्रोऽयम् नतु शत्रादिवल्लादेशः। तथा च कर्तर्येवायम्, नतु भावकर्मणोः। नच लादेशत्वाभावे सोमं पवमान इत्यत्र कर्मणि षष्ठी स्यादिति वाच्यम्. 'न लोक-' इति सूत्रे 'तन्' इति प्रत्याहार इत्युक्तत्वात्। **ताच्छील्य**। चानशि चशावितौ। **भोगं भुञ्जान इति**। भोगशील इत्यर्थः। **कवचं बिभ्राण इति**। यौवनबलादिति भावः। **शत्रुं निघ्नान इति**। निहन्तुं शक्त इत्यर्थः। अतः परत्वाभावान्न मुक्। चानशः लादेशत्वाभावाद् अनात्मनेपदत्वात् परस्मैपदिभ्योऽपि प्रवृत्तिः। **इङ्धार्योः**।

विदः। स्थानिवत्त्वादेव सिद्धे वसोरुगित्करणं 'वसोः संप्रसारणम्' इत्यत्र क्वसोरपि सामान्यग्रहणे तत्सामर्थ्याच्च 'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' इत्येतदपि न प्रवर्तते। **पूङ्यजोः**। शाननः शकारः सार्वधातुकत्वार्थः, नकारः स्वरार्थः। ण्वुलादिवत्स्वतन्त्रोऽयं न तु शत्रादिवल्लादेशस्तथाहि सति वेति वाच्यं स्यात्पवते यजते इति तिङोऽपि यथा स्युरिति। न च वासरूपन्यायेन निर्वाहः। लादेशेषु वासरूपविधिर्नास्तीत्याकरे स्थितत्वात्। किंच लादेशत्वे 'लः कर्मणि च-' इति भावकर्मणोर्विहितं स्यादिति भावकर्मणोरपि प्रयुज्येत इष्यते तु कर्तर्येव। एवं चानशः 'इङ्धार्योः-' इति शतुश्च स्वातन्त्र्यं बोध्यम्। अत्र केचित् शाननो लादेशत्वे लसार्वधातुकानुदात्तत्वं स्यादित्याहुस्तच्चिन्त्यम्, परत्वान्नित्स्वरप्रवृत्त्या पवमान इत्यादेराद्युदात्तत्वे शाननोऽनुदात्तत्वस्येष्टत्वात्। नन्वेषां लादेशत्वानङ्गीकारे सोमं पवमान इत्यादौ कर्मणि षष्ठी स्यादिति चेन्मैवम्, 'न लोका:-' इति सूत्रे तृन्निति प्रत्याहारनिर्देश इत्युक्तत्वात्। **ताच्छील्य**। वचनग्रहणं स्पष्टार्थम्, चानशो लादेशत्वाभावेनात्मनेपदत्वाभावात्परस्मै-

शतृ स्यादकृच्छ्रिणि कर्तरि । अधीयन् । धारयन् । अकृच्छ्रिणि किम्-कृच्छ्रेण अधीते, धारयति । ३१११ **द्विषोऽमित्रे** । (३-२-१३१) द्विषञ्छत्रुः । ३११२ **सुञो यज्ञसंयोगे** । (३-२-१३२) सर्वे सुन्वन्तः । सर्वे यजमानाः सत्रिणः । ३११३ **अर्हः प्रशंसायाम्** । (३-२-१३३) अर्हन् । ३११४ **आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु** । (३-२-१३४) क्विपमभिव्याप्य

शतृ अकृच्छ्रिणीति छेदः । अकृच्छ्रम् अदुःखम्, तदस्यास्तीति अकृच्छ्री । इङ्, धारि अनयोः द्वन्द्वात् पञ्चम्यर्थे षष्ठी । **अधीयन्निति** । सुखमध्येतेत्यर्थः । **धारयन्निति** । सुखेन धारयितेत्यर्थः । **द्विषोऽमित्रे** । द्विषः शतृप्रत्ययः स्याद् अमित्रे कर्तरीत्यर्थः । **सुञो यज्ञ** । यज्ञसंयुक्तेऽभिषवे वर्तमानात् सुनोतेः शतृप्रत्यय इत्यर्थः । संयोगग्रहणं यज्ञस्वामिपरिग्रहार्थम् । तेन याजकेषु न भवति । तत्र सुन्वन्नित्येकवचनान्तं दर्शपूर्णमासज्योतिष्टोमादिविषयम्, एककर्तृकत्वात् । बहुवचनान्तं तु सत्रविषयमेव, तत्र ऋत्विजामपि यजमानत्वादिति मत्वाह **सर्वे सुन्वन्त इति** । **अर्हः प्रशंसायाम्** । अर्ह इति पञ्चमी । शतृप्रत्यय इति शेषः । **अर्हन्निति** । पूजां प्राप्तुं योग्य इत्यर्थः । अत्र प्रशस्तस्यैव पूजायोग्यत्वात् प्रशंसा गम्यते । **आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु** । आङभिविधौ, तदाह **क्विपमभिव्याप्येति** । 'भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' इति सूत्रमभिव्याप्येति यावत् । तत्र ताच्छी-

---

पदिभ्योऽपि विधानमिति ध्वनयन्नुदाहरति **निघ्नान इति** । 'गमहन–' इत्युपधालोपः । **इङ्धार्योः** । इङ आत्मनेपदित्वात् शता न सिध्यति, धारयतेरपि कर्तृगामिनि क्रियाफले न सिध्यति लसार्वधातुकानुदात्तत्वं च प्राप्नोतीत्ययमारम्भः । **सुञो यज्ञसंयोगे** । सुनोतेः शतृप्रत्ययः स्याद् यज्ञेन संयुज्यमाने कर्तरि चेत् । नन्विह सुञो यज्ञे इत्येवास्तु यज्ञविषयकश्चेत्सुनोत्यर्थ इति व्याख्यायां सुरां सुनोतीत्यादेर्व्यावर्तयितुं शक्यत्वात् । अत्राहुः–संयोगग्रहणं प्रधानकर्तृसम्प्रत्ययार्थं तेन यजमानादन्यत्र न भवतीति । एवं चाप्रधाने कर्तरि 'लटः शतृशानचौ–' इत्यनेनापि न भवति, संयोगग्रहणसामर्थ्यादिति हरदत्तः । यः सुन्वन्तमवतीत्यादीनामेकवचनान्तानां यजमानपरत्वसंभवेऽपि बहुवचनान्तानां तु न संभवति । एकस्मिन्यागे एकस्यैव यजमानत्वादित्याशङ्क्य यागविशेषे तु संभवतीति दर्शयितुमुदाहरति **सर्वे सुन्वन्त इत्यादि** । सत्रयागे हि बहवो यजमानास्त एव ऋत्विजां कर्म सोमाभिषवणं कुर्वन्तीति सुन्वन्त इत्यादिबहुवचनान्तस्यापि यजमानपरत्वं संभवतीति भावः । **अर्हः** । प्रशंसायां किम्, अर्हति चौरो वधम् । **आ क्वेः** । शीलादीनां त्रयाणां विशेषणं समर्थयितुं निर्दिष्टैस्त्रिभिस्तच्छब्दैः प्रकृतिभूतधात्वर्थो निर्दिश्यते । **क्विपमभिव्याप्येति** । 'भ्राजभासधु-

वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु बोध्याः। ३११५ तृन् (३-२-१३५) कर्ता कटम्। ३११६ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्। (३-२-१३६) अलंकरिष्णुरित्यादि। ३११७ णेश्छन्दसि। (३-२-१३७) 'वीरुधः पारयिष्णवः'।

लिकाः प्रत्ययाः प्रायेण सोपसर्गेभ्यो नेति 'आढ्यसुभग-' इति सूत्रे भाष्ये स्पष्टम्। तच्छीलः तत्स्वभावः, फलमनपेक्ष्य स्वभावादेव प्रवर्तमान इति यावत्। स धर्मो यस्य स तद्धर्मा। स्वधर्मोऽयमिति प्रवर्तमानः। तस्य धात्वर्थस्य साधुकर्ता तत्साधुकारी। **तृन्।** धातोस्तृन्प्रत्ययः स्यात् तच्छीलादिषु कर्तृषु। तच्छीले उदाहरति **कर्ता कटमिति।** कटकरणक्रियाशील इत्यर्थः। 'न लोक-' इति षष्ठीनिषेधः, 'न लोक-' इति सूत्रे तृन्नित्यनेन 'लटः शतृ-' इत्यारभ्य एतत्सूत्रस्थनकारेण प्रत्याहाराश्रयणात्। तद्धर्मणि यथा—मुण्डयितारः श्राविष्ठायना भवन्ति ऊढां वधूम्। श्राविष्ठायना नाम देशविशेषीया वधूमुण्डनं स्वधर्म इत्यनुष्ठातार इत्यर्थः। तत्साधुकारिणि कर्ता कटमित्येवोदाहरणम्। कटं साधु करोतीत्यर्थः। **अलंकृञ्।** अलंकृञ्, निराकृञ्, जन,उत्पच,उत्पत,उन्मद, रुचि,अपत्रप, वृतु, वृधु,सह,चर एषां द्वादशानां द्वन्द्वात्पञ्चमी। एभ्यः तच्छीलादिषु कर्तृषु इष्णुच् स्यात्। **इत्यादीति।** निराकरिष्णुः। प्रजनिष्णुः। उत्पचिष्णुः। उत्पतिष्णुः। उन्मदिष्णुः। रोचिष्णुः। अपत्रपिष्णुः। वर्तिष्णुः। वर्धिष्णुः। सहिष्णुः। चरिष्णुः। **णेश्छन्दसि।** णयन्ताद्धातोरिष्णुच् स्यात् छन्दसीत्यर्थः। **पारयिष्णव इति।** पॄधातोर्ण्यन्तादिष्णुचि णेर्लोपं बाधित्वा 'अयामन्ताल्वाय्य-' इत्यय्। इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम्।

विद्युतोर्जि-' इति वक्ष्यमाणमिति शेषः। **कर्ता कटानिति।** 'न लोकाव्यय-' इति षष्ठीनिषेधः। **अलंकृञ्।** कृञिति डुकृञ् करण इत्यस्यैव ग्रहणं न तु कृञ् हिंसायामित्यस्य, 'प्रसिद्धाप्रसिद्धयोः प्रसिद्धस्यैव ग्रहणम्' इति न्यायात्। निराङ्पूर्वोऽपि कृञ् स एव। प्रपूर्वो जनी प्रादुर्भावे। इह डुपचष् पाके, पतॢ गतौ, मदी हर्षे, त्रयोऽपि उत्पूर्वाः पठ्यन्ते। तत्र उदः पचपतमद इत्येव वक्तव्ये प्रत्येकमुत्पूर्वस्य पाठ उपसर्गान्तरनिवृत्त्यर्थस्तेन समुत्पतिष्णुरित्यादि न भवतीत्याहुः। रुच दीप्तौ अपपूर्वः, त्रपूष् लज्जायाम्, वृतु वर्तने, वृधु वृद्धौ, षह मर्षणे,, चर गताविन्यादीति। आदिशब्दग्राह्यास्तु निराकरिष्णुः, प्रजनिष्णुः, उत्पचिष्णुः,उत्पतिष्णुः उन्मदिष्णुः इति। 'उत्पतिष्णुसहिष्णू च चेरतुः खरदूषणौ' इति भट्टिः। कालिदासोऽप्याह 'एलानामुत्पतिष्णवः' इति। केचित्तु पत इति स्थाने दान्तं सूत्रे पठित्वा पद गतावित्यस्मात्प्रत्ययमाहुः। उन्मदिष्णुः, रोचिष्णुः, अपत्रपिष्णु, वर्तिष्णुः,सहिष्णुः, चरिष्णुः **पार-**

१—कटमिति मूलपाठस्तु बालमनोरमानुरोधेन।

३११८ भुवश्च। (३-२-१३८) छन्दसीत्येव। भविष्णुः। कथं तर्हि 'जगत्प्रभोरप्रभविष्णु वैष्णवम्' इति—निरङ्कुशाः कवयः। चकारोऽनुक्तसमुच्चयार्थः, भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद्भाष्ये दृष्टम्। ३११९ ग्लाजिस्थश्च ग्स्नुः। (३-२-१३९) छन्दसीति निवृत्तम्। गिदयं न तु कित्, तेन स्थ ईत्वं न। ग्लास्नुः, गित्त्वान्न गुणः। जिष्णुः। स्थास्नुः। चाद्भुवः, 'श्र्युकः किति' (सू २३८१) इत्यत्र गकारप्रश्लेषान्नेट्, भूष्णुः। 'दंशेश्छन्दस्युपसंख्यानम्' (वा २१२६)। 'दङ्क्ष्णवः पशवः'। ३१२० त्रसिगृधिधृषिक्षिपेः क्नुः। (३-२-१४०) त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः। ३१२१ शमित्यष्टाभ्यो घिनुण्। (३-२-१४१) उकार उच्चारणार्थ

भुवश्च। छन्दसीत्येवेति। भूधातोरिष्णुच् स्यात् तच्छीलादिषु छन्दसीत्यर्थः। अण्यन्तार्थ आरम्भः। ग्लाजिस्थश्च। निवृत्तमिति। व्याख्यानादिति भावः। चाद् भुव इत्यनुकृष्यते। ग्ला, जि, स्था एषां द्वन्द्वात्पञ्चमी। ग्ला, जि, स्था, भू इत्येभ्यः क्स्नुः स्यात् तच्छीलादिष्वित्यर्थः। ककार इत्। स्थास्नु इत्यत्र कित्त्वलक्षणं 'घुमास्था–' इतीत्वमाशङ्क्याह गिदयमिति। सूत्रे चर्त्वेन ककारनिर्देश इति भावः। गित्त्वान्न गुण इति। 'क्ङिति च' इत्यत्र गस्य चर्त्वेन ककारान्तरप्रश्लेषादिति भावः। ननु भूष्णुरित्यत्र इट् स्यात्, 'श्र्युकः किति' इति कित एव इण्निषेधात्, अस्य च गित्त्वादित्यत आह श्र्युक इति। प्रश्लेषादिति। चर्त्वेनेति भावः। त्रसिगृधि। तच्छीलादिषु कर्तृष्विति शेषः। त्रस्नुरिति। नेड्वशीति नेट्। गृध्नुः धृष्णुरित्यत्र कित्त्वान्न गुणः। शमित्यष्टाभ्यः। इतिशब्द आदिपर्यायः। शमादयो दिवादौ स्थिताः। तेभ्यः अष्टाभ्यो घिनुण् स्यात् तच्छीलादिष्वित्यर्थः। घित्वमुत्तरसूत्रार्थम्। 'अकर्मकेभ्य एव घिनुण्' इति भाष्यम्।

थिष्णव इति। 'अयामन्ता–' इति णेरय्। नैतदिति। चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः। इत्वं नेति। 'घुमास्था–' इत्यादिना। गित्त्वादिति। 'क्ङिति च' इत्यत्र गकारं प्रश्लिष्य गिति किति ङितीति व्याख्यानादिति भावः। गकारप्रश्लेषादिति। नन्वेवं गकारे चर्त्वस्यासिद्धत्वाद् 'हशि च' इत्युत्वं स्यादिति चेत्। सत्यम्। सौत्रोऽयं निर्देशः। तथा च वार्तिकम्। 'ग्स्नोर्गित्वान्न स्थ ईकारः क्ङितो-रीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यः श्र्युकोऽनिट्त्वं गकोरितो'। दङ्क्ष्णव इति। दंश दशने 'व्रश्च–' इत्यादिना षत्वे 'षढोः कः सि' इति कत्वम्, 'आदेशप्रत्यययोः' इति षत्वम्। 'अनिदितां–' इति नलोपो न, ग्स्नोर्गित्त्वेन प्राप्त्यभावात्। त्रस्नुरिति। 'नेड्वशि–' इति नेट्। शमित्यष्टाभ्यो। इतिशब्द आद्यर्थः।

इति काशिका। अनुबन्ध इति भाष्यम्। तेन शमिनितरा, शमिनीतरा इत्यत्र 'उगितश्च' (सू १८७) इति ह्रस्वविकल्पः। न चैवं शमी शमिनावित्यादौ नुम्प्रसङ्गः, झल्ग्रहणमपकृष्य झलन्तानामेव तद्विधानात्। 'नोदात्तोपदेशस्य' (सू २७६१) इति वृद्धिनिषेधः। शमी। तमी। दमी। श्रमी। भ्रमी। क्षमी। कमी। प्रमादी। उत्पूर्वान्मदेः अलंकृञादिसूत्रेणेष्णुजुक्तः, वासरूपविधिना घिनुणपि। उन्मादी। 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति तु प्रायिकम्।

३१२२ संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसञ्ज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च। (३-२-१४२) घिनुण्स्यात्। संपर्की।

शमिनितरा शमिनीतरेति। शमिन्शब्दात् स्त्रियां नान्तलक्षणङीबन्तात् तरबन्ताट्टाप्। **ह्रस्वविकल्प इति**। भाष्यमते उगित्वाद्ध्रस्वः। काशिकामते तु उगित्त्वाभावान्न ह्रस्वः। न च ह्रस्वाभावे 'तसिलादिषु–' इति पुंवत्त्वं शङ्क्यम्, 'संज्ञापूरण्योश्च' इति निषेधात्। ननु भाष्यरीत्या उगित्त्वाभ्युपगमे शमी शमिनौ इत्यादौ 'उगिदचाम्–' इति नुम् स्यादित्याशङ्क्य निराकरोति **न चैवमिति**। **झल्ग्रहणमपकृष्येति**। 'नपुंसकस्य झलचः' इति उत्तरसूत्रादिति भावः। एतच्च प्रकृतसूत्रे 'युवोरनाकौ' इति सूत्रे च भाष्ये स्पष्टम्। शमादिभ्यो घिनुणि उपधावृद्धिमाशङ्क्याह **नोदात्तेति**। **प्रमादीति**। मान्तत्वाभावान्न वृद्धिनिषेधः। ननु उत्पूर्वान्मदेरुन्मादीति कथं घिनुण्, अलंकृञादिसूत्रे उत्पूर्वान्मदेर्विशिष्य इष्णुचो विधानादित्यत आह **उत्पूर्वादित्यादिना**। ननु कथमत्र तच्छीलिके घिनुणि वासरूपविधिप्रवृत्तिः, ताच्छीलिकेषु वासरूपविधिर्नास्तीति निषेधादित्यत आह **ताच्छीलिकेष्विति**। इयं परिभाषा 'निन्दहिंस–' इत्यादिवद्वयमाणसूत्रे ज्ञापितेति भाष्ये स्पष्टम्। **प्रायिकमिति**। एतच्च 'सूददीपदीक्षश्च' इति दीपग्रहणादिति 'जुचङ्क्रम्यदन्द्रम्य–' इति सूत्रे भाष्ये स्पष्टम्। **संपृचानुरुधाङ्यमाङ्यस**। संपृच, अनुरुध, आङ्यम, आङ्यस, परिसृ, संसृज, परिदेवि, संज्वर, परिक्षिप, परिरट, परिवद, परिदह, परिमुह, दुष, द्विष, द्रुह, दुह, युज, आक्रीड, विविच, त्यज, रज, भज, अतिचर, अपचर, आमुष, अभ्याहन्, एषां सप्तविंशतेः द्वन्द्वात्पञ्चमी। **संपर्कीति**। 'चजोः–' इति कुत्वम्। अनुरोधीत्यादौ लघूपधगुणः। अदुपधेषु

शमिनीतरेत्यत्रेति। अत्र नव्याः—विद्वत्तरेतिवत्तसिलादिष्विति पुंवद्भावेन शमितरेति भाष्यम्। न च उगित्त्वाभ्युपगमस्य फलाभावाद्ध्रस्वविकल्प एव भवतीति वाच्यम्, पाक्षिकह्रस्वेन उगित्करणस्य चरितार्थत्वाद्ध्रस्वाभावपक्षे तु पुंवद्भावस्य दुर्वारत्वादित्याहुः। **संपृचा**। **संपर्कीति**। पृची संपर्के 'चजोः–'इति कुत्वं गुणः।

अनुरोधी। आयामी। आयासी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी। परिराटी। परिवादी। परिदाही। परिमोही। दोषी। द्वेषी। द्रोही। दोही। योगी। आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमोषी। अभ्याघाती। **३१२३ वौ कषलसकत्थस्रम्भः।** (३-२-१४३) विकाषी। विलासी। विकत्थी। विस्रम्भी। **३१२४ अपे च लषः।** (३-२-१४४) चाद्वौ, अपलाषी। विलाषी। **३१२५ प्रे लपसृद्रुमथवदवसः।** (३-२-१४५) प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी। **३१२६ निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्।** (३-२-१४६) पञ्चम्यर्थे प्रथमा। एभ्यो वुञ्स्यात्।

उपधावृद्धिः। **परिदेवीति**। 'देवृ देवने' भ्वादिः। दीव्यतेस्तु णयन्तस्य न ग्रहणम्, लाक्षणिकत्वात्, अणयन्तैः साहचर्याच्च। **अभ्याघातीति**। 'हनस्तोऽचिण्णलोः' इति तत्वम्। 'हो हन्तेः–' इति कुत्वम्। **वौ कषलस**। कष, लस, कत्थ, स्रम्भ एषां द्वन्द्वात्पञ्चमी। एभ्यो घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। **अपे च लषः। चाद्वाविति**। वौ उपपदेऽपीत्यर्थः। अपे वौ च उपपदे लषो घिनुण् इत्यर्थः। ताच्छील्यादिष्वेव। **प्रे लप**। लप, सृ, द्रु, मथ, वद, वस्, एषां षण्णां द्वन्द्वात्पञ्चमी। प्रे उपपदे एभ्यो घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। **निन्दहिंस**। निन्द, हिंस, क्लिश, खाद, विनाश, परिक्षिप, परिरट, परिवादि, व्याभाष, असूय एषां दशानां द्वन्द्वः। **पञ्चम्यर्थे प्रथमेति**। सौत्रं पुंस्त्वमेकवचनं चेति भावः। विनाशेति विपूर्वस्य नशेर्णयन्तस्य भाविना णिलोपेन निर्देशः। शकारादकार उच्चारणार्थः। केचित्तु विनाशीति णयन्तमेव पठन्ति। परिवादीति तु णयन्तमेव। असूयेति कण्ड्वादियगन्तः।

परिदेवीति। देवृ देवने भ्वादिः, णयन्तस्य दीव्यतेस्तु नेह ग्रहणं लाक्षणिकत्वात्। अणयन्तैः साहचर्याच्च। **अभ्याघातीति**। अभ्याङ्पूर्वाद्धन्तेर्हस्य कुत्वेन घः। 'हनस्तोऽचिण्णलोः' इति नस्य तः। 'अत उपधायाः' इति वृद्धिः। **वौ कष**। कष हिंसार्थः। लस श्लेषणक्रीडनयोः, कत्थ श्लाघायाम्, स्रम्भु विश्वासे। **अपे च लषः**। लष कान्तौ। **प्रे लपः**। रप लप व्यक्तायां वाचि। **प्रमाथीति**। मथे विलोडने। **निन्दहिंस**। इह सूत्रे विनाशेति विपूर्वस्य नशेर्णयन्तस्य भाविना णिलोपेन निर्देशः, अकारस्त्वागन्तुकः। केचित्तु विनाशीति णयन्तमेव पठन्ति परिवादीति तु वदेर्णयन्तस्य पाठो निर्विवाद एव। असूयतिः कण्ड्वादियगन्तः। निन्दादीनामसूयान्तानां समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। स्यादेतत्—असूयतेरेव वुञ् विधेयो नेतरेभ्यः, निन्दादीनां ण्वुलैव सिद्धेः। न हि तत्र लित्स्वरनित्स्वरयोर्विशेषोऽस्ति उभयथाप्या-

निन्दकः। हिंसक इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकं तच्छीलादिषु वासरूपन्यायेन तृजादयो नेति। ३१२७ देविक्रुशोश्चोपसर्गे। (३-२-१४७) आदेवकः। आक्रोशकः। उपसर्गे किम्-देवयिता। क्रोष्टा। ३१२८ चलनशब्दार्थादकर्मकाद्युच्। (३-२-१४८) चलनार्थाच्छब्दार्थाच्च युच् स्यात्। चलनः। चोपनः। कम्पनः। शब्दनः। रवणः। अकर्मकात् किम्-पठिता विद्याम्। ३१२९ अनुदात्तेतश्च हलादेः। (३-२-१४९) अकर्मकाद्युच्स्यात्।

इत्यादीति। क्लेशकः, खादकः, विनाशकः, परिक्षेपकः, परिराटकः, परिवादकः, व्याभाषकः, असूयकः। ननु 'असूयो वुञ्' इति असूयतेरेव वुञ्विधीयताम्, न तु निन्दादिभ्योऽपि, तेषां ण्वुलैव सिद्धेः। लित्स्वरञित्स्वरयोस्तु नास्ति विशेषः, उभयथाप्याद्युदात्तत्वात्। असूयतेस्तु ण्वुलि 'लिति' इति प्रत्ययात्पूर्वं ऊकार उदात्तः। वुञि तु ञ्नित्यादिर्नित्यम इति धातोरकार उदात्त इति विशेषः। तस्मादसूयतेरेव वुञ्विधिरिति युक्तमित्यत आह ण्वुला सिद्धे इति। तृजादयो नेतीति। तच्छीलादिषु वासरूपविधिसत्त्वे हि तद्विषये ण्वुलः सरूपतया वुञा नित्यं बाधेऽपि तृजादयः स्युः। अत्र वासरूपविध्यप्रवृत्तौ तु 'तृन्' इति सूत्रेण तच्छीलादिषु तृनि प्राप्ते वुञ्विधिरर्थवान्। अतस्तच्छीलादिषु वासरूपविधिर्न प्रवर्तत इति भावः। इदञ्च प्रायिकम्। तत्फलं तु उत्पूर्वान्मदेरलंकृञादिसूत्रेण इष्णुजुक्तः, वासरूपविधिना घिनुणपीति मूल एवानुपदमुक्तम्। देविक्रुशोः। देवीति चुरादिण्यन्तस्य 'दिवु क्रीडा–' इत्यस्य च ग्रहणम्। उपसर्गे उपपदे देवयतेः क्रुशेश्च तच्छीलादिषु वुञ् स्यादित्यर्थः। चलन। शब्दन इति। 'शब्द शब्दने' चुरादिः। शब्दनं शब्दोच्चारणम्। धात्वर्थोपसंग्रहादकर्मकः। अनुदात्तेतश्च। आदिग्रहणाभावे हलन्तादित्यर्थः स्यात्। ततश्च जुगुप्सन इति न स्यात्। सन्नन्तस्य हलन्तत्वाभावात्। अस्ति चानुदात्तेत्त्वं

युदात्तत्वात्। असूयतेस्तु ण्वुलि 'लिति' इति प्रत्ययात्पूर्वमुदात्तं वुञि तु 'ञ्नित्यादिर्नित्यम्' इत्यादिरुदात्त इति विशेषस्तदाह ण्वुलेति। तृजादयो नेति। नेदं ण्वुल्विषयकमेव ज्ञापकं किंतु सामान्यतः प्रत्ययमात्रविषयकमित्यर्थः। देविक्रुशोः। दीव्यतेर्हेतुमण्ण्यन्तस्य दिवु कूजने इति चुरादिण्यन्तस्य च ग्रहणम्। चलनशब्दार्थाद्। चल कम्पने, चुप मन्दायां गतौ, कपि चलने, शब्द शब्दने चुरादिः, रु शब्दे। चलन इत्यादि 'युवोः–' इत्यनादेशः। अनुदात्तेतश्च हलादेः। ननु सर्वोऽप्यनुदात्तेद् हलन्त एवेति तदन्तविधिं बाधित्वा सामर्थ्याद्धलादिरेव ग्रहीष्यते तत्किमादिग्रहणेनेति चेत्। अत्राहुः—आदिग्रहणाभावे हलन्तादित्यर्थः स्यात्तथाहि सत्येधितेत्यादावतिप्रसङ्गः स्यात्, जुगुप्सत इत्यादि च न सिध्येत्। अस्ति चेहानु-

वर्तनः। वर्धनः। अनुदात्तेतः किम्-भविता। हलादेः किम्-एधिता। अकर्मकात् किम्-वस्त्रिता वस्त्रम्। ३१३० जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः (३-२-१५०) जु इति सौत्रो धातुर्गतौ वेगे च। जवनः। चङ्क्रमणः। दन्द्रमणः। सरणः। पूर्वेण सिद्धे पदग्रहणं 'लषपतपद-' (सू ३१३४) इत्युकञा बाधा मा भूदिति। तेन ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति। तेनालंकृञस्तृन्न। ३१३१ क्रुधमण्डार्थेभ्यश्च। (३-२-१५१) क्रोधनः। रोषणः। मण्डनः। भूषणः। ३१३२ न यः। (३-२-१५२)

सन्नन्तस्य, गुप इत्यनुदात्तेत्त्वस्य केवले प्रयोजनाभावेन सन्नन्तार्थत्वात्। **जुचङ्क्रम्यदन्द्रम्य**। जु, चङ्क्रम्य, दन्द्रम्य, सृ, गृधि, ज्वल, शुच, लष, पत, पद एषां दशानां द्वन्द्वात्पञ्चमी। एभ्यः तच्छीलादिषु युच् स्यादित्यर्थः। धातुपाठे जुधातोरदर्शनादाह **जु इति सौत्र इति। चङ्क्रमण इति।** यङन्ताद्युच्। 'यस्य हलः' इति यकारलोपः, अतो लोपः। एवं दन्द्रमणः, सरणः, गर्धनः, ज्वलनः, शोचनः, लषणः, पतनः, पदन इत्यप्युदाहार्यम्। **पूर्वेणेति।** 'अनुदात्तेतश्च हलादेः' इत्यनेनेत्यर्थः। **तेनेति।** उकञ् ह्ययं तच्छीलाधिकारस्थः। तत्र वासरूपविधिनैव उकञा 'अनुदात्तेतश्च हलादेः' इति विहितस्य पदेर्युचो बाधो न भविष्यतीति 'जुचङ्क्रम्य-' इति युज्विधिरनर्थकः स्यात्। अतस्ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्ति इति विज्ञायते इत्यर्थः। 'निन्दहिंस-' इति सूत्रे तच्छीलादिषु वासरूपविधिना तृजादयो नेति ज्ञापितम्। इह तु ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति ज्ञाप्यते इति न पौनरुक्त्यम्। **तृन्नेति।** अलम्पूर्वात् कृञः अलंकृञित्यादिसूत्रविहितेन तच्छीलाधिकारस्थेन इष्णुचा 'तृन्' इति सामान्यविहितः तच्छीलाधिकारस्थो बाध्यत इत्यर्थः। **क्रुधमण्डार्थेभ्यश्च।** 'क्रुध कोपे' 'मडि भूषायाम्' एतदर्थेभ्यो धातुभ्यो युच् स्यात्, तच्छीलादिष्वित्यर्थः। **न यः।** य इति पञ्चम्यन्तं धातुविशेषणम्। तदन्तविधिः,

---

दात्तेत्त्वं गुपादिष्ववयवेष्वचरितार्थस्यानुबन्धस्य समुदायविशेषकत्वादिति दिक्। **जुचङ्क्रम्य।** क्रमिद्रमी यङन्तौ, क्रमु पादविक्षेपे, द्रम हम्म मीमृ गतौ। **पूर्वेणेति।** 'अनुदात्तेतश्च-' इत्यनेन। इह पदिग्रहणं सकर्मकार्थमिति वृत्तिकृतोक्तम्। भाष्ये तु अनभिधानादेव सकर्मकान्न भविष्यतीत्युक्तत्वात्। ज्ञापनार्थमेव तदित्याशयेनाह **बाधा माभूदित्यादि। परस्परमिति।** निन्दहिंसइत्यादिसूत्रे हि तच्छीलादिषु वासरूपविधानात् तृजादयो नेति ज्ञापितमिह तु ताच्छीलिकेषु परस्परं नेति ज्ञापितमिति विवेक इति भावः। **क्रुध।** क्रुध क्रोधे, रुष रोषे, मडि भूषायाम्, भूष अलंकारे। **न यः।** अय वय पय मय चय तय णय गताविति पठितस्य नयतेर्नायं निर्देशः, अनुदात्तेत्त्वादेव युचः

यकारान्तात्युज्न स्यात्। क्नयिता क्ष्मायिता। ३१३३ सूददीपदीक्षश्च। (३-२-१५३) युज्न स्यात्। सूदिता। दीपिता। दीक्षिता। 'नमिकम्पि-' (सू ३१४७) इति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति प्रायिकमिति। तेन कम्रा कमना युवतिः। कम्प्रा कम्पना शाखा। यदि सूदेर्युज्न, कथं मधुसूदनः-नन्द्यादिः। ३१३४ लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। (३-२-१५४) लाषुकः। पातुक

तदाह यकारान्तादिति। क्नूयिता। क्ष्मायितेति। 'क्नूयी शब्दे उन्दने च' 'क्ष्मायी विधूनने'। 'अनुदात्तेतश्च हलादेः' इति युच् निषिध्यते। तृन्नेव भवति। सूददीप। सूद, दीप, दीक्ष, एषां द्वन्द्वात्पञ्चमी। युज्नेति। शेषपूरणमिदम्। 'अनुदात्तेतश्च-' इति प्राप्तो युच् प्रतिषिध्यते। नन्विह दीपग्रहणं व्यर्थम्, 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति विशेषविहितेन रप्रत्ययेन युचो बाधसिद्धेः। न च वासरूपविधिना तद्बाधः शङ्क्यः, ताच्छीलिकेषु वासरूपविधेः प्रतिषेधादित्यत आह। नमिकम्पीति रेणेति। रप्रत्ययेनेत्यर्थः। प्रायिकमिति। तथा चात्र वासरूपविधिना ताच्छीलिकेनापि रप्रत्ययेन युचो बाधासंभवाद् इह दीपेर्युचो निषेधोऽर्थवानिति भावः। तेनेति। ताच्छीलिकेऽपि क्वचिद्वासरूपविधेः सत्त्वादित्यर्थः। कम्रा, कमनेति। इच्छाशीलेत्यर्थः। 'अनुदात्तेतश्च-' इति युचः 'नमिकम्पि-' इति रेण पक्षे बाध इति भावः। कम्प्रा कम्पनेति। चलनशीलेत्यर्थः। अत्रापि 'नमिकम्पि-' इति रेण युचः पक्षे बाध इति भावः। आक्षिपति यदीति। यदि 'सूददीपदीक्षश्च' इति सूदेर्युच्प्रतिषिध्यते तदा मधुसूदन इति कथमित्यन्वयः। समाधत्ते नन्द्यादिरिति। सूदिरिति शेषः। तथा च 'नन्दिग्रहि-' इति ल्युप्रत्यय इति भावः। लषपत। एभ्यो

सिद्धत्वात्किंतु नेति पृथक् पदमिति मत्वाह यकारान्तादिति। क्नूयिता। क्ष्मायितेति। क्नूयी शब्दे उन्दे च, क्ष्मायी विधूनने। सूददीप। सूद क्षरणे, दीपी दीप्तौ, दीक्ष मौण्ड्येज्यादौ। ताच्छीलिकेष्विति। परस्परमिति शेषः। प्रायिकमिति। न केवलं यथाश्रुतभाष्यमवलम्ब्य युज्रयोरेव समावेश इति मन्तव्यं किंतु प्रायिकत्व एव भाष्यस्य तात्पर्यम्। तेन गमेः 'लषपतपद-' इत्युकञ्विषये तृन्नपि। गन्ता। गामुकः। तथा 'वौ कषलस-' इति घिनुणिविषये युजपि। विकत्थी विकत्थन इत्यादि सिध्यतीति भावः। जल्प। जल्प व्यक्तायां वाचि, भिक्ष भिक्षायां लाभे अलाभे च, कुट्ट छेदने, लुण्ट स्तेये, चौरादिकाविमौ। अत्र व्याचख्युः-- जल्पेः 'चलनशब्दार्थात्-' इति भिक्षेः 'अनुदात्तेतश्च-' इति युचि प्राप्ते कुट्टलुण्टयोः 'णेश्छन्दसि' इति इष्णुचि प्राप्ते वृङस्तु 'आदृगमहनजन-' इति किकिनोः प्राप्तयोरयं

इत्यादि । ३१३५ जल्पभिक्षकुट्टलुण्टवृङः षाकन् । (३-२-१५५) जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । वराकी । ३१३६ प्रजोरिनिः । (३-२-१५६) प्रजवी प्रजविनौ प्रजविनः । ३१३७ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । (३-२-१५७) जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी । ३१३८ स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् । (३-२-१५८) स्पृहया-

---

दशभ्य उकञ् स्यात् तच्छीलादिष्वर्थेषु । **इत्यादीति** । पादुकः । आतो युक्, स्थायुकः । भावुकः । वर्षुकः । घातुकः 'हनस्तः–' इति तत्वम् । 'हो हन्तेः–' इति कुत्वम् । कामुकः । गामुकः । शारुकः । **जल्पभिक्ष** । एभ्यः पञ्चभ्यः षाकन् स्यात् तच्छीलादिष्वित्यर्थः । षकाविती । स्त्रियां षित्त्वान् ङीष् । जल्पाक इत्यादि । **प्रजोरिनिः** । जुः सौत्रो धातुः । प्रपूर्वादस्माद् इनिप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः । नकारादिकार उच्चारणार्थः । **जिदृक्षि** । जि, दृ, क्षि, विश्रि, इण्, वम, अव्यथ, अभ्यम, परिभू, प्रसू, एषां दशानां द्वन्द्वः । जि जये, जि अभिभवे । दृङ् आदरे । क्षि क्षये, क्षि निवासगत्योः । श्रिञ् सेवायां विपूर्वः । इण् गतौ टुवमु उद्गिरणे । व्यथ भयसंचलनयोः नञ्पूर्वः । निपातनाद् नञो धातुना समासे 'न लोपो नञः' इति नकारलोपः । अम गत्यादिषु अभिपूर्वः । भू सत्तायां परिपूर्वः । षू प्रेरणे प्रपूर्वः । एभ्य इनिः स्यात्तच्छीलादिष्वित्यर्थः । सूतिसूयत्योस्तु सानुबन्धकत्वाद् नेह ग्रहणम् । **स्पृहिगृहि** । स्पृहि, गृहि, पति, दयि, निद्रा, तन्द्रा, श्रद्धा, एभ्यः सप्तभ्य आलुच् स्यात्तच्छीलादिष्वित्यर्थः । **स्पृहयालुरिति** । स्पृहधातोरदन्तादालुच् । 'अयामन्त–' इति णेरय णिलोपापवादः । अल्लोपस्य स्थानिवत्त्वान्न लघूपधगुणः । एवं गृहयालुः । पतयालुरित्यत्र तु अल्लोपस्य स्थानिवत्त्वान्नोपधावृद्धिः । **निद्रालुरिति** । 'द्रा कुत्सायां गतौ' निपूर्वादालुच् ।

विधिरिति । षो ङीषर्थ इत्याह **वराकीति** । **प्रजो** । जु इति सौत्रो गत्यर्थः । **जिदृक्षि** । जि जये, जि अभिभवे, दृङ् आदरे, क्षि क्षये, क्षि निवासगत्योः, श्रिञ् सेवायां विपूर्वः, व्यथ भयसंचलनयोर्नञ्पूर्वः । निपातनान्नञो धातुना समासे नलोपे ततः प्रत्ययः । अम गत्यादिषु अभिपूर्वः । **प्रसवीति** । षू प्रेरणे, अस्मादिनिः । षूङ् प्राणिगर्भविमोचने, षूङ् प्राणिप्रसवे, इमौ न गृह्येते सानुबन्धत्वात् । 'जिदृक्षि–' इत्यत्रैव प्रजुं पठित्वा पूर्वसूत्रं त्यक्तुमुचितम् । एवं हि पृथग्विभक्तिश्चकारश्च मास्त्विति सुवचम् । **स्पृह** । स्पृह ईप्सायाम्, गृहू ग्रहणे, पत गतौ । **अयश्चुरादाविति** । तेन णेरयादेशेन रूपसिद्धिरिति भावः । यद्येवं णिचि उपधागुणवृद्धी स्यातामत आह

स्वयस्तुरादावदन्ताः । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तत्पूर्वो द्रा, तदो नान्तत्वं निपात्यते । तन्द्रालुः । श्रद्धालुः । **'शीङो वाच्यः'** (वा २१४०) शयालुः । **३१३९ दाधेट्सिशदसदो रुः** । (३-२-१५९) दारुः । धारुः । सेरुः । शद्रुः । सद्रुः । **३१४० सृघस्यदः क्मरच्** । (३-२-१६०) सृमरः । घस्मरः । अद्मरः । **३१४१ भञ्जभासमिदो घुरच्** । (३-२-१६१) भङ्गुरः । भासुरः । मेदुरः । **३१४२ विदिभिदिच्छिदेः कुरच्** । (३-२-१६२) विदुरः । भिदुरम् । छिदुरम् । **३१४३ इण्नशिजिसर्तिभ्यः क्वरप्** । (३-२-१६३) इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः । **३१४४ गत्वरश्च** । (३-२-१६४) गमेरनुनासिकलोपोऽपि निपात्यते । गत्वरी ।

तत्पूर्वो द्रेति । तच्छब्दपूर्वो द्राधातुः तन्द्रेत्यनेन गृह्यत इत्यर्थः । **श्रद्धालुरिति** । श्रदित्यव्ययम्, तत्पूर्वाद् धाधातोरालुच् । **शीङो वाच्य इति** । आलुजिति शेषः । **दाधेट्** । दा, धेट्, सि, शद्, सद् एषां द्वन्द्वात्पञ्चमी । एभ्यो रुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः । **सृघस्यदः** । सृ, घसि, अद् एषां द्वन्द्वात्पञ्चमी । घसिः प्रकृत्यन्तरम् । **भञ्जभास** । भञ्ज, भास, मिद्, एषां द्वन्द्वात् पञ्चमी । एभ्यः घुरच् स्यात् तच्छीलादिष्वित्यर्थः । घचावितौ । **भङ्गुर इति** । 'चजोः–' इति कुत्वम् । **विदिभिदि** । तच्छीलादिष्वित्येव । विदेर्ज्ञानार्थस्यैव ग्रहणम्, न तु लाभार्थस्य, व्याख्यानादित्याहुः । विदुर इत्यादौ कित्वान्न लघूपधगुणः । **इण्नशिजि** । इण्, नशि, जि, सृ एभ्यः क्वरप् स्यात् तच्छीलादिष्वित्यर्थः । कित्वान्न गुणः । पित्वं तु तुगर्थम् । **गत्वरश्च** । **गमेरिति** । गमेः क्वरप् अनुनासिकलोपश्च निपात्यत इत्यर्थः । झलादिप्रत्ययपरकत्वाभावादनुनासिकलोपस्याप्राप्तिः । पित्त्वात्तुक् ।

अदन्ता इति । ततश्चाल्लोपस्य स्थानिवत्त्वात्तदभाव इति भावः । **तत्पूर्व इति** । तच्छब्दस्य समासोऽपि निपातनादिति बोध्यम् । डुधाञ् श्रत्पूर्वः । श्रद्धालुः । धेटस्तु नेदं रूपम् । श्रत्पूर्वस्य तस्य प्रयोगाभावादिति व्याचख्युः । कथं कृपालुः, स्पर्धालुः इति कृपां स्पर्धां च लातीति विग्रहे मृगय्वादित्वात्कुः । **दाधेट्** । डुदाञ्दोदेङां त्रयाणामत्र ग्रहणं न तु दाप्दैपोरित्याहुः । **भङ्गुर इति** । 'चजोः–' इति कुत्वम् । अभिधानस्वभावाद्भञ्जेः कर्मकर्तर्येवेत्याहुः । **विदिभिदि** । विदेर्ज्ञानार्थस्यैव ग्रहणं न तु लाभार्थस्य व्याख्यानात् । **छिदुरमिति** । कर्मकर्तरि प्रत्यय इति वृत्तिः, नैतद्भाष्ये दृष्टम् । तथा च माघो मुख्येकर्तरि प्रायुङ्क्त –'प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयाऽदुरयाचितमङ्गना' इति । इह अदुरिति च्छेदः । **इत्वरः** । **इत्वरीति** । इण् गतौ 'ह्रस्वस्य पिति–' इति तुक् कित्वाद् गुणाभावः । 'टिड्ढा–' इत्यादिना

३१४५ जागुरूकः। (३-२-१६५) जागर्तेरूकः स्यात्। जागरूकः। ३१४६ यजजपदशां यङः। (३-२-१६६) एभ्यो यङन्तेभ्य ऊकः स्यात्। दशामिति भाविना नलोपेन निर्देशः। यायजूकः। जञ्जपूकः। दन्दशूकः। ३१४७ नमिकम्पिस्म्यजसकमहिंसदीपो रः। (३-२-१६७) नम्रः। कम्प्रः। स्मेरः। असिर्नञ्पूर्वः क्रियासातत्ये वर्तते। अजस्रम्, सन्ततमित्यर्थः। कम्रः। हिंस्रः। दीप्रः। ३१४८ सनाशंसभिक्ष उः। (३-२-१६८) चिकीर्षुः। आशंसुः। भिक्षुः। ३१४९ विन्दुरिच्छुः। (३-२-१६९) वेत्तेर्नुम् इषेश्छत्वं

गत्वरीति। 'टिड्ढ–' इति ङीप्। जागुरूकः। जागृ इत्यस्य जागुरिति पञ्चम्यन्तं पदम्, तदाह जागर्तेरिति तच्छीलादिष्वित्येव। जागरूक इति। ऋकारस्य गुणः, परत्वम्। सिद्धरूपं तु न निपातितम्, उत्तरसूत्रे ऊक इत्यननुवृत्तिप्रसङ्गात्। यजजपदशां यङः। यज, जप, दश एषां त्रयाणां द्वन्द्वः, पञ्चम्यर्थे षष्ठी। तदाह एभ्य इति। तच्छीलादिष्वित्येव। ननु दंशेर्नोपधत्वात् कथं दशामिति निर्देश इत्यत आह भाविनेति। ऊके कृते सति भविष्यतो नलोपस्यात्र निर्देश इति यावत्। यायजूक इति। 'यस्य हलः' इति यलोपः। 'अतो लोपः' 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः। जञ्जपूक इति। 'जपजभदहदशभञ्जपशां च' इत्यभ्यासस्य नुक्। एवं दन्दशूकः। नमिकम्पि। नमि, कम्पि, स्मि, अजस्, कम, हिंस, दीप् एषां द्वन्द्वात्पञ्चम्येकवचनम्। एभ्यः सप्तभ्यो रप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः। अजस्धातोः धातुपाठे अदर्शनादाह जसिर्नञ्पूर्व इति। 'जसु मोक्षणे' अयं नञ्पूर्वः शक्तिस्वभावात् क्रियासातत्ये वर्तते इत्यर्थः। निपातनाद्धातुना नञः समासे 'नलोपो नञः' इति नलोपः। सनाशंस। सन्, आशंस, भिक्ष् एषां त्रयाणां द्वन्द्वात्पञ्चम्येकवचनम्। सनिति सन्प्रत्ययान्तं गृह्यते। 'षणु दाने, षण संभक्तौ' इत्यनयोस्तु न ग्रहणम्। गर्गादिषु विजिगीषुशब्दपाठाल्लिङ्गात्। एभ्य उप्रत्ययः स्यात्

स्त्रियां ङीप्। जागुरूकः। जागुरिति पञ्चम्यन्तं तद्व्याचष्टे जागर्तेरिति। जागरूक इति सिद्धरूपमेव तु न निपातितम्। उत्तरसूत्रे ऊकस्यानुवृत्तिप्रसङ्गात्। यजजप। यायजूक इति। यजेर्यङि द्वित्वादि, 'दीर्घोऽकितः' इत्यभ्यासदीर्घः, अतो लोपे 'यस्य हलः' इति यलोपः। जञ्जपूक इत्यादि। 'जपजभदहदश–' इत्यादिना नुक्। वावदूकशब्दस्तु 'उलूकादयश्च' इत्यत्र वक्ष्यते। माधवस्त्वाह कुर्वादिगणे वावदूक इति पाठादेव यङन्ताद्वदेरूकप्रत्यय इति। सनाशंस। सनिति प्रत्ययग्रहणात्तदन्तग्रहणम्। षणु दाने। षण संभक्ताविति धात्वोस्तु नेह ग्रहणम्। गर्गादिषु विजिगीषुशब्दस्य पाठात्। आशंसेत्याङः संसु इच्छायामित्ययं गृह्यते न शंसु स्तुता-

च निपात्यते। वेत्ति तच्छीलो विन्दुः। इच्छति इच्छुः। ३१५० क्याच्छन्दसि। (३-२-१७०) 'देवाञ्जिगाति सुम्नयुः'। ३१५१ आदृगमहनजनः किकिनौ लिट् च। (३-२-१७१) आदन्तादृदन्ताद्गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिड्वत्। पपिः सोमम्। ददिर्गाः। बभ्रिर्वज्रम्। जग्मिर्युवा।

तच्छीलादिष्वित्यर्थः। **आशंसुरिति**। 'आङः शसि इच्छायाम्' इत्यस्मादुः। **विन्दुरिच्छुः**। **वेत्तेरिति**। 'विद ज्ञाने' इत्यास्यादुप्रत्यये प्रकृतेर्नुमागमः 'इषु इच्छायाम्' इत्यस्मादुप्रत्यये षकारस्य छत्वं च निपात्यत इत्यर्थः। **वेत्तीति**। धातुप्रदर्शनम्। **तच्छील इति**। वेदनशील इत्यर्थः। **इच्छतीति**। 'इषु इच्छायाम्' इति धातुप्रदर्शनम्। **इच्छुरिति**। एषणशील इत्यर्थः। **क्याच्छन्दसि**। क्यप्रत्ययान्तादुप्रत्ययः स्यात् तच्छीलादिषु छन्दसीत्यर्थः। **सुम्नयुरिति**। सुम्नं सुखम्। तदात्मन इच्छतीत्यर्थे सुम्नशब्दात् क्यच्। 'न च्छन्दस्यपुत्रस्य' इति निषेधात् 'क्यचि च' इति ईत्वम् 'अकृत्सार्व–' इति दीर्घश्च न। सुम्नय इति क्यजन्तादुप्रत्ययः, आतो लोपः। **आदृगम**। आत्, ऋ, गम, हन, जन्, एषां द्वन्द्वात्पञ्चमी। कि किन् अनयोर्द्वन्द्वः। लिट् चेति व्याचष्टे **तौ च लिड्वदिति**। तच्छीलादिष्वित्येव। **पपिरिति**। पाधातोः किः, द्वित्वादि, आल्लोपः। **ददिरिति**। दाधातोः किः, द्वित्वादि। **बभ्रिर्वज्रमिति**। भृञः किः, द्वित्वादि।

विति, आङा सह निर्देशात्। **विन्दुरिच्छुः**। विद ज्ञाने इत्यस्यैव ग्रहणं नेतरेषाम्। एवमिषेरपि इच्छार्थकस्यैव ग्रहणं नत्विष गतौ, इष आभीक्ष्ण्ये इत्यनयोः, अनभिधानान्निपातनाद्वेति भावः। बिन्दुशब्दस्तु पवर्गीयादिः 'बिदि' अवयवे अस्मान्मृगय्वादित्वात्कुप्रत्यये बोध्यः। **क्याच्छन्दसि**। क्य इति क्यच्क्यङ्क्यषां सामान्यग्रहणम्। क्यान्ताद्धातोश्छन्दसि विषये तच्छीलादिषु उप्रत्ययो भवतीति काशिका, कियः क्य इति व्याख्यानात्कण्ड्वादियगपि गृह्यते। तेन 'तुरण्यवोऽङ्गिरसो नक्षन्त', 'सपर्येम सपर्यवः' 'यमस्य योनौ शकुनं भुरण्युम्' इत्यादि सिद्धम्। तुरण त्वरायाम्, सपर पूजायाम्, भुरण धारणपोषणयोरित्येते कण्ड्वादिषु पठिताः अथ कथं 'सन्तः प्रणयिवाक्यानि गृह्णन्ति ह्यनसूयवः' इति भट्टपादाः। मृगय्वादिषु असूयुशब्दो द्रष्टव्य इति हरदत्तः। **सुम्नयुरिति**। सुम्नशब्दात्क्यचि तदन्तादुः। 'न छन्दस्यपुत्रस्य' इति निषेधात् 'क्यचि च' इति ईत्वम् 'अकृत्सार्व–' इति दीर्घश्च न भवति। **आदृ**। 'ऋदोरप्' इतिवदादिति दकारो मुखसुखार्थो न त्वयं तकारस्तेन तात्परत्वाभावाद् इत्यनेनैव दीर्घोऽपि गृह्यते। तेन ततुरिर्जुगुरिः। तॄ प्लवनतरणयोरित्यस्य गॄ निगरणे इत्यस्य च 'बहुलं छन्दसि–'इत्युत्वं रूपमिति प्राञ्चः। वस्तुतस्तु आदित्यादिप्रकृतिविशेषणमुदाहरणं प्रपञ्चमात्रम्। किकिनौ लिट्चेत्येतावन्मात्रमेव विवक्षितम्। तथा च

'जघ्निर्वृत्रममित्रियम्' । जज्ञिः । 'भाषायां धान्कृसृगमिजनिनमिभ्यः' (वा २१४४)। दधिः । चक्रिः । सस्रिः । जग्मिः । जज्ञिः । नेमिः । 'सासहिवावहिचाचलिपापतीनामुपसंख्यानम्' (वा २१४४)। यङन्तेभ्यः सहत्यादिभ्यः किकिनौ पतेर्नीगभावश्च निपात्यते । ३१५२ स्वपितृषोर्नजिङ् । (३-२-१७२) स्वप्नक् । तृष्णक् तृष्णजौ तृष्णजः । 'धृषेश्चेति वाच्यम्' इति काशिकादौ । धृष्णक् । ३१५३ शॄवन्द्योरारुः । (३-२-१७३) शरारुः । वन्दारुः । ३१५४

जघ्निरिति । हनः किः, द्वित्वादि । 'गमहन–' इत्युपधालोपः । 'हो हन्तेः–' इति कुत्वम् । जज्ञिरिति । जनेः किः, द्वित्वादि । एवं किन्यपि बोध्यम् । स्वरे विशेषः । छान्दसमप्येतत्सूत्रद्वयं भाषायामित्यादिवक्ष्यमाणवार्तिकविवेचनाय इहोपन्यस्तम् । भाषायामिति । वार्तिकमिदम् । धाञ्, कृ, सृ, गमि, जनि, नमि एभ्यः षड्भ्यः किकिनौ, तौ च लिड्वदिति वक्तव्यमित्यर्थः । दधिरित्यादि । किकिनोः कृतयोः द्वित्वादि यथासंभवं ज्ञेयम् । नेमिरिति । नमेः किः द्वित्वम्, एत्वाभ्यासलोपौ । सासहीति । सहेर्यङि द्वित्वादौ 'दीर्घोऽकितः' इति दीर्घे, किकिनोः कृतयोः 'यस्य हलः' इति यकारलोपे अतो लोपे सासहीति निर्देशः । एवं वहेः चलेः पतेश्च यङन्तस्य किकिनन्तस्य निर्देशः । एषां निपातनस्य उपसंख्यानमित्यर्थः । तदाह यङन्तेभ्यः सहत्यादिभ्य इति । नीगभाव इति । 'नीग्वञ्चु–' इति प्राप्तस्य नीगागमस्याभाव इत्यर्थः । स्वपितृषोर्नजिङ् । पञ्चम्यर्थे षष्ठी । स्वपेः तृषेश्च नजिङ् स्यात् तच्छीलादिष्वित्यर्थः । जकारादिकार उच्चारणार्थः । ङकार इत् । स्वप्नगिति । स्वपनशील इत्यर्थः । स्वप्नजौ स्वप्नजः । एवं तृष्णक्, तर्षणशील इत्यर्थः । धृषेश्चेति । नजिङिति शेषः । काशिकादाविति । भाष्ये तु न दृश्यते इति भावः । शॄवन्द्योरारुः । पञ्चम्यर्थे षष्ठी । 'शॄ हिंसायाम्' 'वदि अभिवादनस्तुत्योः'

वार्तिकम् 'किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' इति । उदाहृतं च भाष्ये सेदिर्नेमिरित्यादि । एवं स्थिते आदिति तपरकरणेऽपि न क्षतिरिति ध्वनयन्नाह आदन्तादृदन्तादिति । यज्ञिर्वज्रमिति । 'न लोका–' इति षष्ठीनिषेधाद् द्वितीया । किकिनोः स्थाने तिबादयो न लिड्वदित्यतिदेशेन स्वरूपाबाधेनैव कार्यातिदेशात् । छान्दससूत्रद्वयोपन्यसनं भाषायां धाञित्यादिवार्तिकविषयविवेचनार्थम् । इह च वार्तिके गमिर्यद्यपि न दृश्यते तथापि धातुवृत्तौ कचिद्वृत्तिपुस्तके च दर्शनादुपन्यस्तः । जग्मिरिति । 'गमहनजन–' इत्युपधालोपः । जघ्निरिति । 'अभ्यासाच्च' इति कुत्वम् । दधिरिति । आतो लोपः । नेमिरिति । एत्वाभ्यासलोपौ । सासहीत्यादि । यङोऽतोलोपे यलोपः । अभ्यासदीर्घः । नीगभावश्चेति ।

भियः क्रुक्लुकनौ। (३-२-१७४) भीरुः। भीलुकः। 'क्रुकन्नपि वाच्यः' (वा २१४५)। भीरुकः। ३१५५ स्थेशभासपिसकसो वरच्। (३-२-१७५) स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः। ३१५६ यश्च यङः। (३-२-१७६) यातेर्यङन्ताद्वरच् स्यात्। 'अतो लोपः' (सू २३०८) तस्य 'अचः परस्मिन्-' (सू ५०) इति स्थानिवद्भावे प्राप्ते 'न पदान्त-' (सू ५१) इति सूत्रेण यलोपं प्रति स्थानिवद्भावनिषेधात् 'लोपो व्योः-' (सू ८७३) इति यकारलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्य आतो लोपे प्राप्ते 'वरे लुप्तं न स्थानिवत्'। यायावरः। ३१५७ भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः

आभ्याम् आरुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः। **भियः**। भीधातोः क्रु क्लुकन् एतौ स्तः तच्छीलादिष्वित्यर्थः। कित्त्वान्न गुणः। **स्थेश**। 'ष्ठा गतिनिवृत्तौ, ईश ऐश्वर्ये, भासृ दीप्तौ, पिसृ पेसृ गतौ, कस् गतौ एभ्यो वरच् स्यात्तच्छीलादिष्वित्यर्थः। ईश्वरीति तु पुंयोगे ङीष्। **यश्च यङः**। 'या प्रापणे' इत्यस्य धातोरनुकरणस्य या इत्यस्य य इति षष्ठ्यन्तम्, तदाह **यातेरिति**। याधातोर्यङ्, द्वित्वादि 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः, यायाय इति यङन्ताद्वरचि विशेषमाह **अतो लोप इति**। हलः परत्वाभावाद् 'यस्य हलः' इति यकारलोपो न। यायाय वर इति स्थिते आह **लोपो व्योरिति यकारलोप इति**। ननु अतो लोपस्य 'अचः परस्मिन्-' इति स्थानिवत्त्वाद् अकारेण व्यवधानाद् वल्परत्वाभावात् कथमिह यलोप इत्यत आह **तस्येति**। तस्य अल्लोपस्य यलोपे कर्तव्ये 'न पदान्त-' इति स्थानिवत्त्वनिषेधादित्यर्थः। एवं च यङोऽकारस्य यकारस्य च लोपे यायावर इत्यत्र 'आतो लोप इटि च' इत्याल्लोपमाशङ्क्य निराकरोति **अल्लोपस्येति**। यङकारलोपस्य 'अचः परस्मिन्-' इति स्थानिवत्त्वमाश्रित्य तदकारात्मकार्धधातुकपरत्वाद् आकारस्य 'आतो लोप इटि च' इत्याल्लोपे प्राप्ते सति परिहार उच्यते इत्यर्थः। परिहारमेवाह **वरे लुप्तं न स्थानिवदिति**। लुप्तमिति भावे क्तः। 'न पदान्त-' इति सूत्रे वरे इत्यनेन वरे परे विहितं न स्थानिवदिति लभ्यते। अल्लोपोऽयमार्धधातुके वरे परे विहितः। अतः तस्य स्थानिवत्त्वाभावान्न यङोऽकारमाश्रित्य 'आतो लोप इटि च' इत्यस्य प्रवृत्तिरित्यर्थः। एवं च 'न पदान्त-' इति सूत्रे वरे इत्यंशस्य यलोपे इत्यंशस्य च यायावर इत्युदाहरणमिति बोध्यम्। **भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः**। भ्राज, भास, धुर्वि,

---

'नीगवञ्चु-' इत्यादिना प्राप्तस्य नीगागमस्याभाव इत्यर्थः। **तृष्णगिति**। ङित्त्वान्न गुणो नजिङ इकार उच्चारणार्थः। **क्रुकन्नपीति**। अतएव 'भीरुभीरुकभीलुकाः' इत्यमरः। **ईश्वर इति**। 'नेड्वशि-' इतीडभावः। **पेस्वर इति**। पिसृ पेसृ गतौ। **कस्वर इति**। कस गतौ। **भ्राज**। भ्राजेरित्युक्तत्वात्तच्छीलादिष्वयं क्विप्। भ्राज्

क्विप्। (३-२-१७७) विभ्राट्। भाः भासौ। धूः धुरौ। विद्युत्। ऊर्क्। पूः पुरौ। दृशिग्रहणस्याप्यपकर्षाज्जवतेर्दीर्घः। जूः जुवौ जुवः। ग्रावशब्दस्य धातुना समासः सूत्रे निपात्यते। ततः क्विप्। ग्रावस्तुत्। **३१५८ अन्येभ्योऽपि दृश्यते।** (३-२-२७८) क्विप्। छित्। भिद्। दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम्। क्वचिद्दीर्घः, क्वचिदसंप्रसारणम्, क्वचिद् द्वे, क्वचिद्ध्रस्वः। तथा च वार्तिकम्-'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' (वा २१४७-४८)। क्विब्वचीत्यादिनौणादिसूत्रेण केषांचित्सिद्धे तच्छीलादौ तृना बाधा मा भूदिति

द्युत, ऊर्जि, पॄ, जु, ग्रावस्तु, एभ्योऽष्टभ्यः क्विप्स्यात् तच्छीलादिषु कर्तृष्वित्यर्थः। **विभ्राडिति**। 'व्रश्च-' इति षः। **भा इति**। भासेः क्विपि सकारान्तस्य रुत्वविसर्गौ। **धूरिति**। धुर्वीधातोः क्विप्। 'राल्लोपः' इति वकारस्य लोपः। धुर् इति रेफान्तम्। सुलोपः। 'र्वोरुपधायाः-' इति दीर्घः। **पूरिति**। पॄधातोः क्विप्। 'उदोष्ठ्य-' इत्युत्वम्, रपरत्वम्। पुर् इति रेफान्तम्, सुलोपे 'र्वोः-' इति दीर्घः। जुधातोः क्विपि दीर्घं साधयितुमाह **दृशि ग्रहणस्याप्यपकर्षादिति**। उत्तरसूत्रादिति भावः। अत्र व्याख्यानमेव शरणम्। ननु ग्रावस्तु इति कथं समस्तनिर्देशः, सुबन्तस्य ग्रावशब्दस्य धातुना समासासंभवादित्यत आह **ग्रावशब्दस्येति**। **ग्रावस्तुदिति**। पित्त्वात्तुक्। **अन्येभ्योऽपि**। **क्विबिति**। शेषपूरणमिदम्। भ्राजभास इत्यादिसूत्रोपात्तापेक्षया अन्येभ्योपि धातुभ्यः तच्छीलादिषु कर्तृषु क्विब् दृश्यते इत्यर्थः। **विध्यन्तरेति**। विधीयते इति विधिः कार्यं कार्यान्तरोपसंग्रहार्थमित्यर्थः, तदेव दर्शयति **क्वचिद्दीर्घ इत्यादि**। **क्विब्वचीत्यादिनेति**। 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' इत्यौणादिकसूत्रेणेत्यर्थः। **तृना बाधा मा भूदिति**।

दीप्तौ, भासृ दीप्तौ, धुर्वी हिंसायाम्, द्युत दीप्तौ, ऊर्ज बलप्राणनयोः, पॄ पालनपूरणयोः, जु गतौ सौत्रः। ग्रावपूर्वः ष्टुञ् स्तुतौ। **विभ्राडिति**। 'व्रश्च-' इति षत्वम्। जश्त्वचर्त्वे। **धूरिति**। 'राल्लोपः' इति वलोपः, 'र्वोरुपधायाः-' इति दीर्घः। **ऊर्गिति**। 'चोः कुः' 'रात्सस्य' इति नियमान्न संयोगान्तलोपः। **पूरिति**। 'उदोष्ठ्यपूर्वस्य' इत्युत्वम्' 'र्वोः-' इति दीर्घः। **वाक्**। **प्राडिति**। इह दीर्घः संप्रसारणाभावश्च। संप्रसारणप्राप्तिस्तु 'वचिस्वपि-' 'ग्रहिज्यावयि-' इत्यादिना। श्रयति हरिं श्रीरिति। प्राचा तु श्रयन्त्येतामिति कर्मणि क्विबदाहृतस्तत्र 'कर्तरि कृत्' इति सूत्रविरोधः स्पष्ट एव। बाहुलकं तु अगतिकगतिः। **द्युति द्वे चेति**। कृतेऽपि द्वित्वे अभ्याससंज्ञेह दुर्लभा, प्रत्यासत्त्या षाष्ठद्वित्व एव प्रवृत्तेरत एव आष्टमिके सा नेत्याशङ्कायामाह **दृशिग्रहणादिति**। **दिद्युदिति**। 'द्युतिस्वाप्योः-'

वार्तिके ग्रहणम् । वक्तीति वाक् । पृच्छतीति प्राट् । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । जुरुक्र । श्रयति हरिं श्रीः । 'द्युतिगमिजुहोतीनां द्वे च' (वा २१४९) दृशिग्रहणादभ्याससंज्ञा । दिद्युत् । जगत् । 'जुहोतेर्दीर्घश्च' (वा २१४९) । जुहूः । 'दॄ भये', 'अस्य ह्रस्वश्च' दीर्घेति, दद्दत् । 'ध्यायतेः संप्रसारणं च' (वा २१५१) । धीः । ३१५९ भुवः संज्ञान्तरयोः । (३-२-१७९) मित्रभूर्नाम कश्चित् । धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स

वासरूपविधिस्तु ताच्छीलिकेषु नेति भावः । **वागिति** । वचधातोः क्विप्, वचनाद् उपधाया दीर्घः, 'वचिस्वपि–' इति संप्रसारणाभावश्च । एवं कटप्रूरित्यत्र दीर्घः । **प्राडिति** । वचनान्न संप्रसारणम् । **जुरुक्र इति** । 'भ्राजभास–' इत्यत्रेति शेषः । अतोऽत्र तद्ग्रहणं मास्त्विति भावः । **श्रीरिति** । श्रिञः क्विपि दीर्घः । **द्युतीति** । 'द्युतिगमिजुहोत्यादीनां द्वित्वं क्विप्च' इति वाच्यमित्यर्थः । 'पूर्वोऽभ्यासः' इत्यत्र षाष्ठद्विर्वचन एव पूर्वखण्डस्याभ्याससंज्ञावचनादाह **दृशिग्रहणादिति** । 'अन्येभ्योऽपि दृश्यते' इत्यत्रेत्यर्थः । ततश्चाभ्यासकार्यं हलादिशेषादीति भावः । **दिद्युदिति** । 'द्युतिस्वप्योः–' इति संप्रसारणम् । **जगदिति** । गमेः क्विप् 'गमः क्वौ' इति मलोपे तुक् । **जुहोतेर्दीर्घश्चेति** । वार्तिकमिदम् चाक्किब्द्वित्वे । **ह्रस्वश्चेति** । वार्तिकमिदम् । **दद्दिति** । ह्रस्वे कृते तुक् । **ध्यायतेरिति** । वार्तिकमिदम् । चात् क्विप् । **धीरिति** । ध्यैधातोः क्विपि संप्रसारणे पूर्वरूपे 'हलः' इति दीर्घ इति भावः । अत्र 'ध्यायतेः संप्रसारणं च' इत्युणादिषु पठितत्वादिदं वार्तिकं मास्त्वित्याहुः । वस्तुतस्तु उणादिसूत्राणि न पाणिनीयानि किन्तु ऋष्यन्तरप्रणीतानीति वक्ष्यते अतो न पौनरुक्त्यशङ्का । **भुवः संज्ञान्तरयोः** । क्विबिति शेषः । संज्ञान्तरयोरेवेति नियमार्थं सूत्रम् । संज्ञायामुदाहरति **मित्रभूर्नामेति** । अन्तरे उदाहरति **धनिकेत्यादि** । यावद्द्रव्यभाविन्यः संज्ञाः । प्रतिभूशब्दस्तु सत्येव पुरुषे कदाचिन्न भवति, ऋणे

इत्यभ्यासस्य संप्रसारणम् । **जगदिति** । 'गमः क्वौ' इति मलोपे तुक् । अत्र 'द्वे च' इति चकारेण दीर्घः समुच्चीयमानो द्युतिगम्योर्न भवति, दीर्घश्रुत्या 'अचश्च' इति परिभाषोपस्थानादजन्तस्य जुहोतेरेव संभवतीत्याशयेनाह **जुहोतेर्दीर्घश्चेति** । जुहोतीति जुहूः ह्रस्वश्चेति चकारेण द्वित्वं समुच्चीयते । **धीरिति** ध्यायतीति धीः । 'हलः' इति दीर्घः । ननु ध्यायति पुरुषो न तु धीः, एवं जुहोत्यनया पुरुष इति सर्वसमतत्वात् । कथं तर्हि भवदुक्तार्थः संगच्छत इति चेत् । अत्राह हरदत्तः–करणस्य कर्तृत्वविवक्षायां क्विब् भवति । **भुवः संज्ञा** । **धनिकेत्यादि** । तेन ग्रामयोरन्तरे यस्तिष्ठति तत्र नेति भावः । एतच्च दृशिग्रहणानुवृत्त्या लभ्यते । नन्वेवं प्रतिभूशब्दः

प्रतिभूः। ३१६० विप्रसंभ्यो ड्वसंज्ञायाम्। (३-२-१८०) एभ्यो भुवो डुः स्यान्न तु संज्ञायाम्। विभुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। 'मितद्र्वादिभ्य उपसंख्यानम्' (वा २१५२)। मितं द्रवतीति मितद्रुः। शतद्रुः। शम्भुः। अन्तर्भावितण्यर्थोऽत्र भवतिः। ३१६१ धः कर्मणि ष्ट्रन्। (३-२-१८१) धेटो धाञश्च कर्मण्यर्थे ष्ट्रन्स्यात्। षो ङीषर्थः। 'धात्री जनन्यामलकीवसुमत्युपमातृषु।' ३१६२ दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। (३-२-१८२) दाबादेः ष्ट्रन् स्यात्करणेऽर्थे। दात्यनेन दात्रम्। नेत्रम्। ३१६३ तितुत्रतथसिसुसरकसेषु

प्रतिदत्ते सति प्रातिभाव्यस्य निवृत्तेः। **विप्रसभ्यः**। डु असंज्ञायामिति छेदः। **विभुरिति**। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। **सम्भुरिति**। संभवति उत्पादयतीति सम्भुः, तदाह **जनितेति**। **मितद्र्वादिभ्य इति**। मितद्र्वादिसिद्ध्यर्थं डुप्रत्ययस्य उपसंख्यानमित्यर्थः। **शम्भुरिति**। शं सुखं भवति उत्पादयतीत्यर्थः। तदेवोपपादयति **अन्तर्भावितेति**। **धः कर्मणि ष्ट्रन्**। धेटः कृतात्वस्य धाञश्च ध इति पञ्चम्यन्तम्, तदाह **धेट इत्यादि**। षकारात् तकारस्य ष्टुत्वसंपन्नटकारेण निर्देशः, षस्य इत्संज्ञायां लोपे सति ष्टुत्वसंपन्नस्य टस्य निवृत्तिः, तदाह **धात्रीत्यादि**। **दाम्नी**। दाप्, नी, शस, यु, युज, स्तु, तुद, सि, सिच, मिह, पत, दश, नह, एषां त्रयोदशानां द्वन्द्वः। 'दाप् लवने' इत्यस्य पकारस्य स्थाने 'यरोऽनु–' इति कृतमकारस्य निर्देशः। अत्र शसेः पतेश्च त्रप्रत्यये इडमाशङ्क्याह **तितुत्रत**। ति, तु, त्र, त, थ, सि, सु, सर, क, स एषां दशानां द्वन्द्वः। अत्र सेरेत्येकम्। ति, तन्तिः 'स्त्रियाम्' इति क्तिन्। तु, सक्तुः, 'तनिगमि–' इत्यादिना तुप्रत्ययः। त्र, शस्त्रम्, पत्रम्। 'दाम्नी–' इति त्रप्रत्ययः। त, हस्तः। औणादिकः तप्रत्ययः। क्तप्रत्यये तु हसितमित्येव। थ कुष्ठम्। औणादिकः क्थप्रत्ययः। सि कुक्षिः। कुषेरौणादिकः क्सिप्रत्ययः। सु, इक्षुः, इषेरौणादिकः क्सुप्रत्ययः। सर,

संज्ञेति फलितं तत्र संज्ञायामित्येव सिद्धं किमन्तरग्रहणेन। अत्राहुः—यावद्द्रव्यभाविन्यः संज्ञाः। प्रतिभूशब्दस्तु सत्येव तस्मिन् ऋणप्रदानेन निवर्तत इत्युभयोर्भेद इति॥ शं सुखं भावयतीति शंभुरित्यर्थाभ्युपगमेनाह **अन्तर्भावितेति**। शं भवति सुखस्वरूपो भवतीति शंभुरित्यन्ये। शं भवत्यस्मादिति व्युत्पत्तिस्तु अपादाने डुप्रत्ययाभावाचिन्त्येति माधवः। **धः कर्मणि**। कर्मणीति नोपपदम्। 'ह्वावामश्च' इत्यनन्तरमेव धः ष्ट्रनिति वक्तव्ये पृथक्कर्मग्रहणाद्व्याख्यानाद्वेत्याशयेनाह **कर्मण्यर्थे इति**। अतएव धीयते पीयत इति धात्री स्तनदायिनीत्यादि व्याचक्षते। **दाम्नी-मेढ्रमिति**। 'हो ढः,

च । (७-२-६) एषां दशानां कृत्प्रत्ययानामिण्न स्यात् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री । ३१६४ **हलसूकरयोः पुवः ।** (३-२-१८३) पूङ्पूञोः करणे ष्ट्रन्स्यात् । तच्चेत्करणं हलसूकरयोरवयवः । हलस्य सूकरस्य वा पोत्रम्, मुखमित्यर्थः । ३१६५ **अर्तिलूधूसूखनसहचर इत्रः ।** (३-२-१८४) अरित्रम् । लवित्रम् । धुवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् । ३१६६ **पुवः संज्ञायाम् ।** (३-२-१८५) पवित्रम् । येनाज्यमुत्पूयते, यच्चानामिकावेष्टनम् । ३१६७ **कर्तरि चर्षिदेवतयोः ।** (३-२-१८६) पुव इत्रः स्यात् ऋषौ करणे, देवतायां कर्तरि । ऋषिर्वेदमन्त्रः । तदुक्तमृषिणेति दर्शनात् । पूय-

---

अत्तरम् अशेः सरन् । क, शल्कः, शलेः कुः । स, वत्सः 'वदेः सः' । **मेढ्रमिति ।** 'मिह सेचने' त्रः । ढत्वधत्वष्टुत्वढलोपाः । **दंष्ट्रेति ।** दंशधातोः त्रः । क्ङित्प्रत्ययाभावान्नलोपो न । सूत्रे दशेति शपा निर्देशाद् 'दंशसञ्ज–' इति नलोपः । केचित्तु दशेत्यकार उच्चारणार्थः । नलोपनिर्देशात् क्वचिदन्यस्मिन्नपि प्रत्यये अङ्कित्यपि नलोप इति दशना दन्ता इत्याहुः । **नद्ध्रीति ।** नह्यते अनयेति विग्रहः । चर्मरज्जुः । 'नह बन्धने' त्रः । 'नहो धः' 'झषस्तथोः–' इति तस्य धः, षित्वान्ङीष् । **हलसूकरयोः पुवः । पोत्रमिति ।** 'तितुत्रतथसिसुसर–' इति नेट् । **अर्तिलूधू ।** अर्ति, लू, धू, सू, खन, सह, चर एषां सप्तानां द्वन्द्वात्पञ्चमी । **पुवः संज्ञायाम् ।** इत्र इति शेषः । करणे इत्येव । **पवित्रमिति ।** पूयते अनेनाज्यमिति विग्रहः । तदाह **येनाज्यमिति ।** पूयते आचमनोदकादिकमनेनेति विग्रहं मत्वाह

धत्वष्टुत्वढलोपः । **दंष्ट्रेति ।** षित्वेऽपि ङीष् इह न भवति, अनित्यः षितां ङीषित्युक्तत्वात् । अन्ये त्वजादिपाठाट्टापमाहुः । **नद्ध्रीति ।** 'नहो धः' इति धत्वम् । 'झषस्तथोर्धो धः' इति जश्त्वम् । सूत्रे दशेति नलोपिनो निर्देशो ज्ञापकःक्वचिदक्ङित्यपि दंशेर्नलोपो भवतीति । तेन दंश दशन इत्यस्माल्ल्युटि दशना दन्ता इत्यादि सिद्धम् । न च सन्निधानात् ष्ट्रन्येव नलोपः स्यादिति वाच्यम्, 'शुनो दन्तदंष्ट्रा–' इति निर्देशात् । **तच्चेत्करणमित्यादि ।** एतेन हलसूकरयोरभिधेयत्वमुपपदत्वं च निरस्तम् । **मुखमित्यर्थ इति ।** तत्रैव रूढिरिति भावः । **अर्तिलूधूसू ।** धू विधूनने इति कुटादिरेव गृह्यते, निरनुबन्धकत्वात् । अतएव 'गाङ्कुटा–' इतिङित्वाद् गुणनिषेधे उवङ्, तदाह **धुवित्रमिति । पुवः ।** पूङ्पूञोरुभयोर्ग्रहणमविशेषात् । करण इत्यनुवृत्तेराह **येनाज्यमिति । कर्तरि चर्षि । इत्रः स्यादिति ।** करणे कर्तरि चेत्यर्थः । काशिकानुसारेण यथासंख्यं व्याचष्टे **ऋषौ करणे इति ।** 'कर्तरि कृत्'

तेऽनेनेति पवित्रम् । देवतायां तु 'अग्निः पवित्रं स मा पुनातु' ।

इति पूर्वकृदन्तप्रकरणम् ।

अथोणादयः ॥ ६७ ॥

१ कृवापाजिमिस्वदिसाध्यशूभ्य उण् । करोतीति कारुः, शिल्पी कार-

यश्चानामिकेति । अनामिका उपकनिष्ठिकाङ्गुलिः । कर्तरि च । पवित्रमिति । पावमान्यादिसूक्तम् । अग्निः पवित्रमिति । पुनातीत्यर्थः । सामान्याभिप्रायमेकवचनं नपुंसकत्वं च ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां तृतीयाध्यायस्य द्वितीयपादे पूर्वकृदन्तप्रकरणं समाप्तम् ।

अथ कृवापाजीत्यादीन्युणादिसूत्राणि मूले प्रौढमनोरमायां च स्फुटं व्याख्यातानि। अथाप्यस्माभिरपि अनतिविस्तरेण व्याख्यायन्ते । तानि चेमानि सूत्राणि शाकटायनमुनिप्रणीतानि नतु पाणिनिना प्रणीतानीति, उणादयो बहुलमिति सूत्रे भाष्ये 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति वार्तिकव्याख्यावसरेऽभिहितम् । उणादीनां शास्त्रान्तरपठितानां साधुत्वाभ्यनुज्ञानार्थं बहुलग्रहणमिति कैयटः । नह्येषां पाणिनीयत्वे शास्त्रान्तरशब्दो युज्यते । उणादिप्रत्ययान्ताः शब्दाः पाणिनिमतेऽव्युत्पन्ना एव । अत एव 'आथर्वणी–' इति सूत्रे प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धम् उणादयो ह्यव्युत्पन्नानि प्रातिपदिकानीति भाष्ये उक्तम् । अत एव च 'आदेशप्रत्यययोः' इति सूत्रभाष्ये उणादयो ह्यव्युत्पन्नानि प्रातिपदिकानीत्युक्त्वा तर्हि सर्पिषा यजुषेत्यादौ अप्रत्ययत्वात् षत्वाभावमाशङ्क्य बहुलग्रहणात् प्रत्ययसंज्ञामवलम्ब्य षत्वं साधितम् , व्युत्पत्तिपक्षश्च निराकृतः । अतोऽप्युणादिसूत्राणां न पाणिनीयत्वम् । अत एव 'अजेर्व्यघञपोः' इति सूत्रभाष्ये अजधातोर्युप्रत्यये प्रकृतेर्वीभावे वायुशब्दो व्युत्पादितः । उणादिसूत्राणां पाणिनीयत्वे हि कृवापाजीत्युणादिसूत्रेणोप्रत्ययमाश्रित्यैव व्युत्पाद्येत । एवं च क्वचिद्भाष्ये उणादीनां व्युत्पन्नत्वाश्रयणं शास्त्रान्तरमूलकमेवेति शब्देन्दुशेखरे प्रपञ्चितम् । तथा च क्विब्वचीत्युणादिसूत्राणां तथाविधवार्तिकानां च न पौनरुक्त्यशङ्का । अथोणादयः । कृवापाजि । डु कृञ्

इति सूत्रस्थभाष्यकैयटयोस्तु यथासंख्यं नेति गम्यत इति शब्दकौस्तुभे स्थितम् ।

इति पूर्वकृदन्तम् ।

अथोणादयः । कृवापा । डुकृञ् करणे, वा गतिगन्धनयोः, पा पाने, पा रक्षणे, जि अभिभवे, डुमिञ् प्रक्षेपणे, स्वद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ ।

कश्च। 'आतो युक्—' (सू २७६१) वातीति वायुः। पायुर्गुदस्थानम्। जयत्यभिभवति रोगान् जायुः औषधम्। मिनोति प्रक्षिपति देहे ऊष्माणमिति मायुः पित्तम्। स्वादुः। साध्नोति परकार्यं साधुः। अश्नुते आशु शीघ्रम्। 'आशुर्व्रीहिः

करणे, वा गतिगन्धनयोः, पा पाने, जि अभिभवे, डु मिञ् प्रक्षेपणे, स्वद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ, एभ्यो द्वन्द्वात् पञ्चमी। एभ्य उण्प्रत्ययः स्यात्कर्त्रर्थे इत्यर्थः। **कारुरिति** । कर्तरि उणि 'अचो ञ्णिति' इत्यनेन वृद्धौ च रूपम्। 'विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः' इति मेदिनी। वाधातोरुण्प्रत्यये युग्विधिं स्मारयति **आतो युगिति। पायुर्गुदस्थानमिति** । उणि 'आतो युक्—' इति भावः। 'गुदं त्वपानं पायुर्ना' इत्यमरः। पा रक्षणे इत्यस्मादुणि तु रक्षकोऽप्यभिधीयते। **जायुरिति**। उणि वृद्धौ आयादेशे रूपम्। 'अगदो जायुः' इत्यमरकोशः। डु मिञ् प्रक्षेपणे इत्यस्मादुणि वृद्धिं बाधित्वा मीनातिमिनोतीत्यादिना आत्वे 'आतो युक्चिण्कृतोः' इति युकि रूपम्। 'मायुः पित्तं कफः श्लेष्मा' इत्यमरः। **स्वादुरिति**। स्वदते रोचते इति स्वादुः पटः। विशेष्यनिघ्नोऽयम्। स्वादु फलमित्यादि बोध्यम्। साध्नोति परकार्यमित्यर्थे कर्तरि उण्। **आशु शीघ्रमिति**। विलम्बाभावमात्रपरत्वे क्लीबम्। तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गमिति बोध्यम्। 'उणादयो बहुलम्' इति बहुलवचनाल्लक्ष्यानुसारेण व्यवस्था। रह त्यागे इत्यस्मादुणि उपधावृद्धौ राहुरिति भवति। एवं वस निवासे इत्यस्मादुणि। वसत्यस्मिन्सर्वमिति वासुः। वासुश्चासौ देवश्च वासुदेवः। यद्यपि वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यणि

'विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः' इति मेदिनीकोशः। 'कारुः शिल्पिनि कारके' इति धरणिकोशस्तदेतदभिप्रेत्याह **कारुरित्यादि**। आद्ये योगरूढिर्द्वितीये तु योगमात्रमिति विवेकः। अत एव द्वितीये धात्वर्थं प्रति कारकान्वयो भवत्येव। तथा च भट्टिः—'राघवस्य ततः कार्यं कारुर्वानरपुङ्गवः। सर्ववानरसेनानामाश्वागमनमादिशत्' इति। पिबत्यनेन तैलादिकमिति पायुर्गुदस्थानम्। 'गुदं त्वपानं पायुर्ना' इत्यमरः। पाति रक्षतीति विग्रहे रक्षकोऽपि। तथा च मन्त्रः 'भुवस्तस्य स्वतवाँः पायुरग्ने' इति। 'स्वतवान् पायौ' इति नस्य रुत्वम्। 'अगदो जायुरित्यपि' इत्यमरः। पुँल्लिङ्गसाहचर्याज्जायुः पुंसि। 'मायुः पित्तं कफः श्लेष्मा' इत्यमरः। गोपूर्वोऽयं वाचं विकृतां मिनोति प्रक्षिपतीति गोमायुः शृगाल इत्युज्ज्वलदत्तः। वस्तुतस्तु मायुःशब्दः 'यत्पशुर्मायुमकृत' 'गोमायुरेकः' 'अजमायुरेकः' इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यातत्वात्। स्वदते रोचते इति स्वादुः। विशेष्यनिघ्नोऽयम्। एवं साधुरपि। आशु शीघ्रमिति विलम्बाभावमात्रे क्लीबम्, तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गम्। 'अथ शीघ्रं त्वरितम्' इत्युपक्रम्य क्लीबे

पाटलः स्यात् ।' २ छन्दसीणः । 'मा न आयौ' । ३ दृसनिजनिचरिचटिभ्यो ञुण् । दीर्यत इति दारु । 'स्नुः प्रस्थः सानुरस्त्रियाम्' । जानु जानुनी । इह 'जनि-

---

वासुदेव इति रूपं सिद्धम्, तथापि तद्व्युत्पत्त्यन्तरमिति भावः । छन्दसीणः । उणित्यनुवर्तते । इण् गतावित्यस्माद् धातोः छन्दसि उण् भवतीत्यर्थः । एति गच्छतीत्यायुः । पुँल्लिङ्गोऽयम् । दृसनिजनि । दृ विदारणे, षणु दाने, जन जनने, चर गतौ, चट भेदने, एषां द्वन्द्वात्पञ्चमी । दार्विति । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः । 'अचो ञ्णिति' इति वृद्धिः । सानुः प्रस्थः । अस्मिन्नर्थे कोशं प्रमाणयति स्नुः प्रस्थः सानुरस्त्रियामिति । जनधातोर्ञुणि रूपमाह जानु इति । 'अत उपधायाः' इत्यनेनोपधावृद्धिरिति भावः । ननु यदुक्तम् अत उपधाया वृद्धौ जानु इति रूपमिति तदसङ्गतम् 'जनिवध्योश्च' इत्यनेनानयोरुपधाया वृद्धिर्न स्यात् चिणि

शीघ्रावसत्त्वे स्यात्त्रिष्वेषां मेध्यैगामि यत्' इत्यमरः व्रीहौ पुंस्येव । 'उणादयो बहुलम्' इति बहुलवचनादन्यस्मादप्युण्भवति । रह त्यागे । गृहीत्वा चन्द्रं रहति त्यजतीति राहुः । वस निवासे । वसत्यस्मिन्सर्वमिति सर्वत्रासौ वसतीति वा वासुः, वासुश्चासौ देवश्च वासुदेवः । वसुदेवस्यापत्यमित्यस्मिन्नर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यणि कृते वासुदेव इति व्युत्पत्त्यन्तरमिति दिक् । छन्दसीणः । उणनुवर्तते । एति गच्छतीत्यायुः । मा न आयौ इति । आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघण्टौ पठितः । अत एव 'त्वामग्ने प्रथममायवे' 'मा नस्तोके तनये मा न आयौ' इत्यादिमन्त्रेषु वेदभाष्ये तथैव व्याख्यातम् । अर्वाचीनास्तु 'छन्दसीणः' इति सूत्रं बहुलवचनाद्भाषायामपि प्रवर्तत इति स्वीकृत्य 'आयुर्जीवितकालो ना' इत्यमरग्रन्थे आयुशब्दमुकारान्तं व्याचख्युः । ननु 'एतेर्णिच्च' इत्युस्प्रत्यये सकारान्तो वक्ष्यमाण आयुःशब्दस्तु लोकवेदयोर्निर्विवाद एव । अतएव जटा आयुरस्येति विग्रहे 'गृध्रं हत्वा जटायुषम्' इति रामायणप्रयोगः, 'यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्' इति श्रीहर्षप्रयोगश्च संगच्छते । तथा च 'आयुर्जीवितकालो ना' इत्यत्रायुःशब्दः सकारान्त इत्येव व्याख्यायतां किमुकारान्ताभ्युपगमेनेति चेत् । अत्राहुः सकारान्त आयुःशब्दो नपुंसक इति तस्य पुँल्लिङ्गता नेत्याशयेन तथोक्तमिति । अन्ये तु 'छन्दसीणः' इति सूत्रस्य भाषायां प्रवृत्त्यभावे 'मा वधिष्ट जटायुं माम्' इति भट्टिप्रयोगः । 'तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः' इति विन्ध्यवर्णने अभिनन्दोक्तप्रयोगश्च न संगच्छेतेत्याहुः । वस्तुतस्तु जटां याति प्राप्नोतीति जटायुः । मृगय्वादित्वात्कुः । आयातीत्यायुः । एवं च 'जटायुषा जटायुं च विद्यादायुं तथायुषा' इति द्विरूपकोशः । 'वायुना जगदायुना' इति वर्णविवेकश्च सुसाध इति दिक् । दृसनि । दृ विदारणे,

वध्योश्च' (सू २५१२) इति न निषेधः । अनुबन्धद्वयसामर्थ्यात् । चारु रम्यम् । चाटु प्रियं वाक्यम् । मृगय्वादित्वात्कुप्रत्यये 'चटु' इत्यपि । ४ **किंजरयोः श्रिणः** । किं शृणातीति किंशारु, सस्यशूकं बाणश्च । जरामेति जरायुः गर्भाशयः । गर्भाशयो जरायुः स्यात्' । ५ **त्रो रश्च लः** । तरन्त्यनेन वर्षा इति तालु । ६ **कृके वचः कश्च** । कृकेन गलेन वक्तीति कृकवाकुः । 'कृकवाकुर्मयूरे च सरटे चरणायुधे' इति विश्वः । ७ **भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः** । भरति बिभर्ति

ञिणाति कृति चेत्यर्थकेन वृद्धिनिषेधादित्याशङ्क्याह **अनुबन्धद्वयसामर्थ्यादिति** । एकैनेवानुबन्धेनान्यत्र वृद्धौ अत्र निषेधे च सिद्धे द्व्यनुबन्धकरणम् अत्रापि वृद्धिर्भवितव्येति ज्ञापनार्थमिति बोध्यम् । चरधातोर्ञुणि उपधावृद्धौ चारु इति रूपम् । नपुंसकलिङ्गोऽयम् । **चाटु इति** । ननु उपधावृद्धेर्नित्यत्वात् चाटु इत्येव भाव्यम् न तु चटु इति, प्रयुञ्जते तु कवयः कथमित्याशङ्कायामाह **मृगय्वादित्वादिति** । **किंजरयोः श्रिणः** । किं जर एतयोः शृ इण् आभ्यां ञुण् स्यात् । यथासंख्यमन्वयः । किमि शृधातोर्ञुणयुदाहरति **किंशारुरिति** । **सस्यशूकमिति** । 'किंशारुर्ना सस्यशूके विशिखे कङ्कपत्त्रिणि' इति मेदिनी । **त्रो रश्च लः** । त्रः रः इति छेदः । तॄ प्लवनतरणयोरित्यस्माद् ञुण् स्यात् । रेफस्य च लकारो भवतीत्यर्थः । तरन्त्यनेनेति तालुः । वृद्धौ रेफस्य लकार इत्यर्थः । **कृके वचः कश्च** । कृके उपपदे वचधातोः ञुण् स्यात् । चकारस्य च ककार इत्यर्थः । 'चजोः कु घिण्यतोः' इत्यनेनाप्राप्तौ कविधिरयम् । **कृकवाकुरिति** । वचधातोर्ञुणि उपधावृद्धौ चस्य कत्वे रूपम् । कृकवाकुशब्दार्थं विवृण्वन् कोशमाह **कृकवाकुर्मयूरे चेत्यादिना** । **भृमृशीतृ** । भृञ् भरणे, मृङ् प्राणत्यागे, शीङ् स्वप्ने, तॄ प्लवन-

---

षणु दाने, जन जनने, चर गतौ, चट भेदने । **दार्विति** । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः । **चाट्विति** । 'चटु चाटु प्रियं वाक्यम्' इति हट्टचन्द्रः । 'चाटुर्नरि प्रियोक्तिः स्यात्' इति रत्नमालाकोशः । नरि पुंसि । 'चकार च किल चाटून् प्रौढयोषिद्वदस्य' इति माघः । माघे तु नपुंसकमपि दर्शितम् । 'चाटु चाकृतकसंभ्रममासाम्' इति । **किंजरयोः** । शृ हिंसायाम्, इण् गतौ, आभ्यामुण् स्यात् । **सस्येति** । 'किंशारुर्ना सस्यशूके विशिखे कङ्कपत्त्रिणि' इति मेदिनीकोशः । **त्रो रश्च लः** । तॄ प्लवनतरणयोः । त्रः रश्चेति च्छेदः । केचित्तु तॄ ऋ इति प्रश्लिष्य द्वयोरपि सवर्णदीर्घे तॄ तयोस्त्रोरित्युक्त्वा ऋ गतावित्यस्मादपि ञुण् रस्य ल इति व्याख्याय इयर्ति अर्यते वा आलुः शाकविशेषो घटी चेत्याहुः । 'कर्कर्यालुर्गलन्तिका' । **भृमृशी** । भृञ् भरणे, मृङ् प्राणत्यागे, शीङ् स्वप्ने, तॄप्लवनतरणयोः, चर गतौ, अयं भक्षणेऽपि, त्सर छद्म गतौ,

---

अत्र कर्तरि तव्यप्रत्ययोऽपाणिनीयः । अन्तर्भावितण्यर्थो वात्र भवतिः, ततश्च कर्मणि प्रत्ययः ।

वा भरुः, स्वामी हरश्च। म्रियन्तेऽस्मिन्भूतानि मरुर्निर्जलदेशः। शेते शयुः अजगरः। तरुर्वृक्षः। चरन्ति भक्षयन्ति देवता इममिति चरुः। त्सरुः खड्गादिमुष्टिः। तनु स्वरूपम्। तन्यते कर्मपाशोऽनया इति तनुः, शरीरं च। 'स्त्रियां मूर्तिस्तनुस्तनूः।' धनुः शस्त्रविशेषः। 'धनुना च धनुर्विदुः।' 'धनुरिवाजनि वक्रः' इति श्रीहर्षः। मयुः किंनरः। 'मद्गुः पानीयकाकिका' इति रभसः। न्यङ्क्वादित्वात्कुत्वम्, जश्त्वेन सस्य दः। ८ अणश्च। 'खलखेशकषायाणवः।' चात्कटिवटिभ्याम्। कटति रसनां कटुः। वटति वदतीति वटुः। ९ धान्ये नित्। धान्ये

तरणयोः, चर गतौ, त्सर छद्मगतौ, तनु विस्तारे, धन धान्ये, डु मिञ् प्रक्षेपणे, टु मस्जो शुद्धौ एषां द्वन्द्वात्पञ्चमी। एभ्य उः प्रत्ययः स्यात्। उणि प्रकृते उविधानं वृद्ध्यभावार्थम्। भृञ्धातोरुप्रत्यये उदाहरति **भरुरिति**। **स्वामी हरश्चेति**। 'भरुः स्वर्णे हरे पुंसि' इति कोशादिति भावः। **शयुरिति**। अजगरे शयुरित्यमरादाह **शयुरजगर इति**। **अणश्च**। अण् शब्दे इत्यस्मादुप्रत्ययः स्यात्। अणुः। चकारप्रयोजनमाह **चादिति**। कटे वर्षादौ, वटे वेष्टने, आभ्यामपि उप्रत्ययो भवतीत्यर्थः। **वटुरिति**। 'वटुर्द्विजसुतः स्मृतः' इति मेदिनी। **धान्ये नित्**। अण्

तनु विस्तारे, धन धान्ये, डुमिञ् प्रक्षेपणे, टुमस्जो शुद्धौ। **भरुरिति**। 'भरुः स्वर्णे हरे पुंसि' इति मेदिनी। 'भरुर्भर्तृकनकयोः' इति हेमचन्द्रः। **शयुरिति**। 'अजगरे शयुर्वाहसः, इत्युभौ' इत्यमरः। **तरुरिति**। तरन्ति नरकमनेन रोपकाः। **चरुरिति**। अनवस्रावितान्तरूष्मपक्व ओदन इति याज्ञिकाः। वृत्तिचर्वधिकरणेऽप्येवमुक्तम्। 'उगवादिभ्यो यत्' इति सूत्रे कैयटस्त्वाह—स्थालीवाची चरुशब्दस्तात्स्थ्यादोदने भाक्त इति। 'तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे' इति मेदिनी। धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने' इति नान्ते मेदिनी। विश्वप्रकाशमुदाहरति **धनुषा चेत्यादि**। धनुषा सार्धं धनुं विदुरित्यर्थः। 'स्यात्तनुस्तनुषा सार्धम्' इत्यतः सार्धमित्यनुषज्यते। 'शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः। क्षेप्तुरेनमृजुमाशु सपक्षं सायकम्' इति श्रीहर्षश्लोकशेषः। 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' इति धन्वन्तरिः। इह पूर्वत्र च धनुरिति उकारान्तः सकारान्तो वा बोध्यः। न च सकारान्तधनुःशब्दो नपुंसक एवेति शङ्क्यम्, 'अथास्त्रियां धनुश्चापौ' इत्यमरोक्त्या तस्यापि पुंस्त्वात्। **किंनर इति**। 'तुरंगवदनो मयुः' इत्यमरः। 'मीनातिमिनोति–' इत्यात्वं तु नेह, बाहुलकात्। 'मयुस्तुरंगवदने मृगेऽपि मयुरिष्यते' इति विश्वः। मज्जति पानीये इति मद्गुः। **अणश्च**। अण शब्दे अस्मादुप्रत्ययः स्यात्। **चादिति**। कटे वर्षादौ, वट वेष्टने। कटति रसनामिति

वाच्येऽण उप्रत्ययः स्यात्, स च नित्। नित्त्वादाद्युदात्तः। 'प्रियङ्गवश्च मेऽणवश्च मे।' 'व्रीहिभेदस्त्वणुः पुमान्।' निद्ग्रहणं 'फलिपाटि-' इत्यादिसूत्रमभिव्याप्य संबध्यते। १० **शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च**। शृणातीति शरुः। शरुरायुधकोपयोः। स्वरुर्वज्रम्। स्नेहुर्व्याधिः। चन्द्र इत्यन्ये। त्रपु सीसम्। 'पुंसि भूम्न्यसवः प्राणाः।' 'वसुर्देवेऽग्नौ योक्त्रेंऽशौ वसु तोये धने मणौ'। हनुर्वक्त्रैकदेशः। क्लेदुश्चन्द्रः। बन्धुः। मनुः। चाद् 'बिदि अवयवे' बिन्दुः। ११ **स्यन्देः संप्रसारणं धश्च**। 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः। १२ **उन्देरिच्चादेः**। उनत्ति इन्दुः। १३ **ईषेः**

इत्यनुवर्तते, उरिति च। अणधातोर्धान्यरूपेऽर्थे उप्रत्ययः स च निद् भवतीत्यर्थः। नित्त्वप्रयोजनमाह **आद्युदात्त इति**। **अभिव्याप्येति**। तस्मिन्नपि सूत्रेऽनुवर्तत इत्यर्थः। **शृस्वृस्निहि**। शॄ हिंसायाम्, स्वृ शब्दोपतापयोः, स्निह उपतापे, त्रपूष् लज्जायाम्, असु क्षेपणे, वस निवासे, हन हिंसागत्योः, क्लिदू आर्द्रीभावे, बन्ध बन्धने, मन ज्ञाने, एषां द्वन्द्वात्पञ्चमी। उरित्यनुवर्तते। **त्रपु सीसमिति**। तद्धि अग्निं दृष्ट्वा त्रपते लज्जत इव। **स्यन्देः**। स्यन्दू प्रस्रवण इत्यस्माद् उप्रत्ययः स्यात्, संप्रसारणं यकारस्य भवति, दकारस्य धकारश्च भवति। **उन्देरिच्चादेः**। उनत्ति क्लेदयति विरहिण इति इन्दुः। उप्रत्ययो भवति, आदेरुकारस्य इकारश्च भवति।

कटुः। 'कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि। नपुंसकमकार्ये स्यात्पुंल्लिङ्गो रसमात्रके। त्रिषु तद्वत्सुगन्धयोश्च मत्सरेऽपि खुरेऽपि च' इति मेदिनी। **वटुरिति** वटतीति वटुः। 'वटुर्द्विजसुतः स्मृतः' इति संसारावर्तः। नटवटुरिति तूपचारात्। **अभिव्याप्येति**। यद्यपि 'फलिपाटि-' इति सूत्रं यावदनुवर्तत इति न्यासग्रन्थेन मर्यादीक्रियेत्यपि प्रतीयते तथाप्यभिव्याप्येत्येवोचितम्। 'पिबतं सोम्यं मधु' इत्यादौ मधुशब्दस्याद्युदात्ततादर्शनात्। 'वोतो गुणवचनात्' इति सूत्रे हरदत्तेनाप्यभिव्याप्येति स्पष्टमभिधानाच्चेति भावः। **शृस्वृस्निहि**। शॄ हिंसायाम्, स्वृ शब्दोपतापयोः, ष्णिह उपतापे, त्रपूष् लज्जायाम्, असु क्षेपणे, वस निवासे, हन हिंसागत्योः, क्लिदू आर्द्रीभावे, बन्ध बन्धने, मन ज्ञाने। **शरुरिति**। 'शरुः कोपे शरे वज्रे' इति हेमचन्द्रः। **स्वरुर्वज्रमिति**। 'शतकोटिः स्वरुः शम्बः' इत्यमरः। **त्रपु सीसमिति**। तद्धि अग्निं दृष्ट्वा त्रपते लज्जत इव। 'रङ्गसीसकयोस्त्रपु' इति मेदिनी। अस्यन्ति क्षिपन्ति शरीरमित्यसवः प्राणाः। **हनुरिति**। 'हनुः पुमान्परो गण्डात्' इति वररुचिकोशः स्त्रीलिङ्गोऽप्ययम्। 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे' इति मेदिनीकोशः। अतिशायने मतुप्। हनुमान्। 'अन्येषामपि

किच्च। ईषेरुः स्यात्, स च कित्, आदेरिकारादेशश्च। ईषते हिनस्ति इषुः, शरः। 'इषुर्द्वयोः'। **१४ स्कन्देः सलोपश्च**। कन्दुः। **१५ सृजेरसुम् च**। चास्सलोप उप्रत्ययश्च। रज्जुः। **१६ कृतेराद्यन्तविपर्ययश्च**। ककारतकारयोर्विनिमयः। तर्कुः सूत्रवेष्टकम्। **१७ नावञ्चेः**। न्यङ्क्वादित्वात्कुत्वम्। नियतमञ्चति न्यङ्कुर्मृगः। **१८ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च**।

ईषेः किच्च। ईषधातोरुप्रत्ययः स्यात्, स च कित्, आदेरीकारस्य इकारादेशश्च। इषुः। **स्कन्देः सलोपश्च**। स्कन्दिर गतिशोषणयोरित्यस्माद् धातोरुप्रत्ययः स्यात्, सकारस्य लोपश्च। कन्दुः। स्कन्दत्यस्मिन् जनताप इति कन्दुः। **सृजेरसुम् च**। सृज विसर्गे इत्यस्माद् उप्रत्ययः स्यात् तत्संनियोगेनासुम्, आदेः सकारस्य लोपश्चेत्यर्थः। असुमो मित्त्वादन्त्यादचः परो भवति। सृ असज् इति स्थिते ऋकारस्य यणि, सस्य श्चुत्वेन शः, जश्त्वेन जः, आदेः सकारस्य लोपः, उप्रत्यये रज्जुरिति भवति। **कृतेराद्यन्तविपर्ययश्च**। कृती छेदने इत्यस्माद् उप्रत्ययो भवति। आदेः ककारस्यान्ते निवेशः। अन्त्यस्य तकारस्यादौ निवेशः। उप्रत्यये परतो गुणः। तर्कुरिति रूपम्। यन्त्रविशेषः। **नावञ्चेः**। अञ्चु गतावित्यस्माद् नावुपसर्गे उप्रत्ययः स्यात्। कुत्वविधिं स्मारयति **न्यङ्क्वादित्वादिति**। **न्यङ्कुर्मृग इति**। 'न्यङ्कुर्मुनौ मृगे पुंसि' इति मेदिनी। **फलिपाटिनमिमनिजनाम्**। फल

दृश्यते' इति दृशिग्रहणात्पाक्षिको दीर्घः। हनूमान्। स्नेहेन बध्नातीति बन्धुः। प्रज्ञादित्वाद्बान्धवः। 'बन्धुर्बन्धूकपुष्पे स्याद्बन्धुर्भ्रातरि बान्धवे' इति विश्वः। मनुरादिराजो मन्त्रश्च। **स्यन्देः**। स्यन्दू प्रस्रवणे। **उन्देः**। उन्दी क्लेदने। **ईषेः**। ईष गतिहिंसादानेषु। **स्कन्देः**। स्कन्दिर् गतिशोषणयोः। **कन्दुरिति**। स्कन्दत्यस्मिञ्जनताप इति व्युत्पत्त्या भोगस्थानमिति केचित्। अन्ये तु स्कन्दति शोषयतीति कन्दुर्लोहादिपात्रमित्याहुः। अतएव 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियाम्' इत्यमरः। 'कन्दुर्वा ना' इति पूर्वेणान्वयाद्वा पुमानित्यर्थः। **सृजेः**। सृज विसर्गे। सृजतीति रज्जुः स्त्रियाम्। आगमसकारस्य श्चुत्वेन शः। जश्त्वेन जः। सृजेरम् चेति सुवचमिति नव्याः। 'रज्जुर्वेण्यां गुणेऽपि च' इति मेदिनी। **कृतेराद्यन्त**। कृती छेदने। **तर्कुरिति**। कृत्यतेऽनेनेति तर्कुः सूत्रवेष्टनयन्त्रविशेषः। 'तर्कुटी सूत्रला तर्कुः' इति हारावली। **नावञ्चेः**। अञ्चु गतौ। 'न्यङ्कुर्मुनौ मृगे पुंसि' इति मेदिनी। **फलिपाटि**। फल निष्पत्तौ, पट गतौ, ण्यन्तः। णम प्रह्वत्वे शब्दे, मन ज्ञाने, जनी प्रादुर्भावे, एभ्य उः स्यादेषां च यथाक्रमं गुगागमः, पटि नाकि ध त इत्यादेशाश्च भवन्ति। इह एकापि षष्ठी विषयभेदाद्भिद्यते। गुगागमे हि फलेरव-

फलेर्गुक् फल्गुः । पाटेः पटिः । पाटयतीति पटुः । नम्यतेऽनेन नाकुर्वल्मीकम् । मन्यत इति मधु । जायत इति जतु । **१९ वलेर्गुक्च** । 'वल संवरणे' वल्गुः । **२० शः कित्सन्वच्च** । श्यतेरुः स्यात्, स च कित् सन्वच्च । शिशुर्बालः । **२१ यो द्वे च** ।

निष्पत्तौ, पट गतौ, एयन्तस्यात्र पाटीति ग्रहणम्, णम प्रह्वत्वे शब्दे, मन ज्ञाने, जनी प्रादुर्भावे, एषां द्वन्द्वात्षष्ठी । एभ्य उप्रत्ययो भवति । जनामिति षष्ठी उत्तरत्र विधीयमानगुगाद्यपेक्षया । गुगित्यागमः कित्त्वाल्लिङ्गात् । इतरे आदेशाः । अत्र एकापि षष्ठी विषयभेदाद्भिद्यत इति गुगपेक्षया अवयवषष्ठी, इतरादेशान्प्रति तु स्थानषष्ठीति बोध्यम् । वस्तुतस्तु अनागमानां सागमका आदेशा इति पक्षस्यापि परिभाषेन्दुशेखरादौ दर्शनात् स्थानषष्ठ्यपि सम्यगेव । फलधातोरुप्रत्यये गुगागमेऽन्तावयवे कृते फल्गु इति रूपम् । पाटेरुप्रत्यये प्रकृतिभूतपाटेः पटिः आदेशः । इकारः 'इक्श्तिपौ धातुनिर्देशे' इत्युक्तरीत्या बोध्यः । पटुरिति रूपम् । **नाकुर्वल्मीकमिति** । नमधातोर्नाकिरादेशः । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । **मध्विति** । मनधातोरुप्रत्यये धकारोऽन्तादेशे रूपम् । **जत्विति** । जनधातोरुप्रत्यये नकारस्य तकारः अन्तादेशः । **वलेर्गुक् च** । वल संवरणे इत्यस्माद्धातोः उप्रत्ययो भवति, तत्संनियोगेन प्रकृतेर्गुगागमश्च । वल्गु इति रूपम् । अत्र केचिद् बल्गु इति पठन्ति, तत् 'तद्वल्गुना युगपदुन्मिषितेन तावत्' इत्यादिलक्ष्यविरोधादुपेक्ष्यम् । **शः कित्सन्वच्च** । शो तनूकरणे इत्यस्मादुप्रत्ययः, स च कित्, सन्वच्च भवति । **शिशुरिति** । शो इत्यस्मादुप्रत्यये तस्य कित्त्वाद् 'आदेच' इत्यात्त्वे तस्य द्वित्वे 'सन्यतः' इत्यभ्यासस्येत्त्वे 'आतो लोप इटि च' इत्यालोपः । तस्याजादावार्धधातुकक्ङिति विधानात् । तथाच

यवषष्ठी पट्याद्यादेशचतुष्टयविधौ तु पाट्यादिभ्यः स्थानषष्ठी सापि धतयोर्विधौ अन्तेऽप्युपसंह्रियत इति विवेकः । अनागमकानां सागमका आदेशा इति पक्षे तु स्थानषष्ठ्येवेति बोध्यम् । 'फल्गवसारेऽभिधेयवत् । नदीभेदे मलग्वां स्त्री' इति मेदिनी । **नाकुर्वल्मीकमिति** । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । **मध्विति** । मधु चैत्रे च दैत्ये च मद्ये पुष्परसे मधु' इति हेमचन्द्रः । 'मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधुः' इति शाश्वतः । **वलेः** । वल संवरणे इति दन्त्योष्ठ्यादिः । 'वल्गुः स्याच्छगले पुंसि सुन्दरे चाभिधेयवत्' इति मेदिनी । यत्तु उज्ज्वलदत्तेन 'बले र्गुक् च' इति ओष्ठ्यादि पठित्वा बल प्राणने इत्युपन्यस्तं तल्लक्ष्यविरोधादुपेक्ष्यम् । 'आर्य नाभावदति वल्गुवो गृहे' इत्यादौ दन्त्योष्ठ्यपाठस्य निर्विवादत्वात् । **शः कित्** । शो तनूकरणे अस्मादुप्रत्ययः, 'आदेच उपदेशे–' इत्यात्वं द्वित्वं 'सन्यतः' इत्यभ्यासस्येत्वम् । 'आतो लोप इटि च' इत्याकार-

ययुरश्वोऽश्वमेधीयः। सन्वदिति प्रकृते ह्रेमहण्यमित्वानिवृत्त्यर्थम्। २२ **कुर्भ्रश्च**। बभ्रुः। 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ।' चादन्यतोऽपि। चक्रुः कर्ता। जघ्नुर्हन्ता। पपुः पालकः। २३ **पॄभिदिव्यधिगृधिधृषिभ्यः**। कुः स्यात्। पुरुः। भिनत्ति भिदुर्वज्रम्। 'ग्रहिज्या–' (सू २४१२) इति संप्रसारणम्। विरहिणां विध्यति विधुः। 'विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे।' गृधुः कामः। धृषुर्दक्षः। २४ **कृग्रोरुच्च**। करोतीति कुरुः। गृणातीति गुरुः। २५ **अपदुः-**

शिशुरिति रूपम्। **यो द्वे च**। या प्रापणे इत्यस्य य इति षष्ठ्यन्तम्। या प्रापणे इत्यस्मादुप्रत्ययो भवति, प्रकृतेर्द्वित्वं च भवतीत्यर्थः। सन्वत्त्वे तु 'सन्यतः' इतीत्वं स्यात्। तस्मात्स न विहितः, तदेवाह **सन्वदितीत्यादिना कुर्भ्रश्च**। चकाराद् द्वे इत्यनुवर्तते। भृञ् भरणे इत्यस्मात्कुप्रत्ययो भवति, प्रकृतेर्द्वित्वं चेत्यर्थः। भरतीति बभ्रुः, कोशमाह **बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ इति**। धरणि-कोशोऽयम्। ननु चक्रुरित्यादि कथमित्याशङ्कायामाह **चादन्यतोऽपीति**। अन्येभ्योऽपि धातुभ्यः कुप्रत्ययः प्रकृतिद्वित्वं च भवतीत्यर्थः। **जघ्नुरिति**। 'गमहन–' इत्युपधा-लोपः। **पॄभिदिव्यधिगृधिधृषिभ्यः**। पॄ पालनपूरणयोः, भिदिर् विदारणे, व्यध ताडने, गृधु अभिकाङ्क्षायाम्, ञि धृषा प्रागल्भ्ये, एषां द्वन्द्वात्पञ्चमी। एभ्यः कुः स्यात्। **पुरुरिति**। कुप्रत्यये परतः 'उदोष्ठ्यपूर्वस्य' इत्युत्वं रपरत्वम्। विधुरित्यत्र प्रक्रियामाह **ग्रहिज्येति संप्रसारणमिति**। व्यधधातोस्ताडनार्थत्वा-दाह **विरहिणामिति**। कोशं प्रमाणयति **विधुः शशाङ्क इत्यादिना**। विश्वकोशोऽयम्। **कृग्रोरुच्च**। डु कृञ् करणे, गॄ निगरणे इत्याभ्यां कुः स्यात्।

लोपः। शिशुः। **यो द्वे च**। या प्रापणे। **कुर्भ्रश्च**। भृञ् भरणे अस्मात्कुप्रत्ययो धातोर्द्वित्वं च। भरतीति बभ्रुः। धरणिकोशस्थमाह। **बभ्रुरित्यादि**। 'बभ्रुर्वैश्वानरे शूलपाणौ च गरुडध्वजे। विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्' इति मेदिनी-कोशः। **चादन्यतोऽपीति**। भ्रः कुश्चेति वक्तव्ये प्राक् प्रत्ययनिर्देशादित्येके। भ्रश्चेति प्रकृतिसंसृष्टेन चकारेण प्रकृत्यन्तरसमुच्चयादित्यन्ये। **पॄभिदि**। पॄ पालन-पूरणयोः, भिदिर् विदारणे, व्यध ताडने, गृधु अभिकाङ्क्षायाम्, ञिधृषा प्रागल्भ्ये। **पुरुरिति**। कुप्रत्यये परतः 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वम्। 'पुरुः प्राज्येऽभिधे-यवत्। पुंसि स्याद्देवलोके च नृपभेदपरागयोः' इति मेदिनी। 'विधुः शशाङ्के' इत्यादिस्तु विश्वकोशः। इह सूत्रे धृषिहृषिभ्यश्चेति पठित्वा हृषुर्हर्षः। सूर्याग्निशनिरा-हवोऽपि हृषवः' इति केचित्। **कृग्रोरुच्च**। डुकृञ् करणे, गॄ शब्दे, आभ्यां कुः स्यादुकारोऽन्तादेशश्च। 'उरण् रपरः'। कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि नीवृति

सुषु स्थः । 'सुषामादिषु च' (सू १०२२) इति षत्वम् । अपष्ठु प्रतिकूलम् । दुःष्ठु । सुष्ठु । २६ रपेरिच्चोपधायाः । अनिष्टं रपतीति रिपुः । २७ अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च । अर्जयति गुणानृजुः । सर्वानविशेषेण पश्यतीति पशुः । कन्तुः कन्दर्पः । अन्धुः कूपः । 'पांशुर्ना न द्वयो रजः ।' 'तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः ।' बाधत इति बाहुः । 'बाहुः स्त्रीपुंसयोर्भुजः ॥' २८ प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च । त्रयाणां कुः

उकारः अन्तादेशश्च रपरः । कुरुः, गुरुरिति रूपम् । **अपदुस्सुषु स्थः** । अप, दुस् , सु एषु उपपदेषु स्थाधातोः कुप्रत्ययः स्यात् । आतो लोपे अपष्ठु दुःष्ठु सुष्ठु इत्यादिरूपम् । **रपेरिच्चोपधायाः** । रपधातोः कुप्रत्ययः स्यात् , उपधाया इकारादेशश्च । **अर्जिदृशि** । अर्ज अर्जने, दृशिर् प्रेक्षणे, कमु कान्तौ, अम गत्यादिषु, पशि नाशने सौत्रोऽयं धातुः, बाधृ लोडने, एषां षण्णां द्वन्द्वात् षष्ठी । एभ्यः कुप्रत्ययः स्यात् तत्संनियोगेन प्रकृतिभूतानां षण्णामर्ज्यादीनां मध्ये अर्जिदृश्योः ऋज पश एतौ सर्वादेशौ, कमेस्तुगागमः, अमेर्धुगागमः। पशिरिदित्। इदित्त्वान्नुम्। दीर्घोऽनेन विधीयते । बाधधातोरन्त्यस्य हकारादेशः । एकापि षष्ठी विषयभेदाद्भिद्यत इत्युक्तत्वात् षष्ठ्या आदेशागमयोरन्वयः । कन्तुर्मदनः । **प्रथिम्रदिभ्रस्जाम्** । प्रथ प्रख्याने, म्रद मर्दने, भ्रस्ज पाके, एभ्यः कुप्रत्ययः स्यात् संप्रसारणं च । भ्रस्जधात्ववयवसकारस्य लोपश्चेत्यर्थः । सलोप इत्यन्यत्रासंभवाद् भ्रस्जधातावेवान्वेति । प्रथधातोः कुप्रत्यये

इति मेदिनी । **अपदुःसु** । ष्ठा गतिनिवृत्तौ । **सुषामेत्यादि** । एतच्च न्यासाद्यनुरोधेनोक्तम् । वार्तिककृता तु स्थास्थिन्स्थूणामित्युपसंख्यातम् । 'अपष्ठुः पुंसि बाले च वामे स्यादन्यलिङ्गकः' इति मेदिनी । वामे प्रतिकूले । एषां त्रयाणां मृगय्वादिपाठेन सिद्धत्वात्सूत्रमिदं न्यासकारस्य न संमतमिति रक्षितः । **अर्जिदृशि** । अर्ज अर्जने अस्य ऋजिरादेशः, दृशेः पशिरादेशः, कमेस्तुगागमः, अम रोगे गत्यादौ वा, अस्य धुगागमः । पशि नाशने सौत्रो धातुरस्य दीर्घः । बाधृ लोडने अस्य हादेशः । षड्भ्योऽपि कुप्रत्ययः स्यादित्यर्थः । **अविशेषेणेति** । चादिगणे पश्विति पठितम् । 'पशु दृश्यर्थमव्ययम्' इति वररुचिः । कन्तुः कन्दर्पः । 'इः कन्तुर्मकराङ्कः' इति त्रिकाण्डशेषः । **पांशुरिति** । पडि पशि नाशने चुरादिर्ण्यन्तः । **स्त्रीपुंसयोरिति** । उक्तं ह्यमरेण 'द्वौ परौ द्वयोः । भुजाबाहू' इति । परौ द्वौ भुजबाहुशब्दौ द्वयोः स्त्रीपुंसयोरिति तदर्थः । अकारान्तोऽप्ययम् । अतएव 'बाहोऽश्वभुजयोः पुमान्' इति दामोदरः । बाहा भुजे पुमान्मानभेदाश्वभुजवायुषु' इति मेदिन्यां टाबन्तोऽप्ययम् । **प्रथिम्रदि** । प्रथ प्रख्याने, म्रद मर्दने, भ्रस्ज पाके । प्रथते इति पृथुः । 'पृथुः

संप्रसारणम्, भ्रस्जे-सलोपश्च। पृथुः। मृदुः। न्यङ्क्वादित्वात्कुत्वम्। भृज्जति तपसा भृगुः। २९ लङ्घिबंह्योर्नलोपश्च। लघुः। 'बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते' (वा ४७१८)। रघुर्नृपभेदः। बहुः। ३० ऊर्णोतेर्नुलोपश्च। ऊरु सक्थि। ३१ महति ह्रस्वश्च। उरु महत्। ३२ श्लिषेः कश्च। श्लिष्यतीति श्लिकुर्भृत्यः, उद्यतो ज्योतिश्च। ३३ आङ्परयोः खनिशृभ्यां डिच्च। आखनतीत्याखुः। परं शृणातीति परशुः। पृषोदरादित्वादकारलोपात्पर्शुरपि। ३४ हरिमितयोर्द्रुवः। 'द्रु गतौ' अस्माद् हरिमितयोरुपपदयोः कुः, स च

संप्रसारणे पृथुरिति रूपम्। भृगुरित्यत्र कुत्वं समर्थयते न्यङ्क्वादित्वादिति। लङ्घिबंह्योर्नलोपश्च। लघि गतौ, बहि वृद्धौ, आभ्यां कुप्रत्ययः स्यात्, नकारलोपश्च। लघु बहु इति रूपम्। लघु इत्यत्र विशेषमाह बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते। ल इति षष्ठ्यन्तम्। एतदवयवस्य लकारस्य रत्वं वा आपद्यत इत्यर्थः। एवं च रघुः इति रूपम्। ऊर्णोतेर्नुलोपश्च। ऊर्णुञ्धातोः कुप्रत्ययः स्यात् तत्संनियोगेन नुकारस्य लोपश्च। ऊरु इति रूपम्। महति ह्रस्वश्च। महति विशेष्ये ह्रस्वश्च भवति। उरु इति रूपम्। श्लिषेः कश्च। श्लिष आलिङ्गन इत्यस्मात् कुप्रत्ययः, कश्चान्तादेशः। श्लिकुर्भृत्य इति। षस्य कत्वे रूपम्। श्लिकुरित्यस्यार्थान्तरमाह उद्यतो ज्योतिश्चेति। आङ्परयोः। आङ्पराभ्यां खनु अवदारणे, शॄ हिंसायाम्, आभ्यां कुप्रत्ययः, स च डिद्भवति। डित्वाट्टिलोपः। आखुरिति। आखनतीति। भूमिमिति शेषः। परं शृणातीति। शत्रुं हिनस्तीत्यर्थः।

स्यान्महति त्रिषु। त्वक्पत्र्यां कृष्णजीरेऽथ पुमानग्नौ नृपान्तरे' इति मेदिनी। म्रदितुं शक्यतेऽकठिनत्वादिति मृदुः कोमलः 'भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि' इति विश्वः। लङ्घि। लघि लाघि गतौ, बहि महि वृद्धौ। लघुरिति। 'पृक्कायां स्त्री लघुः क्लीबं शीघ्रे कृष्णागुरुण्यपि' इति त्रिकाण्डशेषः। 'लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत्क्लीबम्। शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ स्त्रियाम्' इति मेदिनी। नृपभेद इति। एतेन 'अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्' इति कालिदासवचनं व्याख्यातम्। बहुरिति। 'बहुः स्यात्त्र्यादिसंख्यासु विपुले त्वभिधेयवत्' इति मेदिनी। ऊरुरिति। 'सक्थि क्लीबे पुमानूरुः' इत्यमरः। ऊर्णूयते आच्छाद्यते इत्यूरुः। कर्मणि प्रत्ययः। उरु महदिति। कर्तरि प्रत्ययः। श्लिषेः। श्लिष आलिङ्गने अस्मात्कुप्रत्ययः कश्चान्तादेशः। उद्यत इति। स हि यावत्कार्यं श्लिष्यति लगति व्याप्रियत इति यावत्। आङ्परयोः। खनु अवदारणे, शॄ हिंसायाम्। पर्शुरपीति। 'पर्शुः परशुना सह' इति विश्वः। हरिमितेति। द्रु

डित्। हरिभिर्द्रूयते हरिद्रुर्वृक्षः। मितं द्रवति मितद्रुः समुद्रः। ३५ शते च। शतधा द्रवति शतद्रुः। बाहुलकात्केवलादपि। द्रवत्यूर्ध्वमिति द्रुर्वृक्षः शाखा च। तद्वान्द्रुमः ३६ खरुशङ्कुपीयुनीलङ्गुलिगु। पञ्चैते कुप्रत्ययान्ता निपात्यन्ते। खनते रेफश्चान्तादेशः। खरुः कामः क्रूरो मूर्खोऽश्वश्च। 'शङ्कुर्नौ कीलशल्ययोः।' पिबतेरीत्वं युगागमश्च। पीयुर्वायसः कालः सुवर्णं च। निपूर्वाल्लगि गतावस्मात्कुर्नेर्दीर्घश्च। नीलङ्गुः कृमिविशेषः शृगालश्च। नीलाङ्गुः इति पाठान्तरम्। तत्र धातोरपि दीर्घः। लग सङ्गे, अस्य अत इत्वं च। लगतीति

पर्शुरित्यत्र व्युत्पत्तिमाह **पृषोदरादित्वादिति।** **हरिमितयोर्द्रुवः।** द्रु गतावित्यस्माद्धातोर्हरिमितयोरुपपदयोः कुप्रत्ययः स्यात्, स च डिद्भवति। **हरिद्रुरिति।** कुप्रत्ययः, डित्त्वात् टिलोपः। मितद्रुरिति चेत्थमेव रूपम्। **शते च।** शतशब्दे चोपपदे द्रु गताविल्यस्माद्धातोः कुप्रत्ययो भवति, स च डिदिति सूत्रार्थः। टिलोपः। द्रुरित्यत्र कथं कुप्रत्ययः, केवलात्कुप्रत्ययविधेः कुत्राप्यदृष्टत्वादित्यत आह **बाहुलकादिति।** **तद्वानिति।** द्युद्रुभ्यां म इति मत्वर्थीयो मप्रत्ययः। **खरुशङ्कुपीयुनीलङ्गुलिगु।** खनु अवदारणे, शकि शङ्कायाम्, पा पाने, निपूर्वः लगि गतौ, लगे सङ्गे, इत्येतेभ्यः पञ्चभ्यो धातुभ्यः कुप्रत्यये एते निपात्यन्ते। निपातनमेवाह **खनते रेफश्चान्तादेश इति।** नकारस्य रेफे आदेशे खरुरिति रूपम्। खरुरित्यस्यार्थं विवृणोति **काम इत्यादिना।** खरुः पतिंवरा कन्येत्यपि बोध्यम्। शङ्कुशब्दं कोशपूर्वकं विवृणोति **शङ्कुर्नेति।** 'शङ्कुः कीले गरे शस्त्रे संख्यापादपभेदयोः। यादोभेदे च पापे च स्थाणावपि च दृश्यते॥' इति विश्वः। **पीयुरिति।** ईत्वं युगागमश्च निपात्यते। **नीलङ्गुरिति।** 'नीलङ्गुः स्यात् कृमौ पुंसि भम्भराल्यां तु योषिति'

गतौ, अस्माद्धरिमितयोरुपपदयोः कुः स्यात्स च डित्। **हरिद्रुर्वृक्ष इति।** दारुहरिद्रा इत्येके। शतद्रुर्नदीभेदः 'शतद्रुस्तु शुतुद्रिः स्यात्' इत्यमरः। **तद्वानिति।** 'द्युद्रुभ्यां मः'। **खरुशङ्कु।** खनु अवदारणे, शकि शङ्कायाम्। **काम इत्यादि।** खरुः पतिंवरा कन्येत्यपि बोध्यम्। 'खरुर्दर्पे हरे दैत्ये हये श्वेते तु वाच्यवत्' इति विश्वत्रिकाण्डशेषौ। शङ्कते अस्मादिति शङ्कुः। 'शङ्कुः कीले गरे शस्त्रे संख्यापादपभेदयोः। यादोभेदे च पापे च स्थाणावपि च दृश्यते' इति विश्वः। **पीयुरिति।** 'पीयुः काले रवौ घोरे' इति मेदिनी। **क्रिमिविशेष इति।** 'नीलङ्गुः क्रिमिजातौ स्याद्भ्रमरालीप्रसूनयोः' इति विश्वः। 'नीलङ्गुः स्यात्कृमौ पुंसि भम्भराल्यां तु योषिति' इति मेदिनीकारः। **पाठान्तरमिति।** 'नीलङ्गुरपि नीलाङ्गुः' इति विश्वः। **धातोरपीति।** केचित्तु नीलशब्दे उपपदे गमेष्टिलोप उपपदस्य मुम्

खिगु खिलम्। खिगुर्मूर्खः। ३७ **मृगय्वादयश्च**। एते कुप्रत्ययान्ता निपात्यन्ते। मृगं यातीति मृगयुर्व्याधः। देवयुर्धार्मिकः। मित्रयुर्लोकयात्राभिज्ञः। आकृतिगणोऽयम्। ३८ **मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्**। मन्दुरा वाजिशाला। वाशुरा रात्रिः। मथुरा। चतुरः। चङ्कुरो रथः। अङ्कुरः। खर्जूरादित्वादङ्कूरोऽपि। ३९ **व्यथेः संप्रसारणं किच्च**। 'विथुरश्चोररक्षसोः।' ४० मुकुर-

---

इति मेदिनी। **मृगय्वादयश्च**। मृगयु इत्यादयः शब्दाः कुप्रत्ययान्ता निपात्यन्ते। मृगयुः देवयुः इत्यादय उदाहरणम्। **आकृतिगण इति**। तेन पीलुपाण्डुरित्यादिसिद्धिः। **मन्दिवाशि**। मदि स्तुत्यादौ, वाशृ शब्दे, मन्थ विलोडने, चते याचने, चङ्क इति सौत्रो धातुः, अकि लक्षणे, एभ्य उरच् स्यात्। मन्दुरा। 'वाजिशाला तु मन्दुरा' इत्यमरः। **वाशुरेति**। 'वाशुरा वाशितारात्र्योः' इति मेदिनी। **चङ्कुर इति**। 'चङ्कुरः स्यन्दने वृक्षे' इति मेदिनी। ननु अङ्कूर इति कथम्, अनेनोरच्प्रत्यये अङ्कुरशब्दस्यैव साधुत्वादित्याशङ्कायामाह **खर्जूरादित्वादिति**। तेन करप्रत्यये अङ्कूरशब्दोऽपि साधुरेवेति भावः। **व्यथेः संप्रसारणं किच्च**। व्यथ

दीर्घश्च पाक्षिको निपात्यते इत्याहुः। 'लिगु चित्त नपुंसकम्' इति वररुचिः। **मृगय्वादयश्च**। 'मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि' इति मेदिनी। 'मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि' इति विश्वः। 'देवयुर्वाच्यलिङ्गः स्याद्धार्मिके लोकयात्रिके' इति मेदिनी। **आकृतिगण इति**। तेन पील प्रतिष्टम्भे अस्मात्कुः। 'पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोः' इति विश्वः। भाट्टास्तु पीलुशब्दस्य वृक्षे आर्यप्रसिद्धिर्गजे तु म्लेच्छप्रसिद्धिरित्याश्रित्य व्यवजह्रुः। पडि गतौ अस्मात्कुः धातोर्वृद्धिश्च। पाण्डुः। कडि मदे कण्डुरित्यादि बोध्यम्। **मन्दिवाशि**। मदि स्तुत्यादौ, वाशृ शब्दे, मथे विलोडने, चते याचने, चङ्क इति सौत्रो धातुः। अकि लक्षणे। **वाशुरा रात्रिरिति**। वाश्यन्ते अस्यामिति विग्रहः। वाशुरो गर्दभ इत्यन्ये। 'वाशुरा वाशितारात्र्योः' इति मेदिनीहेमचन्द्रौ। **चङ्कुर इति**। 'चङ्कुरः स्यन्दने वृक्षे' इति मेदिनी 'अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि' इति च। **खर्जूरादित्वादिति**। करप्रत्ययोऽपीति भावः। 'अङ्कुरोऽङ्कूर एव च' इति विश्वप्रकाशः। **व्यथेः**। व्यथ भयसंचलनयोरस्मादुरच् कित्स्याद्धातोः संप्रसारणं च। दशपाद्यां तु 'व्यथेः संप्रारणं धः किच्च इति सूत्रं पठित्वा धकारमन्तादेशं विधाय विधुरोऽनमिक इत्युदाहृतम्। माधवप्रसादकारादिभिरपि तदेवानुसृतं नत्वेतद्युक्तम्। 'त्वमेषां विथुरा शवांसि' 'अथ विद्धा विथुरेणाचिदस्रा' इत्यादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात्। यदपि माधवेनोक्तं विदिभिदिच्छिदिरित्यत्र 'व्यथेः संप्रसारणं च' इति वचनात्कुरचि

दर्दुरौ। मुकुरो दर्पणः। बाहुलकान्मकुरोऽपि। 'दॄ विदारणे' धातोर्द्विवचनमभ्यासस्य रुक्टिलोपश्च। 'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः।' 'दर्दुरा चण्डिकायां स्याद् ग्रामजाले च दर्दुरम्।' इति विश्वः। ४१ मद्गुरादयश्च। उरजन्ता निपात्यन्ते। माद्यतेर्गुक्। मद्गुरो मत्स्यभेदः। 'कबृ वर्णे' रुमागमः। 'कर्बुरं श्वेतरक्षसोः।' बध्नातेः खर्जूरादित्वादूरोऽपि। 'बन्धूरबन्धुरौ स्यातां नम्र-

भयसंचलनयोरित्यस्माद्धातोरुरच् स्यात्। स च कित्। धातोः संप्रसारणं चेत्यर्थः। विधुर इत्युदाहरणम्। न चात्र उरचः कित्त्वविधानेनैव ग्रहिज्येति धातोः संप्रसारणे सिद्धे पृथक् संप्रसारणविधानं व्यर्थमिति वाच्यम्, ग्रहिज्येति सूत्रे तवर्गचतुर्थान्तव्यधधातोर्ग्रहणात्, अस्य च तवर्गद्वितीयान्तत्वेन तेनाप्राप्तेः। मुकुरदर्दुरौ। मकि मण्डने, दॄ विदारणे इत्यनयोः मुकुर दर्दुर इति निपात्यते इत्यर्थः। आद्ये उरच् धातोरुपधाया उकारश्च निपात्यते। नन्वेवं कथं मकुर इति, अनेन निपातितस्य उपधाया उत्वस्य नित्यत्वादित्यत आह बाहुलकादिति। बाहुलकाद् उपधाया उत्त्वविकल्प इति भावः। दॄधातोर्निपातनमाह धातोर्द्विवचनमित्यादिना। दॄधातोर्द्वित्वे गुणे अभ्यासस्योरदत्वे हलादिशेषे अभ्यासस्य रुक् टिलोपेन अरित्यास्यापहारे उरचि दर्दुर इति रूपमिति भावः दर्दुरशब्दार्थं विवृण्वन् कोशमाह दर्दुरस्तोयदे भेक इत्यादिना। केचित्तु दॄधातोर्गुणो दुगागमश्च उरच्प्रत्ययसंनियोगेन निपात्यत इत्याहुः। मद्गुरादयश्च। मदी हर्षे, बन्ध बन्धने, कबृ वर्णे, इत्यादय उरजन्ता निपात्यन्त इत्यर्थः। मदी हर्षे इत्यस्मादुरच्। तत्संनियोगेन गुगागमश्च निपात्यते। कबृ वर्णे इत्यस्मादुरच्, तत्संनियोगेन रुमागमो विधीयते। मित्त्वादन्त्यादचः परो भवति। बन्धुर इति। ननु बन्धूर इति कथमित्यत आह खर्जूरा-

धान्तरूपमिति, तदपि स्थवीयः। कुरच्विधायकसूत्रे व्यथेरुपसंख्यानस्याप्रसिद्धत्वात्। तस्मादिह 'धः किच्च' इति दशपादीपाठ उपेक्ष्य एव। कथं तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत्। धुरो विगत इति प्रादिसमासेनेत्यवधेहि। 'समासान्ताः' इति सूत्रे वृत्तिपदमञ्जर्योस्तथैवोक्तत्वात्। इह व्यथेः किच्चेत्येवास्तु 'ग्रहिज्या–' इत्यनेन संप्रसारणं स्यादेवेति न भ्रमितव्यम्, ग्रहिज्यादिषु व्यधिर्वर्गचतुर्थो न त्वयमिति निष्कर्षात्। मकुर इति। मकि मण्डने अस्मादुरच् नलोपश्च बाहुलकादिति धातोरुपधायाः पक्षे उकार इति भावः। 'मकुरो मुकुरोऽपि च' इति विश्वः। मकुरः स्यान्मुकुरवद्दर्पणे बकुलद्रुमे। कुलालदण्डे' इति मेदिनी। धातोर्द्विवचनमिति। केचित्तु गुणो दुगागमश्च निपात्यत इत्याहुः ग्रामजाले चेति। ग्रामजाले चेति पाठान्तरम्। मद्गुरादयश्च। मदी हर्षे। कर्बुरः। 'कर्बुरं सलिले हेम्नि कर्बुरः

सुन्दरयोषितु' इति रन्तिदेवः 'कोकतेर्वा कुक् (च), (ग ११९) कुक्कुरः, कुकुरः। ४२ असेरुरन्। असुरः। प्रज्ञाद्यण्, आसुरः। ४३ मसेश्च। पञ्चमे पादे 'मसेरूरन्' इति वक्ष्यते। 'मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति' 'मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः'। मसूरी पापरोगे स्यादुपधाने पुनः पुमान्' 'मसूरमसुरौ च द्वौ' इति विश्वः। ४४ शावशेराप्तौ। शु इत्याश्वर्थे। श्वशुरः। 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः। ४५ अविमह्योष्टिषच्। अविषः। महिषः। ४६ अमेर्दीर्घश्च। 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि।' ४७ रुहेर्वृद्धिश्च। 'रङ्कुशम्बररौहिषाः'। 'रौहिषो

दित्वादिति। कोकतेर्वा कुक्। कुकुरः कुक्कुर इति रूपद्वयम्। वाग्रहणात्कुको वैकल्पिकत्वात्। असेरुरन्। असुर इति। उरचि प्रकृते उरन्विधानात् स्वरे भेदः। आसुर इत्यत्र प्रक्रियामाह प्रज्ञाद्यणिति। स्वार्थिकोऽणिति भावः। मसेश्च। मसी परिणामे। उरन्निति शेषः। मसुरा इति रूपम्। मसूरा इति शब्दं साधयति मसेरूरन्निति वक्ष्यत इति। शावशेराप्तौ। शु इति कृताकारलोप आशुशब्दः तस्मिन्नुपपदे अशू व्याप्तावित्यस्माद् उरन् आप्तौ गम्यमानायामित्यर्थः। श्वशुर इति रूपम्। अमरकोशमाह पतिपत्न्योरिति। अविमह्योष्टिषच्। अव रक्षणे, मह पूजायामाभ्यां टिषच् प्रत्ययो भवति। टचावितौ। टित्वं ङीबर्थम्। अविषः अविषी महिषः महिषी। अमेर्दीर्घश्च। अमधातोष्टिषच् भवति, प्रकृतेरकारस्य दीर्घश्च भवति। आमिषमिति रूपम्। रुहेर्वृद्धिश्च। रुह बीजजन्मनि इत्यस्मात् टिषच्

पापरक्षसोः। कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत्' इति मेदिनी। बन्धूरबन्धुराविति। बन्ध बन्धने। कुक्कुर इति। कुक आदाने। 'कुक्कुरः कुकुरो मतः' इति हट्टचन्द्रः। 'कुक्कुरः सारमेये ना ग्रन्थिपर्णे नपुंसकम्' इति मेदिनी। अत सातत्यगमने आदिदीर्घः। आतुरः। वा गतिगन्धनयोः। गुगागमः। 'वागुरा मृगबन्धिनी' इत्यादिरपि ज्ञेयम्। असेः। असु क्षेपणे। मसेश्च। मसी परिणामे। मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः। मसूरी पापरोगे स्यादुपधाने पुनः पुमान्' इति मेदिनी। शावशेः। शु इति कृताकारलोप आशुशब्दस्तस्मिन्नुपपदे आप्तौ गम्यमानायाम् अशू व्याप्तावित्यस्माद्धातोरुरन्स्यात्, श्वशुरो दम्पत्योः पिता। 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः। अवि। अव रक्षणादौ। मह पूजायाम्। अविष इति। राजा समुद्रश्च। महिषो महान्। 'तुरीयं धाम महिषो विवक्ति' 'उत माता महिषमन्ववेनत्'। टित्वान्ङीप्। महिषी राजपत्नी। रुहेः। रुह बीजजन्मनि प्रादुर्भावे च। 'रौहिषो मृगभेदः स्याद्रौहिषं च तृणं मतम्'

मृगभेदे स्याद्रौहिषं च तृणं मतम्' इति संसारावर्तः। ४८ **तवेर्णिद्वा**। तव इति सौत्रो धातुः। 'तविष-ताविषावब्धौ स्वर्गे च'। स्त्रियां तविषी ताविषी नदी देवकन्या भूमिश्च। 'तविषो बलम्' इति वेदभाष्यम्। ४९ **नञि व्यथेः**। 'अव्यथिषोऽब्धिसूर्ययोः। अव्यथिषी धराराज्योः। ५० **किलेर्बुक्च**। किल्बिषम्। ५१ **इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्**। इषिरोऽग्निः। मदिरा सुरा। 'मुदिरः कामुकाभ्रयोः' इति विश्वमेदिन्यौ। खिदिरश्चन्द्रः। 'छिदिरोऽसिकुठारयोः'। भिदिरं वज्रम्। मन्दिरं गृहम्। स्त्रियामपि। 'मन्दिरं मन्दिरापि स्यात्' इति विश्वः।

भवति प्रकृतेर्वृद्धिश्च। रौहिषमिति रूपम्। **तवेर्णिद्वा**। तवेति सौत्रो धातुः, अस्माट्टिषच्, स च णिद् विकल्पेन भवतीत्यर्थः। णित्वपक्षे उपधावृद्धिः। तदभावे वृद्ध्यभावः। **नञि व्यथेः**। नञि उपपदे व्यथधातोः टिषज् भवति। अव्यथिषः। टित्वात् स्त्रियां ङीप। अव्यथिषी। **किलेर्बुक् च**। किलधातोः टिषच् प्रकृतिभूतधातोर्बुगागमश्च किल्बिषमिति रूपम्। **इषिमदि**। इषु इच्छायाम्, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुत्यादौ, चदि आह्लादे, तिमि आर्द्रीभावे, मिह सेचने, मुह वैचित्त्ये, मुच्लृ मोक्षणे, रुच दीप्तौ, रुधिर् आवरणे, बन्ध बन्धने, शुष शोषणे, एषां द्वन्द्वात्पञ्चमी। एभ्यः किरच् स्यात्। **इषिर इति**।

इति संसारावर्तः। **वेदभाष्यमिति**। 'इन्द्रो वृत्रस्य तविषीम्'। 'इन्द्रस्यात्र तविषीभ्यो विरप्शिन्' इत्यादिमन्त्रेष्विति भावः। वैदिकनिघण्टौ 'ओजः पाजः' इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति बोध्यम्। 'तविषः शोभनाकारे बलेऽब्धिव्यवसाययोः।तविषी देवकन्यायां पुंसि स्वर्गे महोदधौ। ताविषी चेन्द्रकन्यायां ना स्वर्गाम्बुधिकाञ्चने' इति मेदिनी। **नञि व्यथेः**। व्यथ भयसंचलनयोः। **किलेः**। किल श्वैत्यक्रीडनयोः,अस्मादिषच् धातोर्बुगागमश्च। 'किल्बिषं पापरोगयोः। अपराधेऽपि' इति मेदिनी। **इषिमदि**। इषु इच्छायाम, मदी हर्षे, मुद हर्षे खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मन्दि स्तुत्यादौ, चदि आह्लादने, तिम आर्द्रीभावे, मिह सेचने, मुह वैचित्ये, मुच्लृ मोक्षणे, रुच दीप्तौ, रुधिर् आवरणे, बन्ध बन्धने, शुष शोषणे। **इषिरोऽग्निरिति**। आहार इत्यन्ये। 'छिदिरः पावके रज्जौ करवाले परश्वधे' इति मेदिनी। 'मन्दिरं नगरेऽगारे क्लीबं ना मकरालये' इति मेदिनी। 'चन्दिरोऽनेकपे चन्द्रे' इति च। 'तिमिरं ध्वान्ते नेत्रामयान्तरे' इति। 'मिहिरः सूर्यबुद्धयोः' इति मेदिनी। 'मुहिरः कामिमूर्खयोः' इति च। 'सुन्दरं रुचिरं चारु' इत्यमरः। 'रुधिरोऽङ्गारके पुंसि क्लीबं तु कुङ्कुमासृजोः' इति मेदिनी। बधिरः श्रोत्रेन्द्रियरहितः। 'शुषिरं

'चान्दिरौ चन्द्रहस्तिनौ'। तिमिरं तमोऽक्षिरोगश्च । मिहिरः सूर्यः । 'मुहिरः काम्यसम्म्ययोः'। मुचिरो दाता । रुचिरम् । रुधिरम्। बधिरः। शुष शोषणे। शोषके शुषिरं छिद्रम्। शुष्कमित्यन्ये। ५२ अशेर्णित्। आशिरो वह्निरक्षसोः। ५३ अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः। अजेर्वीभावाभावः। अजिरमङ्गणम्। शशेरुपधाया इत्वम् । 'शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्'। श्रथ मोचने, उपधाया इत्वं रेफलोपः । प्रत्ययरेफस्य लत्वम्। शिथिलम्। ष्ठास्फाय्योष्टिलोपः। स्थिरं निश्चलम्। स्फिरं प्रभूतम्। तिष्ठतेर्वुक् ह्रस्वत्वं च स्थविरः। खदिरः। बाहुलकाच्छीङो बुक् ह्रस्वत्वं च। शिबिरम्। ५४ सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् । सलति गच्छति

कित्त्वान्न लघूपधगुणः। **अशेर्णित्** । अश भोजन इत्यस्मात्किरच् स्यात्, स च णिद् भवति, णित्त्वादुपधावृद्धिः । आशिर इति रूपम्। **अजिरशिशिर**। अज गतिक्षेपणयोः, शश प्लुतगतौ, श्रथ मोचने, ष्ठा गतिनिवृत्तौ, स्फायी वृद्धौ, ष्ठा गतिनिवृत्तौ, खद हिंसायाम्, एभ्यः किरचि कृते निपातनमिदम्। प्रथमतः अज गतिक्षेपणयोरित्यस्मात् किरचि प्रकृतेर्वीभावाभावो निपात्यते । शिशिरमित्यत्राह **शशेरुपधाया इति**। शश प्लुतगताविल्यस्मात् किरचि उपधाभूतस्याकारस्य स्थाने इत्वं निपात्यते। शिशिर इति रूपम् । शिथिलशब्दे आह **श्रथधातोः किरचि उपधाया इत्वमित्यादिना**। प्रत्ययस्थस्य रेफस्य लत्वम् शिथिलमिति रूपम्। स्थिरस्फिरशब्दयोराह **ष्ठास्फाय्योरिति** । स्थविरशब्दे आह **तिष्ठतेरिति**। तिष्ठतेः किरचि तत्संनियोगेन धातोर्वुक्, आकारस्य ह्रस्वश्च निपात्यत इत्यर्थः। खदिरो वृक्षभेदः । शिबिरशब्दं साधयति **शीङ इति**। शीङ् स्वप्ने इत्यस्मात् किरचि प्रकृतेर्वुक्, ईकारस्य ह्रस्वत्वं च निपात्यते । शिबिरमिति रूपम्। **सलि-**

विवरं बिलम्' इत्यमरः। **अशेः**। अश भोजने। **अजिर**। अज गतौ, शश प्लुतगतौ, ष्ठा गतिनिवृत्तौ, स्फायी वृद्धौ, खद हिंसायाम् । **अजिरमिति** । दशपादीवृत्तौ तु नञ्पूर्वस्य जीर्यतेर्ऋवर्णलोपो निपात्यते इत्युक्तं तदपि प्राह्यम्। 'आशु द्रुतमजिरं प्रत्नमीड्यम्' इत्यादौ न जीर्यतीत्यजिर इत्यस्यानुगुणत्वात् । **अङ्गणमिति**। अङ्गेर्ल्युटि अनादेशः। नकारस्य बाहुलकाद् णत्वमित्येके। अन्ये तु दन्त्यमेवेच्छन्ति। 'अजिरं प्राङ्गणे काये विषये दर्दुरेऽनिले' इति मेदिनी। 'शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु' इति च । विश्वकोशस्थमाह । **शिशिरं स्यादिति**। खदिरो वृक्षभेदः। 'खदिरी शाकभेदे स्त्री ना चन्द्रे दन्तधावने' इति मेदिनी। **शिबिरमिति**। शेरतेऽस्मिन् राजबलानि, 'निवेशः शिबिरं शण्ढे' इत्यमरः।

निम्नमिति सलिलम्। कलिलम्। अनिलः। महिला। पृषोदरादित्वान्महेलापि। भज इति सौत्रो धातुः। 'भडिलौ शूरसेवकौ'। भण्डिलो दूतः कल्याणं च। शण्डिलो मुनिः। पिण्डिलो गणकः। तुण्डिलो मुखरः। कोकिलः। भविलो भव्यः। बाहुलकात्कुटिलः। ५५ कमेः पश्च। कपिलः। ५६ गुपादिभ्यः कित्। गुपिलो राजा। तिजिलो निशाकरः। गुहिलं वनम्। ५७ मिथिलादयश्च। मथ्यन्तेऽत्र रिपवो मिथिला नगरी। पथिलः, पथिकः। ५८ पति-

---

कल्यनिमहि। षल गतौ, कलि संख्याने, अन प्राणने, मह पूजायाम् भडि परिभाषणे, भडि कल्याणे, शडि रुजायाम्, पिडि संघाते, तुडि तोडने, कुक आदाने, भू सत्तायाम्। सलिलमिति। सलतीति सलिलमिति। निम्नप्रदेशमिति शेषः। जलस्य निम्नगत्वादिति भावः। 'सलिलं कमलं जलम्' इत्यमरः। कलिलमिति। 'कलिलं गहनं समे' इत्यमरः। अनिलो वायुः। महिलेति। पूज्येत्यर्थः। ननु कथं महेलेति, इलचि महिला इत्यस्य साधनादित्यत आह पृषोदरादित्वादिति। इकारस्य गुण इति भावः। तथा च श्रीहर्षः 'परमहेलारतोऽप्यपारदारिकः' इति प्रायुङ्क्त। परस्य महेला स्त्री तस्यां रतोऽपि अपारदारिक इति विरोधाभासालङ्कारः। परमा उत्कृष्टा हेला क्रीडा तस्यां रत इति विरोधपरिहारः। कुट कौटिल्ये इत्यस्यानुपादानादाह बाहुलकादिति। कमेः पश्च। कमु कान्तावित्यस्माद् इलच् स्यात्, तत्संनियोगेन धातोः पकारः अन्तादेशो भवति। कपिल इति रूपम्। 'कपिला रेणुकायां च शिंशपागोविशेषयोः। पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम्॥ नानले वासुदेवे च मुनिभेदे च कुक्कुरे।' इति मेदिनी। गुपादिभ्यः कित्। गुपू रक्षणे, तिज निशाने, गुह संवरणे, एभ्य इलच्, स च कित्। कित्त्वाच्च लघूपधगुणः।

सलिकलि। षल गतौ, कल संख्याने, अन प्राणने, मह पूजायाम्, भडि परिभाषणे, भडि कल्याणे सुखे च, शडि रुजायाम्, पिडि संघाते, तुडि तोडने, कुक आदाने, भू सत्तायाम्, कुट कौटिल्ये। कलिल इति। मिश्रो गहनश्च। 'कलिलं गहनं सम' इत्यमरः। महिलेति। 'महिला फलिनीस्त्रियोः' इति मेदिनी। 'प्रियङ्गुः फलिनी फली' इत्यमरः। पृषोदरेति। तथा च दमयन्तीकाव्ये प्रयोगः 'परमहेलारतोऽप्यपरदारिकः' इति। परस्य महेला स्त्री, अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः। कमेः। कमु कान्तौ। अस्मादिलच् पश्चान्तादेशः। 'कपिला रेणुकायां च शिंशपागोविशेषयोः पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम्। ना नले वासुदेवे च कुक्कुरे' इति मेदिनी। रेणुकेह लताविशेषः। 'हरेणू रेणुका कुन्ती कपिला भस्मगन्धिनी' इत्यमरात्। गुपादिभ्यः। गुपू रक्षणे,

कठिकुठिगडिगुडिदंशिभ्य एरक्। पतेरः पक्षी गन्ता च। कठेरः कृच्छ्रजीवी। कुठेरः पर्णाशः। बाहुलकान्नुम्न। गडेरो मेघः। गुडेरो गुडकः। दंशेरो हिंस्रः। **५९ कुम्बेर्नलोपश्च।** कुबेरः। **६० शदेस्त च।** शतेरः शत्रुः। **६१ मूलेरादयः।** एरगन्ता निपात्यन्ते। मूलेरो जटा। गुधेरो गोप्ता। गुहेरो लोहघातकः। मुहेरो मूर्खः। **६२ कबेरोतच् पश्च।** कपोतः पक्षी। **६३ भातेर्डवतुः।** भातीति भवान्। **६४ कठिचकिभ्यामोरन्।** कठोरः। चकोरः। **६५ किशोरादयश्च।**

गुपिलः तिजिलः गुहिलः। **मिथिलादयश्च।** मिथिलादय इलच्प्रत्ययान्ता निपात्यन्ते। मिथिला इत्यत्र मन्थ विलोडने इत्यस्माद् इलचि तस्य किस्वाद् अनुनासिकलोपोऽकारस्य इकारो निपात्यते। पथे गतावित्यस्मात्पथिल इति रूपम्। **पतिकठिकुठि।** पत्लृ गतौ, कठ कृच्छ्रजीवने, कुठि कृच्छ्रजीवने, गड सेचने, गुड रक्षायाम्, दंश दशने, एषां द्वन्द्वात् पञ्चमी। एभ्य एरक् स्यात। पतेरः, कठेरः, कुठेरः। ननु कुठिधातोरिदित्वाद् 'इदितो नुम्धातोः' इति नुम् स्यादत आह **बाहुलकादिति। कुम्बेर्नलोपश्च।** कुबि आच्छादने इत्यस्माद् एरक्। कुबेर इति रूपम्। **शदेस्त च।** शद्लृ शातन इत्यस्माद् एरक् स्यात्, तकारश्चान्तादेशः। शतेर इति रूपम्। **मूलेरादयः।** एरगन्ता निपात्यन्ते। **मूलेर इति।** मूल प्रतिष्ठायामित्यस्मादेरक्। **गुधेर इति।** गुध परिवेष्टने। **गुहेर इति।** गुहू संवरणे। **मुहेर इति।** मुह वैचित्ये। **कबेरोतच् पश्च।** कबेरोतच् पश्चेति छेदः। कबृ वर्णे इत्यस्माद् ओतच् स्यात् पकारश्चान्तादेशः। कपोतः पक्षिविशेषः। 'कपोतः

तिज निशाने, गुहू संवरणे। **मिथिलादयश्च।** मथे विलोडने। अकारस्येत्वं निपातनात्। पथे गतौ। **पतिकठि।** पत्लृ गतौ, कठ कृच्छ्रजीवने, कुठि च, गड सेचने, गुड रक्षायाम्, दंश दशने। कुठिधातोरिदित्वाद् नुमि प्राप्ते आह **बाहुलकादिति। कुम्बेः।** कुबि आच्छादने। अन्येषामैश्वर्यं कुम्बतीति कुबेरः। 'कुबेरस्त्र्यम्बकसखः'। **शदेः।** शद्लृ शातने। **मूलेरा।** मूल प्रतिष्ठायाम्, गुध परिवेष्टने, गुहू संवरणे, मुह वैचित्ये। **कबेः।** कबृ वर्णे। 'कपोतः स्याच्चित्रकण्ठे पारावतविहङ्गयोः' इति मेदिनी। 'कपोतः पक्षिमात्रेऽपि' इति त्रिकाण्डशेषः। अत्र ओतचश्चित्त्वं प्रामादिकम्। 'यत्कपोतः पदमग्नौ कृणोति,' 'देवाः कपोत इषितो यदिच्छन्' इत्यादौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैव पठ्यमानत्वादित्याहुः। **भातेः।** भा दीप्तौ। भवानिति सर्वनामशब्दोऽयम्। **कठि।** कठ कृच्छ्रजीवने, चक तृप्तौ। कठोरः कठिनः पूर्णश्च। 'कठोरताराधिपलाञ्छनच्छविः' इति माघः। चकोरः पक्षिभेदः। **किशोरा।** शॄ हिंसायाम्। षह मर्षणे। 'किशोरोऽश्वस्य शावके। तैलपर्ण्योषधौ च

किंपूर्वस्य शृणातेष्टिलोपः किमोऽन्त्यलोपः। किशोरोऽश्वशावः। सहोरः साधुः।
६६ कपिगडिगण्डिकटिपटिभ्यः कोलच्। कपीति निर्देशान्नलोपः। कपोलः।
गडोलगण्डोलौ गुडकपर्यायौ। कटोलः कटुः। पटोलः। ६७ **मीनातेरूरन्**।
मयूरः। ६८ **स्यन्देः संप्रसारणं च**। सिन्दूरम्। ६९ **सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्**। सिनोतीति सेतुः। 'तितुत्र-' (सू ३११२)

स्याच्चित्रकण्ठे पारावतविहङ्गयोः' इति मेदिनी। **भातेर्डवतुः**। भातेरिति भा दीप्तावित्यस्य श्तिपा निर्देशः। **भवानिति**। सर्वनामशब्दोऽयम्। **कठिचकिभ्यामोरन्**। कठ कृच्छ्रजीवने, चक तृप्तौ, आभ्यामोरन् प्रत्ययः स्यात्। कठोरः चकोर इति रूपम्। **किशोरादयश्च**। एते ओरन्प्रत्ययान्ता निपात्यन्ते। **किंपूर्वस्येति**। किंपूर्वस्य शॄ हिंसायामिति धातोरोरन्। तस्मिन्परे शृणातेः टिलोपः किंशब्दान्तस्य मकारस्य लोपश्च निपात्यत इत्यर्थः। **सहोर इति**। षह मर्षणे इत्यस्मान्निपातनम्। **कपिगडि**। कपि चलने, गड सेचने, गडि वदनैकदेशे, कटे वर्षावरणयोः, पट गतौ, एषां द्वन्द्वात्पञ्चमी। एभ्यः कोलच्प्रत्ययो भवति। कपोलः गडोलः गण्डोलः कटोलः पटोलः। ननु कपि चलन इत्यस्य इदित्वान्नुम्स्यादित्यत आह **कपीति निर्देशादिति**। कम्पीति निर्देशे कर्तव्ये नलोपकरणपूर्वकं निर्देशः नलोपविवक्षार्थं भवतीति भावः। **मीनातेरूरन्**। गुणे अयादेशे मयूर इति रूपम्। **स्यन्देः संप्रसारणं च**। स्यन्दू प्रस्रवण इत्यस्माद् ऊरन्प्रत्ययो भवति, प्रकृतिभूतस्य स्यन्दू इत्यस्य संप्रसारणं च भवति। सिन्दूरमिति रूपम्। सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके' इति मेदिनी। **सितनिगमि**। षिञ् बन्धने, तनु विस्तारे, गम्लृ गतौ, मसी परिणामे, सच समवाये, अव रक्षणे, डु धाञ् धारणपोषणयोः, क्रुश आक्रोशे, एषां द्वन्द्वात्पञ्चमी। एभ्यस्तुन्प्रत्ययो भवतीत्यर्थः। सेतुः। ननु इडागमः

स्यात्तरुणावस्थसूर्ययोः' इति मेदिनी। **कपिगडि**। कपि चलने, गड सेचने, गडि वदनैकदेशे, कटे वर्षावरणयोः, पट गतौ। **कपोल इति**। केचित्तु सूत्रे कडि पठन्ति। कडि मदे। कण्डोलश्चण्डालः। 'चण्डालिका तु कण्डोलवीणा चण्डालवल्लकी' इत्यमरः। **पटोल इति**। पटोलं वस्त्रभेदे नौषधौ ज्यौत्स्न्यां तु योषिति' इति मेदिनी। कल्ल शब्दे। बाहुलकादतोऽप्योलच्। 'कल्लोलः पुंसि हर्षे स्यान्महत्सूर्मिषु वारिणः' इति मेदिनी। **स्यन्देः**। स्यन्दू प्रस्रवणे। 'सिन्दूरस्तरुभेदे स्यात्सिन्दूरं रक्तचूर्णके' इति मेदिनीविश्वप्रकाशौ। **सितनि**। षिञ् बन्धने, तनु विस्तारे, गम्लृ गतौ, मसी परिणामे, षच सेचने, अव रक्षणादौ, डुधाञ् धारणपोषणयोः, क्रुश आक्रोशे। 'सेतुर्नालौ कुमारके' इति मेदिनी। 'सेतुरालौ स्त्रियां पुमान्'

इति नेट् । तन्तुः । गन्तुः । मस्तु दधिमण्डम् । सप्यत इति सक्तुः । अर्थेषादिः । 'ज्वरत्वर-' (सू २६५४) इत्यूठ् । तत्र क्विक्तीत्यनुवर्तेत इति मते तु बाहुलकात् । ओतुर्बिडालः । धातुः । क्रोष्टा । ७० पः किच्च । पिबतीति 'पितुर्वह्नौ दिवाकरे' । ७१ अर्तेश्च तुः । अर्तेस्तुः स्यात् स च कित् । 'ऋतुः स्त्रीपुष्पकालयोः' । ७२ कमिमनिजनिगाभायाहिभ्यश्च । एभ्यस्तुः स्यात् । 'कन्तुः कन्दर्पचित्तयोः' । मन्तुरपराधः । जन्तुः प्राणी । 'गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेऽपि च' । भातुरादित्यः । 'यातुरध्वगकालयोः' । रक्षसि क्लीबम् । हेतुः कारणम् । ७३ चायः किः । 'केतुर्ग्रहपातकयोः' । ७४ आप्नोतेर्ह्रस्वश्च ।

स्यादित्यत आह तितुत्रेति नेडिति । अव रक्षण इत्यस्मात्तुनि आह ज्वरत्वरेत्यूठिति । अव् तु इति स्थिते वकारस्य संप्रसारणे उकारे गुणे ओतुरिति रूपम् । मतान्तरे आह बाहुलकादिति । क्रोष्टुशब्दात्तुप्रत्यये तृज्वत्क्रोष्टुः इत्यस्य प्रवृत्तेराह क्रोष्टेति । पः किच्च । पितुरिति । तुनः कित्वादित्वम् । अर्तेश्च तुः । ऋ गतौ । तुनि प्रकृते तुविधानं स्वरार्थम् । कमिमनिजनि । कमु कान्तौ, मन ज्ञाने, जनी प्रादुर्भावे, गै शब्दे, भा दीप्तौ, या प्रापणे, हि गतौ, एषां द्वन्द्वात्पञ्चमी । एभ्यस्तुप्रत्ययः स्यात् । तन्तुः मन्तुः जन्तुः गातुः भातुः यातुः हेतुरिति । कन्तुरिति पूर्वोक्तेन 'अर्जिदृशि-' इत्यादिसूत्रेण कुप्रत्ययतुकोर्निपातनात् सिद्धे पुनरुक्तिर्व्युत्पत्तिवैचित्र्याय । चायः किः । चायृ पूजानिशामनयोरित्यस्मात् तुप्रत्ययः, प्रकृतेः किरादेशश्च । गुणे केतुरिति रूपम् । आप्नोतेर्ह्रस्वश्च । आप्लृ व्याप्तावित्यस्मात् तुप्रत्ययः,

---

इत्यमरः । 'सूत्राणि नरि तन्तवः' इत्यमरः । 'मण्डं दधिभवं मस्तु' इति च । 'धातुर्ना नेन्द्रिये त्रिषु । शब्दयोनिमहाभूततद्गुणेषु रसादिषु । मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्थ्नि च' इति मेदिनी । 'श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः । इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः' इत्यमरः । पः किच्च । पा पाने अस्मात्तुन् स च कित् । कित्वाद् 'घुमास्था-' इतीत्त्वम् । अर्तेश्च तु । ऋ गतौ । तुनि प्रकृते अन्तोदात्तार्थं तुः क्रियते । 'ऋतुना यज्ञं य ऋतुर्जनीनाम्' इत्यादि । 'ऋतुर्वर्षादिषट्सु च । आर्तवे मासि च पुमान्' इति मेदिनी । 'ऋतुः स्त्रीकुसुमेऽपि च' इत्यमरः । कमिमनि । कमु कान्तौ, मन ज्ञाने, जनी प्रादुर्भावे, गै शब्दे, भा दीप्तौ, या प्रापणे, हि गतौ च । कमिग्रहणं प्रपञ्चार्थम् । 'अर्जिदृशि-' इत्यादिना कुप्रत्यये तुकि सिद्धत्वात् । मन्तुरिति । 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी । गातुर्ना कोकिले भृङ्गे गन्धर्वे त्रिषु रोषणे' इति मेदिनी । 'भातुर्ना किरणे सूर्ये' इति मेदिनी । चायः किः । चायृ पूजानिशामनयोः । अस्मात्तुर्धातोः किरादेशश्च । 'केतुर्नारुक्पताका-

अप्तुः शरीरम्। ७५ **वसेस्तुन्**। वस्तु। ७६ **अगारे णिच्च**। 'वेश्मभूर्वास्तुरस्त्रियाम्'। ७७ **कृञः क्तुः**। क्रतुर्यज्ञः। ७८ **एधिवह्योश्चतुः**। एधतुः पुरुषः। वहतुरनड्वान्। ७९ **जीवेरातुः**। 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे'। ८० **आतृकन्वृद्धिश्च**। जीवेरित्येव। 'जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले'। ८१ **कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः**। 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता'। चमूः। तनूः। धनूः शस्यम्। सर्ज सर्जने, सर्जूर्वणिक्। खर्ज व्यथने, खर्जूः पामा। ८२ **मृजेर्गुणश्च**। मर्जूः शुद्धिकृत्।

प्रकृतेर्ह्रस्वश्च भवति। **अप्तुः शरीरमिति**। **वसेस्तुन्**। वस निवास इत्यस्मात्तुन् स्यात्। वस्तु। **अगारे णिच्च**। अगारे वाच्ये वसधातोर्जायमानस्तुन्प्रत्ययो णिद्भवतीत्यर्थः। णित्त्वादुपधावृद्धिः। **कृञः क्तुः**। डु कृञ् करणे इति धातोः क्तुप्रत्ययो भवति। तस्य कित्त्वाद् गुणाभावे यणादेशे च क्रतुरिति रूपम्। **एधिवह्योश्चतुः**। एध वृद्धौ, वह प्रापणे, आभ्यां चतुः स्यात्। एधतुः वहतुः। **जीवेरातुः**। जीव प्राणने, अस्मादातुप्रत्ययः। जीवातुः। **आतृकन्वृद्धिश्च**। जीवेरित्यनुवर्तते। जीव प्राणने इत्यस्मादातृकन्प्रत्ययो भवति, प्रकृतेरिको वृद्धिश्च भवति। जैवातृक इति रूपम्। **कृषिचमितनि**। कृष विलेखने, चमु अदने, तनु विस्तारे, धन धान्ये, सृज विसर्गे इत्यस्य न ग्रहणं तस्य इका निर्देशेऽपि इकः कित्त्वाद् गुणाभावे सृजीत्येव निर्देष्टव्यत्वात्, किंतु सर्ज सर्जन इत्यस्य ग्रहणम्, खर्ज व्यथने, एषां द्वन्द्वात्पञ्चमी। रभसकोशमाह **कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मतेति**। 'कर्षूः पुमान्करीषाग्नौ' इति मेदिनी। चमूः सेना। **तनूरिति**।

विग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी। **आप्नोतेः**। आप्लृ व्याप्तौ। **अप्तुः शरीरमिति**। अभिलषितार्थश्चाप्यत्वात्। अतएव यागविशेषवाचकस्याऽप्तोर्यामशब्दस्याभिलषितार्थप्रापक इत्यवयवार्थमाहुः। **वसेः**। वस निवासे। **कृञः**। डुकृञ् करणे। क्तोः कित्त्वाद् गुणाभावे यणादेशः। 'क्रतुर्यज्ञे मुनौ पुंसि' इति मेदिनी। **एधिवह्योश्च तुः**। एध वृद्धौ, वह प्रापणे चित्त्वादन्तोदात्तः। 'स्योनं पत्ये वहतुं कृणुष्व' 'वहतुः पथिके वृषभे पुमान्' इति मेदिनी। **जीवेः**। जीव प्राणधारणे। **आतृकन्**। 'जैवातृकः पुमान् सोमे कृषकायुष्मतोस्त्रिषु' इति मेदिनी। **कृषिचमि**। कृष विलेखने चमु अदने, तनु विस्तारे, धन धान्ये। रभसकोशस्थमाह। **कर्षूः पुंसीत्यादि**। 'कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्पखातयोः' इति मेदिनी। 'चमूः सेनाविशेषे च सेनामात्रे च योषिति' इति मेदिनी। 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। 'सर्जूर्वणिजि विद्युति। स्त्रियां स्वर्गे विधौ रुद्रे' इति मेदिनी। 'खर्जूः कीटान्तरे वृत्तौ', 'खर्जूरीपा-

८३ **वहो धश्च** । 'वधूर्जायास्नुषास्त्रीषु' । ८४ **कषेश्छश्च** । कच्छूः पामा । ८५ **णित्कसिपद्यर्तेः** । कासूः शक्तिः । पादूश्चरणधारिणी । आरूः पिङ्गलः । ८६ **अणो डश्च** । आडूर्जलप्लवद्रव्यम् । ८७ **नञि लम्बेर्नलोपश्च** । 'तुम्ब्यलाबूरुभे समे' इत्यमरः । ८८ **के श्र एरङ् चास्य** । कशब्दे उपपदे शृणातेरूः स्यात् । एरङादेशः । 'कशेरूस्तृणकन्दे स्त्री' । बाहुलकादुप्रत्यये कशेरुः । क्लीबे पुंसि च । ८९ **त्रो दुट् च** । तरतेरूः स्यात्तस्य दुट् । 'तर्दूः

'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः । **मृजेर्गुणश्च** । 'मृजेर्वृद्धिः' इति वृद्ध्यभावः, ऊप्रत्ययसंनियोगेन गुणो विधीयते । मर्जूरिति रूपम् । **वहो धश्च** । वह प्रापण इत्यस्मादूप्रत्ययः । तत्संनियोगेन धातोर्धकारः अन्तादेशश्च । **वधूरिति** । 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च' इति विश्वः । **कषेश्छश्च** । कष हिंसायाम्, अस्मादूप्रत्ययो भवति, तत्संनियोगेन छकारश्चान्तादेशः । कच्छूरिति रूपम् । 'कच्छ्वां तु पाम पामा विचर्चिका' इत्यमरः । **णित्कसिपद्यर्तेः** । कस गतौ, पद गतौ, ऋ गतौ, एषां समाहारद्वन्द्वात्पञ्चमी । एभ्य ऊप्रत्ययः स्यात्, स च णिद् भवति । णित्कार्यं प्रवर्तयतीत्यर्थः । **कासूः शक्तिरिति** । 'कासूर्विकलवाचि स्यात् ।' इति मेदिनीकारः । **अणो डश्च** । अण शब्दे अस्मादूः स्यात्, स च णित् प्रकृतेर्डकारश्चान्तादेशो भवतीत्यर्थः । आडूरिति रूपम् । **नञि लम्बेर्नलोपश्च** । अवस्रंसनार्थकाद् लबिधातोः नञि उपपदे ऊप्रत्ययो भवति, स च णित्, धातोरिदित्वाद् लब्धस्य नकारस्य लोपश्च भवतीत्यर्थः । न लम्बते नावस्रंसते जले इत्यर्थेऽनेन ऊप्रत्ययेऽनुनासिकलोपे च 'अत उपधायाः' इत्यनेनोपधावृद्धौ अलाबूरिति रूपम् । **के श्र एरङ् चास्य** । शॄ हिंसायामित्यस्य श्र इति पञ्चम्यन्तम् । शेषं स्पष्टम् । कशेरुरिति कथम्? ऊप्रत्ययस्यैवानुशासनादित्यत आह **बाहुलकादिति** । **त्रो दुट् च** ।

दर्वी काण्डाम्' इति च । **मृजेः** । मृजू शुद्धौ । अस्मादूः स्याद्वृद्ध्यभावो गुणश्च । 'मर्जूः स्त्री शुद्धौ धावकेऽपि च' इति मेदिनी । **वहो धश्च** । वह प्रापणे । 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च' इति विश्वः । 'पृक्का महिला च वधूः' इति त्रिकाण्डशेषः । **कषेश्छश्च** । कषशिषेति दण्डके हिंसार्थोऽस्मादूः स्याच्छश्चान्तादेशः, 'कच्छ्वां तु पाम पामा विचर्चिका' इत्यमरः । **णित्कसि** । कस गतौ, पद गौ, ऋ गतौ । 'कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियाम्' इति मेदिनी । 'कासूः शक्त्यायुधे रुजि । बुद्धौ विकलवाचि स्यात्' इति हेमचन्द्रः । **अणो डश्च** । अण दण्डके शब्दार्थः । अस्मादूः स्यात्स च णिद् डश्चान्तादेशः । **नञि लम्बेः** । लबि अवस्रंसने । न लम्बते जले इत्यलाबूः । **के श्र** । शॄ हिंसायाम् । **त्रो दुट् च** । तॄ

स्यादारुहस्तकः'। ९० **दरिद्रातेर्यालोपश्च** । इश्च आश्च यौ, तयोर्लोपः। दर्दूः कुष्ठप्रभेदः। ९१ **नृतिशृध्योः कूः** । नृतूर्नर्तकः। शृधूरपानम्। ९२ **ऋतेरम् च** । ऋतिः सौत्रो धातुः। ततः कूरमागमश्च। रन्तूर्देवनदी सत्यवाक् च। ९३ **अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः** । एते कूप्रत्ययान्ता निपात्यन्ते। अन्दूर्बन्धनम्। दृभी ग्रन्थे, निपातनान्नुम्। दृम्भूः। अनुस्वाराभावोऽपि निपा-

---

तॄ प्लवनतरणयोरित्यस्माद् ऊप्रत्ययः, दुडागमश्च। अयं चागमः प्रत्ययस्य। नन्वेवं प्रत्ययस्य वलादित्वाद् आर्धधातुकत्वाच्च इडागमो दुर्वार इति वाच्यम्, 'नेड्वशि कृति' इति निषेधात्। केचित्तु त्रो दुक्चेति पठित्वा ऊप्रत्ययसंनियोगेन प्रकृतेर्दुगागममाहुः। तेषां यद्यपि इडागमाभावः सिद्धः, तथापि इगन्तत्वाभावादङ्गस्य गुणो न स्यात्। नच 'पुगन्त—' इति गुणो भविष्यतीति वाच्यम्, तॄधातोः ॠकारान्तत्वेन लघूपधत्वाभावात्। यदि कथंचिदेतन्मते आग्रहस्तर्हि दुक् चेत्यत्र चकारो दुगागमात्पूर्वं यत्कार्यं भवितव्यं तदपि भवतीति बोधनार्थमिति क्लिष्टकल्पनं शरणम्। **दरिद्रातेर्यालोपश्च** । दरिद्रा दुर्गतावित्यस्मादूप्रत्ययः, यालोपश्च भवतीत्यर्थः। यालोप इत्येतद्विवृणोति **इश्च आश्चेति** । या औ इत्यत्र वृद्धौ यौ, तयोर्लोप इत्यर्थः। **नृतिशृध्योः कूः** । नृती गात्रविक्षेपे, शृधु हिंसायाम्, आभ्यां कूप्रत्ययः स्यात्। **ऋतेरम् च** । ऋतिः सौत्रो धातुः। तस्मात्कूप्रत्ययः स्यात्, प्रकृतेरमागमश्चेत्यर्थः। ऋतू इति स्थिते अमागमे ऋकारात्परे सति ऋकारस्य यणि च रन्तूरिति रूपम्। **अन्दूदृम्भूजम्बू** । अदि बन्धने, दृभी ग्रन्थे ईदित्, जन जनने, ला आदाने कफपूर्वः, डु धाञ् धारणपोषणयोः कर्कपूर्वः, षोऽन्तकर्मणि दिधिपूर्वः, एषां समाहारद्वन्द्वात्प्रथमा। एते कूप्रत्ययान्ता निपात्यन्ते। अदिधातोरि-

---

प्लवनतरणयोः। **तर्दूरिति** । 'नेड्वशि—' इति नेट्। वरमनादाविति परिगणनं तु बाहुलकाश्रीयते इत्याहुः। केचित्तु इडभावाय 'त्रो दुक् च' इति पाठित्वा धातोर्दुगागममाहुः। तेषां तु धातोर्गुणो दुर्लभः। दुगागमात्पूर्वं यत्प्राप्तं तदपि भवतीत्येवं चकारबलेन व्याख्याय वा गुणः साधनीयः। **दरिद्रातेः** । दरिद्रा दुर्गतौ। **इश्च आश्चेति** । भोजदेवस्तु र्यालोप इति रेफादिकं पदं छित्त्वा द्वेधा व्याख्यातवान्। रिश्च आश्चेति व्याख्याने दद्रूः। रश्च इश्च आश्चेति व्याख्याने तु 'अन्त्यबाधेऽन्त्यसदेशस्य' इति द्वितीयस्यैव रेफस्य लोपाद्दर्दूरिति। मृगय्वादित्वात्कुप्रत्यये दर्दुरित्यन्ये। 'दर्द्रुणो दद्रुरोगी स्यात्' इत्यमरः। इत्थं चत्वारि रूपाणि। **नृति** । नृती गात्रविक्षेपे, शृधु शब्दकुत्सायाम्। **अन्दूदृम्भू** । अदि बन्धने। 'नृतिशृध्योः कूः' इत्यत्रादिग्रहणं न कृतं वैचित्र्यार्थमित्याहुः। ला आदाने कफपूर्वः। डुधाञ् धारणादौ कर्कपूर्वः। षोऽन्तकर्मणि दिधि-

---

१—कर्तरि तव्यदयमपाणिनीयः, बाहुलकाद्वा बोध्यः।

तनादित्येके, दम्भूः। जनेर्बुक् जम्बूः। जमु अदने, इत्यस्येत्येके। बाहुलकाद्ध्र-
स्वोऽपि, जम्बुः। कफं लाति कफेलूः श्लेष्मातकः। निपातनादेत्वम्। कर्कं
दधाति कर्कन्धूर्बदरी, निपातनान्नुम्। दिधिं धैर्यं स्यति त्यजतीति दिधिषूः
पुनर्भूः। केचित्तु 'अन्दूदम्फूजम्बूकम्बू' इति पठन्ति। 'दम्फ उत्क्लेशे' दम्फूः
सर्पजातिः। 'कमेर्बुक्' कम्बूः परद्रव्यापहारी। ९४ **मृग्रोरुतिः**। मरुत्। गरु-
त्पक्षः। ९५ **ग्रो मुट् च**। गिरतेरुतिस्तस्य च मुट्। गर्मुत्सुवर्णं लताविशेषश्च।

दित्त्वान्नुम्। दभीधातोरीदित्वात् कथं नुमित्यत्राह **निपातनान्नुमिति**। केचिद्
दन्भूरिति पठन्ति, तन्मतेऽनुस्वाराभावोऽपि निपातनसाध्य इत्याह **अनुस्वाराभाव
इति**। जनधातोराह **जनेर्बुगिति**। बुगागमोऽपि कूप्रत्ययसंनियोगेन विधीयत
इत्यर्थः। ततश्चानुस्वारे परसवर्णे मकारे जम्बूरिति रूपम्। ननु कथं जम्बुशब्द
इत्यत्राह **बाहुलकादिति**। **मृग्रोरुतिः**। मृङ् प्राणत्यागे, गॄ निगरणे, आभ्यां
उतिप्रत्ययः स्यात्। मरुत्। मरुतशब्दोऽप्यस्ति। तथा च विक्रमादित्यकोशः 'मरुतः
स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति एतेन 'कोऽयं वाति स दाक्षिणात्यमरुतः'
इति कविराजश्लोके मरुत इत्यनुपपन्नमिति मत्वा दाक्षिणात्यपवन इति पठन्तः
प्रत्युक्ताः। गरुत्मानित्यत्र 'मादुपधायाः–' इत्यनेन वत्वाभावस्तु अस्य यवादित्वात्
सिद्धः, अयवादिभ्य इति निषेधात्। **ग्रो मुट् च**। गॄ निगरणे इत्यस्माद् उतिः

पूर्वः षत्वं च। **अन्दुर्बन्धनमिति**। 'अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च'
इति मेदिनी। 'अन्दुको हस्तिनि गदे' इत्यमरः। संज्ञायां कन्। 'केऽणः' इति
ह्रस्वः। केचित्तु अम गतौ अस्य दुक्, अन्दूर्वृद्धिरिति व्याचख्युः। **दभी ग्रन्थ
इति**। तुदादिरयम्। दभतीति दम्भूः संदर्भकर्तेत्यर्थः। कथक इत्यन्ये। कैयटमतानु-
रोधेनास्य रूपाणि हूहूवदित्युक्तम्। माधवादयस्तु दलशब्दे उपपदे भुवः कूप्रत्यय
उपपदस्य दमादेशो निपात्यते। यद्वा दडार्थकं दमिति नान्तमव्ययमुपपदम्। दम्भूस्तु
सर्पः कपिर्वेति व्याख्याय 'दनकर–' इति यणि वर्षाभूवद्रूपमस्येत्याहुः। **ह्रस्वोऽपीति**।
अत एव विक्रमादित्येनोक्तं 'तस्या जम्बोः फलरसो नदीभूय प्रवर्तते' इति। केचित्तु
'परिणतजम्बुफलोपभोगहृष्टा' इति भारविप्रयोगं ह्रस्वान्तत्वे साधकत्वेनोदाजहुस्तन्न,
'इको ह्रस्वो ङ्य–' इत्युत्तरपदाधिकारस्थह्रस्वविधायकसूत्रेण गतार्थत्वात्। **दिधि-
मिति**। केचित्तु दधातेरित्वं द्वित्वं षुक् च निपात्यते। दधात्यसौ दिधिषूरित्याहुः।
पुनर्भूरिति। 'पुनर्भूर्दिधिषूरूढा द्विः' इत्यमरः। द्विरूढा द्विवारं विवाहितेत्यर्थः।
उज्ज्वलदत्तोक्तं पाठमाह **केचित्त्विति**। एतच्च कैयटमाधवादिग्रन्थविरुद्धम्।
अत एव 'दम्भूः स्त्री सर्पचक्रयोः' इति भ्रान्तो मेदिनी। **मृग्रोः**। मृङ् प्राणत्यागे, गॄ

९६ हृषेरुलच् । 'हर्षुलो मृगकामिनोः' । बाहुलकाच्चटतेः, चटुलं शोभनम् । ९७ हृसृरुहियुषिभ्य इतिः । 'हरित्ककुभि वर्णे च तृणवाजिविशेषयोः' । सरिद्स्त्री । रोहित् मृगविशेषस्य स्त्री । युष इति सौत्रो धातुः । 'ऋरयस्य रोहित् पुरुषस्य योषित्' इति भाष्यम् । ९८ ताडेर्णिलुक् च । ताडयतीति

स्यात् तत्संनियोगेन मुडागमश्च । गर्मुदिति रूपम् । 'गर्मुत् स्त्री स्वर्णलतयोः' इति कोशादाह स्वर्णं लताविशेषश्चेति । हृषेरुलच् । हृष हृष्टौ, अस्माद् उलच्प्रत्ययः स्यात् । हर्षुल इति । लघूपधगुणः । चटुल इति रूपं साधयितुमाह बाहुलकादिति । चटतेरिति । चटे वर्षावरणयोरित्यस्मादित्यर्थः । हृसृरुहियुषिभ्य इतिः । हृञ् हरणे, सृ गतौ, रुह बीजजन्मनि, युषि, एषां द्वन्द्वात्पञ्चमी । एभ्य इतिप्रत्यय इत्यर्थः । इकारस्तकारस्येत्संज्ञातः परित्राणार्थः । हरिच्छब्दार्थं विवरिषुर्विश्वकोशमाह हरित्ककुभीति । 'हरिद्दिशि स्त्रियां पुंसि हर्षवर्णविशेषयोः' इति मेदिनीकारः । सरिदिति सुप्रसिद्धम् । रोहिच्छब्दार्थमाह मृगविशेषस्य स्त्रीति । 'रोहिन्मृग्यां लताभेदे' इति मेदिन्याम् । ननु युषधातुर्धातुपाठे नोपलभ्यत इत्यत आह युष धातुः सौत्र इति । ताडेर्णिलुक् च । तड ताडने चुरादिः । अस्माद्धातोः इतिप्रत्ययः स्याद् णिलुक् चेति सूत्रार्थः । तडिदिति । 'तडित्सौदामनी विद्युत्' इत्यमरः । 'णेरनिटि' इति सूत्रेणैव लोपे सिद्धेऽनेन लुग्विधानं उपधावृद्ध्यभावार्थम् । लोपे हि प्रत्ययलक्षणेन उपधावृद्धिर्भवेदेव । अत एव च भाव्यत इत्यादौ णिलोपेऽपि वृद्धिर्भवति । ननु णयन्तस्य केवलस्य वा तडधातोः सेट्क्त्वादिडागमेनैव रूपं सिध्यति, इडाद्यार्धधातुकत्वेन णेर्लोपाभावेऽपि अनेन लुग्विधानात् ।

निगरणे, आभ्यामुतिरितीकारस्तकारस्येत्संज्ञापरित्राणार्थः । मरुदिति । प्रज्ञादित्वाद्दणि मारुतोऽपि । मरुतशब्दोऽप्यव्युत्पन्नोऽस्ति । तथा च विक्रमादित्यकोशः— 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति 'कोऽयं वाति स दाक्षिणात्यमरुतः' इति कविराजश्लोकेऽनुपपत्तिं मत्वा दाक्षिणात्यपवन इति पाठं केचित्कल्पयन्त्यलक्षणा इति वर्णविवेकः । गरुदिति । यवादिरयम् । तेनास्मात्परस्य मतुपो मस्य 'झयः' इत्यनेन वत्वं न । गरुत्मान् । गर्मुदिति । 'गर्मुत्स्त्री स्वर्णलतयोः' इति मेदिनी । हृषेः । हृष तुष्टौ । चटतेरिति । चटे वर्षावरणयोः । हृसृ । हृञ् हरणे, सृ गतौ, रुह बीजजन्मनि । विश्वकोशस्थमाह हरिदिति । 'हरिद्दिशि स्त्रियां पुंसि हर्षवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च' इति मेदिनी । ऋश्यस्येति एतेन 'गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा' इति पुष्पदन्तप्रयोगो व्याख्यातः । 'रोहिन्मृग्यां लताभेदे स्त्री नार्के' इति मेदिनी । ताडेः । तड आघाते णयन्तः ।

तडित्। ९९ शमेर्ढः। बाहुलकादित्संज्ञा एयादेश इट् च न। 'शण्ढः स्यात्पुंसि गोपतौ'। शण्ढः क्लीबः। १०० कमेरठः। कमठः। 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी। बाहुलकाज्जरठः। १०१ रमेर्वृद्धिश्च। रामठं हिङ्गु। १०२ शमेः खः। शङ्खः। १०३ कणेष्ठः। कण्ठः। १०४ कलस्तृपश्च। तृपतेः कलप्रत्ययः, चात्तृफतेः। तृपला लता। 'तृफला तु फल-

---

ततश्च तिप्रत्यय एव विधीयतामिति वाच्यम्, तिप्रत्ययमात्रविधाने तितुत्रेति इण्निषेधप्रसङ्गात्। तस्माद्यथोक्तमेव रमणीयम्। **शमेर्ढः**। ननु ढ प्रत्यये 'चुटू' इत्यनेन इत्संज्ञा ढकारस्य दुर्वारा। किं च आयनेयीतिसूत्रेण एयादेशश्च दुर्वारः। किंच वलाद्यार्धधातुकत्वादिडागमश्च दुर्वारः। न च ढप्रत्ययस्य वशादिकृत्त्वाद् 'नेड्वशि कृति' इति निषेधो भविष्यतीति वाच्यम्, तस्मिन्सूत्रे नेड्वरमनादाविति परिगणितत्वात्। एवं च शण्ढ इति रूपमसाध्येवेति शङ्कायामाह **बाहुलकादिति**। **कमेरठः**। कमु कान्तौ, अस्माद् अठप्रत्ययः स्यात्। कमठ इति रूपम्। जरठशब्दायाह **बाहुलकादिति**। जॄ वयोहानावित्यस्मादठप्रत्ययः। 'जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति मेदिनी। **रमेर्वृद्धिः**। रमु क्रीडायामित्यस्मादठप्रत्ययः वृद्धिश्चेत्यर्थः। रामठमिति रूपम्। **शमेः खः**। शम उपशमे इत्यस्माद्धातोः खप्रत्ययः। बाहुलकादीनादेशाभावः। 'शङ्खो निधौ ललाटास्थि' इत्यमरः। **कणेष्ठः**। कण निमीलने इत्यस्मात् ठप्रत्ययो भवति। कण्ठः। 'कण्ठो गले संनिधाने ध्वनौ मदनपादपे' इति मेदिनी। **कलस्तृपश्च**। तृप प्रीणन इत्यस्माद् धातोः कलप्रत्ययः। तृपलेति रूपम्। तृफलेति रूपं साधयति **चादिति**। चकारः तृफधातोः समुच्चायक

'तडित्सौदामनी विद्युत्' इत्यमरः। **शमेः**। शम उपशमे। **बाहुलकादिति**। यद्यपि 'नेड्वशि कृति' इत्यनेनैव इडभावस्य सिद्धत्वादिट् च नेत्येतदयुक्तं तथापि नेड्वरमनादाविति परिगणनाद्बहुलग्रहणमाश्रित्यैव इडभावोऽपि साधितः। 'शण्ढः स्यात्पुंसि गोपतौ। आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' इति मेदिनी। **कमेः**। कमु कान्तौ। 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी। **जरठ इति**। जॄ वयोहानौ। 'जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति विश्वमेदिन्यौ। 'जरठः कठिने जीर्णे' इति वैजयन्ती। **रमेः**। रम क्रीडायाम्। **शमेः**। शम उपशमे। 'शङ्खो निधौ ललाटास्थि कम्बौ न स्त्री' इत्यमरः। 'शङ्खः कम्बौ नखोषिधा भालास्थिनिधिभिन्नखे' इति मेदिनी। **कणेः**। 'कण्ठो गले सन्निधाने ध्वनौ मदनपादपे' इति विश्वमेदिन्यौ। **कल**। तृप प्रीणने। **फलत्रिके इति**। 'तृपला त्रिफला च सा' इति विश्वः। त्रिफलाशब्दसमानार्थस्तृपलाशब्द इति 'द्विगोः'

त्रिके'। १०५ **शपेर्बश्च**। शबलः। १०६ **वृषादिभ्यश्चित्**। वृषलः। पललम्। बाहुलकाद् गुणः। सरलः। तरलः। 'कमेर्बुक् (च)' (गण ११६) कम्बलः। मुस खण्डने, मुसलम्। 'लङ्गेर्वृद्धिश्च' (गण ११७) लाङ्गलम्। कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् (च)' (गण ११८) कुट्मलः। कुडेरपि, कुड्मलः। कश्मलम्। बाहुलकाद् गुणः, कोमलम्। १०७ **मृजेष्टिलोपश्च**।

इति भावः। **शपेर्बश्च**। शप आक्रोशे इत्यस्मात् कलप्रत्ययो भवति। धातोः पकारस्य बकारश्चान्तादेश इत्यर्थः, शबल इति, रूपम्। **वृषादिभ्यश्चित्**। वृष सेचने, पल गतौ, इत्यादिभ्यः कलप्रत्ययः। स च चिद्भवति। चित्त्वं स्वरार्थम्। नन्वेवमपि सरल इत्यादौ कथं गुणः, प्रत्ययस्य कित्त्वादित्यत आह **बाहुलकादिति**। कम्बल इत्यत्र प्रक्रियामाह **बुगिति**। **लङ्गेर्वृद्धिश्च**। लगि गतौ इत्यस्मात्कलप्रत्ययो भवति, प्रकृतेर्वृद्धिश्च। लाङ्गलमिति रूपम्। **कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्**। कुट कौटिल्ये, कश गतिशासनयोः, कु शब्दे, एषां द्वन्द्वात्पञ्चमी। एभ्यः कलप्रत्ययो भवति, तस्य मुडागमश्च भवतीत्यर्थः। कुट्मलमित्येव रूपम्। कुड्मलशब्दस्तर्हि असाधुरित्याशङ्कायामाह **कुडेरपीति**। बाहुलकादिति भावः। ननु कोमलमिति कथम्, कलप्रत्ययस्य कित्त्वेन गुणासंभवादित्यत आह **बाहुलकादिति**। एवमन्येऽपि कोसलादयः शब्दा बोध्याः। **मृजेष्टिलोपश्च**। कलप्रत्ययस्तत्संनियोगेन टेः ऋज् इत्यस्य लोपः। मलमिति

इति सूत्रे रचितः। **शपेः**। शप आक्रोशे। **वृषादिभ्यः**। वृषु सेचने, पल गतौ, सृ गतौ, तॄ प्लवनतरणयोः। 'शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः। 'वृषलस्तुरगे शूद्रे' इति हेमचन्द्रः। 'पललं तिलचूर्णे च पिङ्के मांसे नपुंसकम्। ना राक्षसे' इति मेदिनी। फलप्रत्ययस्य कित्त्वादाह **बाहुलकादिति**। 'सरलः पूतिकाष्ठे नाऽथोदारावक्रयोस्त्रिषु' इति मेदिनी। 'सरला विरलायन्ते घनायन्ते कलिद्रुमाः। न शमी न च पुन्नागा अस्मिन्संसारकानने' इत्यभियुक्तप्रयोगः। **कमेः**। कमु कान्तौ। अस्माद् वृषादित्वेन कलप्रत्यये बाहुलकादित्यनुषज्यत इति बुक् 'कम्बलो नागराजे स्यात्सास्नाप्रावारयोरपि। क्रमावप्युत्तरासङ्गे सलिले तु नपुंसकम्' इति मेदिनी। 'मुसलं स्यादयोऽग्रे च पुंनपुंसकयोः स्त्रियाम् तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' इति मेदिनी। मूर्धन्यमध्योऽप्ययमिति वर्णदेशना। मुस खण्डन इति धातोर्दन्त्यान्तेषु मूर्धन्यान्तेषु च बोपदेवादिभिः पाठितत्वात्। उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः। अतएव 'मुसलो मुषलोऽपि च' इति विश्वकोशे। मुशलोऽपि चेति पाठान्तरम्। **लङ्गे**। लगि गतौ अस्मात्कलप्रत्यये बाहुलकादित्यनुषङ्गाद्वृद्धिरिति भावः।

मलम्। १०८ चुपेरच्चोपधायाः। चपलम्। १०९ शकिशम्योर्नित्। शकलम्। शमलम्। ११० छो गुग्घ्रस्वश्च। छगलः। प्रज्ञादित्वाच्छागलः। १११ अमन्ताड्डः। दण्डः। रण्डा। खण्डः। मण्डः। वण्डः छिन्नहस्तः।

रूपम्। 'मलोऽस्त्री पापविट् किट्टे कृपणे त्वभिधेयवत्' इति मेदिनी। **चुपेरच्चोपधायाः**। चुप मन्दायां गतौ, अस्माद्धातोः कलप्रत्यये उपधाया उकारस्य अकारे चपल इति रूपम्। **शकिशम्योर्नित्**। शक्लृ शक्तौ, शम उपशमे, आभ्यां कलप्रत्ययो निच्च भवति। शकलं शमलमिति रूपम्। **छो गुक् ह्रस्वश्च**। छो छेदने, अस्मात्कलप्रत्ययः गुगागमः प्रकृतेरवयवस्याकारस्य ह्रस्वश्च भवतीत्यर्थः। ननु कथं छागल इति, अनेन ह्रस्वस्य दुर्निवारत्वादित्यत आह **प्रज्ञादित्वादिति**। 'प्रज्ञादिभ्यश्च' इत्यणि छागल इति भवतीत्यर्थः। स्वार्थिकोऽयं तद्धितप्रत्ययः। **अमन्ताड्डः**। अम् प्रत्याहारः। अमन्ताद् धातोर्डप्रत्ययः स्यात्। **दण्ड इति**।

एवमग्रेऽपि। मुडागमो बाहुलकादेव। **कुटिकशि**। कुट कौटिल्ये, कश गतिशासनयोः, कु शब्दे, अस्मात्कलप्रत्यये गुणो नेत्याशङ्कयाह **बाहुलकादिति**। 'कोमलं मृदुलं मृदु'। बाहुलकादन्यत्रापि बोध्यः। तद्यथा—कुस श्लेषणे। दन्त्यान्तोऽयम्। बोपदेवमते तु तालव्यान्तोऽपि, गुणः कोशलः कोसलो वा देशविशेषः। 'वृद्धेत्कोसला—' इति सूत्रे तु दन्त्यान्त एव सांप्रदायिकः। संब संबन्धे, शंब च। संबलं शंबलम्। 'शंबलोऽस्त्री संबलवत् कुलपाथे च मत्सरे' इति मेदिनी। कदि आह्वाने नलोपः। गौरादित्वान्ङीषि कदली। 'मन्दान्दोलितकर्पूरकदलीदलसंज्ञया। विश्रमाय श्रमापन्नानाह्वयन्तीमिवाध्वगान्' इति काशीखण्डम्। अजादेराकृतिगणत्वाट्टाबपि। कदला कदलौ पृश्न्यां कदली कदले पुनः। रम्भावृक्षेऽथ कदली पताकामृगभेदयोः। कदली बिम्बिकायां च' इति मेदिनी। कुश इति सौत्रो धातुः। 'कुशलः शिक्षिते त्रिषु। क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसके' इति मेदिनी। कमु कान्तौ। कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः' इति विश्वमेदिन्यौ। मडि भूषायाम्। 'मण्डलं परिधौ कोठे देशे द्वादशराजके' इति मेदिनी। 'कोठो मण्डलकं क्लीबे' इत्यमरः। बिम्बोऽस्त्री मण्डलं त्रिषु' इति च। **मृजेः**। मृजू शुद्धौ। 'मलोऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत्' इति मेदिनी। **चुपेः**। चुप मन्दायां गतौ। 'चपलः पारदे मीने चोरके प्रस्तरान्तरे। चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषु च। नपुंसके तु शीघ्रं स्याद्वाच्यवत्तरले चले' इति मेदिनी। **शकिशम्योः**। शक्लृ शक्तौ, शम उपशमे। शकलं खण्डे रोहितादीनां त्वचि च। तद्योगात् शकली मत्स्यः। मत्स्यान् शकलानिति भाष्यम्। 'शकलं त्वचि खण्डे

अण्डः । बाहुलकात्सत्वाभावः । षण्डः संघातः । तालव्यादिरित्यपरे । शण्डः । गण्डः । चण्डः । पण्डः क्लीबः । पण्डा बुद्धिः । ११२ कादिभ्यः कित् । कवर्गादिभ्यो डः कित्स्यात् । कुण्डम् । काण्डम् । गुक् गुडः । घुण भ्रमणे,

---

दमु उपशमे अस्माड्डप्रत्ययः । 'नेड्वशि कृति' इति निषेधादिडागमो न । बाहुलकात् 'चुटू' इतीत्संज्ञा न । 'दण्डोऽस्त्री लगुडेऽपि स्यात्' इत्यमरः । रण्डेति । रमु क्रीडायाम् इत्यस्माड्डप्रत्ययः । 'रण्डा मूषकपर्ण्यां च विधवायां च योषिति' इति मेदिनी । खण्ड इति । खनु अवदारणे । 'खण्डोऽस्त्री शकले चेक्षुविकारमणिभेदयोः' इति कोशः । मण्ड इति । मन ज्ञान इत्यस्माड्डप्रत्ययः । 'मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि' इति मेदिनी । वण्ड इति । वन संभक्तावित्यस्माद् डप्रत्ययः । अण्ड इति । अम गत्यादिषु । षण्ड इति । षणु दाने इत्यस्माड्डप्रत्ययः । 'धात्वादेः षः सः' इति सत्वमाशङ्क्याह बाहुलकादिति । गण्ड इति । गम्लृ गतौ । चण्ड इति । चण दाने । पण्ड इति । पण व्यवहारे स्तुतौ च । एवं फाण्ड इत्यादिरूह्यः । कादिभ्यः कित् । कुः कवर्गः, तदादिभ्यो धातुभ्यः जायमानो डप्रत्ययः कित्स्यात् । कुण्डमिति । कुण शब्दोपकरणयोः, डप्रत्ययस्य कित्वाद् न गुणः । 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घस्तु न भवति, संज्ञापूर्वकविधेर-

---

स्याद्भागवस्तुनि वल्कले' इति मेदिनी । छो गुक् । छो छेदने । 'छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके' इति मेदिनी । अमन्ताड्डः । अमिति प्रत्याहारः, दमु उपशमे, रमु क्रीडायाम्, खनु अवदारणे, मन ज्ञाने, वन संभक्तौ, अम गत्यादिषु, षणु दाने, गम्लृ गतौ, चण दाने, पण व्यवहारे स्तुतौ च । काशिकायां तु त्रिभ्य एव कणमाः स्युरित्युक्तम् । अम् प्रत्याहारस्तु न स्वीकृतः । अष्टाध्याय्यां तस्य विषयाभावात् । दण्ड इति । बाहुलकात् 'चुटू' इति नेत्संज्ञा । 'दण्डोऽस्त्री लगुडोऽपि स्यात्' इत्यमरः । 'रण्डा मूषकपर्ण्यां च विधवायां च योषिति । खण्डोऽस्त्री शकले नेक्षुविकारमणिभेदयोः । मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि । चण्डा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते' । अमन्ति अनेनेति अण्डः प्राण्यवयवः । 'षण्डः पद्मादिसंघाते वर्तते न स्त्री स्याद् गोपतौ पुमान्' । शडि रुजायाम्, अस्माद् घञि शण्डशब्दस्तालव्यादिरपि संघाते वर्तते इत्याशयेन मतान्तरमाह तालव्यादिरित्यपरे इति । 'गण्डः स्यात्पुंसि खड्गिनि । चिह्नवीरकपालेषु हयभूषणबुद्बुदे । चण्डो ना तिन्तिणीवृक्षे यमकिंकरदैत्ययोः । चण्डी कात्यायनी देव्यां हिंस्रा कोपनयोषितोः । पण्डः षण्डे धियि स्त्री स्यात्' इति मेदिनी । फण्ड इति । फण गतौ फण्डः । प्रज्ञादित्वादण् । फाण्डमुदरम् । कादिभ्य कित् । कुण शब्दोपकरणयोः ।

घुण्डो भ्रमरः। **११३ स्थाचतिमृजेरालज्वालञालीयचः**। तिष्ठतेरालच्। स्थालम्, स्थाली। चतेर्वालञ्। चात्वालः। मृजेरालीयच्, मार्जालीयो बिडालः। **११४ पतिचण्डिभ्यामालञ्**। पातालम्। चण्डालः। प्रज्ञादित्वा-

निल्यत्वादिति भावः। **काण्डमिति**। कमु कान्तावित्यस्माद् डप्रत्यये अनुनासिकस्य क्वीति दीर्घः। अनित्यत्वाश्रयणं तु लक्ष्यानुरोधादिति भावः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। गुड्धातोर्डप्रत्यये गुड इति रूपम्। 'गुडो गोलेक्षुपाकयोः' इत्यमरः। **घुण्ड इति**। कित्वाद्गुणाभावः। **स्थाचतिमृजेराल-ज्वालञालीयचः**। ष्ठा गतिनिवृत्तौ, चते याचने, मृजू, शुद्धौ, एभ्यः क्रमाद् आलच्, वालञ्, आलीयच् एते प्रत्ययाः स्युः। स्थालम् चात्वालः मार्जालीय इति रूपम्। अत्र लचा सिद्धे आलचि आकारोच्चारणं निष्फलमेव। **स्थालमिति**। 'स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटलेखयोः' इति मेदिनी। **चात्वाल इति**। 'चात्वालो यज्ञकुण्डे स्यात्' इति मेदिनी। **मार्जालीय इति**। 'मार्जालीयः स्मृतः शूद्रे बिडाले कायशोधने' इति मेदिनी। **पतिचण्डिभ्यामालञ्**। पत्लृ गतौ, चडि कोपे, आभ्यामालञ्प्रत्ययः स्यात्। आलञो ञित्वादुपधावृद्धिः। पातालः। पतन्त्यस्मिन्निति

कुण्डमिति। इह कुण्डमित्यत्र प्रायेणानुस्वारमेव लिखन्ति तत्तु प्रमादकृतम्। एवमन्यत्रापि बोध्यम्। डस्य कित्वान्न गुणः। 'अनुनासिकस्य क्विझलोः–' इति दीर्घस्तु न भवति, बाहुलकात्संज्ञापूर्वकविधेरनित्यत्वाद्वेत्याहुः। 'कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान्। पिठरे तु न ना' इति मेदिनी। 'अमृते जारजः कुण्डो मृते भर्तरि गोलकः' इत्यमरः। **काण्डमिति**। कमु कान्तौ। 'अनुनासिकस्य–' इति दीर्घः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। अर्वा कुत्सितः। अत एव 'काण्डं स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः। कुत्सिते वृत्तभिन्नाडीवृन्दे रहसि न स्त्रियाम्' इति मेदिनी। गुङ् अव्यक्ते शब्दे। गुडो गोलेक्षुपाकयोः' इत्यमरः। गुडा स्नुही, तद्वत्केशा यस्य स गुडाकेशः शिवः जटाधारित्वात्। 'गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्यां च कथिता गुडिकायां च योषिति' इति मेदिनी। गुडाका निद्रा तस्या ईश इति वा जितेन्द्रियत्वादिति भावः। **स्थाचति**। ष्ठा गतिनिवृत्तौ, चते याचने, मृजू शुद्धौ। लचा सिद्धे आलच आकारश्चिन्त्यप्रयोजनः। चित्स्वरं बाधित्वा पक्षे आद्युदात्तार्थमित्येके। 'स्थालं भाजनभेदेऽपि स्थाली स्यात् पाटलेखयोः' इति मेदिनी। चात्वालो यज्ञकुण्डे स्याद्दर्भे च' इति विश्वः। 'मार्जालीयः स्मृतः शूद्रे बिडाले कायशोधने' इति मेदिनी। **पतिचण्डि**। पत्लृ गतौ, कोपे। पतन्त्यस्मिन्नधर्मेणेति पातालम्। उपधावृद्धिः।

दधि चाण्डालोऽपीत्येके । ११५ तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् । तमालः । विशालः । बिडालः । मृणालम् । कुलालः । कपालम् । पलालम् । पञ्चालाः । ११६ पतेरङ्गच पक्षिणि । पतङ्गः । ११७

पातालः । चण्डालः । इदित्वान्नुमि अदुपधत्वाभावान्न वृद्धिः । चाण्डाल इति तु प्रज्ञादित्वाद् बोध्य इति उज्ज्वलदत्तादयो वदन्ति, तदाह एके इति । अत्रास्वरसबीजं तु 'कुलालवरुडनिषादचण्डालामित्रेभ्य–' इति वार्तिकतद्भाष्यविरोध एव । तत्र ह्येतेभ्यः स्वार्थेऽञ् विहितः । तमिविशि । तमु काङ्क्षायाम्, विश प्रवेशने, बिड आक्रोशे, मृण हिंसायाम्, कुल संस्त्याने, कपि चलने, पल गतौ, पचि विस्तारे, एतेषां द्वन्द्वात्पञ्चमीबहुवचनम् । तमाल इति । 'तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे' इति मेदिनी । विशालः । बिडालः । 'आखुर्बिडालो मार्जारः' इत्यमरः । मृणालः । कुलालः । 'कुलालः ककुभे कुम्भकारे' इति मेदिनी । पतेरङ्गच् पक्षिणि । पत्लृ

'अधोभुवनपातालं बलिसद्म रसातलम्' इत्यमरः । 'पातालं नागलोके स्याद्विवरे वडवानले' इति मेदिनी । चण्डाल इति । इदित्वान्नुमि अदुपधत्वाभावान्न वृद्धिः । माधवेन तु 'पतिचण्डिभ्यामालन्' इति नित्तं पठित्वा पातालशब्दे बाहुलकाद् वृद्धिमुक्त्वा वृद्ध्यर्थमालञिति केषांचित्पाठे तु चण्डालशब्देऽपि वृद्धिः स्यादित्युक्तं तदतिरभसात् । एके इति । उज्ज्वलदत्तादयः । एतच्च 'कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यश्छन्दसि' इति चण्डालात्स्वार्थेऽणं विदधता वार्तिकेन तद्भाष्येण च सह विरुद्धमिति बोध्यम् । तमिविशि । तमु काङ्क्षायाम्, विश प्रवेशने, विड आक्रोशे, मृण हिंसायाम्, कुल संस्त्याने, कपि चलने, निर्देशान्नलोपः । पल गतौ, पचि विस्तारे । 'तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे' इति मेदिनी । 'विशाला त्विन्द्रवारुण्यामुज्जयिन्यां तु योषिति । नृपवृक्षभिदोः पुंसि पृथुलेऽप्यभिधेयवत्' इति मेदिनी । 'बिडालो नेत्रपिण्डे स्याद् वृषदंशकके पुमान्' इति च मेदिनी । 'ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्' इत्यमरः । 'मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिसे' इति मेदिनी । 'कुलालः ककुभे कुम्भकारे स्त्री त्वञ्जनान्तरे' इति च मेदिनी । 'कुलालो घूकपक्षिणि । ककुभे कुम्भकारे च' इति हेमचन्द्रः । 'कपालोऽस्त्री शिरोस्थि स्याद्घटादेः शकले व्रजे' इति मेदिनीविश्वप्रकाशौ । 'पाञ्चाली पुत्रिकागीत्योः स्त्रियां पुंभूम्नि नीवृति' इति मेदिनी । बाहुलकात् श्यतेरपि कालन् । 'आदेच उपदेशे–' इत्यात्वम् । शाला । शल चलने । अस्माद् घञि शाला । 'सेनासुराच्छायाशालानिशानाम्' इति निपातनात्स्त्रीत्वमिति न्यासः । 'शाला द्रुस्कन्धशाखायां गृहगेहैकदेशयोः । ना झषे' इति मेदिनी । पतेरङ्गच् । पत्लृ गतौ । पक्षिणीत्युपलक्षणम् ।

तरत्यादिभ्यश्च। तरङ्गः। लवङ्गम्। ११८ **विडादिभ्यः कित्**। विडङ्गः। मृदङ्गः। कुरङ्गः। बाहुलकादुत्वं च। ११९ **सृवृञोर्वृद्धिश्च**। सारङ्गः। वारङ्गः खङ्गादिमुष्टिः। १२० **गन्गम्यद्योः**। गङ्गा। अङ्गः पुरोडाशः। १२१ **छापू-**

गतौ इत्यस्मादङ्गच् प्रत्ययः पक्षिणि वाच्य इत्यर्थः। **पतङ्ग इति**। 'पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः' इति मेदिनी। **तरत्यादिभ्यः**। अङ्गच् इत्यनुवर्तते। तरत्यादिभ्यो धातुभ्यः अङ्गच् प्रत्ययः स्यादित्यर्थः। **तरतीति**। तॄ प्लवनतरणयोरित्यस्य श्तिपा निर्देशः। **लवङ्गमिति**। लूञ् छेदने इत्यस्मादङ्गच्। आकृतिगणोऽयम्। **विडादिभ्यः कित्**। विड आक्रोशे इत्यादिभ्यो धातुभ्यो जायमानः अङ्गच्प्रत्ययः किद्भवतीत्यर्थः। **विडङ्ग इति**। कित्वान्न गुणः। 'विडङ्गस्त्रिष्वभिज्ञे स्यात्कृमिघ्ने पुंनपुंसकम्' इति मेदिनीकारः। **मृदङ्ग इति**। मृद क्षोदे इत्यस्मात्प्रत्ययः। तस्य कित्वान्न गुणः। **कुरङ्ग इति**। प्रत्यये परत उत्वं साधयति **बाहुलकादिति**। कुर शब्दे इत्यस्मात्प्रत्यये तु महल्लाघवम्। **सृवृञोर्वृद्धिश्च**। सृ गतौ, वृञ्, वरणे, आभ्यामङ्गच् प्रत्ययः प्रकृतेर्धातोर्वृद्धिश्चेत्यर्थः। **सारङ्ग इति**। 'सारङ्गः पुंसि हरिणे चातके शबले त्रिषु' इति मेदिनी। **गन् गम्यद्योः**। गम्लृ गतौ, अद भक्षणे, आभ्यां गन्प्रत्ययः स्यात्। गङ्गा। अङ्गः। बाहुलकादङ्गादयोऽपि। अमधातोर्गन् प्रत्ययः। **छापूखडिभ्यः कित्**। छो छेदने, पूङ् पवने, खड

'पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः। क्लीबं सूते' इति मेदिनी। सूते पारद इत्यर्थः **तरत्या**। तॄ प्लवनतरणयोः। लूञ् छेदने। तरङ्ग ऊर्मिः। 'तरङ्गस्तुरगादीनामुत्फाले वस्त्रभङ्गयोः' इति विश्वः। 'लवङ्गं देवकुसुमे' आकृतिगणोऽयम्। **विडादिभ्यः**। विड आक्रोशे, मृद क्षोदे, कॄ विक्षेपे, एभ्यो ङ्गच् कित्स्यात्। विडङ्ग ओषधिविशेष इति उज्ज्वलदत्तः। 'विडङ्गः कृमिसंघघ्ने विडङ्गो नागरेऽन्यवत्' इति विश्वः। 'विडङ्गस्त्रिष्वभिज्ञे स्यात् कृमिघ्ने पुंनपुंसकम्' इति मेदिनी। 'मृदङ्गः पटहे घोषे' इति च। कुरङ्गो मृगविशेषः। **बाहुलकादुत्वं चेति**। कुर शब्दे इत्यस्मादङ्गच्। तस्य कित्वेन गुणाभाव इत्यन्ये। **सृवृञोः**। सृ गतौ, वृञ् वरणे। 'सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शबले त्रिषु' इति मेदिनी। बाहुलकाद् नॄ नये। अथ नारङ्गः पिप्पली रसे। यमजप्राणिनि विटे नागरङ्गद्रुमेऽपि च' इति मेदिनी। **गन् गम्य**। गम्लृ गतौ अद भक्षणे, बाहुलकादम गत्यादिषु। अस्मादपि गन्। 'अङ्गं गात्रान्तिकोपायप्रतीकेष्वप्रधानके। अङ्गो देशविशेषः स्यादङ्गसंबोधनेऽव्ययम्' इति विश्वः। 'अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके' इति मेदिनी। **छापू**। छो छेदने, पूङ् पवने, खड भेदने।

खडिभ्यः कित् । छागः । पूगः । खङ्गः । बाहुलकात् 'षिट अनादरे' गन्सत्वाभावश्च । षिङ्गस्तरलः । 'षिङ्गैरगद्यत ससम्भ्रममेवमेका' इति माघः । १२२ **भृञः किन्नुट् च** । भृञो गन्कित्स्यात्तस्य नुट् च । 'भृङ्गाः षिङ्गाविधूम्याटाः' । १२३ **शृणातेर्ह्रस्वश्च** । शृङ्गम् । १२४ **गण्शकुनौ** । नुट् चेत्यनुवर्तते । शार्ङ्गः । १२५ **मुदिग्रोर्गग्गौ** । मुद्गः । गर्गः । १२६ **अण्डन्कृसृभृवृञः** । करण्डः ।

भेदने, आहृत्य त्रिभ्यो धातुभ्यो गन्प्रत्ययो भवति । स च कित्स्यात् । **छागः पूग इति** । कित्त्वाद् गुणाभावः । छायते छिद्यते यज्ञार्थमिति छागः, पूयते सुखमनेनेति पूगः । 'पूगः क्रमुकवृन्दयोः' इत्यमरः । **खङ्ग इति** । 'खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' इति मेदिनी । **भृञः किन्नुट् च** । भृञ् भरणे, अस्माद् जायमानः गन्प्रत्ययः किद्भवति नुडागमश्च भवतीत्यर्थः । 'छापूखडिभ्यः कित्' इति पूर्वसूत्रात्किदित्यनुवर्तमाने पुनरिह किद्ग्रहणं विस्पष्टार्थम् । 'भृङ्गो धूम्याटषिङ्गयोः' इति मेदिनी । **शृणातेर्ह्रस्वश्च** । शॄ हिंसायामस्माद्धातोर्गन्प्रत्ययो भवति । धातोर्ह्रस्वश्च भवति । प्रत्ययस्य च कित्त्वं नुट् चेत्यर्थः । शृङ्गमिति रूपम् । 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्णमीनभेदयोः ऋषभौषधौ' इति मेदनी । **गण् शकुनौ** । शृणातेरित्यनुवर्तते । शकुनौ वाच्ये शृणातेर्गन्प्रत्ययो नुडागमश्च । **शार्ङ्ग इति** । णित्वाद् 'अचो ञ्णिति' इति वृद्धिः, नुटः अनुस्वारपरसवर्णौ, शार्ङ्गः पक्षी । शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इत्यर्थे बोध्यम् । **मुदिग्रोर्गग्गौ** । मुद हर्षे, गॄ निगरणे आभ्यां यथासंख्यं गक् ग एतौ प्रत्ययौ स्तः । मुद्गः सस्यविशेषः द्राविडभाषायां पयरु इति प्रसिद्धः । गकः कित्त्वान्नोपधागुणः । गर्ग इति मुनिविशेषः । गप्रत्यये गुणः । एतदर्थमेव गक् ग इति पृथग् विहितौ । **अण्डन् कृसृभृवृञः** । डु कृञ् करणे, सृ गतौ, भृञ् भरणे,

---

छायते छिद्यते यज्ञार्थमिति छागः । पूयते सुखमनेनेति पूगः । 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी । 'खड्गो गण्डकशृङ्गे स्यान्निस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिणी । 'खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' इति मेदिनी । **भृञः** । डुभृञ् धारणपोषणयोः । किदित्यनुवर्तनात्किद्ग्रहणमिह स्पष्टार्थम् । 'भृङ्गो धूम्याटषिङ्गयोः । मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि' इति मेदिनी । **शृणातेः** । शॄ हिंसायामस्माद्गन् धातोर्ह्रस्वत्वं प्रत्ययस्य तु कित्त्वं नुट् च । 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्रीविषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' इति मेदिनी । 'शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके । मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते' इत्युत्पलिनीकोषः । **गण् शकुनौ** । शृणातेः शकुनौ

सरण्डः पक्षी। भरण्डः स्वामी। वरण्डो मुखरोगः। १२७ शृदॄभसोऽदिः। शरत्। 'दरत्दृदयकूलयोः'। भसज्जघनम्। १२८ दृणातेः षुग्घ्रस्वश्च। दृषत्। १२९ त्यजितनियजिभ्यो डित्। त्यद्। तद्। यद्। सर्वादयः। १३० एतेस्तुट् च। एतद्। १३१ सर्तेररटिः। 'सरट् स्याद्वातमेघयोः'। वेदभाष्ये तु 'याभिः कृशानुम्' इति मन्त्रे 'सरड्भ्यो मधुमक्षिकाभ्यः' इति व्याख्यातम्। १३२ लङ्घेर्नलोपश्च। लघट् वायुः। १३३ पारयतेरजिः।

वृञ् वरणे, एषां समाहारद्वन्द्वात्पञ्चमी। एभ्यः अण्डन्प्रत्ययः स्यात्। करण्ड इति। प्रत्यये परतो गुणः। **शृदॄभसोऽदिः**। शॄ हिंसायाम्, दॄ विदारणे, भस भर्त्सनदीप्त्योः, एभ्यः अदिप्रत्ययः। इकार उच्चारणार्थः। **शरदिति**। प्रत्यये परतो गुणः। 'शरत्स्त्री वत्सरेऽप्यृतौ'। 'दरस्त्रियां प्रपाते च भयपर्वतयोरपि' 'भसत्स्त्री भास्वरे योनौ' इति मेदिनी। **दृणातेः षुग् ह्रस्वश्च**। दॄ विदारणे इत्यस्माद् अदिप्रत्ययः, प्रकृतेः षुगागमो ह्रस्वश्च भवतीति सूत्रार्थः। दृषदिति रूपम्। **त्यजितनियजिभ्यो डित्**। त्यज हानौ, तनु विस्तारे, यज देवपूजादौ, एभ्यो जायमानः अदिप्रत्ययो डिद् भवति। **त्यदिति**। अदिप्रत्ययस्य डित्त्वाट्टिलोपः। **एतेस्तुट् च**। इण गतावित्यस्माद् अदिप्रत्ययः, तस्य तुडागमश्च भवतीत्यर्थः। एतदिति रूपम्। **सर्तेररटिः**। सृ गतावित्यस्मादटिप्रत्ययः। सरट्शब्दार्थं विवृण्वन् कोशमाह **सरट् स्याद्वातमेघयोरिति**। **लङ्घेर्नलोपश्च**। लघि शोषणे, अस्मादटिप्रत्ययः, नकारस्य लोपश्च। **पारयतेरजिः**। पारधातुश्चुरा-

---

वाच्ये गणः स्यात्तस्य नुट्। 'अचोऽञ्णिति' इति धातोर्वृद्धिः। शार्ङ्गः पक्षी। शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इति बोध्यम्। **मुदिग्रोः**। मुद हर्षे, गॄ निगरणे, आभ्यां यथासंख्यं गक् ग इत्येतौ स्तः। मुद्गः सस्यभेदः। गर्गो मुनिविशेषः। **अण्डन्**। डुकृञ् करणे, सृ गतौ, भृञ् भरणे, वृञ् वरणे। 'करण्डो मधुकोशासिकारण्डेषु ललाटके' इति मेदिनी। वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः' इति विश्वमेदिन्यौ। बाहुलकात् तॄ प्लवनतरणयोरपि। 'तरण्डो बडिशीसूत्रबद्धकाष्ठादिके प्लवे' इति मेदिनी। **शृदॄ**। शॄ हिंसायाम्, दॄ विदारणे, भस भर्त्सनदीप्त्योः। 'शरत् स्त्री वत्सरेऽप्यृतौ। दरस्त्रियां प्रपाते च भयपर्वतयोरपि। भसत् स्त्री भास्वरे योनौ' इति मेदिनी। 'उवे अम्बसुलाभिकः' इति मन्त्रव्याख्यायां भसद्भग इति वेदभाष्यम्, 'जाघन्यां पत्नीः संयाजयन्ति भसद्वीर्या हि स्त्रियः' इत्यत्र भसज्जघनमिति व्याख्यातारः। **दृणातेः**। दॄ विदारणे। 'दृषच्छिल्पेषणशिलापट्टप्रस्तरयोः स्त्रियाम्'। इति मेदिनी। **त्यजि**। त्यज हानौ, तनु विस्तारे, यज देवपूजादौ। **त्यदित्यादि**।

पारक् सुवर्णम्। प्रथेः कित्संप्रसारणं च। पृथक्। स्वरादिपाठादव्ययत्वम्। १३५ भियः षुग्घ्रस्वश्च। भिषक्। १३६ युष्यसिभ्यां मदिक्। युष सौत्रो धातुः। युष्मद्। अस्मद्। त्वम्। अहम्। १३७ अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्। एभ्यश्चतुर्दशभ्यो मन्। अर्मः चक्षूरोगः। स्तोमः संघातः। सोमः। होमः। सर्मो गमनम्। धर्मः। क्षेमं कुशलम्। क्षोमम्। प्रक्षाद्यणि क्षौमं च। भामः आदित्यः। यामः। 'वामः शोभनदुष्टयोः'।

दिरण्यन्तः। अस्माद् अजिप्रत्ययः स्यादित्यर्थः। **पारगिति**। अजिप्रत्यये णेरनिटीत्यनेन णिलोपः तस्य प्रत्ययलक्षणेन उपधावृद्धिर्भवत्येव। कुत्वे रूपम्। **प्रथेः कित्संप्रसारणं च**। प्रथ प्रख्याने, अस्मादजिप्रत्ययः। स च किद् भवति, धातोः संप्रसारणं च, पृथक्। **स्वरादिपाठादिति**। पृथग् विनार्थ इति पाठादिति भावः। **भियः षुग् ह्रस्वश्च**। ञि भी भये इत्यस्मादजिप्रत्ययः, प्रकृतेः षुगागमश्च भवतीत्यर्थः। भिषगिति रूपम्। **युष्यसिभ्यां मदिक्**। धातुपाठे युषधातोरदर्शनादाह **युष् सौत्रो धातुरिति**। असु क्षेपणे दिवादिः। आभ्यां मदिक्प्रत्ययः। युष्मदिति रूपम्। अस्मदिति रूपम्। **त्वम् अहमिति**। 'त्वाहौ सौ' इति त्वाहादेशाविति भावः। **अर्तिस्तुसुहु**। ऋ गतौ, ष्टुञ् स्तुतौ, षुञ् अभिषवे, हु दानादानयोः, सृ गतौ, धृञ् धारणे, क्षि क्षये, टु क्षु शब्दे, भा दीप्तौ, या प्रापणे, वा गतिगन्धनयोः, पद गतौ, यक्ष पूजायां चुरादिः, णीञ् प्रापणे, एषां द्वन्द्वात्पञ्चमी। एभ्यो मन्प्रत्ययो भवति। **अर्म इति**। मन्प्रत्यये गुणे च रूपम्। **स्तोम इति**। संघात इत्यर्थः। **सोम इति**। 'सोमस्तुहिनदीधितौ'। क्षौमशब्दं साधयितुमाह **प्रक्षाद्य-**

अर्देर्डित्त्वाट्टिलोपः। **एतेः**। इण् गतौ अस्माददिस्तस्य तुटि गुणः। एतद्। **सर्तेः**। सृ गतौ। **लङ्घेः**। लघि शोषणे। **पारयतेः**। पार तीर कर्मसमाप्तौ चुरादिः। **पारगिति**। णिलोपः कुत्वम्। **प्रथेः**। प्रथ प्रख्याने। **भियः**। ञिभी भये। **युष्यसि**। असु क्षेपणे। **अर्तिस्तु**। ऋ गतौ, ष्टुञ् स्तुतौ, षुञ् अभिषवे, हु दानादनयोः, सृ गतौ, धृञ् धारणे, क्षि क्षये, टुक्षु शब्दे, भा दीप्तौ, या प्रापणे, वा गतिगन्धनयोः, पद गतौ, णीञ् प्रापणे, 'सोमस्तुहिनदीधितौ। वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ' इति मेदिनी। **होम इति**। देवतोद्देशेन हविःप्रक्षेपः। धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे' इति च। 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः। 'क्षौमं पट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके। शणजेऽतसिजे' इति मेदिनी। 'भामः क्रोधे रवौ दीप्तौ' इति च।

पद्मम् । यक्ष पूजायाम्, यक्ष्मो रोगराजः । नेमः । १३८ जहातेः सन्वदालोपश्च । 'जिह्मः कुटिलमन्दयोः' । १३९ अवतेष्टिलोपश्च । मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः । अन्यथा डिदित्येव ब्रूयात् । 'ज्वरत्वर–' (सू २६२४) इति ऊठौ । तयोर्दीर्घे कृते गुणः। चादिपाठादव्ययत्वमित्युज्ज्वलदत्तः, तन्न । तेषामसत्त्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठादव्ययत्वम् । अवतीति ओम् । १४० ग्रसेरा च । ग्रामः । १४१ अविसिविसिशुषिभ्यः कित् ।

णीति । जहातेः सन्वदालोपश्च । ओ हाक् त्यागे, अस्मान्मन्प्रत्ययः, स च सन्वद्भवति । आकारलोपश्च । जिह्म इति रूपम् । अवतेष्टिलोपश्च । अव रक्षणादौ, अस्माद् मन्प्रत्ययः, मन्प्रत्ययस्य टेर्लोपश्चेत्यर्थः । ननु टिलोपश्चेत्यत्र अस्मिन्नेव सूत्रे विधेयभूतस्य मन्प्रत्ययस्योद्देश्यत्वं न स्यात्, अतः टिलोप इत्यत्र प्रकृतेरेवोद्देश्यत्वं स्यादित्यत आह अन्यथेति । प्रकृते टिलोपाङ्गीकार इत्यर्थः । डिदित्येवेति । टेरिति टिलोपसंभवादित्यर्थः । ज्वरत्वरेत्यूठाविति । वकारस्य उपधायाश्च स्थाने इत्यर्थः । तयोरिति । अकारवकारस्थानिकयोरूठोरित्यर्थः । प्रत्येकमूठ् इति पक्षाभिप्रायेणेदम् । उपधावकारयोः स्थाने एक एवोठिति मते तु न कापि विप्रतिपत्तिः । अस्याव्ययत्वे साधकमाह चादिपाठादिति । तन्नेति । तन्मतं खण्डयति तेषामसत्त्वार्थत्वादिति । ग्रसेरा च । ग्रसु अदने, अस्माद् मन्प्रत्ययो धातोराकारश्चान्तादेशः । ग्राम इति रूपम् । अविसिवि । अव रक्षणादौ,

---

'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति च । 'वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियामथ । वामी शृगाली वडवा रासभीकरभीषु च' इति । 'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे' इति च मेदिनी । यक्ष पूजायामिति । अयमन्तस्थादिः । मनिन्प्रत्यये तु नकारान्तः शब्दः । 'क्षयः शोषश्च यक्ष्मा च' इत्यमरः । 'राजयक्ष्मेव रोगाणाम्' इति माघः । 'यक्ष्मणापि परिहाणिरायर्यौ' इति रघुः । अत्र जकारयकारयोर्भेदाग्रहेण जक्षभक्षहसनयोरित्युज्ज्वलदत्तेनोपन्यस्तम् । तन्न, तस्य चवर्गतृतीयादित्वात् । अत एव 'अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि । यक्ष्मं सर्वस्मात्' इति मन्त्रे यक्ष्मशब्दस्यान्तःस्थादित्वम् । 'जक्षत् क्रीडन् रममाणः' इत्यादिमन्त्रे तु जक्षच्छब्दस्य चवर्गतृतीयादित्वं वेदभाष्यकृतो व्याचख्युः । 'नेमः कालेऽवधौ गर्ते प्राकारे कैतवेऽपि च' इति मेदिनी । 'नेमस्त्वर्धे प्राकारगर्तयोः अवधौ कैतवे च' इति हेमचन्द्रः । जहातेः । ओहाक् त्यागे । जिह्म इति । मन्प्रत्ययस्य सन्वत्त्वाद् द्वित्वे 'सन्यतः' इतीत्वम् । 'जिह्मस्तु कुटिले मन्दे क्लीबं तगरपादपे' इति मेदिनी ।

ऊमं नगरम्। स्यूमो रश्मिः। सिमः सर्वः। 'शुष्ममग्निसमीरयोः'। १४२ **इषियुधीन्धिदसिश्याधूसूभ्यो मक्**। 'इष्मः कामवसन्तयोः'। ईषीति पाठे दीर्घादिः। युध्मः शरो योद्धा च। इध्मः समित्। दस्मो यजमानः। श्यामः। धूमः। सूमोऽन्तरिक्षम्। बाहुलकादीर्मं व्रणः। १४३ **युजिरुचितिजां**

षिवु तन्तुसन्ताने, षिञ् बन्धने, शुष शोषणे, एभ्यो मन् स्यात्स च कित्। ऊठादिकं पूर्ववत्। **ऊममिति**। अवधातोर्मन्प्रत्यये ज्वरत्वरेत्यूठि सवर्णदीर्घे रूपम्। **स्यूम इति**। षिवुधातोर्मन्प्रत्यये च्छ्वोरिति वस्य ऊठि, यणि रूपं बोध्यम्। **सिम इति**। षिञ्धातो रूपम्। सर्वादिगणे पठितोऽयम्। **इषियुधीन्धि**। इष गतिहिंसादानेषु, युध संप्रहारे, ञि इन्धी दीप्तौ, दसु उपक्षये, श्यैङ् गतौ, धूञ् कम्पने, षूञ् प्राणिगर्भविमोचने, एषां द्वन्द्वात्पञ्चमी। **युध्म इति**। 'युध्मो धनुषि संयोगे' इति मेदिनी। **दस्म इति**। 'दस्मस्तु यजमाने स्यादपि चौरे हुताशने' इति मेदिनी। **श्याम इति**। 'त्रिषु श्यामो हरित्कृष्णौ श्यामा स्याच्छारिका निशा' इत्यमरः। **युजिरुचितिजाम्**। युजिर् योगे, रुच दीप्तौ, तिज निशाने, एषां द्वन्द्वात्षष्ठी। एभ्यो

अवतेः। अव रक्षणादौ। 'ओं प्रश्ने स्वीकृतौ रोषे' इति विश्वः। **ग्रसेरा च**। ग्रसु अदने। अतो मन्धातोराकारश्च। 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति विश्वः। शब्दादिपूर्वको ग्रामशब्दो वृन्दे शब्दग्रामो गुणग्राम इति यथा। 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इत्यमरः। संपूर्वोऽयं युद्धे। तदुक्तं 'संपूर्वः संयुगे स्मृतः' इति। **अविसिवि**। अव रक्षणादौ, षिवु तन्तुसन्ताने, षिञ् बन्धने, शुष शोषणे, एभ्यो मन्स्यात्स च कित्। ऊठादिकं पूर्ववत्। ऊमं नगरमिति 'त्वे क्रतुम्' इति मन्त्रे ऊमास्तर्पका यजमाना इति वेदभाष्यम्। टापि बाहुलकाद्ध्रस्वत्वे 'उमातसीहैमवतीहरिद्राकान्तिकीर्तिषु' इति मेदिनी। स्यूमो रश्मिरिति सूत्रम्। तन्तुरित्यन्ये। सिमः सर्वनामगणे पठितः। 'शुष्मं तेजसि सूर्ये ना इति मेदिनी। शुष्मं बलमिति वेदभाष्यम्। **इषियुधि**। इष गतिहिंसादानेषु ईष गताविति केचित्। इष्मः। युध संप्रहारे, ञिइन्धी दीप्तौ, दसु उपक्षये, श्यैङ् गतौ, धूञ् कम्पने, षूञ् प्राणिगर्भविमोचने। **युध्म इति**। 'युध्मो धनुषि संयुगे' इति मेदिनी। 'दस्मस्तु यजमाने स्यादपि चौरे हुताशने' इति च। 'त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिका निशा' इत्यमरः। 'श्यामो वटे प्रयागस्य वारिदे वृद्धदारके। पिके च कृष्णहरितोः पुंसि स्यात्तद्वति त्रिषु। मरीचे सिन्धुलवणे क्लीबं स्त्री शारिकौषधौ। अप्रसूताङ्गनायां च प्रियङ्गावपि गुग्गुलौ। यमुनायां त्रियामायां कृष्णात्रिवृतिकौषधे। नीलिकायाम्' इति मेदिनी। **ईर्ममिति**।

कुश्च। युग्मम्। रुक्मम्। तिग्मम्। १४४ हन्तेर्हि च। हिमम्। १४५ भियः षुग्वा। भीमः। भीष्मः। १४६ घर्मः। घृधातोर्मग्गुणश्च निपात्यते। १४७ ग्रीष्मः। ग्रसतेर्निपातोऽयम्। १४८ प्रथेः षिवन्संप्रसारणं च। पृथिवी। षवन्नित्येके। पृथवी। 'पृथवी पृथिवी पृथ्वी' इति शब्दार्णवः। १४९ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्। अश्वः। प्रुष स्नेहनादौ। 'प्रुष्वः स्यादृतुसूर्ययोः'। प्रुष्वा जलकणिका। लट्वा पक्षिभेदः फलं च। कण्वं

मक्प्रत्ययः स्याद् अन्त्यस्य च कुत्वम्। **हन्तेर्हि च**। हन हिंसागत्योः, अस्माद्धातोर्मक्, धातोर्हिरादेशश्च। **भियः षुग्वा**। ञि भी भये। अस्माद् धातोर्मक् स्यात्। धातोः षुगागमश्च वा स्यात्। **भीम इति**। षुगभावे रूपम्। **भीष्म इति**। षुकि रूपम्। **घर्मः**। मकि घर्म इति निपात्यत इत्यर्थः। प्रकृतिप्रत्ययविभागेन दर्शयति **घृधातोर्मगिति**। घृ क्षरणदीप्त्योरित्यस्मादिति भावः। मकः कित्त्वेन क्ङिति चेति निषेधादाह **गुणश्चेति**। **ग्रीष्मः**। ग्रसु अदने, अस्माद् मकि निपातोऽयम्। उपधाया ईत्वं निपात्यत इति भावः। **प्रथेः षिवन् संप्रसारणं च**। प्रथ प्रख्याने, अस्माद्धातोः षिवन्प्रत्ययः। धातोः संप्रसारणं चेत्यर्थः। षिवनः षित्त्वाद् ङीष्। **षवन्नित्येक इति**। प्रथधातोः षवन्प्रत्यय इत्यर्थः। तथात्वे तु पृथवी इति रूपम्। 'पृथिवी पृथवी पृथ्वी' इत्यमरः। **अशूप्रुषिलटि**। अशू व्याप्तौ, प्रुष स्नेहनादौ, लट बाल्ये, कण निमीलने, खटि काङ्क्षायाम्, विश प्रवेशने, एषां द्वन्द्वात् पञ्चमी। एभ्यः क्वन्स्यात्। **अश्व इति**। 'घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः' इत्यमरः। **प्रुष्व इति**। प्रुषधातोः रूपम्। **लट्वेति**।

ईर गतौ। 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः। बाहुलकाज्जन जनन इत्यस्मादपि। जन्मम्। रुह बीजजन्मनीति निर्देशान्मनिन्नन्तोऽप्यस्ति स तु नान्तः। 'जनुर्जननजन्मानि' इत्यमरस्तु अकारान्तनकारान्तोभयसाधारणः। **युजि**। युजिर् योगे, रुच् दीप्तौ, तिज निशाने, एभ्यो मक् कवर्गश्चान्तादेशः। 'रुक्मं तु काञ्चने लोहे' इति विश्वमेदिन्यौ। तिग्मं तीक्ष्णम्। **हन्तेः-**। हन हिंसागत्योरस्मान्मक् धातोर्हिरादेशश्च। 'हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम्। शीतले वाच्यलिङ्गं' इति मेदिनी। **भियः-**। ञिभी भये। बिभेत्यस्मादिति विग्रहः। 'भीष्मो गाङ्गेयघोरयोः। भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे' इति मेदिनी। **घर्मः**। घृ क्षरणदीप्त्योः। **ग्रीष्मः**। ग्रसु अदने। 'घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि' 'ग्रीष्म ऊष्मर्तुभेदयोः' इति च मेदिनी। **प्रथेः-**। प्रथ प्रख्याने। षित्त्वान्ङीष्। 'पृथवी पृथिवी पृथ्वी धरा सर्वंसहा रसा' इति शब्दार्णवः। **अशूप्रुषि-**। अशू व्याप्तौ, लट बाल्ये,

पापम्। बाहुलकादित्त्वे क्विप्वमपि। खट्वा। विश्वम्। १५० इणशीभ्यां वन्। एवो गन्ता। 'ये च एवा मरुतः'। असत्त्वे निपातोऽयम्। शेवं लाञ्छनं पुंसाम्। 'शेवं मित्राय वरुणाय'। १५१ सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे। अकर्तर्येते निपात्यन्ते। सृतमनेन विश्वमिति सर्वम्। निपूर्वाद् घृषे-र्गुणाभावोऽपि। निघृष्यते अनेन निघृष्वः खुरः। रिष्वो हिंस्रः। लष्वो नर्तकः। लिष्व इत्यन्ये। तत्रोपधाया ह्रस्वमपि। शेतेऽस्मिन् सर्वमिति शिवः शम्भुः। शीङो ह्रस्वत्वम्। पद्वो रथो भूलोकश्च। प्रहूयते इति प्रह्वः। ह्वेञ आकारवकार-लोपः। जहातेराल्लोपो वा। ईषेर्वन्। ईष्वः आचार्यः। इष्वः इत्यन्ये। अतन्त्रे

'झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला' इत्यमरः। 'लट्वा करञ्जभेदे स्यात् फले वाद्ये खगान्तरे' इति विश्वः। **कण्वमिति**। 'कण्वं पापे मुनौ पुंसि' इति मेदिनी। **खट्वेति**। 'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः। **विश्वमिति**। 'आदित्या विश्वसवः' इत्यमरः। 'विश्वा त्वतिविषायां स्त्री जगति स्यान्नपुंसकम्' इति मेदिनी। **इणशीभ्यां वन्**। इण् गतौ, शीङ् स्वप्ने, आभ्यां वन्प्रत्ययः स्यात्। **एव इति। शेव इति**। शीङ्धातो रूपम्। **सर्वनिघृष्वरिष्व**। सृ गतौ, घृषु संघर्षे, रिष हिंसायाम्, लष हिंसायाम्, शीङ् स्वप्ने, पद गतौ, ह्वेञ् स्पर्धायां शब्दे च, ईष गत्यादिषु। अत्र तन्त्रशब्दः कर्तृवाचकः। अतन्त्रेऽकर्तरीत्यर्थः। **निपात्यन्त इति**। वन्प्रत्ययान्ततयेति शेषः। वन्प्रत्यये गुणे च सर्वमिति रूपम्। **निघृष्व इति**। निपूर्वाद् घृषधातोर्वन्प्रत्यये गुणाभावोऽपि निपात्यत इत्यर्थः। **रिष्वो हिंस्र इति**। अत्रापि गुणाभावो निपातनाद् लिष्व इत्यत्र व्युत्पत्तिमाह। **उपधाया ह्रस्वमिति**। **शिव इति**। 'शंभुः शर्वः शिवः स्थाणुः' इत्यमरः। प्रह्व इत्यत्र वन्प्रत्यये रूपमाह **ह्वेञ इति**। वनो वकारस्य लोपः, धातोराकारस्य लोपश्च निपात्यत इत्यर्थः। धात्वन्तरं प्रकृतिं दर्शयति **जहातेरिति**। ओ हाक् त्यागे इत्यस्मादित्यर्थः। वन्प्रत्यये आकारस्य लोपो निपात्यत इत्यर्थः।

कण निमीलने, खटि काङ्क्षायाम्, विश प्रवेशने, 'अश्वः पुंजातिभेदे च तुरंगे च पुमानयम्' इति मेदिनी। 'अश्वः पुंभेदवाजिनोः' इति विश्वः। 'लट्वा करञ्जभेदे स्यात्फले वाद्ये खगान्तरे' इति विश्वमेदिन्यौ। 'कण्वं पापे मुनौ पुंसि' इति मेदिनी। 'किण्वं बीजाघसीधुषु' इति च पठ्यते। शयनार्थिभिः काङ्क्ष्यते इति खट्वा। 'विश्वा त्वतिविषायां स्त्री जगति स्यान्नपुंसकम्। न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु' इति मेदिनी। इण्। इण् गतौ। शीङ् स्वप्ने। शेवं सुखमिति वेदभाष्यम्। शेवं मेढ्रमित्युज्ज्वलदत्तः। **सर्वनिघृष्व**-। सृ गतौ, घृषु संघर्षे, रिष हिंसायाम्, लष

किम्—सर्ता सारकः । बाहुलकाद्भसतेः। ह्रस्वः। १५२ **शेवयह्वजिह्वाग्रीवाप्वामीवाः।** शेव इत्यन्तोदात्तार्थम् । यान्त्यनेन यह्वः । ह्रस्वोहुगागमश्च। जिहन्त्यनया जिह्वा । लकारस्य जः गुणाभावश्च । गिरन्त्यनया ग्रीवा। ईडागमश्च । आप्नोतीत्याप्वा वायुः । मीवा उदरकृमिः । वायुरित्यन्ये। १५३ **कॄगॄशॄदॄभ्यो वः ।** कर्वः कामः आखुश्च । गर्वः। शर्वः। दर्वो राक्षसः। १५४ **कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।** यौतीति युवा ।वृषा

शेवयह्वजिह्वा । एते वन्प्रत्ययान्ता निपात्यन्त इत्यर्थः। ननु इणशीभ्यामिति सूत्रेणैव शेव इति रूपे सिद्धे किमर्थमिदमित्यत आह **अन्तोदात्तार्थमिति।** शीङ् स्वप्ने इत्यस्माद् वन्प्रत्यये रूपम् । या प्रापणे इत्यस्माद् वन्प्रत्यये तत्संनियोगेन प्रकृतेर्हुगागमे ह्रस्वे च यह्व इति रूपम्। यद्वा, यजधातोर्वन्प्रत्यये जकारस्य हकारश्च निपात्यते। जिह्वेति शब्दं साधयति **लिहन्त्यनयेति।** लिह आस्वादने इत्यस्माद् वन्प्रत्यये लकारस्य जकारो गुणाभावश्च निपात्यत इत्यर्थः। यद्वा, जि जये इत्यस्माद् वन्प्रत्ययो हुगागमश्च निपात्यत इति व्याख्येयम्। **गिरन्त्यनयेति** । गॄ निगरणे इत्यस्माद् वन्प्रत्यये ईडागमो निपात्यत इत्यर्थः। यणादेश इति भावः। आप्लृ व्याप्तौ इत्यस्मात्प्रत्यये आप्वेति रूपम् । **मीवेति** । मीञ् हिंसायामित्यस्माद् रूपम्। **कॄ गॄ शॄ दॄभ्यो वः**। कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, दॄ विदारणे, एषां द्वन्द्वात्पञ्चमी। **कर्व इति**। कॄधातो रूपम्। **गर्व इति**। 'गर्वोऽभिमानोऽहङ्कारः' इत्यमरः। **शर्व इति**। 'ईश्वरः शर्व ईशानः' इत्यमरः । **दर्व इति**। दॄधातो रूपम्। **कनिन् युवृषि**। यु मिश्रणे, वृषु सेचने, तक्षू तनूकरणे, राजृ दीप्तौ,

---

कान्तौ, शीङ् स्वप्ने, पट गतौ, ह्वेञ् स्पर्धायां शब्दे च, ओहाक् त्यागे इति वा, ईष गत्यादिषु। तन्त्रशब्दोऽत्र कर्तृवाचीत्याह **अकर्तरीति। निपात्यन्त इति**। वन्प्रत्ययान्ततयेति शेषः। **ह्रस्व इति** । हस शब्दे। 'ह्रस्वो न्यक्खर्वयोस्त्रिषु' इति मेदिनी। **शेवयह्व-।** एते वन्प्रत्ययान्ता निपात्यन्ते। **अन्तोदात्तार्थमिति।** 'इणशीभ्या' मित्यनेन आद्युदात्तत्वात्सिद्धेरिति भावः। शीङ् स्वप्ने। शेवा लिङ्गाकृतिः दशपादीवृत्तिरित्याह। **यान्त्यनेनेति** । उज्ज्वलदत्तस्तु यज देवपूजादौ जकारस्य हकारो यह्वो यजमान इत्याह। वैदिकनिघण्टौ महन्नामसु यह्वशब्दः पठितः। 'प्रवो यह्वं पुरूणां'। यह्वं महान्तमिति वेदभाष्यम्। लिह आस्वादने। लिहन्त्यनयेति जिह्वा। जि जये हुगागमः। जिह्वा रसनेत्युज्ज्वलदत्तः। **ग्रीवेति।** गॄ निगरणे, आप्लृ व्याप्तौ, मीञ् हिंसायाम्। **मीवेति।** वेदे तु अमीवेति छित्वा अम रोग इत्यस्माद्वः, इट् चेत्युक्तम् । 'अमीवहा वास्तोष्पते' इत्यादिमन्त्रास्तत्रानुकूलाः।

इन्द्रः । तक्षा । राजा । धन्वा मरुः । धन्व शरासनम् । द्युवा सूर्यः । प्रतिदीव्यन्त्यस्मिन्प्रतिदिवा दिवसः । १५५ सप्यशूभ्यां तुट् च । सप्त । अष्ट । १५६ नञि जहातेः । अह्नः । १५७ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति । एते त्रयोदश कनिप्रत्ययान्ता निपात्यन्ते । श्वयतीति श्वा । उक्षा । पूषा । प्लिह गतौ । इकारस्य

धन्वि गतौ, द्यु अभिगमने, दिवु क्रीडादौ एषां समाहारद्वन्द्वात् पञ्चमी । एभ्यः कनिन्प्रत्ययः । **युवेति** । 'बालस्तु स्यान्माणवको वयःस्थस्तरुणो युवा' इत्यमरः । 'युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि' इति मेदिनी । **वृषेति** । वृषधातोः कनिन्प्रत्ययः । 'चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा' इत्यमरः । **तक्षेति** । तक्षू तनूकरणे तस्यस्मात् कनिन्प्रत्ययः । 'तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट्' इत्यमरः । **राजेति** । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इत्यमरः । **धन्वेति** । 'समानौ मरुधन्वानौ' इत्यमरः । **सप्यशूभ्यां तुट् च** । षप समवाये, अशू व्याप्तौ, आभ्यां कनिन्प्रत्ययः तुडागमश्च । सप्त अष्टेति रूपम् । **नञि जहातेः** । नञि उपपदे ओ हाक् त्यागे इत्यस्मात् कनिन्प्रत्ययः । कनिन्यातो लोपः । **श्वन्नुक्षन्पूषन्प्लीहन्** । टु ओ श्वि गतिवृद्ध्योः, उक्ष सेचने, पूष वृद्धौ, प्लिह गतौ, क्लिदू आर्द्रीभावे, ष्णिह प्रीतौ, मुह वैचित्त्ये, टु मस्जो शुद्धौ, माङ् माने अर्यपूर्वः, प्सा भक्षणे विश्वपूर्वः, जनी प्रादुर्भावे परिपूर्वः, टु ओ श्वि गतिवृद्ध्योः,

---

कॄ गॄ । कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम् , दॄ विदारणे । गर्वोऽहंकारः । शर्वो रुद्रः । **कनिन्यु** । यु मिश्रणे, वृषु सेचने, तक्षू त्वक्षू तनूकरणे, राजृ दीप्तौ, धन्वि गत्यर्थः, द्यु अभिगमने, दिव क्रीडादौ । 'युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि' इति । 'वृषा कर्णे महेन्द्रे ना' इति च मेदिनी । 'तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्' इत्यमरः । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति च । 'समानौ मरुधन्वानौ' इति च 'अथास्त्रियाम् । धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इति चामरः । 'धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेऽपि च' इति मेदिनी । **सप्यशूभ्याम्** । षप समवाये, अशू व्याप्तौ । **नञि** । ओहाक् त्यागे, कनिनि आतो लोपः । **श्वन्नुक्षन्**— । टुओश्वि गतिवृद्ध्योः, उक्ष सेचने, पूष वृद्धौ, ष्णिह प्रीतौ, मुह वैचित्त्ये, मुर्वी बन्धने । उकारस्य दीर्घत्वे वकारस्य धकार इत्युज्ज्वलदत्तः । टुमस्जो शुद्धौ । मस्जेः सकारस्य शकारस्तस्य जश्त्वेन जः । माङ् माने शब्दे च, प्सा भक्षणे, जनी प्रादुर्भावे, टुओश्वि गतिवृद्ध्योः । **कनिप्रत्ययान्ता इति** । नायं निदिति भावः । केचित्तु निरवं स्वीकृत्य उक्षादीनां सूत्रेऽन्तोदात्तनिपातनमाहुस्तच्च गौरवग्रस्तमित्यु-

दीर्घत्वम् । प्लेहतीति प्लीहा कुक्षिव्याधिः । क्लिदू आर्द्रीभावे । क्लिद्यति क्लेदा चन्द्रः । स्निह्यतेर्गुणः । स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यन्त्यस्मिन्नाहते मूर्धा । मुहेरुपधाया दीर्घो धोऽन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ् । अर्यमा । विश्वं प्साति विश्वप्सा अग्निः । परिजायते परिज्मा चन्द्रोऽग्निश्च । जनेरुपधालोपो मश्चान्तादेशः । मातर्यन्तरिक्षे श्वयतीति मातरिश्वा । धातोरिकारलोपः । मह पूजायाम् । हस्य घो वुगागमश्च, मघवा इन्द्रः ।

इत्युणादिषु प्रथमः पादः

मह पूजायाम्, एते कनिन्प्रत्ययान्ता निपात्यन्त इत्यर्थः । **श्वेति** । इकारलोपो निपात्यते । 'शुनको भषकः श्वा स्यात्' इत्यमरः । **उक्षेति** । 'उक्षा भद्रो बलीवर्दः' इत्यमरः । **पूषेति** । सौ चेत्युपधादीर्घः । पूषणावित्यादौ तु इन्हन्निति नियमाद् न दीर्घः । 'विकर्तनार्कमार्तण्डमिहिरारुणपूषणः' इत्यमरः । **प्लिह गताविति** । अस्मात् कनिप्रत्यये उपधाया इकारस्य दीर्घ इत्यर्थः । 'अन्त्रं पुरीतद् गुल्मस्तु प्लीहा पुंस्यथ वस्नसा' इत्यमरः । **मूर्धेति** । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । **मज्जेति** । मज्जन्शब्दस्य नकारान्तत्वेऽपि स्त्रीत्वविवक्षायां टाबप्यभ्युपेयते । 'सारो मज्जा नरि त्वक् स्त्री' इत्यमरः । **अर्यमेति** । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी । 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः । परिज्मेत्यत्र प्रक्रियामाह **जनेरुपधालोप इत्यादि** । **मातरिश्वेति** । सप्तम्या अलुक् निपातनात् । 'श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः' इत्यमरः । मघवन्शब्दे

प्रेक्ष्यम् । **श्वेति** । इकारलोपो निपात्यते । **पूषेति** । 'सौ च' इत्युपधादीर्घः । 'इन्हन्–' इति नियमात्पूषणौ पूषण इत्यादौ न दीर्घः । 'क्लेदौषधिशशाङ्कयोः' इति यादवः । **मूर्धेति** । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । **मज्जेति** । नकारान्तोऽयं टाबन्तोऽप्यभ्युपगम्यते । 'ऊष्मया सार्धमूष्मापि मज्जोक्तो मज्जया सह' इति द्विरूपकोशात् । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी । **परिजायत इत्यादि** । एतच्च दशपादीवृत्त्यनुरोधेनोक्तम् । 'परिज्मानं सुखं रथम्' इति मन्त्रस्य वेदभाष्ये तु परिज्मा परितो गन्ता । अजेः परिपूर्वस्य 'श्वन्नुक्षन्–' इत्यादिना मन्प्रत्ययः, अकारलोपः आद्युदात्तत्वं च निपात्यत इत्युक्तम् । उज्ज्वलदत्तस्तु परिज्वेति पठित्वा जु इति सौत्रो धातुः परिपूर्वः, यणादेशः परिज्वा चन्द्र इत्याह, तल्लक्ष्यविरोधादुपेक्ष्यम् । **मातरिश्वेति** । सप्तम्या अलुक् । इह मत्वविषये संप्रसारणं न भवति । 'श्वयुव–' इति सूत्रे अभिव्यक्ततरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य

अथ उणादिषु द्वितीयः पादः ।

१५८ कृहृभ्यामेणुः । करेणुः । हरेणुः, गन्धद्रव्यम् । १५६ हनिकुषिनीरमिकाशिभ्यः क्थन् । हथो विषण्णः । कुष्ठः । नीथो नेता । रथः ।

प्रक्रियामाह हस्य घ इति । 'इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः' इत्यमरः ।
इत्युणादिषु प्रथमः पादः समाप्तः ।

अथ द्वितीयः पादः । **कृहृभ्यामेणुः** । डु कृञ् करणे, हृञ् हरणे, आभ्यामेणुप्रत्ययः । तस्मिन्प्रत्यये परे धातोर्गुण इति भावः । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । 'करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे' इति मेदिनी । **हरेणुरिति** । 'हरेणुः खण्डिके चास्मिन्' इत्यमरः । 'हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषितोः' इति मेदिनी । **हनिकुषिनी** । हन हिंसागत्योः, कुष निष्कर्षे, णीञ् प्रापणे, रमु क्रीडायां, काश्ट दीप्तौ, एषां द्वन्द्वात् पञ्चमी । एभ्यः क्थन्प्रत्ययः स्यात् । **हथ इति** । 'अनुदात्तोपदेशवनतितनोत्यादीनाम्-' इत्यनुनासिकलोपः । **कुष्ठ इति** । 'व्याधिः कुष्ठं पारिभाव्यम्' इत्यमरः । कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकार्शसी' इत्यमरः । 'कुष्ठं मुण्डं शीधु बुस्तम्' इत्यमरः । 'कुष्ठं रोगे पुष्करे स्त्री' इति मेदिनीकोशश्च । **रथ इति** । 'रथाभ्रपुष्पविदुर' इत्यमरः । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च'

तदन्तस्य च ग्रहणात् । तेन मातरिश्वनः मातरिश्वनेत्येव । इह सूत्रे इतिशब्द आद्यर्थस्तेनान्येभ्योऽपि यथादर्शनं कनिः प्रयोक्तव्यः । दशपाद्यां तु इति शब्दोऽत्र न पठ्यते । **इत्युणादिषु प्रथमः पादः** ।

कृहृभ्याम् । डुकृञ् करणे, हृञ् हरणे । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । 'करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे इति मेदिनी । **गन्धद्रव्यमिति** । कलायश्चेति बोध्यम् । 'कलायस्तु सतीनकः' इत्यमरः । 'हरेणुखण्डिके चास्मिन्' इत्यमरः हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषितोः' इति मेदिनीविश्वप्रकाशौ । **हनिकुषि** । हन हिंसागत्योः, कुष निष्कर्षे, णीञ् प्रापणे, रमु क्रीडायाम् , काश्ट दीप्तौ । 'कुष्ठं रोगे पुष्करे स्त्री' इति मेदिनी । 'कुष्ठं रोगे सुगन्धे च' इति विश्वः । 'नीथे नीथे मघवानं सुतासः' इति मन्त्रे नीथशब्दस्यान्तोदात्तत्वं बाहुलकात् । नीथे नीथे स्तोत्रे स्तोत्रे इति वेदभाष्यम् । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी । 'रथः स्यात्स्यन्दने काये वीरणे वेतसेऽपि च' इति विश्वः । 'काष्ठा दारुहरिद्रायां कालमानप्रक-

काष्ठम्। १६० अवे भृञः। अवभृथः। १६१ उषिकुषिगर्तिभ्यस्थन्। ओष्ठः। कोष्ठम्। गाथा। अर्थः। बाहुलकाच्छोथः। १६२ सर्तेर्णित्। सार्थः समूहः। १६३ जृवृञ्भ्यामूथन्। जरूथं मांसम्। 'वरूथो रथगुप्तौ ना'। १६४ पातृतुदिवचिरिचिसिचिभ्यस्थक्। पीथो रविः। घृतं पीथम्।

इति मेदिनी। काष्ठमिति। 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः। अवे भृञः। डु भृञ् धारणपोषणयोः, अस्मादवे उपपदे क्थन्प्रत्ययः स्यात्। अवभृथ इति। 'दीक्षान्तोऽवभृथे यज्ञे तत्कर्मार्हं तु यज्ञियम्' इत्यमरः। उषिकुषिगर्तिभ्यस्थन्। उष दाहे, कुष निष्कर्षे, गै शब्दे, ऋ गतौ, एषां द्वन्द्वात्पञ्चमी। ओष्ठ इति। 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। कोष्ठमिति। 'पुंसि कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा' इत्यमरः। कोष्ठं कुक्षिकुसूलयोः' इत्यमरः। गाथेति। 'गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदनी। अर्थ इति। 'अर्थरैविभवा अपि' इत्यमरः। बाहुलकात् शोथ इति। 'शोफस्तु श्वयथुः शोथः' इत्यमरः। शु गतावित्यस्मात्प्रत्ययः। सर्तेर्णित्। सृ गतावित्यस्मात् थन्प्रत्ययः। स च णिद् भवतीत्यर्थः। सार्थ इति रूपम्, 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति मेदिनी। जृवृञ्भ्यामूथन्। जॄ वयोहानौ, जृष्धातुश्च गृह्यते, वृञ् वरणे, आभ्यामूथन् स्यात्। जरूथ इति। जॄधातो रूपम्। तस्यार्थमाह मांसमिति। वरूथ इति। 'रथगुप्तिर्वरूथो ना कूबरस्तु युगन्धरः' इत्यमरः। पातृतुदिवचि। पा पाने, तॄ प्लवनतरणयोः, तुद व्यथने, वच परिभाषणे, रिचिर् विरेचने, षिचिर क्षरणे, एषां द्वन्द्वात्पञ्चमी। एभ्यस्थक्प्रत्ययः स्यात्। पीथ इति। घुमास्थेतीत्त्वमिति भावः। तीर्थमिति। ॠत इत्त्वे रपरत्वे दीर्घे इति भावः। 'अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम्' इत्यमरः। 'निपातागमयोस्तीर्थमृषिजुष्टे जले

धियोः। स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्' इति मेदिनी। अवे। डुभृञ् धारणपोषणयोः। अवभृथो यज्ञावसानम्। उषिकुषि। उष दाहे, कुष निष्कर्षे, गै शब्दे, ऋ गतौ, एभ्यः स्थन्। 'कोष्ठं कुक्षिकुसूलयोः'। 'गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदिनी। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। शोथः श्वयथुः, शु गतौ। सर्तेः। सृ गतौ। 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति मेदिनीविश्वप्रकाशौ। जृवृञ्। जॄ वयोहानौ क्र्यादिः, जृष् दिवादौ। वृञ् वरणे। जरूथोऽसुरविशेष इति वेदभाष्यम्। 'वरूथः स्यात्तनुत्राणे रथगोपनवेश्मनोः' इति हेमचन्द्रः। पातॄ। पा पाने, तॄ प्लवनतरणयोः, तुद व्यथने, वच परिभाषणे, रिचिर् विरेचने, षिच क्षरणे, ॠच स्तुतौ। 'तुत्थोऽग्नावञ्जने तुत्था

'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भः स्त्रीरजःसु च विश्रुतम् ।' इति विश्वः । तुत्थोऽग्निः । उक्थं सामभेदः । रिक्थम् । बाहुलकाद्रचेरपि । 'रिक्थमृक्थं धनं वसु' । सिक्थम् । १६५ **अर्तेर्निरि** । निर्ऋथं साम । १६६ **निशीथगोपीथावगथाः** । निशीथोऽर्धरात्रो रात्रिमात्रं च । गोपीथं तीर्थम् । अवगथः प्रातःस्नातः । १६७ **गश्चोदि** । उद्गीथः साम्नो भागविशेषः । १६८ **समीणः** । समिथो वह्निः, संग्रामश्च । १६९ **तिथपृष्ठ-**

गुरौ' इत्यमरः । विश्वकोशमाह **तीर्थं शास्त्राध्वरेत्यादि** । **तुत्थ इति** । 'रञ्जनी श्रीफली तुत्था द्रोणा दोला च नीलिनी । सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः' इत्यमरः । **उक्थमिति** । सामभेदः । **रिक्थमिति** । 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु' इत्यमरः । **सिक्थ इति** । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी । 'मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम्' इत्यमरः । **अर्तेर्निरि** । ऋ गतौ, अस्मात् थगिति शेषः । निर्ऋथं साम । **निशीथगोपीथावगथाः** । शीङ् स्वप्ने निपूर्वः, पा पाने गोपूर्वः, गाङ् गतौ अवपूर्वः, एतेभ्यः थक्प्रत्ययः स्यात् । **निशीथ इति** । कित्त्वान्न गुणः । 'अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ' इत्यमरः । 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी । गोपीथः सोमपानम् । तीर्थमिति तु वृत्तिः । घुमास्थेतीत्वम् । **अवगथ इति** । थकि धातोराकारस्य ह्रस्वत्वं निपात्यते । **गश्चोदि** । गै शब्दे इत्यस्य कृतात्वानुकरणस्य ग इति षष्ठ्यन्तम् । 'आतो धातोः' इत्याकारलोपः । उदि उपपदे गैधातोः थक्प्रत्यय इत्यर्थः । 'दृतिसीमन्तहरितो रोमन्थोद्गीथबुद्बुदाः' इत्यमरः । **समीणः** । समि उपपदे इणधातोः थगित्यर्थः । **समिथ इति** । वेदभाष्ये त्वस्य संग्रामपरत्वमुक्तम् । **तिथपृष्ठगूथयूथप्रोथाः** । तिज निशाने, पृषु

नीलीसूक्ष्मैलयोरपि' इति विश्वः । 'तुत्थमञ्जनभेदे स्यान्नीलीसूक्ष्मैलयोः स्त्रियाम् । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी । **अर्तेः** । ऋ गतौ । 'ग्रोघवाचस्ते निर्ऋथं सचन्ताम्' इति मन्त्रे निर्ऋथो हिंसेति वेदभाष्यम् । **निशीथ** । शीङ् स्वप्ने निपूर्वः, पा पाने गोपूर्वः, 'घुमास्था–' इतीत्वम् । गाङ् गतौ । अवपूर्वस्य धातोर्ह्रस्वत्वम् । 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी । 'प्रति त्यं चारुमध्वरम्' इति मन्त्रे गोपीथः सोमपानमिति वेदभाष्यम् । तीर्थमिति तु वृत्तिकारः । **गश्चोदि** । उदि उपपदे गै शब्दे इत्यस्मात् थक् । **समीणः** । इण गतावस्मात्समि उपपदे थक् । समिथशब्दः संग्रामपर्यायेषु वैदिकनिघण्टौ पठितः । 'श्रिये जातः' इति मन्त्रे समिथाः युद्धानीति वेदभाष्यम् । तच्च युक्तमेव । सम्यगेति

गूथयूथप्रोथाः । तिजेर्जलोपः । तिथोऽनलः कामश्च । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' । १७० **स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्** । द्वात्रिंशतो रक्स्यात् । वञ्चि यलोपः । स्फारम् । न्यङ्क्वादित्वा-

---

सेचने, गु पुरीषोत्सर्गे, यु मिश्रणे, प्रुङ् गतौ, एते थकप्रत्ययान्ता निपात्यन्त इत्यर्थः । तिज निशाने इत्यस्मात् थकि आह **तिजेर्जलोप** इति । तस्यार्थमाह **काम इति** । **पृष्ठमिति** । 'पृष्ठं तु चरमं तनोः' इत्यमरः । 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी । **गूथमिति** । धातोर्दीर्घत्वं च निपात्यते । **विष्ठेति** । 'पुरीषगूथे वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्' इत्यमरः । **यूथमिति** । अत्रापि निपातनाद्दीर्घः । **समूह इति** । 'सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम्' इत्यमरः । **प्रोथमिति** । प्रुधातो रूपम् । ननु थकः कित्त्वेन कथं गुण इत्यत आह **निपातनादिति** । क्वचिदिदं वाक्यं मूलपुस्तकेषु नोपलभ्यते । 'गतयोऽमूः पञ्च धाराः घोणा तु प्रोथमस्त्रियाम्' इत्यमरः । 'प्रोथोऽस्त्री हयघोणायाम्' इति मेदिनी । **स्फायितञ्चिवञ्चि** । स्फायी वृद्धौ, तञ्चु संकोचने, वञ्चु प्रलम्भने, शक्लृ शक्तौ, क्षिप प्रेरणे, क्षुदिर् संपेषणे, सृप्लृ गतौ, तृप प्रीणने, दृप हर्षमोचनयोः, वदि अभिवादनस्तुत्योः, उन्दी क्लेदने, श्विता वर्णे, वृतु वर्तने, अज गतिक्षेपणयोः, णीञ् प्रापणे, पद गतौ, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुतौ, चदि आह्लादने, दह भस्मीकरणे, दसु उपक्षये, दम्भु दम्भने, वस निवासे, वाशृ शब्दे, शीङ् स्वप्ने, हसे हसने, षिध गत्याम् , शुभ दीप्तौ, एषां द्वन्द्वात्पञ्चमी । एभ्यो धातुभ्यो रक्प्रत्यय इत्यर्थः । यकारलोपमाह **वञ्चि यलोप इति** । **स्फारमिति** । नेड्वशि कृतीति निषेधादिडागमो न भवति । स्फारं भूयश्च भूरि

जयार्थमत्रेति व्युत्पत्तेः । संपूर्वस्येणः क्विबाद्यन्तस्य लोकेऽपि युद्धार्थत्वदर्शनाच्च । उक्तं ह्यमरेण 'समित्याजिसमिद्युधः' इति । **तिथपृष्ठ** । तिज निशाने, पृषु सेचने, गु पुरीषोत्सर्गे, यु मिश्रणे, प्रुङ् गतौ–एते थकप्रत्ययान्ता निपात्यन्ते । 'पृष्ठं तु चरमं तनोः' इत्यमरः । 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी । स्तोत्रविशेषोऽपि पृष्ठम्, 'पृष्ठैः स्तुवते' इत्यादौ तथा निर्णयात् । **गूथमिति** । निपातनाद्दीर्घः । एवं यूथेऽपि । 'यूथं तिर्यक्समूहेऽस्त्री पुष्पभेदेऽपि योषिति' इति मेदिनी । 'यूथी पुष्पप्रभेदे स्यान्मागध्यां च कुरण्टके । यूथं तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' विश्वः । 'यूथं तदग्रसरगर्वितकृष्णसारम्' इति रघुः । **प्रोथमिति** । निपातनाद् गुणः ।

स्फुरत्वम्, तक्रम्। वक्रम्। शक्रः। क्षिप्रम्। क्षुद्रः। सुप्रश्चन्द्रः। तृप्रः पुरोडाशः। दृप्रो बलवान्। वन्द्रः पूजकः। उन्दी। उन्द्रो जलचरः। श्वित्रं कुष्ठम्। 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' अजेर्वी वीरः। नीरम्। पद्रो ग्रामः। मद्रो हर्षो देशभेदश्च। 'मुद्रा प्रत्ययकारिणी'। 'खिद्रो रोगो दरिद्रश्च'। छिद्रम्। भिद्रं वज्रम्। मन्द्रः। चन्द्रः। पचाद्यचि चन्द्रोऽपि। 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः'। दह्रोऽग्निः दस्रः स्वर्वैद्यः। दभ्रः समुद्रः, स्वल्पं च। वसेः संप्रसारणे ३१६८ न रपरसृपिसृजिस्पृ-

च' इत्यमरः। 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी। तञ्चुधातोः रक्प्रत्यये कुत्वविधिं स्मारयति **न्यङ्क्वादित्वादिति**। **तक्रमिति**। 'तक्रं ह्युदश्विन्मथितम्' इत्यमरः। **वक्र इति**। वञ्चिधातो रूपम्। कित्त्वान्नलोपः। न्यङ्क्वादित्वात्कुत्वम्। 'आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि' इत्यमरः। **शक्र इति**। शक्लृधातो रूपम्। 'जिष्णुर्लेखर्षभः शक्रः' इति 'जयोऽथ कुटजः शक्रः' इति चामरः। 'शक्रः पुमान् देवराजे कुटजार्जुनभूरुहोः' इत्यपि मेदिनी। **क्षिप्रमिति**। 'क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थी' इत्यमरः। **क्षुद्र इति**। 'कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः' इत्यमरः। 'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु' इति मेदिनी। इत्यादि स्पष्टम्। **न रपरसृपिसृजि**। रपर इति बहुव्रीहिः। अपदान्तस्य मूर्धन्य इत्यधिकृतम्। सृप्लृ गतौ, सृज विसर्गे, स्पृश संस्पर्शने, स्पृह ईप्सायां चुरादिः, सवनादि, एतेषां

'प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु' इति मेदिनी। **स्फायितञ्चि**। स्फायी वृद्धौ, तञ्चु संकोचने, वञ्चु प्रलम्भने, शक्लृ शक्तौ, क्षिप प्रेरणे, क्षुदिर् संपेषणे, सृप्लृ गतौ, तृप प्रीणने, दृप हर्षमोचनयोः, वदि अभिवादनस्तुत्योः, उन्दी क्लेदने, श्विता वर्णे, वृतु वर्तने, अज गतिक्षेपणयोः, णीञ् प्रापणे, पद गतौ, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुतौ, चदि आह्लादने, दह भस्मीकरणे, दसु उपक्षेपे, दम्भु दम्भने, वस निवासे, वाश्र शब्दे, शीङ् स्वप्ने, हसे हसने, षिध गत्याम्, शुभ दीप्तौ। **द्वात्रिंशद्भ्य इति**। दशपाद्यां तु त्रयस्त्रिंशदुक्ताः। दम्भिवह्रिवसीति पठित्वा वह प्रापणे ऊह्रोऽनड्वानित्युदाहरणात्। माधवोऽप्येवम्। **स्फारमिति**। 'नेड्वशि कृति' इति नेट्। वलि यलोपः। 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदनी। **तक्रमिति**। 'तक्रं ह्युदश्विन्मथितं। पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः। 'वक्रः स्यात्कुटिले क्रूरे पुटभेदे शनैश्चरे' इति विश्वः। 'शक्रः पुमान् देवराजे कुटजार्जुनभूरुहोः' इति मेदिनी। 'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत्' इति मेदिनी। **तृप्रः पुरोडाश इति**। 'न तृप्रा उरुव्य-

शिस्पृहिसवनादीनाम् । (८-३-११०) रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्धन्यो न स्यात्। 'पूर्वपदात्' (सू ३६४३) इति प्राप्तः प्रतिषिध्यत इति वृत्तिभूयोऽभिप्राया। तेन 'शासिवसि—' (सू २४१०) इति प्राप्तमपि न। उस्रो रश्मिः। उस्रा गौः । वास्रो दिवसः । वास्रं मन्दिरम्। शीरोऽजगरः। हस्रो मूर्खः। सिध्रः साधुः। शुभ्रम्। बाहुलकात् मुसेरक्, मुस्रम् उदश्रु। १७१ **चकिरम्योरुच्चोपधायाः**। चुक्रमम्लद्रव्यम्। रुम्रोऽरुणः। १७२ **वौ कसेः**। विकुस्रश्चन्द्रः । १७३ **अमितम्योर्दीर्घश्च**। आम्रम्।

द्वन्द्वात्षष्ठी। अवयवावयविभावः षष्ठ्यर्थः। तथा चैतदवयवस्य सकारस्य षत्वं न स्यादित्यर्थः । **उस्र इति**। वसधातो रकि तस्य कित्वात्संप्रसारणेऽनेन षत्वनिषेधे च रूपम्। नन्वत्रानेन षत्वाभावकथनमसंगतम्, अस्य सूत्रस्य 'पूर्वपदात्संज्ञायामगः' इति प्राप्तस्य षत्वस्य निषेधकताया वृत्त्यादिषु उक्तत्वात्। अत्र तु न तेन षत्वप्राप्तिः। अपि तु शासिवसीत्यनेनैवेत्याशङ्कायामाह **भूयोऽभिप्रायेति**। तस्माद् वृत्तिग्रन्थ एतन्निषेधकत्वस्यापि बोधक एवेति भावः। **उस्रो रश्मिरिति**। 'किरणोऽस्रमयूखांशु' इत्यमरादिति भावः । 'उस्रो वृषे च किरणे' इति मेदिनी। **उस्रेति**। 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः। **वास्र इति**। वाश्रधातो रूपम्। **मुस्रमिति**। मुस खण्डने, इत्यस्माद्रूपम्। **चकिरम्योरुच्चोपधायाः**। चक तृप्तौ, रमु क्रीडायम्, आभ्यां रक्प्रत्ययः, उपधाया उकारश्चेत्यर्थः। **चुक्र इति**। 'सहस्रवेधी चुक्रोऽम्लवेतसः' इत्यमरः। **वौ कसेः**। कस गतौ, विपूर्वादस्माद् रक् स्यादुत्वं चोपधायाः। विकुस्र इति रूपम्। **अमितम्योर्दीर्घश्च**।

चस्रम्' इति मन्त्रे वेदभाष्यकारैरित्थं व्याख्यातं प्रकृतसूत्रे उज्ज्वलदत्तादिभिश्च। दशपादीवृत्तौ तु तृप्रमाज्यं काष्ठं चेत्युक्तम्। तृप्रं दुःखमिति सुब्धातुवृत्तौ माधवः। हिमांशुरित्यादि हिमद्युतिरित्यन्तं शब्दार्णवः। दस्यति रोगान् क्षिपतीति 'दस्रः खरेऽश्विनीसुते' इति मेदिनी। 'दस्रः खरे चाश्विनयोः' इति विश्वः। **शासिवसीति प्राप्तमपि नेति**। एवं च 'अविन्द उस्रियाः' इति मन्त्रे षत्वाभावः सिद्धः। माधवस्तु वृत्तिग्रन्थानुरोधेन बाहुलकादिह षत्वं नेति व्याचष्ट। 'उस्रो वृषे च किरणे उस्राजुंन्युपचित्रयोः' इति मेदिनी। 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः। 'वाश्रो ना दिवसे क्लीबं मन्दिरे च चतुष्पथे' इति मेदिनी। 'वाश्रो रासभपक्षिणोः' इति केचित्। माधवेन तु 'वाश्रेव विद्युन्मिमाति' इति मन्त्रे शब्दयुक्ता प्रस्तुतस्तना धेनुर्वाश्रेति व्याख्यातम्। 'शुभ्रं स्यादभ्रके क्लीबमुद्दीप्तशुक्लयोस्त्रिषु' इति मेदिनी। **मुस्रमिति**। मुस खण्डने। **चकि**। चक तृप्तौ, रमु क्रीडायाम्, 'चुक्र-

ताम्रम् । १७४ निन्देर्नलोपश्च । निद्रा । १७५ अर्देर्दीर्घश्च । आर्द्रम् । १७६ शुचेर्दश्च । शूद्रः । १७७ दुरीणो लोपश्च । दुःखेनेयते प्राप्यत इति दूरम् । १७८ कृतेश्छः क्रू च । कृच्छ्रम् । क्रूरः । १७९ रोदेर्णिलुक् च ।

अम गत्यादिषु, तमु काङ्क्षायाम्, आभ्यां रक्प्रत्ययः, प्रकृतेरचो दीर्घश्चेत्यर्थः । **आम्रमिति** । 'आम्रश्चूतो रसालोऽसौ' इत्यमरः । **ताम्रमिति** । तमुधातो रूपम् । **निन्देर्नलोपश्च** । णिदि कुत्सायामस्माद्धातोः रक्प्रत्ययः, तत्संनियोगेन धातोर्नकारस्य लोपश्चेत्यर्थः । **निद्रेति** । इदित्वान्नुमि तस्य लोप इत्यर्थः । 'स्यान्निद्रा शयनं स्वापः' इत्यमरः । **अर्देर्दीर्घश्च** । अर्द गतौ याचने च अस्माद् रक्प्रत्ययः धातोर्दीर्घश्चेत्यर्थः । आर्द्रमिति रूपम् । 'आर्द्रं सार्द्रं क्लिन्नं तिमितम्' इत्यमरः । **शुचेर्दश्च** । शुच शोके, अस्माद् रक् , धातोर्दकारश्चान्तादेशः, उपधाया दीर्घश्चेत्यर्थः । 'शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः । **दुरीणो लोपश्च** । इण् गतावित्यस्माद् दुर्युपपदे रक् स्यात्, धातोर्लोपश्चेत्यर्थः । रकि रोरीति रेफस्य लोपे ढ्लोप इति दीर्घ इति भावः । **कृतेश्छः क्रू च** । कृती छेदने इत्यस्माद् रक् स्यात् प्रकृतेरन्त्यस्य तकारस्य छकारादेशः । क्रू इति अनेकाल्त्वात्सर्वादेशश्च स्यादित्यर्थः । 'स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् । देवभूयादिकं तद्वत् कृच्छ्रं सान्तपनादिकम् । नृशंसो घातुकः क्रूरः प्रायो धूर्तस्तु वञ्चकः ।' इत्यमरः । **रोदेर्णिलुक्च** । रुदिर् अश्रुविमोचने ण्यन्तादस्माद् रक्प्रत्ययः णेर्लुक्च स्यात् ।

स्त्वम्लेऽम्लवेतसे । चुक्री चाङ्गेरिकायां स्याद् वृक्षाम्लं चुक्रमिष्यते' इति विश्वः । **वौ कसेः** । कस गतौ । विपूर्वादस्माद्रक् स्यादुत्वं चोपधायाः । **अमि** । अम गत्यादिषु, तमु काङ्क्षायाम् । आभ्यां रक् स्यादुपधाया दीर्घश्च । **निन्देः** । णिदि कुत्सायाम् । **अर्देः** । अर्द गतौ । 'आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत्' इति मेदिनी । **शुचेः** । शुच शोके, अस्माद्रक दश्चान्तादेशः धातोर्दीर्घश्च । शूद्रो वृषलः । 'अहद्यु रे त्वा शूद्र' इति श्रुतौ तु रूढेर्बाधाद् योग एव पुरस्कृतः । तथा चोत्तरतन्त्रे भगवता व्यासेन सूत्रितं 'शुगस्य तदनादरश्रवणात्' इति । **दुरीणो** । इण गतावित्यस्माद्दुरुपपदे रक् स्याद्धातोर्लोपश्च । 'रो रि' इति रेफस्य लोपे 'ढ्लोपे–' इति दीर्घः । **कृतेः** । कृती च्छेदने इत्यस्माद्रक् स्याच्छ्रःक्रू इत्येतावादेशौ च स्तः । छस्त्वन्त्यस्यादेशः । क्रू त्वनेकाल्त्वात्सर्वस्यादेशः । 'कृच्छ्रमाख्यातमाभीले । पापसंतापनादिनोः' इति विश्वमेदिन्यौ । 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः । 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति विश्वः । 'नृशंसो घातुकः 'क्रूरः पापो धूर्तस्तु वञ्चकः' इत्यमरः । **रोदेः** । रुदिर् अश्रुविमोचने, ण्यन्तादस्माद्रक् णेश्च लुक् । 'णेरनिटि' इति लोपे तु 'पुगन्त–'

रोदयतीति रुद्रः। १८० बहुलमन्यत्रापि संज्ञाछन्दसोः। णिलुगित्येव। 'वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे। ततः पर्णरुहो वान्ति ततो देवः

णेरनिटीति लोपे सिद्धे लुग्वचनं प्रत्ययलक्षणेन गुणाभावार्थम्। **रोदयतीति रुद्र इति**। रुकि रूपम्। **बहुलमन्यत्रापि संज्ञाच्छन्दसोः**। संज्ञाच्छन्दसोरन्यत्रापि धात्वन्तरात् प्रत्ययान्तरेऽपि बहुलं णेर्लुग् वक्तव्य इत्यर्थः। संज्ञायामुदाहरणं बृंहयति वर्धयति प्रजा इति ब्रह्मा। णेर्लुक्। छन्दसि तु 'वर्धन्तु त्वा सुष्टुतयः'। वर्धयन्त्वित्यर्थः। बाहुलकात्संज्ञाछन्दसोरभावेऽपि क्वचिद् भवतीत्याह **वान्ति पर्णशुष इति**। प्रथमतः पर्णशुषः वाता वान्ति पर्णं शोषयन्तीत्यर्थः।

इति गुणः स्यादिति णिलुक् चेत्युक्तम्। **रोदयतीति रुद्र इति**। नन्वेवं 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति श्रुत्या सह विरोधोऽत्र स्यादिति चेत्। अत्राहुः—'कर्तरि कृत्' इति सूत्रानुरोधेन शम्भुरित्यत्र शं भावयतीत्यन्तर्भावितण्यर्थता यथा स्वीक्रियते तथा अरोदीदित्यत्राप्यन्तर्भावितण्यर्थतायां स्वीकृतायां रोदनं कारितवानित्यर्थलाभान्नास्ति श्रुतिविरोधः। न च देवैरग्नौ वामं वसु स्थापितं तच्च धनं देवैर्याचितं चेदग्निस्तु रोदनं कृतवानिति सोऽरोदीदित्यादिश्रुत्यर्थादिहान्तर्भावितण्यर्थकल्पनं न संभवतीति श्रुतिविरोधस्त्वपरिहार्य एवेति वाच्यम्। देवैः स्थापितं वामं वसु देवेभ्योऽग्निना न दत्तं ते देवा एव रोदनं कृतवन्तः। अग्निस्तु तमदत्वा रोदनं कारितवानित्यर्थकल्पनायाः संभवात्। अथवाग्नौ प्रयुज्यमानरुद्रशब्दस्य रोदितीति रुद्र इत्येवार्थोऽस्तु परन्तु ब्रह्मविष्णुरुद्रा इति व्यवह्रियमाणो यो रुद्रस्तद्वाचकरुद्रशब्दस्य रोदेरित्युणादिसूत्रानुरोधेन रोदयतीति रुद्र इत्येवार्थकल्पनायां बाधकाभावात् श्रुतिविरोधोऽत्र नास्त्येवेति। **अन्यत्रापीति**। धात्वन्तरात्प्रत्ययान्तरेऽपि णेर्लुगित्यर्थः। संज्ञायामुदाहरणम्। बृंहयति वर्धयति प्रजा इति ब्रह्मा। शं सुखं भावयतीति शम्भुरित्यादि। छन्दसि तु वृद्ध वृद्धौ। 'वर्धन्तु त्वा सुष्टुतयः' वर्धयन्त्वित्यर्थः। 'य इमा जजान'। जनी प्रादुर्भावे लिटि रूपम्। जनयामासेत्यर्थः। इह णलि परतः 'अत उपधायाः' इति वृद्धिर्भवत्येव, 'जनिवध्योश्च' इति निषेधस्य चिणि ञिति णिति कृति च स्वीकारात्। न च णिलोपे सति प्रत्ययान्तत्वात् 'कास्प्रत्ययात्—' इत्याम्स्यादिति वाच्यम्, अमन्त्र इति पर्युदासादामोऽप्रसक्तेः। कास्यनेकाच इति वार्तिकेन तु आम्शङ्का दूरापास्तैव, लिटि णिलोपे सत्यनेकाच्त्वाभावात्। ननु णलि 'णेरनिटि' इत्यनिडादावार्धधातुके णिलोपे जजानेति रूपं सिद्धमिति किमनेन लुक्युदाहरणेनेति चेन्मैवम्। णिलोपे सति 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति णौ मित्त्वे 'मितां ह्रस्वः' स्यात् प्रत्ययलक्षणन्यायेन णिपरत्वसंभवात्। ततश्च जजनेति स्याल्लुकि सति तु

प्रवर्षेति'। १८१ **जोरी च**। जीरोऽणुः। ज्यश्चेत्येके। १८२ **सुसूधागृधिभ्यः क्रन्**। सुरः। सूरः। धीरः। गृध्रः। १८३ **शुसिचिमीनां दीर्घश्च**। शूः

पर्णशोषानन्तरं पर्णमुचो वाता वान्ति। पर्णं मोचयन्तीति पर्णमुचः। पर्णमोचनान्तरं पर्णरुहो वाता वान्ति। पर्णं रोहयन्तीति पर्णरुहः। ततो देवः वृष्टिं करोतीत्यर्थः। अत्र संज्ञाछन्दसोरभावेऽपि णेर्लुक्। **जोरी च**। जु इति सौत्रो धातुः, अस्माद् रक् स्यात्, ईकारश्चान्तादेश इत्यर्थः। **जीर इति**। 'जीरस्तु जरणे खड्गे' इति मेदिनी। **ज्यश्चेत्येक इति**। ज्या वयोहानौ, अस्माद् रकि ग्रहिज्येति संप्रसारणं पूर्वरूपं 'हलः' इति दीर्घे च, जीर इति रूपमित्यर्थः। इदमेव च सम्यक्। अत एव भाष्ये न धातुलोपसूत्रे 'जीवेरदानुः' इति वार्तिकस्य प्रत्याख्यानार्थं नैतद् जीवे रूपम्, अपि तु ज्याधातो रकि इति उक्तम्। **सुसूधागृधिभ्यः क्रन्**। षुञ् अभिषवे, षूङ् प्राणिगर्भविमोचने, डु धाञ् धारणपोषणयोः, गृधु अभिकाङ्क्षायाम्, एषां द्वन्द्वात् पञ्चमी। एभ्यः क्रन्प्रत्ययः स्यादित्यर्थः। **सुरेति**। कित्त्वान्न गुणः। रका सिद्धे क्रविधिः नित्स्वरार्थः। 'सुरा हलिप्रिया हाला' इत्यमरः। **सूर इति**। 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः। **धीर इति**। घुमास्थेतीत्वम्। 'धीरो मनीषी ज्ञः प्राज्ञः' इत्यमरः। **शुसिचिमीनां दीर्घश्च**। शु गतौ, षिञ् बन्धने, चिञ् चयने, डु मिञ् प्रक्षेपणे, एभ्यः क्रन्प्रत्ययः स्यात्, प्रकृतिभूतानामेषां दीर्घश्च। शु गतावित्यस्य

प्रत्ययलक्षणन्यायो न प्रवर्तत इति मित्त्वाभावादिष्टं सिध्यति। बाहुलकादसंज्ञाछन्दसोरपि क्वचिद्भवतीत्याशयेनोदाहरति **वान्तीत्यादि**। पर्णानि शोषयन्तीति पर्णशुषः पर्णानि मोचयन्तीति पर्णमुचः। **जोरी च**। जु गतौ सौत्रोऽस्माद्रक् ईकारश्चान्तादेशः। 'जीरः खड्गे वणिग्द्रव्ये' इति विश्वः। 'जीरस्तु जरणे खड्गे' इति मेदिनी। **ज्यश्चेति**। ज्या वयोहानौ। अस्माद्रक् 'ग्रहिज्या–' इति संप्रसारणं पूर्वरूपम् 'हलः' इति दीर्घः। **एके इति**। मुख्या इत्यर्थः। तथा च 'न धातुलोप–' इति सूत्रे जीवेरदानुरित्यस्य प्रत्याख्यानार्थं नैतज्जीवे रूपं किं तु 'रकि ज्यः संप्रसारणम्' इति भाष्ये उक्तम्। **सुसूधा**। षुञ् अभिषवे, षूञ् प्राणिगर्भविमोचने, डुधाञ् धारणादौ, गृधु अभिकाङ्क्षायाम्। 'सुरा चषकमद्ययोः। पुंल्लिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी। 'सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित्' इति विश्वः। सुवति प्रेरयति कर्मणि लोकमिति सूरः सूर्यः। 'सूरसूर्यार्यमादित्य' इत्यमरः। 'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे। स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी। 'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके' इति च। **शुसिचि**। शु गतौ, षिञ्

सौत्रः। शूरः। सीरम्। चीरम्। मीरः समुद्रः। **१८४ वाविन्धेः।** वीध्रं विमलम्। **१८५ वृधिवपिभ्यां रन्।** वर्ध्रं चर्म। वप्रः प्राकारः। **१८६ ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्रेरा-मालाः।** रन्नन्ता एकोनविंशतिः। निपातनाद् गुणाभावः। ऋज्रो नायकः। इदि इन्द्रः। अङ्गेर्नलोपः। अग्रम्। 'वज्रोऽस्त्री हीरके पवौ'। डु वप्, उपधाया

धातुपाठेऽदर्शनादाह--**शुः सौत्र इति।** **चीरमिति।** 'माणिक्यभाष्यसिन्दूरचीर-चीवरपिञ्जरम्' इत्यमरः। **मीर इति।** मिञ्धातो रूपम्। **वाविन्धेः।** वाउपपदे इन्धी दीप्तावित्यस्मात्कन्स्यादित्यर्थः। **वीध्रमिति।** अनिदितामिति नलोपः। 'वीध्रं तु विमलात्मकम्' इत्यमरः। **वृधिवपिभ्यां रन्।** वृधु वृद्धौ, डु वप् बीजसन्ताने, आभ्यां रन्प्रत्ययः स्यात्। **वर्ध्रमिति।** रनि उपधागुणः। 'नध्री वध्री वरत्रा स्यात्' इत्यमरः। **वप्र इति।** 'वप्रस्तापे पुमानस्त्री वेणुक्षेत्रचये तटे' इत्यमरः। **ऋज्रेन्द्राग्र।** ऋज गतिस्थानादिषु, इदि परमैश्वर्ये, अगि गतौ, वज गतौ, डु वप् बीजसन्ताने, कुबि आच्छादने, चुबि वक्त्रसंयोगे, क्षुर विलेखने, खुर छेदने, भदि कल्याणे, उच समवाये, ञि भी भये, शुच शोके, गुङ् अव्यक्ते शब्दे, वन संभक्तौ, इण् गतौ, मा माने, एते रन्नन्ता निपात्यन्ते। ऋज्र इत्यत्र उपधागुणमाशङ्क्याह **निपातनादिति।** अगिधातोरिगित्त्वादाह **अङ्गेर्नलोप इति।** शेषं स्पष्टम्।

बन्धने, चिञ् चयने, डुमिञ् प्रक्षेपणे, एभ्यः क्रन् एषां दीर्घत्वं च। 'शूरः स्याच्चादवे भटे' इति मेदिनी। 'शूरश्चारुभटे सूर्ये' इति विश्वहेमचन्द्रौ। 'सीरोऽर्कहलयोः पुंसि चीरी भिल्लयां नपुंसके। गोस्तने वज्रभेदे च रेखालेखनभेदयोः' इति मेदिनी। 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च। चीरी कृच्छाटिकाभिल्लयोः' इति विश्वः। **वा विन्धेः।** ञिइन्धी दीप्तौ। विपूर्वादस्मात् क्रन्, 'अनिदिताम्-' इति नलोपः। 'वीध्रं तु विमलार्थकम्' इति विशेष्यनिघ्नेऽमरः। **वृधि।** वृधु वृद्धौ, डुवप् बीजसन्ताने। 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिरन्तिदेवौ। 'वप्रस्ताते पुमानस्त्री वेणुक्षेत्रचये तटे' इति मेदिनी। **ऋज्रेन्द्राग्र।** ऋज गतिस्थानादिषु, इदि परमैश्वर्ये, अगि गतौ, वज गतौ, डुवप् बीजसन्ताने, कुबि आच्छादने, चुबि वक्त्रसंयोगे, भदि कल्याणे, शुच शोके, गुङ् अव्यक्ते शब्दे, इण् गतौ। **नायक इति।** 'ऋज्राश्वः पृष्टिभिरम्बरीषः' इति मन्त्रे ऋज्रा गति-मन्तोऽश्वा यस्य से ऋज्राश्व इति वेदभाष्यम्। 'इन्द्रः शचीपतावन्तरात्मन्यादित्य-योगयोः' इति विश्वः। 'अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते स्यात्पुंनपुंसकम्। अधिके च प्रधाने च प्रथमे चाभिधेयवत्' इति मेदिनी।

इत्वम्। विप्रः। कुम्बिशुम्भ्योर्नलोपः। कुम्भरयम्। शुम्भं शुल्बम्। 'क्षुर विलेखने' रेफलोपः अगुणः। क्षुरः। 'खुर छेदने' रलोपो गुणाभावश्च, खुरः। भन्देर्नलोपः, भद्रम्। 'उच समवाये' चस्य गः, उग्रः। भि भी, भेरी। पक्षे लः भेलो जलतरणद्रव्यम्। शुचेश्चस्य कः, शुक्रः। पक्षे लः शुक्लः। गुङ्। वृद्धिः। 'गौरोऽरुणे सिते पीते'। 'वन संभक्तौ' वन्रो विभागी। इणो गुणाभावः। 'इरा मद्ये च वारिणि'। 'मा माने' माला। १८७ समि कस उकन्। 'कस गतौ' सम्यक् कसन्ति पलायन्ते जना अस्मादिति संकसुकः, दुर्जनः, अस्थिरश्च। १८८ पचिनशोर्णुकन्कनुमौ च। पचेः कः। पाकुकः सूपकारः।

समि कस उकन्। कस् गतौ, अस्मात्समि उपपदे उकन्प्रत्यय इत्यर्थः। संकसुक इति रूपम्। पचिनशोर्णुकन्कनुमौ च। डु पचष् पाके, णश अदर्शने, आभ्यां णुकन्प्रत्ययः स्यात्। अनयोः क्रमेण कादेशनुमागमौ च भवत इत्यर्थः। णुकनो

क्षुरो लोमच्छेदकः। 'क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे' इति विश्वमेदिन्यौ। 'खुरः कोलदले शफे' इति मेदिनी। 'भद्रः शिवे खञ्जरीटे वृषभे तु कदम्बके। करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः' इति च। 'उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे। स्त्रीवचाक्षुद्रयोः' इति मेदिनी। भेरीति। गौरादित्वान्ङीष्। भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः। 'भेलः प्लवे भीलुके च निर्बुद्धिमुनिभेदयोः' इति विश्वः। 'भेलः प्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्' इति। 'शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीबं शुक्लो योगान्तरे सिते। नपुंसकं तु रजते' इति च। 'गौरः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरी त्वसंजातरजःकन्याशंकरभार्ययोः। रोचने रजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगाया विशेषेऽपि यादसांपतियोषिति' इति च मेदिनी। 'नदीभेदे च गौरी स्याद्वरुणस्य च योषिति' इति विश्वः। 'अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते। सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तितः' इति ब्रह्माण्डवचनं श्राद्धकाण्डे हेमाद्रिणोदाहृ॑ एतेन 'गौरः शुच्याचारः' इत्यादि भाष्यं व्याख्यातम्। 'इराभूवाक्सुराप्सु स्यात्' इत्यमरः। मालेति। प्रत्ययरेफस्य लत्वम्। 'मालं क्षेत्रे स्त्रियां पुष्पाद्युजोजात्यन्तरे पुमान्' इति मेदिनी। 'मालं क्षेत्रे जिने मालो माला पुष्पादिदामनि' इति विश्वः। 'मालमुन्नतभूतलम्' इत्युत्पलः। 'क्षेत्रमारुह्य मालम्' इति मेघदूतः। मणिपूर्वोऽयमर्थान्तरे रूढः। 'मणिमाला स्मृता हारे स्त्रीणां दन्तक्षताान्तरे' इति विश्वः।

नशेर्नुम्, नंशुकः। १८६ भियः क्रुकन्। भीरुकः।१६० क्वुन्शिल्पिसंज्ञयोरपूर्वस्यापि। रजकः। इक्षुकुट्टकः। चरकः। 'चष भक्षणे'। चषकः। शुनकः। भषकः। १६१ रमे रश्च लो वा। रमको विलासी। लमकः। १६२ जहातेर्द्वे च। जहकस्त्यागी कालश्च। १६३ ध्मो धम च। धमकः कर्मकारः। १६४ हनो वध च। वधकः १६५ बहुलमन्यत्रापि। 'कुट्ट विस्मापने'।

णित्वाद् वृद्धिः। पाकुकः नंशुक इति रूपम्। **भियः क्रुकन्।** ञि भी भये इत्यस्मात् क्रुकन्प्रत्यय इत्यर्थः। भीरुक इति रूपम्। 'भीरुकः कारुकः त्रस्तो भीरुभीरुकभीलुकाः' इत्यमरः। **क्वुन्शिल्पि।** शिल्पिन्यभिधेये संज्ञायां च गम्यमानायां क्वुन्स्यात्। अपूर्वस्य निरुपपदस्येत्यर्थः। पञ्चम्यर्थे षष्ठी। अपिशब्दात्सोपपदादपि। शिल्पिन्युदाहरति **रजक इति।** रञ्ज रागे इत्यस्मात् क्वुनि नलोपे अकादेशे च रूपम्। 'निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः' इत्यमरः। सोपपदादुदाहरति **इक्षुकुट्टक इति।** कुट्ट छेदने, इक्षून् कुट्टयतीति इक्षुकुट्टकः। संज्ञायामुदाहरति **चरक इति।** 'पातकोयोगचरकतमालामलका नडाः' इत्यमरः। **चषक इति।** 'चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम्' इत्यमरः। **शुनक इति।** शुन गतावित्यस्मात्क्वुनि रूपम्। **भषक इति।** भष भर्त्सने इत्यस्माद्रूपम्। 'शुनको भषकः श्वा स्यादलर्कस्तु स रोगितः' इत्यमरः। **रमे रश्च लो वा।** रमु क्रीडायामित्यस्मात् क्वुन्स्यात्, धातो रेफस्य लकारश्च वेत्यर्थः। लमक इति रूपम्। **जहातेर्द्वे च।** ओ हाक् त्यागे, अस्मात् क्वुन्स्यात्, धातोर्द्वित्वं च स्यादित्यर्थः। जहक इति रूपम्। **ध्मो धम च।** ध्मा शब्दाग्निसंयोगयोः, अस्मात्क्वुन्स्याद्

स्मि कस। 'संसुकोऽस्थिरः' इति विशेष्यनिघ्नेऽमरः। **पचिनशोः-।** डुपचष् पाके, णश अदर्शने। आभ्यां णुकन् प्रत्ययः स्यात्। णकारो वृद्ध्यर्थः। अनयोर्यथाक्रमं कादेशनुमागमौ च भवतः। **भियः।** ञिभी भये 'अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुका' इत्यमरः। **क्वुन्।** शिल्पिन्यभिधेये संज्ञायां गम्यमानायां च क्वुन् स्यादपूर्वस्य निरुपपदस्य च अपिशब्दात्सोपपदस्य। पञ्चम्यर्थे षष्ठी। यद्वा अर्थद्वारकसंबन्धे षष्ठी, प्रकृतिप्रत्ययार्थयोः क्रियाकारकभावात्। एवं च निरुपपदप्रकृत्यर्थनिरूपितकर्तृकारके क्वुन्नित्यायर्थः फलितः। शिल्पिनि तावत्। रञ्ज रागे। 'रजको धावके शुके' इति विश्वः। 'रजकौ धावकशुकौ' इति हेमचन्द्रः। 'कुट्ट च्छेदने' इक्षून् कुट्टयति शौण्डिकः। चर गतिभक्षणयोः। संज्ञायां तु 'चषकोऽस्त्री पानपात्रम्'। शुन गतौ, भष भर्त्सने, शुनकः भषकः श्वा। **लमक इति।** ऋषिविशेषः। **जहातेः।** ओहाक् त्यागे। **ध्मो धम च।** ध्मा शब्दाग्निसंयोगयोः।

कुहकः । कृतकम् । १९६ कृषेर्वृद्धिश्चोदीचाम् । कार्षकः, कृषकः । १९७ उदकं च । प्रपञ्चार्थम् । १९८ वृश्चिकृष्योः किकन् । वृश्चिकः । कृषिकः । १९९ प्राङि पणिकषः । प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी । २०० मुषेर्दीर्घश्च । मूषिकः आखुः । २०१ स्यमेः संप्रसारणं च । चाद्दीर्घः सीमिकः वृक्षभेदः । २०२ क्रिय इकन् । क्रयिकः क्रेता । २०३ आङि पणि-

---

धातोर्धमादेशश्चेत्यर्थः । धमक इति रूपम् । हनो वध च । वधक इति । हन हिंसागत्योः, क्वुनि धातोर्वधादेशे च रूपम् । बहुलमन्यत्रापि । अन्यधातोरपि क्वुन्स्यात् । कुहधातोः क्वुनि कुहक इति रूपम् । कृतकमिति । कृती छेदने । कृषेर्वृद्धिश्चोदीचाम् । कृष विलेखने, अस्मात्क्वुन्, उदीचां मते वृद्धिश्चेत्यर्थः । उदीचां ग्रहणाद्विकल्पोऽयं वृद्धिविधिः । कार्षकः कृषक इति रूपम् । उदकं च । उन्दी क्लेदने, अस्मात् क्वुन् । ननु क्वुन्शिल्पिसंज्ञयोरित्यादिना संज्ञात्वात्सिद्धमित्यत आह प्रपञ्चार्थमिति । वृश्चिकृष्योः किकन् । ओ व्रश्चू छेदने, कृष विलेखने, आभ्यां किकन्स्यात्, वृश्चिक इति रूपम् । 'किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिके' इत्यमरः । कृषिक इति । 'क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः' इत्यमरः । प्राङि पणिकषः । प्राङि उपपदे पण व्यवहारे स्तुतौ च, कष हिंसायामिति धातुभ्यां किकन्स्यादित्यर्थः । प्रापणिक इति । प्रआङ्पूर्वकपणधातो रूपम् । प्राकषिक इति । कषधातो रूपम् । मुषेर्दीर्घश्च । मुष स्तेये, इत्यस्मात्किकन् स्याद् धातोर्दीर्घश्चेत्यर्थः । मूषिक इति रूपम् । 'उन्दुरुर्मूषिकोऽप्याखु' इत्यमरः । स्यमेः संप्रसारणं च । स्यमु शब्दे, अस्मात् किकन्, धातोः संप्रसारणं दीर्घश्चेत्यर्थः । सीमिक इति रूपम् । क्रिय इकन् । डु क्रीञ् द्रव्यविनिमये इत्यस्मादिकन्प्रत्यय इत्यर्थः । क्रयिक इति । गुणे अयादेशे च रूपम् । आङि पणिपनि । पण व्यवहारे स्तुतौ च, पन च, पत्लृ गतौ, खनु अवदारणे एषां द्वन्द्वात् पञ्चमी । आङि उपपदे एतेभ्यः इकन्प्रत्ययः स्यात् । आङि उपपदेऽनेन इकना

कुहको दाम्भिकः । कृतकमिति । कृती छेदने । कृषेः । कृष विलेखने । अस्मात्क्वुन् वृद्धिश्च कार्षकः कृषीवलः । कृषकः स एव । 'कृषकः पुंसि फाले स्यात्कार्षके त्वभिधेयवत्' इति मेदिनी । उदकं च । उन्दी क्लेदने अस्मात्क्वुन् । ननु 'क्वुन् शिल्पि—' इत्यादिना गतार्थमित्याशङ्कायामाह प्रपञ्चार्थमिति । वृश्चिकृष्योः । ओव्रश्चू छेदने, कृष विलेखने । प्राङि । पण व्यवहारे । कषशिषेति दण्डके हिंसार्थकः । मुषेः । मुष स्तेये अस्मात्किकन् धातोर्दीर्घश्च । स्यमेः । स्यमु शब्दे । क्रियः । डुक्रीञ् द्रव्यविनिमये । आङि पणि । पण व्यवहारे स्तुतौ च, पन च,

पनिपतिखनिभ्यः । आपणिकः । आपनिकः इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च । आखनिको मूषिको वराहश्च । २०४ **श्यास्त्याहृञविभ्य इनच्** । श्येनः । स्त्येनः । हरिणः । अविनोऽध्वर्युः । २०५ **वृजेः किच्च** । वृजिनम् । २०६ **अजेरज च** । वीभावबाधनार्थम् । अजिनम् । २०७ **बहुलमन्यत्रापि** । कठिनम् । नलिनम् । मलिनम् । कुण्डिनम् ।

रूपसिद्धेः प्राङि पणिकष इत्यत्र पणिग्रहणं प्रपञ्चार्थम् । उपसर्गान्तरनिवृत्त्यर्थं वा तत् । **श्यास्त्याहृञविभ्य इनच्** । श्यैङ् गतौ, ष्ट्यै शब्दसंघातयोः, हृञ् हरणे, अव रक्षणादौ, एभ्य इनच् स्यात् । **श्येन इति** । 'पत्री श्येन उलूकस्तु वायसारातिपेचकौ' इत्यमरः । स्त्येनश्चोरः । **हरिण इति** । 'मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः । **वृजेः किच्च** । वृजी वर्जने, अस्माद् इनच् स्यात्, स च किद्भवतीत्यर्थः । **वृजिनमिति** । 'कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम्' इत्यमरः । 'वृजिनं कल्मषे क्लीबम्' इति मेदिनी । **अजेरज च** । अज गतिक्षेपणयोः, अस्मादिनच् अजेरजादेशश्चेत्यर्थः । न चाजेरजादेशविधानं व्यर्थमिति वाच्यम्, वीभावबाधनार्थं तदावश्यकत्वात् । 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः । **बहुलमन्यत्रापि** ।

पत्लृ गतौ, खनु अवदारणे, एभ्य आङि उपपदे इकन् स्यात् । **आपणिक इति** । नन्वत्रैव प्रपूर्वे आङि प्रापणिक इति सिद्धौ आङि पणीत्यत्र पणिग्रहणं प्रपञ्चार्थमित्युज्ज्वलदत्तः । उपसर्गान्तरनिवृत्त्यर्थमिति तु मनोरमायाम् । आपणिकशब्दोऽयं णित्स्वरेणाद्युदात्तः । आपणेन व्यवहरतीत्यर्थे ठकि तु कित इत्यन्तोदात्तः । **श्यास्त्या** । श्यैङ् गतौ, स्त्यै ष्ट्यै शब्दसंघातयोः, हृञ् हरणे, अव रक्षणादौ । 'श्येनः पत्रिणि पाण्डुरे' इति मेदिनी । स्त्येनश्चौरः । स्तेन चौर्ये इति चौरादिकात्पचाद्यचि तु स्तेन इति निर्यकारोऽपि । केचित्तु 'स्तायूनां पतये नमः' इत्यादिप्रयोगोपष्टम्भेन निर्यकारस्यापि ष्टैधातोर्माधवादिभिर्व्यादिषु स्वीकृतत्वात्प्रकृतसूत्रेऽपि ष्टैधातुमेव पठन्तः स्तेनशब्दो निर्यकार एवेत्याहुः । 'हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत् । हरिणी हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च' इति मेदिनी । **वृजेः** । वृजी वर्जने । वृजिनं पापम् । 'वृजिनं कल्मषे क्लीबं क्लेशे ना कुटिलेऽन्यवत्' इति मेदिनी । **अजेः** । अज गतिक्षेपणयोरस्मादिनच् । अजेरजादेशविधानं व्यर्थमित्यत आह **वीभावबाधनार्थमिति** । 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः । **बहुलमन्यत्रापि** । अन्यस्मादपीत्यर्थः । कठ कृच्छ्रजीवने, णल गहने, मल मल्ल धारणे, कुडि दाहे, दो अवखण्डने । 'कठिनमपि निष्ठुरे स्यात् स्तब्धे तु त्रिषु नपुंसकं स्थाल्याम् । कठिनी खटिकायामपि कठिना गुडशर्करायां च' इति मेदिनी ।

द्यतेः 'यत्परुषि दिनम्' । दिवसोऽपि दिनम् । २०८ द्रुदक्षिभ्यामिनन् । द्रविणम् । दक्षिणः । दक्षिणा । २०९ अर्तेः किदिच्च । इरिणं शून्यम् । २१० वेपितुह्योर्ह्रस्वश्च । विपिनम् । तुहिनम् । २११ तलिपुलिभ्यां च । 'तलिनं विरले स्तोके स्वच्छेऽपि तलिनं त्रिषु' । पुलिनम् । २१२ गर्वेरत उच्च । गौरादित्वान्ङीष् । गुर्विणी गर्भिणी । २१३ रुहेश्च ।

अन्येभ्योऽपि धातुभ्य इनज् वक्तव्य इत्यर्थः । **कठिनमिति** । कठ कृच्छ्रजीवने इत्यस्माद्रूपम् । **नलिनमिति** । णल गहने इत्यस्माद्रूपम् । **मलिनमिति** । मल धारणे इत्यस्माद्रूपम् । **कुण्डिनमिति** । कुडि दाहे इत्यस्माद्रूपम् । **द्यतेरिति** । दो अवखण्डने इत्यस्मादिनच स्यादित्यर्थः । दिनमिति रूपम् । **द्रुदक्षिभ्यामिनन्** । द्रु गतौ, दक्ष वृद्धौ, आभ्यामिनन् स्यादित्यर्थः । **द्रविणमिति** । 'हिरण्यं द्रविणं द्युम्नम्' इत्यमरः । **दक्षिण इति** । 'दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि' इत्यमरः । **अर्तेः किदिच्च** । ऋ गतौ, अस्मादिनन् । स च कित् । धातोरित्त्वं चादेशः । रपरत्वम् । **इरिणमिति** । 'इरिणं शून्यमूषरम्' इत्यमरः । **वेपितुह्योर्ह्रस्वश्च** । टु वेपृ कम्पने, तुहिर् अर्दने, आभ्यामिनन् धातोर्ह्रस्वश्चेत्यर्थः । एकारस्य ह्रस्व इकारः । 'अटव्यरण्यं विपिनम्' इत्यमरः । **तुहिनमिति** । लघूपधगुणे ह्रस्वः । **तलिपुलिभ्यां च** । तल प्रतिष्ठायाम्, पुल महत्त्वे, आभ्यामिनन्स्यात् । तलिनशब्दार्थं विवृण्वन्नाह **तलिनं विरले स्तोक इति** । **पुलिनमिति** । 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः । **गर्वेरत उच्च** । गर्व मोचने, अस्मादिनन्, अकारस्य उकार आदेशश्चेत्यर्थः । स्त्रीत्वविवक्षाया-

---

'मलिनं दूषिते कृष्णे ऋतुमत्यां तु योषिति' इति मेदिनी । **कुण्डिनमिति** । 'नगरं कुण्डिनमण्डजो ययौ' इति श्रीहर्षः । कुण्डिन ऋषिः । तस्यापत्यं कौण्डिन्यः । **यत्परुषीति** । 'पर्वणि दिनं खण्डितं तद्देवाना'मिति तैत्तिरीयश्रुत्यर्थः । **द्रुदक्षि** । द्रु गतौ, दक्ष वृद्धौ । । 'द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे' इति मेदिनी । 'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवृत्तिषु । अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्' इति च । 'दक्षिणः सरलोदारपरच्छन्दानुवृत्तिषु । वाच्यवद्दक्षिणा वाचि यज्ञदानप्रतिष्ठयोः' इति विश्वः । **अर्तेः** । ऋ गतौ, अस्मादिनन् कित्स्याद् इकारश्च धातो रपरत्वम् । 'इरिणं शून्यमूषरम्' इत्यमरः । 'इरिणं तूषरे शून्येऽपि' इति मेदिनी । **वेपि** । टुवेपृ कम्पने, तुहिर् अर्दने, आभ्यामिनन् ह्रस्वश्च धातोः । 'अटव्यरण्यं विपिनम्' इत्यमरः । **तुहिनमिति** । लघूपधगुणे कृते ह्रस्वः । **तलिः** । तल प्रतिष्ठायाम्, पुल महत्त्वे । 'तलिनं विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम्'

रोहिणः । २१४ **महेरिनण्च** । चादिनन् । माहिनम्-महिनम् राज्यम् । २१५ **क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च** । वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकमिति स्रूः, यज्ञोपकरणम् । द्रुर्हिरण्यम् । कटप्रः कामरूपी कीटश्च । 'जूराकाशे सरस्वत्यां पिशाच्या जवने स्त्रियाम्' । २१६ **आप्नोतेर्ह्रस्व-**

माह **गौरादित्वादिति** । **गुर्विणीति** । 'आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः । **रुहेश्च** । रुह बीजजन्मनि, प्रादुर्भावे च, अस्मादिननप्रत्यय इत्यर्थः । **रोहिण इति** । उपधागुणे रूपम् । गौरादित्वाद् रोहिणी । 'अर्जुन्यघ्न्या रोहिणी स्यात्' इति वैश्यवर्गे अमरः । **महेरिनण् च** । मह पूजायाम् अस्मादिनण् स्यात् । चकारादिननपि । **माहिनमिति** । इनणो णित्त्वादुपधावृद्धिः । **महिनमिति** । इननि रूपम् । **क्विब्वचिप्रच्छि** । वच परिभाषणे, प्रच्छ ज्ञीप्सायाम्, श्रिञ् सेवायाम् स्रु गतौ, द्रुङ् गतौ, प्रुङ् गतौ जु गतौ सौत्रः, एषां द्वन्द्वात् षष्ठी । एभ्यः क्विप् स्यात्, दीर्घः क्वित्वात्प्राप्तसंप्रसारणाभावश्च स्यादित्यर्थः । **वागिति** । क्विपः सर्वलोपितया कुत्वे दीर्घे वचिस्वपियजादीनामिति प्राप्तसंप्रसारणाभावे च रूपम् । **प्राट इति** । प्रच्छधातोः क्विपि ग्रहिज्येति संप्रसारणाभावे दीर्घे छस्य 'च्छ्वोः शूडनुनासिके च' इति शकारे व्रश्चेति षत्वे जश्त्वे चर्त्वे च रूपम् । **श्रीरिति** । दीर्घे रूपम् । कृदिकारादिति ङीष् तु न शङ्क्यः । कृतो य इकार इति व्याख्यानात् । अत्र इकारस्य कृदवयवत्वं नास्ति, कृत्प्रत्ययस्तु सर्वलुप्तः । **स्रूरिति** । स्रुधातोर्दीर्घे रूपम् । **द्रूरिति** । द्रुधातो रूपम् । जूशब्दार्थे विश्वमेदिनीकोशमाह **जूराकाशे सरस्वत्यामिति** । **आप्नोतेर्ह्रस्वश्च** । आप्लृ व्याप्तौ, अस्मात्क्विप्

इति मेदिनी । **गर्वे** । गर्व मोचने, अस्मादिनन् अकारस्य उत् । **रुहेश्च** । रुह बीजजन्मनि प्रादुर्भावे च । **रोहिण इति** । प्रज्ञादित्वादणि रौहिणश्चन्दनतरुः । **महेः** । मह पूजायाम् । 'कुतस्त्वमिन्द्रमाहिनः सन्' इति मन्त्रे माहिनो महनीयः पूजनीय इति वेदभाष्यम् । **क्विब्वचि** । वच परिभाषणे, प्रच्छ ज्ञीप्सायाम्, श्रिञ सेवायाम्, स्रु गतौ, द्रु गतौ, प्रुङ् गतौ, जु गतौ, सौत्रः । **वागिति** । 'वचिस्वपि-' इति संप्रसारणाभावः । पृच्छतीति प्राट्, 'ग्रहिज्या-' इति संप्रसारणाभावः, 'छ्वोः शूड्-' इति शः, 'व्रश्च-' इति षत्वं जश्त्वचर्त्वे, प्राशौ प्राशः । **श्रीरिति** । 'कृदिकारात्-' इति ङीष् न भवति कृत्प्रत्ययस्य य इकार इति व्याख्यानात् । कृदन्तं यदिकारान्तमिति पक्षे तु यद्यपि ङीष्प्राप्तिरस्ति तथापि कारग्रहणसामर्थ्येन केवलस्येकारस्य ग्रहणादकारान्तपक्षो दुर्बल इत्याहुः । दुर्घटस्तु ङीषि श्रीमत्यपि रक्षित इच्छतीत्याह । 'श्री वेषरचना शोभा भारती सरलद्रुमे । लक्ष्म्यां त्रिवर्गसंपत्तिविधोपकरणेषु च ।

श्च। आपः। अपः। अद्भिः। अद्भ्यः। २१७ परौ व्रजेः षः पदान्ते। व्रजेः क्विब्दीर्घौ स्तः पदान्ते तु षश्च। परिव्राट्। परिव्राजौ। २१८ हुवः श्लुवच्च। जुहूः। २१९ स्रुवः कः। स्रुवः। २२० चिक्च। इकार उच्चारणार्थः। क इत्, कुत्वम्। स्रुक्। 'स्रुवं च स्रुचश्च संमृड्ढि'। २२१ तनोतेरनश्च वः। तनोतेश्चिक्प्रत्ययः, अनो वशब्दादेशश्च। त्वक्। २२२ ग्लानुदिभ्यां डौः। ग्लौः। नौः। २२३ च्विरव्ययम्। डौरित्येव। ग्लौकरोति। 'कृन्मेजन्तः'

स्यात्, प्रकृतेर्ह्रस्वश्चेत्यर्थः। आप इति। अप्तृन्निति दीर्घः। ह्रस्वश्रवणायाह अप इति। अद्भिरिति। 'अपो भि' इति तकारादेशः, जश्त्वम्। परौ व्रजेः षः पदान्ते। परावुपपदे व्रज गतावित्यस्मात्क्विब् दीर्घश्च भवतः। पदान्तस्य तु जकारस्य षकारश्चेत्यर्थः। पदान्तविषये षत्वे कृते उदाहरति परिव्राडिति। जश्त्वचर्त्वे इति भावः। परिव्राजाविति। पदान्तत्वाभावान्न षत्वम्। हुवः श्लुवच्च। हु दानादानयोः, अस्मात्क्विप्, धातोर्दीर्घः, श्लुवत्त्वं च भवतीत्यर्थः। जुहूरिति। श्लुवद्भावाद् द्विर्वचने अभ्यासहस्ले च रूपम्। स्रुवः कः। स्रु गतावित्यस्मात् कप्रत्यय इति भावः। स्रुव इति। किरवाद्गुणाभावे उवङि च रूपम्। 'ध्रुवोऽपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः' इत्यमरः। अयं स्रुवोऽभिजिहर्ति होमानिति मूल एव जुहोत्यादिव्याख्याप्रकरणे उक्तम्। चिक् च। स्रुव इत्यनुवर्तते। स्रु गतावित्यस्मात् चिक्प्रत्ययो भवतीत्यर्थः। कित्त्वं गुणनिषेधार्थम्। इकार उच्चारणार्थः। चस्य कुत्वे च स्रुक् इति रूपम्। तनोतेरनश्च वः। चिगित्यनुवर्तते। तनु विस्तारे इत्यस्मात् चिक्प्रत्ययः। तन्धात्ववयवस्य अन् इति संघातस्य व इत्यकारविशिष्टः संघातो भवतीत्यर्थः। चस्य कुत्वे च रूपमाह त्वगिति। 'स्त्रियां तु त्वगसृग्धरा' इत्यमरः। ग्लानुदिभ्यां डौः। ग्लै हर्षक्षये, णुद प्रेरणे, आभ्यां डौप्रत्यय इति भावः। ग्लौरिति। टेरिति टिलोपः। 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः। नौरिति। टिलोपे रूपम्। 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः। च्विरव्ययम्। डौरित्यनुवर्तते।

विभुतौ च मतौ च स्त्री' इति मेदिनी। जूराकाशे इत्यादिमूलोदाहृतमिति मेदिनी। आप्नोतेः। आप्लृ व्याप्तौ, अस्मात्क्विप् धातोर्ह्रस्वश्च। 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः। परौ। व्रज गतौ। हुवः। हु दानादनयोः। अस्मात्क्विब् धातोश्च दीर्घः श्लुवद्भावाद् द्विर्वचनम्। स्रुवः कः। स्रु गतौ। स्रुवो यज्ञपात्रविशेषः। 'अयं स्रुवो अभिजिहर्ति' 'स्रुवेण पार्वणौ जुहोति' इत्यादौ प्रसिद्धः। चिक् च। स्रुव इत्येव। योगविभाग उत्तरार्थः। क इदिति। तेन स्रुक् स्रुचौ स्रुच इत्यादौ गुणो न। तनोते। तनु विस्तारे, व इति संघातग्रहणम्, तदाह शब्दादेश इति।

(सू ४४६) इति सिद्धे नियमार्थमिदम् । उणादिप्रत्ययान्तश्च्व्यन्त एवेति । **२२४ रातेर्डैः** । राः रायौ रायः । **२२५ गमेर्डोः** । 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' । बाहुलकाद्द्युतेरपि डोः । 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' इति कोशः । **२२६ भ्रमेश्च डूः** । भ्रूः । चाद्गमेः अग्रेगूः । **२२७ दमेर्डोसिः** । दोः दोषौ । **२२८ पणेरिज्यादेश्च वः** । वणिक् । स्वार्थेऽण् —

प्रत्ययग्रहणपरिभाषया तदन्तपरम् । डौप्रत्ययान्तं शब्दस्वरूपं च्व्यन्तं चेदव्ययसंज्ञकं स्यादित्यर्थः । **ग्लौकरोतीति** । अग्लौः ग्लौः संपद्यते तथा करोतीत्यर्थः । अव्ययत्वप्रयोजनं तु सुपो लुक् । अस्य नियमार्थत्वमाह **कृन्मेजन्त इत्यादिना** । नियमाकारमाह **उणादिप्रत्ययान्त इत्यादिना** । **च्व्यन्त इति** । तेन नौर्ग्लौरित्यादौ नाव्ययत्वम् । **रातेर्डैः** । रा दाने इत्यस्माद् डैप्रत्ययो भवतीत्यर्थः । **रा इति** । रायो हलीत्यात्त्वम् । 'अर्थरैविभवा अपि' इत्यमरः । **गमेर्डोः** । गम्लृ गतावित्यस्माद् डोप्रत्यय इत्यर्थः । **गौरिति** । टिलोपे गोतो णिदिति णिद्वद्भावे वृद्धौ च रूपम् । गोशब्दार्थं विवृण्वन् केशवोक्तमाह **गौर्नादित्ये इत्यादिना** । 'गौरिला कुम्भिनी क्षमा' 'अनड्वान् सौरभेयो गौः' 'माहेयी सौरभेयी गौः' इति चामरः । द्यौरिति रूपमाह **बाहुलकादिति** । द्युत दीप्तावित्यस्मात्प्रत्यये टिलोपे च रूपम् । 'द्योदिवौ द्वे स्त्रियामभ्रम्' इत्यमरः । **भ्रमेश्च डूः** । भ्रमु अनवस्थाने, चाद् गम्लृ गतौ, आभ्यां डूप्रत्ययः स्यादित्यर्थः । डित्वाट्टिलोपः । **भ्रूरिति** । 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम्' इत्यमरः । **अग्रेगूरिति** । सेवक इत्यर्थः । **दमेर्डोसिः** । दमु उपशमे, अस्माड्डोसिप्रत्यय इत्यर्थः । डित्वाट्टिलोपः । 'भुजबाहू प्रवेष्टो दोः' इत्यमरः । **पणेरिज्यादेश्च वः** । पण व्यवहारे स्तुतौ च, अस्माद्

'स्त्रियां तु त्वगसृग्धरा' इत्यमरः । **ग्लानुदि** । ग्लै हर्षक्षये, णुद प्रेरणे । 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः । 'स्त्रियां नौस्तरणिस्तरिः' इति च । **ग्लौकरोतीति** । अग्लौः ग्लौः संपद्यते तथा करोतीत्यर्थः । अव्ययत्वात्सुपो लुक् । **च्व्यन्त एवेति** । तेन ग्लौर्नौर्गौरित्यादीनां नाव्ययत्वमिति भावः । **रातेः** । रा दाने । **रा इति** । 'रायो हलि' इत्यात्वम् । 'राः स्मृतः पावके तीक्ष्णे राः पुंसि स्वर्णवित्तयोः' इति मेदिनी । 'रास्तीक्ष्णे दहने रास्तु सुवर्णे जलदे धने' इति हेमचन्द्रः । **गमेः** । गम्लृ गतौ । 'गोतो णित्' गौः । केशवोक्तमाह **गौर्नादित्य इत्यादि** । 'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रे पुमान् भवेत् । अर्जुनी नेत्रदिग्बाणभूवाग्वारिषु गौर्मता' इत्यमरः । **द्युतेरपीति** । द्युत दीप्तौ, द्योतन्ते देवा अस्यामिति द्यौः । **भ्रमेश्च** । भ्रमु

'नैगमो वाणिजो वणिक्'। २२९ वशेः कित्। 'उशिगग्नौ घृतेऽपि च'। २३० भृज ऊच्च। भूरिक् भूमिः। २३१ जसिसहोरुरिन्। जसुरिर्वज्रम्। सहुरिरादित्यः पृथिवी च। २३२ सुयुरुवृञो युच्। सवनश्चन्द्रमाः। यवनः। रवणः कोकिलः। वरणः। २३३ अशे रश च। अश्नोतेर्युच्स्यात् रशादेशश्च।

इजिप्रत्ययः। आदेः पकारस्य वकारश्चेत्यर्थः। वणिक् इति कुत्वे चर्त्वे च रूपम्। अमरकोशस्थवाणिज इत्यस्योपपत्तिमाह **स्वार्थेऽणिति**। **वशेः कित्**। वश कान्तावित्यस्माद् इजिः, स च कित्स्यात् कित्त्वात्संप्रसारणम्, कुत्वचर्त्वे। **भृज ऊच्च**। भृज् भरणे, अस्मादिजिः, कित्स्यात्, धातोरूकारः अन्तादेशश्च। **भूरिगिति**। ऊत्वं रपरत्वम्। **जसिसहोरुरिन्**। जसु मोक्षणे, षह मर्षणे, आभ्यामुरिन्प्रत्यय इत्यर्थः। **सुयुरुवृञो युच्**। षुञ् अभिषवे, यु मिश्रणे, रु शब्दे, वृञ् वरणे, एभ्यो युच्प्रत्यय इत्यर्थः। 'युवोरनाकौ' इति अनादेशः। गुणे अवादेशे च सवनमिति रूपम्। 'अभिषवः सवनं च सा' इत्यमरः। 'यवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति मेदिनी। यवनो म्लेच्छविशेषः। **रवण इति**। 'रषाभ्याम्–' इति णत्वम्। 'रवणः शब्दनो नान्दी' इत्यमरः। **वरण इति**। गुणः रपरत्वं णत्वम्। 'सेतौ च वरणे वेणी नदीभेदकचोच्चये' इत्यमरः। 'प्राकारो वरणः सालः' इति च। **अशे रश च**। अशू व्याप्तौ इत्यस्माद् युच् स्यात् प्रकृतेरशादेशश्चेत्यर्थः। नायमादेशः शित्, सर्वादेशत्वं त्वनेकाल्त्वात्। **रशनेति**। 'स्त्री कट्यां

अनवस्थाने, गम्लृ गतौ। अग्रेगूः सेवकः। **दमेः**। दमु उपशमे डित्त्वाट्टिलोपः। **दोरिति**। 'दोषं तस्य' इति श्रीहर्षप्रयोगात्पुंस्त्वम्। 'ककुद्दोषणी' इति भाष्यप्रयोगान्नपुंसकत्वम्। 'दोर्दोषा च भुजो बाहुः' इति धनंजयकोशात्स्त्रीलिङ्गोऽप्ययमित्यादि प्रागेव प्रपञ्चितम्। **पणेः**। पण व्यवहारे स्तुतौ च। अमरकोशमाह। **नैगम इत्यादि**। **वशेः**। वश कान्तौ, अस्मादिजिः कित्स्यात्। 'ग्रहिज्या–' इति संप्रसारणम्। **भृजः**। भृज् भरणे, अस्मादिजिः कित्स्याद् धातोरूकारान्तादेशश्च। **जसि**। जसु मोक्षणे। षह मर्षणे। 'जसुरये स्तर्यं पिप्यथुर्गाम्' इति मन्त्रे जसुरये श्रान्तायेति, 'नीचायमानं जसुरिं न श्येनम्' इत्यत्र जसुरिं क्षुधितं श्येनं न श्येनपक्षिणमिवेति। 'उतस्य वाजी सहुरिर्ऋतौ' इति मन्त्रे सहुरिः सहनशील इति च वेदभाष्यम्। **सुयु**। षुञ् अभिषवे, यु मिश्रणे, रु शब्दे, वृञ् वरणे। 'सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति मेदिनी। यवनो म्लेच्छविशेषः। 'रवणः शब्दने स्वरे' इति च मेदिनी। रवणः कोकिल इत्येके। वरणो वृक्षभेदः। टापि तु वरणा नदी। 'वरणस्तिक्तशाकेऽपि प्राकारे वरणं वृतौ' इति विश्वः। 'वरुणो वरणः सेतु-

रशना काञ्ची । जिह्वावाची तु दन्त्यसकारवान् । २३४ **उन्देर्नलोपश्च** । ओदनः २३५ **गमेर्गश्च** । गमेर्युच्स्याद्गश्चादेशः । गगनम् । २३६ **बहुलमन्यत्रापि** । युच्स्यात् । स्यन्दनः । रोचना । २३७ **रञ्जेः क्युन्** । रजनम् । २३८ **भूसूधूभ्रस्जिभ्यश्छन्दसि** । भुवनम् । सुवन आदित्यः । धुवनो वह्निः ।

मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः । **जिह्वावाची त्विति** । 'रसज्ञा रसना जिह्वा' इति प्रसिद्ध इति भावः । **दन्त्यसकारेति** । रस आस्वादने चौरादिकः । ततो नन्द्यादित्वात् ल्युप्रत्यये अनादेशे रूपमिति भावः । **उन्देर्नलोपश्च** । उन्दी क्लेदने, अस्माद् युच्, धातोर्नकारस्य लोपश्चेत्यर्थः । उपधागुणः । **ओदन इति** । 'ओदनोऽस्त्री सदीदिविः' इत्यमरः । **गमेर्गश्च** । गम्लृ गतावित्यस्माद्युच्प्रत्ययः गश्चान्तादेश इत्यर्थः । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः । **बहुलमन्यत्रापि** । **स्यन्दन इति** । स्यन्दू प्रस्रवण इत्यस्माद् युजिति भावः । **रोचनेति** । रुच दीप्तावित्यस्मात्प्रत्ययः । **रञ्जेः क्युन्** । रञ्ज रागे अस्मात्क्युन्स्यात् । **रजनमिति** । कित्त्वान्नलोप इति भावः । ल्युटि तु रञ्जनमिति भावः । 'रञ्जनं रक्तचन्दनम्' इत्यमरः । **भूसूधू** । भू सत्तायम्, षूङ् प्राणिप्रसवे, धूञ् कम्पने, भ्रस्ज पाके, एभ्यः क्युन्स्यात् । **भुवनमिति** । कित्त्वान्न गुणः । उवङिति भावः । 'विष्टपं भुवनं जगत्'

स्तिक्तशाकः कुमारकः' इत्यमरः । **अशेः** । अशू व्याप्तौ । **जिह्वावाची त्विति** । रस आस्वादने चौरादिकः । ततो नन्द्यादित्वात् ल्युः । 'ण्यासश्रन्थ–' इति युज्वा । रसत्यास्वादयतीति रसना । 'रसनं स्वदने ध्वनौ । जिह्वायां तु न पुंसि स्यात्काञ्च्यां रसना स्त्रियाम्' इति मेदिनी । काञ्चीवाची तालव्यशकारवान् जिह्वावाची तु दन्त्यसकारवानित्येषा व्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता । वस्तुतस्तु तालव्यशकारवान् रशनाशब्दोऽपि काञ्च्यां जिह्वायां च तथा दन्त्यसकारवान रसनाशब्दोऽप्यर्थद्वये बोध्यः । तथा हि 'तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः । रशनापि च जिह्वायाम्' इति विश्वकोशाज्जिह्वायामुभय साधु । 'रसनं निःस्वने स्वादे रसना काञ्चिजिह्वयोः' इत्यजयधरणिकोशाभ्यां काञ्च्यामप्युभयं साधु । एवं च 'अशेरश च' इति सूत्रे अशू व्याप्तौ अश भोजने इति धातुद्वयमपि ग्राह्यम् । रस आस्वादने, रस शब्दे, इति धातुभ्यां तु 'बहुलमन्यत्रापि' इत्यनुपदमेव वक्ष्यमाणेन युच । तेन सर्वत्रावयवार्थानुगमोऽपि सूपपाद इत्याहुः । **उन्देः** । उन्दी क्लेदने अस्माद्युच् । 'ओदनं न स्त्रियां भक्तेऽबलायामोदने स्त्रियाम्' इति मेदिनी । **गमेः** । गम्लृ गतौ । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः । **बहुलमिति** । स्यन्दू प्रस्रवणे, रुच दीप्तौ । 'स्यन्दनं तु श्रुतौ नीरे तिनिशे ना रथे स्त्रियाम्' इति मेदिनी । 'रोचना रक्तकह्लारे गोपित्तवरयोषितोः । रोचनः कूट-

निधुवनं सुरतम्। भूञ्जनमम्बरीषम् । २३९ कृपॄवृजिमन्दिनिधाञः क्युः। किरणः। पुरणः समुद्रः । वृजनमन्तरिक्षम् । मन्दनं स्तोत्रम्। निधनम्। २४० धृषेर्धिष् च संज्ञायाम्। धिषणो गुरुः। धिषणा धीः। २४१ वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। अतिप्रत्ययान्ताः। 'पृषु सेचने' गुणाभावः

इत्यमरः। एवं सुवन इत्यपि। **निधुवनमिति**। 'मैथुनं निधुवनं रतम्' इत्यमरः। **भूञ्जनमिति**। क्युनः कित्त्वाद् ग्रहिज्येति संप्रसारणम्। सस्य जश्त्वेन दः। दस्य श्चुत्वेन जः। **कृपॄवृजि**। कॄ विक्षेपे, पॄ पालनपूरणयोः, वृजी वर्जने, मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु, निपूर्वकडुधाञ्धारणपोषणयोः, एभ्यः क्युप्रत्यय इत्यर्थः। **किरण इति**। इत्वं रपरत्वम्, णत्वम्। **पुरण इति**। 'उदोष्ठ्यपूर्वस्य' इत्युत्वम्। **निधनमिति**। 'आतो लोप इटि च' इत्यालोपः। 'निधनं कुलनाशयोः' इत्यमरः। **धृषेर्धिष् च संज्ञायाम्**। ञि धृषा प्रागल्भ्ये, अस्मात्क्युः, धातोर्धिषादेशश्च। **धिषण इति**। 'गीष्पतिर्धिषणो गुरुः' इत्यमरः। **धिषणेति**। 'बुद्धिर्मनीषा धिषणा' इत्यमरः। **वर्तमाने**। पृषु सेचने, बृह वृद्धौ, मह पूजायम्, गम्लृ गतौ, एभ्यः अतिप्रत्यय इत्यर्थः। **शतृवच्चेति**। तेन उगित्त्वान्नुमिति भावः।

शाल्मल्यां पुंसि स्याद्रोचके त्रिषु' इति च। चदि आह्लादे। 'चन्दनं मलयोद्भवे। चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी' इति विश्वः। 'चन्दनी तु नदीभिदि। चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकम्' इति मेदिनी। भद्रकाली ओषधिविशेषः। 'भद्रकाली तु गन्धोल्यां कात्यायन्यामपि स्त्रियाम्' इति मेदिनी। असु क्षेपणे। 'असनं क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे' इति मेदिनी। अत सातत्यगमने राजपूर्वः। 'राजातनः क्षीरिकायां प्रियाले किंशुकेऽपि च' इति विश्वमेदिन्यौ। एवमन्येऽपि द्रष्टव्याः। **रञ्जः**। रञ्ज रागे, ल्युटि तु रञ्जनम्। 'रजनो रागजनने रजनं रक्तचन्दने' इति मेदिनी। बाहुलकात्कृपेरपि क्युन्। 'कृपो रो लः' इति प्राप्तलत्वाभावश्च। कृपणः। **भूसू**। भू सत्तायाम्, षूङ् प्राणिप्रसवे, धूञ् कम्पने, भ्रस्ज पाके, बहुलवचनाद्भाषायामपि क्वचित्। 'भुवनं विष्टपेऽपि स्यात्सलिले गगने जने' इति मेदिनी। 'विष्टपं भुवनं जगत्' इत्यमरः। **भृज्जनमिति**। 'ग्रहिज्या-' इति संप्रसारणम्। सस्य जश्त्वेन दः, दस्य श्चुत्वेन जः। 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः। **कृपॄ**। कॄ विक्षेपे, पॄ पालनादौ, वृजी वर्जने, मदि स्तुत्यादौ, डुधाञ् धारणपोषणयोः। 'निधनं स्यात्कुले नाशे' इति मेदिनी। 'निधनं कुलनाशयोः' इति हेमचन्द्रः। **धृषेः**। ञिधृषा प्रागल्भ्ये, अस्मात्क्युः धिषादेशश्च धातोः। 'धिषणस्त्रिदशाचार्ये धिषणा धियि योषिति' इति मेदिनी। 'गीष्पतिर्धिषणो गुरुः' इत्यमरः। **वर्तमाने**। **शतृवच्चेति**। तथा

पृषन्ति। बृहत्। महान्। गमेर्जगादेशः, जगत्। २४२ संश्चत्तृपद्वेहत्। एते निपात्यन्ते। पृथक्करणं शतृवद्भावनिवृत्त्यर्थम्। सञ्चिनोतेः सुट्, इकारलोपः, संश्चत् कुहकः। तृपत् छत्रम्। विपूर्वाद् हन्तेष्टिलोपः, इत ए च।

अतिप्रत्यये लघूपधगुणमाशङ्क्याह **गुणाभाव इति**। निपात्यत इति शेषः। शतृवत्त्वातिदेशस्य फलप्रदर्शनायाह **पृषन्तीति**। गम्धातोरतिप्रत्यये जगादेशे च जगदिति रूपम्। लटः शतरि तु महतीत्यादौ शपि 'आच्छीनद्योः–' इति नुम् स्यात्। अतिप्रत्यये तु तस्यार्धधातुकतया न शप्। **संश्चत्तृपद्वेहत्**। चिञ् चयने, तृप प्रीणने, हन हिंसागत्योः, एते अतिप्रत्ययान्ता निपात्यन्त इत्यर्थः। ननु पूर्वसूत्र एव पठितव्ये पृथक् पठनं व्यर्थमित्यत आह **पृथक्करणमिति**। संश्चदित्यत्राह। **इकारलोप इति**। वेहदित्यत्राह **इत ए इति**। विशब्दसंबन्धिन इकारस्येत्यर्थः।

च 'उगिदचाम्–' इति नुमि महान्। स्त्रियां तु 'उगितश्च' इति ङीपि महतीत्यादि सिध्यतीति भावः। ननु पृषन्महदादयः 'लटः शतृशानचौ–' इति शतृप्रत्ययान्ता एव भवन्तु। ततश्च वर्तमान इति शतृवच्चेति च न कर्तव्यमिति महदेव लाघवमिति चेदत्राहुः–शतृप्रत्ययान्तत्वे तु 'कर्तरि शप्' इति शप्प्रत्यये महतीत्यादौ 'आच्छीनद्योः–' इति नुम् स्यात् महानित्यादौ तु 'तस्यानुदात्तेन्ङिददुपदेशात्' इति लसार्वधातुकस्वरः स्याद् अतिप्रत्ययान्तत्वे तु तस्यातिप्रत्ययस्यार्धधातुकत्वाभ्युपगमेन शबभावाञ्चोक्तदोष इत्याशयेनातिप्रत्ययान्तत्वेन निपातनं स्वीकृतमिति। बृह वृद्धौ, मह पूजायाम्, गम्लृ गतौ। **पृषन्तीति**। बिन्दुवाची पृषच्छब्दो नपुंसकमिति ध्वननाय बहुवचनमुदाहृतम्। 'पृषन्मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना। अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी। 'बृहती क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च। वारिधान्यां महत्यां च छन्दोवसनभेदयोः' इति विश्वः। शतृवद्भावाद् 'उगिदचाम्–' इति नुम्। बृहन् विपुलः। 'महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम्। तत्त्वभेदे पुमान् श्रेष्ठे वाच्यवत्' इति मेदिनी। महती नारदवीणा। 'विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती। महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी' इति वैजयन्ती। 'अवेक्षमाणं महतीं मुहुर्मुहुः' इति माघः। 'जगत्स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु। जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' इति मेदिनी। तत्र वायुवाचिनः पुँल्लिङ्गस्य शतृवद्भावादुगित्त्वेन नुमि जगन् जगन्तौ जगन्त इत्यादि भवति। 'द्युतिगमिजुहोतीनां द्वे च' इति व्युत्पादितस्य तु नुमभावाज्जगत् जगतौ जगत इत्यादीति बोध्यम्। **संश्चत्तृ**। चिञ् चयने, तृप प्रीणने, हन हिंसागत्योः। **निपात्यन्त इति**। अतिप्रत्ययान्ता इति शेषः। **निवृत्त्यर्थमिति**। एवं च संश्चदित्यत्र 'उगिदचाम्–'

'वेहद्गर्भोपघातिनी'। २४३ छन्दस्यसानच्छुजृभ्याम्। शवसानः पन्थाः। जरसानः पुरुषः। २४४ ऋञ्जिवृधिमन्दिसहिभ्यः कित्। ऋञ्जसानो मेघः। वृधसानः पुरुषः। मन्दसानोऽग्निर्जीवश्च। सहसानो यज्ञो मयूरश्च। २४५ अर्तेर्गुणः शुट् च। अर्शसानोऽग्निः। २४६ सम्यानच्स्तुवः। संस्तवानो वाग्मी। २४७ युधिबुधिदृशिभ्यः किच्च। युधानः। बुधानः। दृशानो लोकपालकः। २४८ हुर्छेः सनो लुक् छलोपश्च। जुहुराणश्चन्द्रमाः। २४९

छन्दस्य। शु गतौ, जॄष् वयोहानौ आभ्यामसानच्प्रत्यय इत्यर्थः। ऋञ्जिवृधि। ऋजि गतौ, वृधु वृद्धौ, मदी हर्षे, षह मर्षणे, एभ्यः असानच्प्रत्ययः कित्स्यादित्यर्थः। अर्तेर्गुणः। ऋ गतौ, अस्माद् असानच्प्रत्ययः, धातोर्गुणः, प्रत्ययस्य शुडागमश्चेत्यर्थः। सम्यानच् स्तुवः। समि उपपदे ष्टुञ् स्तुतावित्यस्माद् आनच्प्रत्यय इत्यर्थः। गुणेऽवादेशः। युधिबुधि। युध संप्रहारे, बुधिर् अवबोधने, दृशिर् प्रेक्षणे, एभ्य आनच् कित्स्यादित्यर्थः। युधान इति। हुर्छेः सनो। हुर्च्छा कौटिल्ये, अस्मात्सन्नन्ताद् आनच् स्यात्, सनो लुक्, छलोपश्च। जुहुराण

इति नुमः शङ्कैव नास्ति। वेहदित्यत्र तु 'उगितश्च' इति ङीब् नेति भावः। संचिनोतेरिति। सुभूतिचन्द्रस्तु संपूर्वाच्छ्रयतेः संश्रदित्याह तृपच्छत्रमिति। चन्द्रमा इत्यन्ये। विहन्ति गर्भमिति वेहत्। इत ए चेति। विशब्दसंबन्धिन इकारस्य एकार इत्यर्थः। गौरित्यनुवृत्तौ 'वेहद् गर्भोपघातिनी' इत्यमरः। छन्दस्य। शु गतौ, जॄष् वयोहानौ। पन्था इति। 'प्रमन्महे' इत्यादिमन्त्रद्वये शवसानशब्दो गन्तृपरतया व्याख्यातः। ऋञ्जि। ऋजि भर्जने, वृधु वृद्धौ, मदि स्तुत्यादौ, षह मर्षणे, एभ्य असानच् कित्स्यात्। ऋञ्जसानो मेघ इति। ऋजेरिदित्वान्नुम्। इदित्वादेव नलोपाभावः। एवं चायं मन्दिसही च त्रयोऽपि पूर्वसूत्र एव पठितुं शक्याः। कित्त्वं तु वृधुधातावेवोपयुज्यते। उत्तरसूत्रेऽपि गुणग्रहणं सुत्यजम्। अर्तेः सुट् च वृधेः किदित्युक्तौ सर्वसामञ्जस्यादित्याहुः। 'ऋञ्जसानः पुरुवार उक्थैः' 'अस्मिन् यज्ञे मन्दसानो वृषण्वसू' इत्यादिमन्त्राणां भाष्ये तु यौगिकार्थ एव पुरस्कृतः। अर्तेः। ऋ गतौ धातोर्गुणः प्रत्ययस्य सुडागमः। 'आसाविषदर्शसानाय' इति मन्त्रस्य भाष्ये तु अर्शसानाय शत्रूणां हिंसित्रे इति व्याख्यातम्। सम्या। ष्टुञ् स्तुतौ अस्मात्सम्युपपदे आनच्। युधि। युध संप्रहारे। युधानो रिपुः। बुधिर बोधने। बुधान आचार्यः। दृशिर् प्रेक्षणे। बाहुलकात्कृपेरप्यानच्। कृपाणः खङ्गः। 'कृपाणेन कथंकारं कृपणः सह गण्यते। परेषां दानसमये यः स्वकोशं विमुञ्चति'। हुर्छेः। हुर्च्छा कौटिल्ये, अस्मात्सन्नन्तादानचस्यात्सनो लुक् छलोपश्च। 'युयोध्यस्म-

श्वितेर्दश्च। शिश्विदानः पुण्यकर्मा। २५० तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ। शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः, तौ चानिटौ। शंस्ता स्तोता। शंस्तारौ शंस्तारः। क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च। अनुदात्तेत्, 'भृक्ष्ये चक्षदानम्' इति मन्त्रात्, 'उखायां वा वेहतं वा क्षदन्ते' इति ब्राह्मणाच्च। 'क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे'। २५१ बहुल-

---

इति। प्रत्ययलक्षणेन सनमाश्रित्य द्वित्वम्। नच 'न लुमता–' इति निषेधः। लुप्तप्रत्यये परतः तन्निमित्ताङ्गसंज्ञकस्य कार्यं नेति तदर्थात्। द्वित्वं तु न सनि परतः तन्निमित्ताङ्गसंज्ञस्य विधीयते, अपितु तदन्तस्य। श्वितेर्दश्च। श्विता वर्णे, अस्मात् सन्नन्तादानच् सनो लुक्, तकारस्य दकारश्च। शिश्विदान इति। पूर्ववद् द्वित्वम्। 'शिश्विदानः पुण्यकर्मा चपलश्चिकुरः समौ' इत्यमरः। शिश्विदानोऽकृष्णकर्मेति क्वचित्पाठः। तस्याप्येष एवार्थः। तृन्तृचौ शंसि। शंसु स्तुतौ, क्षदधातुः सौत्रः, आभ्यां तृन्तृचौ क्रमात्स्तः। तौ चानिटावित्यर्थः। शंस्तेति। तृन्। शंस्तराविति। अप्तृन्निति सूत्रे नप्त्रादिग्रहणं नियमार्थं औणादिकतृन्तृजन्तानां यद्युपधादीर्घस्तर्हि नप्त्रादीनामेवेति। तस्मादत्र न दीर्घ इति भावः। प्रशास्तारावित्यादौ तु आदिग्रहणात्तृचि दीर्घो भवत्येव, नप्त्रादिषु पाठात्। क्षत्तेति।

ज्जुहुराणमेनः' इति मन्त्रे जुहुराणं कौटिल्यकारि एनः पापं युयोधि पृथक् कुरु इति भाष्यम्। श्वितेः। श्विता वर्णे अस्मात्सन्नन्तादानच्, 'सन्यङोः' इति द्वित्वम्, सनो लुक् तकारस्य च दकारः। किदित्यनुवृत्तेर्न गुणः। पुण्यकर्मेति। 'शिश्विदानोऽकृष्णकर्मा' इति विशेष्यनिघ्ने अमरः। अकृष्णं शुक्लं निष्पापत्वात् शुद्धं कर्म यस्येत्यर्थः। क्षीरस्वामिना तु प्रकृतसूत्रं विस्मृत्य श्विदि श्वैत्ये अस्माच्छिदः कानजिति व्याख्यातम्, तदसंगतं कानचश्छान्दसत्वाद् इदित्वेन नलोपानुपपत्तेश्चेति दिक्। तृन्तृचौ। शंस्तेति। शंसु स्तुतावस्मात्तृन्। 'अप्तृन्–' इति सूत्रे नप्त्रादिग्रहणं नियमार्थमौणादिकतृन्तृजन्तानां चेदुपधादीर्घस्तर्हि नप्त्रादीनामेवेत्युक्तम्। तेनात्र दीर्घो नेत्युदाहरति शंस्तारौ शंस्तर इति। नित्वादाद्युदात्तः। तथा च मन्त्रः 'ग्रामग्राम उत शंस्ता सुविप्रः'। आदिशब्दाच्छासु अनुशिष्टौ। शास्ति विनयति सत्वान् शास्ता बुद्धः। शास्तारौ। शास्तारः। 'शास्ता समन्तभद्रे ना शासके पुनरन्यवत्' इति। प्रपूर्वस्य तु नप्त्रादिषु पाठाद् 'अप्तृन्–' इति दीर्घः। प्रशास्तारौ। प्रशास्तारः। 'क्षत्ता शूद्राच्च वैश्याजे प्रतीहारे च सारथौ। भुजिष्यातनयेऽपि स्यान्नियुक्तेवधसोः पुमान्' इति मेदिनीकोशानुसारेणाह वैश्यायामिति। अमरस्तु 'क्षत्रियायां च शूद्रजे' इत्याह। णीञ् प्रापणे उत्पूर्वः। उन्नेता ऋत्विग्भेदः। बहुलमन्यत्रापि।

मन्यत्रापि । मन् मन्ता । हन् हन्ता । इत्यादि । २५२ **नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ** । न पतन्त्यनेन पितरो नरके इति नप्ता पौत्रो दौहित्रश्च । नयतेः षुग्गुणश्च, नेष्टा । त्विषेरितोऽत्वम् , त्वष्टा । होता । पोता ऋत्विग्भेदः । भ्राजतेर्जलोपः, भ्राता । जायां माति जामाता । 'मान पूजायाम्' न लोपः, माता । पातेराकारस्येत्वम् , पिता । दुहेस्तृच् , इट् गुणाभावश्च, दुहिता । २५३ **सुञ्यसेर्ऋन्** । स्वसा । २५४ **यतेर्वृद्धिश्च** । याता । 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' । २५५ **नञि च नन्देः** । न नन्दति ननान्दा, इह वृद्धिर्नानुवर्तते इत्येके । 'ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा' इति शब्दार्णवः । २५६ **दिवेर्ऋः** । देवा । देवरः । 'स्वामिनो देवृदेवरौ' । २५७

'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः । **नप्तृनेष्टृत्वष्टृ** । एते तृन्तृजन्ता निपात्यन्ते । नप्तृशब्दस्य व्युत्पत्तिमाह **न पतन्त्यनेनेति** । नञि उपपदे पत्लृ गतावित्यस्मात्तृनि नञः प्रकृतिभावः । अच्छब्दलोपश्च निपात्यते । नेष्टेत्यत्राह **नयतेरिति** । णीञ् प्रापणे इत्यस्मात्प्रत्ययः । त्वष्टेत्यत्राह **त्विषेरितोऽत्वमिति** । त्विष दीप्तावित्यस्मात् प्रत्यये इकारस्य अकार इत्यर्थः । **होतेति** । हु दानादनयोरित्यस्मात् प्रत्ययो गुण इति भावः । **पोतेति** । पूञ् पवने इत्यस्मात् प्रत्ययः । भ्रातेत्यत्राह **भ्राजतेरिति** । भ्राजृ दीप्तावित्यस्मात् प्रत्ययः । **सावसेर्ऋन्** । सावुपपदे असु क्षेपणे इत्यस्माद् ऋन्प्रत्यय इत्यर्थः । **स्वसेति** । यणादेशः, अप्तृन्निति दीर्घः । **यतेर्वृद्धिश्च** । यती प्रयत्ने, अस्माद् ऋन् वृद्धिश्चेत्यर्थः । यातेत्यस्यार्थमाह **भार्यास्त्विति** । अमरकोशोऽयम् । **नञि च नन्देः** । टु नदि समृद्धौ, अस्मान्नञ्युपपदे ऋन् । **न नन्दतीति** । सेवायां कृतायामपीति शेषः । ऋनि वृद्धिरप्यनेनैव, पूर्वसूत्रादनुवृत्तेः । मतान्तरमाह **इहेति** । अत्र मानमाह **ननान्दा तु स्वसा पत्युरिति** । **दिवेर्ऋः** । दिवु क्रीडादिषु, अस्माद् ऋप्रत्ययो भवती-

---

अन्यत्रापि धातोर्बहुलं तृन्तृचौ भवतः । पूर्वसूत्रस्थादिशब्देनैव मन्ताहन्तेत्यादेः सिद्धत्वात्प्रपञ्चार्थमिदं सूत्रम् । **नप्तृनेष्टृ** । नप्त्रादयो दश तृन्तृजन्ता निपात्यन्ते **नञेति** । नञः प्रकृतिभावः । पत्लृ गतावित्यस्मात्तृच् टिलोपः । णीञ् प्रापणे, त्विष् दीप्तौ, हु दानादनयोः पूञ् पवने, भ्राजृ दीप्तौ मा माने, पा रक्षणे, दुह प्रपूरणे । 'त्वष्टा पुमान् देवशिल्पितक्ष्णोरादित्यभिद्यपि' इति मेदिनी । जायां मातीत्यन्तर्भावितण्यर्थः । **सुञ्यसेः** । सुञि उपपदे असु क्षेपणे इत्यस्माद् ऋन् यणादेशः । स्वसा भगिनी । सावसेरिति तु क्वाचित्कः पाठः । **यतेः** । यती प्रयत्ने । **नञि च** । टुनदि समृद्धौ अस्मान्नञ्युपपदे ऋन् । **न नन्दतीति** । कृतायामपि

नयतेर्डिच्च। ना नरौ नरः। २५८ **सव्ये स्थश्छन्दसि।** 'अम्बाम्ब–' (सू. २३१८) इत्यत्र 'स्थास्थिन्स्थृणामुपसंख्यानम्' (वा. ४३६१)। सव्येष्ठा सारथिः। सव्येष्ठरौ सव्येष्ठरः। २५९ **अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः।** अष्टभ्योऽनिप्रत्ययः स्यात्। अरणिरग्नेर्योनिः। सरणिः। धरणिः। धमनिः। अमनिर्गतिः। अशनिः। अवनिः। तरणिः। बाहुलकाद्रजनिः। २६० **आङि**

त्यर्थः। ऋनि प्रकृते ऋविधिः नित्स्वराभावार्थम्। 'स्वामिनो देवृदेवरौ' इत्यमरः। **नयतेर्डिच्च।** णीञ् प्रापणे, अस्माद् ऋप्रत्ययः, स च डिद्भवतीत्यर्थः। डित्वं टिलोपार्थम्। 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः' इत्यमरः। **सव्ये स्थश्छन्दसि।** ष्ठा गतिनिवृत्तौ, अस्मात् सव्यशब्दे उपपदे ऋप्रत्ययः, स च डिदित्यर्थः। सव्येष्ठ इति स्थले षत्वार्थमाह **अम्बाम्बेत्यत्रेति।** तत्पुरुषे कृतीत्यलुक्। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः। सव्येष्ठृदक्षिणस्थौ च' इत्यमरः। **अर्तिसृधृ।** ऋ गतौ, सृ गतौ, धृञ् धारणे, धमिधातुः सौत्रः, अम गतौ, अश भोजने, अव रक्षण, तॄ प्लवनतरणयोः, एभ्यः अनिप्रत्यय इत्यर्थः। **अरणिरिति।** 'निर्मन्थदारुणि त्वरणिर्द्वयोः' इत्यमरः। **आङि शुषेः।** आङि उपपदे शुष शोषणे इत्य·

सेवायां न तुष्यतीत्यर्थः। 'उषाप्यूषा ननान्दा च ननन्दा च प्रकीर्तिता' इति द्विरूपकोशः। **दिवेः।** दिवु क्रीडाविजिगीषादौ। **देवेति।** भ्रातर इत्यनुवृत्तौ 'स्वामिनो देवृदेवरौ' इत्यमरः। 'देवे धवे देवरि माधवे च' इति श्रीहर्षः। **नयतेः।** णीञ् प्रापणे। अस्माद् ऋप्रत्ययः सच डित्, डित्वाट्टिलोपः। 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इत्यमरः। **सव्ये।** ष्ठा गतिनिवृत्तौ अस्मात्सव्यशब्दे उपपदे ऋः स्यात्स च डित्। 'तत्पुरुषे कृति–' इति सप्तम्या अलुक्। **उपसंख्यानमिति।** षत्वस्येति शेषः। **अर्ति।** ऋ गतौ, सृ गतौ, धृञ् धारणे, धमिः सौत्रः, अम गतौ, अश भोजने, अव रक्षणादौ, तॄ प्लवनतरणयोः। 'अरणिर्वह्निमन्थे ना द्वयोर्निर्मथ्यदारुणि' इति मेदिनी। 'सरणिः श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः। 'सरणिः पङ्क्तौ मार्गे स्त्री' इति मेदिनी। शॄ हिंसायां ततोऽनिप्रत्ययः। शरणिरित्येके। 'शरणिः पथि चावलौ' इति तालव्यादावजयः। 'इमामग्ने शरणिम्' इति मन्त्रे शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्वेति वेदभाष्यम्। धरणिर्भूमिः। 'धमनी तु शिराहट्टविलासिन्यां तु योषिति' इति मेदिनी। अमनिर्गतिः। अश्यते भुज्यते राज्यमिन्द्रेणानयेति अशनिर्वज्रम्। 'अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां स्वावपि' इति मेदिनी। अवनिः पृथिवी। 'तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्' इति मेदिनी। कुमारी लताविशेषः। तरणी रामतरणी कर्णिका चारुकेसरा।

शुषेः सनश्छन्दसि। आशुशुक्षणिरग्निर्वातश्च । **२६१ कृषेरादेश्च चः।** चर्षणिर्जनः। **२६२ अदेर्मुट् च।** अद्मनिः अग्निः। **२६३ वृतेश्च।** वर्तनिः। गोवर्धनस्तु चकारान्मुट् वर्त्मनिरित्याह। **२६४ क्षिपेः किच्च।** क्षिपणिरायुधम्। **२६५ अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः।** अर्चिर्ज्वाला। इदन्तोऽप्य-

---

स्मात्सन्नन्तादनिप्रत्यय इत्यर्थः। **आशुशुक्षणिरिति।** शुशुक्षेति सन्नन्तम्। 'रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः' इत्यमरः। **कृषेरादेश्च चः।** कृष विलेखने अस्मादनिप्रत्यय इत्यर्थः। ककारस्य चकारश्च। **चर्षणिरिति।** 'पुगन्तलघूपधस्य च' इति गुणः। **अदेर्मुट् च।** अद भक्षणे, अस्मादनिप्रत्ययः, मुडागमश्च प्रत्ययस्य भवतीत्यर्थः। **वृतेश्च।** वृतु वर्तने, अस्मादनिप्रत्यय इत्यर्थः। 'सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' इत्यमरः। वर्तिनीत्यत्र कृदिकारादिति ङीष्। **क्षिपेः किच्च।** क्षिप् प्रेरणे, अस्मादनिप्रत्ययः, स च किद्भवतीत्यर्थः। कित्वान्न गुणः, क्षिपणिः। **अर्चिशुचि।** अर्च पूजायाम्, शुच शोके, हु दानादनयोः, सृप्लृ गतौ, छद अपवारणे ण्यन्तः, छर्द वमने, एभ्य इसिप्रत्यय इत्यर्थः। **अर्चिरिति।** सान्तोऽयम्। 'ज्वालाभासोर्नपुंस्यर्चिः' इत्यमरः। **इदन्तोऽप्ययमिति।** ण्यन्तादर्चेः

सहा कुमारी गन्धोल्योः' इति धन्वन्तरिनिघण्टुः। **रजनिरिति।** रञ्ज रागे अस्मादप्यनिर्नलोपोऽपि बाहुलकात् 'कृदिकारात्–' इति ङीष्। रजनी। 'रजनी नीलिनी रात्रिर्हरिद्राजतुकासु च' इति मेदिनी। **आङि।** शुष शोषणे अस्मात्सन्नन्तादाङि उपपदे अनिः स्यात्। **कृषेरादेः।** कृष विलेखने, चर्षणिर्जन इति वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु पाठात्। 'ओमासश्चर्षणीधृतः' इत्यादिमन्त्रेषु वेदभाष्यकारैस्तथैव व्याख्यातत्वाच्च। उज्ज्वलदत्तेन तु आदेश्च ध्र इति पठित्वा धर्षणिर्बन्धकीति व्याख्यातम्। तदयुक्तम्। तथा सति धृषेरित्येव सूत्रयेत्। प्रागल्भ्यरूपावयवार्थानुगमात्। आदेश्च ध इत्यंशस्य त्यागेन लाघवाच्च, तस्मादादेश्च चः इति दशपादीवृत्तिपाठ एव युक्त इत्याहुः। **अदेः।** अद भक्षणे अस्मादनिस्तस्य मुडागमश्च। **वृतेश्च।** वृतु वर्तने अस्मादप्यनिः। **वर्तनिरिति।** 'कृदिकारात्–' इति ङीषि तु वर्तनी। 'सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' इत्यमरः। **क्षिपेः।** क्षिप प्रेरणे **क्षिपणिरायुधमिति।** 'उतस्य वाजी क्षिपणिं तुरण्यति' इति मन्त्रस्य वेदभाष्ये तु क्षिपणिं क्षेपणमनु तुरण्यति त्वरयति गन्तुमिति व्याख्यातम्। **अर्चि।** अर्च पूजायाम्, शुच शोके, हु दानादनयोः, सृप्लृ गतौ, छद अपवारणे, ण्यन्तः। छर्द वमने, अर्चिरिति सान्तम्। 'तमर्चिषा स्फूर्जयन्' इति मन्त्रः। 'नयनमिव सनिद्रं घूर्णते दैवमर्चिः' इति माघः। 'ज्वालाभासोर्नपुंस्यर्चिः' इति नानार्थे सान्तेष्वमरः।

यम् । 'अग्नेर्भ्राजन्ते अर्चयः' । शोचिर्दीप्तिः । हविः । सर्पिः । 'इस्मन्–' (सू. २१८४) इति ह्रस्वः । छदिः पटलम् । छर्दिर्वमनव्याधिः । इदन्तोऽपि । 'छर्द्यतीसारशूलवान्' । **२६६ बृंहेर्नलोपश्च ।** 'बर्हिर्ना कुशशुष्मणोः' । **२६७ द्युतेरिसिन्नादेश्च जः ।** ज्योतिः । **२६८ वसौ रुचेः संज्ञायाम् ।** वसुरोचिर्यज्ञः । **२६९ भुवः कित् ।** भुविः समुद्रः । **२७० सहो धश्च ।** सधिरनड्वान् । **२७१ पिबतेस्थुक् ।** 'पाथिश्चक्षुःसमुद्रयोः' । **२७२ जनेरुसिः ।** जनुर्जननम् । **२७३ मनेर्धश्छन्दसि ।** मधुः । **२७४ अर्तिपृवपियजित-**

अच इरिति इप्रत्यये साधुरिति भावः । छादि इति ण्यन्तादिसि णिलोपे उपधाह्रस्वार्थमाह **इस्मन्निति । छर्द्यतीसारेति ।** छर्दिश्चातिसारश्च शूलं च यस्य सन्तीति विग्रहः । **बृंहेर्नलोपश्च ।** बृहि वृद्धौ, अस्मादिसिः, नकारस्य लोपश्चेत्यर्थः । **बर्हिरिति** उपधागुणे रूपम् । **द्युतेरिसिन्नादेश्च जः ।** द्युत दीप्तौ, अस्मादिसिन्प्रत्ययः । आदेर्दकारस्य जकारश्चेत्यर्थः । **वसौ रुचेः संज्ञायाम ।** वसुशब्दे उपपदे रुच दीप्तावित्यस्मादिसिन् प्रत्ययः स्यात्संज्ञायामित्यर्थः **वसुरोचिरिति । भुवः कित् ।** भू सत्तायामित्यस्माद् इसिन्प्रत्ययः, स च किद् भवतीत्यर्थः । कित्वान्न गुणः । **सहो धश्च ।** षह मर्षणे इत्यस्माद् इसिन्प्रत्ययः, अन्त्यस्य धकारश्चेत्यर्थः । **पिबतेस्थुक् ।** पा पाने, अस्मादिसिन्, धातोश्च थुगागम इत्यर्थः । पाथिरिति रूपम् । **जनेरुसिः ।** जनी प्रादुर्भावे अस्मादुसिप्रत्यय इत्यर्थः । **मनेर्धश्छन्दसि ।** मनु अवबोधने, अस्मादुसिप्रत्ययः धातोरन्तादेशश्च धकार इत्यर्थः । **अर्तिपृवपि ।**

इदन्तोऽपीति । णिजन्तादर्चेरत इरिति भावः । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । 'रोचिः शोचिरुभे क्लीबे इति च । सर्पिर्घृतम् । छाद्यतेऽनया छदिः । छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम् । एवं च पटलं छदिरित्यमरग्रन्थे पटलसाहचर्याच्छदिषः क्लीबतां वदन्त उपेक्ष्याः । **छर्द्यतीति ।** छर्दिश्चातिसारश्च शूलं च तानि यस्य सन्तीति विग्रहः । **बृंहेः ।** बृहि वृद्धौ अस्मादिसिः । **कुशशुष्मणोरिति ।** शुष्मा नाम अग्निः । 'अग्निर्वैश्वानरो वह्निः' इत्युपक्रम्य 'बर्हिः शुष्मे'त्यमरेणोक्तत्वात् । 'बर्हिः पुंसि हुताशने । न स्त्री कुशे' इति मेदिनी । **द्युतेः ।** द्युत दीप्तौ । 'ज्योतिरग्नौ दिवाकरे । पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः' इति मेदिनी । **वसौ ।** रुच दीप्तावस्माद्वसुशब्दे उपपदे इसिन्स्यात्संज्ञायाम् । बाहुलकात्केवलादपि 'रोचिः शोचिरुभे क्लीबे' इत्यमरः । **भुवः ।** भवतेरिसिन् स्यात्स च कित् । **सहो ।** षह मर्षणेऽस्मादिसिन् धश्चान्तादेशः । **पिबतेः ।** पा पाने अस्मादिसिन्धातोश्च थुगागमः । **जनेः ।** जनी प्रादुर्भावे । **मनेः ।** *मनु अवबोधनेऽस्मादुसिः स्याच्छन्दसि धकारश्चान्तादेशः । मधु पवित्रद्रव्यम् ।*

निधनितपिभ्यो नित् । अरुः । परुर्ग्रन्थिः । वपुः । यजुः । तनुः तनुषी तनूंषि । धनुरस्त्रियाम् । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' । सान्तस्योदन्तस्य वा रूपम् । 'तपुः सूर्याग्निशत्रुषु' । २७५ एतेर्णिच्च । आयुः । आयुषी । २७६ चक्षेः शिच्च । शित्त्वात् सार्वधातुकत्वेन ख्याञ्बाधः । चक्षुः । २७७ मुहेः किच्च । मुहुरव्ययम् । २७८ बहुलमन्यत्रापि । आचक्षुः । परिचक्षुः । २७९ कॄगॄशॄवृञ्चतिभ्यः ष्वरच् । 'कर्वरो व्याघ्ररक्षसोः । गर्वरोऽहङ्कारी । शर्वरी रात्रिः । 'वर्वरः प्राकृतो जनः' । चत्वरम् । २८० नौ सदेः । 'निषद्वरस्तु

ॠ गतौ, पॄ पालनपूरणयोः, डु वप् बीजसन्ताने, यज देवपूजनादौ, तनु विस्तारे, धन धान्ये, तप सन्तापे, एभ्य उसिप्रत्ययः स्यात् । स च निद् भवतीत्यर्थः । नित्त्वं स्वरार्थम् । **एतेर्णिच्च** । इण् गतावित्यस्मादुसिप्रत्ययः, स च णिद्भवतीत्यर्थः । णित्त्वाद् वृद्धिः । **आयुरिति** । **चक्षेः शिच्च** । चक्षिङ् व्यक्तायां वाचि, अस्मादुसिः । स च शिद्भवतीत्यर्थः । शित्त्वफलमाह । **सार्वधातुकत्वेनेति** । चक्षते रूपादिकमनुभवन्त्यनेनेति चक्षुः । **मुहेः किच्च** । मुह वैचित्त्ये, अस्मादुसिः, स च किदित्यर्थः, कित्त्वान्न गुणः । 'मुहुः पुनः पुनः शश्वत्' इत्यमरः । **कॄगॄशॄ** । कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, वृञ् वरणे, चते याचने, एभ्यः

अर्तिपॄ । ॠ गतौ, पॄ पालनपूरणयोः, डुवप् बीजसन्ताने, यज देवपूजादौ, तनु विस्तारे, धन धान्ये, तप सन्तापे, एभ्य उसिर्नित्स्यात् । 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः । 'ग्रन्थिर्ना पर्वपरुषी' इति च । 'वपुः क्लीबं तनौ शस्ताकृतावपि' इति मेदिनी । शस्ताकृतिः प्रशस्ताकृतिरित्यर्थः । यजुरिति यजुर्वेदः । तनुः शरीरम् । तनुषे । तनुषेऽनङ्गमिति सुबन्धुः । 'स्यात्तनुस्तनुषा सार्धं धनुषा च धनुं विदुः' इति द्विरूपेषु विश्वः । 'अथास्त्रियाम् । धनुश्चापौ' इत्यमरः । 'धनुः प्रियाले ना न स्त्री राशिभेदे शरासने । धनुर्धरे त्रिषु' इति सान्ते मेदिनी । **एतेः** । इण् गतावित्यस्मादुसिः, णित्त्वाद् वृद्धौ कृतायामायादेशः । **चक्षेः** । चक्षिङ् व्यक्तायां वाचि, अस्मादुसिः शिद्भवति । शित्त्वात्ख्याञादेशाभावः । चक्षते रूपमनुभवन्त्यनेनेति चक्षुः । **मुहेः** । मुह वैचित्त्ये । 'मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यव्ययेष्वमरः । अस्मात्परं 'बहुलमन्यत्रापि' इति सूत्रं स्पष्टत्वात्त्यक्तम् । **कॄ गॄ** । कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, वृञ् वरणे, चते याचने । 'नैर्ऋतः कर्वरः क्रव्यात्कर्बुरो यातुरक्षसोः' इति शब्दार्णवः । 'शर्वरी यामिनीस्त्रियोः' इति मेदिनी । 'वर्वरः पामरे केशविन्यासे नीवृदन्तरे । वर्वरः फञ्जिकायां तु वर्वरा शाकपुष्पयोः' इति विश्वः । 'बर्बरः पामरे केशचक्रले नीवृदन्तरे । फञ्जिकायां पुमान् शाकपुष्पभेदभिदोः स्त्रियाम्' इति मेदिनी ।

जम्बालः' । निषद्वरी रात्रिः ।

॥ इत्युणादिषु द्वितीयः पादः ॥

अथ उणादिषु तृतीयः पादः ।

२८१ छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः । एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते । छिदिर् छद् अनयोस्तकारोऽन्तादेशः, छिदेर्गुणाभावश्च । छित्वरो धूर्तः । छत्वरो गृहकुञ्जयोः' । धीवरः कैवर्तः । पीवरः स्थूलः । मीवरो हिंसकः । चिनोतेर्दीर्घश्च । चीवरं भिक्षुकप्रा-

---

ष्वरच् स्यादित्यर्थः, । षित्त्वं ङीषर्थम् । **नौ सदेः** । नावुपपदे षद्लृ विशरणगत्यवसादनेष्वित्यस्मात् ष्वरच् स्यादित्यर्थः । षित्त्वफलं दर्शयन्नुदाहरति । **निषद्वरी रात्रिरिति** ।

इत्युणादिषु द्वितीयः पादः ।

अथ तृतीयः पादः । **छित्वरछत्वरधीवर** । एते ष्वरच्प्रत्ययान्ता निपात्यन्त इत्यर्थः । निपातनमेवाह **अनयोस्तकार इति** । छिदिर् द्वैधीकरणे, छद अपवारणे, आभ्यां ष्वरच्प्रत्ययः, तत्संनियोगेन धातोस्तकारोऽन्तादेशः गुणाभावश्च निपात्यत इत्यर्थः । 'छित्वरश्छेदने द्रव्ये धूर्ते वैरिणि च त्रिषु' इति मेदिनी । **धीवर इति** । डु धाञ् धारणपोषणयोः, अस्मात् ष्वरचि धातोरन्त्यस्य ईत्वं निपात्यत इत्यर्थः । एवं पा पाने, मा माने, आभ्यां ष्वरचि ईत्वं निपात्यत इति बोध्यम् । 'कैवर्ते दाशधीवरौ' 'पीव्नी तु स्थूलपीवरे' इत्यमरः । **मीवर इति** । डु मीञ् हिंसायामित्यस्मादपि ष्वरचि साधुः । **चीवरमिति** । चिञ् चयने इत्यस्मात्

'चत्वरं स्थण्डिले गणे' इति च । **नौ सदेः** । षद्लृ विशरणादौ । निपूर्वादस्मात्ष्वरच् स्यात् । 'सदिरप्रतेः' इति षत्वम् । 'निषद्वरः स्मरे पङ्के निशायां तु निषद्वरी' इति मेदिनी । **इत्युणादिषु द्वितीयः पादः** ।

छित्वर । अनयोरिति । छिदिर् द्वैधीकरणे, छद अपवारणे, 'छित्वरश्छेदने द्रव्ये धूर्ते वैरिणि च त्रिषु' इति मेदिनी । डुधाञ् धारणपोषणयोः, पा पाने, मा माने, एषां त्रयाणामीत्वमन्त्यस्य निपात्यत इत्येके । अन्ये तु पीव मीव तीव नीव स्थौल्ये । एभ्यः ष्वरचि 'लोपो व्योः–' इति लोपमाहुः । 'पीवरः कच्छपे स्थूले' इति मेदिनी । **मीवर इति** । हिंसक इत्यर्थानुगुण्येन मीञ् हिंसायामित्यस्मात्ष्वरजिति

वरणम् । तीवरो जातिविशेषः । नीवरः परिव्राट् । गाहतेर्ह्रस्वत्वम् । गह्वरम् । कटे वर्षादौ, कट्वरं व्यञ्जनम् । यमेर्दकारः, संयद्वरो नृपः । पदेः सम्पद्वर इत्येके ।
२८२ इणसिञ्जिदीङुष्यविभ्यो नक् । 'इनः सूर्ये नृपे पत्यौ' । सिनः कायः । जिनः अर्हन् । दीनः । उष्णः । ऊनः । २८३ फेनमीनौ । एतौ निपात्येते । स्फायतेः फेनः । मीनः । २८४ कृषेर्वर्णे । कृष्णः । २८५ बन्धेर्ब्रधिबुधी च ।

श्नुविकरणात् ष्वरचि दीर्घो निपात्यत इत्यर्थः । तीवर इति । तायृ पूजानिशामनयोरित्यस्मात् ष्वरचि, 'लोपो व्योः–' इति यलोपे, ईत्वं निपात्यते । यद्वा, तीवधातो प्रत्यये 'लोपो व्योः–' इति वलोपे रूपम् । नीवर इति । णीञ् प्रापणे इत्यस्मात् ष्वरचि रूपम् । गह्वरेत्यत्राह । गाहतेरिति । गाहृ विलोडने इत्यस्मादिति भावः । 'गह्वरं गण्डशैलास्तु' इत्यमरः । षित्त्वान्ङीषि गह्वरीति रूपम् । 'विपुला गह्वरी धात्री' इत्यमरः । कट्वरेति । कटे वर्षादौ, अस्मात्प्रत्ययः । संयद्वर इत्यत्राह यमेर्दकार इति । इणसिञ्जि । इण गतौ, षिञ् बन्धने, जि जये, दीङ् क्षये, उष् दाहे, अव रक्षणे, एभ्यो नक्प्रत्यय इत्यर्थः । कित्त्वान्न गुणः । इन इति । 'इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ।' 'इनः सूर्ये प्रभौ राजा' इत्यमरः । जिन इति । 'मारजिल्लोकजिज्जिनः' इत्यमरः । दीन इति । 'निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः' इत्यमरः । ऊन इति । अवधातो रूपम् । नकः कित्त्वाद् 'ज्वरत्वर–' इत्यूठ् । फेनमीनौ । स्फायी वृद्धौ, मीञ् हिंसायां, आभ्यां नकि एतौ निपात्येते इत्यर्थः । आद्ये स्फाय् इत्येतस्य फे इत्यादेशः । 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः । कृषेर्वर्णे । कृष विलेखने, अस्माद् वर्णेऽभिधेये नक् स्यादित्यर्थः ।

केचिदाहुः । 'तीवरो नाम्बुधौ व्याधे' इति मेदिनी । 'स्यान्नीवरो वाणिजके वास्तवेऽपि च दृश्यते' इति मेदिनीविश्वप्रकाशौ । गाहतेरिति । गाहू विलोडने । 'कट्वरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम्' इति मेदिनी । बाहुलकादुपपूर्वकाद् हुदानादनयोरित्यस्मात्ष्वरच्युकारलोपः । 'उपह्वरं समीपे स्यादेकान्तेऽपि नपुंसकम्' इति मेदिनी । उपह्वरो रथ इति केचित् । 'तदु प्रयक्षतमं' इति मन्त्रे तु उपह्वरे उपगन्तव्ये समीपदेशे । इण । इण् गतौ, षिञ् बन्धने, जि जये, दीङ् क्षये, उष दाहे, अव रक्षणे । 'इनः पत्यौ नृपार्कयोः' इति मेदिनी । 'जिनोऽर्हति च बुद्धे च पुंसि स्यात्त्रिषु जित्वरे' इति च । 'दीना मूषिकयोषायां दुर्गते कातरेऽन्यवत्' इति विश्वः । 'उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गकः' इति मेदिनी । 'ज्वरत्वर–' इत्यूठ् ऊनमसंपूर्णम् । फेन । स्फायी वृद्धौ, अस्य फे इत्यादेशः । मीञ् हिंसायाम् । 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः । 'मीनो राश्यन्तरे मत्स्ये' इति विश्वः । कृषेः ।

ब्रध्नः । बुध्नः । २८६ धापॄवस्यज्यतिभ्यो नः । 'धाना भृष्टयवे स्त्रियः' । पर्णं पत्रम् । पर्णः किंशुकः । 'वस्नो मूल्ये वेतने च' । अजेर्वी । वेनः । अत्नः आदित्यः । बाहुलकाच्छृणोतेः । श्रोणः पङ्गुः । २८७ लक्षेरट् च । लक्षेश्चुरादिण्यन्तान्नः स्यात्तस्याडागमश्च । चान्मुडित्येके । 'लक्षणं लक्ष्मणं नाम्नि चिह्ने च' । लक्ष्मणो लक्ष्मणश्च रामभ्राता । 'लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा' । २८८ वनेरि-

---

कृष्णो नीलासितश्यामकालश्यामलमेचकाः' इत्यमरः । बन्धेर्बुधिब्रधी च । बन्ध बन्धने, अस्मान्नक् स्यात्, प्रकृतेर्बुधि ब्रधि इत्यादेशौ च भवत इत्यर्थः । ब्रध्न इति । 'भास्करोऽहस्करो ब्रध्नः' इत्यमरः । बुध्न इति । 'शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः' इत्यमरः । धापॄवस्यज्यतिभ्यो नः । डु धाञ् धारणपोषणयोः, पॄ पालनपूरणयोः, वस निवासे, अज गतौ, अत सातत्यगमने, एभ्यो न प्रत्यय इत्यर्थः । नकि प्रकृते नप्रत्ययविधानं वेन इत्यादौ गुणार्थम्, वस्न इत्यत्र संप्रसारणाभावार्थं च । धाना इत्यत्र अमरकोशमाह धाना भृष्टयवे स्त्रिय इति । वस्न इति । 'मूल्यं वस्नोऽप्यवक्रयः' इत्यमरः । वेन इति । अजेर्वी आदेशः । श्रोण इति । 'पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते' इत्यमरः । लक्षेरट् च । लक्ष दर्शनाङ्कनयोः, लक्ष आलोचने, आभ्यां चुरादिण्यन्ताभ्यां नप्रत्ययः स्यादित्यर्थः, अडागमश्च प्रकृतेः । लक्ष्मण इति रूपसिद्ध्यर्थमाह चान्मुडिति । वनेरिच्चोपधायाः । वन षण संभक्तौ, अस्मान्नप्रत्ययः, उपधाया इत्वं चेत्यर्थः ।

कृष विलेखने अस्माद्वर्णे वाच्ये नक् स्यात् । 'कृष्णः सत्यवतीपुत्रे केशवे वायसेऽर्जुने । कृष्णा स्याद् द्रौपदीनीलीकणाद्राक्षासु योषिति । मेचके वाच्यलिङ्गः स्यात्क्लीबे मरिचलोहयोः' इति मेदिनी । बन्धेः । बन्ध बन्धने अस्मान्नक् । 'भास्करोऽहस्करो ब्रध्नः प्रभाकरदिवाकरौ' इत्यमरः । 'बुध्नो ना मूलरुद्रयोः इति मेदिनी । धापॄ । डुधाञ् धारणादौ, पॄ पालनादौ, वस निवासे, अज गतौ, अत सातत्यगमने, एभ्यो नः स्यात् । नक् प्रत्यये सति तु वस्न इत्यत्र संप्रसारणं स्यात् । वेन इत्यत्र तु गुणो न स्यादिति भावः । 'धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदि' इति विश्वः । 'पर्णं पत्रं किंशुके ना' इति मेदिनी । 'वस्नस्त्ववक्रये पुंसि वेतने स्यान्नपुंसकम्' इति च । वेनः लुण्टाकः प्रजापतिश्च । लक्षेः । लक्ष दर्शनाङ्कनयोः । लक्षणमित्यादि । लक्षणलक्ष्मणशब्दौ द्वावपि नामचिह्नयोः क्लीबौ । रामभ्रातरि तु पुँल्लिङ्गौ । हंसयोषायां लक्षणा । सारसस्य योषायां तु लक्ष्मणेति व्यवस्थेत्यर्थः । 'लक्षणं नाम्नि चिह्ने च सौमित्रिरपि लक्ष्मणः । लक्षणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः' इति विश्वः । 'लक्ष्मणोऽपि लक्षणोऽपि च' इति द्विरूपेषु च विश्वः । 'लक्षणं नाम्नि चिह्ने च सारस्यां लक्षणा क्वचित् । लक्ष्मणा त्वौषधीभेदे

श्चोपधायाः । वेन्ना नदी । २८९ सिवेष्टेर्यू च । दीर्घोच्चारणसामर्थ्यान्न गुणः । स्यून आदित्यः । बाहुलकात्केवलो नः । ऊट् । अन्तरङ्गत्वाद्यण् । गुणः । स्योनः । २९० कृवृजृसिद्रुपन्यनिस्वपिभ्यो नित् । कर्णः । वर्णः । 'जर्णश्चन्द्रे च वृक्षे च' । सेना । द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा । २९१ धेट इच्च । 'धेनः सिन्धुर्नदी धेना । २९२ तृषिशुषिरसिभ्यः कित् । तृष्णा ।

वेन्नेति । उपधाया इत्वे गुणः । सिवेष्टेर्यू च । षिवु तन्तुसन्ताने, अस्मान्नप्रत्ययः, टेरिव् इत्यस्य स्थाने यू आदेशश्चेत्यर्थः । स्यून इत्यत्र यू आदेशे कृते 'सार्वधातुकार्धधातुकयोः' इति गुणमाशङ्क्याह दीर्घोच्चारणसामर्थ्यादिति । यदि गुण इष्टस्तर्हि यु इति ह्रस्वमेव विदधीत, गुणे कृते विशेषाभावात् । एवं सति दीर्घोच्चारणं गुणाभावार्थं विज्ञायेतेति भावः । ननु तर्हि कथं स्योन इति अत्राह बाहुलकात् केवलो न इति । यूआदेशरहित इत्यर्थः । एवं च नप्रत्यये छ्वोरिति वस्य ऊठि गुणात्पूर्वमन्तरङ्गत्वाद् यणि गुणे च रूपमिति भावः । कृवृजृसिद्रु । कॄ विक्षेपे, वृञ् वरणे, वॄ इति पाठे तु वॄ वरणे, जॄष् वयोहानौ, षिञ् बन्धने, द्रु गतौ, पन स्तुतौ, अन प्राणने, ञि ष्वप् शये, एभ्यो नप्रत्ययः स्यात् , स च निदित्यर्थः । नित्त्वं स्वरार्थम् । कर्ण इति । 'रषाभ्याम्–' इति णत्वम् । धेट इच्च । धेट् पाने, अस्मान्नप्रत्ययः स्याद् इकारश्चान्तादेश इत्यर्थः । धेन इति । इकारस्य गुणे रूपम् । इत्वाविधाने तु आदेच इत्यात्वं स्यादिति भावः । तृषिशुषिरसिभ्यः । ञि तृषा

सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात्सश्रीके चाभिधेयवत्' इति मेदिनी । कोशे तु 'सारस्यामपि लक्षणा' इति निर्मकारः पाठः स्वीकृतः । वनेः । वन संभक्तावस्मान्नः, उपधाया इत्वं च । वेन्नेति । लघूपधगुणः । सिवेः । षिवु तन्तुसन्ताने । बाहुलकादिति । एतच्च 'छ्वोः शूड्–'इति सूत्रे वृत्तौ 'येन विधि–' इति सूत्रे कैयटग्रन्थे च स्पष्टम् । यणीति । लघूपधगुणे कृते त्वेकारस्यायादेशे ऊठोऽपि 'सार्वधातुक–' इत्यादिना गुणे कृते सयोन इति स्यादिति भावः । 'स्योनः किरणसूर्ययोः' इति मेदिनी । कृवृ । कॄ विक्षेपे, वृञ् वरणे, दीर्घपाठे तु वॄ वरणे, जॄष् वयोहानौ, दिवादिः । जॄ इति क्र्यादौ चुरादौ च । षिञ् बन्धने, द्रु गतौ, पन स्तुतौ, अन प्राणने, ञिष्वप् शये, एभ्यो न प्रत्ययो नित्स्यात् । 'कर्णः पृथाज्येष्ठसुते सुवर्णालौ श्रुतावपि' इति विश्वमेदिन्यौ । 'वर्णो द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदे रूपाक्षरविलेखने' इति मेदिनी । विश्वमेदिनीस्थमाह जर्णश्चन्द्र इति । 'जर्णौ जीर्णद्रुमेन्दुषु' इति हेमचन्द्रः । 'ध्वजिनी वाहिनी सेना' इत्यमरः । 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान्कृपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां

शुष्णः सूर्यो वह्निश्च । रस्नं द्रव्यम् । २६३ सुञो दीर्घश्च । सूना वधस्थानम् । २६४ रमेस्त च । रमयतीति रत्नम् । २६५ रास्नासास्नास्थूणावीणाः । रास्ना गन्धद्रव्यम् । सास्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः । वीणा वल्लकी । २६६ गादाभ्यामिष्णुच् । गेष्णुर्गायनः । देष्णुर्दाता । २६७ कृत्यशूभ्यां

पिपासायाम्, शुष शोषणे, रस शब्दे, एभ्यो नप्रत्ययः स्यात्, स च किदित्यर्थः । **तृष्णेति** । कित्वान्न गुणः । **सुञो दीर्घश्च** । षुञ् अभिषवे, अस्मान्नप्रत्ययः स्याद् धातोर्दीर्घश्चेत्यर्थः । **सूनेति** । धातोर्दीर्घविधिसामर्थ्यान्न गुणः, किदित्यनुवर्तनाद्वा । 'सूनाधोजिह्विकापि च' इत्यमरः । **रमेस्त च** । रमु क्रीडायामस्माण्ण्यन्ताद् नप्रत्ययः स्यात्, तकारोऽन्तादेशश्चेत्यर्थः । रमेरिति ण्यन्तस्य निर्देशः । मित्त्वादुपधाह्रस्वः । **रास्नासास्ना** । रस आस्वादने, षस सस्ति स्वप्ने, ष्ठा गतिनिवृत्तौ, वी गतिव्याप्तिप्रजनादिषु, एभ्यो नप्रत्यये इत्थं निपात्यन्त इत्यर्थः । **रास्नेति** । रसधातोः नप्रत्यये उपधादीर्घ इति भावः । 'नाकुली सरसा रास्ना' इत्यमरः । **सास्नेति** । उपधादीर्घो निपात्यते । 'सास्ना तु गलकम्बले' इत्यमरः । **स्थूणेति** । ष्ठा गतिनिवृत्तावित्यस्य रूपम् । प्रत्ययसंनियोगेन धातोरूत्वम्, प्रत्ययस्य णत्वं च निपात्यते । 'स्थूणा स्तम्भे च वेश्मनः' इत्यमरः । **वीणेति** । वीधातो रूपम् । णत्वं निपात्यते । **गादाभ्यामिष्णुच्** । गै शब्दे, डु दाञ् दाने, आभ्याम् इष्णुच्प्रत्यय इत्यर्थः ।

गवादन्यामपीष्यते । अन्नं भक्ते च भुक्ते स्यात्' इति मेदिनी । 'स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्' इति मेदिनी । **धेट्** । धेट् पाने अस्मान्नः स्यादिच्चान्तादेशः । 'धेना नद्यां नदे पुमान्' इति मेदिनी । 'धेनः समुद्रे नद्यां च धेना' इति विश्वः । श्लोको धारा इत्यादिषु वाङ्नामसु धेनेति वैदिकनिघण्टौ पठितम् । अत एव 'धेना जिगाति दाशुषे' 'इन्द्र धेनाभिरिह मादयस्व' इत्यादिमन्त्रेषु धेना वागिति व्याख्यातं भाष्ये । **तृषि** । ञितृषा पिपासायाम्, शुष शोषणे, रस शब्दे । 'तृष्णा लिप्सापिपासयोः' इति विश्वः । **सुञः** । षुञ् अभिषवे अस्मान्नः स्याद्धातोर्दीर्घश्च । 'सूनाधोजिह्विकापि च' इति नान्तेऽमरः 'सूनं प्रसवपुष्पयोः' । 'सूना पुत्र्यां वधस्थानगलशुण्डिकयोः स्त्रियाम्' इति मेदिनी । **रमेः** । रमेर्ण्यन्तान्नः स्यात्तकारश्चान्तादेशः । 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी । **रास्ना** । रस आस्वादने उपधादीर्घः । 'रास्ना तु स्याद् भुजङ्गाख्यामेलापर्ण्यामपि स्त्रियाम्' इति मेदिनी । षस स्वप्ने उपधादीर्घः । 'सास्ना तु गलकम्बलः' इत्यमरः । 'सास्ना गोगलकम्बलः' इति पाठान्तरम्' । ष्ठा गतिनिवृत्तावित्यस्य ऊत्वं प्रत्ययस्य णत्वं च । 'अथ स्थूणा स्यात्सूर्म्यां स्तम्भे गृहस्य च' इति मेदिनी । सूर्मी लोहप्रतिमा । वी गत्यादिषु । गुणाभावो णत्वं

क्सः । कृत्स्नम् । अक्ष्णामक्ष्णयडम् । २९८ **तिजेर्दीर्घश्च** । तीक्ष्णम् । २९९ **श्लिषेरच्चोपधायाः** । श्लक्ष्णम् । ३०० **यजिमनिशुन्धिदसिजनिभ्यो युच्** । यज्युरध्वर्युः । 'मन्युर्दैन्ये क्रतौ क्रुधि' । शुन्ध्युरग्निः । दस्युस्तस्करः । जन्युः शरीरी । ३०१ **भुजिमृङ्भ्यां युक्त्युकौ** । भुज्युर्भाजनम् । मृत्युः । ३०२ **सर्तेरयुः** । सरयुर्नदी । अयूरिति पाठान्तरम् । सरयूः । ३०३ **पानीविषिभ्यः पः** । पाति रक्षत्यस्मादात्मानमिति पापम् । वधोगात्पापः । नेपः पुरोहितः । बाहुलकाद् गुणाभावे नीपो वृक्षविशेषः, वेष्पः पानीयम् । ३०४ **च्युवः किच्च** ।

गेष्णुरिति । आद्गुणे रूपम् । **कृत्यशूभ्यां क्स्नः** । कृती छेदने, अशू व्याप्तौ, आभ्यां क्स्नप्रत्यय इत्यर्थः । **कृत्स्नमिति** । कित्त्वान्नोपधागुणः । **अक्ष्णमिति** । व्रश्चेति षत्वे, षढोरिति कत्वे, कवर्गात्परत्वात्षत्वे, रषाभ्यामिति णत्वे च रूपम् । **तिजेर्दीर्घश्च** । तिज निशाने, अस्मात् क्स्नप्रत्ययः, धातोर्दीर्घश्चेत्यर्थः । **श्लिषेरच्चोपधायाः** । श्लिष आलिङ्गने अस्मात् क्स्नप्रत्ययः, धातोरुपधाया आकारश्चेत्यर्थः । **यजिमनि** । यज देवपूजनादौ, मन ज्ञाने, शुन्ध शुद्धौ, दसु उपक्षये, जनी प्रादुर्भावे, एभ्यो युच्प्रत्यय इत्यर्थः । **यज्युरिति** । 'युवोरनाकौ' इत्यनादेशस्तु न, तत्र यु वु इति उकारेत्संज्ञकयोरेव ग्रहणात् । **मन्युरिति** । 'मन्युशोकौ तु शुक् स्त्रियाम्' इत्यमरः । **भुजिमृङ्भ्याम्** । भुज पालनाभ्यवहरणयोः, मृङ् प्राणत्यागे, आभ्यां क्रमात् युक्त्युकौ प्रत्ययौ स्तः । **भुज्युरिति** । युकः कित्त्वान्न गुणः । एवं मृत्युरित्यपि । **सर्तेरयुः** । सृ गतौ, अस्माद् अयुप्रत्यय इत्यर्थः । **युरिति** । अयुप्रत्यये गुण इति भावः । **पानीविषिभ्यः पः** । पा पाने, णीञ् प्रापणे, विष्लृ व्याप्तौ, एभ्यः पप्रत्यय इत्यर्थः । नीप इति सिद्ध्यर्थमाह **बाहुलकादिति** । 'तूलं च नीपप्रियककदम्बास्तु हलिप्रिये' इत्यमरः । **च्युवः किच्च** । च्युङ् गतौ, अस्मात् पः स्यात्स च कित्स्यात्,

---

च । 'वीणा विद्युति वल्लक्याम्' इति मेदिनी । **गादाभ्याम्** । गै शब्दे, डुदाञ् दाने । 'गेष्णुर्नटे गायके च देष्णुर्दातरि दुर्दमे' इति विश्वः । **कृत्यशू** । कृती वेष्टने, अशू व्याप्तौ । 'कृत्स्नं सर्वाम्बुकुक्षिषु' इति मेदिनी । **तिजेः** । तिज निशाने, अस्मात्क्स्नः, धातोर्दीर्घश्च । 'तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके । क्लीबं यवामके पुंसि तिग्मात्मत्यागिनोस्त्रिषु' इति मेदिनी । **यजि** । यज देवपूजादौ, मन ज्ञाने, शुन्ध शुद्धौ, दसु उपक्षये, जनी प्रादुर्भावे । 'दस्युश्चौरे रिपौ पुंसि' इति मेदिनी । 'अथ जन्युः स्यात्पुंसि प्राण्यभिधातृषु' इति च । **भुजिः** । भुज पालनादौ, मृङ् प्राणत्यागे, आभ्यां यथासंख्यं युक्त्युकौ स्तः । 'मृत्युर्ना मरणे यमे' इति मेदिनी । **सर्तेः** । सृ गतौ । **पानी** । पा रक्षणे, णीञ् प्रापणे, विष्लृ व्याप्तौ । 'नीपः कदम्बबन्धूक-

च्युपो वक्त्रम् । ३०५ **स्तुवो दीर्घश्च** । स्तूपः समुच्छ्रायः । ३०६ **सुशृभ्यां निच्च** । चात्किन् । सूपः । बाहुलकादुत्वम् । शूर्पम् । ३०७ **कुयुभ्यां च** । कुर्वन्ति मण्डूका अस्मिन्कूपः । युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः । ३०८ **खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः** । सप्तैते पप्रत्ययान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वम् । 'खष्पौ क्रोधबलात्कारौ । शीलतेर्ह्रस्वश्च । शिल्पं कौशलम् । शसु हिंसायाम्, निपातनात्षत्वम् । शष्पं बालतृणं प्रतिभाक्षयश्च । बाधतेः षः । 'बाष्पो नेत्रजलोष्मणोः' । बाष्पं च । रौतेर्दीर्घः । 'रूपं स्वभावे

कित्वान्न गुणः । **स्तुवो दीर्घश्च** । ष्टुञ् स्तुतौ, अस्मात्प स्यात्, धातोर्दीर्घश्चेत्यर्थः । 'फेनस्तूपौ सयूपकौ' इत्यमरः । **सुशृभ्यां निच्च** । षुञ् अभिषवे, शॄ हिंसायाम्, आभ्यां पः स्यात्, स च निद् भवति, चाद्दीर्घश्चेत्यर्थः । **सूप इति** । धातोर्दीर्घविधिसामर्थ्यान्न गुणः । शूर्पमित्यत्राह । **बाहुलकादुत्वमिति** । रपरत्वं दीर्घत्वं चेति भावः । **कुयुभ्यां च** । कु शब्दे, यु मिश्रणे, आभ्यां पः, स च निद् धातोर्दीर्घत्वं चेत्यर्थः । 'तूदस्तु यूपः क्रमुकः' इत्यमरः । **खष्पशिल्प** । खनु अवदारणे, शील समाधौ शसु हिंसायाम्, बाधृ लोडने, रु शब्दे, पॄ पालनपूरणयोः, तल प्रतिष्ठाकरणे चुरादिण्यन्तः, एते पप्रत्ययान्ता इत्थ निपात्यन्त इत्यर्थः । निपातनमेवाह **खनतेर्नकारस्येति** । 'खष्पः क्रोधे बलात्कारे' इति विश्वकोशादाह **खष्पौ क्रोधबलात्काराविति** । शिल्पमित्यत्राह **शीलतेर्ह्रस्व इति** । ह्रस्वनिपातनसामर्थ्यात् किदित्यनुवर्तनाद्वा गुणाभावः । शष्पमित्यत्राह **निपातनात्षत्वमिति** । 'शष्पं बालतृणं घासः' इत्यमरः । बाष्प इत्यत्राह **बाधतेरिति** ।

नीलाशोकद्रमेऽपि च' इति मेदिनी । **च्युवः** । च्युङ् गतौ । धातूनामनेकार्थत्वादिह भाषणे । च्यवन्ते भाषन्तेऽनेनेति विग्रहः । दशपाद्यां तु 'चुपः किच्च' इति पठ्यते । चुप मन्दायां गतौ । चोपतीति चुप्मन्दगमनकर्ता । **स्तुवः** । ष्टुञ् स्तुतौ । अस्मात्पः स्याद्धातोर्दीर्घश्च । **सुशॄ** । षुञ् अभिषवे, शॄ हिंसायाम् । आभ्यां पः स्यात्स च निद्भवति । नित्वं तु **स्वरार्थम्** । 'सूपो व्यञ्जनसूद्योः' इति मेदिनी । **शूर्पमिति** । बाहुलकादुत्वं रपरत्वं 'हलि च' इति दीर्घः । 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः । **कुयु** । कु शब्दे, यु मिश्रणे । आभ्यां पः, स च निद्धातोर्दीर्घत्वं च । **खष्पशिल्प** । खनु अवदारणे, शील समाधौ, बाधृ लोडने, रु शब्दे, पॄ पालनादौ । 'खष्पः क्रोधे बलात्कृतौ' इति विश्वः । 'शष्पं बालतृणेऽपि च । पुंसि स्यात्प्रतिभाहानौ' इति मेदिनी । विश्वोक्तिमाह **बाष्प इति** । 'बाष्पमूष्मणि चाश्रुणि' इति कोशान्तरमभिप्रेत्याह **बाष्पं चेति** । रूपं स्वभावे सौन्दर्ये नालके पशुशब्दयोः ।

सौन्दर्ये'। पृ पर्प गृहं बालतृणं पङ्गुपीठं च। 'तल प्रतिष्ठाकरणे' चुरादिणिचो लुक। 'तल्पं शय्याट्टदारेषु'। ३०९ स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्। 'अयामन्त-' (सू २३११) इति णेरयादेशः। स्तनयित्नुः। हर्षयित्नुः। पोषयित्नुः। गदयित्नुः। वावदूकः। मदयित्नुः मदिरा। ३१० कृहनिभ्यां क्त्नुः। कृत्नुः शिल्पी। हत्नुर्व्याधिः शस्त्रं च। ३११ गमेः सन्वच्च। जिगत्नुः। ३१२ दाभाभ्यां नुः। दानुर्दाता। भानुः। ३१३ वचेर्गश्च।

'बाष्पमूष्माश्रु कशिपु' इत्यमरः। शेषं स्पष्टम्। **स्तनिहृषिपुषि**। स्तन देवशब्दे, हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः, गदी देवशब्दे, एभ्यो णयन्तेभ्य इत्नुच् स्यात्। इत्नुचि कृते णेरयादेशविधिं स्मारयति। **अयामन्तेति णेरयादेश इति**। 'स्तनयित्नुर्बलाहकः' इत्यमरः। **कृहनिभ्यां क्त्नुः**। डु कृञ् करणे, हन हिंसागत्योः, आभ्यां क्त्नुप्रत्यय इत्यर्थः। **कृत्नुरिति**। कित्त्वान्न गुणः। कर्तेत्यर्थः। **हत्नुरिति**। अनुदात्तोपदेशवनतीत्यादिना अनुनासिकलोपः। **गमेः सन्वच्च**। गम्लृ गतौ, अस्मात् क्त्नुप्रत्ययः, स च सन्वद्भवतीत्यर्थः। **जिगत्नुरिति**।

ग्रन्थवृत्तौ नाटकादावाकारश्लोकयोरपि' इति विश्वमेदिन्यौ। 'तल्पमट्टे कलत्रे च शयनीये च न द्वयोः' इति मेदिनी। अमरोक्तिमाह **तल्पं शय्येति**। **स्तनिहृषि**। स्तनगदी देवशब्दे चुरादिण्यन्तौ, हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः, घटादिः। एभ्यो ण्यन्तेभ्य इत्नुच् स्यात्। 'स्तनयित्नुः पुमान्वारिधरेऽपि स्तनितेऽपि च' इति मेदिनी। 'स्तनयित्नुः पयोवाहे तद्ध्वनौ मृगरोगयोः' इति विश्वः। 'हर्षयित्नुः सुते हेम्नि पोषयित्नुः पिके द्विजे' इति च। 'गदयित्नुः पुमान्कामे जल्पाके कार्मुकेऽपि च' इति विश्वमेदिन्यौ। 'मदयित्नुः कामदेवे पुमान्मद्ये नपुंसकम्' इति मेदिनी। **कृहनि**। डुकृञ् करणे, हन हिंसागत्योः। **कृत्नुरिति**। कर्तेत्यर्थः। कित्त्वान्न गुणः। **हत्नुरिति**। 'अनुदात्तोपदेश-'इत्यादिनानुनासिकलोपः। एवमुत्तरत्र गमेः क्त्नुप्रत्यये गत्नुरित्यपि बोध्यः। **शस्त्रं चेति**। चाद्धन्ता। दशपादीवृत्तौ तु क्नुरिति तकाररहितं पठित्वा कृणुः कर्ता। हनुर्वक्त्रैकदेशः। बाहुलकान्नलोपः। गमेस्तु जिगन्तुरित्युदाहृतं तत्सर्वं प्रामादिकम्। लक्ष्यविसंवादात्। तथा च श्रूयते। 'सुरूपकृत्नुमूतये' 'ज्येष्ठराजं भरे कृत्नु' 'अयं कृत्नुरगृभीतः' 'मा नो वधाय हत्नवे' 'मृगं न भीममुपहत्नुमुग्रम्' 'यो नः सनुत्य उत वा जिगत्नुः' इत्यादि। अतएव हन्तिधातुं विवृण्वता माधवेन उपहत्नुरित्युदाहृत्य क्नोः कित्त्वादनुनासिकलोप इत्युक्तम्। यत्तु तेनैव 'सुरूपकृत्नुम्' इति मन्त्रं विवृण्वता तकारोपजनश्छान्दस इत्युक्तं तद्दशपादीवृत्तिमनुसृत्य, न तु वस्तुस्थितिमनुरुध्येति सहृदयैराकलनीयमित्याहुः।

वग्नुः। ३१४ धेट इच्च। धयति तामिति धेनुः। **३१५ सुवः कित्।** 'सूनुः पुत्रेऽनुजे रवौ'। **३१६ जहातेर्द्वे अन्तलोपश्च।** जह्नुः। **३१७ स्थो णुः।** 'स्थाणुः कीले स्थिरे हरे'। **३१८ अजिवृरीभ्यो निच्च।** अजेर्वी, वेणुः। वर्णुर्नददेशभेदयोः। रेणुर्द्वयोः स्त्रियां धूलिः'। **३१९ विषेः किच्च।** विष्णुः। **३२० कृदाधारा-**

अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। सन्वत्त्वाद् द्वित्वम्, अभ्यासाकारस्य इत्वादिकार्यम्। **दाभाभ्यां नुः।** डु दाञ दाने, भा दीप्तौ, आभ्यां नुप्रत्यय इत्यर्थः। 'भानुर्हंसः सहस्रांशुः' इत्यमरः। **वचेर्गश्च।** वच परिभाषणे, अस्माद् नुप्रत्ययः, मकारश्चान्तादेश इत्यर्थः। **धट इच्च।** धेट् पाने, अस्मान्नुप्रत्ययः स्यात्, इकारश्चान्तादेशः। आदेच इत्यात्वे प्रसक्ते तदपवादोऽयम्। 'धेनुः स्यान्नवसूतिका' इत्यमरः। **सुवः कित्।** षूङ् प्राणिप्रसवे, अस्माद् नुप्रत्ययः स्यात्, स च किद्भवतीत्यर्थः। **सूनुरिति।** कित्वान्न गुणः। **जहातेर्द्वे अन्तलोपश्च।** ओ हाक् त्यागे, अस्मान्नुप्रत्ययः, धातोर्द्वित्वम्, अन्तस्याकारस्य लोपश्चेत्यर्थः। नुप्रत्ययस्य कित्त्वेऽप्यनजादित्वाद् 'आतो लोप इटि च' इत्याकारलोपाप्राप्तेरयमारम्भः। **जह्नुरिति।** धातोर्द्वित्वे आलोपे च रूपम्। **स्थो णुः।** ष्ठा गतिनिवृत्तौ, अस्माद् णुः स्यादित्यर्थः। क्वचित्तु स्थाणुरित्येव पाठः। तस्मिन्पाठे यद्यपि अत्र स्थाधातोर्नुप्रत्यये णत्वं निपात्यत इति वक्तुं शक्यते, तथापि उत्तरत्रानुवृत्त्यर्थं णुप्रत्ययविधानमेव वरम्। **अजिवृरी।** अज गतिक्षेपणयोः, वृञ् संभक्तौ, री गतिरेषणयोः, एभ्यो णुर्नित्स्यादित्यर्थः। नित्त्वं स्वरार्थम्। अजधातोर्णुप्रत्यये आह **अजेर्वी इति। वेणुरिति।** 'वेणुमस्करतेजनाः' इत्यमरः। **विषेः किच्च।** विष्लृ व्याप्तौ, अस्माद् णुः स्यात्, स च कित्, चकारात् निच्च। **विष्णुरिति।** कित्वान्न गुणः, नित्त्वं स्वरार्थम्। 'विष्णुर्नारायणः

दाभाभ्याम्। डुदाञ् दाने, भा दीप्तौ। 'दानुर्दातरि विक्रान्ते' इति मेदिनी। 'भानू रश्मिदिवाकरौ' इत्यमरः। **वचेः।** वच परिभाषणे। वग्नुर्वाचालः। **धेटः।** धेट् पाने अस्मान्नुः स्यादिकारश्चान्तादेशः। 'धेनुः स्यान्नवसूतिका' इत्यमरः। **सुवः।** षूङ् प्राणिप्रसवे। अस्मान्नुः स्यात्स च कित्। विश्वोक्तिमाह। **सूनुः पुत्रे इति। जहातेः।** ओहाक् त्यागे। 'जह्नुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने' इति मेदिनी। **स्थो णुः।** ष्ठा गतिनिवृत्तौ। अस्माण्णुः स्यात्। विश्वोक्तिमाह **स्थाणुरिति।** 'स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुवे' इति मेदिनी। **अजिवृ।** अज गतौ, वृञ् संभक्तौ, री गतिरेषणयोः, एभ्यो णुर्नित्स्यात्। 'वेणुर्नृपान्तरे वंशे' इति विश्वः। 'रेणुः स्त्रीपुंसयोर्धूलौ पुंल्लिङ्गः पर्पटे पुनः' इति मेदिनी। **विषेः।** विष्लृ व्याप्तौ। अस्माण्णुः स्यात्स च किन्नित्। नित्त्वादाद्युदात्तत्वम्। विष्णुरिद्धा। 'विष्णुर्नारायणः कृष्णः'

चिकलिभ्यः कः। बाहुलकान्न कस्येत्संज्ञा। 'कर्को धवलघोटकः'। दाको दाता। धाकोऽनड्वानाधारश्च। राका पौर्णमासी। अर्कः। 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि'। ३२१ सृवृभूशुषिमुषिभ्यः कक्। 'सृक उत्पलवातयोः'। 'वृकः श्वापदकाकयोः'। भूकं छिद्रम्। शुष्कः। मुष्कोऽण्डम्। ३२२ शुकवल्कोल्काः। शुभेरन्त्यलोपः। शुकः। 'वल्कं वल्कलमस्त्रियाम्'। 'उष दाहे', षस्य लः। उल्का। ३२३ इणभीकापाशल्यतिमर्चिभ्यः कन्।

कृष्णः' इत्यमरः। कृदाधाराचिकलिभ्यः। डु कृञ् करणे, डु दाञ् दाने, डुधाञ् धारणपोषणयोः, रा दाने, अर्च पूजायाम्, कल शब्दसंख्यानयोः, एभ्यः कप्रत्ययः स्यादित्यर्थः। ननु कप्रत्ययावयवककारस्य 'लशक्वतद्धिते' इतीत्संज्ञा प्राप्नोतीत्यत आह बाहुलकादिति। 'पृष्ठ्यः स्थौरी सितः कर्कः' इत्यमरः। दाको दातेति। कर्तरि प्रत्ययादिति भावः। राकेति। 'पूर्णे राका निशाकरे' इत्यमरः। दाक धाक राक इत्यत्र यद्यपि 'केऽणः' इत्यनेन ह्रस्वः प्राप्नोति, तथापि बाहुलकान्न भवति। सृवृभूशुषिमुषिभ्यः कक्। सृ गतौ, वृञ् वरणे, भू सत्तायाम्, शुष शोषणे, मुष स्तेये, एभ्यः कक्प्रत्यय इत्यर्थः। कित्त्वं गुणाभावार्थम्। सृक इति। शुकवल्कोल्काः। शुभ शुम्भ भाषणे, वल वल संवरणे, उष दाहे, एते कक्प्रत्ययान्ता निपात्यन्त इत्यर्थः। निपातनमेवाह। शुभेरन्त्यलोप इति। भलोप इत्यर्थः। कित्त्वान्न गुणः। 'ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे' इत्यमरः। वल्कमिति। 'वल्कं वल्कलमस्त्रियाम्' इत्यमरः। उल्केति। 'प्राचिकोल्का पिपीलिका' इत्यमरः। इणभीकापा। इण् गतौ, ञि भी भये, कै शब्दे, पा पाने, शल गतौ, अत

इत्यमरः। कृन्दा। डुकृञ् करणे, डुदाञ् दाने, डुधाञ् धारणपोषणयोः, रा दाने, अर्च पूजायाम्, कल गतौ। 'कर्कः कर्के तले वह्नौ शुक्लाश्वे दर्पणे घटे' इति विश्वमेदिन्यौ। 'राका नद्यन्तरे कच्छ्वां नवजातरजःस्त्रियाम्। संपूर्णेन्दुतिथौ' इति मेदिनी। 'राका तु सरिदन्तरे। राका नवरजःकन्या पूर्णेन्दुः पूर्णिमापि च' इति विश्वः। इह दा धा रा एषां 'केऽणः' इति ह्रस्वोऽपि बाहुलकात्संज्ञापूर्वकविधेरनित्यत्वाद्वा नेति बोध्यम्। 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' इति विश्वमेदिन्यौ। 'कल्कोऽस्त्री घृततैलादिशेषे दम्भे बिभीतके। विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः' इति मेदिनी। बाहुलकाद्रमेरपि कः। 'रङ्कः कृपणमन्दयोः' इति मेदिनी। कपिलकादित्वाल्लत्वं टाप्। 'लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च' इति विश्वमेदिन्यौ। सृवृ। सृ गतौ, वृञ् वरणे, भू सत्तायाम्, शुष शोषणे, मुष स्तेये। सृक इति। 'सृकं संशाय पविमिन्द्र तिग्मम्' इति मन्त्रस्य वेदभाष्ये तु सृकं सरणशीलं पविं वज्रं संशाय सम्यक्

'एके मुख्यान्यकेवलाः' 'भेको मण्डूकमेषयोः' इति विश्वमेदिन्यौ । काकः । पाकः शिशुः । शल्कं शकलम् । अत्कः पथिकः शरीरावयवश्च । मर्कः शरीरवायुः । ३२४ नौ हः । जहातेः कन्स्यान्नौ । निहाका गोधिका । ३२५ नौ सदेर्डिच्च । 'निष्कोऽस्त्री हेम्नि तत्पले' । ३२६ स्यमेरीट् च । स्यमीको वल्मीकः वृक्षभेदश्च । इड् ह्रस्व इति केचित् । स्यमिकः । ३२७ अजियुधूनीभ्यो दीर्घश्च । 'वीकः

सातत्यगमने, मर्च शब्दे चुरादिः, एभ्यः कन्प्रत्ययः, स्यात् । नित्त्वं स्वरार्थम् । **नौ हः** । नावुपपदे ओ हाक् त्यागे इत्यस्मात् कन् स्यादित्यर्थः । 'निहाका गोधिका समे' इत्यमरः । **नौ सदेर्डिच्च** । नावुपपदे षद्लृधातोः कन्स्यात्, स च डिद्भवतीत्यर्थः । डित्त्वाट्टिलोपः । षत्वं 'सदिरप्रतेः' इत्यनेन । निष्कमिति रूपम् । **स्यमेरीट् च** । स्यमु शब्दे अस्मात्कन्स्यात्, तस्य चेडागमः । स्यमीक इति रूपम् । **अजियुधूनीभ्यो** । अज गतिक्षेपणयोः, यु मिश्रणे अमिश्रणे च, धूञ कम्पने,

---

तीक्ष्णीकृत्येति व्याख्यातम् । 'भूकं छिद्रे च काले च' इति मेदिनी । 'मुष्को मोक्षकवृक्षे स्यात्संघाते वृषणेऽपि च' इति स एव । 'शुको व्याससुते कीरे रावणस्य च मन्त्रिणि। शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम् । वल्कं वल्कलशल्कयोः' इति च । 'उल्का ज्वाला विभावसोः' इति सुभूतिचन्द्रः । **इण्भि** । इण् गतौ, ञिभी भये, कै शब्दे, पा पाने, शल गतौ, अत सातत्यगमने । 'एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' इति मेदिनी । काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि । शिरोऽवक्षालने मानप्रभेदद्वीपभेदयोः । काका स्यात्काकनासायां काकोली काकजङ्घयोः । रक्तिकायां मलय्यां च काकमाच्यां च योषिति । काकं सुरतबन्धे स्यात्काकानामपि संहतौ' इति मेदिनीविश्वप्रकाशौ । 'पाकः परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी । 'शल्कं तु शकले वल्के' इति च । मर्च इति सौत्रो धातुरिति बहवः । मर्च शब्दे चौरादिक इति 'मिदचोऽन्त्यात्परः' इति सूत्रे कैयटः । 'मर्तो मर्त मर्चयति द्वयेन' इति मन्त्रे मर्चयति विधेयीकरोति भर्त्सयति वेति वेदभाष्यम् । न चैवं णिलोपस्य स्थानिवद्भावेन कुत्वाभावान्मर्क इति न सिध्येदिति वाच्यम्, पूर्वत्रासिद्धे तदभावात् । शो तनूकरणे अस्मादपि बाहुलकात्कन् । शाको द्वीपान्तरेऽपि च । शाकौ द्रुमविशेषे च पुमान् हारीतके स्त्रियाम्' इति मेदिनी । **नौ हः** । ओहाक् त्यागे । अस्मान्निशब्दे उपपदे कन्स्यात् । 'निहाका गोधिका समे' इत्यमरः । **नौ सदेः** । षद्लृ विशरणे अस्मान्निशब्दे उपपदे कन् स्यात्स च डित् । डित्वाट्टिलोपः । 'सदिरप्रतेः' इति षत्वम् । 'निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेममात्रे हेमपलेऽपि च' इति मेदिनी । **स्यमे** । स्यमु शब्दे अस्मात्कन्स्यात्तस्य च

स्याद्वातपक्षिणोः'। यूका। धूको वायुः। नीको वृक्षविशेषः। ३२८ ह्रियो रश्च लो वा। 'ह्रीका ह्लीका त्रपा मता'। ३२९ शकेरुनोन्तोन्त्युनयः। उन, उन्त, उन्ति, उनि, एते चत्वारः स्युः। शकुनः। शकुन्तः। शकुन्तिः। शकुनिः। ३३० भुवो झिच्। भवन्तिर्वर्तमानकालः। बाहुलकादवेश्च। अवन्तिः। वदेर्वदन्तिः। 'किंवदन्ती जनश्रुतिः'। ३३१ कन्युच्क्षिपेश्च। चाद् भुवः। 'क्षिपण्युर्वसन्तः' इत्युज्ज्वलदत्तः। 'भुवन्युः स्वामिसूर्ययोः'। ३३२ अनुङ् नदेश्च। चात्क्षिपेः। नदनुर्मेघः।

णीञ् प्रापणे, एभ्यः कन्स्यादेषां दीर्घश्चेत्यर्थः। वीक इति। अजधातोः कनि प्रकृतेर्वीभावे, तस्य दीर्घत्वे दीर्घविधानसामर्थ्याद् गुणाभावः। यूकेति। कनि धातोर्दीर्घः। ह्रियो रश्च लो वा। ह्री लज्जायाम्, अस्मात्कन्, धातोर्दीर्घत्वं, रेफस्य लकारश्च वेत्यर्थः। ह्रीकेति। दीर्घविधानसामर्थ्याद् गुणाभावः। ह्लीकेति। रेफस्य लकारे रूपम्। शकेरुनोन्तोन्त्युनयः। शक्लृ शक्तौ, अस्माद् उन उन्त उन्ति उनि एते चत्वारः प्रत्ययाः स्युः। 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः। भुवो झिच्। भू सत्तायामस्माद् झिच् स्यात् 'झोऽन्तः' इत्यन्तादेशः। भवन्तिरिति। अन्तादेशे गुणेऽवादेशे च रूपम्। अस्तिर्भवन्तिपरोऽप्यप्रयुज्यमानोऽस्तीति भाष्यम्। अवन्तिरित्यादिसिद्ध्यर्थमाह बाहुलकादिति। कन्युच् क्षिपेश्च। क्षिप प्रेरणे, चकाराद् भवतेरपि कन्युच् प्रत्यय इत्यर्थः। क्षिपण्युरिति। 'अट्कुप्वाङ्–' इति णत्वम्। भुवन्युरिति। कन्युचः कित्त्वाद् गुणाभावे उवङादेशे च रूपम्। अनुङ् नदेश्च। नद अव्यक्ते शब्दे। चकारात्क्षिपेरनुङ् स्यात्।

ईडागमः। 'श्यमीका नीलिकायां स्त्री श्यमीको नाकुवृक्षयोः' इति मेदिनी। अजि। अज गतिक्षेपणयोः, यु मिश्रणे, धूञ कम्पने, णीञ् प्रापणे, एभ्यः कन् स्यादेषां दीर्घश्च। तत्सामर्थ्याद् गुणाभावः। अजेर्वीभावः। ह्रियः। ह्री लज्जायामस्मात्कन्धातोर्दीर्घत्वं च तत्सामर्थ्याद् गुणाभावः। शकेः। शक्लृ शक्तौ। 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः। 'शकुनस्तु पुमान्पक्षिमात्रप्रश्नविशेषयोः। शुभाशंसिनिमित्ते च शकुनं स्यान्नपुंसकम्' इति मेदिनी। 'शकुन्तः कीटभेदे स्याद्भासपक्षिविहङ्गयोः' इति। 'शकुनिः पुंसि विहगे सौबले करणान्तरे' इति च। भुवः। भू सत्तायाम्। अस्मात् झिच् स्यात्। 'झोऽन्तः' 'कृदिकारात्–' इति ङीष्। भवन्ती लटः संज्ञा। भवन्तीति स्पष्टार्थः। तथा च 'अस्तिर्भवन्तीपरः प्रयोक्तव्यः' इति भाष्यम्। बाहुलकात्कर्मेरपि प्रत्ययादिलोपे धातोः कुशब्दादेशः। कुन्तिः। 'इतो मनुष्यजातेः' इति ङीष् 'कुन्ती पाण्डुप्रियायां च शल्लक्यां गुग्गुलद्रुमे' इति मेदिनी अवन्तिरित्यादि। अव रक्षणे, वद व्यक्तायां वाचि, आभ्यामपि झिच्। वदन्तिरिति। 'कृदिकारात्–'

क्षिपणुर्वातः । ३३३ कॄवृदारिभ्य उनन् । 'करुणो वृक्षभेदः स्यात्करुणा च कृपा मता' । वरुणः । दारुणम् । ३३४ त्रो रश्च लो वा । 'तरुणस्तलुनो युवा' । ३३५ क्षुधिपिशिमिथिभ्यः कित् । क्षुधुनो म्लेच्छजातिः । पिशुनः । मिथुनम् । ३३६ फलेर्गुक्च । फल्गुनः पार्थः । प्रज्ञाद्यण् । फाल्गुनः । ३३७ अशेर्लशश्च । लशुनम् । ३३८ अर्जेर्णिलुक्च । अर्जुनः । ३३९ तृणाख्यायां

क्षिपणुरिति । अनुङो ङित्वाद् गुणाभावः । कॄवृदारिभ्य उनन् । कॄ विक्षेपे, वृञ् वरणे, दॄ विदारणे ण्यन्तः, एभ्य उननप्रत्यय इत्यर्थः । त्रो रश्च लो वा । तॄप्लवनतरणयोः, अस्माद् उनन् स्यात्, रेफस्य लकारो वेत्यर्थः । तरुण इति । उननि धातोर्गुणः । 'वयस्थस्तरुणो युवा' इत्यमरः । क्षुधिपिशिमिथिभ्यः कित् । क्षुध बुभुक्षायाम्, पिश अवयवे, मिथः सौत्रः, एभ्यः कित्स्यादित्यर्थः । क्षुधुन् इति । कित्वान्न गुणः । फलेर्गुक च । फल निष्पत्तौ, अस्मादुनन्स्यात् धातोर्गुगागमश्चेत्यर्थः । फल्गुन इति । अर्जुन इत्यर्थः । ननु कथं फाल्गुन इत्यत आह प्रज्ञाद्यणिति । अशेर्लशश्च । अश भोजने, अस्मादुनन् धातोर्लशादेशश्चेत्यर्थः । लशुनमिति । 'लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः' इत्यमरः । अर्जेर्णिलुक्च ।

इति वा ङीष् । क्न्युच् । क्षिप प्रेरणे, भू सत्तायाम् । 'क्षिपण्युस्तु पुमान् देहे सुरभौ वाच्यलिङ्गके इति मेदिनी । 'भुवन्युः स्यात्पुमान्भानौ ज्वलने शशलाञ्छने' इति विश्वमेदिन्यौ । अनुङ् । णद अव्यक्ते शब्दे । अस्मादनुङ्प्रत्ययः स्यात् । क्षिपणुरिति । ङित्वाद् गुणाभावः । कॄवृ । कॄ विक्षेपे, वृञ् वरणे, दॄ विदारणे, ण्यन्तः । 'करुणस्तु रसे वृक्षे कृपायां करुणा मता' इति विश्वमेदिन्यौ । वरुणस्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः' इति विश्वः । 'दारुणं भीषणं भीष्मम्' इत्यमरः । 'दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे' इति मेदिनी । त्रो रश्च । तॄ प्लवनतरणयोरस्मादुनन्स्यात् । 'तरुणं कुब्जपुष्पे ना रुचके यूनि तु त्रिषु' इति मेदिनी गौरादित्वात् ङीष् । 'तरुणी तलुनीति च' इति द्विरूपेषु विश्वः । क्षुधि । क्षुध बुभुक्षायाम्, पिश अवयवे । अयं दीपनायामपि । मिथिः सौत्रो धातुः । 'पिशुनो दुर्जनः खलः' इत्यमरः । 'पिशुनं कुङ्कुमे स्मृतम् । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु । पृक्कायां पिशुना स्त्री स्यात्' इति मेदिनी । 'मिथुनं न द्वयो राशिभेदे स्त्रीपुंसयुग्मके' इति च । फलेः । फल निष्पत्तौ, अस्मादुनन् गुगागमश्च धातोः । 'फल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे । तपस्यसंज्ञमासे तत्पूर्णिमायां च फाल्गुनी' इति मेदिनी । फाल्गुन इति । 'फल्गुनः फाल्गुनोऽर्जुने' इति द्विरूपकोशः । अशेः । अश भोजने अस्मादुनन् धातोर्लशादेशश्च । लशुनं महाकन्दः । 'लशुना लशुनं वेश्म कश्मलं विश्वमश्ववत्'

चित् । चित्त्वादन्तोदात्तः, अर्जुनं तृणम् । ३४० अर्तेश्च । अरुणः । ३४१ अजियमिशीङ्भ्यश्च । 'वयुनं देवमन्दिरम्' यमुना । शयुनः अजगरः । ३४२ वृतॄवदिहनिकमिकषिभ्यः सः । वत्सम् । तत्सम् । 'तर्सः प्लवसमुद्रयोः' ।

अर्ज गतिस्थानार्जनोपार्जनेषु, अस्मादुनन्प्रत्ययः तत्संनियोगेन णेर्लुक्चेत्यर्थः । **अर्जुन इति** । जकारेण व्यवधानान्न णत्वम् । 'वलक्षो धवलोऽर्जुनः' इत्यमरः । अत्र णेरनिटीत्यनेनैव णेर्लोपे सिद्धे णिलुक् चेति लुग्विधानं चिन्त्यप्रयोजनमेव । न च प्रत्ययलक्षणेन प्राप्तं लघूपधगुणं वारयितुं लुग्विधानमावश्यकम्, लुकि तु न लुमताङ्गस्येति निषेधान्न प्राप्तिरिति वाच्यम्, लुग्विधानेऽपि उननमाश्रित्य लघूपधगुणस्य दुर्वारत्वात् । अथ यदि यथाकथंचिद् एतद्ग्रन्थसमर्थने आग्रहः, एवं वक्तव्यम्-अस्मिन्सूत्रे किदित्यनुवर्तेत, ततश्च उननः कित्त्वेन गुणो न भवति, लोपे तु स्यादेव गुण इति वैपरीत्ये पर्यवस्यतीति । एवं सति अर्जुन इति रूपमेव न सिध्येत्, तस्मात् किदिति नानुवर्तनीयमेव, लुग्विधानं च व्यर्थम् । **तृणाख्यायाम्** । तृणस्याख्या तृणाख्या, तस्यां सत्यां अर्जेर्जायमान उनन् चित्स्यादित्यर्थः । चित्त्वफलमाह **चित्त्वादन्तोदात्त इति** । **अर्तेश्च** । ऋ गतौ, अस्मादुनन्स्यात्, स च चित्स्यादित्यर्थः । **अरुण इति** । रषाभ्यामिति णत्वम् । 'अरुणो भास्करेऽपि स्याद् वर्णभेदेऽपि च त्रिषु' इत्यमरः । **अजियमिशीङ्भ्यश्च** । अज गतिक्षेपणयोः, यमु उपरमे, शीङ् स्वप्ने, एभ्य उनन् स्यात्, स च चिदित्यर्थः । **वयुनमिति** । अजेर्वीभावो गुणः अयादेशः । **यमुनेति** । 'यमुना शमनस्वसा' इत्यमरः । **वृतॄवदि** । वृ वरणे, तॄ प्लवनतरणयोः, वद व्यक्तायां वाचि, हन हिंसागत्योः,

---

इति मध्यतालव्येषु विश्वः । लस चेति दन्त्यमध्यपाठस्तु प्रामादिकः । **अर्जेः'** अर्ज गतिस्थानार्जनोपार्जनेषु, अस्माण्ण्यन्तादुनन् स्याद् णेश्च लुक् । इह **'णेरनिटि'** इति णिलोपेनैव सिद्धे णिलुक् चेत्युक्तः फलं चिन्त्यम । 'अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत् । नपुंसकं तृणे नेत्ररोगे वाप्यर्जुनी गवि । उषायां बाहुदानयां कुट्टन्यामपि च क्वचित्' इति विश्वमेदिन्यौ । **अर्तेश्च** । ऋ गतावस्मादुनन्स्यात्स च डित् । 'अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु । अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासु च' इति मेदिनी । **अजि** । अज गतिक्षेपणयोः, यम उपरमे, शीङ् स्वप्ने, एभ्य उनन् स्यात्स च डित् । अजेर्वीभावः । वीयते गम्यतेऽनेनेति वयुनम् । 'विश्वानि देव वयुनानि विद्वान्' इति मन्त्रे वयुनानि प्रज्ञानानीति वेदभाष्यम् । वैदिकनिघण्टौ प्रज्ञापर्याये प्रशस्यपर्याये च वयुनशब्दः पठितः । 'यमुना शमनस्वसा' इत्यमरः । **वृ तॄ** । वृ वरणे, तॄ प्लव-

वत्सः । वत्सं वक्षः । हंसः । 'कंसोऽस्त्री पानभाजनम्' । कक्षम् अरण्यम् । ३४३ प्लुषेरच्चोपधायाः । प्लक्षः । ३४४ मनेर्दीर्घश्च । मांसम् । ३४५ अशेर्देवने । अक्षः । ३४६ स्नुव्रश्चिकृत्यृषिभ्यः कित् । स्नुषा । वृक्षः । कृत्स-

---

कमु कान्तौ, कष हिंसायाम्, एभ्यः सप्रत्यय इत्यर्थः ॥ **वर्षमिति** प्रत्ययावयवत्वात्षत्वम् । **तर्षमिति** । 'तर्षो जग्धिस्तु भोजनम्' इत्यमरः । अत्रापि गुणे कृते षत्वम् । **कक्षमिति** । षढोरिति कत्वम् । **प्लुषेरच्चोपधायाः** । प्लुष दाहे, अस्मात्सः स्यात्, उपधाया अकारश्चेत्यर्थः । 'प्लक्षश्च तिन्तिडी चिञ्चा' इत्यमरः । **मनेर्दीर्घश्च** । मन ज्ञाने, अस्मात्सप्रत्ययः, धातोर्दीर्घश्चेत्यर्थः । **मांसमिति** । 'नश्चापदान्तस्य–' इत्यनुस्वारः । **अशेर्देवने** । अशू व्याप्तौ, अस्मात्सप्रत्ययः देवने वाच्ये इत्यर्थः ।

नतरणयोः, वद व्यक्तायां वाचि, हन हिंसागत्योः, कमु कान्तौ, कष हिंसायाम् । **वर्सम् । तर्सम् इति** । 'तितुत्र–' इति नेट् । षत्वं तु न भवति बाहुलकेन षत्वे कर्तव्ये प्रत्ययसंज्ञाया अप्रवृत्तेः । कक्षशब्दे तु षत्वं भवत्येव । एतच्च भाष्यकैयटादिपर्यालोचनयोक्तम् । कथं तर्हि सर्वैरप्युणादिवृत्तिकारैरिह षत्वमुदाहृतमिति चेत् । अत्राहुः—अस्तु भाष्यप्रामाण्याद् वर्सं तर्समिति दन्त्यपाठोऽपि साधुः । पक्षे तु षत्वमस्तु । बाहुलकलभ्यषत्वाभावस्य पाक्षिकत्वेऽपि बाधकाभावाद् वृषितृषिभ्यां घञि कृते ण्यन्तादेरचि 'घञर्थे कविधानम्' इति ण्यन्तात्कप्रत्यये वा कृते वर्षतर्षशब्दयोर्दुर्वारत्वात्, अज्विधौ भयादीनामुपसंख्यानान्नपुंसके क्तादिनिवृत्त्यर्थमित्यत्र वर्षमित्याकारे उदाहृतत्वाच्च । तस्माद्दिह द्विरूपता फलितेति । 'वर्षोऽस्त्री भारतादौ स्याज्जम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि' इति मेदिनी । 'तर्षो लिप्सोदन्ययोः' इति च । 'पुत्रादौ तर्णके वर्षे वत्सः क्लीबं तु वक्षसि' इति त्रिकाण्डशेषः । 'सद्यो जातस्तु तर्णकः' । 'हंसः स्यान्मानसौकसि । निर्लोभनृपविष्ण्वर्कपरमात्मसु मत्सरे । योगभेदे मन्त्रभेदे शारीरमरुदन्तरे । तुरङ्गमप्रभेदे च' इति मेदिनी । 'कंसोऽस्त्री तैजसद्रव्ये कांस्ये माने सुरेतरे' इति च । 'कंसो दैत्यान्तरे स्मृतः । कांस्ये च कांस्यपात्रे च मानभेदे च कीर्तितः' इति विश्वः । 'कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्धायां ना तु दोर्मूले कच्छवीरुत्तृणेषु च' इति मेदिनी । **प्लुषेः** । प्लुष दाहे, अस्मात्सः स्यादुपधाया अकारश्च । 'प्लक्षो जटी गर्दभाण्डद्वीपभित्कुञ्जराशने' इति मेदिनी । 'प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्दभाण्डयोः । पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तितः' इति विश्वः । **मनेः** । मन ज्ञाने । 'मांसं स्यादामिषे क्लीबं कक्कोलीजटयोः स्त्रियाम्' इति मेदिनी । **अशेः** । अशू व्याप्तौ, अस्माद्देवने वाच्ये सः स्यात् । 'व्रश्चभ्रस्ज-' इत्यादिना

शुद्धकम्। ऋक्षं नक्षत्रम्। **३४७ ऋषेर्जातौ**। 'ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने। ऋक्षमृक्षं च नक्षत्रे' इति विश्वः। **३४८ उन्दिगुधिकुषिभ्यश्च**। उत्सः प्रस्रवणम्। गुत्सः स्तबकः। कुक्षो जठरम्। **३४९ गृधिपण्योर्दकौ च**।

अक्ष इति। व्रश्चेति षत्वम्, कत्वम्, षत्वमिति भावः। **स्नुव्रश्चि**। स्नु प्रस्रवणे, ओ व्रश्चू छेदने, कृती छेदने, ऋषी गतौ, एभ्यः सप्रत्ययः स्यात्, स च कित्स्यादित्यर्थः। **स्नुषेति**। कित्त्वान्न गुणः। **वृक्ष इति**। व्रश्चधातोः सनि तस्य कित्त्वाद् ग्रहिज्येति संप्रसारणे, स्कोरिति सलोपः, चोः कुरिति कुत्वम्, सस्य षत्वे च रूपम्। **ऋषेर्जातौ**। ऋषी गतावित्यस्माद् जातौ सप्रत्ययः स्यात्, स च किदित्यर्थः। पूर्वसूत्रेणैव सिद्धे इदं सूत्रं नियमार्थम्—ऋषेर्जातावेव सप्रत्यय इति। तेन यौगिके न भवति। अन्येभ्यस्तु उभयत्रापि भवति। **उन्दिगुधिकुषिभ्यश्च**। उन्दी क्लेदने, गुध रोषे, कुष निष्कर्षे, एभ्यः सः कित्स्यादिति भावः। **उत्स इति**। अनिदितामिति नलोपः। 'उत्सः प्रस्रवणं वारि' इत्यमरः। **गुत्स इति**। खरि चेति चर्त्वम्। **कुक्ष इति**। षढोरिति कः। **गृधिपण्योर्दकौ च**। गृधु

षत्वादिकार्यम्। 'अथाक्षमिन्द्रिये। ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे' इत्यमरः। 'अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके। रुद्राक्षेन्द्राक्षयोः सर्पे बिभीतकतरावपि। चक्रे कर्षे पुमान् क्लीबं तुत्थसौवर्चलेन्द्रिये' इति मेदिनी। **स्नुव्रश्चि**- स्नु प्रस्रवणे, ओव्रश्चू छेदने, कृती छेदने, ऋषी गतौ, एभ्यः सः कित्स्यात्। स्नुषा पुत्रवधूः। **वृक्ष इति**। सस्य कित्वाद् 'ग्रहिज्या–' इति संप्रसारणम्। 'ऋक्षः पर्वतभेदे स्याद्भल्लुके शोणके पुमान्। कृतवेधेऽप्यन्यलिङ्गं नक्षत्रे पुंनपुंसकम्' इति मेदिनी। **ऋषेर्जातौ**। पूर्वसूत्रेणैव सिद्धे ऋषेर्जातावेवेति नियमार्थं सूत्रम्। तेनान्येभ्यस्त्रिभ्यः केवलयौगिकत्वेऽपि सप्रत्ययो भवति। **उन्दिगुधि**। उन्दी क्लेदने, गुध रोषे, कुष निष्कर्षे, एभ्यः सः कित्स्यात्। 'अनिदिताम्–' इति नलोपः। 'उत्सः प्रस्रवणं वारि' इत्यमरः। 'गुत्सः स्यात्स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः' इति मेदिनी। 'गुच्छश्च गुत्सो गुच्छो गुलुच्छवत्' इति द्विरूपकोशात्। 'स्याद् गुच्छः स्तबके स्तम्बे हारभेदकलापयोः' इति चवर्गद्वितीयान्ते मेदिनीकोशाच्च। **गृधि**। गृधु अभिकाङ्क्षायाम्, पण व्यवहारे स्तुतौ च। ननु गृधेश्चर्त्वेन गृत्स इति सिद्धे दकारविधानं व्यर्थमिति चेत्। मैवम्। चर्त्वस्यासिद्धत्वेन 'एकाचो बशः–' इति भष्भावप्रसङ्गात्। न चैवमपि प्रक्रियालाघवाय तकार एव विधीयतामिति शङ्क्यम्, 'चयो द्वितीया–' इति पक्षे तकारस्य थकारापत्तेः। 'पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः। केशादेः

गृत्सः कामदेवः। पक्षः। **३५० अशेः सरः।** अक्षरम्। **३५१ वसेश्च।** वत्सरः। **३५२ सपूर्वाच्चित्।** संवत्सरः। **३५३ कृधूमदिभ्यः कित्।** बाहुलकात्र षत्वम्। 'कृसरः स्यात्तिलौदनम्'। धूसरः। मत्सरः। 'मत्सरा

अभिकाङ्क्षायाम्, पण व्यवहारे स्तुतौ च, आभ्यां सप्रत्ययः, धातोरन्त्यस्य क्रमेण दकारककारौ चादेशौ स्त इत्यर्थः। **गृत्स इति।** किदित्यनुवर्तनान्न गुणः। धकारस्य दकार आदेश इति भावः। ननु धकारस्य खरि चेति चर्त्वेन तकारे गृत्स इति रूपसिद्धौ किमर्थमेवं दकारविधिप्रयास इति चेत्, अत्राहुः 'खरि च' इति चर्त्वस्यासिद्धत्वाद् 'एकाचो बशो भष्–' इति भष्भावः प्रसज्येत, तदर्थं दकारविधिरिति। प्रक्रियालाघवाय तकार एव तु न विहितः 'चयो द्वितीया–' इति पक्षे थकारप्रसंगात्। दकारविधाने तु चर्त्वस्यासिद्धत्वान्न भवति। **पक्ष इति।** पणधातो रूपम्। कित्परत्वात्षत्वम्। **अशेः सरः।** अशू व्याप्तौ, अस्मात्सरप्रत्यय इत्यर्थः। **अक्षरमिति।** व्रश्चेत्यादिना षत्वं षढोरिति कत्वम्, सस्य षत्वम्। **वसेश्च।** वस निवासे, अस्मात् सरप्रत्यय इत्यर्थः। **वत्सर इति।** 'सः स्यार्धधातुके' इति तत्वम्। **संपूर्वाच्चित्।** समित्युपसर्गपूर्वकाद्वसेर्जायमानः सरप्रत्ययः चिदित्यर्थः। चित्त्वप्रयोजनं तु अन्तोदात्तस्वरः। अत्र सपूर्वादिच्चिति स्वारसिकः पाठः। समितरपूर्वादपि सरप्रत्ययदर्शनात्। 'संवत्सरोऽसि परिवत्सरोऽसि इलावत्सरोऽसि इद्वत्सरोऽसि' इत्यादौ यथा। **कृधूमदिभ्यः कित्।** डु कृञ् करणे, धूञ् कम्पने, मदी हर्षे, एभ्यः सरप्रत्ययः, स च कित्स्यादित्यर्थः। ननु कृसर इत्यत्र इणः परत्वात् प्रत्ययावयवत्वाच्च षत्वं कुतो नेत्यत आह **बाहुलकादिति।** कृसरशब्दार्थं विवृण्वन् अमरकोशमाह **कृसरः स्यादिति। धूसर इति।** कित्त्वान्न गुणः। 'ईषत्पाण्डुस्तु धूसरः'। **मत्सर इति।**

परतोऽन्दे बले सखिसहाययोः चुल्लीरन्ध्रे पतत्रे च राजकुञ्जरपार्श्वयोः' इति विश्वमेदिन्यौ। **अशेः।** अशू व्याप्तौ 'व्रश्च–' इत्यादिना षत्वादिकार्यम्। 'अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोः' इति हेमचन्द्रः। 'अशेः सरन्' इत्युज्ज्वलदत्तादिपाठस्तु प्रामादिकः, नित्स्वरापत्तेः। इष्यते तु प्रत्ययस्वरेणाक्षरशब्दस्य मध्योदात्तत्वम्। 'ऋचो अक्षरे परमे व्योमन्' इत्यादिऋङ्मन्त्रेषु, 'त्रीणि च शतानि षष्टिश्चाक्षराणि' इति यजुषि च तथैव पाठात्। अत एवाश्नोतेर्वा सरोऽक्षरमिति द्वितीयाह्निकान्ते भाष्यकृतोक्तम्। **वसेश्च।** वस निवासे, अस्मादपि सरः स्यात्। 'सः स्यार्धधातुके' इति तत्वम्। **सपूर्वाच्चित्।** पूर्वसहिताद्वसतेः सरः स्यात्स च चित्। चित्त्वादन्तोदात्तः। 'इद्वत्सराय परिवत्सराय'। संपूर्वादिति पाठान्तरम्। तच्च लक्ष्यविरोधादुपेक्ष्यम्। **कृधू।** डुकृञ् करणे, धूञ् कम्पने, मदी हर्षे, एभ्यः सरः

मक्षिका ज्ञेया भम्भराली च सा मता'। ३५४ पते रश्च लः। पत्सलः पन्थाः। ३५५ तन्यृषिभ्यां क्सरन्। तसरः सूत्रवेष्टनम्। ऋक्षरः ऋत्विक्। ३५६ प्रीयुकणिभ्यां कालन्ह्रस्वः संप्रसारणं च। प्रीयुः सौत्रः। प्रियालो वृक्षभेदः। कुणालो देशभेदः। ३५७ कटिकुषिभ्यां काकुः। कटाकुः पक्षी। कुषाकु-

---

'मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः। **पते रश्च लः**। पत्लृ गतौ, अस्मात् सरः स्यात्, रेफस्य लश्चेत्यर्थः। पत्सल इति रूपम्। **तन्यृषिभ्यां क्सरन्**। तनु विस्तारे, ऋषी गतौ, आभ्यां क्सरन्प्रत्यय इत्यर्थः। **तसर इति**। प्रत्ययस्य कित्त्वादनुदात्तोपदेशेत्यादिनाऽनुनासिकलोपः। ऋषधातोः ऋक्षर इति रूपम्। कित्त्वान्न गुणः। कत्वं षत्वम्। **प्रीयुकणिभ्याम्**। प्रीयुधातोर्धातुपाठे अदर्शनादाह **सौत्र इति**। कण शब्दे। आभ्यां कालन्प्रत्ययः, क्रमेण प्रीयुधातोर्ह्रस्वः, कणधातोः संप्रसारणं चेत्यर्थः। **प्रियाल इति**। ह्रस्वे रूपम्। **कुणाल इति**। संप्रसारणे वकारस्योकारे पूर्वरूपे च रूपम्, 'राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुःपटः' इति वनौषधिवर्गे अमरः। **कटिकुषिभ्यां काकुः**। कटे वर्षावरणयोः, कुष निष्कर्षे,

---

कित्स्यात्। कुसरः स्यादित्यादि हारावलीस्थम्। 'धूसरी किन्नरीभेदे ना खरे त्रिषु पाण्डुरे' इति मेदिनी। 'मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान्। असह्यपर-संपत्तौ कृपणे चाभिधेयवत्' इति च। 'मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः। 'अथ मत्सरः। असह्यपरसंपत्तौ मात्सर्ये कृपणे क्रुधि' इति विश्वः। वेदे तु मदी हर्षे इति योगार्थं पुरस्कृत्य प्रयुज्यते 'इन्दुमिन्द्राय मत्सरम्'। 'तं सिन्धवो मत्सरमिन्द्रियाणाम्' इत्यादि। समत्सरं हर्षहेतुमिति तद्भाष्यम्। **पतेः**। पत्लृ गतावस्मात्सरः स्याद्रेफस्य लश्च। **तन्यृषिः**। तनु विस्तारे, ऋषी गतौ। अमरोक्तिमाह **तसर इति**। कित्त्वाद् 'अनुदात्तोपदेश–' इत्यादिनानुनासिकलोपः। **ऋक्षर ऋत्विगिति**। 'ऋक्षरं वारिधारायामृक्षरस्त्वृत्विजि स्मृतः' इति मेदिनी। 'अनृक्षरा ऋजवः सन्तु पन्थाः' इति मन्त्रस्य वेदभाष्ये तु ऋक्षरः कण्टक इति व्याख्यातम्। **पीयुकणिभ्याम्**। अणरण इति दण्डके कणिः पठ्यते स च शब्दार्थकः, आभ्यां कालन् स्यात् यथाक्रमं ह्रस्वः संप्रसारणं च। 'राजादनः प्रियालः स्यात्' इत्यमरः। 'पियालः स्यात्प्रियालवत्' इति द्विरूपकोशः। बाहुलकाद्भजेरपि कालन्। कित्त्वान्नलोपः। न्यङ्कादित्वात्कुत्वम्। भगालं नरमस्तकम्। मत्वर्थे इनिः। 'चण्डीकान्तो भगाली च लेलिहानो वृषध्वजः' इति राजशेखरः। **कठिकुषि**। कठ कृच्छ्रजीवने, कुष निष्कर्षे। 'कुषाकुः कपिवह्न्यर्के ना परोत्तापिनि त्रिषु' इति मेदिनी। उज्ज्वलदत्तस्तु कटिकषिभ्यामिति

रश्मिः सूर्यश्च । ३५८ सर्तेर्दुक्च । 'सृदाकुर्वातसरितोः' । ३५९ वृतेर्वृद्धिश्च । वार्ताकुः । बाहुलकादुकारस्य अत्वम् । वार्ताकम् । ३६० पर्देर्नित्संप्रसारणमल्लोपश्च । 'पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे' । ३६१ सृयुवचिभ्योऽन्युजागूजक्नुचः । अन्युच्, आगूच्, अक्नुच्, एते क्रमात्स्युः 'सरण्युर्मेघवातयोः' । यवागूः । 'वचक्नुर्विप्रवाग्मिनोः' । ३६२ आनकः शीङ्भियः । शयानकोऽजगरः । भयानकः । ३६३ आणको लूधूशिङ्घिधाञ्भ्यः ।

आभ्यां काकुप्रत्ययः । कटाकुः कृषाकुरिति रूपम् । सर्तेर्दुक् च । सृ गतौ, अस्मात्काकुप्रत्ययः स्यात्, धातोर्दुगागमश्चेत्यर्थः । सृदाकुरिति । प्रत्ययस्य कित्त्वान्न गुणः । वृतेर्वृद्धिश्च । वृतु वर्तने, अस्मात्काकुः स्यात्, धातोर्वृद्धिश्चेत्यर्थः । वार्ताकुरिति । वार्ताकशब्दं साधयति बाहुलकादिति । पर्देर्नित्संप्रसारणमल्लोपश्च । पर्द कुत्सिते शब्दे, अस्मात्काकुः स्यात्, स च नित्, धातो रेफस्य संप्रसारणम् ऋकारो भवति, पकारोत्तराकारस्य लोपश्चेत्यर्थः । 'सर्पः पृदाकुर्भुजगः भुजङ्गोऽहिर्भुजङ्गमः', इत्यमरः । सृयुवचिभ्यो । सृ गतौ, यु मिश्रणे, वच परिभाषणे, एभ्यो धातुभ्यः क्रमाद् अन्युच्, आगूच्, अक्नुच् इति प्रत्ययाः स्युः । सरण्युरिति । अन्युचि कृते धातोर्गुणे णत्वे च रूपम् । यवागूरिति । गुणे अवादेशे च रूपम् । 'यवागूरुष्णिका श्राणा' इत्यमरः' 'वचक्नुस्तु पुमान्विप्रे' इति मेदिनीकारः । आनकः शीङ्भियोः । शीङ् स्वप्ने, ञि भी भये, आभ्याम् आनगित्यर्थः । शयानको भयानक इति । गुणे अयादेशे च रूपम् । आणको । लूञ्

पठित्वा कषशिषेति दण्डकधातुमुपन्यस्य कषाकुरित्युदाजहार, तत्कोशविरुद्धम् । मेदिनीकोशे षकारप्रक्रमे पाठात् । सर्तेः । सृ गतावस्मात्काकुः स्याद्धातोर्दुगागमश्च । 'सृदाकुर्नानिले चक्रे ज्वलने प्रतिसूर्यके' इति मेदिनी । वृतेः । वृतु वर्तने 'वार्ताकुः प्रियवार्ताकी अन्ताकोऽपि च दृश्यते' इति द्विरूपे विश्वः । 'वार्ताकी हिङ्गली सिंही भण्टाकी दुष्प्रधर्षणी' इत्यमरः । 'वार्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम्' इति वैद्यशास्त्रम् । पर्देः । पर्द कुत्सिते शब्दे । अस्मात्काकुः स्यात्स च नित् । धातो रेफस्य संप्रसारणमकारलोपश्च । विश्वकोशस्थमाह पृदाकुरिति । 'पृदाकुर्वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान्' इति मेदिनी । सृयु । सृ गतौ, यु मिश्रणे, वच परिभाषणे । 'सरण्युस्तु पुमान् वारिवाहे स्यान्मातरिश्वनि' इति मेदिनी । 'सरण्युरस्य सूनुरश्वः' इति मन्त्रस्य भाष्ये सरण्युः शीघ्रगामीति व्याख्यातम् । 'यवागूरुष्णिका श्राणा विलेपी तरला च सा' इत्यमरः । 'वचक्नुस्तु पुमान् विप्रे वावदूकेऽभिधेयवत्' इति मेदिनी । आनकः । शीङ् स्वप्ने, ञिभी भये, बिभेत्यस्मादिति भयानको

लवाणकं दात्रम्। धवाणको वातः। शिङ्घाणकः श्लेष्मा। पृषोदरादित्वात्पक्षे कलोपः। 'शिङ्घाणं नासिकामलं'। 'धाणको दीनारभागः'। २६४ उल्मुकदर्विहोमिनः। उष दाहे। षस्य लः मुकप्रत्ययश्च। उल्मुकं ज्वलदङ्गारम्। दृणातेर्विः दर्विः। जुहोतेर्मिनिः होमी। २६५ ह्रियः कुग्रश्च लो वा। ह्रीकुः, ह्लीकुः लज्जावान्। २६६ हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्। दशभ्यस्तन् स्यात्। 'तितुत्र-' (सू ३१६३) इति नेट्। हस्तः। मर्तः। गर्तः। एतः

छेदने, धूञ् कम्पने, शिघि आघ्राणे, डु धाञ् धारणपोषणयोः, एभ्य आणक्प्रत्यय इत्यर्थः। शिङ्घाणकमिति। इदित्त्वान्नुम्। उल्मुकदर्विहोमिनः। उल्मुक, दर्वि, होमी इति त्रयोः निपात्यन्त इत्यर्थः। निपातनमेवाह उष दाह इति। ननु तर्हि षकारोऽपि श्रूयते इत्यत आह षस्य ल इति। प्रत्ययमाह मुकप्रत्ययश्चेति। निपात्यत इति शेषः। 'अङ्गारोऽलातमुल्मुकम्' इत्यमरः। दर्विरित्यत्राह दृणातेरिति। 'दर्विः कम्बिः खजाका च' इत्यमरः। होमीत्यत्राह जुहोतेरिति। ह्रियः कुक् रश्च लो वा। ह्री लज्जायामस्मात्कुक्प्रत्ययः स्यात्, धातुसंबन्धिरेफस्य लकारश्च वेत्यर्थः। ह्लीकुरिति। कित्त्वाद् गुणनिषेधः। हसिमृग्रिण्वामि। हसे हसने, मृङ् प्राणत्यागे, गॄ निगरणे, इण् गतौ, वा गतिगन्धनयोः, अम गत्यादिषु, दमु उपशमे, लूञ् छेदने, पूञ् पवने, धुर्वी हिंसायाम्, एभ्यो धातुभ्यस्तन्प्रत्ययः। हस्त इत्यादौ वलादिलक्षणेटमाशङ्क्याह तितुत्रेति नेडिति। तनः कित्त्वाभावाद्दन्त इत्यादौ 'अनुनासिकस्य क्विझलोः-' इति दीर्घो न। मर्त इति। भूलोक इत्यर्थः।

भयंकरः। 'भयानकः स्मृतो व्याघ्रे रसे राहौ भयंकरे' इति मेदिनी। आणको। लूञ् छेदने, धूञ् कम्पने, शिघि आघ्राणे, डुधाञ् धारणपोषणयोः। हारावलीस्थमाह शिङ्घाणमिति। 'शिङ्घाणं काचपात्रे स्याल्लोहनासिकयोर्मले' इति विश्वः। 'शिङ्घाणः फेनडिण्डीरो नकरेतश्च पिच्छिलः' इति विक्रमादित्यकोशः। उल्मुक। एते निपात्यन्ते। निपातनप्रकारमेवाह उष दाहे इत्यादि। हारावलीस्थमाह उल्मुकमिति। 'दर्विः कम्बिः खजाका च' इत्यमरः। ह्रियः। ह्री लज्जायामस्मात्कुक्प्रत्ययः स्यात्। ककारो गुणनिषेधार्थः। हसिः। हसे हसने, मृङ् प्राणत्यागे, गॄ निगरणे, इण् गतौ, वा गतिगन्धनयोः, अम गत्यादिषु, दमु उपशमे, लूञ् छेदने, पूञ् पवने, धुर्वी हिंसायाम्। 'हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च। ऋक्षे केशात्परो व्राते' इति मेदिनी। अत्रायमर्थः—केशवाचकात्परो यो हस्तशब्दः स समूहवाची। तथा च केशहस्तशब्दः केशसमूहशब्दपर्याय इति। मर्तो भूलोकस्तत्र भवो मर्त्यः। दिगादेराकृतिगणत्वाद्यत्। 'गर्तस्त्रिगर्तभेदे स्यादवटे च कुकुन्दरे' इति मेदिनी।

कर्बुरः । वातः । अन्तः । दन्तः । 'लोतः स्यादश्रुचिह्नयोः' । 'पोतो बालवहित्रयोः' । धूर्तः । बाहुलकात्तु सेर्दीर्घश्च । तूस्तं पापं धूलिर्जटा च । ३६७ **नञ्याप इट् च** । नापितः । ३६८ **तनिमृङ्भ्यां किच्च** । ततम् । मृतम् । ३६९ **अञ्जिघृसिभ्यः क्तः** । अक्तम् । घृतम् । सितम् । ३७० **दुतनिभ्यां**

तत्र भवो मर्त्यः । दिगादित्वाद्यत् । **धूर्त इति** । तनि कृते 'लोपो व्योर्वलि' इति वलोपः, हलि चेति दीर्घः । **नञ्याप इट् च** । नञि उपपदे आप्लृ व्याप्तावित्यस्मात् तन्प्रत्ययः, इडागमश्चेत्यर्थः **नापित इति** । बाहुलकान्नञो नलोपाभावः । 'क्षुरी मुण्डी दिवाकीर्तिनापितान्तावसायिनः' इत्यमरः । **तनिमृङ्भ्यां किच्च** । तनु विस्तारे, मृङ् प्राणत्यागे, आभ्यां तन्स्यात्, स च किदित्यर्थः । **ततमिति** । कित्वादनुनासिकलोपः । 'ततं वीणादिकं वाद्यम्' इत्यमरः । **अञ्जिघृसिभ्यः क्तः** ।

एत इति । 'एतः कर्बुर आगते । अन्तःस्वरूपे नाशे ना न स्त्रीशेषेऽन्तिके त्रिषु' इति च । 'दन्तोऽद्रिकटके कुञ्जे दशने चौषधौ स्त्रियाम्' इति च मेदिनी । 'लोतमश्रुणि चोरिते' इति विश्वः । 'क्तक्तवतू निष्ठा' इति सूत्रे लोतो मेष इति कैयटः । 'पोतः शिशौ वहित्रे च' इति विश्वमेदिन्यौ । **धूर्त इति** । 'लोपो व्योर्वलि' इति वलोपः 'राल्लोपः' इत्यनेन लोपस्तु क्विझलोरित्यननुवृत्तिपक्षे बोध्यः । 'हलि च' इति दीर्घः । धूर्तं तु खण्डलवणे धत्तूरे ना शठे त्रिषु' इति मेदिनी । **तूस्तमिति** । तुस खण्डन इत्यस्मात्तन् । **नञ्या** । आप्लृ व्याप्तौ अस्मान्नञ्युपपदे तन्स्यादिडागमश्च बाहुलकान्नञो नलोपाभावः । **तनि** । तनु विस्तारे, मृङ् प्राणत्यागे, आभ्यां तप्रत्ययः स्यात्स च कित् । कित्वादनुनासिकलोपः । 'ततं वीणादिकं वाद्यम्' इत्यमरः । 'अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम् । क्लीबं वीणादिवाद्ये, स्यात्पुंल्लिङ्गस्तु समीरणे' इति मेदिनी । 'मृतं तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिषु' इति च । **अञ्जि** । अञ्जू व्यक्तिम्रक्षणादौ, घृ क्षरणदीप्त्योः, षिञ् बन्धने एभ्यः क्तः स्यात् । निष्ठासंज्ञात्वे तस्य न भवति । उणादीनामव्युत्पन्नत्वाद्बाहुलकाद्वा । अन्यथा 'निष्ठा च द्व्यजनात्' इत्याद्युदात्तत्वं स्यादिति 'क्तक्तवतू निष्ठा' इति सूत्रे कैयटः । अक्तं परिच्छिन्नम् । अक्तः परिमाणवाचक इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात् । 'अक्तं व्याप्ते च संकुले' इति विश्व इत्युज्ज्वलदत्तेनोक्तम्, तच्च लिपिभ्रमप्रयुक्तम् । विश्वकोशे हि 'व्यस्तं व्याप्ते च संकुले' इति स्थितत्वात् । मेदिन्यां वकारादिप्रक्रमे 'व्यस्तं तु व्याकुले व्याप्ते' इत्युक्तम् । घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्' । 'सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री' इति मेदिनी । बाहुलकाद् ऋगतावित्यस्माद् क्तः । 'ऋतमुञ्छशिले जले । सत्ये दीप्ते पूजिते

दीर्घश्च । दूतः । तातः । ३७१ जेर्मूट् चोदात्तः । जीमूतः । ३७२ लोष्टपलितौ । लुनातेः क्तः, तस्य सुट्, धातोर्गुणः, लोष्टम् । पलितम् । ३७३ हृश्याभ्यामितन् । हरितश्येतौ वर्णभेदौ । ३७४ रुहे रश्च लो वा । 'रोहितो मृग-

---

अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, घृ क्षरणदीप्त्योः, षिञ् बन्धने, एभ्यः क्तः स्यात् । **अक्त इति** । नलोपे कुत्वे च रूपम् । **दुतनिभ्यां दीर्घश्च** । दु गतौ, तनु विस्तारे, आभ्यां क्तः स्याद् धातोर्दीर्घश्च । **तात इति** । क्तस्य कित्वान्नलोपे दीर्घे च रूपम् । **जेर्मूट् चोदात्तः** । जि जये, अस्मात्क्तप्रत्ययः स्यात्, तस्य चोदात्तः, मूडागमः, धातोर्दीर्घश्च स्यात् । जीमूत इति रूपम् । **लोष्टपलितौ** । एतौ निपात्येते । निपातनप्रकारमेवाह **लुनातेरिति** । लूञ् छेदने इत्यस्मात्क्तप्रत्ययः, सुडागमः, धातोर्गुणश्च निपात्यत इत्यर्थः । 'लोष्टानि लोष्टवः पुंसि' इत्यमरः । 'पलितं जरसा शौक्ल्यम्' इति च । **हृश्याभ्यामितन्** । हृञ् हरणे, श्यैङ् गतौ, आभ्यामित-

---

स्यात्' इति मेदिनी । **दुतनि** । दु गतौ, तनु विस्तारे, आभ्यां क्तः स्याद्धातो दीर्घश्च । दूतः प्रेष्यः । गौरादित्वान्ङीष् । दूती । कथं तर्हि 'तेन दूति विदितं निषेदुषा' इति रघुरिति चेत् । अत्राहुः—दूङ् परितापे इत्यस्मात् क्तिचि दूतिरिति । 'दूत्यां दूतिरपि स्मृता' इति द्विरूपकोशः । 'ततोऽनुकम्प्ये जनके' इति विश्वमेदिन्यौ । बाहुलकात् शीङ् स्वप्ने इत्यस्मादपि क्तः । शीता लाङ्गलपद्धतिः । रामपत्नी च शीता । 'शीता नभःसरिति लाङ्गलपद्धतौ च शीता दशाननरिपोः सहधर्मिणी च । शीतं स्मृतं हिमगुणे च तदन्विते च शीतोऽलसे च बहुवारतरौ च दृष्टः' इति तालव्यादौ धरणिः । सीता दन्त्यादिरप्यस्ति । 'सीता लाङ्गलपद्धतिः । वैदेहीस्वर्गगङ्गासु' इति दन्त्यादौ मेदिनी । 'सीता लाङ्गलरेखा स्याद्व्योमगङ्गा च जानकी' इति दन्त्यादौ रभसकोशाच्च । **जेः** । जि जये, अस्मात् क्तप्रत्ययस्तस्योदात्तमुडागमः स्याद्दीर्घ इत्यनुवृत्त्या धातोर्दीर्घश्च स्यात् । इदं सूत्रमनार्षमिति केचित् । अत एव वृत्त्यादिग्रन्थे पृषोदरादिषु जीमूतशब्द उदाहृतः । 'जीमूतोऽद्रौ भूतिकरे देवताडे पयोधरे' इति मेदिनी । 'वेणी खरागरी देवताडो जीमूतः' इत्यमरः । 'जीमूतः स्याद् भृतिकरे शक्रेऽद्रौ घोषके घने' इति विश्वः । **लोष्ट** । लूञ् छेदने, पल गतौ, एतौ क्तान्तौ निपात्येते । 'लोष्टानि लेष्टवः पुंसि' इत्यमरः । अत्र पुंसीत्युभयान्वयि । तेन पुंनपुंसकलिङ्गो लोष्टशब्दः । तथा च 'स्थानेऽन्तरतमः' इति भाष्यम् । लोष्टः क्षिप्तो बाहुवेगं गत्वेत्यादि । अत एव 'लेष्टुः शकलेऽपि लोष्टः स्यात्' इति पुँल्लिङ्गकाण्डे बोपालितः । 'पलितं शैलजे तापे केशपाके च कर्दमे' इति मेदिनी । **हृश्या** । हृञ् हरणे, श्यैङ् गतौ । 'हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्' इति मेदिनी । 'शुक्लशुभ्रशुचि-

मत्स्ययोः'। लोहितं रक्तम्। ३७५ पिशेः किच्च। पिशितं मांसम्। ३७६ श्रुदक्षिस्पृहिगृहिभ्य आय्यः। श्रवाय्यो यज्ञपशुः। दक्षाय्यो गरुडो गृध्रश्च। स्पृहयाय्यः। गृहयाय्यो गृहस्वामी। ३७७ दिधिषाय्यः। दधातेर्द्वित्वमित्वं षुक्च। 'मित्र इव यो दिधिषाय्यः'। ३७८ वृञ एण्यः। वरेण्यः। ३७९

न्प्रत्यय इत्यर्थः। श्येन इति। इतनि आद्गुणः। वर्णभेदाविति। 'पालाशो हरितो हरित्' 'शुक्लशुभ्रशुचिश्वेत' इति चामरः। रुहे रश्च लो वा। रुह बीजजन्मनि, अस्मादितन् स्यात्। धातुसंबन्धिरेफस्य लकारो वेत्यर्थः। रोहित इति। 'रोहिताश्चमरो मृगाः' 'रोहितो मद्गुरः शालः' 'लोहितो रोहितो रक्तः' इति चामरः। पिशेः किच्च। पिश अवयवे, अस्मादितन् स्यात् स च किदित्यर्थः। पिशितमिति। कित्त्वान्न लघूपधगुणः। श्रुदक्षिस्पृहिगृहिभ्य आय्यः। श्रु श्रवणे, दक्ष वृद्धौ, स्पृह हिंसायाम्, गृहू ग्रहणे, एभ्य आय्यप्रत्ययः स्यात्। अत्र 'स्पृहिगृहि-' इति ण्यन्तौ। ताभ्यामाय्यप्रत्यये अयामन्तेति णेरयादेश इति भावेनो-दाहरति स्पृहयाय्य इति दिधिषाय्यः। इत्थं निपात्यत इत्यर्थः। निपातनप्रकार-मेवाह दधातेरिति। डु धाञ् धारणपोषणयोरित्यस्मादाय्यप्रत्ययः द्वित्वमाकार-स्येत्वं षुक् च निपात्यत इत्यर्थः। दिधिषाय्य इति प्रयोगस्थलमाह मित्र इवेति। वृञ एण्यः। वृञ् वरणे, अस्माद् एण्यप्रत्ययः। गुणे वरेण्य इति रूपम्।

श्वेतविशदश्येतपाण्डराः' इत्यमरः। रुहेः। रुह बीजजन्मनि प्रादुर्भावे च। अस्मादितन्। 'रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने। पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे' इति मेदिनी। 'लोहितं रक्तगोशीर्षकुङ्कुमाजिकुचन्दने। पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति' इति च। पिशेः। पिश अवयवे। अयं दीपनायामपि। अस्मादिनन्स्यात्स च कित्। पिशितं मांसम्। 'मांसी स्त्री' इति मेदिनी। मांसी जटमांस्याम्। तथा च 'जटा च पिशिता पेशी' इति धन्वन्तरिः। श्रुदक्षि। श्रु श्रवणे, दक्ष वृद्धौ, स्पृह ईप्सायाम्, गृहू ग्रहणे, चुरादावदन्तौ। 'उग्रतस्त्वे भवसि श्रवाय्यः' इति मन्त्रे श्रवाय्यो मन्त्रैः श्रवणीय इति वेदभाष्यम्। 'दक्षाय्यो यो दम आस नित्यः' इत्यादिष्वपि यौगिकार्थ एव भाष्ये पुरस्कृतः। स्पृहयाय्यः। दिधिषाय्य इति। डुधाञ् धारणपोषणयोः। 'अयामन्ता-' इति णेरयादेशः। एवं गृहयाय्य इति। उज्ज्वलदत्तस्तु दिधिषाय्य इति सूत्रं पठित्वा दिधिपूर्वा-त्स्यतेराय्यः, षत्वं च। दधिषाय्यो घृतमिति व्याख्यत्। दशपादीवृत्तिकारस्तु धिषु शब्दे अस्य द्वित्वं गुणाभावः अत्वं चाभ्यासस्य निपात्यत इत्याह, प्रसादकारादयोऽप्ये-वमेवाहुस्तदेतत्सर्वं प्रामादिकम्। 'मित्र इव यो दिधिषाय्योऽभूत्' इति वैदिक-

स्तुवः क्सेय्यश्छन्दसि । 'स्तुषेय्यं पुरुवर्चसम्' । ३८० राजेरन्यः । राजन्यो वह्निः । ३८१ शृरम्योश्च । शरण्यम् । रमण्यम् । ३८२ अर्तेर्निच्च । अरण्यम् । ३८३ पर्जन्यः । 'पृषु सेचने' षस्य जः । 'पर्जन्यः शक्रमेघयोः' । ३८४ वदेरान्यः । 'वदान्यस्त्यागिवाग्मिनोः' । ३८५ अमिनक्षियजि-

---

'मुख्यवर्यवरेण्याश्च' इत्यमरकोशः । **स्तुवः क्सेय्यश्छन्दसि** । ष्टुञ् स्तुतौ, अस्मात् छन्दसि क्सेय्यप्रत्यय इत्यर्थः । **स्तुषेय्यमिति** । कित्वान्न गुणः, प्रत्ययावयवत्वात्षत्वम् । **राजेरन्यः** । राजृ दीप्तौ, अस्मादन्यप्रत्ययः । **राजन्यो वह्निरिति** । 'मूर्धाभिषिक्तो राजन्यः' इति क्षत्रियवाची तु 'राजश्वशुराद्यत्' इति यत्प्रत्यये बोध्यः । **शृरम्योश्च** । शॄ हिंसायाम्, रमु क्रीडायाम्, आभ्यामन्यप्रत्ययः स्यात् । **शरण्यं रमण्यमिति** । रषाभ्यामिति णत्वम् । **अर्तेर्निच्च** । ऋ गतौ अस्मादन्यप्रत्ययः, स च निदित्यर्थः । नित्त्वं स्वरार्थम् । **अरण्यमिति** । अन्यप्रत्यये गुण इति भावः 'अटव्यरण्यं विपिनम्' इत्यमरः । **पर्जन्यः** । इत्थं निपात्यत इत्यर्थः । निपातनमेवाह **पृषु सेचन इति** । अस्मादन्यप्रत्ययः, षकारस्य जकारः, लघूपधगुण इति भावः । जकारेण व्यवधानान्न णत्वम् । **वदेरान्यः** । वद व्यक्तायां वाचि, अस्मादान्यप्रत्यय इत्यर्थः । **वदान्य इति** । 'स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे' इत्यमरः । **अमिनक्षियजिवधिपतिभ्योऽत्रन्** । अम गत्यादिषु, नक्ष

प्रयोगाद्विधिषाय्य इत्येव सूत्रं युक्तमिति प्रामाणिकाः । **वृञः** । वृञ् वरणे । वरेण्यः श्रेष्ठः । **स्तुवः** । ष्टुञ् स्तुतौ । स्तुषेय्यं स्तोतव्यम् । पुरुवर्चसं बहुरूपमिति वेदभाष्यम् । स्तुवः केय्य इति पठित्वा कित्वाद् गुणाभावे उवङि सति स्तुवेय्यः पुरन्दर इत्युदाहरन् उज्ज्वलदत्तस्तु उदाहृतश्रुतितद्भाष्यादिविरोधादुपेक्ष्यः । तस्मादिह क्सेय्यप्रत्ययं पठन् दशपादीवृत्तिकृदेव ज्यायानित्याहुः । **राजेः** । राजृ दीप्तौ । क्षत्रियजातौ तु 'राजश्वशुराद्यत्—' इति यत्प्रत्यये राजन्य इत्यन्तस्वरितः— । **शृरम्योः** । शॄ हिंसायाम्, रमु क्रीडायाम् आभ्यामन्यः स्यात् । **अर्तेः** । ऋ गतौ । अस्मादन्यः स च नित् । 'अटव्यरण्यं विपिनम्' इत्यमरः । **पर्जन्यः** । पृषु सेचने षस्य जः । 'पर्जन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः' इति मेदिनी । **वदेः** । वद व्यक्तायां वाचि । अजयकोशस्थमाह **वदान्य इति** । **अमिनक्षि** । अम गत्यादिषु, नक्ष गतौ, यज देवपूजादौ, वध हिंसायाम्, पत्लृ गतौ । **नक्षत्रमिति** । 'नभ्राण्नपात्—' इति सूत्रे नञः प्रकृतिभावेन नक्षत्रमिति साधितं तत्तु व्युत्पत्त्यन्तरमिति बोध्यम् । यजत्रमग्निहोत्रमिति प्राञ्चः । वस्तुतस्तु यजत्रो यष्टव्यदेवता । 'संते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि' इति मन्त्रे तथैव व्याख्यातत्वात् । अमरकोशस्थ-

जिवधिपतिभ्योऽत्रन् । अमत्रं भाजनम्। नक्षत्रम् । यजत्रः । वधत्रमायुधम्। पतत्रं तनूरुहम्। ३८६ **गडेरादेश्च कः**। कडत्रम् । डलयोरेकत्वस्मरणात्कलत्रम्। ३८७ **वृञश्चित्**। वरत्रा चर्ममयी रज्जुः। ३८८ **सुविदेः कत्रः**। 'सुविदत्रं कुटुम्बकम्'। ३८९ **कृतेर्नुम्च**। कृन्तत्रं लाङ्गलम्। ३९० **भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच्**। दशभ्योऽतच्स्यात्। भरतः। मरतो मृत्युः। 'दर्शतः सोमसूर्ययोः'। यजतः ऋत्विक्। पर्वतः।

गतौ, यज देवपूजादौ, वध हिंसायम्, पत्लृ गतौ, एभ्यः अत्रन्प्रत्यय इत्यर्थः। यद्यपि तत्पुरुषप्रकरणे 'नभ्राण्नपात्' इति सूत्रेण नक्षत्रमिति साधितम्, तथापि तद्व्युत्पत्त्यन्तरमिति बोध्यम्। **गडेरादेश्च कः**। गड सेचने, अस्मादत्रन् स्यात्, आदेर्गकारस्य ककारश्चेत्यर्थः। **कडत्रमिति**। गकारस्य ककारे रूपम्। ननु कथं कलत्रमिति प्रयुज्यत इत्याशङ्क्याह **डलयोरिति**। 'कलत्रं श्रोणिभार्ययोः'। **वृञश्चित्**। वृञ् वरणे, अस्मादत्रन् चित्स्यादित्यर्थः। चित्त्वं स्वरार्थम्। **वरत्रेति**। अत्रनि धातोर्गुणः। 'नध्री वध्री वरत्रा च' इत्यमरः। **सुविदेः कत्रन्**। सावुपपदे विद ज्ञाने इत्यस्मात् कत्रन्नित्यर्थः। **सुविदत्रमिति**। कित्त्वान्न लघूपधगुणः। **कृतेर्नुम् च**। कृती छेदने, अस्मात् कत्रन् स्यात्, धातोर्नुमागमश्च। **कृन्तत्रमिति**। नुमि रूपम्। **भृमृदृशियजि**। भृञ् भरणे, मृङ् प्राणत्यागे, दृशिर् प्रेक्षणे, यज देवपूजादौ, पर्व पूरणे, डु पचष् पाके, अम गत्यादिषु, तमु काङ्क्षायम्, णम प्रह्वत्वे शब्दे,

---

माह **पतत्रं चेति**। **गडेः**। गड सेचने, अस्मादत्रन्त्यादेर्गकारस्य ककारादेशश्च। 'कलत्रं श्रोणिभार्ययोः' इत्यमरः। **वृञः**। वृञ् वरणे अस्मादत्रन् चित्स्यात् चित्त्वादन्तोदात्तः। 'नध्री वध्री वरत्रा स्यात्' इत्यमरः। 'वरत्रायां दावानह्यमानः' इत्यादौ चित्स्वरः स्पष्टः। **सुविदेः कत्रः**। विद ज्ञाने। इह कत्रन्निति नित्त्वं केचित्पठन्ति तत्प्रामादिकम्। 'बृहस्पतेः सुविदत्राणि राध्या' इत्यादौ नित्स्वरादर्शनात्। कृदुत्तरपदप्रकृतिस्वरेण प्रत्ययस्वरस्यैव दर्शनाच्चेत्याहुः। **कृतेः**। कृती छेदने, अस्मात्कत्रः स्याद्धातोर्नुमागमश्च। 'धन्व च यत्कृन्तत्रं च' इति मन्त्रे कृन्तत्रं कर्तनीयमरण्यमिति वेदभाष्यम्। **भृमृ**। भृञ् भरणे, मृङ् प्राणत्यागे, दृशिर् प्रेक्षणे, यज देवपूजादौ, पर्व पूरणे, डुपचष् पाके, अम गतौ, तमु काङ्क्षायाम्, णम प्रह्वत्वे शब्दे च, हर्य गतिकान्त्योः। दशपाद्यां तु मृदृशीङिति पठित्वा दृङ् आदरे ध्रियते दरतः शेते शयत इत्युदाहृतम्। तन्न। 'दृशान्तमग्निं दर्शतं बृहन्तम्', 'तरणिर्विश्वदर्शतः' 'दैव्यो दर्शतो रथः' इत्यादिमन्त्रैस्तद्भाष्येण च विरोधात्। 'भरतो नाट्यशास्त्रे

पचतोऽग्निः । अमतो रोगः । तमतस्तृष्णापरः । नमतः प्रह्वः । हर्यतोऽश्वः । **३९१ पृषिरञ्जिभ्यां कित्** । पृषतो मृगो बिन्दुश्च । रजतम् । **३९२ खलतिः** । स्खलतेः सलोपः । अतच्प्रत्ययान्तस्येत्वं च । खलतिर्निष्केशशिराः । **३९३ शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः** । सप्तभ्योऽथः स्यात् । शयथोऽजगरः । शपथः । रवथः कोकिलः । गमथः पथिकः पन्थाश्च । वञ्चथो धूर्तः । वन्दीति पाठे कर्मणि कर्तरि वा प्रत्ययः । वन्दते वन्द्यते वा वन्दथः स्तोता स्तुत्यश्च । जीवथः आयुष्मान् । प्राणथो बलवान् । बाहुलकाच्छमिदमिभ्याम् । 'शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः' । **३९४ भृञश्चित्** । भरथो

हर्य गतिकान्त्योः, एभ्योऽतच् प्रत्यय इत्यर्थः । **पृषिरञ्जिभ्यां कित्** । पृषु सेचने, रञ्ज रागे, आभ्यामतच् कित्स्यात् । 'पृषन्ति बिन्दुपृषताः' इत्यमरः । **खलतिः** । इत्थं निपात्यत इत्यर्थः । निपातनप्रकारमाह **स्खलतेरिति** । स्खल संचलन इत्यस्मादिति भावः । अस्मादतच्प्रत्ययेऽन्त्यस्याकारस्येत्वं च निपात्यत इत्यर्थः । **शीङ्शपिरुगमि** । शीङ् स्वप्ने, शप आक्रोशे, रु शब्दे, गम्लृ गतौ, वञ्चु गतौ, जीव प्राणधारणे, प्रपूर्वः अन प्राणने, एभ्योऽथप्रत्ययः स्यादित्यर्थः । **शयथ इति** । गुणेऽयादेशः । **प्राणथ इति** । 'अनितेः' इति णत्वम् । **भृञश्चित्** । डु भृञ् धारणपोषणयोरस्मादथप्रत्ययः, स च चित् ।

मुनौ नटे । रामानुजे च दौष्यन्तौ' इति मेदिनी । **यजतः ऋत्विगिति** । उज्ज्वलदत्ताद्यनुरोधेनैवमुक्तम् । वेदभाष्ये तु 'हिरण्यश्मश्रुं यजतो बृहन्तम्' इत्यादिषु यजतशब्दो यष्टव्यपरतया व्याख्यातः । 'पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः । देवमुन्यन्तरे शैले' इति मेदिनी । **हर्यतोऽश्व इति** । 'परि त्यं हर्यतं हरिम्' 'आहर्यताय धृष्णवे' इत्यादिमन्त्रेषु हर्यतः सर्वैः स्पृहणीय इति वेदभाष्यम् । **पृषि** । पृषु सेचने, रञ्ज रागे, आभ्यामतच् कित्स्यात् । 'पृषन् मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना । अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी । 'रजतं त्रिषु शुक्ले स्यात् क्लीबे हारे च दुर्वर्णे' इति च । **खलतिः** । स्खल संचलने । **शीङ्शपि** । शीङ् स्वप्ने, शप आक्रोशे, रु शब्दे, गम्लृ गतौ, वञ्चु गतौ भ्वादिः, वञ्चु प्रलम्भने चुरादिः, जीव प्राणधारणे, अन प्राणने प्रपूर्वः । उज्ज्वलदत्तेनात्र वञ्चिजीवीति पठ्यते । अन्यैस्तु वञ्चिस्थाने वन्दिः पठ्यते । वञ्चथवन्दथयोरन्यतरं वेदादावुपलभ्यते बहुश्रुतैः पाठो निर्णेयः । **वन्दथ इति** । कर्मणि कर्तरि वा प्रत्ययः । **प्राणथ इति** । 'अनितेः' इति णत्वम् । **शमिदमिभ्यामिति** । शम उपशमे, दमु उपशमे । 'शमथः शान्तिमन्त्रिणोः' इति मेदिनी । 'दमथस्तु पुमान् दण्डे दमे च परिकीर्तितः'

लोकपालः । ३६५ रुदिविदिभ्यां ङित् । रोदितीति रुदथः शिशुः । वेत्तीति विदथः । ३६६ उपसर्गे वसेः । आवसथो गृहम्, संवसथो ग्रामः । ३६७ अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् । त्रयोदशभ्योऽसच्स्यात् । अततीत्यतसो वायुरात्मा च । अवतीत्यवसो राजा भानुश्च । चमन्त्यस्मिन्निति चमसः सोमपानपात्रम् । ताम्यत्यस्मिन्निति तमसोऽन्धकारः । नमसोऽनुकूलः । 'रभसो वेगहर्षयोः' । लभसो धनं याचकश्च । नभते नभ्यति वा नभस आकाशः । तपसः पक्षी चन्द्रश्च । पतसः पक्षी । 'पनसः कण्टकिफलः' । पणसः पण्यद्रव्यम् । महसं ज्ञानम् । ३६८ वेञस्तुट् च । बाहुलकादात्वाभावः । वेतसः ।

चित्त्वं स्वरविशेषार्थम् । **रुदिविदिभ्यां ङित्** । रुदिर् अश्रुविमोचने, विद ज्ञाने, आभ्यामथप्रत्ययो ङित्स्यात् । **रुदथ इति** । ङित्वान्न गुणः । **उपसर्गे वसेः** । उपसर्गे उपपदे वस निवासे अस्मादथः स्यात् । **आवसथ इति** । आङि उपपदे वसेः प्रत्ययः । **अत्यविचमितमि** । अत सातत्यगमने, अव रक्षणादौ, चमु अदने, तमु काङ्क्षायाम्, णम प्रह्वत्वे शब्दे, रभ राभस्ये, डु लभष् प्राप्तौ, णभ हिंसायाम्, तप सन्तापे, पत्लृ गतौ, पन व्यवहारे स्तुतौ च, पण च, मह पूजायाम्, एभ्योऽसच्प्रत्यय इत्यर्थः । **अतस इति** । 'अतसी स्यादुमा क्षुमा' इत्यमरः । गौरादित्वान्ङीष् । शेषं स्पष्टम् । **वेञस्तुट् च** ।

इति च । **भृञः** । डुभृञ् धारणपोषणयोः । अस्मादथः स्यात्स च चित् । **रुदि** । रुदिर् अश्रुविमोचने, विद ज्ञाने, आभ्यामथः स्यात्स च ङित् । 'विदथो योगिकृतिनोः' इति मेदिनी । अत्रोज्ज्वलदत्तो रुविदिभ्यां किदिति पठित्वा रौतीति रुवथः श्वेत्युदाजहार । दशपादीवृत्तिकारस्तु रुदिविदिभ्यां किदिति पपाठ । इह तु भाष्यानुरोधेन ङिदिति पठितम् । तथाहि 'गाङ् कुटादि–' सूत्रे के पुनश्चङदायः चङ्अङ्नजिङ्अथङ्नङः इति भाष्यम् । किदिति पठता तु अथङिति भाष्यं न सङ्गच्छेतेति दिक् । **उप** । वस निवासे, अस्मादुपसर्गे अथः स्यात् । उज्ज्वलदत्तेन तु सोपसर्गाद्वसेरिति पठितमन्यैस्तु आङि वसेरिति पठितम् । **अत्यवि** । अत सातत्यगमने, अव रक्षणादौ, चमु अदने, तमु काङ्क्षायाम्, णमु प्रह्वत्वे शब्दे च । रभ राभस्ये, डुलभष् प्राप्तौ, णभ तुभ हिंसायाम्, भ्वादौ क्र्यादौ चायम् । तप सन्तापे, पत्लृ गतौ, पण व्यवहारे स्तुतौ च, पन च, मह पूजायाम् । गौरादित्वाद् ङीष् । 'अतसी स्यादुमा क्षुमा' इत्यमरः । 'चमसो यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम्' इति मेदिनी । 'पनसः कण्टकिफले कन्दके वानरान्तरे । स्त्रियां रोगप्रभेदे स्यात्' इति च । **वेञः** । वेञ् तन्तुसन्ताने, अस्मादसच् स्यात्तस्य तुट् । दशपादीवृत्तौ तु

३९९ वहियुभ्यां णित् । वाहसोऽजगरः । यावसस्तृणसङ्घातः । ४०० वयश्च । वय गतौ । वायसः काकः । ४०१ दिवः कित् । दिवसम्, दिवसः । ४०२ कृशृशलिकलिगर्दिभ्योऽभच् । करभः । शरभः । शलभः । कलभः । गर्दभः ४०३ ऋषिवृषिभ्यां कित् । ऋषभः । वृषभः । ४०४ रुषेर्निल्लुक्च । रुष हिंसायाम्, अस्मादभच् निकित्स्यात्, लुषादेशश्च । 'लुषभो मत्तदन्तिनि'। ४०५ रासिवल्लिभ्यां च । रासभः । वल्लभः । ४०६ जृविशिभ्यां झच् ।

वेञ् तन्तुसन्ताने, अस्मादतसच् स्यात्, प्रत्ययस्य तुडागमश्चेत्यर्थः । ननु वेतस इति वक्ष्यमाणमसङ्गतम्, आदेच इत्यात्वस्य दुर्वारत्वादित्यत आह बाहुलकादिति । वहियुभ्यां णित् । वह प्रापणे, यु मिश्रणे, आभ्यामसच् प्रत्ययः, स च णिदित्यर्थः । वाहस इति । णित्त्वादुपधावृद्धिः । 'शयुर्वाहस इत्युभौ' इत्यमरः । यावस इति । णित्त्वाद् वृद्धिः । वयश्च । वय गतौ, अस्माद् असच्, स च णिदित्यर्थः । वायस इति । 'बलिभुग्वायसा अपि' इत्यमरः । दिवः कित् । दिवु क्रीडादौ अस्मादसच् कित्स्यात् । दिवस इति । कित्त्वान्न लघूपधगुणः । 'क्लीबे दिवसवासरौ' इत्यमरः । कृशृशलि । कॄ विक्षेपे, शॄ हिंसायाम्, शल गतौ, कल शब्दे, गर्द शब्दे, एभ्यः अभच्प्रत्यय इत्यर्थः । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । ऋषिवृषिभ्यां कित् । ऋषी गतौ, वृषु सेचने, आभ्यामभच् स्यात्, स च कित् । ऋषभ इति । कित्त्वान्न लघूपधगुणः । रुषेर्निल्लुष् च । रुष हिंसायामस्मादभच्, नित्कित्स्यात्, प्रकृतेर्लुषादेशश्च । रासिवल्लिभ्यां च । रासृ शब्दे,

---

'वियस्तुट् च' इति पठित्वा वी गतिप्रजनकान्त्यादिष्विति धातुरुदाहृतः । वहि । वह प्रापणे, यु मिश्रणादौ, 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः । 'वा तु क्लीबे दिवसवासरौ' इति च । यावस इति । असचो णित्त्वाद् वृद्धिः । दिवः । दिवु क्रीडादौ । कृशॄ । कॄ विक्षेपे, शॄ हिंसायाम्, शल गतौ, कल विलेखने, गर्द शब्दे । 'करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते' इति मेदिनी । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । 'शरभस्तु पशोर्भिदि' । करभो वानरभिदि' इति मेदिनी । 'समौ पतङ्गशलभौ' इत्यमरः । 'कलभः करिपोतकः' इति च । 'गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि । रासभे गर्दभी क्षुद्रजन्तुरोगप्रभेदयोः' इति मेदिनी । ऋषि । ऋषी गतौ, वृषु सेचने, आभ्यां अभच् स्यात्स च कित् । 'ऋषभस्त्वौषधान्तरे । स्वरभिद्वृषयोः कर्णरन्ध्रगर्दभपुच्छयोः । उत्तरस्थः स्मृतः श्रेष्ठे स्त्रीनराकारयोषिति । शूकशिम्ब्यां शिरालायां विधवायां क्वचिन्मता' इति मेदिनी । 'वृषभः

जरन्तो महिषः। वेशन्तः पल्वलम्। ४०७ रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि। रोहन्तो वृक्षभेदः। नन्दन्तः पुत्रः। जीवन्तः औषधम्। प्राणन्तो वायुः। षित्त्वान्ङीष्। रोहन्ती। ४०८ तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च। एभ्यो झच् स्यात्। स च षित्। तरन्तः समुद्रः। तरन्ती नौका। भवन्तः कालः। वहन्तो वायुः। वसन्तः ऋतुः। भासन्तः सूर्यः। साधन्तो भिक्षुः। गडेर्घटादित्वान्मित्वं ह्रस्वः। 'अयामन्त--' (सू २३११) इति णेरयः। गण्डयन्तो जलदः। मण्डयन्तो भूषणम्। जयन्तः शक्रपुत्रः।

वल्ल संवरणे, आभ्यामभच्प्रत्ययः, स च निदित्यर्थः। जृविशिभ्यां झच्। जॄ वयोहानौ, विश प्रवेशने, आभ्यां झच्प्रत्यय इत्यर्थः। जरन्त इति। 'झोऽन्तः' इति झकारस्यान्तादेशः। गुण इति भावः। एवं वेशन्त इत्यपि। 'वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका' इत्यमरः। रुहिनन्दिजीवि। रुह बीजजन्मनि, टु नदि समृद्धौ, जीव प्राणधारणे, प्रपूर्वः अन प्राणेन, एभ्यः आशिषि झच्, स च षिदित्यर्थः। रोहन्त इति। झस्यान्तादेशे उपधागुणे रूपम्। षित्त्वफलं दर्शयन् 'षिद्गौरादिभ्यश्च' इति ङीषि उदाहरणमाह रोहन्तीति। तृभूवहिवासि। तॄ प्लवनतरणयोः, भू सत्तायाम्, वह प्रापणे, वस निवासे, भास दीप्तौ, साध संसिद्धौ, गड सेचने, मडि भूषायाम्, जि जये, टु नदि समृद्धौ, एभ्यो झच् स्यात्, स च षिदित्यर्थः। तरन्त इति। झस्यान्तादेशः। षित्त्वफलं दर्शयितुमाह तरन्ती नौकेति। गण्डयन्त इति। गडि सेचने, अस्माद् ण्यन्तात् प्रत्ययः। ननु तर्हि णिचि उपधावृद्धिः कथं न श्रूयत इत्यत आह घटादय इति। मित्त्वे प्रकृते किमायातमित्यत आह ह्रस्व इति। मितां ह्रस्व इत्यनेनेत्यादिः। ननु 'णेरनिटि' इति णिलोपः स्यादित्यत आह अयामन्तेति। एवं मण्डयन्त

श्रेष्ठभूषयोः' इति च। रासिवल्लि। रासृ शब्दे वल्ल संवरणे। 'वल्लभो दयितेऽध्यक्षे सुलक्षणतुरङ्गमे' इति मेदिनी। जृविशि। जॄ वयोहानौ, विश प्रवेशने। 'वेशन्तः पल्वलं चाल्पसरः'। बाहुलकादर्हतेरपि झच्। 'अर्हन्तः क्षपणको जिनः' इति विक्रमादित्यकोशः। रुहि। रुह बीजजन्मनि प्रादुर्भावे च, टुनदि समृद्धौ, जीव प्राणधारणे, अन प्राणने प्रपूर्वः। एभ्य आशिषि झच् स च षिद्भवति। प्राणन्त इति। 'अनितेः' इति णत्वम्। तृभू। तॄ प्लवनतरणयोः, भू सत्तायाम्, वह प्रापणे, वस निवासे, भास दीप्तौ, साध संसिद्धौ, गड सेचने, मडि भूषायाम्, उभौ ण्यन्तौ। जि जये, टुनदि समृद्धौ, ण्यन्तः। नन्दयन्त इति। उज्ज्वलदत्तस्तु नन्दन्त इत्युदाहृत्य पूर्वसूत्रेण गतार्थतामाशङ्क्य अनाशीरर्थं नन्दिग्रहणमित्याह तच्चिन्त्यम्।

नन्दयन्तो नन्दकः। ४०९ हन्तेर्मुट् हि च। हेमन्तः। ४१० भन्देर्नलोपश्च। भदन्तः प्रव्रजितः। ४११ ऋच्छेररः। ऋच्छरा वेश्या। बाहुलकाज्जर्झरझर्झरादयः। ४१२ अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्। षड्भ्योऽरश्चित्स्यात्। अररं कपाटम्। कमरः कामुकः। भ्रमरः चमरः। देवरः। वासरः। ४१३ कुवः क्रन्। कुररः पक्षिभेदः। ४१४ अङ्गिमदिमन्दिभ्य आरन्।

इत्यपि। हन्तेर्मुट् हि च। हन हिंसागत्योः, अस्माज्झच्प्रत्ययः स्यात्, तस्य मुडागमः धातोर्हिशब्दादेशश्च। हेमन्त इति। धातोर्हिआदेशे गुणः। भन्देर्नलोपश्च। भदि कल्याणे अस्माज्झच् स्यात्। धातोरिदित्त्वाल्लब्धनकारस्य लोपश्चेत्यर्थः। भदन्त इति। नलोपे झस्यान्तादेशे च रूपम्। ऋच्छेररः। ऋच्छ गतौ, अस्मादरप्रत्यय इत्यर्थः। जर्झरझर्झरादिशब्दानामपि लोके प्रयोगदर्शनादाह बाहुलकादिति। अर्तिकमिभ्रमि। ऋ गतौ, कमु कान्तौ, भ्रमु अनवस्थाने, चमु अदने, दिवु क्रीडादौ, वस निवासे, एभ्यः अरप्रत्ययः स्यात् स च चिदित्यर्थः। चित्त्वं स्वरार्थम्। अररमिति। ऋधातोर्गुणे रूपम्। 'कवाटमररं तुल्ये' भ्रातर इत्यनुवृत्तौ 'स्वामिनो देवृदेवरौ' इति चामरः। कुवः क्रन्। कु शब्दे, अस्मात्क्रन्प्रत्ययः। ककारनकारावितौ। कुरर इति। कित्त्वान्न गुणः। 'उत्क्रोशकुररौ समौ' इत्यमरः। अङ्गिमदि। अगिमगि इति दण्डकपठितो गत्यर्थः अगिः, मदि

इहाप्याशिषीत्यस्य स्वयमेवानुवर्तितत्वात्। हन्तेः। हन हिंसागत्योरस्माद् झच् प्रत्ययः स्यात्तस्य मुडागमः, धातोर्हिरादेशश्च। भन्देः। भदि कल्याणे सुखे च। अस्माद् झच् स्याद्धातोर्नकारलोपश्च। ऋच्छेः। ऋच्छ गतौ। बाहुलकादिति। जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु। परिभाषणभर्त्सनयोरिति तुदादौ। 'जर्झरं शैवले शक्रध्वजे त्रिषु जरत्तरे। झर्झरः स्यात्कलियुगे वाद्यभेदे नदान्तरे' इति च मेदिनी। बाहुलकादेव झस्य जादेशे जर्झर इत्युज्ज्वलदत्तः। अर्तिकमि। ऋ गतौ, कमु कान्तौ, भ्रमु अनवस्थाने, चमु अदने, दिवु क्रीडादौ, वस निवासे, उभावपि ण्यन्तौ। 'अररं छदकपाटयोः' इति मेदिनी। 'कपाटमररं तुल्ये' इत्यमरः। 'भ्रमरः कामुके भृङ्गे' इति मेदिनी। 'चमरं चामरे स्त्री तु मञ्जरीमृगभेदयोः' इति च। चमरो मृगभेदः। देवरः पत्युः कनिष्ठभ्राता। वासर इति। केचित्तु सूत्रे वाशिभ्य इति तालव्यं पठित्वा वाश्ट शब्द इत्यस्मादरप्रत्यये वाशयत इति वाशरः कोकिल इत्याहुः। कुवः। कु शब्दे। अङ्गि। अगिर्गत्यर्थः, मदी हर्षे, मदि स्तुत्यादौ 'अङ्गार उल्मुके न स्त्री पुंल्लिङ्गस्तु महीसुते' इति मेदिनी। 'मन्दारः स्यात्सुरद्रुमे। पारिभद्रेऽर्कपर्णे च मन्दारो हस्तिधूर्तयोः' इति च। मदि स्तुत्यादावित्यस्माद्बाहुलकादारुरपि।

अङ्गारः। मदारो वराहः। 'मन्दारः पारिजातकः'। ४१५ गडेः कड च। कडारः। ४१६ शृङ्गारभृङ्गारौ। शृभृञ्भ्यामारन्नुम्गुग्घ्रस्वश्च। शृङ्गारो रसः। 'भृङ्गारः कनकालुका'। ४१७ कञ्जिमृजिभ्यां चित्। कञ्जिः सौत्रः। कञ्जारो मयूरः। मार्जारः। ४१८ कमेः किदुच्चोपधायाः। चिदित्यनुवृत्तेरन्तोदात्तः। कुमारः। ४१९ तुषारादयश्च। तुषारः। कासारः। सहार आम्रभेदः। ४२०

स्तुतिमोदादौ, मदी हर्षे, एभ्य आरन्स्यात्। अङ्गार इत्यादि। गडेः कड च। गड सेचने, अस्मादारन्प्रत्ययः स्यात्, कडादेशश्चेत्यर्थः। 'कडारः कपिलः पिङ्ग पिशङ्गौ कद्रुपिङ्गलौ' इत्यमरः। शृङ्गारभृङ्गारौ। एते निपात्येते। निपातनप्रकारमेवाह शृभृञ्भ्यामिति। शॄ हिंसायाम्, डु भृञ् धारणपोषणयोः, आभ्यामारन्प्रत्ययः, धातोर्नुम् ह्रस्वः, गुगागमश्च निपात्यत इत्यर्थः। शृङ्गारो रस इति। 'शृङ्गारः शुचिरुज्ज्वलः' इत्यमरः। 'भृङ्गारः कनकालुका' इति च। कञ्जिमृजिभ्यां चित्। कञ्जधातोर्धातुपाठेऽदर्शनादाह सौत्र इति। मृजू शुद्धौ। आभ्यामारन्प्रत्ययः, स च चिदित्यर्थः। मार्जार इति। मृजेर्वृद्धिः। 'ओतुर्बिडालो मार्जारः' इत्यमरः। कमेः किदुच्चोपधायाः। कमु कान्तौ, अस्मादारन्प्रत्ययः, स च कित्, उपधाया अकारस्य उकारश्चेत्यर्थः। कुमार इति। कित्वान्न गुणः। तुषारादयश्च। एते निपात्यन्ते। तुषार इति। तुष तुष्टौ, अस्मादारन् कित, कित्वान्न लघूपधगुणः।

'पारिभद्रे तु मन्दारुर्मन्दारः पारिजातकः' इति शब्दार्णवः। गडेः। गडि वदनैकदेशे, गड सेचने, अस्मादारन्प्रत्ययः स्यात्कडादेशश्च। 'कडारः कपिले दासे' इति मेदिनी। 'कडारः कपिलः पिङ्गः' इत्यमरः। शृङ्गारः। शॄ हिंसायाम्, डुभृञ् धारणपोषणयोः, एतौ निपात्येते। आभ्यामारन्नुम् गुग् ह्रस्वश्च। 'शृङ्गारः सुरते नाट्ये रसे च गजमण्डने। नपुंसकं लवङ्गेऽपि नागसंभवचूर्णयोः इति मेदिनी। भृङ्गारी भिल्लिकायां स्यात्कनकालौ पुनः पुमान्' इति च। कञ्जिः। मृजू शुद्धौ, चित्वादारन्प्रत्यय अन्तोदात्तः। 'कञ्जारो जठरे सूर्ये विरञ्चौ वारणे मुनौ' इति विश्वमेदिन्यौ। 'मार्जार ओतौ खट्वाङ्गे' इति च। 'ओतुर्बिडालो मार्जारः' इत्यमरः। कमेः। कमु कान्तौ, अस्मादारन्कित्स्यात्। 'कुमारः स्याच्छुके स्कन्दे युवराजेऽश्ववारके। बालके वरुणाद्रौ ना न द्वयोर्जात्यकावने। कुमारी शैलतनयावनकाल्योर्नदीभिदि। सहापराजिताकन्या जम्बुद्वीपेषु च स्त्रियाम्' इति मेदिनी। विश्वप्रकाशे तु 'कुमारी रामतरणी' इति पाठः। रामतरणी लताविशेषः। सहेति प्रसिद्धा। 'तरणी रामतरणी कर्णिका चारुकेसरा। सहा कुमारी गन्धाढ्या' इति धन्वन्तरिनिघण्टुः। 'जम्बू[illegible] कन्याः कुमार्योऽश्वा-श्ववारके। बालके कार्तिकेये च कुमारो भर्तृदारके' इति त्रिकाण्डशेषः। तुषारः।

दीङो नुट् च । दीनारः सुवर्णाभरणम् । ४२१ सर्तेरपः षुक्च । सर्षपः । ४२२ उषिकुटिदलिकचिखजिभ्यः कपन् । 'उषपो वह्निसूर्ययोः' । कुटपो मानभाण्डम् । दलपः प्रहरणम् । कचपं शाकपत्रम् । खजपं घृतम् । ४२३ क्वणेः संप्रसारणं च । कुणपम् । ४२४ कपश्चाक्रवर्मणस्य । स्वरे भेदः । ४२५ विटपपिष्टपविशिपोलपाः । चत्वारोऽमी कपन्प्रत्ययान्ताः । विट शब्दे, विटपः । विशतेरादेः पः, प्रत्ययस्य तुट् षत्वम्, पिष्टपम्-

---

कासार इति । कासृ शब्दकुत्सायां भ्वादिः, अस्मादारनि रूपम् । सहार इति । षह मर्षणे । 'कासारः सरसी सरः' इत्यमरः । दीङो नुट् च । दीङ् क्षये, अस्मादारन्, तस्य नुडागमश्च । किदित्यनुवर्तत एव । तस्मान्न गुणः । दीनार इति । 'दीनारेऽपि च निष्कोऽस्त्री' इत्यमरः । सर्तेरपः षुक् च । सृ गतौ, अस्मादपप्रत्ययः षुक् च धातोरागमः । सर्षप इति । प्रत्यये धातोर्गुणः । 'तन्तुभे सर्षपे तु' इत्यमरः । उषिकुटिदलि । उष दाहे, कुट कौटिल्ये, दल विदारणे, कच बन्धने, खज मन्थे, एभ्यः कपन्प्रत्ययः स्यात् । कनावितौ । उषप इति । कित्त्वान्न लघूपधगुणः । नित्त्वं स्वरार्थम् । । शेषं स्पष्टम् । क्वणेः संप्रसारणं च । क्वण शब्दे अस्मात्कपन् , धातुवकारस्य संप्रसारणं चेत्यर्थः । कुणपमिति । वकारस्य संप्रसारणे उकारे संप्रसारणाच्चेत्युकाराकारयोः पूर्वरूपे रूपम् । 'कुणपः शवमस्त्रियाम्' इत्यमरः । कपश्चाक्रवर्मणस्य । क्वणेः संप्रसारणमित्यनुवर्तते । चाक्रवर्मणस्य मते क्वणधातोः कपप्रत्ययः संप्रसारणं चेत्यर्थः । अत्रापि कुणपमित्येव रूपम् । ननु रूपे विशेषाभावात्किमर्थमयमित्यत आह स्वरे भेद इति । कपनि नित्स्वरः । अत्र तु नेति भेद इति भावः । विटपपिष्टप । एते निपात्यन्त इत्यर्थः । निपातनप्रकारमेवाह विट शब्द इति । अस्मात्कपन्प्रत्यय इति शेषः । कित्त्वान्न गुणः । पिष्टपे आह विशतेरिति । विश प्रवेशने इत्यस्मात् कपन्प्रत्ययः । कित्त्वान्न गुणः, आदेर्वकारस्य पकारः,

---

एते निपात्यन्ते । तुष तुष्टौ आरन् । 'तुषारस्तुहिनं हिमम्' इत्यमरः । कासृ शब्दकुत्सायाम् । 'कासारः सरसी सरः' इत्यमरः । सहार इति । षह मर्षणे । दीङो । दीङ् क्षये, अस्मादारन्, तस्य नुडागमश्च । सर्तेः । सृ गतौ अस्मादपः स्याद्धातोः षुगागमश्च । उषि । उष दाहे, कुट कौटिल्ये, दल विदारणे, कच बन्धने, खज मन्थे । क्वणेः । क्वण शब्दे । अस्मात्कपन् धातुवकारस्य संप्रसारणं च । 'कुणपः पूतिगन्धे......शवेऽपि च' इति मेदिनी । 'कुणपः शवमस्त्रियाम्' इत्यमरः । विटप । 'विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे । विटाधिपे ना' इति मेदिनी । विशतेरिति । विश प्रवेशने । आदेः प इति । एतच्च उज्ज्वलदत्तरीत्योक्तम् ।

भुवनम्। विशतेः प्रत्ययादेरित्त्वम्। विशिपं मन्दिरम्। वलतेः संप्रसारणम्। 'उलपं कोमलं तृणम्'। ४२६ वृतेस्तिकन्। वर्त्तिका वर्तिका। ४२७ कृतिभिदिलतिभ्यः कित्। कृत्तिका। भित्तिका भित्तिः। लत्तिका गोधा। ४२८ इष्यशिभ्यां तकन्। इष्टका। अष्टका। ४२९ इणस्तशन्तशसुनौ। एतशो ब्राह्मणः। स एव एतशाः। ४३० वीपतिभ्यां तनन्। वी गत्यादौ, वेतनम्।

प्रत्ययस्य तुडागमश्च निपात्यते इत्यर्थः। व्रश्चेति षत्वे ष्टुत्वे च रूपं सिध्यति। विशिपमित्यत्राह **विशतेरिति**। **वलतेरिति**। वल संवरणे इत्यस्मादित्यर्थः। **संप्रसारणमिति**। आदेर्वकारस्येत्यादिः। 'विष्टपं भुवनं जगत्' इत्यमरे विष्टपशब्दो वकारादिरेव पठ्यते, सूत्रं त्वन्यमतानुसारेण। 'गुल्मिन्युलप इत्यपि' इत्यमरः। **वृतेस्तिकन्**। वृतु वर्तने, अस्मात् तिकन्नित्यर्थः। **वर्त्तिकेति**। लघूपधगुणः। **वर्तिकेति**। हलो यमामिति यमस्तकारस्य लोपविकल्पः। **कृतिभिदिलतिभ्यः**। कृती छेदने, भिदिर् विदारणे, लतिः सौत्रः, एभ्यस्तिकन्प्रत्ययः स्यात्, स च किदित्यर्थः। **कृत्तिकेति**। कित्त्वान्न लघूपधगुणः। **इष्यशिभ्यां तकन्**। इष इच्छायाम्, अशू व्याप्तौ, आभ्यां तकन्प्रत्ययः, स च किदित्यर्थः। **इष्टकेति**। कित्त्वान्न गुणः। प्रत्ययस्थादिति इत्वं तु 'इष्टकेषीकामालानां चितूतलभारिषु' इति निर्देशान्न भवति। **अष्टकेति**। व्रश्चादिना षत्वं ष्टुत्वम्। 'अष्टका पितृदेवत्ये' इत्युक्तत्वान्नित्त्वम्। **इणस्तशन्तशसुनौ**। इण् गतावित्यस्मात् तशन् तशसुन् इति प्रत्ययौ स्त इत्यर्थः। **एतश इति**। गुणो नकार इत्। **एतशा इति**। तशसुन्प्रत्यये उकारनकारयोरित्संज्ञकत्वात् सान्तोऽयं शब्दः। अत्वसन्तस्येति दीर्घः। तशसुनि उकार उच्चारणार्थः। नकारो नित्स्वरार्थः। **वीपतिभ्यां तनन्**। वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु, पत्लृ गतौ, आभ्यां तनन्प्रत्यय इत्यर्थः। **वेतनमिति**। गुणः। 'भृत्या-

---

अन्ये तु सूत्रे विष्टपेति दन्त्यौष्ठ्यादिमेव पठन्ति। युक्तं चैतत्। 'यत्र ब्रध्नस्य विष्टपम्' इत्यादौ तथा दर्शनात्। अमरकोशेऽपि 'विष्टपं भुवनं जगत्' इति प्रचुरपाठाच्च। **वलतेः**। वल वल्ल संवरणे संचरणे च, 'उलपो न स्त्री गुल्मिन्यां ना तृणान्तरे' इति मेदिनी। **वृतेः**। वृतु वर्तने। **कृतिभिदि**। कृती छेदने, भिदिर् विदारणे, लतिः सौत्रो धातुः। **इष्यशि**। इष इच्छायाम्, अशू व्याप्तौ, आभ्यां तकन् कित्स्यात्। **इष्टकेति**। 'इष्टकेषीकामालानाम्–' इति निर्देशात् 'प्रत्ययस्थात्–' इति नेत्वम्। केचित्तु प्रत्ययस्थादितीत्वमिह न भवत्यनित्यत्वात्। तज्ज्ञापकं तु 'मृदस्तिकन्' इति इकारोच्चारणमित्याहुः। **इणस्त**। **एतशा इति**। 'अत्वसन्तस्य–' इति दीर्घः। एतशसौ। एतशसः। **वीपति**। पत्लृ गतौ। 'पत्तनं पुटभेदनम्' इति पुरीपर्यायेष्व-

पत्तनम्। ४३१ दृदलिभ्यां भः। दर्भः। 'दलभः स्यादृषिचक्रयोः'। ४३२ अर्तिगृभ्यां भन्। अर्भः। गर्भः। ४३३ इणः कित्। इभः। ४३४ असिसञ्जिभ्यां क्थिन्। अस्थि। सक्थि। ४३५ प्लुषिकुषिशुषिभ्यः क्सिः। प्लुक्षिर्वह्निः। कुक्षिः। शुक्षिर्वातः। ४३६ अशेर्नित्। अक्षि। ४३७ इषेः क्सुः। इक्षुः। ४३८ अवितृस्तृतन्त्रिभ्य ईः। 'अवीर्नारी रजस्वला'। तरीर्नौः। स्तरीर्धूमः। तन्त्रीर्वीणादेर्गुणः। ४३९ यापोः किद् द्वे च। ययीरश्वः। 'पपीः स्यात्सोमसूर्ययोः'। ४४० लक्षेर्मुट् च। लक्ष्मीः।

इत्युणादिषु तृतीयः पादः।

भृतयो भर्म वेतनम्' 'पत्तनं पुटभेदनम्' इति चामरः। दृदलिभ्यां भः। दृ विदारणे, दल विकसने, आभ्यां भप्रत्यय इत्यर्थः। दर्भ इति। काकासुरस्याक्षि दृणातीति दर्भः। कर्तरि भप्रत्ययः, गुणः। अर्तिगृभ्यां भन्। ऋ गतौ जुहोत्यादिः, गॄ निगरणे, आभ्यां भन्नित्यर्थः। अर्भ इति। गुणः। अर्भक इति तु संज्ञायां कनि बोध्यम्। इणः कित्। इण् गतौ, अस्माद्भन् कित्स्यात्। इभ इति। कित्वान्न गुणः। 'इभः स्तम्बेरमः पद्मी' इत्यमरः। असिसञ्जिभ्यां क्थिन्। असु क्षेपणे, षञ्ज सङ्गे, आभ्यां क्थिन्स्यात्। सक्थि इति। कित्वान्नलोपः कुत्वम्। प्लुषिकुषिशुषिभ्यः क्सिः। प्लुष दाहे, कुष निष्कर्षे, शुष शोषणे, एभ्यः क्सिः स्यात्। प्लुक्षिरित्यादौ कित्वाद् गुणाभावे 'षढोः–' इति कः। अशेर्नित्। अशू व्याप्तौ, अस्मात्क्सिन् नित्स्यात्। अक्षीति। व्रश्चेति षः, कत्वं षत्वम्। इषेः क्सुः। इष इच्छायाम्, अस्मात्क्सुः स्यादित्यर्थः। अवितृस्तृ। अव रक्षणादौ, तॄ प्लवनतरणयोः, स्तृञ् आच्छादने, तत्रि कुटुम्बधारणे, एभ्य ईप्रत्यय इत्यर्थः। अवीरिति। रजस्वलेत्यर्थः। यापोः किद्द्वे च। या प्रापणे, पा पाने, आभ्यां

मरः। दृदलि। दॄ विदारणे, दल विकसने। अर्तिगृ। ऋ गतौ, इयर्तीति अर्भः शिशुः। संज्ञायां कनि अर्भकः। 'गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके' इति मेदिनी। इणः। इण् गतौ, अस्माद्भन् कित्स्यात्। 'इभः स्तम्बेरमः पद्मी' इत्यमरः। असि। असु क्षेपणे, षञ्ज सङ्गे। 'कीकसं कुल्यमस्थि च' इत्यमरः। 'सक्थि क्लीबे पुमानूरुः' इति च। प्लुषि। प्लुष दाहे, कुष निष्कर्षे, शुष शोषणे। अशेः। अशू व्याप्तौ, अस्मात् क्सिन्नित्स्यात्। अक्षि नयनम्। इषेः। इष इच्छायाम्, इक्षुः, 'रसाल इक्षुः' इत्यमरः। अवि। अव रक्षणादौ, तॄ प्लवनतरणयोः, स्तृञ् आच्छादने, तत्रि कुटुम्बधारणे, चुरादिण्यन्तः। तरीरिति। 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः।

अथ उणादिषु चतुर्थः पादः।

४४१ वातप्रमीः। वातशब्द उपपदे माधातोरीप्रत्ययः, स च कित्। वातप्रमीः। अयं स्त्रीपुंसयोः। **४४२ ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजलिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः।**

ईप्रत्ययः कित्स्याद् धातोर्द्वित्वं च। **ययीरिति।** कित्त्वाद् 'आतो लोप इटि च' इत्यालोपः। **लक्षेर्मुट् च।** लक्ष दर्शनाङ्कनयोः, अस्मादीप्रत्ययः स्यात्, स च कित्, तस्य मुडागमश्च। अयं धातुश्चुरादिर्ण्यन्तः, अस्मादीप्रत्यये णिलोपः। 'लक्ष्मीः पद्मालया पद्मा' इत्यमरः। इत्युणादिषु तृतीयः पादः।

अथ चतुर्थः पादः। **वातप्रमीः।** इत्थं निपात्यत इत्यर्थः। निपातनमेवाह **वातशब्दे उपपदे इति। माङ्धातोरिति।** मा माने इत्यस्माद्धातोरिति भावः। **स च किदिति।** कित्त्वाद् 'अतो लोपः' इत्यालोपः। 'वातप्रमीर्वातमृगः' इत्यमरः। **अयमिति।** वातप्रमीशब्द इत्यर्थः। **ऋतन्यञ्जिवन्यञ्जि।** ऋ गतौ,

---

यापोः। या प्रापणे, पा पाने, आभ्यामीः कित्स्याद् द्वित्वं च धातोः। **लक्षेः।** लक्ष दर्शनाङ्कनयोश्चुरादिर्ण्यन्तः। अस्मादीप्रत्ययः स्यात्तस्य मुडागमो णिलोपश्च। 'लक्ष्मीः पद्मा विभूतिश्च'। 'कृदिकारात्-' इति ङीषि लक्ष्मी इत्यपि भवतीति रक्षितः। 'लक्ष्मीः संपत्तिशोभयोः। ऋद्ध्योषधौ च पद्मायाम्' इति मेदिनी।

इत्युणादिषु तृतीयः पादः।

माधातोरिति। मा माने, कित्त्वाद् 'आतो धातोः' इत्यालोपः। 'वातप्रमीर्वातमृगः' इत्यमरः। **अयमिति।** 'द्विचतुःषट्पदोरगाः' इत्यमरेण चतुष्पाद्वाचिनामुभयलिङ्गतोक्तेः। सुभूतिचन्द्रादिभिरपि वातप्रमीशब्दस्य द्विलिङ्गतोक्तेश्चेति भावः। तत्र 'कृदिकारात्-' इति पाक्षिको ङीष् कैश्चिदिष्यते। न च ह्रस्वादेव 'कृदिकारात्-' इति ङीष् भवति, न तु दीर्घादिति शङ्क्यम्। वर्णनिर्देशे कारप्रत्ययस्य विधानेन दीर्घादपि 'कृदिकारात्-' इति ङीषः संभवात्। अतएव वातप्रमीश्रीलक्ष्मीति पक्षे ङ्यन्ताः सुसाधव इति रक्षितः। एतच्च दुर्घटग्रन्थे स्पष्टम्। 'आशीराश्यहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिप्रियाम्' इति द्विरूपकोशः। अतएव 'आशीविषो विषधरः' इत्यमरकोशः संगच्छते। अश भोजने इत्यस्माद् 'इणजादिभ्यः' इति इणप्रत्यये उपधावृद्धौ 'कृदिकारात्-' इति ङीषः स्वीकाराद् आशीति च। 'आशीमिव कलामिन्दोः' इति राजशेखरः। 'आशीर्हिताशंसाहिदंष्ट्रयोः' इति सान्तेऽमरात्सान्तोऽप्याशीःशब्दोऽस्त्री-त्यन्यदेतत्। **ऋतनि।** ऋ गतौ, तनु विस्तारे, अञ्जू व्यक्त्यादौ, वनु याचने,

द्वादशभ्यः क्रमात्स्युः। अर्तेः क्लिच्, यण्। 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः'। तनोतेर्यतुच् तन्यतुर्वायू रात्रिश्च। अञ्जेरलिच् अञ्जलिः। वनेरिष्णुच् वनिष्णुः स्थविरान्त्रम्। अञ्जेरिष्ठच् अञ्जिष्ठो भानुः। अर्पयतेरिसन् अर्पिसोऽग्रमांसम्। मदेः स्यन्, मत्स्यः। अतेरिथिन्, अतिथिः। अङ्गेरलिः, अङ्गलिः। कौतेः असः, कवसः। अच इत्येके। कवचम्। यौतेरासः, यवासो दुरालभा। कृशेरानुक्, कृशानुः। ४४३ शः करन्। उत्तरसूत्रे किद्ग्रहणा-

---

तनु विस्तारे, अञ्जू व्यक्त्यादौ, वनु याचने, अञ्जू व्यक्त्यादौ, ऋ गतौ ण्यन्तः, मदी हर्षे, अत सातत्यगमने अगिवगिमगीति दण्डकपठितः अगिर्गत्यर्थः, कु शब्दे, यु मिश्रणे, कृश तनूकरणे, एषां द्वन्द्वात्पञ्चमी। क्लिच्, यतुच्, अलिच्, इष्णुच्, इष्ठच्, इसन्, स्यन्, इथिन्, उलि, अस, आस, आनुक्, एषां द्वन्द्वात्प्रथमा-बहुवचनम्। पूर्वोक्तेभ्यो द्वादशभ्यो धातुभ्य एते द्वादश प्रत्ययाः क्रमात्स्युः। **अर्तेः क्लिजिति**। ककारचकारावितौ, कित्त्वाञ्च गुणः, किंतु यणादेशे रत्निरिति रूपम्। रत्निशब्दार्थमाह **बद्धमुष्टिः करो रत्निरिति**। 'हस्तो मुष्ट्या तु बद्धया, स रत्निः स्यादरत्निस्तु' इत्यमरः। **अरत्निरिति**। न रत्निः अरत्निरिति नञ्समासे साधुः। शेषं स्पष्टम्। **शः करन्**। शॄ हिंसायामस्मात्करन्प्रत्यय इत्यर्थः।

अञ्जूः स एव, ऋ गतौ ण्यन्तः, मदी हर्षे, अत सातत्यगमने, अगि गत्यर्थः, कु शब्दे, यु मिश्रणे, कृश तनूकरणे। प्रसङ्गादाह **अरत्निरिति**। न रत्निः अरत्निरिति नञ्समासः। प्रसृताङ्गलिः स हस्तः अरत्निरित्यर्थः। दशपादीवृत्तौ तु क्लिजित्यत्र ककारमपठित्वा अर्तेरत्निचमकितं विधाय अरत्निः साधितः। उज्ज्वलदत्तानुसारेणाह **वायू रात्रिश्चेति**। तन्यतुः शब्दो मेघः अशनिश्चेत्यपि बोध्यम्। 'आविष्कृणोमि तन्यतुर्न वृष्टिम्' इति मन्त्रे तन्यतुर्गर्जितमिति, 'सृजा वृष्टिं न तन्यतुः' इति मन्त्रे तन्यतुर्मेघ इति 'उतस्मास्य तन्यतोरिव द्योः' इति मन्त्रे 'दिवश्चित्रं न तन्यतुम्' इति मन्त्रे च तन्यतुरशनिरिति वेदभाष्ये व्याख्यातत्वात्। 'अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च' इति मेदिनी। **स्थविरान्त्रमिति**। 'वनिष्ठोर्हृदयादधि' इति मन्त्रस्य भाष्ये तथोक्तत्वात्। **अञ्जिष्ठ इति**। केचिदञ्जेरिष्णुचमिच्छन्ति तेषामञ्जिष्णुरुदाहरणम्। **अर्पिस इति**। 'अर्तिह्री–' इत्यादिना पुक्। 'णेरनिटि' इति णिलोपः। **मदेरिति**। 'मत्स्यो मीनेऽथ पुंभूम्नि देशे' इति मेदिनी। 'अतिथिः कुशपुत्रे स्यात्पुमानागन्तुके त्रिषु' इति च। 'अङ्गलिः करशाखायां कर्णिकायां गजस्य च' इति च। कवसः सन्नाहः कण्टजातिश्च। **अच इति**। 'कवचो गर्दभाण्डे च संनाहे पर्पटेऽपि च' इति मेदिनी। **यौतेरिति**। 'दुरालभा कटुस्पर्शा यासो

दिह ककारस्य नेत्वम् । शर्करा । ४४४ पुषः कित् । पुष्करम् । ४४५ कलंश्च । पुष्कलम् । ४४६ गमेरिनिः । गमिष्यतीति गमी । ४४७ आङि णित् । आगामी । ४४८ भुवश्च । भावी । ४४९ प्रे स्थः । प्रस्थायी । ४५० परमे कित् । परमेष्ठी । ४५१ मन्थः । मन्थतेरिनिः

शर्करेति । करनि गुणे रूपम् । नन्वेतदयुक्तं करनः ककारस्य 'लशक्वतद्धिते' इतीत्संज्ञा दुर्वारा । न चोच्चारणसामर्थ्यात्काम्यजादाविव न लोपः, लोपाभावे च फलाभावादित्संज्ञापि नेति वाच्यम्, क्ङिति चेति निषेधसत्त्वेन गुणनिषेधसंपादकत्वेन साफल्यसंभवात् । तस्माद् इत्संज्ञा दुर्वारेत्यत्राह **उत्तरसूत्र इति** । उत्तरत्र पुषः किदिति पठ्यते । तत्र करन्नेवानुवर्तते । करनः कित्त्वं विधीयते । यद्यस्य ककारस्येत्त्वं स्यात्, तर्हि कित्त्वे स्वतः सिद्धे किमनेन कित्त्वविधानेन । एवं चात्रे-त्संज्ञा न भवतीत्यर्थः । **पुषः कित्** । **पुष्करमिति** । कित्त्वान्न लघूपधगुणः । **कलंश्च** । पुषः किदित्यनुवर्तते । कलन्प्रत्ययः । कित्स्यात् । **गमेरिनिः** । गम्लृ गतावित्यस्मादिनिप्रत्ययः । कस्मिन्नर्थे इत्याकाङ्क्षायामाह **गमिष्यतीति** । उत्तरकृदन्ते 'भविष्यति गम्यादयः' इति सूत्रं व्याख्यास्यते मूलकृता । अस्माभिश्चो-णादिनिरूपणात्प्रागेव निरूपितम् । तेन सूत्रेण भविष्यतीति नियमनादत्र भविष्यतीति लब्धम् । **आङि णित्** । आङि उपपदे गमेर्भविष्यति जायमान इनिप्रत्यय णिदित्यर्थः । णित्त्वादुपधावृद्धिः । **भुवश्च** । भू सत्तायाम् अस्मादिनिप्रत्ययः, स च णित्स्यादित्यर्थः । **भावीति** । णित्त्वाद् 'अचो ञ्णिति' इति वृद्धिः । अयमपि भविष्यदर्थ एव, गम्यादय इत्युक्तत्वात् । **प्रे स्थः** । प्रपूर्वात् ष्ठा गतिनिवृत्तावित्य-स्मादिनिप्रत्ययः, स च णित् । **प्रस्थायीति** । इनेर्णित्त्वाद् 'आतो युक्चिण्कृतोः' इति युक् । युकः कित्त्वेऽपि अजादित्वाभावान्नाकारलोपः । **परमे कित्** । परम-

---

धन्वयवासकः' इति धन्वन्तरिनिघण्टुः । 'कृशानुः पावकोऽनलः' इत्यमरः । **शः** । शॄ हिंसायाम् । 'शर्करा खण्डविकृतौ उपलाशर्करांशयोः । शर्करान्वितदेशे च रुग्भेदे शकलेऽपि च' इति मेदिनी । **पुषः** । पुष पुष्टौ, अस्मात्करन्स्यात्स च कित् । 'पुष्करं खेऽम्बुपद्मयोः । तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः । कुष्ठौषधिद्वीपतीर्थ-भेदयोश्च नपुंसकम् । ना रागनागविहगनृपभेदेषु वारुणौ' इति मेदिनी । **कलश्च** । पुष्यतेः कलन् स च कित् । 'पुष्कलस्तु पूर्णे श्रेष्ठे' इति हेमचन्द्रः । **गमेः** । गम्लृ गतौ । 'भविष्यति गम्यादयः' इत्याशयेनाह **गमिष्यतीति** । **आगामीति** । इनिप्रत्ययस्य णित्त्वादुपधावृद्धिः । आगमिष्यतीत्यर्थः । **भुवश्च** । भू सत्तायाम् । अस्मादिनिः स च णित्स्यात् । भविष्यतीति भावी । **प्रे स्थः** । ष्ठा गतिनिवृत्तौ

कित्स्यात्। कित्त्वान्नकारलोपः। मन्थाः मन्थानौ मन्थानः। ४५२ पतस्थ च। पन्थाः पन्थानौ। ४५३ खजेराकः। खजाकः पक्षी। ४५४ बलाकादयश्च। बलाका। शलाका। पताका। ४५५ पिनाकादयश्च।

शब्दे उपपदे स्थाधातोरिनिप्रत्ययः, स च कित्। परमेष्ठीति। इनेः कित्त्वादातो लोपः, 'हलदन्तात्सप्तम्याः–' इति परमे इत्यत्र सप्तम्या अलुक्। मन्थः। मन्थ विलोडने, अस्मादिनिप्रत्ययः किदित्यर्थः। कित्त्वाद्धातुनकारस्य लोपः। मथिन्शब्दः। मन्था इति। 'पथिमथि–' इत्यात्वम्। 'इतोऽत्सर्वनामस्थाने' इतीकारस्यात्वम्। 'थो न्थः' इति न्थादेशः। पतस्थ च। पत्लृ गतौ इत्यस्मादिनिः थकारश्चान्तादेश इत्यर्थः। पन्था इति। पथिन्शब्दः, पूर्ववत्प्रक्रिया। खजेराकः। खज मन्थे, अस्मादाकप्रत्य इत्यर्थः। 'दर्विः कम्बिः खजाका च' इत्यमरः। बलाकादयश्च। एते आकप्रत्ययान्ता निपात्यन्ते। अनेनैव सिद्धे 'खजेराक' इति पूर्वसूत्रं प्रपञ्चार्थम्।

प्रपूर्वादस्मादिनिः स च णित्। णित्त्वाद् 'आतो युक्–' इति युक्। प्रस्थायी गन्तुकामः। परमे। परमशब्दे उपपदे तिष्ठतेरिनिः कित्स्यात्। कित्त्वादातो लोपः। 'हलदन्तात्–' इत्यलुक्। 'परमेष्ठी पितामहः' इत्यमरः। मन्थः। मन्थ विलोडने। मन्था इति। 'पथिमथि–' इत्यात्वम्। 'इतोऽत्सर्वनामस्थाने'। 'मन्था मन्थनदण्डे च वज्रे चापेऽपि च स्मृतः'। पतः। पत्लृ गतावित्यस्मादिनिः स्थश्चान्तादेशः। पथे गतावित्यस्मात्पचाद्यचि आकारान्तोऽप्यस्ति। 'वाटः पथश्च मार्गश्च' इति सुभूतिचन्द्रः। 'त्वचि त्वचः किरोऽपि स्यात्किरौ प्रोक्तः पथः पथि' इति द्विरूपेषु विश्वः। इह ऋभवो देवाः क्षियन्त्यस्मिन्निति विग्रहे 'अन्येभ्योऽपि दृश्यते' इति डः। 'ऋभुक्षः स्वर्गवज्रयोः' इति विश्वः। ततो मत्वर्थीयेनिः। ऋभुक्षिन्निति नान्तं प्रातिपदिकम्। 'पथिमथि–' इत्यात्वे 'इतोऽत्–' इत्यत्वे च ऋभुक्षा इन्द्रः, ऋभुक्षाणौ ऋभुक्षाण इत्युज्ज्वलदत्तः। दशपाद्यां तु 'अर्तेः भुक्षिनक्' इति सूत्रमुपन्यस्य तस्य ऋभुक्षिनित्युदाहृतम्। 'ऋभुक्षिणमिन्द्रमाहुव ऊतये' इति मन्त्रस्य वेदभाष्ये तत्सूत्रमुदाहृतम्। अत्रायं विवेकः—इनिप्रत्ययान्ता इति मते अन्तोदात्तत्वं न्याय्यं प्रत्ययस्वरेण इनेरिकारस्योदात्तत्वात्। अवग्रहाभावो बाहुलकात्। द्वितीयमते त्ववग्रहाभावो न्याय्यः। परन्तु प्रत्ययस्वरेणोकारस्योदात्ततया भुक्षिनक्प्रत्ययान्तस्य मध्योदात्तत्वे प्रसक्ते बाहुलकादन्तोदात्तः स्वीकर्तव्य इति। खजेः। खज मन्थे। बलाका। बल प्राणने, शल गतौ, पत्लृ एते आकप्रत्ययान्ता निपात्यन्ते। 'बलाका बकपङ्क्तिः स्याद्बलाका बिसकण्ठिका। बलाका कामुकी प्रोक्ता बलाकश्च बको मतः' इति विश्वशाश्वतौ। 'शलाकाञ्जनयष्टिका। पताका वैजयन्त्यां च सौभाग्येऽङ्के ध्वजेऽपि च' इति विश्वः। 'पताका वैजयन्त्यां च

पातेरित्वं नुम् च । 'क्लीबपुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः' । तड आघाते, तडाकः । ४५६ **कषिदूषिभ्यामीकन्** । कषीका पक्षिजातिः । दूषीका । 'दूषिका नेत्रयोर्मलम्' । ४५७ **अनिहृषिभ्यां किच्च** । अनीकम् । हृषीकम् । ४५८ **चङ्कणः कङ्कणश्च** । 'कण शब्दे' अस्माद्यङ्लुगन्तादीकन्, धातोः कङ्कणादेशश्च । 'घण्टिकायां कङ्कणीका सैव प्रतिसरापि च' । ४५९ **शॄपॄवृञां द्वे रुक् चाभ्यासस्य** । शर्शरीको हिंस्रः । पर्परीको दिवाकरः ।

बलाकेति । बल प्राणने । **शलाकेति** । शम गतौ । **पिनाकादयश्च** । एते आक-प्रत्ययान्ता निपात्यन्त इत्यर्थः । निपातनप्रकारमाह **पातेरिति** । पा रक्षणे इत्यस्मादाक-प्रत्ययः, धात्वन्त्यस्य इत्वं नुमागमश्च धातोर्निपात्यत इत्यर्थः । अमरकोशमाह **क्लीबपुंसोः पिनाकः स्यादिति** । **कषिदूषिभ्यामीकन्** । कष हिंसायाम्, दुष वैकृत्ये आभ्यामीकन् **दूषीकेति** । ण्यन्तात्प्रत्ययः । 'दोषो णौ' इत्यूकार उपधायाः । अमरकोशस्थमाह । **दूषिकेति** । 'आः कीदृगक्षिमुनिलोचनदूषिकायाम्' इति मुरारिः । **अनिहृषिभ्यां किच्च** । अन प्राणने, हृष तुष्टौ, आभ्यामीकन्स्यात्स च किदित्यर्थः । **हृषीकमिति** । कित्त्वान्न गुणः । 'हृषीकं विषयीन्द्रियम्', इत्यमरः । **चङ्कणः कङ्कणश्च** । चङ्कण इति षष्ठी । कण निमीलने यङ्लुकि प्रत्ययलक्षण-माश्रित्य 'सन्यङोः' इति द्वित्वे, 'कुहोश्चुः' इत्यभ्यासककारस्य चकारे 'नुगतोऽनुना-सिकान्तस्य' इति नुकि अनुस्वारे परसवर्णे च चङ्कण् इति धातुः । तस्ये-त्यर्थः, अस्मादीकन्प्रत्ययः, धातोः कङ्कणादेशश्चेत्यर्थः । **कङ्कणीकेति** । **शॄपॄवृञां**

सौभाग्ये नाटकाङ्कयोः' इति मेदिनी । **पिनाका** । एते आकप्रत्ययान्ता निपात्यन्ते । पा रक्षणे, 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः' इति मेदिनी । अमरोक्तिमाह **क्लीबपुंसोरिति** । किं च पिष्लृ संचूर्णने, षकारस्य णत्वं धातोर्यगागमः । 'पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीकसिह्लके' इति इति मेदिनी । **कषि** । कष खषेति दण्डके हिंसार्थकः । दुष वैकृत्ये ण्यन्तः । 'दोषो णौ' इत्युपधाया ऊकारः । अमरो-क्तिमाह **दूषिकेति** । किं च अकृतेऽपि ईकनि दूषयतेः 'अच इः' इति इप्रत्यये दूषिः । 'कृदिकारात्–' इति ङीषि दूषी । उभाभ्यामपि स्वार्थे कनि दूषिका ह्रस्वमध्यैव । 'केऽणः' इति ङीषेऽपि ह्रस्वादेशात् । 'पिचण्डी दूषिका दूषी पिचाटं च दृशोर्मलम्' इति विक्रमादित्यकोशः । 'दूषिका तूलिकायां च मले स्याल्लोचनस्य च' इति मेदिनी । **अनिहृषि** । अन प्राणने, हृष तुष्टौ, आभ्यामीकन्स्यात् स च कित् । 'अनीकोऽस्त्री रणे सैन्येऽपि' इति मेदिनी । 'हृषीकं विषयीन्द्रियम्' इत्यमरः । **चङ्कणः** । कणधातोर्यङ्लुकि प्रत्ययलक्षणन्यायेन 'सन्यङोः' इति द्वित्वे 'कुहोश्चुः' इत्यभ्यासस्य

बर्बरीकः कुटिलकेशः । ४६० **फर्फरीकादयश्च** । स्फुर स्फुरणे, अस्मादीकन्, धातोः फर्फरादेशः । फर्फरीकं किसलयम् । दर्दरीकं वादित्रम् । झर्झरीकं शरीरम् । तित्तिडीको वृक्षभेदः । 'चरेर्नुम् च' (गण १९९)। चञ्चरीको

द्वे । शॄ हिंसायाम्, पॄ पालनपूरणयोः, वृञ् वरणे, एभ्य ईकन्प्रत्ययः, धातोर्द्वित्वं तदभ्यासस्य रुगागमश्च । **शर्शरीक इति** । शॄ इत्यस्य द्वित्वे उरदत्वे रपरत्वे हलादिशेषेण रेफनिवृत्तौ अनेन रुकि रूपम् । एवं पर्परीक इति । **फर्फरीकादयश्च** । निपातनमेवाः **स्फुर स्फुरण इति** । अस्मादीकनित्यर्थः । **दर्दरीकमिति** । दॄ विदारणे, अस्मादीकन् । धातोर्दर्दरादेशः । यद्वा, धातोर्द्वित्वं रुक् चाभ्यासस्य निपात्यते । **झर्झरीकमिति** । झॄष् वयोहानौ, अस्मादीकन् धातोर्झर्झरादेशः । यद्वात्रापि धातोर्द्वित्वं रुक् चाभ्यासस्य निपात्यत इति व्याख्येयम् । **तित्तिडीकमिति** । तिमधातोरीकनि धातोरन्त्यस्य डकारादेशे द्वित्वे अभ्यासस्य तुक् च निपात्यते । **चञ्चरीक इति** । चर गतिभक्षणयोः, अस्माद् ईकनि धातोर्द्वित्वम्

चुत्वे 'नुगतोऽनुनासिकान्तस्य' इति नुकि चञ्चरः । ङसिङसोरुत् चञ्चुरः । **धातोरिति** । चञ्चरित्यस्य । **शॄ पॄ** । शॄ हिंसायाम् , पॄ पालनादौ, वृञ् वरणे, एभ्य ईकन् एषां द्विर्वचनमभ्यासस्य रुगागमश्च । **शर्शरीक इत्यादि** । उरदत्वे रपरत्वम् । **फर्फरीका** । ईकन्नन्ता एते निपात्यन्ते । **फर्फरादेश इति** । एतच्चोज्ज्वलदत्तरीत्योक्तम्, वस्तुतस्तु धातोर्द्वित्वमुकारस्याकारः सलोपो रुक् चाभ्यासस्येति दशपाद्यां यदुक्तं तदेव न्याय्यम् । चरेर्नुम् चेत्युत्तरग्रन्थानुरोधेन द्वे रुक् चेत्याद्यनुवृत्तेर्न्याय्यत्वात् । **किसलयमिति** । 'नैतौशेवतुर्फरी पर्फरीका' इति मन्त्रस्य वेदभाष्ये तु त्रिफला विशरणे, पॄ पालनपूरणयोः, पर्व पुर्व पूरणे, एषामन्यतमस्य निपातनमिदमित्याश्रित्य शत्रूणां विदारयितारौ स्तोतॄणां पालकौ इष्टार्थस्य पूरयितारौ चेति व्याख्यातम् । **दर्दरीकमिति** । दॄ विदारणे, अस्मादीकन्धातोर्दर्दरादेशः । **झर्झरीकमिति** । झॄष् वयोहानौ अस्मादीकन्धातोर्झर्झरादेशः । वस्तुतस्तु दर्दरीकझर्झरीकावपि पर्फरीकवद्धातोर्द्वित्वं रुक् चाभ्यासस्येति व्याख्येयौ । उत्तरखण्डे ऋकारस्य गुणे रपरत्वम् । **तित्तिडीक इति** । तिमष्टीम आर्द्रीभावे मकारस्य डकारः अभ्यासस्य तुक् च । 'तिन्तिडी चिञ्चाम्लिका' इत्यमरे तु शब्दान्तरं बोध्यम् । तथा च 'तिन्तिडी त्वम्लिका चिञ्चा तित्तिडीका कपिप्रिया' इति वाचस्पतिः । 'अम्लीका चाम्लिका चिञ्चा तित्तिडीका च तिन्तिडा' इति चन्द्रः । 'अम्लीका चुक्रिका चुक्रा साम्ला शुक्राथ शुक्रिका । अम्लिका चिञ्चका चिञ्चा तिन्तिडीका सुतिन्तिडा' इति धन्वन्तरिनिघण्टुः । **चरेरिति** । चर गतिभक्षणयोरस्मादीकन् द्विर्वचनमभ्यासस्य

भ्रमरः। मर्मरीको हीनजनः। कर्करीका गलन्तिका। पुणतेः, पुण्डरीकं वादित्रम्। पुण्डरीको व्याघ्रोऽग्निर्दिग्गजश्च। **४६१ ईषेः किद्ध्रस्वश्च**। इषीका शलाका। **४६२ ऋजेश्च**। ऋजीक उपहतः। **४६३ सर्तेर्नुम् च**। सृणीका लाला। **४६४ मृडः कीकक्कङ्कणौ**। मृडीको मृगः। मृडङ्कणः शिशुः। **४६५ अलीकादयश्च**। कीकजन्ता निपात्यन्ते। 'अल भूषणादौ' अलीकं

अभ्यासस्य नुगागमश्च निपात्यते। **मर्मरीक इति**। मृङ् प्राणत्यागे, अस्मादीकनि धातोर्द्वित्वमभ्यासस्य रुक् च निपात्यते इत्यर्थः। एवं कर्करीकेति डु कृञ् करणे इत्यस्माद् बोध्यः। **पुणतेरिति**। पुण कर्मणि शुभे, अस्मादीकन्, तस्य रुगागमः, धातोर्डगागमश्च निपात्यत इत्यर्थः। **ईषेः किद् ध्रस्वश्च**। ईष गतौ, अस्मादीकन्, ह्रस्वश्च धातोः, प्रत्ययस्य कित्त्वं च। **इषीकेति**। कित्त्वाद् गुणाभावः। अत्र यद्यपि धातोर्ह्रस्वविधानसामर्थ्यादेव गुणाभावोऽपि सिध्यति, गुणे ईकारस्य इकारस्य चाविशेषात्, तथाप्युत्तरार्थमावश्यकमेव। **ऋजेश्च**। ऋज गतावित्यस्मादीकन्, स च किदित्यर्थः। **ऋजीक इति**। कित्त्वाद् गुणाभावः। **सर्तेर्नुम् च**। सृ गतौ, अस्मादीकन् कित्स्याद्धातोर्नुमागमश्च। **सृणीकेति**। नुमि णत्वं, कित्त्वान्न गुणः। **मृडः कीकच्कङ्कणौ**। मृड सेचने, अस्मादीकन्, धातोः कीकच् कङ्कण इत्यादेशौ च पर्यायेण स्त इत्यर्थः, मृडेः कीकीनः कङ्कणीन इति च रूपमिति केचिद्वदन्ति, तदसङ्गतमेव। किं त्वेतौ द्वावपि प्रत्ययौ। मृडीनः मृडङ्कण इति च रूपम्। **अलीका-**

नुमागमश्च। 'भ्रमरश्चञ्चरीकः स्याद्रोलम्बो मधुसूदनः। इन्दिन्दिरः पुष्पकीटो मधुपो मधुकेशयः' इति त्रिकाण्डशेषः। **मर्मरीक इत्यादि**। मृङ् प्राणत्यागे, डुकृञ् करणे, आभ्यामीकन् धातोर्द्वित्वम् अभ्यासस्य रुक्। 'कर्कर्यालुर्गलन्तिका' इत्यमरः। पुण कर्मणि शुभे, णस्य डः प्रत्ययस्य रुडागमश्च। 'पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि च' इति मेदिनी। **इषेः**। ईष गतावस्मादीकन् ह्रस्वश्च कित्त्वाद् गुणाभावः। ह्रस्वविधानसामर्थ्यादेव गुणाभावे सिद्धेऽप्युत्तरार्थं कित्त्वमित्याहुः। 'इषीका स्यादीषिकापि वानायुजवनायुजौ' इति द्विरूपकोशः। **ऋजेः**। ऋज गतौ। **सर्तेः**। सृ गतावस्मादीकन्स्याद्धातोर्नुमागमश्च। 'सृणिका स्यन्दिनी लाला' इत्यमरः। **मृडः कीकच्**। मृड सुखने। मृडः कीकन्नित्युज्ज्वलदत्तादिपाठः प्रामादिकः, मृडीकशब्दस्य चित्स्वरेणान्तोदात्तत्वात्। 'मृळीके अस्य सुमतौ स्याम' इत्यादौ चित्स्वरस्यैव दर्शनात्। **अलीकाद**। 'अलीकमप्रियेऽपि स्याद्दिव्यसत्ये नपुंसकम्' इति मेदिनी। 'अलीकमप्रिये प्रोक्तमलीकममृते दिवि' इति विश्वः। 'अलीकमप्रिये भाले वितथे' इति हेमचन्द्रः। तथा

मिथ्या । विप्रर्यव्यलीकं विप्रियं खेदश्च । 'वलीकं पटलप्रान्ते' इत्यादि । ४६६ **कॄतॄभ्यामीषन्** । 'करीषोऽस्त्री शुष्कगोमये' । तरीषः तरिता । ४६७ **शॄपॄभ्यां किच्च** । शिरीषः पुरीषम् । ४६८ **अर्जेर्ऋज च** । ऋजीषं पिष्टपचनम् । ४६९ **अम्बरीषः** । अयं निपात्यते । अबि शब्दे । 'अम्बरीषः पुमान्भ्राष्ट्रम्' । अमरस्तु 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' । ४७० **कॄशॄपॄकटिपटिशौटिभ्य ईरन्** ।

दयश्च । एते कीकनन्ता निपात्यन्त इत्यर्थः । **वलीकमिति** । वल संवरणे इत्यस्मात् प्रत्ययः । **कॄतॄभ्यामीषन्** । कॄ विक्षेपे, प्लवनतरणयोः तॄ प्रसिद्धः, आभ्यामीषन्प्रत्यय इत्यर्थः । **करीष इति** । 'तत्तु शुष्कं करीषोऽस्त्री' इत्यमरः । **शॄपॄभ्यां किच्च** । शॄ हिंसायाम्, पॄ पालनपूरणयोः, स च किदित्यर्थः । **शिरीषमिति** । ऋत इद्धातोः' इति इत्त्वम् । **पुरीषमिति** । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । **अर्जेर्ऋज च** । अर्ज अर्जने, अस्मादीषन्, स च कित्, धातोः ऋजादेशश्च । **ऋजीषमिति** । 'ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनम्' इत्यमरः । **अम्बरीषः** । निपातनप्रकारमेवाह **अबि शब्दे इति** । इदित्वान्नुमि अम्ब, अस्माद् ईषनि अरुडागमो निपात्यत इत्यर्थः । अमरकोशमाह **क्लीबेऽम्बरीषमिति** ।

चाभियुक्तैः प्रयुज्यते—'ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च । नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतां च न संत्यजन्ति' इति । इहालीकलग्नाः भाललग्नाः अप्रिये लग्ना इत्याद्यर्थो यथायोग्यं बोध्यः । 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने । ना नागरे' इति मेदिनी । वल संवरणे, 'वलीकनीध्रे पटलप्रान्ते' इत्यमरः । वलतेर्मुडागमे वल्मीकम् । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । वहतेर्वृद्धिश्च । वाहीको गौरश्वश्च । सुप्रपूर्वादिणस्तुट् च । सुप्रतीकः । शाम्यतेः शमीक ऋषिः । एवमन्येऽप्यूह्या इत्याशयेनाह **इत्यादीति** । **कॄतॄ** । कॄ विक्षेपे, तॄ प्लवनतरणयोः । **शॄपॄ** । शॄ हिंसायाम्, पॄ पालनादौ, आभ्यामीषन् कित्स्यात् । ऋत इद्धातोः' इति इत्वे रपरत्वम् । शिरीषो वृक्षभेदः । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । 'गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियाम्' इत्यमरः । **अर्जेः** । अर्ज षर्ज अर्जने, अस्मादीषन् कित्स्याद् धातोर्ऋजादेशश्च । अमरोक्तिमाह **ऋजीषमिति** । किं च उद्धृतरसः सोमलतायाः शेषोऽपि ऋजीषम् । एतच्च 'ऋजीषिणं वृषणंसश्चत श्रिये' 'आसत्यो यातु मघवाँऋजीषी' इत्यादिमन्त्रे भाष्ये स्पष्टम् । **अयमिति** । ईषन् प्रत्ययस्तस्य अरुडागमश्चेत्यर्थः । बोपालितोक्तिमाह **अम्बरीषमिति** । 'क्लीबेऽम्बरीषं भ्राष्ट्रे ना' इत्यमरः । 'अम्बरीषो रणे भ्राष्ट्रे क्लीबं पुंसि नृपान्तरे । नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातकेऽनुपाते च'

---

१ 'वलीकनीध्रे पटलप्रान्ते' इति क्वचित् पाठः ।

करीरो वंशाङ्कुरः। शरीरम्। परीरं फलम्। कटीरः कन्दरो जघनप्रदेशश्च। पटीरश्चन्दनः कण्टकः कामश्च। 'शौटीरस्त्यागिवीरयोः'। ब्राह्मणादित्वात् ष्यञ्। शौटीर्यम्। ४७१ **वशेः कित्।** उशीरम्। ४७२ **कशेर्मुट् च।** कश्मीरो देशः। ४७३ **कृञ उच्च।** कुरीरं मैथुनम्। ४७४ **घसेः किच्च।** क्षीरम्। ४७५ **गभीरगम्भीरौ।** गमेर्भः। पक्षे नुम् च। ४७६ **विषा विहा।**

कृशॄपॄकटिपटिशौटिभ्य ईरन्। कॄ विक्षेपे, शॄ हिंसायाम्, पॄ पालनपूरणयोः, कटे वर्षावरणयोः, पट भाषार्थः, शौटृ गर्वे, एषां द्वन्द्वात्पञ्चमी। एभ्य ईरन्प्रत्ययः स्यात्। **करीर इति।** 'वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना' इत्यमरः। **पटीर इति।** **वशेः कित्।** वश कान्तौ, अस्मादीरन् कित्स्यात्। **उशीरमिति।** कित्त्वात्संप्रसारणम्। **कशेर्मुट् च।** कशधातुः सौत्रः, तस्मादीरन् स्यात् तस्य मुडागमश्च। **कृञ उच्च।** डु कृञ् करणे, अस्मादीरन्स्याद् धातोरन्त्यस्य उकार आदेशश्च रपरो भवतीत्यर्थः। **कुरीरमिति।** उत्वं रपरत्वम्। **घसेः किच्च।** घस्लृ अदने, अस्मादीरन्स्यात्, स च कित्। **क्षीरमिति।** गमहनेत्युपधालोपे खरि चेति चर्त्वे षत्वम्। **गभीरगम्भीरौ।** एतौ निपात्येते। निपातनमाह **गमेरिति।**

इति मेदिनी। **कृशॄपॄ।** कॄ विक्षेपे, शॄ हिंसायाम्, पॄ पालनपूरणयोः, कटे वर्षावरणयोः, इट किट कटी गतौ, चुरादौ पट पुटेति दण्डके भाषार्थः, शौटृ गर्वे। 'वंशाङ्कुरे करीरोऽस्त्री वृक्षभिद्घटयोः पुमान्। करीरा चीरिकायां च दन्तमूले च दन्तिनाम्' इति मेदिनी। शीर्यत इति शरीरम्। 'शरीरं वर्ष्म विग्रहः' इत्यमरः। अर्धर्चादित्वाच्छरीर इति पुँल्लिङ्गोऽपि। **परीरमिति।** पूर्यतेऽनेनेति विग्रहः। बाहुलकाद् हिडि गत्यनादरयोः, हिण्डते इतस्ततो गच्छतीति हिण्डीरः। 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। 'डिण्डीरोऽपि च हिण्डीरः' इति द्विरूपकोशः। किर्मीरजम्बीरतूणीरादयोऽपि बाहुलकादेव बोध्याः। 'किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे' इति मेदिनी। 'जम्बीरः प्रस्थपुष्पे स्यात्तथा दन्तशठद्रुमे' इति च। **वशेः।** वश कान्तौ, अस्मादीरन्कित्स्यात्। कित्त्वात्संप्रसारणादि। उशीरं वीरणमूलमुशीरोऽपि। 'मूलेऽस्योशीरमस्त्रियाम्। अभयं नलदं सेव्यम्' इत्यमरः। **कशेः।** कश इति सौत्रो धातुः, अस्मादीरन् तस्य मुडागमश्च। पृषोदरादित्वात्काश्मीरः। **कृञः।** डुकृञ् करणे, अस्मादीरन् धातोरन्त्यस्य उदादेशो रपरः। **घसेः।** घस्लृ अदने। अस्मादीरन् कित्स्यात्। 'गमहन–' इत्युपधालोपे। कत्वं षत्वं च। 'क्षीरं दुग्धे च नीरे च' इति विश्वः। **गभीर।** गम्लृ गतौ। अस्मादीरन् मकारोऽन्तादेशः पक्षे नुमागमश्च निपात्यते। 'निम्नं गभीरं गम्भीरम्' इत्यमरः। **विषा।**

स्यतेर्जहातेश्च विपूर्वाभ्यामाप्रत्ययः। विषा बुद्धिः, विहा स्वर्गः, अव्यये इमे। **४७७ पच एलिमच्** । 'पचेलिमो वह्निरव्योः' । **४७८ शीङो धुक्लक्वलञ्वालनः** । चत्वारः प्रत्ययाः स्युः। शीधु मद्यम्। शीलं स्वभावः। शैवलः। शेवालम्। बाहुलकाद् वस्य पोऽपि। 'शेवालं शैवलो न स्त्री शेपालो जलनीलिका' । **४७९ मृकणिभ्यामूकोकणौ** । मरूको मृगः। काणूकः काकः। **४८० वलेरूकः** । वलूकः पक्षी उत्पलमूलं च। **४८१ उलूकादयश्च** । वलेः संप्रसारणमूकश्च । उलुकाविन्द्रपेचकौ । वावदूको वक्ता । भल्लूकः।

गम्लृ गतावित्यस्मादीरन्प्रत्ययो भकारश्चान्तादेशो नुमागमविकल्पश्च निपात्यत इत्यर्थः । 'निम्नं गभीरं गम्भीरम्' इत्यमरः । **विषा विहा**। इमे निपात्येते, तदेवाह **स्यतेरिति** । षोऽन्तकर्मणि, ओ हाक् त्यागे, आभ्यामित्यर्थः । विषावृत्तभेदेऽपि । 'विश्वा विषा प्रतिविषा' इत्यमरः । **पच एलिमच्** । डु पचष् पाके, अस्मादेलिमजित्यर्थः । कृत्यप्रक्रियायां तु 'केलिमर उपसंख्यानम्' इत्युक्तम्। **शीङो धुक्** । शीङ् स्वप्ने, अस्माद् धुक्, लक्, वलञ्, वालन, एते चत्वारः प्रत्ययाः स्युः। **शीधु इति** । धुकः कित्वान्न गुणः। 'मैरेयमासवः शीधुः' इत्यमरः। **शीलमिति** । लकः कित्वाद् गुणाभावः। **शैवलमिति** । ञित्वाद् 'अचो ञ्णिति' इति वृद्धिः । **शेवालमिति**। वालनि गुणः। 'जलनीली तु शेवालं शैवले तु कुमुद्वती' इत्यमरः । **मृकणिभ्यामूकोकणौ** । मृङ् प्राणत्यागे, कण निमीलने, आभ्यामूकऊकणप्रत्ययौ क्रमात्स्त इत्यर्थः । **मरूक इति** । ऊके गुणः । **काणूक इति** । ऊकणो णित्वादुपधावृद्धिः। **वलेरूकः**। वल संवरणे, अस्मादूकप्रत्यय इत्यर्थः। **उलूकादयश्च** । निपात्यन्त इत्यर्थः । निपातनमेवाह **वलेरिति** । **संप्रसारणमिति** । वकारस्येत्यर्थः।

षोऽन्तकर्मणि, ओहाक् त्यागे, आभ्यां विपूर्वाभ्यामाप्रत्ययो निपात्यते । **पचः** । डुपचष् पाके, अस्मादेलिमच् स्यात् । कर्तरि अयम् । कृत्यप्रत्ययेषु तु केलिमर उपसंख्यातः। **शीङः** । शीङ् स्वप्ने, शेरतेऽनेनेति शीधुर्मद्यविशेषः । **'मैरेयमासवः शीधुः'** इत्यमरः । अर्धर्चादिपाठात् क्लीबं च 'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः' इति त्रिकाण्डशेषः। **'शीलं स्वभावे सद्वृत्ते'** इति मेदिनी। 'जलनीली तु शेवालम्' इत्यमरः। 'शैवलं पद्मकाष्ठे स्यात् शैवाले तु पुमानयम्' इति मेदिनी । शब्दार्णवोक्तिमाह **शेवालं शैवल इति** । **मृकणि** । मृङ् प्राणत्यागे, कण शब्दार्थः, ऊकश्च उकण् च ऊकोकणौ एतौ प्रत्ययौ यथाक्रमं भवतः। **वलेः** । वल संवरणे। 'उलूकः पुंसि काकारिविन्द्रे भारतयोधिनि' इति

'शमेर्बुक् च' (गण २००)। शम्बूको जलशुक्तिः। ४८२ शलिमण्डिभ्यामूकण्। शालूकं कन्दविशेषः। मण्डूकः। ४८३ नियो मिः। नेमिः। ४८४ अर्तेरूच्च। ऊर्मिः। ४८५ भुवः कित्। भूमिः। ४८६ अश्नोते रश्च।

'उलूके करिणः पुच्छमूलोपान्ते च पेचकः' इत्यमरः। **वावदूक इति**। वदेर्यङ्लुगन्तादूकः। 'वावदूकश्च वक्तरि' इत्यमरः। **भल्लूक इति**। भल भल्ल परिभाषणहिंसादानेष्विति पठितभल्लधातो रूपम्। 'ऋक्षाच्छभल्लभल्लूकाः' इत्यमरः। **शमेर्बुक् च**। शम उपशमे, अस्मादूकः धातोर्बुगागमश्च। 'शम्बूका जलशुक्तयः' इत्यमरः। **शलिमण्डिभ्यामूकण्**। शल गतौ, मडि भूषायाम्, आभ्यामूकण्प्रत्यय इत्यर्थः। **शालूक इति**। ऊकणो णित्वादुपधावृद्धिः। 'शालूकमेषां कन्दः स्यात्' इत्यमरः। **मण्डूक इति**। प्रत्ययस्य णित्त्वेऽपि अकारस्योपधात्वाभावान्न वृद्धिः। **नियो मिः**। णीञ् प्रापणे, अस्य निय इति पञ्चम्यन्तम् अस्मान्मिप्रत्यय इत्यर्थः। **नेमिरिति**। 'चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्' इत्यमरः। **अर्तेरूच्च**। मिरित्यनुवर्तते। ऋ गतावित्यस्मान्मिप्रत्ययो धातोरूकारश्चादेश इत्यर्थः। **ऊर्मिरिति**। धातोरूत्वे रपरत्वम्।

मेदिनी। वदेर्यङ्लुगन्तदूकः। 'वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि' इत्यमरः। **भल्लूक इति**। भल्ल परिभाषणे इत्यस्मादूकः। **शमेः**। शम उपशमेऽस्मादूकः धातोर्मुगागमश्च। 'शम्बूको गजकुम्भान्ते घोषे च शूद्रतापसे' इति मेदिनी। बाहुलकादूकप्रत्यये ह्रस्वमध्योऽपि। 'जम्बूकं जम्बुकं प्राहुः शम्बूकमपि शम्बुकम्' इति द्विरूपकोशः। जम्बूकबन्धूकादयोऽप्यत्रैव द्रष्टव्याः। 'जम्बूकः फेरवे नीचे पश्चिमाशापतावपि' इति मेदिनी–विश्वप्रकाशौ। 'बन्धूकं बन्धुजीवे स्याद्बन्धूकः पीतसारके' इति च। **शलिमण्डि**। शल गतौ, मडि भूषायां हर्षे च। 'सौगन्धिकं तु कह्लारम्' इत्याद्युपक्रम्य 'शालूकमेषां कन्दः स्यात्' इत्यमरः। एषां च सौगन्धिकादीनां कुमुदकैरवान्तानां कन्दो मूलं शालूकमित्यर्थः। मण्डते वर्षासमयमिति मण्डूको भेकः। **नियो मिः**। णीञ् प्रापणे। नयति चक्रमिति नेमिश्चक्रावयवः। 'नेमिर्ना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्' इति मेदिनी। बाहुलकादन्यतोऽपि। या प्रापणे, 'यामिः स्वसृकुलस्त्रियो' इत्यन्तस्थादौ रभसः। 'जामिः स्वसृकुलस्त्रियोः' इति चवर्गतृतीयादावजयकोशः। 'चवर्गादिरपि प्रोक्तो जामिः स्वसृकुलस्त्रियोः' इति द्विरूपेषु विश्वः। **अर्तेरूच्च**। ऋ गतावित्यस्मान्मिः, धातोरूकारादेशश्च। उचेति वक्तुमुचितम्। रपरत्वे 'हलि च' इति दीर्घसंभवात्। 'ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः। वस्त्रसंकोचरेखायां वेदनापीडयोरपि'

रश्मिः किरणो रज्जुश्च। ४८७ दलिमः। दल विशरणे। दलिमरिन्द्रायुधम्। ४८८ वीज्याज्वरिभ्यो निः। बाहुलकाण्णत्वम्। 'वेणिः स्यात्केशविन्यासः प्रवणी च स्त्रियामुभे'। ज्यानिः। जूर्णिः। ४८९ सृवृषिभ्यां कित्। सृणि-रङ्कुशः। 'वृष्णिः स्त्रियमेषयोः'। ४९० अङ्गेर्नलोपश्च। अग्निः। ४९१

भुवः कित्। भू सत्तायामित्यस्माद् मिप्रत्ययः, स किदित्यर्थः। भूमिरिति। कित्वान्न गुणः। अत्र अर्तिभुवोरूच्चेत्येव सूत्रं कर्तुं शक्यम्, भुवः किदिति च त्यक्तुं शक्यम्। न च भूमिरित्यत्र गुणप्रसङ्गः, ऊकारस्य उकारविधानसामर्थ्येन गुणाभावस्य सिद्धत्वात्। अश्नोते रश्च। अशू व्याप्तौ, अस्माद् मिः, धातोः रशादेशश्च। रश्मिरिति। 'किरणप्रग्रहौ रश्मी' इत्यमरः। दलिमः। इत्थं निपात्यत इत्यर्थः। धातुं प्रदर्शयति दल विशरणे इति। वीज्याज्वरिभ्यो निः। वी गतिव्याप्त्यादौ, ज्या वयोहानौ, ज्वर रोगे, एभ्यो निप्रत्ययः। ननु वेणिरित्यत्र कथं णत्वं रषाभ्यां परत्वाभावादित्यत्राह बाहुलकादिति। अमरकोश-माह वेणिः स्यात्केशविन्यास इति। ज्यानिरिति। जूर्णिरिति। ज्वर-धातोर्निप्रत्यये ज्वरत्वरेत्यूठ्। सृवृषिभ्यां कित्। सृ गतौ, वृषु सेचने, आभ्यां निः कित्स्यात्। सृणिरिति। ऋकारात्परत्वाण्णत्वम्, कित्वान्न गुणः। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। वृष्णिरिति। रषाभ्यामिति णत्वम्। अङ्गेर्नलोपश्च। अगिर्गत्यर्थः। अस्मान्निः स्याद्, धातोरिदित्त्वाल्लब्धनकारस्य लोपश्चेत्यर्थः। किदित्यनुवर्त्य नेः कित्वविधानेऽपि धातोरिदित्त्वाद् 'अनिदिताम्' इति लोपो न

इति मेदिनी। भुवः। भवतेर्मिः कित्स्यात्। भवन्ति भूतान्यस्यामिति भूमिः। 'भूमिर्वसुन्धरायां स्यात्स्थानमात्रेऽपि च स्त्रियाम्' इति मेदिनी। 'भूर्भूमिरचलानन्ता' इत्यादिस्त्वमरः। अश्नोतेः। अशू व्याप्तौ, अस्मान्मिः धातो रशादेशश्च। 'रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि' इति मेदिनी। वीज्या। वी गतौ, ज्या वयोहानौ, ज्वर रोगे। अमरोक्तमाह वेणिः स्यादित्यादि। 'कृदिकारात्–' इति ङीष्। 'वेणी केशस्य बन्धने। नद्यादेरन्तरे देवताडे' इति मेदिनी। 'वेणी खरा गरी देवताडो जीमूत इत्यपि' इत्यमरः। 'ज्यानिर्हानौ स्रवन्त्यां च' इति विश्वः। 'ज्वरत्वर–' इत्युपधाया वकारस्य च ऊठ्। जूर्णिः स्त्रीरोगः। सृवृषि। सृ गतौ, वृषु सेचने, आभ्यां निः कित्स्यात्। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। सृणिः स्यादङ्कुशे पुमान्' इति कोशान्तरम्। अत एव 'आरचममभवमत्य सृणिं शिताग्रम्' इति माघे पुँल्लिङ्गप्रयोगः। 'वृष्णिस्तु यादवे मेषे वृष्णिः पाखण्डचण्डयोः' इति विश्वः। 'ऐन्द्रे वृष्णि षोडशिनि तृतीयम्' इति श्रुतौ वृष्णि मेषमित्यर्थः। अङ्गेः। अगिर्गत्यर्थः।

वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्। वह्निः। श्रेणिः। श्रोणिः। योनिः। द्रोणिः। ग्लानिः। हानिः। तूर्णिः। बाहुलकाम्म्लानिः। ४६२ घृणिपृश्निपार्ष्णिचूर्णिभूर्णि। एते पञ्च निपात्यन्ते। घृणिः किरणः। स्पृशतेः सलोपः। पृश्निरल्पशरीरः। पृषेर्वृद्धिश्च। पार्ष्णिः पादतलम्। चरेरुपधाया उत्वम्। चूर्णिः कपर्दकशतम्। बिभर्तेरुत्वम्। भूर्णिर्धरणी, ४६३ वृदृभ्यां विन्। वर्विर्घस्मरः। दर्विः। ४६४ जॄशॄस्तॄजागृभ्यः क्विन्। जीर्विः पशुः। शीर्विर्हिंस्रः।

स्यादिति नकारलोपविधानं कृतम्। वहिश्रिश्रुयु। वह प्रापणे, श्रिञ् सेवायाम्, श्रु श्रवणे, यु मिश्रणे, द्रु गतौ, ग्लै हर्षक्षये ओ हाक् त्यागे, ञि त्वरा संभ्रमे, एभ्यो निप्रत्ययः स्यात्, स च नित्। नित्वं स्वरार्थम्। तूर्णिरिति। त्वरधातोः प्रत्यये ज्वरत्वरेत्यूठि रषाभ्यामिति णत्वम्। घृणिपृश्नि। एते निपात्यन्ते। घृणिरिति। घृ क्षरणदीप्त्योरित्यस्मान्निप्रत्यये णत्वम्। गुणाभावो निपातनात्। पृश्नीति। स्पृश संस्पर्शने इत्यस्मात्प्रत्यये सकारलोपो गुणाभावश्च निपात्यते। पार्ष्णिरिति। पृषु सेचने, अस्मान्निप्रत्यये धातोर्वृद्धिर्निपात्यते। ऋकारस्य आर् वृद्धिः, रषाभ्यामिति णत्वम्। चूर्णिरिति। चर गतावित्यस्मान्निप्रत्यये रषाभ्यामिति णत्वम् उपधाया ऊत्वं निपात्यत इत्यर्थः। भूर्णिरिति। डु भृञ् धारणपोषणयोः, अस्मान्निप्रत्यये धातोरन्त्यस्य ऊत्वं निपात्यते, रपरत्वम्, रषाभ्यामिति णत्वम्। वृदृभ्यां विन्। वृञ्

'अग्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी। वहि। वह प्रापणे, श्रिञ् सेवायाम्, श्रु श्रवणे, यु मिश्रणे, द्रु गतौ, ग्लै म्लै हर्षक्षये, ओहाक् त्यागे, ञित्वरा संभ्रमे, एभ्यो निः प्रत्ययः स्यात्स च नित्। 'वह्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी। श्रेणिः पङ्क्तिः। 'निश्रेणिस्त्वधिरोहिणी। श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समाने शिल्पिसंहतौ' इति मेदिनी। श्रोणिः कटिप्रदेशः। 'कटिः श्रोणिः ककुद्मती' इत्यमरः। योनिर्भगम्। 'योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे' इति मेदिनी। द्रोणिः सेचनी। 'कृदिकारात्–' इति ङीषि द्रोणी। 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये। पुमान् कृपीपतौ कृष्णकाके स्त्री नीवृदन्तरे' इति मेदिनी ग्लानिर्दौर्बल्यम्। हानिरपचयः क्षयश्च। तूर्णिर्मनः। घृणि। घृ सेचने, स्पृश संस्पर्शने, पृषु सेचने, चर गतौ, डुभृञ् धारणपोषणयोः। निप्रत्ययो गुणाभावश्च निपात्यते। 'घृणिः पुनः। अंशुज्वालातरङ्गेषु' इति हेमचन्द्रः। 'पृश्निरल्पतनौ' इत्यमरः। 'पार्ष्णिः स्यादुन्मदस्त्रियाम्। स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च' इति मेदिनी। भूर्णिरिति। 'तक्वा न भूर्णिः' इति मन्त्रभाष्ये तु भूर्णिर्धारकः पोषको वेति व्याख्यातम्। वृदृ। वृञ् वरणे, दृङ् आदरे, स्त्रियां 'कृदिकारात्–'

स्तीर्विरच्चयुः। जागृविर्नृपः। ४९५ दिवो द्वे दीर्घश्चाभ्यासस्य। 'दीदिविः स्वर्गमोक्षयोः'। ४९६ कृविघृष्विछ्विस्थविकिकीदिवि। कृविस्तन्तुवायद्रव्यम्। घृष्विर्वराहः। छास्योर्ह्रस्वत्वं च। छविर्दीप्तिः, स्थविस्तन्तुवायः।

वरणे, दङ् आदरे, आभ्यां विनिरित्यर्थः। **ववि‍रिति**। धातोर्गुणः। **जॄशॄस्तॄजागृभ्यः क्विन्**। जॄ वयोहानौ, शॄ हिंसायाम्, स्तॄञ् आच्छादने, जागृ निद्राक्षये, एभ्यः क्विन् स्यात्, कनावितौ। **जीर्विरिति**। कित्त्वाद् गुणाभावे 'ॠत इद्धातोः' इति इत्वे 'हलि च' इति दीर्घे रूपम्। 'वेरपृक्तस्य' इति लोपस्तु न, अपृक्तस्येत्युक्तेः। **दिवो द्वे**। दिवु क्रीडाविजिगीषादिषु, अस्मात्क्विन्, धातोर्द्वित्वम्, अभ्यासस्य दीर्घश्च स्यात्। **दीदिविरिति**। पुनर्ह्रस्व इति अभ्यासह्रस्वस्तु न शङ्क्यः, लक्ष्ये लक्षणस्येति न्यायात्। न चाभ्यासदीर्घात्पूर्वम् इकारस्य ह्रस्वविधाने फलाभावाद् ह्रस्वो न प्रवर्तते। एवं च न लक्ष्ये लक्षणमिति न्यायविरोध इति वाच्यम्, फलाभावेऽपि पर्जन्यवच्छास्त्रप्रवृत्त्या दीर्घात्पूर्वं ह्रस्वप्रवृत्तेर्दुर्वारत्वात्। 'ओदनोऽस्त्री स दीदिविः' इत्यमरः। **कृविघृष्विछ्वि**। डु कृञ् करणे, घृषु सेचने, छो छेदने, ष्ठा गतिनिवृत्तौ, दिवु क्रीडादौ किकिपूर्वः, एते क्विन्नन्ता निपात्यन्ते इत्यर्थः। तत्र कृविरित्यत्र कित्त्वान्न गुणः। एवं घृष्विरित्यत्रापि। **छविरिति**। छो छेदने इत्यस्मात् प्रत्यये 'आदेच–' इत्यात्त्वे ह्रस्वोऽनेन निपात्यते। एवं स्थविरित्यपि।

इति ङीष्। दर्वी। **जॄशॄ**। जॄ वयोहानौ, शॄ हिंसायाम्, स्तॄञ् आच्छादने, जागृ निद्राक्षये, क्विनः कित्त्वाद् 'ॠत इद्धातोः' इति इत्वे रपरत्वे जीर्विरित्यादि। **दिवो**। दिवु क्रीडादौ अस्मात् क्विन्, कित्त्वाद् गुणाभावः 'दीदिविर्धिषणान्नयोः' इति विश्वः। 'दीदिविर्ना धिषणे स्वेतदस्त्रियाम्' इति मेदिनी। धिषणो बृहस्पतिः। 'दीदिविर्द्वादशकरश्चक्षुः सुरगुरुर्गुरुः' इति त्रिकाण्डशेषः। दीदिविर्द्वादशार्चिः स्याज्जीवः प्राक्फल्गुनीसुतः' इति हारावली। 'ओदनोऽस्त्री सदीदिविः' इत्यमरः। अत्र सदीदिविर्दीदिविसहित इति व्याख्यानं न्याय्यम्। अत्र स इति विशेषणाद्दीदिविः पुँल्लिङ्ग इति केषांचिद्व्याख्यानं नादर्तव्यम्। स इति छेदने तु अस्त्रियामिति न लभ्येत। ततश्चान्ते तदस्त्रियामिति पूर्वोक्तमेदिनीग्रन्थो विरुध्येतेति ध्येयम्। 'गोपामृतस्य दीदिविम्' इति मन्त्रे तु द्योतमानमित्यर्थः। **कृवि**। डुकृञ् करणे, घृषु सेचने, छो छेदने, ष्ठा गतिनिवृत्तौ, दिवु क्रीडादौ, एते क्विन्नन्ता निपात्यन्ते। **घृष्विर्वराह इति**। 'उपस्य यूनः स्थविरस्य घृष्वेः' इति मन्त्रे तु घृष्वेः कामानां वर्षकस्येत्यर्थ इति व्याख्यातम्। घृषु सेचने इति धात्वर्थानुगमात्। 'छविः शोभारुचोर्योषित्' इति मेदिनी। 'अथ चाषः किकीदिविः' इत्यमरः।

दीव्यतेः किकिपूर्वात् किकीदिविश्चाषः । बाहुलकाद् ह्रस्वदीर्घयोर्विनिमयः, 'चाषेण किकिदीविना' । ४९७ पातेर्डतिः । पतिः । ४९८ शकेर्ऋतिन् । शकृत् । ४९९ अमेरतिः । अमतिः कालः । ५०० वहिवस्यर्तिभ्यश्चित् । वहतिः पवनः । 'वसतिर्गृहयामिन्योः' । अरतिः क्रोधः । ५०१ अञ्चेः को वा । अङ्कतिरञ्चतिर्वातः । ५०२ हन्तेरंह च । हन्तेरतिः स्यादंहादेशश्च धातोः । हन्ति दुरितमनया अंहतिर्दानम् । 'प्रादेशनं निर्वपणमपवर्जनमंहतिः' । ५०३ रमेर्नित् । 'रमतिः कालकामयोः' । ५०४ सूङः क्रिः । सूरिः ।

किकीदिविरिति । दिव्धातोः किकिपूर्वात् क्रिनि कित्त्वाद् लघूपधगुणाभावे 'लोपो व्योर्वलि' इति धातुवकारस्य लोपे किकिशब्दावयवस्यान्त्यस्य इकारस्य दीर्घो निपात्यते । 'अथ चाषः किकीदिविः' इत्यमरः । **विनिमय इति** । दिव्शब्देकारस्य दीर्घः, किकिशब्दावयवस्य ह्रस्व इत्यपि निपात्यते । लोके उभयोरपि दर्शनादिति भावः । तदेवाह **चाषेण किकिदीविनेति** । **पातेर्डतिः** । पा रक्षणे, अस्माड्डति-प्रत्यय इत्यर्थः । **पतिरिति** । डित्वाट्टिलोपः । **शकेः ऋतिन्** । शक्लृ शक्तौ, अस्मादृतिन्नित्यर्थः । 'शमलं शकृत्' इत्यमरः । **अमेरतिः** । अम गत्यादौ, अस्मा॰ अस्मादतिप्रत्यय इत्यर्थः । **वहिवस्यर्तिभ्यश्चित्** । वह प्रापणे, वस निवासे, ऋ गतौ, एभ्यः अतिप्रत्ययः स्यात् , स च चित् । **वसतिरिति** । 'वसती रात्रिवे-श्मनोः' इत्यमरः । **अञ्चेः को वा** । अञ्चु गतौ, अस्मादतिः स्यात् ककारश्चा-न्तादेशो विकल्पेन । **हन्तेरंह च** । हन हिंसागत्योः, अस्मादतिप्रत्ययः धातोरंहा-देशश्चेत्यर्थः । अंहतिरित्यस्यार्थे विवृण्वन्नमरोक्तिमाह **प्रादेशनं निर्वपणमिति** **रमेर्नित्** । रमु क्रीडादौ, अस्मादतिप्रत्ययः, स च नित्स्यात् , नित्त्वं स्वरार्थम् । **सूङः क्रिः** । षूङ् प्राणिप्रसवे, अस्मात् क्रिः प्रत्यय इत्यर्थः । **सूरिरिति** । कित्त्वाद्

विनिमय इति । 'किकिदीविकिकीदिवौ' इति द्विरूपकोशः । **पातेः** । पा रक्षणे डित्वाट्टिलोपः । 'पतिर्धवे ना त्रिष्वीशे' इति मेदिनी । **शकेः** । शक्लृ शक्तौ । 'उच्चारावस्करौ शमलं शकृत् । गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्' इत्यमरः । **अमेः** । अम गतौ । 'अथामतिः पुंसि हिमदीधितिकालयोः' इति मेदिनी । **वहिः** । वह प्रापणे, वस निवासे, ऋ गतौ । 'वसतिः सचिवे गवि' इति विश्वः । 'वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने' इति मेदिनी । **अञ्चेः** । अञ्चु गतौ, अस्मादतिः स्यात्ककारश्चान्तादेशो विकल्पेन । **हन्तेः** । हन हिंसागत्योः, अमरोक्तिमाह **प्रादेशनमित्यादि** । **रमेः** । रमतेरतिः स्यात्स च नित् । 'रमतिर्नायके नाके पुंसि स्यात्' इति मेदिनी । नित्त्वमाद्युदात्तार्थम् । 'रन्तिरसि

५०५ अदिशदिभूशुभिभ्यः क्रिन् । अद्रिः । शद्रिः शर्करा । भूरि प्रचुरम् । शुभ्रिर्ब्रह्मा । ५०६ वङ्क्र्यादयश्च । क्रिन्नन्ता निपात्यन्ते । वङ्क्रिर्वाद्यभेदो गृहदारु पार्श्वास्थि च । वप्रिः क्षेत्रम् । 'अंह्रिरङ्घ्रिश्च चरणः' । तन्द्रिः सौत्रो धातुः । तन्द्रिर्मोहः । बाहुलकाद् गुणः । मेरिः । ५०७ राशदिभ्यां त्रिप् । रात्रिः । शत्रिः कुञ्जरः । ५०८ अदेस्त्रिनिश्च । चात्त्रिप् । अत्त्री अत्त्रिणौ अत्त्रिणः ।

गुणाभावः । 'धीमान्सूरिः कृती कृष्टिः' इत्यमरः । **अदिशदि** । अद भक्षणे, शद्लृ शातने, भू सत्तायाम्, शुभ शोभार्थे, एभ्यः क्रिन्नित्यर्थः । कनावितौ, नित्त्वमाद्युदात्तार्थम् । **वङ्क्र्यादयश्च** । एते निपात्यन्ते । प्रत्ययमाह **क्रिन्नन्ता इति** । **वङ्क्रिरिति** । वकि कौटिल्ये, अस्मात्क्रिन् धातोरिदित्त्वान्नुम्, अनुस्वारपरसवर्णौ । **वप्रिरिति** । डु वप् बीजसन्ताने इत्यस्माद्रूपम् । प्रत्ययस्य कित्त्वेऽपि निपातनात्संप्रसारणाभावः । अंहिर्भाषार्थः, अघि वघि मघि गत्याक्षेपे इति पठितोऽघिः, ताभ्यां क्रिनि, अंह्रिः, अङ्घ्रिरिति रूपे । उभयत्रापि धातोरिदित्त्वान्नलोपो न । **राशदिभ्यां त्रिप्** । रा दाने, शद्लृ शातने, आभ्यां त्रिप् स्यात् । **अदेस्त्रिनिश्च** । अद भक्षणे

रमतिरसि' । **सूङः** । षूङ् प्राणिप्रसवे । कित्त्वाद् गुणाभावः । 'धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः । दशपाद्यां तु 'सुसोरिन् दीर्घश्च' इति पाठस्तत्र रिनो नकारो नानुबन्ध उत्तरसूत्रे स्त्रिन्प्रत्ययारम्भात् । अनुबन्धत्वे हि लाघवादिहैव क्रिन्नुच्येत । तथा च सूरी सूरिणौ सूरिणः इत्यादि रूपम् । अतएवाभिधानमालायां सूरीति नान्तमुदाहृतमित्यविधेयम् । दशपादीवृत्तिकारैस्तु नित्त्वं स्वीकृत्य सूरिरित्युदाहृतं तदेतेन प्रत्युक्तम् । स्वरविरुद्धमपि 'सदा पश्यन्ति सूरयः' 'विसूरयो दधतो विश्वमायुः' इत्यादौ सूरिशब्दस्यान्तोदात्तत्वदर्शनात् । **अदि** । अद भक्षणे, शद्लृ शातने, भू सत्तायाम्, शुभ शुम्भ शोभार्थे । 'अद्रयो द्रुमशैलार्काः' इत्यमरः । 'भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकम्' इति मेदिनी । **वङ्क्र्यादयश्च** । वकि कौटिल्ये, डुवप् बीजसन्ताने । निपातनात्संप्रसारणाभावः । अंहिर्भाषार्थश्चुरादिर्ण्यन्तः । अघि गतौ गत्यारम्भे च । ञिभी भये । **तन्द्रिरिति** । 'कृदिकारात्—' इति पक्षे ङीष् । 'तन्द्री निद्राप्रमीलयोः' इति मेदिनी । 'तन्द्री तन्द्रिश्च तन्द्रायाम्' इति द्विरूपकोशः । 'विभज्य नक्तंदिवमस्ततन्द्रिणा' इति भारविः । प्रत्ययस्य कित्त्वाद् गुणाभावमाशङ्क्याह **बाहुलकादिति** । **राशदि** । रा दाने, शद्लृ शातने । 'शत्रिर्नाम्भोधरे विष्णौ' इति मेदिनी । 'शत्रिमग्र उपमां केतुमर्यः' इति मन्त्रस्य वेदभाष्ये तु उपमाम् उपमानभूतं केतुं प्रख्यातं शत्रिम् एतन्नामकं राजर्षिमिति व्याख्यातम् । **अदेः** । अद भक्षणे, अत्री भक्षकः

अत्त्रिः अत्त्री अत्त्रयः । ५०९ पतेरत्रिन् । पतत्रिः पक्षी । ५१० मृकणिभ्यामीचिः । मरीचिः । कणीचिः पल्लवो निनादश्च । ५११ श्वयतेश्चित् । श्वयीचिर्व्याधि । ५१२ वेञो डिच्च । वीचिस्तरङ्गः । नञ्समासेऽवीचिर्नरकभेदः । ५१३ ऋहनिभ्यामूषन् । अरूषः सूर्यः । हनूषो राक्षसः । ५१४ पुरः कुषन् । 'पुर अग्रगमने' पुरुषः । 'अन्येषामपि–' (सू ३५३९) इति दीर्घः । पूरुषः । ५१५ पृनहिकलिभ्य उषच् । परुषम् । नहुषः । कलुषम् । ५१६ पीये-

---

अस्मात् त्रिनिः चकारात्त्रिप् च स्याताम् । त्रिन्याह अत्त्री । अत्त्रिणाविति । नकारान्तत्वप्रदर्शनायोक्तम् । अत्रिरिति । त्रिपि रूपम् । पतेरत्रिन् । पत्लृ गतौ, अस्मादत्रिन्प्रत्यय इत्यर्थः । पतत्रिरिति । नित्त्वादाद्युदात्तः । 'पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः' इत्यमरः । मृकणिभ्यामीचिः । मृङ् प्राणत्यागे, कण शब्दार्थः, आभ्यामीचिप्रत्यय इत्यर्थः । श्वयतेश्चित् । टु ओ श्वि गतिवृद्ध्योः, अस्मादीचिप्रत्ययः स्यात्, स च चिदित्यर्थः । चित्त्वमन्तोदात्तत्वार्थम् । वेञो डिच्च । वेञ् तन्तुसन्ताने अस्मादीचिर्डित्स्यात् । वीचिरिति । डित्त्वाट्टिलोपः । अन्यथा अयादेशे श्वयीचिवद् वयीचिरिति स्यात् । ऋहनिभ्यामूषन् । ऋ गतौ, हन हिंसागत्योः, आभ्यामूषन्स्यात् । अरूष इति । ऊषनि गुणः । पुरः कुषन् । पुर अग्रगमने, अस्मात्कुषन्स्यात् । पुरुष इति । कुषनः कित्त्वाद्गुणाभावः । ननु कथं तर्हि पूरुष इत्यत्राह अन्येषामपीति । पृनहिकलिभ्य उषच् । पॄ

अत्रिर्मुनिभेदः । उज्ज्वलदत्तादयस्तु अदेस्त्रिनिति पठित्वा अत्रिरित्युदाजहार । तन्न । त्रिपैवेष्टसिद्धौ प्रत्ययान्तरवैयर्थ्यात् । गोवर्धनस्तु अदिस्त्रेश्चिचेति पठित्वा निदिति वचनाच्चकारस्य नेत्संज्ञा अत्री अत्त्रिणौ अत्त्रिण इत्याह । तदपि न, नित्त्वे सत्याद्युदात्तत्वापत्तेः । न चेष्टापत्तिः । 'जहीन्यत्रिणं पणिं' । 'दूरे वा ये अन्ति वा केचिदत्रिणः' । 'अग्ने दंसिन्य १ त्रिणाम्' इत्यादावन्तोदात्तस्य निर्विवादत्वात् । अतएव 'न लुमताङ्गस्य' इति सूत्रे 'अदेस्त्रिनिश्चे'त्येव कैयटोऽप्याहेति दिक् । पतेः । पत्लृ गतौ । पतत्रिरिति । पक्षवाचकात्पतत्रशब्दान्मत्वर्थे इनि तु नान्तः पतत्री पतत्रिणौ पतत्रिण इत्यादि । मृकणि । मृङ् प्राणत्यागे, कण शब्दार्थः । 'मरिचिः कृपणे दीप्तौ ऋषिभेदे च दृश्यते' इति विश्वः । 'मरीचिर्मुनिभेदे ना गभस्तावनपुंसकम्' इति मेदिनी । 'कणीचिः पुष्पितलतागुञ्जयोः शकटे स्त्रियाम्' इति च । श्वयतेः । टुओश्वि गतिवृद्ध्योः, अस्मादीचिप्रत्ययश्चित्स्यात् । वेञः । वेञ् तन्तुसन्तानेऽस्मादीचिर्डित्स्यात् । 'वीचिः स्वल्पे तरङ्गे स्यादवकाशे सुखे द्वयोः' इति विश्वमेदिन्यौ । ऋहनि । ऋ गतौ, हन हिंसागत्योः । पुरः । कुष निष्कर्षे । कित्वाद् गुणाभावः ।

रूषन्। पीय इति सौत्रो धातुः। पीयूषम्। बाहुलकादूयो 'पेयूषोऽभिनवं पयः'। ४१७ **मस्जेर्नुम्च** । 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः'। मञ्जूषा। ४१८ **गडेश्च** । गण्डूषः गण्डूषा। ४१९ **अर्तेररुः**। अररुः शत्रुः। अरुरू अररवः।

पालनपूरणयोः, णह बन्धने, कल शब्दसंख्यानयोः, एभ्य उषच् स्यात्। **पीयेरूषन्**। पीयधातोर्धातुपाठेऽदर्शनादाह **सौत्र इति**। **मस्जेर्नुम् च**। टु मस्जो, शुद्धौ, अस्मादूषन् नुम् च वाच्य इत्यर्थः। **मञ्जूषेति**। ननु नुमो मित्त्वाद् मिदचोऽन्त्यादिति मकारोत्तराकारात्स्यात् सकारश्च श्रूयेतेत्यत आह **मस्जेरन्त्यात्पूर्व इति**। तथ च सकारात्परत्र नुमि स्कोरिति सलोपे च रूपमिति भावः। **गडेश्च**। गडि वदनैकदेशे, अस्मादूषन्स्यात्। **गण्डूष इति**। इदित्वान्नुम्यनुस्वारपरसवर्णौ। **अर्तेररुः**। ऋ गतौ, अस्मादरुप्रत्यय इत्यर्थः। **अररुरिति**। धातोर्गुणः।

'पुरुषः पूरुषे सांख्यज्ञे च पुंनागपादपे' इति विश्वमेदिन्यौ। **पॄनहि**। पॄ पालनपूरणयोः, णह बन्धने, कल शब्दसंख्यानयोः। परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत्' इति मेदिनी। 'नहुषो राजविशेषे नागभिद्यपि' इति हेमचन्द्रः। उषचश्चित्त्वान्नहुषशब्दस्यान्तोदात्तत्वे प्राप्ते ग्रामादित्वाद्वृषादित्वाद्वा आद्युदात्तत्वमित्याहुः। एतच्च 'देवा अकृण्वन्नहुषस्य विश्वम्' इति मन्त्रस्य भाष्ये स्पष्टम्। 'कलुषं त्वाविलैनसाः' इति विश्वः। **पीयेः**। 'पीयूषममृतं सुधा' इत्यमरः। 'पीयूषं सप्तदिवसावधि क्षीरे तथाऽमृते' इति मेदिनी। अमरोक्तिमाह **पेयूष इत्यादि**। **मस्जेः**। टुमस्जो शुद्धौ, अस्मादूषन्स्यान्नुमागमश्च धातोः। 'मिदचोऽन्त्यात्परः' सस्य श्चुत्वेन शस्तस्य जश्त्वेन जस्तस्य 'झरो झरि–' इति वा लोपः। लोपाभावपक्षे जकारद्वयम्। मञ्जूषा काष्ठमयं द्रव्यम्। पेटक इति यावत्। 'पिटकः पेटकः पेटा मञ्जूषा' इत्यमरः। **गडेः**। गडि वदनैकदेशे। 'गण्डूषो मुखपूर्तौ भपुष्करप्रसृतोन्मिते' इति मेदिनी। **अर्तेः**। ऋ गतौ, उकारान्तोऽयं प्रत्ययो न तु सकारान्त इति स्फोरयति अररू अररव इत्यनेन। न चोकारान्तत्वे विवदितव्यम्। 'कंचिद्यावीररुं शूरमर्त्यम्' 'अपाररुमदेवयजनो जहि' इत्यादिमन्त्रेषु तथा दर्शनात्। अत्र व्याचक्षते–'मा नः शंसो अररुषः' इति मन्त्रस्य भाष्ये सान्तोऽयमिति माधवेनोक्तं यत्तत्प्रौढिवादमात्रं न तु वास्तवम्। अररुष इति पदस्य आद्युदात्तत्वानुपपत्तिप्रसङ्गात्। तस्माद्रातेः लिटः क्वसुश्चेति क्वसोररिवानित्यनेन नञ्समासे ञ्स्यररुष इति व्याख्येयम्। ततश्च 'तत्पुरुषे तुल्यार्थ–' इत्यादिना पूर्वपदप्रकृतिस्वरे सत्याद्युदात्तत्वं सिध्यति। 'गुरुद्वेषो अररुषे दधन्ति' इत्यत्र स्वयमेव रातेः क्वसन्तस्य नञ्समास इत्यादि। व्याख्यानात्। 'यो नो अग्ने अररिवाँ अघायुः' इत्यादिमन्त्रान्तरसंभवाच्चेति।

५२० कुटः किच्च। कुटरुर्वेश्मगृहम्। कित्त्वमिह चिन्त्यम्। ५२१ शकादिभ्योऽटन्। शकटोऽस्त्रियाम्। कङ्किर्गत्यर्थः। कङ्कटः सन्नाहः। देवटः शिल्पी। करट इत्यादि। ५२२ कृकदिकडिकटिभ्योऽम्बच्। करम्बं व्यामिश्रम्। कदिकडी सौत्रौ। कदम्बो वृक्षभेदः। कडम्बोऽग्रभागः। कटम्बो वादित्रम्। ५२३ कदेर्णित्पक्षिणि। कादम्बः कलहंसः। ५२४ कलिकर्द्योरमः। कलमः। कर्दमः। ५२५ कुणिपुल्योः किन्दच्। 'कुण शब्दोपकरणयोः'। कुणिन्दः

प्रत्ययस्य सकारान्तत्वभ्रमवारणायाह अरुरू इति। कुटः किच्च। कुट कौटिल्ये, अस्मादरुः स्यात्, स च कित्। कुटरुरिति। कित्त्वान्न लघूपधगुणः। नन्वत्र कित्त्वं व्यर्थं गाङ्कुटादिभ्य इति प्रत्ययस्य ङित्वेनैव गुणाभावसिद्धेरित्यत आह कित्त्वमिहेति। शकादिभ्योऽटन्। अटनि नकार आद्युदात्तार्थः। शकट इति। शक्लृ शक्तावित्यस्माद्रूपम्। कङ्किर्गत्यर्थ इति। अस्मादटन्निति शेषः। 'उरच्छदः कङ्कटकः' इत्यमरः। देवट इति। दिवु क्रीडाविजिगीषादिषु, अस्मादटनि पुगन्तेति गुणः। कृकदिकडिकटिभ्योऽम्बच्। डु कृञ् करणे, कदिकडी सौत्रौ, कटे वर्षादौ, एभ्यः अम्बच् इत्यर्थः। करम्बमिति। धातोर्गुणः। 'कलम्बश्च वेसवार उपस्करः' इत्यमरः। कदेर्णित्पक्षिणि। सौत्रात्कदधातोर्जायमानः अम्बच्प्रत्ययः पक्षिण्यभिधेये णिदित्यर्थः। कादम्ब इति। णित्त्वादुपधावृद्धिः। कलिकर्द्योरमः। कल संख्याने, कर्द कुत्सिते शब्दे, आभ्याममः स्यात्। कलम इति। 'शालयः कलमाद्याश्च' इत्यमरः। कुणिपुल्योः किन्दच्। कुण शब्दो-

---

कुटः। कुट कौटिल्येऽस्मादरुः स्यात्स च कित्। चिन्त्यमिति। 'गाङ् कुटादिभ्यः—' इति ङित्त्वेनैव गुणाभावसिद्धेरिति भावः। शका। शकिर्गत्यर्थ इति। शक्लृ शक्तावित्यस्मादटन्नित्येके। 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इत्यमरः। देवट इति। देवृ देवने। करट इति। डुकृञ् करणे' कॄ विक्षेपे इत्यस्माद्वा अटन्। 'काकेभगण्डौ करटौ' इत्यमरः। 'करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीविनि। एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे' इति मेदिनी। कृकदि। डुकृञ् करणे, कटे वर्षावरणयोः। 'करम्बो मिश्रिते वान्तो भान्तस्तु दधिसक्तुषु' इति विश्वः। 'कदम्बं निकुरम्बे स्यान्नीपसर्षपयोः पुमान्' इति च। कदेः। 'कादम्बः स्यात्पुमान्पक्षिविशेषे सायकेऽपि च' इति मेदिनी। कलि। कल संख्याने, कर्द कुत्सिते शब्दे। 'कलमः पुँसि लेखन्यां शालौ पाटच्चरेऽपि च' इति मेदिनी। कुणिपुल्योः। पुल महत्त्वे। कुपेः। कुप क्रोधेऽस्मात्किन्दच् स्याद् वकारश्चान्तादेशो विकल्पेन। 'तन्तुवायः कुविन्दः स्यात्' इत्यमरः। बाहुलकाद् अल भूषणादौ। अलिन्दम्। 'यस्यामलिन्देषु

शबरः। पुलिन्दो जातिविशेषः। **५२६ कुपेर्वा वश्च**। कुपिन्दकुविन्दौ तन्तुवाये। **५२७ नौ षञ्जेर्घथिन्**। निषङ्गथिरालिङ्गकः। **५२८ उद्यतेश्चित्**। उद्रथिः समुद्रः **५२९ सर्तेर्णिच्च**। सारथिः। **५३० खर्जिपिञ्जादिभ्य ऊरोलचौ**। खर्जूरः। कर्पूरः। वल्लूरं शुष्कमांसम्। पिञ्जूलं कुशवर्तिः। 'लङ्गेर्वृद्धिश्च' (गण २०१) लाङ्गलम्। कुसूलः। 'तमेर्वुग्वृद्धिश्च' (गण २०२)

पकरणयोः, पुल महत्त्वे, आभ्यां किन्दच् स्यात्, कचावितौ। **पुलिन्द इति**। कित्वान्न लघूपधगुणः। 'किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः। **कुपेर्वावश्च**। कुप कोपे, अस्मात् किन्दच्, धातोर्वकारः अन्तादेशश्च वेत्यर्थः। **कुविन्द इति**। 'तन्तुवायः कुविन्दः स्यात्' इत्यमरः। **नौ षञ्जेर्घथिन्**। नावुपपदे षञ्ज सङ्गे इत्यस्माद् घथिन् स्यादित्यर्थः। **निषङ्गथिरिति**। उपसर्गात्सुनोतीति षत्वम्। घथिनो घित्वात् 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। **उद्यतेश्चित्**। उदि उपपदे ऋ गतावित्यस्माद् घथिन्प्रत्ययः स च चिदित्यर्थः। **उदरथिरिति**। घथिनि कृते धातोर्गुणः। **सर्तेर्णिच्च**। सृ गतावित्यस्माद् घथिन् स्यात्, स च णिदित्यर्थः। **सारथिरिति**। णित्त्वाद् वृद्धिः। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः। **खर्जिपिञ्जादिभ्य ऊरोलचौ**। खर्ज पूजने च, पिञ्ज हिंसायामित्यादिभ्य ऊर ऊलच् इति प्रत्ययौ क्रमात्स्याताम्। खर्जादिभ्य ऊरः, पिञ्जादिभ्य ऊलजित्यर्थः। **कर्पूर इति**। कृपू सामर्थ्ये चेत्यस्माद्रूपम्। बाहुलकात्कृपो रो ल इति लत्वाभावः। **वल्लूरमिति**। वल वल्ल संवरणे इत्यत्र पठिताद्रूपम्। **लङ्गे-**

न चक्रुरेव मुग्धाङ्गनागोमयगोमुखानि' इति माघः। **नौ षञ्जेः**। षञ्ज सङ्गे। निपूर्वादस्माद् घथिन्स्यात्। 'उपसर्गात्सुनोति–' इत्यादिना षत्वम्। 'चजोः–' इति कुत्वम्। 'आभुरस्य निषङ्गथिः'। रथकूबर इत्यर्थः। **उद्य**। ऋ गतावुत्पूर्वादस्माद् घथिन् स्यात् स च चित्। **सर्तेः**। सृ गतावस्माद् घथिन् णित्स्यात्। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः। **खर्जि**। खर्ज मार्जने, पिञ्ज हिंसायाम्। खर्जादिभ्यः पिञ्जादिभ्यश्च यथाक्रमं ऊरऊलचौ स्तः। 'खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोः' इति मेदिनीहेमचन्द्रौ। कृपू सामर्थ्ये। बाहुलकात् 'कृपो रो लः' इति लत्वाभावः। 'अथ कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' इत्यमरः। वल्ल संवरणे। वल्लूरम्। 'उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्' इत्यमरः। एवं शालूरादयो द्रष्टव्याः। 'भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः' इत्यमरः। **लङ्गेः**। लगिर्गत्यर्थः। 'लाङ्गलं पुच्छशेफसोः' इति मेदिनी। **कुसूल इति**। कुस श्लेषणे दन्त्यसकारवान्। 'कुसूलं च कुसीदं च मध्यदन्त्यमुदा-

ताम्बूलम्। 'शृणातेर्दुग्वृद्धिश्च' (गण २०३)। शार्दूलः। 'दुकोः कुक्च' (गण २०४)। दुकूलम्। कुकूलम्। ५३१ **कुवश्चट् दीर्घश्च**। कूची चित्रलेखनिका। ५३२ **समीणः**। समीचः समुद्रः। समीची हरिणी। ५३३ **सिवेष्टेरू च**। सूचो दर्भाङ्कुर। सूची। ५३४ **शमेर्बन्**। शम्बो मुसलम्। ५३५ **उल्बादयश्च**। बन्नन्ता निपात्यन्ते। 'उच समवाये'। तस्य लत्वं

वृद्धिश्च। अगिवगिमगि इति दण्डकपठितो लगिरित्यर्थः। अस्मात्पिञ्जादेरूलच् सिद्धः। वृद्धिरपि भवतीत्यर्थः। **कुसूलमिति**। पिञ्जादित्वादूलच्। कुस श्लेषणे धातुः। **तमेर्बुग्वृद्धिश्च**। तमु ग्लानौ, अस्माद् ऊलच्संनियोगेन बुगागमः धातोर्वृद्धिश्च स्यात्। **तम्बूलमिति**। **शृणातेर्दुक् वृद्धिश्च**। शॄ हिंसायाम्, अस्माद् ऊलच्संनियोगेन दुगागमः वृद्धिश्च स्यातामित्यर्थः। **दुक्वोः कुक् च**। दु गतौ, कु शब्दे, आभ्यामूलच्संनियोगेन कुक् च निपात्यत इत्यर्थः। **कुवश्चड् दीर्घश्च**। कु शब्दे, अस्माच्चट्प्रत्ययोः दीर्घश्च धातोरित्यर्थः। कूचः कुचपर्यायः। 'कुचकूचौ स्तनौ मतौ' इति कोशात्। प्रत्ययस्य टित्त्वे फलमाह **कूचीति**। **समीणः**। सम्युपपदे इण् गताविरयस्मात् चट् स्यात्, दीर्घश्च धातोः। **समीच इति**। धातोर्दीर्घे रूपम्। टित्त्वफलं दर्शयन्नुदाहरति **समीचीति**। **सिवेष्टेरू च**। षिवु तन्तुसन्ताने, अस्माच्चट्प्रत्ययः स्यात्, धातोष्टेरूत्वं चेत्यर्थः। **शमेर्बन्**। शम उपशमे, अस्माद्बन् स्यात्। शम्ब इति रूपम्। **उल्बादयश्च**। एते बन्नन्ता निपात्यन्त इत्यर्थः। धातुं दर्शयति **उच समवाय इति**।

हतम्' इति विश्वः। ताम्बूलादयोऽप्यत्र द्रष्टव्याः। तमु ग्लानौ, वुग् दीर्घत्वं च। 'ताम्बूलो नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्' इति मेदिनी। शॄ हिंसायाम्, धातोर्वृद्धिर्दुगागमश्च। 'शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च पत्तने तूत्तरस्थितः' इति मेदिनीविश्वप्रकाशौ। उत्तरस्थित उत्तरपदभूतः। शार्दूलशब्दस्तु श्रेष्ठवाची राजशार्दूल इति यथा। दु गतौ, कुङ् शब्दे, अनयोः कुक् च। 'दुकूलं श्लक्ष्णवस्त्रे स्यात् क्षौमे च' इति मेदिनी। कुकूलं शङ्कुसङ्कीर्णे श्वभ्रे ना तु तुषानले' इति विश्वमेदिन्यौ। 'शिरीषादपि मृद्वङ्गी केयमायतलोचना। अयं क्व च कुकूलाऽग्निकर्कशो मदनानलः' इति प्रयोगश्च। **कुवः**। कु शब्दे। कूचः स्तनः। 'कुचकूचौ स्तनौ मतौ' इति विश्वः। **कूचीति**। टित्त्वान्ङीप्। **समीणः**। इण् गतावस्मात्सम्युपपदे चट् स्याद्दीर्घश्च धातोः। **सिवेः**। षिवु तन्तुसन्तानेऽस्माच्चट् प्रत्ययः स्याट्टेरूत्वं च टित्त्वान् ङीप्। 'सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे' इति मेदिनी। **शमेः**। शम उपशमे। 'शम्बः स्यान्मुसलाग्रस्थलोहमण्डलके पवौ।

गुणाभावश्च। उल्बो गर्भाशयः। शुल्बं ताम्रम्। बिल्वम्। निम्बः। बिम्बम्
५३६ स्थः स्तोऽम्बजबकौ। तिष्ठतेरम्बच् अबक एतौ स्तः, स्तादेशश्च।
'स्तम्बो गुच्छस्तृणादिनः'। स्तबकः पुष्पगुच्छः। ५३७ शाशपिभ्यां ददनौ।
'शादो जम्बालशष्पयोः'। शब्दः। ५३८ अब्दादयश्च। अवतीत्यब्दः।
'कौतेर्नुम्। (च)' (ग २०५)। कुन्दः। ५३९ वलिमलितनिभ्यः कयन्।

अस्माद्वनि चकारस्य ल वं धातोर्गुणाभावश्च निपात्यत इत्यर्थः। 'गर्भाशयो जरायुः स्याद् उल्बं तु कललोऽस्त्रियाम्' इत्यमरः। **शुल्बमिति**। शुच शोके, अस्माद् बनि चकारस्य लत्वं गुणाभावश्च निपात्यते। 'शुल्बं वराटकं स्त्री तु' इत्यमरः। **बिल्वमिति**। बिल भेदने, अस्माद्वन्। बवयोरभेदाद्बिल्वमित्यपि। **स्थः स्तोऽम्बजबकौ**। ष्ठा गतिनिवृत्तौ, अस्माद् अम्बच्, अबक इति प्रत्ययौ स्तः। तत्संनियोगेन धातोः स्तादेशश्च। स्तादेशस्यानेकाल्त्वात् सर्वादेशः। **स्तम्ब इति**। अमरकोशमाह **स्तम्बो गुच्छस्तृणादिन इति**। **शाशपिभ्यां ददनौ**। शो तनूकरणे, शप आक्रोशे, आभ्यां द-दन्प्रत्ययौ यथाक्रमं स्याताम्। अमरकोशस्थमाह **जम्बालशष्पयोरिति**। **शब्द इति**। 'झलां जश् झशि' इति जश्त्वम्। **अब्दादयश्च**। एते दन्नन्ता निपात्यन्ते। **अवतीत्यब्द इति**। वकारस्य बकारो निपात्यते। **कौतेर्नुम्**। कु शब्दे, अस्माद्दन्प्रत्ययः नुमागमश्चेत्यर्थः। **कुन्द इति**। 'माध्यं कुन्दं रक्तकस्तु' इति वनौषधिवर्गेऽमरः। **वलिमलित-**

शुभान्विते त्रिषु' इति विश्वमेदिन्यौ। **उल्बा**। **उल्बमिति**। 'गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियाम्' इत्यमरः। शुच शोके। चस्य लत्वं गुणाभावश्च प्राग्वत्। 'शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ' इति मेदिनीहेमचन्द्रौ। वी गतिप्रजनकान्त्यसनखादनेषु। अस्य नुमागमो ह्रस्वत्वं च। बवयोरभेदाद्बिम्बम्। 'बिम्बस्तु प्रतिबिम्बे स्यान्मण्डले पुंनपुंसकम्। बिम्बिकायः फले क्लीबं कृकलासे पुनः पुमान्' इति मेदिनी। **स्थः**। **स्तः**। ष्ठा गतिनिवृत्तौ। 'स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च' इति विश्वः। 'स्तम्बोऽप्रकाण्डद्रुमगुच्छयोः' इति मेदिनी। 'स्याद्गुच्छकस्तु स्तबकः' इत्यमरः। **शाशपि**। शो तनूकरणे, शप आक्रोशे। 'शादो जम्बालशष्पयोः' इत्यमरः। 'शष्पं बालतृणं घासः' इति च। 'शादः स्यात्कर्दमे शष्पे' इति मेदिनी। शब्दो निनादः। **अब्दादय**। एते दन्नन्ता निपात्यन्ते। अव रक्षणे। वस्य बः। 'अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान्' इति मेदिनी। **कौतेः**। कु शब्दे, 'कुन्दो माध्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' इति च मेदिनी। **वलिमलि**। वल संवरणे संचरणे च, मल मल्ल धारणे,

वलयम् । मलयः । तनयः । ५४० वृह्रोः षुग्दुकौ च । वृषय आश्रयः । हृदयम् । **५४१ मिपिभ्यां रुः** । मेरुः । पेरुः सूर्यः । बाहुलकात्पिबतेरपि । 'संवत्सरवपुः पारुः पेरुर्वासीर्दिनप्रणीः' । **५४२ जत्र्वादयश्च** । जत्रु जत्रुणी । अश्रु अश्रुणी । **५४३ रुशातिभ्यां क्रुन्** । रुरुर्मृगभेदः । शातयतीति शत्रुः । प्रज्ञादौ पाठाद् ह्रस्वत्वम् । **५४४ जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्त्वन्तन्निक-**

निभ्यः कयन् । वल संवरणे, मल धारणे, तनु विस्तारे, एभ्यः कयन्प्रत्ययः स्यात् । कयनः कित्त्वमुत्तरार्थम् । **वलयमिति** । **वृह्रोः षुग्दुकौ च** । वृञ् वरणे, हृञ् हरणे, आभ्यां कयन्स्यात्, यथासंख्यं षुक् दुक् चागमौ स्तः । **वृषय इति** । कयनः कित्त्वान्नेह गुणः । **हृदयमिति** । ह्रियते विषयैरिति हृदयम् । **मिपिभ्यां रुः** । डु मिञ् प्रक्षेपणे, रि पि गतावित्यत्र पठितः पिधातुर्गत्यर्थकः, आभ्यां रुप्रत्ययः स्यात् । **मेरुरिति** । रुप्रत्यये गुणः । 'मेरुः सुमेरुर्हेमाद्रिः' इत्यमरः । **जत्र्वादयश्च** । एते रुप्रत्ययान्ता निपात्यन्ते । **जत्रु इति** । जनी प्रादुर्भावे इत्यस्माद् रौ नकारस्य तकारो निपात्यते । **अश्रु इति** । अशू व्याप्तौ, अस्माद् रुप्रत्ययः । **रुशातिभ्यां क्रुन्** । रु गतौ, शद्लृ शातने ण्यन्तः । 'शदेरगतौ तः' इति तकारे शातीति निर्देशः । **रुरुरिति** । 'कृष्णसाररुरुन्यङ्कु' इत्यमरः । ननु शत्रुरित्यत्र कथं ह्रस्वत्वमित्याशङ्कायामाह **प्रज्ञादाविति** । **जनिदाच्युसृवृमदि** । जनी प्रादुर्भावे, डु दाञ्

तनु विस्तारे । 'वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम्' इति मेदिनी । 'मलयः पर्वतान्तरे । शैलांशे देश आरामे त्रिवृतायां तु योषिति' इति च । 'आत्मजस्तनयः सूनुः सुतः पुत्रः' इत्यमरः । **वृह्रोः** । वृञ् वरणे, हृञ् हरणे, आभ्यां कयन् स्यात्, यथाक्रमं षुग्दुकावागमौ च भवतः । कयनः कित्त्वं त्विह गुणाभावार्थम् । ह्रियते विषयैरिति हृदयं मनः । **मिपीभ्याम्** । डुमिञ् प्रक्षेपणे, पीङ् पाने । 'मेरुः सुमेरुर्हेमाद्रिः' इत्यमरः । पीयते रसानिति पेरुः । **पिबतेरिति** । पा पाने । छन्दोक्तिमाह **संवत्सरवपुरित्यादि** । **जत्र्वादयः** । रुप्रत्ययान्ता निपात्यन्ते । जनी प्रादुर्भावे । नकारस्य तकारः । जत्रुः स्कन्धसन्धिः । 'सन्धी तस्यैव जत्रुणी' इत्यमरः । तस्य पूर्वोक्तस्य स्कन्धस्य सन्धी इत्यर्थः । असु क्षेपणे, अशू व्याप्तौ संघाते च । अस्र अश्रु च नयनजलम् । शीङो ह्रस्वत्वं गुणागमश्च । 'शिग्रुर्ना शाकमात्रेऽपि शोभाञ्जनमहीरुहे' इति मेदिनी । **रुशाति** । रु शब्दे, शद्लृ शातने ण्यन्तः । 'कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः' इत्यमरः । 'रुरुर्दैत्ये मृगेऽपि च' इति मेदिनी । **जनिदा** । जनी प्रादुर्भावे, डुदाञ् दाने, च्युङ् गतौ, सृ गतौ, वृञ् वरणे, मदी हर्षे, षम ष्टम अवैकल्ये, णम प्रह्वत्वे शब्दे च, डुभृञ् धारणपोषणयोः ।

श्शक्स्यढडटाऽटचः। जनित्वौ मातापितरौ । दात्वो दाता । च्यौत्नो गन्ता सण्डजः सीघ्रपुण्यश्च । सृणिरङ्कुशश्चन्द्रः सूर्यो वायुश्च । वृश मार्द्रकं मूलकं च । मत्स्यः । षण्ढ । ङित्वाट्टिलोपः । नमतीति नटः शैलूषः । बिभर्ति भरटः कुलालो भृतकश्च । ५४५ अन्यभ्योऽपि दृश्यन्ते । पेत्वममृतम् । भृशम् । ५४६ कुसेरुम्भोमेदेताः । कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितो जनपदः ।

दाने, च्युङ् च्युतौ, स. गतौ, वृञ् वरणे, मदी हर्षे, षम अवैकल्ये, णमु प्रह्वत्वे शब्दे च, डु भृञ् धारणपोषणयोः, एभ्य इत्वन्, त्नण्, त्वन्, क्निन्, शक्, स्य, ढ, डट, अटच्, इति प्रत्ययाः स्युः । **च्यौत्न इति** । त्नणो णित्वाद्वृद्धिः । **सृणिरिति** । क्निनः कित्वान्न गुणः । **वृश इति** । कित्वान्न गुणः । **मत्स्य इति** । स्ये खरि चेति चर्त्वम् । **षण्ढ इति** । बाहुलकाद् धात्वादेरिति सो न । **नट इति** । डित्वाट्टिलोपः । टित्त्वान्नटी । **अन्येभ्योऽपि** । अन्येभ्योऽपि धातुभ्य इत्वन्नादयो भवन्तीत्यर्थः । **पेत्वमिति** पा पाने इत्यस्माद् इत्वनि आद् गुणः । **भृशमिति** । भृञः शक् कित्वान्न गुणः । **कुसेरुम्भोमेदेताः** । कुस श्लेषणे, अस्मादुम्भ, उम, ईद, इत, एते प्रत्ययाः स्युः । **कुसुम्भमिति** । बाहुलकान्न लघूपधगुणः । 'स्यान्म-

---

एभ्यो नवभ्यो यथासंख्यं नव स्युः । जनेरित्वन् । जनेरिडागमेनापि जनित्वेति रूपसिद्धाविकारोच्चारणमुत्तरार्थम् । **च्यौत्न इति** । त्नणो णित्वाद् वृद्धिः । **सृणिरिति** । क्निनः कित्वान्न गुणः । नित्त्वं तु आद्युदात्तार्थम् । 'सृवृषिभ्यां कित्' इति निप्रत्यये त्वन्तोदात्तः साधितः । **वृश इति** । शकः कित्वान्न गुणः । **मत्स्य इति** । स्यप्रत्यये चर्त्वेन दस्य तः । अन्तोदात्तोऽयम् । 'ऋतन्यञ्जि-' इति सूत्रे तु आद्युदात्तः साधितः **षण्ढ इति** । बाहुलकाद्धात्वादेः षस्य सकारो न । प्रत्ययादेर्ढस्य तु प्रयोजनाभावान्नेत्संज्ञा । 'शमेर्ढ' इति सूत्रे तु तालव्यादिः साधितः । 'सायं सायो भवेत्कोशः कोषः षण्ढश्च शण्डवत्' इति द्विरूपकोशः । 'षण्ढो वर्षवरः' इत्यमरः । **नट इति** । नमतेर्डट् । 'नटी नल्यौषधी स्त्री स्याच्छैलूषाशोकयोः पुमान्' इति मेदिनी । **भरट इति** । बिभर्तेरटच् । **अन्येभ्योऽपि** । इत्वन्नादयोऽनुवर्तन्ते । **पेत्वमिति** । पा पानेऽस्मादित्वन् । **भृशमिति** । भृञः शक् । **कुसेः** । कुस संश्लेषणेऽस्मादुम्भ उम ईद इत एते प्रत्ययाः स्युः । 'कुसुम्भं हेमनि महारजने ना कमण्डलौ' इति मेदिनी । 'कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः' इति च । 'कुसीदं जीवने वृद्ध्यां क्लीबं त्रिषु कुसीदके' इति च । इह सूत्रे तृतीयो ह्रस्वादिर्दीर्घादिश्च तन्त्रेणोपात्तः । 'वृषाकप्यग्नि-' इति सूत्रे ह्रस्वादिरेवेति वृत्तिकारहरदत्तादिग्रन्थोपष्टम्भेन निर्णीतम् । 'पारलौकिककुसीदमसीदत्' इति श्रीहर्षप्रयोगात्तु दीर्घादिरपि ।

५४७ सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः। सनोतेरसिप्रत्यये उपधावृद्धिश्च। सानसिर्हिरण्यम्। वृञो नुक् च। वर्णसिर्जलम्। पॄ, पर्णसिर्जलगृहम्। तड आघाते, तण्डुलाः। अकि लक्षणे, उशच्, अङ्कुशः। चषेरालः 'चषालो यूपकटकः'। इल्वलो दैत्यभेदः। पल्वलम्। ञि धृषा, ण्यः, अकारस्येकारः, धिष्ण्यम्। शलेर्यः, शल्यम्। 'वा पुंसि शल्यं

हारजते क्लीबं कुसुम्भं करके पुमान्' इत्यमरः। **सानसिवर्णसि**। षणु अदने इत्यादिभ्य इत्थं निपात्यन्त इत्यर्थः। सानसिरित्यत्राह **सनोतेरिति**। **उपधावृद्धिश्चेति**। धातोरकारस्येत्यर्थः। **वृञो नुक् चेति**। वृञ् वरणे, अस्मादसिः, धातोर्नुगागमश्चेत्यर्थः। धातोर्गुणे रषाभ्यामिति णत्वे च वर्णसिरिति रूपम्। **पर्णसिरिति**। पॄ पालनपूरणयोः, अस्मादसिप्रत्ययो नुक् च निपात्यते। धातोर्गुणे रषाभ्यामिति णत्वे रूपम्। तण्डुला इत्यत्राह **तडि आघाते इति**। अस्मादुलच्प्रत्ययः, नुम् च निपात्यते। इदित्त्वाद्वा नुम् सिद्धः। अनुस्वारपरसवर्णौ। अङ्कुश इत्यत्राह **अकि लक्षण इति**। इदित्त्वान्नुम्यनुस्वारपरसवर्णौ। चषाल इत्यत्राह **चषेरिति**। चष भक्षणे इत्यस्मादित्यर्थः। 'चषालो यूपकटकः' इत्यमरः। **इल्वल इति**। इलधातुः सौत्रः, तस्माद्वलच् गुणाभावश्च निपात्यते। **पल्वलेति**। पा पाने इत्यस्माद्वलच्, लगागमो निपात्यते, ह्रस्वत्वं च। पिबन्त्यस्मिन्नित्यधिकरणे

सानसि। **सनोतेरिति**। षणु दाने। **वृञो नुक् चेति**। वृञ् वरणेऽस्मादसिः। दशपाद्यां तु 'सानसिधर्णसि–' इति पठित्वा धृञो नुक् च धर्णसिर्लोकपाल इति व्याख्यातम्। युक्तं चैतद् 'धर्णसिं भूरिधायसम्' इत्यादिमन्त्रानुगुणत्वात्। **पर्णसिरिति**। पॄ पालनपूरणयोरस्मादसिप्रत्ययो नुक् च। **तण्डुला इति**। उलच्प्रत्ययो नुमागमश्च धातोः। त्रेधा तण्डुलान्विभजेत्। इह चित्स्वरः। 'तण्डुलः स्याद्विडङ्गे च धान्यादिनिकरे पुमान्' इति मेदिनी। **अङ्कुश इति**। अयमपि चित्स्वरेणान्तोदात्तः। तथाच मन्त्रः 'दीर्घं ह्यङ्कुशं यथा' इति 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। **चषेराल इति**। चष भक्षणे प्रत्ययस्वरेणाद्युदात्तः। उज्ज्वलदत्तस्त्वालजिति चितमाह। तन्न। 'चषालं ये अश्वयूपाय तक्षति'। 'चषालवन्तः स्वरवः पृथिव्याम्' इत्यादौ चित्स्वरादर्शनात्। अमरोक्तिमाह **चषाल इति**। **इल्वल इति**। इल स्वप्नप्रेरणयोः। वलच् गुणाभावः। 'इल्वलस्तारका राजभेदे ना दैत्यमत्स्ययोः' इति मेदिनी। 'इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः' इत्यमरः। पा पाने अस्माद्वलच् लुगागमः ह्रस्वत्वं च। पिबन्त्यस्मिन्निति पल्वलमल्पसरः। 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः। **इकार इति**। रपरत्वाभावो

शङ्कर्ना' । **५४८ मूशक्यविभ्यः क्लः** । मूलम् । शक्लः प्रियंवदे । अम्लो रसः । बाहुलकादमेः । अम्लः । **५४९ माछासासिभ्यो यः** । माया । छाया । सस्यम् । बाहुलकात्सुनोतेः । 'सव्यं दक्षिणवामयोः ।' **५५० जनेर्यक्** । 'ये विभाषा' (सू २३१९) । जन्यं युद्धम् । जाया भार्या । **५५१ अघ्न्यादयश्च** । यगन्ता निपात्यन्ते । हन्तेर्यक् अडागम उपधालोपश्च । अघ्न्या माहेयी ।

प्रत्ययः । **धिष्ण्य इति** । ञि धृषा प्रागल्भ्ये, अस्मात् ण्यप्रत्ययः, धातोरुपधाया ऋकारस्य इकारः, रपरत्वाभावः, गुणाभावश्च निपात्यते । 'धिष्ण्यं स्थाने गृहे भेऽग्नौ भाग्यं कर्म शुभाशुभम्' इत्यमरः । शल्यमित्यत्राह **शलेरिति** । शल गता-विल्पसादित्यर्थः । **मूशक्यविभ्यः क्लः** । मूङ् बन्धने, शक्लृ शक्तौ, अवि शब्दे, एभ्यः क्लप्रत्यय इत्यर्थः **मूलमिति** । कित्वान्न गुणः । **शक्ल इति** । 'दुर्मुखौ मुखराबद्धमुखौ, शक्लः प्रियंवदे' इत्यमरः । **माच्छासासिभ्यो यः** । मा माने, छो छेदने, षस स्वप्ने, एभ्यो यप्रत्यय इत्यर्थः । स्पष्टम् । **जनेर्यक्** । जन जनने, अस्मा-द्यक् इत्यर्थः । यकः किरं मुत्तरार्थम् । आत्वं स्मारयति **ये विभाषेति । अघ्न्या-दयश्च** । यगन्ता निपात्यन्ते । निपातनमेवाह **हन्तेरिति** । यक् अडागमश्च निपा-त्यते । उपधालोपस्तु गमहनजनखनेत्येव सिद्धः । उपधालोपे हो हन्तेरिति कुत्वम् ।

ण्यप्रत्ययश्चेति बोध्यम् । 'धिष्ण्यं स्थाने गृहे भेऽग्नौ' इत्यमरः । 'धिष्ण्यं स्थानाग्नि-सद्मसु । ऋक्षे शक्तौ च' इति मेदिनी । **शलेः** । शल गतौ । 'शल्यं तु न स्त्रियां शङ्कौ क्लीबं द्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति मेदिनी । 'धिष्ण्यं स्थाने च ऋक्षे च धिष्ण्योऽग्नौ धिष्ण्यमालये' इति धरणिः । **शलेः** । शल गतौ । 'शल्यं तु नस्त्रियां शङ्कौ क्लीबं द्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति मेदिनी । **मूशकि** । मूङ् बन्धने, शक्लृ शक्तौ, अवि शब्दे । 'मूलं शिफाद्ययोः । मूलं विक्तन्तिके' इति मेदिनी । 'शक्लः प्रियंवदे' इति विशेष्यनिघ्नेऽमरः । **अमेरिति** । अम रोगे चुरादिरण्यन्तः । बाहुलकादेव वोपधाह्रस्वः । 'अम्लो रसविशेषे स्यादम्ला चाङ्गेरिकौषधौ' इति मेदिनी । **माछा** । मा माने, छो छेदने, षस स्वप्ने । 'माया स्याच्छाम्बरीबुद्ध्योर्मायः पीताम्बरे' इति मेदिनी । 'छाया स्यादातपाभावे प्रतिबिम्बार्क-योषितोः । पालनोत्कोचयोः कान्तिसच्छोभापङ्क्तिषु स्त्रियाम्' इति विश्वमेदिन्यौ । 'वृक्षादीनां फलं सस्यम्' इत्यमरः । **सुनोतेरिति** । षुञ् अभिषवे, 'सव्यं वामे प्रतीपे च' इति मेदिनी । **जनेः** । जन जनने । यकः कित्वमुत्तरार्थम् । 'जन्यं हट्टे परीवादे सङ्ग्रामे च नपुंसकम् । जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान् । त्रिषूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः । स्निग्धे' इति मेदिनी । आत्वपक्षे रूपमाह **जायेति । अघ्न्या** ।

अघ्न्यः प्रजापतिः । कनी दीप्तौ, कन्या । बवयोरैक्यम् वन्ध्या । ५५२ स्नामदिपद्यर्तिपृशकिभ्यो वनिप् । स्नावा रसिकः । मद्वा शिवः । पद्वा पन्थाः । 'अर्वा तुरङ्गगर्ह्ययोः' । पर्व ग्रन्थिः प्रस्तावश्च । शक्वा हस्ती । ङीब्रौ, शक्वरी अङ्गुलिः । ५५३ शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् । शीवा अजगरः । क्रुश्वा सृगालः । रुह्वा वृक्षः । जित्वा जेता । क्षित्वा वायुः । सृत्वा प्रजापतिः । धृत्वा विष्णुः । ५५४ ध्याप्योः संप्रसारणं च । धीवा कर्मकरः । पीवा

अघ्न्येति । स्त्रियां टाप् । 'अर्जुन्यघ्न्या रोहिणी स्यात्' इत्यमरः । कन्येति । यकि रूपम् । बन्ध बन्धने, अस्माद्यकि बन्ध्येत्येव स्यात्, न तु वन्ध्येतीत्यत आह बवयोरिति । स्नामदिपद्यर्ति । ष्णा शौचे, मदी हर्षे, पद गतौ, ऋ गतौ, पॄ पालनपूरणयोः, शक्लृ शक्तौ, एभ्यो वनिप् स्यात् । स्नावेति । उपधादीर्घनलोपादि । अर्वेति । ऋधातोर्वनिपि गुणः । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः । ङीब्राविति । वनो र चेत्यनेनेत्यर्थः । शीङ्क्रुशिरुहि । शीङ् स्वप्ने, क्रुश आह्वाने, रुह बीजजन्मनि, जि जये, क्षि निवासगत्योः, सृ गतौ, धृ धारणे, एभ्यः क्वनिप् स्यात् । जित्वेति । क्वनिपः पित्त्वात् ह्रस्वस्य पिति कृतीति

अघ्न्य इति । यकः कित्त्वाद् 'गमहन-' इत्युपधालोपे 'हो हन्तेः-' इति कुत्वेन हस्य घः । अडागममनुक्त्वा नञ्पूर्वाद्धन्तेर्यगित्यन्ये । अघ्न्येति । स्त्रियां टाप् । 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी । अर्जुन्यघ्न्या रोहिणी स्यात्' इत्यमरः । संपूर्वाद्धाञो यक् आतो लोपश्च । 'संध्या पितृप्रसूनद्यन्तरयोर्युगसन्धिषु' इति मेदिनी । 'कन्या कुमारिकागौर्योरोषधीराशिभेदयोः' इति विश्वमेदिन्यौ । वन्ध्येति । बन्ध बन्धने । 'बन्ध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजस्त्रियाम्' इति मेदिनी । कौतेर्यति डुक् । कुड्यमित्युज्ज्वलदत्तः । 'यतो नावः' इत्याद्युदात्तः । ड्यत्प्रत्ययान्तोऽयमन्तोदात्त इत्यन्ये इति । 'निवाते वातत्राणे' इति सूत्रे वृत्तिः । डित्वाट्टिलोपे सति कित्करणं व्यर्थं स्यादिति गुणप्रतिषेधार्थात्ककाराद्ङकारस्येत्त्वं नेति तत्रैव हरदत्तः । एवं स्थितेऽघ्न्यादयो यगन्ता इति प्रायोवादः । स्नामदि । ष्णा शौचे । मदी हर्षे, पद गतौ, ऋ गतौ पॄ पालनपूरणयोः, शक्लृ शक्तौ । 'अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः' इति मेदिनी । 'पर्व क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि' इति च । ङीब्राविति । 'वनो र च' इत्यनेन । अङ्गुलिरिति । एतच्च 'आरोहितं दर्शतं शक्वरीर्मम' इत्यादिमन्त्रव्याख्यायां स्पष्टम् । 'शक्वरी छन्दसो भेदे नदीमेखलयोरपि' इति मेदिनी । शीङ् । शीङ् स्वप्ने, क्रुश आह्वाने रोदने च, रुह बीजजन्मनि प्रादुर्भावे च, जि जये, क्षि निवासगत्योः,

स्थूलः। ४५५ अदेर्ध च। अध्वा। ४५६ प्र ईरशदोस्तुट् च। प्रेत्वा प्रशत्वा च सागरः। प्रेत्वरी प्रशत्वरी च नदी। ४५७ सर्वधातुभ्य इन्। पचिरग्निः। तुडिः। तुण्डिः। वलिः। वटिः। यजिः। देवयजिः। काशत इति काशिः। यतिः। मल्लिः। मल्ली। केलिः। मसी परिणामे, मसिः। बाहुलकाद्गुणः। कोटिः। हेलिः। बोधिः। नन्दिः। कलिः। ४५८ हृपिषिरुहिवृति-

---

तुक्। एवं जित्वा सत्वेत्यादि। ध्याप्योः संप्रसारणं च। ध्यै चिन्तायम्, प्यैङ् वृद्धौ, आभ्यां क्वनिप् स्यात्, संप्रसारणं चेत्यर्थः। धीवेति। संप्रसारणे इकारे हल इति दीर्घः। अदेर्ध च। अद भक्षणे, अस्मात्क्वनिप् धकारश्चान्तादेश इत्यर्थः। प्र ईरशदोस्तुट् च। ईर गतौ, शद्लृ शातने, आभ्यां प्रे उपपदे क्वनिप् स्यात् तस्य तुडागमश्च। प्रेत्वेति। प्र ईत्वेति स्थिते आद्गुणः। प्रेत्वरीति। वनो र चेति ङीप्, रश्चान्तादेशः। एवं प्रशत्वरीति। सर्वधातुभ्य इन्। सर्वेभ्योऽपि धातुभ्य इन्प्रत्यय इत्यर्थः। पचिरिति। डुपचष् पाके, अस्मादिन्प्रत्ययः। ननु कोटिरित्यत्र गाङ्कुटादिभ्य इतीन्प्रत्ययस्य ङित्त्वात्कथं गुण इत्यत्राह बाहुलकादिति। हृपिषिरुहिवृति। हृञ् हरणे, पिष्लृ संचूर्णने, रुह बीजजन्मनि, वृतु वर्तने, विद ज्ञाने, छिदिर् द्वैधीकरणे, कृत संशब्दने, एभ्य इन्प्रत्यय इत्यर्थः। पूर्वसूत्रेणैव सिद्धे इदं वचनम्, अच इः,

---

सृ गतौ, धृञ् धारणे। ध्याप्योः। ध्यै चिन्तायाम्, प्यैङ् वृद्धौ, आभ्यां क्वनिप्स्यात्संप्रसारणं च। धातोर्हल इति दीर्घः। अदेः। अद भक्षणेऽस्मात्क्वनिप् धकारश्चान्तादेशः। अध्वा मार्गः। प्र ईरः। ईर गतौ, शद्लृ शातने, आभ्यां प्रपूर्वाभ्यां क्वनिप्स्यात्तस्य तुडागमश्च। प्रेत्वरीति। स्त्रियाम् 'वनो र च' इति ङीप्। सर्वधातुभ्य इन्। डुपचष् पाके, तुडि तोडने, तोडनं दारणं हिंसनं च, वल संवरणे, वट वेष्टने, यज देवपूजादौ, काशृ दीप्तौ, यती प्रयत्ने। 'यतिः स्त्री पाठविच्छेदे निकारयतिनोः पुमान्' इति मेदिनी। मल मल्ल धारणे, केलृ चलने भ्वादिः, केला विलासे कण्ड्वादिः, किल श्वैत्यक्रीडनयोः तुदादिः, कुट कौटिल्ये, हिल भावकरणे, बुध अवगमने, टुनदि समृद्धौ, कल शब्दसंख्यानयोः। 'गाङ्कुटादिभ्यः–' इति ङित्वाद् गुणाभावमाशङ्क्याह बाहुलकादिति। 'कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः' इति मेदिनी। 'बोधिः पुंसि समाधिश्च भेदे पिप्पलपादपे' इति च। 'नन्दिर्द्यूताङ्ग आनन्दे स्त्री नन्दिकेश्वरे पुमान्' इति च। इह इणित्येव सूत्रम्। सर्वधातुभ्य इति तु प्रक्षिप्तं व्यर्थं च। एवं 'सर्वधातुभ्यः ष्ट्रन्' इत्यादावपि बोध्यमित्याहुः। अतएव दशपाद्यां ष्ट्रन्नित्येव पठितमिति दिक्। हृपिषि। हृञ्

विदिच्छिदिकीर्तिभ्यश्च । 'हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ । चन्द्रे कीले प्लवङ्गे च यमे वाते च कीर्तितः ।' पेषिर्वज्रम् । रोहिर्मृगी । वर्तिः । वेदिः । छेदिश्छेत्ता । कीर्तिः । ५५९ इगुपधात्कित् । कृषिः । ऋषिः । शुचिः । लिपिः । बाहुलकाद्रस्वे लिबिः । तूल निष्कर्षे । तूलिः । तूली कूर्चिका । ५६० भ्रमेः संप्रसारणं च । भृमिर्वातः । बाहुलकाद् भ्रमिः । ५६१ क्रमि-

---

इगुपधादिति कप्रत्ययः, एतदुभयबाधनार्थम् । **हरिरिति** । इनि गुणः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । अत्र अच इः प्राप्तः । **पेषिरिति** । इगुपधात्कः प्राप्तः । **इगुपधात्कित्** । इन्नित्यनुवर्तते । अन्येभ्योऽपि इगुपधेभ्यो धातुभ्य इन्प्रत्ययः स्यात्, स च किदित्यर्थः । पूर्वसूत्रे पिषादीनां ग्रहणं कित्त्वाभावार्थम् । अत एव पेषिरिति गुणः सिध्यति । **कृषिरिति** । कित्त्वान्न गुणः । कृष विलेखने धातुः । **भ्रमेः संप्रसारणं च** । भ्रमु अनवस्थाने, अस्मादिन् स्यात्, स च कित्संप्रसारणं चेत्यर्थः । **भृमिरिति** । कित्त्वान्न गुणः । ननु कथं भ्रमिरित्यत आह **बाहुलका-**

हरणे, पिष्लृ संचूर्णने, रुह बीजजन्मनि प्रादुर्भावे च, वृतु वर्तने । वर्तिर्दीपोपकरणम् । विद सत्तायाम् । विद्यते पुण्यमस्यामिति वेदिः, 'वेदिः परिष्कृता भूमिः' । छिदिर् द्वैधीकरणे, कॄत संशब्दने, हरतेः कीर्तयतेश्च 'अच इः' इति प्राप्ते इतरेषां तु 'इगुपधात्–' इति कप्रत्यये प्राप्ते वचनमिदम् । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । 'हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु । कपौ सिंहे हरेऽजेंऽशौ शक्रे लोकान्तरे पुमान् । वाच्यवत्पिङ्गहरितो.' इति मेदिनी । 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः । गात्रानुलेपनी दीपदशादीपेषु योषिति' इति मेदिनी । 'वेदिः स्यान्मण्डले पुमान् । स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले' इति च । 'कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि च' इति विश्वः । **इगुपधात्** । कृष विलेखने, ऋषी गतौ, शुच शोके, लिप उपदेहे, इत्यादेरिगुपधाद्धातोरिन्स्यात्स च कित् । केचित्तु इगुपधात्किरिति पठित्वा इणोऽपवादः किप्रत्यय इति व्याचख्युः । तन्न । प्रत्ययस्वरेण ऋष्यादीनामन्तोदात्ततापत्तेः । न चेष्टापत्तिः, 'अग्निः पूर्वेभिर्ऋषिभिः' 'ऋषिर्विप्रः काव्येन' 'शुचिर्विप्रः शुचिः कविः' इत्यादौ ऋषिशुचिप्रभृतीनामाद्युदात्तत्वदर्शनात् । न चैवम् 'अक्षैर्मा दीव्यः कृषिमित्कृषस्व' इत्यादौ कृषिशब्दस्यान्तोदात्तता न सिध्येदिति वाच्यम् । 'इक्कृष्यादिभ्यः' इतीक्प्रत्यये सत्यन्तोदात्तत्वसिद्धेः । 'ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्' इति मेदिनी । 'शुचिर्ग्रीष्माग्निश्शृङ्गारेष्वाषाढे शुद्धमन्त्रिणि' इति च । **भ्रमेः** । भ्रमु अनवस्थानेऽस्मादि-

तमिशतिस्तम्भामत इच्च । क्रिमिः । संप्रसारणानुवृत्तेः कृमिरपि । तिमिर्मत्स्यभेदः । 'शितिर्मेचकशुक्लयोः' । स्तिभिः समुद्रः । ४६२ मनेरुच्च । मुनिः । ४६३ वर्णेर्वलिश्चाहिरण्ये । वर्णिः सौत्रः । अस्य वलिरादेशः । 'करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियाम्' । वबयोरैक्याद् वलिः । हिरण्ये तु वर्णिः सुवर्णम् । ४६४ वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् । वासिश्छेदनवस्तुनि वापिः । वापी । याजिर्यष्टा । राजिः । राजी ।

दिति । क्रमितमिशतिस्तम्भामत इच्च । क्रमु पादविक्षेपे, तमु काङ्क्षायाम्, शतिः स्तम्भश्च सौत्रः, एभ्य इन्स्यात्स च कित् । एषामकारस्य इकारादेशश्च । क्रिमिरिति । अत इत्वे रूपम् । कृमिरित्यर्थमाह संप्रसारणमित्यनुवृत्तेरिति । संप्रसारणेत्वे च पर्यायेण भवतः, संप्रसारणपक्षे इत्वस्य फलाभावात् संप्रसारणाचेति पूर्वरूपे विशेषाभावात् । मनेरुच्च । मन ज्ञाने, अस्मादिन्प्रत्ययः अकारस्य उकारश्चेत्यर्थः । मुनिरिति । कित्त्वान्न गुणः । 'वाचंयमो मुनिः' इत्यमरः । वर्णेर्वलिश्चाहिरण्ये । वर्ण धातोर्धातुपाठेऽदर्शनादाह वर्णिः सौत्र इति । अस्मादिन् स्याद् अहिरण्येऽभिधेये बलिरादेशश्चेत्यर्थः । वसिवपियजिराजि । वस निवासे, डुवप् बीजसन्ताने, यज देवपूजादौ, राजृ दीप्तौ, व्रज गतौ, षद्लृ विशरणादौ, हन हिंसागत्योः, वाशृ शब्दे, वद व्यक्तायां वाचि ण्यन्तः, वृञ् वरणे ण्यन्तः, एभ्य

न्स्यात् स च कित् संप्रसरणं च । 'भूर्मि चिद्यथा वसवः पुषन्ति' इति मन्त्रे भूर्मि भरणशीलं दरिद्रं जनमिति वेदभाष्यम् । क्रमि । क्रमु पादविक्षेपे, तमु काङ्क्षायाम्, शतिस्तम्भौ सौत्रौ, एभ्य इन्स्यात्स च कित् । एषामत इकारादेशश्च । क्रिमिः क्षुद्रजन्तुः । 'कृमिर्ना क्रिमिवत्कीटे लाक्षायां क्रिमिले खरे' इति विश्वमेदिन्यौ । 'पारतं पारदं वास्रो वासरः क्रिमिवत्कृमिः' इति द्विरूपकोशः । तिमिरिति । 'अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिंगिलः । तिमिंगिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति लक्ष्मण' इति रामायणे सप्तमे काण्डे रामवाक्यम् । केचित्तु 'तद्गिलोऽप्यस्ति राघव' इति पठित्वा राघवं प्रति लक्ष्मणवाक्यमित्याहुः । 'शितिः कृष्णे सिते भूर्जे' इति विश्वः । 'शितिर्भूर्जे ना सितासितयोस्त्रिषु' इति मेदिनी । मनेः । मन ज्ञाने अस्मादिन्स्यात्स च किद् अकारस्योकारादेशश्च स्यात् । मन्यते जानातीति मुनिः । 'मुनिः पुमान्वसिष्ठादौ वङ्गसेनतरौ जिने' इति मेदिनी । वर्णेः । अस्मादिन्स्यात्स च कित् । 'बलिर्दैत्यप्रभेदे च करचामरदण्डयोः । उपहारे पुमान्स्त्री तु जरया श्लथचर्मणि । गृहदारुप्रभेदे च जठरवयवेऽपि च' इति मेदिनी । वसि । वस निवासे, डुवप् बीजसन्ताने, यज देवपूजादौ, राजृ दीप्तौ, व्रज गतौ, षद्लृ विशरणादौ, हन

व्राजिर्वातालिः । सादिः सारथिः । निघातिर्लोहघातिनी । वाशिरग्निः । वादिर्विद्वान् वारिर्गजबन्धनी । जले तु क्लीबम् । बाहुलकाद्धारिः पथिकसंहतौ । ५६५ नहो भश्च । नाभिः स्यात्क्षत्रिये पुंसि । प्राण्यङ्गे तु स्त्रियाम् । पुंस्यपीति केचित् । ५६६ कृषेर्वृद्धिश्छन्दसि । कार्षिः । ५६७ शॄः शकुनौ । शारिः शारिका । ५६८ कृञ उदीचां कारुषु । कारिः शिल्पी । ५६९ जनिघसि-

---

इञ्प्रत्यय इत्यर्थः । वाशिरिति । इञो ञित्त्वादुपधावृद्धिः । शेषं स्पष्टम् । नहो भश्च । णह बन्धने, अस्मादिञ् स्यात् हकारस्य भकारश्च । नाभिरिति रूपम् । कृषेर्वृद्धिश्छन्दसि । कृष विलेखने इत्यस्मादिञ् वृद्धिश्चेत्यर्थः । कार्षिरिति । ऋकारस्य आर् वृद्धिः । लोके तु इगुपधात्किदित्यनेन इनि कृषिरित्येव । शॄः शकुनौ । शॄ हिंसायामस्माच्छकुनौ वाच्ये इञ् स्यात् । शारिरिति । इञो ञित्वाद् वृद्धिः । कृञ उदीचां कारुषु । डु कृञ् करणे, अस्मात्कारुषु शिल्पिषु वाच्येषु इञ् स्यात् । कारिः । जनिघसिभ्यामिण् ।

हिंसागत्योः, वाशृ शब्दे, वद व्यक्तायां वाचि णयन्तः, वृञ् वरणे णयन्तः । वासिरिति दन्त्यसकारवान् । सूत्रेऽष्टमस्तु तालव्यशकारवान् । अयमपि छेदनसाधने प्रयुज्यते । वास्यादीनामिव करणानां कर्तृव्यापार्यत्वनियमादिति वैशेषिकाः । वास्यर्थमित्यत्र 'स्कोः–' इति सलोपः प्राप्नोतीति भाष्यम् । वापिरुदकाधारः । वापी प्रसिद्धा । 'राजिः स्त्री पङ्क्तिरेखयोः' इति मेदिनी । इह वादीति णयन्तनिर्देशोऽपि बाहुलकादणयन्तादपि इञ्, तथा च भूवादिसूत्रे वदन्तीति वादयो वाचका इति न्यासकारादयः । 'वारिः स्मृता सरस्वत्यां वारि ह्रीबेरनीरयोः । वारी घटीभवन्धन्योः' इति विश्वः । हृञ् हरणेऽस्मादिञ् । 'हारिः पथिकसन्तानद्यूतादिभङ्गयोः स्त्रियाम्' इति मेदिनी । नहः । णह बन्धनेऽस्मादिञ् स्यात् । भश्चान्तादेशः । स्त्रियामिति । लिङ्गानुशासने स्त्रियामित्यधिकारे 'नाभिरक्षत्रिये' इति सूत्रितत्वादिति भावः । पुंस्यपीति । तथा च मेदिनी । 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे' इति । भारविश्च पुंसि प्रायुङ्क्त, 'समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः' इति । कृषेः । कृष विलेखनेऽस्मादिञ् वृद्धिश्च । 'इको गुणवृद्धी' इतीकः स्थाने एव वृद्धिरित्युदाहरति कार्षिरिति । भाषायां तु कृषिरित्येव । शॄः । शॄ हिंसायामस्माच्छकुनौ वाच्ये इञ् स्यात् । 'शारिर्नाक्षोपकरणे स्त्रियां शकुनिकान्तरे । युद्धार्थगजपर्याणे व्यवहारान्तरेऽपि च' इति मेदिनी । कपिलिकादित्वाल्लत्वम् । 'शालिस्तु कलमादौ च गन्धमार्जारके पुमान्' इति मेदिनी । कृञः । करोतेरिञ् स्यादुदीचां मते कारुषु वाच्येषु । 'कारिः स्त्रियां क्रियायां स्याद्वा-

भ्यामिण् । जनिर्जननम् । घासिर्भक्ष्यमग्निश्च । **५७० अज्यतिभ्यां च ।** आजिः संग्रामः । आतिः पक्षी । **५७१ पादे च ।** पदाजिः । पदातिः । **५७२ अशिपणाय्योः रुडायलुकौ च ।** अशेरुट् । राशिः पुञ्जः । पणायतेराय-लुक् । पाणिः करः । **५७३ वातेर्डिच्च ।** विः पक्षी । स्त्रियां वीत्यपि । **५७४ प्रे हरतेः कूपे ।** प्रहिः कूपः । **५७५ नौ व्यो यलोपः पूर्वस्य च दीर्घः ।**

जनी प्रादुर्भावे, घस्लृ भक्षणे आभ्यामिण् स्यात् । **जनिरिति ।** जनिवध्योश्चेति निषेधः । **अज्यतिभ्यां च ।** अज गतिक्षेपणयोः, अत सातत्यगमने, आभ्या-मिण् स्यात् । **आजिरिति ।** इण्युपधावृद्धिः । वीभावस्तु बाहुलकान्न । 'समे क्ष्मांशे रणेऽप्याजिः इत्यमरः । **पादे च ।** पादशब्दे उपपदे अज अत आभ्यां इण् स्यादित्यर्थः । **पदाजिरिति ।** 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः । **अशि-पणाय्योः ।** अशू व्याप्तौ, पण व्यवहारे, आयप्रत्ययान्तः, अशिश्च पणायिश्च तयो-रिति विग्रहः । आभ्यामिण् स्यात् । अनयोर्यथाक्रमं रुडागम आयप्रत्ययलुक् एतौ स्याताम् । **राशिरिति ।** रुडागमे उपधावृद्धौ च रूपम् । **पाणिरिति ।** इणि आयप्रत्ययस्य लुकि अत उपधाया वृद्धौ रूपम् । **वातेर्डिच्च ।** वा गतिगन्धनयोः, अस्मादिण् स्यात्, स च डित्, डित्त्वाट्टिलोपः, तदाह **विरिति ।** 'नगौको-वाजिविकिरविविष्किरपतत्त्रयः' इत्यमरः । **स्त्रियामिति ।** कृदिकारादक्तिन इति ङीष् । **प्रे हरतेः कूपे ।** प्रपूर्वाद् हृञ् हरणे इत्यस्मादिण् स्यात्, स च डिदि-त्यर्थः । तदाह **प्रहिरिति ।** डित्त्वाट्टिलोपः । 'पुंस्येवान्धुः प्रहिः कूपः' इत्यमरः । **नौ व्यो यलोपः ।** नावुपपदे व्येञ् संवरणे इत्यस्मादिण् स्यात्, स च डित्,

---

च्यलिङ्गस्तु शिल्पिनि' इति मेदिनी । **जनि ।** जनी प्रादुर्भावे, घस्लृ अदने, आभ्या-मिण् 'जनिवध्योश्च' इति वृद्धिप्रतिषेधः । जनिरिति स्त्रीलिङ्गम् । 'कृदिकारात्–' इति पक्षे ङीष् । 'जनी सीमन्तिनीवध्वोरुत्पत्तावौषधीभिदि' इति मेदिनी । **अज्य ।** अज गतिक्षेपणयोः, अत सातत्यगमने । बाहुलकादजेर्वीभावो न । **पादे च ।** पादो-पपदे 'अज्यतिभ्यामिण्' । 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः । पदाजिः पादचारी । पदातिपत्तिपदगपादातिकपदाजयः । पद्गश्च पदिकश्च' इत्यमरः । **अशि-पणाय्योः–।** अशिश्च पणायिश्चाशिपणायी, तयोरिति विग्रहः । अशू व्याप्तौ, पण व्यवहारे आयप्रत्ययान्तः, आभ्यामिण् स्यादनयोर्यथाक्रमं रुडायप्रत्ययलुकौ च भवतः । 'राशिर्मेषादिपुञ्जयोः' इति मेदिनी । **वातेः ।** वा गतिगन्धनयोरस्मादिण् स्यात् । डित्त्वाट्टिलोपः । **प्रेहर ।** प्रपूर्वाद्धरतेः कूपे वाच्ये इण् । 'पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा' इत्यमरः । **नौव्यो ।** व्येञ् संवरणे । स्त्रीकटीवस्त्रबन्धेऽपि नीवी

व्येञ इण् स्याद् यलोपश्च नेर्दीर्घः । नीविः नीवी । वस्त्रग्रन्थौ मूलधने च । ५७६ **समाने ख्यः स चोदात्तः** । समानशब्दे उपपदे ख्या इत्यस्मादिण् स्यात् , स च डिच्च यलोपश्च । समानस्य तूदात्तः स इत्यादेशश्च । समानं ख्यायते जनैरिति सखा । ५७७ **आङि श्रिहनिभ्यां ह्रस्वश्च** । इण् स्यात्स च डित् , आङो ह्रस्वश्च । अश्रयः पाल्यश्रिकोटयः । सर्पे वृत्रासुरेऽप्यहिः ।

धातुयकारस्य लोपः, उपसर्गेकारस्य दीर्घश्चेत्यर्थः । **नीविरिति** । व्येञ्धातोरिणि डित्त्वाट्टिलोपे धातुयकारस्य लोपे नेर्दीर्घे च रूपम् । 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च इत्यमरः । परिपणं मूलधनम्, तदाह **वस्त्रग्रन्थौ मूलधने चेति** । **समाने ख्यः** । समानशब्दे उपपदे ख्या प्रकथन इत्यस्माद् इण् स्यात् । स चोदात्त इत्यत्र सः च उदात्त इति छेदः । एवं च स च इण् डित्स्याद्यलोपश्च । समानस्य तूदात्तः, स इत्यादेशश्चेत्यर्थः । समानशब्दस्य सादेशे सखेति रूपम् । **आङि श्रिहनिभ्यां ह्रस्वश्च** । आङि उपपदे श्रिञ् सेवायाम्, हन हिंसागत्योः, आभ्यामिण् स्यात् , स च डित् , आङो ह्रस्वश्चेत्यर्थः । अश्रिः । अहिः ।

परिपणेऽपि च' इत्यमरः । परिपणो मूलधनम् । **समाने** । ख्या प्रकथने । इण् स्यादिति । यत्तूज्ज्वलदत्तेनोक्तमिञ् स्यात्स चोदात्त इति । तन्न । संनिहितेन 'जनिघसिभ्यामिण्' इत्यनेन 'वसिवपियजि–' इत्यादिना विहितस्येञो विच्छिन्नत्वात् । यद्यपि तेनैव 'नौ व्यः' इति पूर्वसूत्रे उक्तमिञत्रानुवर्तते न त्विण् । उत्तरसूत्रे उदात्तवचनाज्ज्ञापकादिति । तदपि न । स चोदात्त इति हि नायं धातोः परत्र विहितं प्रत्ययं निर्देष्टुं तच्छब्दः, किंतु समानशब्दस्य स्थाने विधीयमानमादेशं निर्देष्टुं शब्दस्वरूपपरः । तथा च कथं ज्ञापकता स्यात् । यदपि स इञ् उदात्त इति व्याख्याय समानस्य सभाव इति प्रक्रियास्मरणमात्रं कृतं तदपि न । सभावविधायकस्याभावात् । यदपि स्वरमञ्जरीकारादिभिरुक्तं 'समानस्य च्छन्दसि' इति सूत्रेण सभाव इति तदपि न, लोके सखिशब्दस्यासाधुत्वापत्तेः । अपि च 'सखा सखायमब्रवीत्' 'सखा सख्ये अपचन्' 'सखायस्त्वा वव्रमहे' । सखा सखिभ्य ईड्यः' इत्यादिमन्त्रेषु सर्वत्र सखिशब्द आद्युदात्त एवेति निर्विवादम् । एवं च इञुदात्त इत्युज्ज्वलदत्तादिव्याख्यानं वेदवार्तानभिज्ञत्वप्रयुक्तमेवेति दिक् । **आङि** । श्रिञ् सेवायाम् , हन हिंसागत्योः । अमरोक्तिमाह **स्त्रिय इति** । एवं च 'सुप्रातसुश्व–' इति सूत्रे चतुरश्रेति तालव्यपाठः संगच्छत एव । तत्सूत्रे केषांचिद्दन्त्यपाठस्तु एतत्सूत्रापर्यालोचनामूलक एवेत्यवधेयम् । नन्वेवं चतुरस्रमिति दन्त्यप्रयोगस्य कथं निर्वाह इति चेदत्राहुः—अकारान्तेन दन्त्यगर्भिणास्रशब्देन विग्रहे तत्प्रयोगः साधीयान् । न च तादृशे शब्दे

५७८ अच इः। रविः। पविः। तरिः। कविः। अरिः। अलिः। ५७९ खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च। खनिः। कषिः हिंस्रः। अजिः। असिः। वसिर्वस्त्रम्। वनिरग्निः। सनिर्भक्तिर्दानं च। ध्वनिः। ग्रन्थिः। चलिः पशुः। ५८० वृतेश्छन्दसि। वर्तिः। ५८१ भुजेः किच्च। भुजिः। ५८२ कृगृशृपृकुटिभिदिछिदिभ्यश्च। इः कित्स्यात्। किरिर्वराहः।

अत्रामरोक्तिमाह स्त्रिय इत्यादिना। अच इः। धातोरित्यस्य विशेषणात्तदन्तविधिः। अजन्ताद्धातोरित्यर्थः। रविरिति। रु शब्दे अस्मादिप्रत्ययः। डिदित्यननुवर्तनाद् न टिलोपः। पविरिति। पूञ् पवने। खनिकष्यज्यसिवसि। खनु अवदारणे, कष हिंसायाम्, अज गतिक्षेपणयोः, असु क्षेपणे, वस आच्छादने, वन षण संभक्तौ, ध्वन शब्दे, ग्रन्थ बन्धने, चल कम्पने, एभ्य इप्रत्ययः स्यात्। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। अजिरिति। बाहुलकाद्वीभावाभावः। वृतेश्छन्दसि वृतु वर्तने अस्मादिः स्यात्। वर्तिरिति। लघूपधगुणः। भुजेः किच्च। भुज पालनाभ्यवहरणयोः, अस्मादिः कित्स्यात्। छन्दसि क्वचिल्लोकेऽपि प्रयुज्यते। कृगृशृपृकुटि। कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्,

विप्रतिपत्तव्यम्। 'अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते' इति मेदिनीकोशादिति। 'अहिर्वृत्रासुरे सर्पे' इति मेदिनी। अच इः। अजन्ताद्धातोरिः स्यात्। रु शब्दे, पूञ् पवने, पविर्वज्रम्। तॄ प्लवनतरणयोः, तरिर्वस्त्रादिस्थापनभाण्डम्। 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः। कु शब्दे। 'कविर्वाल्मीकिशुक्रयोः। सूरौ काव्यकरे पुंसि स्यात्खलीने तु योषिति' इति मेदिनी। ऋ गतौ अरिः शत्रुः। कपिलकादित्वाद्विकल्पिकं लत्वम्। अलिर्भ्रमरः। खनिः। खनु अवदारणे। कष खषेति दण्डके हिंसार्थकः। अज गतिक्षेपणयोः, असु क्षेपणे, वस आच्छादने, वन षण संभक्तौ, वनु याचने, षणु दाने, ध्वन शब्दे, ग्रन्थ बन्धने उभौ चुरादौ, चल कम्पने, एभ्य इः स्यात्। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। ण्यन्ताद् 'अच इः' इति इप्रत्यये खानिरपि। 'खनिरेव मता खानिः' इति द्विरूपकोशः। 'ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः' इति मेदिनी। 'ग्रन्थिर्ना पर्वपरुषी' इत्यमरः। वनिरग्निरिति। वनु याचने इत्यस्मादिप्रत्यये वनिर्याच्ञा इत्याहुः। चलिः पशुरिति। चरिभ्यश्चेति पाठान्तरम्। चर गतौ, चरतिर्भक्षणेऽपि। चरिः पशुः। वृतेः। वृतु वर्तनेऽस्मादिः स्यात्। बाहुलकाल्लोकेऽपि 'साज्यं च वर्तिसंयुक्तम्' इति प्रयोगः। 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनीदीपदशादीपेषु योषिति' इति मेदिनी। भुजेः। भुज पालनाभ्यवहारयोरस्मादिः स्यात्स च कित्। भुजिरग्निः।

गिरिर्गोत्रार्त्तिरोगयोः । गिरिया काणः गिरिकाणः । शिरिः शलभो हन्ता च । पुरिर्नगरं राजा नदी च । कुटिः शाखा शरीरं च । भिदिर्वज्रम् । छिदिः परशुः ।
५८३ कुडिकम्प्योर्नलोपश्च । कुडि दाहे । कुडिर्देहः । कपिः ।
५८४ सर्वधातुभ्यो मनिन् । क्रियत इति कर्म । चर्म । भस्म । जन्म । शर्म । स्थाम बलम् । इस्मन्निति ह्रस्वः । छद्म । सुत्रामा । **५८५ बृंहेर्नोऽच्च** ।

पॄ पालनपूरणयोः, कुट कौटिल्ये, भिदिर् विदारणे, छिदिर् द्वैधीकरणे, एभ्य इप्रत्ययः स्यात्, स च किदित्यर्थः । **किरिरिति** । ॠत इदिति इत्वम्, रपरत्वम् । 'वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । **गिरिरिति** । 'अद्रि-गोत्रगिरिग्रावा' इत्यमरः । **पुरिरिति** । उदोष्ठ्यपूर्वस्य इत्युत्वम् । **कुडिकम्प्योर्न-लोपश्च** । कुडि दाहे, कपि चलने, आभ्याम् इः कित्स्यात् । धातोर्नलोपश्चेत्यर्थः । प्रत्ययस्य कित्त्वेऽपीदित्वान्न नलोपप्राप्तिः, अतस्तद्विधानम् । **कुडिरिति** । कित्वाच्च लघूपधगुणः । **कपिरिति** । 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः' इत्यमरः । **सर्वधातुभ्यो मनिन्** । सर्वेभ्योऽपि धातुभ्यो मनिन्स्यात् । **कर्मेति** । डु कृञ् करणे, अस्मान्मनिनि गुणः । **चर्मेति** । चर गतौ । **सुत्रामेति** । त्रैङ् पालने, सुष्ठु त्रायत इति सुत्रामा । **बृंहेर्नोऽच्च** । बृंहेः नः अत् इति च्छेदः । बृहि वृद्धौ अस्मान्मनिन् नुमा निष्पन्नस्य नकारस्याकारश्चेत्यर्थः । नकारस्याकारे ऋकारस्य

कॄगॄशॄ । कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, पॄ पालनपूरणयोः, कुट कौटिल्ये, भिदिर् विदारणे, छिदिर् द्वैधीकरणे । 'वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । 'इगुपधज्ञाप्रीकिरः–' इति कप्रत्यये किर इत्यकारान्तोऽपि । 'त्वचि त्वचः किरोऽपि स्यात् किरौ प्रोक्तः पयः पथि इति द्विरूपकोशः । गिरिर्ना नेत्ररु-ग्भिदि । अस्त्री गिरिजके योषिद्वोर्ण्यो पूज्ये पुनस्त्रिषु' इति मेदिनी । **कुटिरिति** । ङीषि तु कुटी 'कुटीशमीशुण्डाभ्यो रः' कुटीरः । 'कुटिः कीटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदास्यां च सुरायां चित्रगुच्छके' इति मेदिनी । **कुडि** । कुडि दाहे, कपि चलने, आभ्यामिः कित्स्याद्धातोर्नलोपश्च । 'कपिर्ना सिह्के शाखामृगे च मधुसूदने' इति च । **सर्वधातुभ्यः** । डुकृञ् करणे, चर गतौ, चरतिर्भक्षणेऽपि, जन जनने, भस भर्त्सनदीप्त्योः, शॄ हिंसायाम्, शर्म सुखे, ष्ठा गतिनिवृत्तौ, छद अपवारणे चुरादिः, त्रैङ् पालने । सुष्ठु त्रायते इति सुत्रामा इन्द्रः । 'कर्मण्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्' इति रुद्रः । 'चर्म कृत्तौ च फलके' इति मेदिनी । **बृंहेः** । बृहि वृद्धावस्मान्मनिन्नुमो नकारस्याकारे ऋकारस्य यण्-देशः । 'ब्रह्म तत्त्वं तपो वेदे न द्वयोः पुंसि वेधसि । ऋत्विग्योगभिदोर्विप्रे' इति

नकारस्याकारः। 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः'। ५८६ **अशिशकिभ्यां छन्दसि**। अश्मा। शक्मा। ५८७ **हृभृधृसृस्तृशृभ्य इमनिच्**। हरिमा कालः। भरिमा कुटुम्बम्। धरिमा रूपम्। सरिमा वायुः। स्तरिमा तल्पम्। शरिमा प्रसवः। ५८८ **जनिमृङ्भ्यामिमनिन्**। जनिमा जन्म। मरिमा मृत्युः। ५८९ **वेञः सर्वत्र**। छन्दसि भाषायां चेत्यर्थः। वेमा तन्तुवायदण्डः। अर्धर्चादिः। सामनी वेमनी इति वृत्तिः। ५९० **नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धामन्**। सप्त अमी निपात्यन्ते। म्नायतेऽनेनेति नाम। सिनोतेर्दीर्घः। सीमा सीमानौ

यणादेशः। अमरकोशमाह **ब्रह्म तत्त्वं तपो वेद इति**। **अशिशकिभ्यां छन्दसि**। अशू व्याप्तौ, शक्लृ शक्तौ, आभ्यां मनिन्स्यादित्यर्थः। **अश्मेति**। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इत्यमरः। **हृधृभृसृ**। हृञ् हरणे, डु भृञ् धारणपोषणयोः, धृ धारणे, सृ गतौ, स्तॄञ् आच्छादने, शॄ हिंसायाम्, एभ्य इमनिच्प्रत्यय इत्यर्थः। **हरिमेति**। इमनिचि इच्चावितौ, धातोर्गुणः। **जनिमृङ्भ्यामिमनिन्**। जन जनने, मृङ् प्राणत्यागे, आभ्यामिमनिन्स्यात्, नित्स्वरो विशेषः। **वेञः सर्वत्र**। वेञ् तन्तुसन्ताने अस्मादिमनिन्प्रत्ययः छन्दसि लोके च भवतीत्यर्थः। **वेमेति**। 'पुंसि वेमा वायदण्डः' इत्यमरः। **नामन्सीमन्व्योमन्**। **निपात्यन्त इति**। मनिन्नन्ता इति शेषः। निपातप्रकारमेवाह **म्नायत इति**। म्ना अभ्यास इत्यस्मान्मनिनि धातोर्नाभावो निपात्यते। अथवा आदेर्मकारस्य लोपो निपात्यत इत्यर्थः। **सिनोतेरिति**। षिञ् बन्धने, अस्मान्म-

---

मेदिनी। **अशि**। अशू व्याप्तौ संघाते च, शक्लृ शक्तौ, शक्मा इन्द्रः। छन्दसीत्यस्य शकिना संबन्धो न त्वशिना। अतएव 'अश्मानमारोपयतः स्मरारेः' इति प्रयोगः। **हृभृ**। 'हृञ् हरणे, डुभृञ् धारणपोषणयोः, धृ धारणे, सृ गतौ, स्तॄञ् आच्छादने, शॄ हिंसायाम्। **शरिमेति**–। एतच्चोज्ज्वलदत्तरीत्योक्तम्। दशपाद्यां तु शृणातिर्न पठ्यते तत्स्थाने सृधातुं प्रक्षिप्य प्रत्ययं च दीर्घादिं नितं च कृत्वा, स्तृसृभ्यामीमनिजिति पठ्यते, छन्दोग्रहणं चानुवर्तितम्। युक्तं चैतत्। 'पिपृतां नो भरीमभिः'। 'वातस्य सर्गो अभवत्सरीमणि'। स्तीर्णं बर्हिः सुष्टरीमा जुषाणा'। 'यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिः' इत्यादिमन्त्राणां तद्भाष्यस्य चानुगुणत्वात्। उक्तप्रयोगाणां भाषायामदर्शनेन च्छन्दोऽनुवृत्तेर्न्याय्यत्वाच्च। अतएव 'वेञः सर्वत्रे'ति सूत्रे सर्वत्रग्रहणं करिष्यति। **जनि**। जन जनने, मृङ् प्राणत्यागे। **वेञः**। वेञ् तन्तुसन्ताने। **निपात्यन्त इति**। मनिनन्ता इति शेषः। म्ना अभ्यासे। मलोपो नाभावो वा। नाम संज्ञा। षिञ् बन्धने। 'सीमसीमे स्त्रियामुभे' इत्यमरः। व्येञ्

सीमानः । पक्षे डाप् सीमे सीमाः । व्येञोऽन्त्यस्योत्वं गुणः । व्योम । रौतेः रोम । लोम । पाप्मा पापम् । धाम परिमाणं तेजश्च । **५६१ मिथुने मनिः ।** उपसर्गक्रियासंबन्धो मिथुनम् । न तु स्त्रीपुंसौ । स्वरार्थमिदम् । सुशर्मा । **५६२ सातिभ्यां मनिन्मनिणौ ।** स्यतीति साम । सामनी । आत्मा । **५६३ हनिमशिभ्यां सिकन् ।** हंसिका हंसयोषिति । मक्षिका । **५६४ कोररन् ।** कवरः । **५६५ गिर उडच् ।** गरुडः । **५६६ इन्देः कमिन्नलोपश्च ।** इदम् ।

निनि धातोर्दीर्घो निपात्यत इत्यर्थः । **पक्षे डाबिति ।** डाबुभाभ्यामन्यतरस्यामित्यनेन । **व्येञ इति ।** व्येञ् संवरणे, अस्मान्मनिनि एकारस्योत्वं निपातनात् । 'व्योम पुष्करमम्बरम्' इत्यमरः । **रौतेरिति ।** रु शब्दे । **लोमेति ।** लूञ् छेदने । **पाप्मेति ।** पा पाने अस्मान्मनिनि पुगागमो निपात्यते । **मिथुने मनिः ।** मिथुनशब्दार्थं व्याचष्टे **उपसर्गक्रियासंबन्ध इति ।** स एवेह विवक्षित इति भावः । एवं च सोपसर्गाद्धातोर्मनिप्रत्यय इत्यर्थः । ननु सर्वधातुभ्यो मनिन्निति मनिनैव सिद्धे किमर्थं मनिप्रत्ययविधिक्लेश इत्यत आह **स्वरार्थमिति ।** नित्स्वरो मध्योदात्तः स्यादिति भावः । **सातिभ्यां मनिन्मनिणौ ।** षो अन्तकर्मणि, अत सातत्यगमने, आभ्यां यथाक्रमं मनिन् मनिण एतौ स्त इत्यर्थः । **सामेति ।** मनिनि 'आदेचः–' इत्यात्त्वम् । **आत्मेति ।** मनिणो णित्त्वादुपधावृद्धिः । **हनिमशिभ्यां सिकन् ।** हन् हिंसागत्योः, मश शब्दे, आभ्यां सिकनित्यर्थः । **हंसिकेति । मक्षिकेति ।** शस्य व्रश्चेति षत्वे, षढोरिति कत्वम्, षत्वं च । **कोररन् ।** कु शब्दे अस्मादरन्प्रत्यय इत्यर्थः । **कवर इति ।** गुणः अवादेशः । **गिर उडच् ।** गॄ

संवरणे, रु शब्दे, रोम गात्रकेशः । लूञ् छेदने । लोमश एव । पा पाने पुगागमः । ध्यै चिन्तायाम् । बाहुलकादन्येभ्योऽपि । यक्ष पूजायाम् । 'क्षयः शोषश्च यक्ष्मा च' इत्यमरः । षू प्रेरणे, सोमा चन्द्रः । डुधाञ् धारणपोषणयोः । 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति मेदिनी । **मिथुने ।** शॄ हिंसायाम्, सुष्ठु शृणाति इति सुशर्मा राजविशेषः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदम् । मनिनि तु मध्योदात्तं स्यात् । **साति ।** षोऽन्तकर्मणि, अत सातत्यगमने, आभ्यां यथासंख्यमेतौ स्तः । स्यति दुःखयति दुरध्येयत्वात्साम । 'साम क्लीबमुपायस्य भेदे वेदान्तरेऽपि च' इति मेदिनी । 'आत्मा पुंसि स्वभावे स्यात्प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि' इति च । **हनि ।** हन हिंसागत्योः, मश शब्दे रोषकृते च । 'मक्षिका भम्भराली स्यात्' इति हारावली । **कोररन् ।** कु शब्दे । कवरः पाठकः । बवयोरैक्यात्कबरी केशविन्यासः । 'जानपद–' इति ङीष् । अन्यत्र कबरा । **गिरः ।**

५९७ कायतेर्डिमि । किम् । ५९८ सर्वधातुभ्यः ष्ट्रन् । वस्त्रम् । अस्त्रम् । शस्त्रम् । ह्रस्वन्निति ह्रस्वत्वम् । छादनाच्छत्रम् । ५९९ भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च । भ्राष्ट्रः । गान्त्रं शकटम् । नान्त्रं स्तोत्रम् । हान्त्रं मरणम् । वैष्ट्रं पिष्टपम् । आष्ट्रमाकाशम् । ६०० दिवेर्द्युश्च । द्यौत्रं ज्योतिः । ६०१ उषिखनिभ्यां कित् । उष्ट्रः । खात्रं खनित्रं जलाधारश्च । ६०२

निगरणे, अस्मादुडन् स्यात् । 'गरुत्मान्गरुडस्तार्क्ष्यः' इत्यमरः । **इन्देः कमिर्नलोपश्च** । इदि परमैश्वर्ये, अस्मात्कमिः स्यान्नकारलोपश्चेत्यर्थः । **इदमिति** । सर्वनामशब्दोऽयम् । **कायतेर्डिमिः** । कै शब्दे, अस्माड्डिमिप्रत्यय इत्यर्थः । डित्वाट्टिलोपः । अयमपि सर्वादिरेव । **सर्वधातुभ्यः ष्ट्रन्** । सर्वेभ्योऽपि धातुभ्यः ष्ट्रन्प्रत्यय इत्यर्थः । **वस्त्रमिति** । वस आच्छादने । **छादनादिति** । छद अपवारणे ण्यन्तः । **भ्रस्जिगमिनमि** । भ्रस्ज पाके, गम्लृ गतौ, णम प्रह्वत्वे शब्दे च, हन हिंसागत्योः, विश प्रवेशने, अशू व्याप्तौ, एभ्यः ष्ट्रन् स्यात्, एषां वृद्धिश्च **भ्राष्ट्र इति** । व्रश्चेति षत्वम्, वृद्धिः । 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना इत्यमरः । **दिवेर्द्युश्च** । दिवु क्रीडादौ, अस्मात्ष्ट्रन् स्यात्, धातोर्द्युदादेशो वृद्धिश्च । द्यौत्र-

---

गॄ निगरणे । केचित्तु सूत्रमिदं परित्यज्य गरुता डयत इति विगृह्य डीङो डप्रत्यये पृषोदरादित्वाद्गरुतस्तकारलोपे गरुडशब्दं क्लेशेन व्युत्पादयन्ति । **इन्देः** । इदि परमैश्वर्ये । उज्ज्वलदत्तस्तु कमिन्निति नितं पपाठ, तच्चिन्त्यम् । 'इदं त्यत्पात्रमिन्द्रपानम्' । 'इदं ते सोम्यं मधु' इत्यादौ नित्स्वराभावात् । दशपाद्यां तु 'इणो दमक्' इति सूत्रितम् । इदमिति सर्वनामशब्दोऽयं संनिहितपरामर्शी । **कायतेः** । कै गै शब्दे । प्रयोजनाभावादेव मकारस्येत्संज्ञाविरहे सिद्धे डिमेरिकार उच्चारणार्थः । डकारस्तु टिलोपार्थः । दशपाद्यां तु मान्तमेव डिमिति सूत्रितम् । किमिति सर्वनाम । **सर्वधातुभ्यः** । दशपाद्यां तु अर्थात्सर्वधातुभ्यो भविष्यतीत्याशयेन ष्ट्रन्नित्येव सूत्रितम् । अतएवाधिकं प्रक्षिप्तमित्याहुः । वस निवासे, असु क्षेपणे, शसु हिंसायाम् , छद अपवारणे ण्यन्तः । 'अस्त्रं प्रहरणे चापे करवाले नपुंसकम्' इति मेदिनी । पत्लृ गतौ । 'पत्रं तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः' इति मेदिनी । पा पाने । पात्रम् । षित्वान् ङीष् 'पात्र्यमत्रे त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि । तीरद्वयान्तरे योग्ये' इति मेदिनी । दंश दशने 'व्रश्च–' आदिना षत्वे ष्टुत्वे षितां ङीषोऽनित्यत्वाट्टाप् । दंष्ट्रा । **भ्रस्ज** । भ्रस्ज पाके, गम्लृ गतौ, णम प्रह्वत्वे शब्दे च, हन हिंसागत्योः, विश प्रवेशने, अशू व्याप्तौ, एभ्यः ष्ट्रन् स्यादेषां वृद्धिश्च । **भ्राष्ट्र इति** । संयोगादिलोपः । 'व्रश्च–' इति षत्वे ष्टुत्वम् । 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः । वैष्ट्रं विष्टपम् ।

सिविमुच्योष्टेरू च। सूत्रम्। मूत्रम्। ६०३ **अमिचिमिदिशसिभ्यः क्त्रः।** आन्त्रम्। चित्रम्। मित्रम्। शस्त्रम्। ६०४ **पुवो ह्रस्वश्च।** पुत्रः। ६०५ **स्त्यायतेर्ड्रट्।** स्त्री। ६०६ **गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः।**

मिति रूपम्। **उषिखनिभ्यां कित्।** उष दाहे, खनु अवदारणे, आभ्यां ष्ट्रन् कित्स्यात्। **उष्ट्र इति।** 'उष्ट्रे क्रमेलकमयमहाङ्गाः' इत्यमरः। **खात्रमिति।** 'जनसनखनां सञ्झलोः' इत्यात्वम्। **सिविमुच्योष्टेरू च।** षिवु तन्तुसन्ताने, मुच्लृ मोक्षणे, आभ्यां ष्ट्रन् कित्स्यात्। **सूत्रमिति।** सिव्धातोः ष्ट्रनि च्छ्वोरिति वस्य ऊठि, उपधाया ऊकारे, सवर्णदीर्घे रूपम्। ष्ट्रन्निति ष्टुत्वसंपन्नस्य निर्देशः। षस्येत्त्वे त्रनिति शिष्यते। **मूत्रमिति।** टेरूत्वे रूपम्। **अमिचिमिदि।** अम गत्यादिदिषु, चिञ् चयने, ञि मिदा स्नेहने, शसु हिंसायाम्, एभ्यः क्त्रप्रत्यय इत्यर्थः। **आन्त्रमिति।** अनुनासिकस्य क्वीति दीर्घः। शेषं स्पष्टम्। **पुवो ह्रस्वश्च।** पूञ् पवने, अस्मात्क्त्रः स्यात्, धातोर्ह्रस्वत्वं च। **पुत्र इति।** कित्त्वान्न गुणः। **स्त्यायतेर्ड्रट्।** स्त्यै ष्ट्यै शब्दसङ्घातयोः अस्माड्ड्रट् स्यात्। **स्त्रीति।** डित्त्वाट्टिलोपः। 'लोपो व्योः–' इति यलोपः। टित्त्वान्ङीप्। 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः। **गुधृवीपचि।** गुङ् अव्यक्ते शब्दे, धृञ् धारणे, वी

दिवेः। दिवु क्रीडादावस्मात् ष्ट्रन् स्याद् द्युदादेशो वृद्धिश्च धातोः। **उषि।** उष दाहे, खनु अवदारणे, आभ्यां ष्ट्रन् कित्स्यात्। उष्ट्रः क्रमेलकः। 'उष्ट्रे क्रमेलकमयमहाङ्गाः' इत्यमरः। **सिवि।** षिवु तन्तुसन्ताने, मुच्लृ मोक्षणे, आभ्यां ष्ट्रन्कित्स्यात् टेरूकारादेशश्च। सूत्रिमूत्रिभ्यां चुरादिण्यन्ताभ्यामेरचा रूपसिद्धावाद्युदात्तार्थमिदं सूत्रम्। न च घञा तत्सिद्धिः, 'एरच्' इत्यस्य घञो बाधकत्वात्। 'सूत्रं तु सूचनाग्रन्थे सूत्रतन्तुव्यवस्थयोः' इति विश्वः। **अमि।** अम गतिशब्दसंभक्तिषु, चिञ् चयने, ञिमिदा स्नेहने, शसु हिंसायाम्। **आन्त्रमिति।** 'अनुनासिकस्य–' इति दीर्घः। 'श्रोणिलम्बिपुरुषान्त्रमेखलाम्' इति कालिदासः। आलेख्याश्चर्ययोश्चित्रम्, इत्यमरः। मित्रं सुहृदि न द्वयोः। सूर्ये पुंसि' इति मेदिनी। 'शस्त्रं लोहास्त्रयोः क्लीबं छुरिकायां तु योषिति' इति च। प्रत्ययस्वरेणैतेऽन्तोदात्ताः। 'शुन आन्त्राणि पेचे'। 'चित्रं देवानाम्'। 'मित्रं नयम्'। 'शस्त्रस्य शस्त्रमसि' इत्यादि। **पुवः।** पूञ् पवनेऽस्मात्क्तः स्याद् धातोर्ह्रस्वत्वं च। पुनाति स्ववंशानिति पुत्रः। पुंनाम्नो नरकस्तस्मात् त्रायते इत्यर्थे 'आतोऽनुपसर्गे कः' इति कप्रत्यये पुत्र इति व्युत्पत्त्यन्तरम्। **स्त्यायतेः।** स्त्यै ष्ट्यै शब्दसंघातयोः। **स्त्रीति।** डित्वाट्टिलोपः। 'लोपो व्योः–' इति यलोपः। टित्वान्ङीप्। 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः'

'गोत्रं स्यान्नामवंशयोः' । गोत्रा पृथिवी । धत्रं गृहम् । वेत्रम् । पक्त्रम् । वक्त्रम् । यन्त्रम् । सत्त्रम् । छत्त्रम् । ६०७ **हुयामाश्रुभसिभ्यस्त्रन्** । होत्रम् । यात्रा । मात्रा । श्रोत्रम् । भस्त्रा । ६०८ **गमेरा च** । गात्रम् । ६०९ **दादिभ्यश्छन्दसि** । दात्रम् । पात्रम् । ६१० **भूवादिगृभ्यो णित्रन्** । भावित्रम् । वादित्रम् । गारित्रमोदनम् । ६११ **चरेर्वृत्ते** । चारित्रम् । ६१२ **अशित्रादिभ्य इत्रोत्रौ** ।

गतिप्रजननादौ, डु पचष् पाके, वच परिभाषणे, यम उपरमे, षद्लृ विशरणादौ, त्सदिः सौत्रः, एभ्यस्त्रप्रत्यय इत्यर्थः । **गोत्रमिति** । त्रे गुणः । 'अद्रिगोत्रगिरिग्रावा' 'सन्ततिर्गोत्रजनन' इति चामरः । **सत्त्रमिति** । 'सत्त्रमाच्छादने यज्ञे सदादाने वनेऽपि च' इत्यमरः । **हुयामा** । हु दानादानयोः, या प्रापणे, मा माने, श्रु श्रवणे, भस भर्त्सनदीप्त्योः, एभ्यस्त्रन्प्रत्यय इत्यर्थः । 'भस्त्रा चर्मप्रसेविका' इत्यमरः । **गमेरा च** । गम्लृ गतौ, अस्मात्त्रन्स्यात्, धातोरन्त्यस्य मकारस्य आकारश्चेत्यर्थः । **गात्रमिति** । **दादिभ्यश्छन्दसि** । दाप् लवने इत्यादिभ्यस्त्रन्स्यात् छन्दसि । **दात्रमिति** । 'दात्रं लवित्रमाबन्धः' इत्यमरः । **पात्रमिति** । 'योग्यभाजनयोः पात्रम्' इत्यमरः । **भूवादिगृभ्यो** । भू सत्तायाम्, वद व्यक्तायां वाचि णयन्तः, गॄ निगरणे, एभ्यो णित्रन् स्यात् । **भावित्रमिति** । णित्वाद् वृद्धिः । **वादित्रमिति** । 'चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः । **चरेर्वृत्ते** ।

इत्यमरः । **गुधृ** । गुङ् अव्यक्ते शब्दे, धृञ् धारणे, वी गतिप्रजनादौ, डुपचष् पाके वच परिभाषणे, यम उपरमे, षद्लृ विशरणगत्यादौ, त्सद इति सौत्रः । 'गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः । संभावनीयबोधे च काननक्षेत्रवर्त्मसु' इति मेदिनी । 'सत्रमाच्छादने यज्ञे सदादाने धनेऽपि च' इत्यमरः । 'सत्रं यज्ञसदादानच्छादनारण्यकैतवे' इति मेदिनी । क्षत्त्रं ब्राह्मणानन्तरजातिः । **हुयामा** । हु दानादनयोः, या प्रापणे, मा माने, श्रु श्रवणे, भस भर्त्सनदीप्त्योः । होत्रमाहुतिः । होत्राशब्द ऋत्विक्ष्वपि स्त्रीलिङ्ग इति 'होत्राभ्यश्छः' इति सूत्रे हरदत्तादयः । 'यात्रा तु यातनेऽपि स्याद्गमनोत्सवयोः स्त्रियाम्' इति मेदिनी । 'मात्रा कर्णविभूषायां वित्ते माने परिच्छदे । अक्षरावयवे स्वल्पे क्लीबं कात्स्न्येऽवधारणे' इति च । 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । 'भस्त्रा चर्मप्रसेविका' इति च । **गमेः** । गम्लृ गतावस्मात् त्रन्स्याद्धातोराकारान्तादेशश्च । 'गात्रमङ्गे कलेवरे । स्तम्बेरमाग्रजङ्घादिविभागेऽपि समीरितम्' इति विश्वः । **दादिभ्यः** । दाप् लवने एवमादिभ्यस्त्रन् । दात्रं धान्यादिच्छेदनसाधनम् । पा पाने, 'योग्यभाजनयोः पात्रम्' इत्यमरः । क्षि निवासगत्योः । क्षेत्रमित्यादि योज्यम् । **भूवादि** । भू सत्तायाम् । भावित्रं

अशित्रम् । वहित्रम् । धरित्री मही । त्रैङ् एवमादिभ्य उत्रः । त्रोत्रं प्रहरणम् । वृञ् वरुत्रं प्रावरणम् । ६१३ अमेर्द्विषति चित् । अमित्रः शत्रुः । ६१४ आः समिणनिकषिभ्याम् । संपूर्वादिणो निपूर्वात्कषेश्च आ स्यात् । स्वरादित्वादव्ययत्वम् । समया । निकषा । ६१५ चितेः कणः कश्च । बाहुलकादगुणः । 'चिक्कणं मसृणं स्निग्धम्' । ६१६ सूचेः स्मन् । सूक्ष्मम् । ६१७ पातेर्डुम्सुन् । पुमान् । ६१८ रुचिभुजिभ्यां किष्यन् । रुचिष्यमिष्टम् ।

चर गतावस्माण्णित्रन् स्याद् वृत्ते गम्ये । **चारित्रमिति** । णित्वादुपधावृद्धिः । **अशित्रादिभ्य इत्रोत्रौ** । अशिश्च त्रश्च अशित्रौ, तौ आदी येषामिति विग्रहः । द्वन्द्वान्ते श्रूयमाणस्यादिशब्दस्य प्रत्येकं योगः । अश्वादि त्रादि एभ्यः क्रमाद् इत्र उत्र इत्येतौ प्रत्ययौ स्तः । **अशित्रमिति** । अशू व्याप्तौ अस्मादित्रः । **वहित्रमिति** । वह प्रापणे । **धरित्रीति** । धृञ् धारणे गौरादित्वान्ङीष् । **त्रोत्रमिति** । त्रैङ् पालने, आत्वे आद्गुणः । **अमेर्द्विषति चित्** । अम गत्यादौ, अस्माद् इत्रः स्यात्, स च चित् शत्रौ वाच्ये । 'द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः' इत्यमरः । **आ समिण्** । संपूर्वक इण् गतौ, निपूर्वककषः हिंसार्थकः, आभ्यामा स्यात् । **समयेति** । गुणेऽयादेशे रूपम् । 'समयान्तिकमध्ययोः' इत्यमरः । **चितेः कणः क च** । चिती संज्ञाने, अस्मात् कणप्रत्ययः, धातोरन्त्यस्य च ककारादेश इत्यर्थः । अमरकोशमाह **चिक्कणमिति । सूचेः स्मन्** । सूच पैशुन्ये चुरादिण्यन्तः, अस्मात्स्मनि णिलोपे कुत्वे षत्वे च सूक्ष्ममिति रूपम् । **पातेर्डुम्सुन्** । पा रक्षणे

त्रैलोक्यम् । वद व्यक्तायां वाचि ण्यन्तः । वादित्रं तूर्यादि । गॄ निगरणे । **चरेः** । चर गतौ, अस्माण्णित्रन्स्याद् वृत्ते वाच्ये । 'वृत्तं पद्ये चरित्रे च' इत्यमरः । ननु इत्रन्प्रत्यये चरित्रमित्युक्तं ततश्च प्रज्ञादण्णि चारित्रमिति सिद्धौ किमनेनेति चेत् । मैवम् । स्वरे विशेषात् । **अशि** । अशू व्याप्तावेवमादिभ्य इत्रः, त्रैङ् पालने एवमादिभ्य उत्रश्च स्यात् । **वहित्रमिति** । वह प्रापणे । **धरित्रीति** । धृञ् धारणे गौरादित्वाद् ङीष् । **अमेः** । अम गतौ अस्मादित्रः स्यात्स च चित् । उत्रस्तु नानुवर्तते अस्वरितत्वात् । मित्रं नेति विग्रहे त्वमित्रमिति नपुंसकम् । **आः समिण्** । इण् गतौ, अस्मादाप्रत्यये गुणे सत्ययादेशः । **कषेरिति** । कषखषेति दण्डकः । समयानिकषाशब्दौ समीपवाचकौ, बाहुलकाद् । दुषेः दोषा । दिवेराप्रत्यये बाहुलकादेवास्य गुणाभावे दिवा । स्वदेराप्रत्यये बाहुलकादेव धातोर्धान्तादेशश्च, स्वधेत्यादि । **चितेः** । चिती संज्ञानेऽस्मात्कणः प्रत्ययः स्यात्कश्चान्तादेशः । अमरोक्तमाह **चिक्कणमिति । सूचेः** । सूच पैशुन्ये चुरादिरस्मात्स्मन् णिलोपः । कुत्वषत्वे ।

भुजिष्यो. दासः । ६१९ वसेस्तिः । 'वस्तिर्नाभेरधो द्वयोः'। 'वस्तयः स्युर्दशासूत्रे'। बाहुलकात् शासः शास्तिः राजदण्डः। विन्ध्याख्यमगमस्यतीत्यगस्तिः। शकन्ध्वादिः। ६२० सावसेः। स्वस्ति। स्वरादिपाठादव्ययत्वम्। ६२१ वौ तसेः। वितस्तिः। ६२२ पदिप्रथिभ्यां नित्। पत्तिः। प्रथितिः।

अस्माड्डुम्सुन्प्रत्ययः। **पुमानिति**। डुम्सुनो डित्त्वाट्टिलोपः। उकार उच्चारणार्थ इति केचित्। तेषामपीत्संज्ञामन्तरा लोपासंभवाद् उगित्कार्यसिद्धिः, उच्चारणार्थानामपि वर्णानामित्संज्ञालोपाभ्यामेव निवृत्त्यङ्गीकारात्। एतच्च दिवऔत्सूत्रे शेखरे स्पष्टम्। तत्फलं तु सुपुंसीत्यादौ उगितश्चेति ङीप्। भाष्ये तु सूतेः सप् प्रसवे पुमानिति व्युत्पादितम्। तत्रेत्थं व्युत्पत्तिः। पूङ् प्राणिगर्भविमोचने अस्मान्म्सुन्प्रत्ययः, धातुसकारस्य पकारः, ऊकारस्य ह्रस्वश्चेत्यर्थः। एतच्च शेखरे हलन्तपुँल्लिङ्गे 'पुंसोऽसुङ्' इति सूत्रव्याख्यावसरे स्पष्टम्। **रुचिभुजिभ्यां किष्यन्**। रुच दीप्तौ, भुज पालनादौ, आभ्यां किष्यनित्यर्थः। **रुचिष्यमिति**। कित्त्वान्न लघूपधगुणः। **वसेस्तिः**। वस निवासे अस्मात् तिप्रत्यय इत्यर्थः। **वस्तिरिति**। शास्तिरित्यर्थमाह **बाहुलकादिति**। शासु अनुशिष्टावित्यस्मात् तिप्रत्ययः। **अगमिति**। पर्वतमित्यर्थः। ननु कथं तर्हि सवर्णदीर्घाभाव इत्यत आह **शकन्ध्वादिरिति**। शकन्ध्वादिपररूपस्य सवर्णदीर्घबाधकत्वादिति भावः। **सावसेः**। सावुपपदे अस भुवीत्यस्मात् तिप्रत्यय इत्यर्थः। 'स्वस्त्याशीः क्षेमपुण्यादौ' इत्यमरः। ननु कथं तर्हि सुपोऽश्रवणमित्यत्राह **स्वरादिपाठादिति**। **वौ तसेः**। वावुपपदे तसु उपक्षये अस्मात्तिः स्यात्। 'अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः' इत्यमरः।

'सूक्ष्मं स्यात्कतकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके' इति मेदिनी। **पातेः**। पा रक्षणेऽस्माद् डुम्सुन्स्याद्, डित्त्वाट्टिलोप उकार उच्चारणार्थ इत्युज्ज्वलदत्तः। वस्तुतस्तूगित्कार्यार्थः। सुपुंसीति 'उगितश्च' इति ङीप्। नकारः स्वरार्थः। 'पुंसोऽसुङ्' इति सूत्रे न्यासरक्षिताभ्यां पुनातेर्मक्सुन् ह्रस्वश्चेति पठितम्। पूञो डुम्सुनित्यन्ये। भाष्ये तु सूतेः सप्रसवे पुमानित्युक्तम्। 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः' इति तत्त्वम्। **रुचि**। रुच दीप्तावभिप्रीतौ च, भुज पालनादौ। 'भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः। स्त्रियां दासीगणिकयोः' इति मेदिनी। **वसेः**। वस निवासे, वस आच्छादने। 'बस्तिर्द्वयोर्निरूहे नाभ्यधोभुमिदशासु च' इति मेदिनी। **शास इति**। शासु अनुशिष्टौ। **अस्यतीति**। असु क्षेपणे। 'अगस्तिः कुम्भयोनौ च वङ्गसेनतरौ पुमान्' इति मेदिनी। **सावसेः**। अस् भुवि अस्मात्सावुपपदे तिः स्यात्। बहुलवचनान्न भुभावः। **वौ**। तसु उपक्षयेऽस्माद्विपूर्वात्तिः स्यात्। 'अङ्गुष्ठे

'तितुत्रेष्वग्रहादीनाम्' (वा ४३१३) इतीट्। ६२३ दृणातेर्ह्रस्वश्च। दृतिः। ६२४ कृतॄकृपिभ्यः कीटन्। किरीटं शिरोवेष्टनम्। तिरीटं सुवर्णम्। कृपीटं कुक्षिवारिणोः। ६२५ रुचिवचिकुचिभ्यः कितच्। रुचितमिष्टम्। उचितम्। कुचितं परिमितम्। कुटितं कुटिलम्। ६२६ कुडिकुषिभ्यां क्मलन्। कुड्मलम्। कुष्मलम्। ६२७ कुषेर्लश्च। कुल्मलं पापम्। ६२८ सर्वधातु-

---

पदिप्रथिभ्यां नित्। पद गतौ, प्रथ प्रख्याने, आभ्यां तिप्रत्ययो नित्स्यादित्यर्थः। पत्तिरिति। 'पदातिपत्तिपदगपादातिकपदाजयः' इत्यमरः। प्रथितिरिति। ख्यातिरित्यर्थः। ननु प्रथितिरित्यत्र कथमिट्, वलादीटस्तितुत्रेति निषेधादित्यत आह अग्रहादीति। अस्य प्रथधातोर्ग्रहादित्वादिति भावः। दृणातेर्ह्रस्वश्च। दॄ विदारणे अस्मात्तिः स्यात्, धातोर्ह्रस्वत्वं च। दृतिरिति। 'दृतिसीमन्तहरित' इत्यमरः। कृतॄकृपिभ्यः कीटन्। कॄ विक्षेपे, तॄ प्लवनतरणयोः, कृपू सामर्थ्ये, एभ्यः कीटन् स्यात्। किरीटमिति। कित्त्वान्न धातोर्गुणः, किंतु 'ॠत इद्धातोः' इति इत्वम्। 'किरीटस्तितल्वमार्जनौ' इत्यमरः। रुचिवचिकुचिभ्यः। रुच दीप्तावभिप्रीतौ च, वच परिभाषणे, कुच शब्दे, एभ्यः कितच् स्यात्। रुचितमिति। कित्त्वान्न गुणः। उचितमिति। कित्त्वात्संप्रसारणम्। बाहुलकादाह कुटितमिति। क्वचित्तु सूत्र एव पाठः। कुडिकुषिभ्यां क्मलन्। कुडि दाहे, कुष निष्कर्षे, आभ्यां क्मलन्नित्यर्थः। कुषेर्लश्च। पूर्वोक्ताद्धातोर्लकारश्चान्तादेश इत्यर्थः। कुल्मलमिति।

सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः' इत्यमरः 'स्त्रीपुंसयोर्वितस्तिः स्यात्' इत्यमरमाला। पदि। पद गतौ, प्रथ प्रख्याने, आभ्यां तिः स्यात्स च नित्। पत्तिरिति। पदातिः। प्रथितिरिति। प्रख्यातिः। तितुत्रेष्विति। ग्रहादित्वादिडागमनिषेधो नेति भावः। दृणातेः। दॄ विदारणे। अस्मात्तिः स्याद्धातोर्ह्रस्वत्वं च। 'दृतिश्चर्मपुटे मत्स्ये ना' इति मेदिनी। कृतॄ। कॄ विक्षेपे, तॄ प्लवनतरणयोः, कृपू सामर्थ्ये। 'किरीटं मुकुटे न स्त्री' इति चन्द्रगोमी। 'कृपीटमुदरे नीरे' इति विश्वः। दशपाद्यां तु कृतॄकृपिकपिभ्य इति पठित्वा कम्पीट इति चतुर्थमुदाहृतम्, 'कृपो रो लः' इत्यत्र न्यासे तु कृकृपिभ्यामिति पठ्यते। अतस्तरतिरत्र प्रक्षिप्त इति कश्चित्। 'तरतेश्चेति पृथक्पठित्वा तिरीटः कूलवृक्ष' इति कश्चिद्व्याख्यत्। रुचिवचि। रुच दीप्तावभिप्रीतौ च, वच परिभाषणे, कुच शब्दे तारे, अथवा कुच कौटिल्याल्पीभावयोः। इकः कित्त्वात्सूत्रे नलोपेन निर्देशः। कुट कौटिल्ये। उचितमिति। 'वचिस्वपि–' इत्यादिना संप्रसारणम्। कुडिकुषि। 'कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे' इति मेदिनी। कुष निष्कर्षे। कुष्मलं छर्दनम्। विकसितमित्यन्ये। सर्वधातुभ्योऽसुन्।

भ्योऽसुन्। चेतः। सरः। पयः। सदः। ६२९ रपेरत एच्च। रेपोऽवद्यम्। ६३० अशेर्देवने युट् च। देवने स्तुतौ। यशः। ६३१ उब्जेर्बले बलोपश्च।

योगविभागाच्चायं नित्यः। तेन कुष्मलमिति पूर्वोक्तमपि। **सर्वधातुभ्योऽसुन्। चेत इति**। चिती संज्ञाने अस्मादसुनि रूपम्। सृ गतौ, पीङ् पाने, षद्लृ विशरणादौ। **रपेरत एच्च**। रप व्यक्तायां वाचि अस्मादसुन्स्यात्, अकारस्य एकारश्चेत्यर्थः। **अशेर्देवने युट् च**। अशू व्याप्तौ अस्मादसुन स्याद्धातोर्युडागमश्च। देवनं स्तुतिः। **उब्जेर्बले बलोपश्च**। उब्ज आर्जवे, अस्माद्बलेऽभिधेयेऽसुन्

दशपाद्यां तु असुन्नित्येव सूत्रम्। चिती संज्ञाने, चित संचेतने चुरादिः, सृ गतौ। गौरादित्वान्ङीष्। 'सरसी तु महासरः' इति शब्दार्णवः। 'महान्ति सरांसि सरस्यः' इति भाष्यम्। पय गतौ, पीङ् पाने। 'पयः स्यात् क्षीरनीरयोः' इति मेदिनी। षद्लृ विशरणादौ। सदः सभा। वर्च दीप्तौ। 'वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि। पुंसि चन्द्रस्य तनये' इति मेदिनी। रुदिर् अश्रुविमोचने। 'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सहप्रयोगेऽप्यनयो रोदस्यावपि रोदसी' इति विश्वः। वी गत्यादिषु। 'वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्' इति मेदिनी। अन प्राणने। अनो भक्तम्। 'अनोऽश्मायः सरसां जातिसंज्ञयोः' इति टचि तु अनसम्। 'पाकस्थानं महानसम्' इत्यमरः। तमु ग्लानौ। 'तमः क्लीबं गुणे शोके सैंहिकेयान्धकारयोः' इति रभसः। 'तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे' इति मेदिनी। षह मर्षणे, 'सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः' इति मेदिनी। तप संतापे। 'तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः' इति च। मह पूजायाम्। 'मह उत्सवतेजसोः' इति मेदिनी। नभ हिंसायां भौवादिकः क्रैयादिकश्च। 'नभोऽन्तरिक्षं गगनम्' इत्यमरः। 'नभं तु नभसा सार्धं तपं तु तपसा सह। सहं च सहसा सार्धं महं च महसा सह। तमेन च तमः प्रोक्तं रजेनापि रजः समम्' इति द्विरूपकोशः। नन्वसुन्प्रत्यये नभःसहस्तम इत्यादिसान्तशब्दाः सिध्यन्ति, पचाद्यचि तु नभं सहं तमं इत्याद्यजन्ता अपि सिध्यन्ति, परन्तु रज इति अकारान्तसकारान्तौ नलोपवच्छब्दौ न सिध्यत इति 'रजेनापि रजः समम्' इति कोशश्चिन्त्य एवेति चेदत्राहुः—रञ्ज रागे इत्यस्मादसुनि 'भूरञ्जिभ्यां कित्' इति वक्ष्यमाणेनासुनः कित्त्वान्नलोपे रजः इति सिध्यति। 'घञर्थे कविधानम्' इति कप्रत्यये तु रज इत्यदन्तोऽपि सिध्यतीति। **रपेः**। रप व्यक्तायां वाचि, अस्मादसुन् स्यादत एकारश्च। **रेपोऽवद्यमिति**। 'अरेपसा तन्वा' इति मन्त्रे निरवद्ययेति भाष्ये उक्तम्, नञ्पूर्वकरेपःशब्दस्यानवद्यवाचकत्वात्। **अशेः**। अशू व्याप्तौ संघाते च अस्मादसुन्स्याद्धातोर्युडागमश्च।

ओजः। ६३२ श्वेः संप्रसारणं च। शवः शवसी। बलपर्यायोऽयम्। ६३३ श्रयतेः स्वाङ्गे शिरः किच्च। श्रयतेः शिर आदेशोऽसुन् किच्च। शिरः शिरसी। ६३४ अर्तेरुच्च। उरः। ६३५ व्याधौ शुट् च। अर्शो गुदव्याधिः। ६३६ उदके नुट् च। अर्तेरसुन्स्यात्तस्य च नुट्। अर्णः अर्णसी। ६३७ इण आगसि। एनः। ६३८ रिचेर्धने घिच्च। चात्प्रत्ययस्य नुट्। घित्वात्कुत्वम्। रेक्णः सुवर्णम्। ६३९ चायतेरन्ने ह्रस्वश्च। चनो भक्तम्। ६४०

स्यात्, बकारस्य लोपश्चेत्यर्थः। श्वेः संप्रसारणं च। टु ओ श्वि गतिवृद्ध्योः अस्मादसुन्, धातोः संप्रसारणं चेत्यर्थः। शव इति रूपम्। श्रयतेः स्वाङ्गे। श्रिञ् सेवायामस्मात्स्वाङ्गेऽभिधेयेऽसुन्, धातोः शिरआदेशः प्रत्ययश्च किदित्यर्थः। अर्तेरुच्च। ऋ गतौ अस्मादसुन् कित्स्याद् धातोरुत्वं च। उर इति। रपरत्वम्। व्याधौ शुट् च। अर्तेर्व्याधावभिधेयेऽसुन्स्यात् शुडागमश्चेत्यर्थः। अर्श इति। 'अर्शो रोगयुतोऽर्शसः' इत्यमरः। उदके नुट् च। अर्तेरित्येव। अर्तेरुदके वाच्येऽसुन् स्यात्, तस्य नुडागमश्च। अर्ण इति। रषाभ्यामिति णत्वम्। इण आगसि। इण् गतौ अस्मादसुन् स्यात् पापे वाच्ये तस्य नुडागमश्चेत्यर्थः। रिचेर्धने घिच्च। रिचिर विरेचने अस्माद्धने वाच्ये असुन्, स च कित्, तस्य नुडागमश्च। रेक्ण इति। चजोरिति कुत्वम्, अट्कुप्वाङिति णत्वम्। चायतेरन्ने ह्रस्वश्च। चायृ

यशः कीर्तिः। उब्जेः। उब्ज आर्जवे अस्मादसुन् स्याद्बले वाच्ये बकारस्य लोपश्च। 'ओजो दीप्ताववष्टम्भे प्रकाशबलयोरपि' इति मेदिनी। श्वेः। टुओश्वि गतिवृद्ध्योः अस्मादसुन्स्यात्संप्रसारणं च। श्रयतेः-। श्रिञ् सेवायामस्मात्स्वाङ्गे वाच्येऽसुन्स्यात्स च किद्धातोः शिरादेशश्च। 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः। घञर्थे कप्रत्यये तु शिर इत्यदन्तोऽपि। 'शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा' इति कोशान्तरम्। 'पिण्डं दद्याद्गयाशिरे' इति वायुपुराणे। 'कुण्डलोद्घृष्टगण्डानां कुमाराणां तरस्विनाम्। निचकर्त शिरान्द्रौणिर्नालेभ्य इव पङ्कजान्' इति महाभारतम्। अर्तेः। ऋ गतावस्मादसुन् कित्स्याद्धातोरुत्वं च। रपरत्वम्। 'उरो वत्सं च वक्षश्च' इत्यमरः। व्याधौ। अर्तेरेव व्याधौ वाच्येऽसुन्, तस्य शुडागमश्च स्यात्। अर्ण इति। पानीयमित्यर्थः। इणः। इण् गतौ अस्मात्पापे वाच्येऽसुन् स्यात्तस्य नुडागमश्च। एनः पापम्। रिचेः। रिचिर् विरेचने, रिच वियोजनसंपर्चनयोरित्यस्माद्वा धने वाच्येऽसुन्। रेक्ण इति। 'चजोः-' इति कुत्वे 'अट्कुप्वाङ्-' इति णत्वम्। इह दशपादीवृत्तौ नुटं नानुवर्त्य रेकः रेकसी इत्युदाहृतम्। तन्न। उत्तरसूत्रे नुडनुवृत्तेर्निर्विवादत्वाद्। मण्डूकप्लुतौ मानाभावाल्लक्ष्यविसंवादाच्च। उज्ज्वलदत्तेन तु रिचेर्धने

वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च। वर्पो रूपम्। शेपो गुह्यम्। ६४१ स्रुरीभ्यां तुट् च। स्रोतः। रेतः। ६४२ पातेर्बले जुट् च। पाजः पाजसी। ६४३ उदके थुट् च। पाथः। ६४४ अन्ने च। पाथो भक्तम्। ६४५ अदेर्नुम्धौ च। अदेर्भक्षे वाच्येऽसुन्नुमागमो धादेशश्च। अन्धोऽन्नम्। ६४६

पूजानिशामनयोः, अस्मादन्ने वाच्ये असुन्स्यात्, तस्य नुट् धातोर्ह्रस्वत्वं च। **चन इति।** लोपो व्योरिति यलोपः। **वृङ्शीङ्भ्यां रूपस्वाङ्गयोः।** वृङ् संभक्तौ, शीङ् स्वप्ने, आभ्यां क्रमेण रूपे स्वाङ्गे च वाच्येऽसुन्स्यात्, तस्य पुडागमश्च। **शेप इति।** असुनि पुकि गुणः। **स्रुरीभ्यां तुट् च।** स्रु गतौ, रीङ् श्रवणे, आभ्यामसुन्, तस्य तुडागमश्चेत्यर्थः। **पातेर्बले जुट् च।** पा रक्षणे अस्माद्बले वाच्येऽसुन् स्यात् तस्य जुडागमश्च बले वाच्ये। **उदके थुट् च।** पातेरुदके वाच्येऽसुन् स्यात् तस्य थुडागमश्चेत्यर्थः। **अन्ने च।** अन्ने वाच्येऽपि पातेरसुन् थुडागमश्चेत्यर्थः। **अदेर्नुम्धौ च।** अद भक्षणे अस्मादसुन् स्यात्। **अन्ध इति।** 'भिस्सा

चिक्लिश्चेति पठित्वा नुटं चानुवर्त्य कित्त्वाद् गुणाभावे नुटश्चुत्वेन ञकारे रिञ्चमिति साधितं तल्लोकवेदयोरप्रसिद्धत्वादुपेक्ष्यम्। 'नित्यं रेक्णो अमर्त्यः' 'परिषद्यं ह्यरणस्य रेक्णः' 'रेक्णः स्वत्यभि या वाममेति' इत्यादिमन्त्रेषु रेक्ण इति शब्दस्य प्रसिद्धत्वात्। वैदिकनिघण्टौ च सुवर्णपर्यायेषु तथा पाठात्। वेदभाष्ये तु प्रकृतसूत्रेणैव तस्य साधितत्वाच्च रेक्ण इति प्रयोग एव साधीयानिति दिक्। **चायतेः।** चायृ पूजानिशामनयोः। अस्मादन्ने वाच्येऽसुन्स्यात्तस्य नुट् च धातोर्ह्रस्वत्वं च यलोपः। 'चनो दधिष्व पचतः' 'सुते दधिष्व नश्चनः' इत्यादिमन्त्रेषु प्रसिद्धोऽयं चनशब्दः। एतेन चणोऽन्नमित्युदाहृत्य बाहुलकाण्णत्वमिति वदन्तो दशपादीवृत्तिकारास्तदनुसारिणः प्रसादकारादयश्च परास्ताः। **वृङ्।** वृङ् संभक्तौ, शीङ् स्वप्ने, आभ्यां यथाक्रमं रूपे स्वाङ्गे च वाच्येऽसुन्स्यात्तस्य पुडागमश्च। **वर्पो रूपमिति।** 'घ्नन् छिश्नदेवाँ अभिवर्पसा भूत्' इत्यादिमन्त्रेषु प्रसिद्धमिदम्। 'शेपः स्याद् वृषणं पेलम्' इति सुभूतिचन्द्रः। अकारान्तोऽप्ययम्। 'शेपपुच्छलांगूलेषु शुनः' इति वार्तिके शेप इति निर्देशाद् 'यस्यामुशन्तः प्रहराम शेपम्' इति वैदिकप्रयोगाच्च। 'शेपः शेपो च शेवश्च शेवं प्रोक्तं च शेफसे' इति द्विरूपकोशः। **स्रुरीभ्याम्।** स्रु गतौ, रीङ् श्रवणे, आभ्यामसुन् स्यात् तस्य तुट् च। 'स्रोतोऽम्बुवेगेन्द्रिययोः' इति विश्वः। 'रेतः शुक्रे पारदे च' इति मेदिनी। **पातेः।** पा रक्षणेऽस्माद्बले वाच्येऽसुन् जुडागमश्च चवर्गतृतीयादिः। युट् चेत्यन्तस्यादिपाठस्तूज्ज्वलदत्तस्य प्रामादिकः। 'पृथुपाजा अमर्त्यः' इत्यादिमन्त्रतद्भाष्यविरोधात्। **उदके।** पातेरुदके वाच्येऽसुन्स्यात्तस्य थुडागमश्च। 'कबन्धमुदकं पाथः' इत्यमरः। **अदेः।** अद भक्षणे। 'भिस्सा स्त्री भक्त-

स्कन्देश्च स्वाङ्गे । स्कन्धः स्कन्धसी । **६४७ आपः कर्माख्यायाम्** । कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुलकाद् आपः आपसी । **६४८ रूपे जुट् च** । अब्जो रूपम् । **६४९ उदके नुम्भौ च** । अम्भः । **६५० नहेर्दिवि भश्च** । नभः । **६५१ इण आगोऽपराधे च** । 'आगः पापापराधयोः' । **६५२ अमेर्हुक्च** । अंहः । **६५३ रमेश्च** । रंहः । **६५४ देशे ह च** । रमन्ते-

---

स्त्री भक्तमन्धोऽन्नम्' इत्यमरः । **स्कन्देश्च स्वाङ्गे** । स्कन्दिर् गतिशोषणयोः, अस्मात्स्वाङ्गे वाच्येऽसुन्, धातोश्चान्तादेशः धः । स्कन्धः । **आपः कर्माख्यायाम्** । आप्लृ व्याप्तौ अस्मात्कर्माख्यायामसुन् धातोर्ह्रस्वश्च । प्रत्ययस्य नुडागमस्तु वा भवतीत्यर्थः । **बाहुलकादिति** । धातोर्ह्रस्वो नेत्यर्थः । **रूपे जुट् च** । रूपे वाच्ये आप्नोतेरसुन्, धातोर्ह्रस्वः, प्रत्ययस्य जुडागमश्चेत्यर्थः । **अब्ज इति** । झलां जश् झशीति बकारः । **उदके नुम् भौ च** । उदके वाच्ये आप्लृधातोरसुन् नुमागमो ह्रस्वत्वं भकारश्चान्तादेश इत्यर्थः । **नहेर्दिवि भश्च** । णह बन्धने अस्माद् गमने वाच्येसुन् भकारश्चान्तादेशः । **नभ इति** । हकारस्य भकारः । **इण आगोऽपराधे च** । इण् गताविरयस्मादसुन् स्याद् अपराधे वाच्ये धातोरागादेशश्च । 'पापापराधयोरागः इत्यमरः । **अमेर्हुक्च** । अम गत्यादिषु

मन्धोऽन्नम्' इत्यमरः । 'द्विजातिशेषेण यदेतदन्धसा' इति भारविः । **स्कन्देः** । स्कन्दिर् गतिशोषणयोः । अस्मात्स्वाङ्गे वाच्येऽसुन्धश्चान्तादेशः । **आपः** । आप्लृ व्याप्तौ । अस्मात्कर्माख्यायामसुन् ह्रस्वश्च धातोः । प्रत्ययस्य नुडागमस्तु वा स्यात् । 'अप्नस्वतीमश्विना' 'अपांसि यस्मिन्नधि संदधुः' । **बाहुलकादिति** । उपलक्षणं ह्रस्वनुटौ वा स्त इति व्याख्यानस्यापि संभवात् । तथा च 'ब्रुवते कतमेऽपि नपुंसकमाप' इति कोशमुदाहृत्य 'सर्वमापोमयं जगत्' इति प्रयोगो दुर्घटवृत्तौ समर्थितः । **रूपे** । रूपे वाच्ये आप्नोतेरसुन् ह्रस्वत्वं च धातोः प्रत्ययस्य जुडागमश्च स्यात् । **अब्ज इति** । 'झलां जश् झशि' इति पकारस्य बकारः । **उदके** । उदके वाच्ये आप्नोतेरसुन् ह्रस्वत्वं च नुमागमो भश्चान्तादेशः । **नहेः** । णह बन्धने अस्माद्गमने वाच्येऽसुन् भश्चान्तादेशः स्यात् । 'नभो व्योम्नि नभो मेघे श्रावणे च पतद्ग्रहे । घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतम्' इति विश्वः । 'नभः क्लीबं व्योम्नि पुमान्घने । घ्राणश्रावणवर्षासु बिसतन्तौ पतद्ग्रहे' इति मेदिनी । 'नभः खं श्रावणो नभाः' इत्यमरः । 'नभं तु नभसा सार्धम्' इति द्विरूपकोशादकारान्तोऽपि । **इणः** । इणोऽसुन् स्यादपराधे वाच्ये धातोरागादेशश्च । विश्वोक्तिमाह **आग इति** । **अमेः** । अम गत्यादौ । अस्मादसुन् हुगागमश्च धातोः स्यात् । अमन्ति गच्छन्त्यनेनाधस्ता-

ऽस्मिन् रहः। ६५५ अञ्च्यञ्जियुजिभृजिभ्यः कुश्च। एभ्योऽसुन्कवर्गश्चान्तादेशः। 'अङ्कश्चिह्नशरीरयोः'। अङ्गः पक्षी। योगः समाधिः। भर्गस्तेजः। ६५६ भूरञ्जिभ्यां कित्। भुवः। रजः। ६५७ वसेर्णित्। वासो वस्त्रम्। ६५८ चन्देरादेश्च छः। छन्दः। ६५९ पचिवचिभ्यां सुट् च। 'पक्षसी तु स्मृतौ

अस्मादसुन् हुगागमश्च धातोः स्यात्। 'अंहो दुरितदुष्कृतम्' इत्यमरः। **रमेश्च।** रमु क्रीडायाम् अस्मादसुन्प्रत्ययो हुगागमश्चेत्यर्थः। **देशे ह च।** रमेरित्येव। रमतेर्देशे वाच्येऽसुन् हकारश्चान्तादेश इत्यर्थः। **अञ्च्यञ्जियुजि।** अञ्चु गति पूजनयोः, अञ्जु व्यक्तिम्रक्षणकान्तिगतिषु, युजिर् योगे, भृजि भर्जने, एभ्योऽसुन् स्यात्कवर्गश्चान्तादेश इत्यर्थः। **भूरञ्जिभ्यां कित्।** भू सत्तायाम्, रञ्ज रागे, आभ्यामसुन्कित्स्यात्। **भुव इति।** कित्त्वान्न गुणः, उवङ्। **रज इति।** अनिदितामिति नलोपः। **वसेर्णित्।** वस आच्छादने, अस्मादसुन् णित्स्यात्। **वास इति।** णित्त्वादुपधावृद्धिः। 'वस्त्रमाच्छादनं वासः' इत्यमरः। **चन्देरा-**

दित्यंहो दुरितम्। **रमेश्च।** रमेरसुन् स्याद् हुगागमश्च धातोः। रंहो वेगः। अहि-रहिभ्यामसुना सिद्धे अघिरघिभ्यामसुनि अङ्घो रङ्घ इति माभूदिति सूत्रद्वयमिति गोवर्धनः। तथा च 'स्यान्मध्योष्मचतुर्थत्वमंहसो रंहसस्तथा' इति द्विरूपकोशः। एवं च 'दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्घोविघातम्' इति 'रङ्घः सङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः' इत्यत्र अङ्घो रङ्घ इति घकारपाठोऽनुप्रासरसिकानां प्रामादिक इति वदन्ति। **देशे।** देशे वाच्ये रमेरसुन् हकारश्चान्तादेशः स्यात्। 'रहस्तत्त्वे रते गुह्ये' इति मेदिनी। **अञ्चि।** अञ्चु गतिपूजनयोः, अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, युजिर् योगे, युज समाधौ, भृजी भर्जने, अङ्कः अङ्कसी अङ्कांसि। अङ्गः अङ्गसी अङ्गांसि। योगः योगसी योगांसि। **भर्गस्तेज इति।** 'हरः स्मरहरो भर्गः' इत्यत्र तु भर्ग-शब्दो घञन्तः पुंलिङ्ग इति बोध्यः। उच समवायेऽस्मादसुनि बाहुलकात्कुत्वम्। न्यङ्क्वादित्वाद्वा। 'ओक आश्रयमात्रेऽपि मन्दिरेऽपि नपुंसकम्' इति मेदिनी। **भूरञ्जि।** भू सत्तायाम्, रञ्ज रागे, आभ्यामसुन्कित्स्यात्। भुवः अन्तरिक्षम्। षष्ठ्यन्तप्रतिरूपकमव्ययमिदम्। रजो रेणुः 'रजः क्लीबं गुणान्तरे। आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते' इति मेदिनी। घञर्थे कप्रत्यये तु अकारान्तोऽप्ययम्। 'रजोऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु' इत्यजयकोशः। **वसेः।** वस निवासेऽस्मादसुन् स्यात्स च णित्। णित्वाद् वृद्धिः। **चन्देः।** चदि आह्लादने अस्मादसुन् आदेः छकारश्च। 'छन्दः पद्यप्रभेदेऽपि स्वैराचाराभिलाषयोः' इति मेदिनी। **अका-**

पक्षौ'। वक्षो हृदयम्। ६६० वहिहाधाञ्भ्यश्छन्दसि। वक्षा अनड्वान्। हासाश्चन्द्रः। धासाः पर्वत इति प्राञ्चः। वस्तुतस्तु णिदित्यनुवर्तते, न तु सुट्। तेन वहेरुपधावृद्धिः। इतरयोः 'आतो युक्-' (सू २७६१) इति युक्। 'शोचा धृष्णू नृवाहसा'। श्रोता हवं गृणत स्तोमवाहाः'। 'विश्वो विहायाः'। 'वाजम्भरो विहायाः'। 'देवो नयः पृथिवीं विश्वधायाः'। 'अधारयत्पृथिवीं विश्वधायसम्'। 'धर्णसं भूरिधायसम्' इत्यादि। ६६१ इण आसिः। अयाः वह्निः। स्वरादिपाठादव्ययत्वम्। ६६२ मिथुनेऽसिः पूर्ववच्च सर्वम्। उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोऽपवादोऽसिः स्वरार्थः। यस्य धातोर्यत्कार्यम्

देश्च छः। चदि, आह्लादने अस्मादसुन् प्रत्ययश्छकारादेशश्च। **पचिवचिभ्यां सुट् च**। डु पचष् पाके, वच परिभाषणे, आभ्यामसुन्स्यात्तस्य सुडागमश्च। **पक्ष इति**। चस्य कुत्वे सस्य षत्वम्। **वहिहाधाञ्भ्यश्छन्दसि**। वह प्रापणे, ओ हाक् त्यागे, डु धाञ् धारणादौ, एभ्यः असुन्स्यात्। **वक्षा इति**। अत्वसन्तस्येति दीर्घः। सुडागमे हस्य ढत्वे षढोरिति कत्वे षत्वमिति भावः। **इति प्राञ्च इति**। प्राञ्च इत्यस्वरसद्योतनाय। तथा हि उक्तोदाहरणानि हि लोके न दृश्यन्ते, छन्दस्येव एतत्सूत्रप्रवर्तनात्, वेदे तु मदुक्तरीत्यैव दृश्यते इत्याह **वस्तुतस्त्विति**। **णिदित्यनुवर्तत इति**। वसेर्णिदित्यतः। **उपधावृद्धिरिति**। असुनो णित्वादिति भावः। युकि रूपमाह **विश्वो विहाया इति**। **इण आसिः**। इण् गतावस्मादासिः स्यात्। **अया इति**। गुणे अयादेश इति भावः। **मिथुनेऽसिः**। मिथुनशब्दार्थमाह **उपसर्गविशिष्टो धातुर्मिथुनमिति**। तथा च सोपसर्गादसुधातोः

रान्तोऽप्ययम्। 'अभिप्रायवशौ छन्दौ' इत्यमरद्विरूपकोशौ। **पचे**। डुपचष् पाके, वच परिभाषणे, आभ्यामसुन् स्यात्तस्य सुडागमश्च। चस्य कुत्वे सस्य षत्वम्। पक्षः पक्षसी पक्षांसि। 'यथा शालायै पक्षसी' इति श्रुतिः। 'पूर्वापरे द्वे पक्षसी' इति च श्रुतिः। 'पूर्वोत्तरे द्वे पक्षसी' इति अनीकाधिकरणे शाबरभाष्यम्। माधवस्तु पक्ष परिग्रह इत्यस्मादसुन् इत्याह **वहि**। वह प्रापणे, ओहाक् त्यागे, डुधाञ् धारणादौ, एभ्योऽसुन् स्यात्। अत्र पूर्वसूत्रात्सुटमनुवर्तयतामुज्ज्वलदत्तादीनां मतेनोदाहरणमाह वक्षाः हासाः धासाः इति। **प्राञ्च इति**। सकलवृत्तिकृतः प्रसादकारादयश्चेत्यर्थः। एतच्चायुक्तम्। उक्तोदाहरणानि हि न तावल्लोके दृश्यन्ते न वा संभवन्ति। सूत्रेऽस्मिन् छन्दसीत्युक्तत्वात्। वेदे तु विपरीतान्येवोदाहरणानि दृश्यन्त इत्याह **वस्तुतस्त्विति**। वेदभाष्यकारादयश्चेहानुकूला इत्यवधेयम्। **इणः**। इण् गतौ अस्मादासिः स्यात्। **मिथुने**। सुयशा इति 'अशेर्देवने युट् च' इत्यादि पूर्ववत्।

असुन्प्रत्यये उक्तं तदत्रापि भवतीत्यर्थः। अशेर्देवने युट् चेत्यादि। सुयशाः। ६६३ नञि हन एह च। अनेहा अनेहसौ। ६६४ विधाञो वेध च। विदधातीति वेधाः। ६६५ नुवो धुट् च। नोधाः ऋषिः। ६६६ गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च। असिः स्यात्। सुतपाः। जातवेदाः। 'गतिकारकोपपदात्कृत्' (सू० ३८७३) इत्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम्। ६६७ चन्द्रे मो डित्। चन्द्रोपपदान्माङोऽसिः स्यात्, स च डित्। चन्द्रमाः। ६६८ वयसि धाञः। वयोधास्तरुणः। ६६९ पयसि च। पयोधाः समुद्रो मेघश्च। ६७०

असिप्रत्यय इत्यर्थः। **पूर्ववदिति**। अशेर्देवने स्तुतौ युडित्यर्थः। **सुयशा इति**। असुनोऽपवादोऽसिः। **नञि हन एह च**। नञ्युपपदे हन हिंसागत्योरित्यस्मादसिप्रत्ययो धातोरेहादेशश्चेत्यर्थः। **विधाञो वेध च**। विपूर्वाद् डु धाञ् धारणे पोषणयोः इत्यस्माद् असिः स्याद् वेधादेशश्चेत्यर्थः। अयमादेशः सोपसर्गधातोः। **वेधा इति**। 'विष्णौ च वेधास्त्री त्वाशीः' इत्यमरः। **नुवो धुट् च**। णु स्तुतौ अस्मादसिः स्यात्, तस्य धुडागमश्च। **नोधा इति**। धातोर्गुणः। **गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च**। गतौ कारके चोपपदे धातोरसिः स्यात्। **सुतपा इति**। स्वुपपदे तप सन्तापे इत्यस्मादसिः। **जातवेदा इति**। जातशब्दे कर्मकारके उपपदे विद ज्ञाने इत्यस्मादसिः। पूर्वपदप्रकृतिस्वरविधानस्य कृत्यमाह **गतिकारकोपपदादिति**। **चन्द्रे मो डित्**। चन्द्रशब्दे उपपदे माङ् माने इत्यस्मादसिः स्यात्स च डिदित्यर्थः। डित्त्वफलं तु चन्द्रमसावित्यादौ टिलोपः। **वयसि धाञः**। वयश्शब्दे उपपदेऽपि डु धाञ् धारणपोषणयोरित्यस्मादसिप्रत्ययः। **वयोधा इति**। रुत्वोत्वादि। **पयसि च**।

सुयशाः सुश्रोता इत्याद्युदाहार्यम्। **नञि**। हन्तेर्नञ्युपपदेऽसिः स्याद् धातोरेहादेशश्च 'ऋदुशनस्पुरुदंस-' इत्यादिना अनङ्। **विधाञः**। डुधाञ् धारणादौ विपूर्वादस्मादसिः स्याद्वेधादेशश्च सोपसर्गधातोः। 'वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि' इति मेदिनी। **नुवः**। णु स्तुतौ अस्मादसिः स्यात्तस्य धुडागमश्च। **नोधा इति**। 'सद्यो भुवद्वीर्याय नोधाः' इति मन्त्रे नोधा ऋषिर्भवतीति निरुक्तम्। नवं[1] दधातीति तु नैरुक्तं व्युत्पत्त्यन्तरं बोध्यम्। **गति**। गतौ कारके चोपपदेऽसिः स्यात्। तप संतापे, विद ज्ञाने, विद्लृ लाभे। **चन्द्रे**। चन्द्रं रजतममृतं च, तदिव मीयतेऽसौ चन्द्रमा इति हरदत्तः। स च डिदिति डित्त्वाट्टिलोपे चन्द्रमसौ चन्द्रमस इत्यादि सिध्यति। **वयसि**। डुधाञ् धारणे अस्माद्वयस्युपपदेऽसिः स्यात्स च डित्। **पयोधा इति**।

१—'नवनम्' इति निरुक्तेऽवलोक्यते।

पुरसि च । पुरोधाः । ६७१ **पुरूरवाः** । पुरुवशब्दस्य दीर्घो रौतेरसिश्च निपात्यते । ६७२ **चक्षेर्बहुलं शिच्च** । नृचक्षाः । ६७३ **उषः कित्** । उषः । ६७४ **दमेरुनसिः** । 'सप्तार्चिर्दमुनाः' । ६७५ **अङ्गतेरसिरिरुडागमश्च** । अङ्गिराः । ६७६ **सर्तेरप्पूर्वादसिः** । अप्सराः प्रायेणायं भूम्नि । अप्सरः । ६७७ **विदिभुजिभ्यां विश्वे** । विश्ववेदाः । विश्वभोजाः । ६७८ **वशेः**

पयश्शब्दे उपपदेऽपि धाञोऽसिप्रत्ययः, स च डिदित्यर्थः । **पुरसि च** । पुरश्शब्दे उपपदेऽपि धाञोऽसिप्रत्ययः, स च डिदित्यर्थः । 'पुरोधास्तु पुरोहितः' इत्यमरः । **पुरूरवाः** । इत्थं निपात्यत इत्यर्थः । निपातनमेवाह **पुरुशब्दस्येति** । पुरून् रौतीति विग्रहः । रु शब्दे अस्मादसिः, गुणावादेशौ, पूर्वपदस्य दीर्घश्चेत्यर्थः । अलोऽन्त्यस्येति भावः । 'पुरूरवा बुधसुतो राजर्षिश्च पुरूरवाः' इत्यमरः । **चक्षेर्बहुलं शिच्च** । चक्षिङ् व्यक्तायां वाचि, अस्मादसिः स्यात्, स च बहुलं शिदित्यर्थः । **नृचक्षा इति** । नृशब्दे उपदे चक्षिङ्धातोरसिः । तस्य च शित्वेन सार्वधातुकत्वाच्चक्षिङः ख्याञिति ख्याआदेशो न । **उषः कित्** । उष दाहे, अस्मादसिः स्यात्, स च कित् । **उष इति** । कित्वान्न लघूपधगुणः । 'प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि' इत्यमरः । **दमेरुनसिः** । दम उपशमे, अस्मादुनसिः प्रत्यय इत्यर्थः । सप्तार्चिर्दमुनाः शुक्रः' इत्यमरः । **अङ्गतेरसिरिरुडागमश्च** । अगिधातोरसिप्रत्ययः, इरुडागमश्चेत्यर्थः । अङ्गिरा ऋषिभेदः । **सर्तेरप्पूर्वादसिः** । सृ गतौ अस्मादप्पूर्वादसिप्रत्यय इत्यर्थः । **अप्सरा इति** । असिप्रत्यये धातोर्गुणः । **विदि-**

पयःशब्द उपपदे डुधाञः पूर्ववत् । **पुरसि च** । पुरःशब्द उपपदे पूर्ववत् । 'पुरोधास्तु पुरोहितः' इत्यमरः । **रौतेरिति** । रु शब्दे । 'पुरूरवा बुधसूतो राजर्षिश्च पुरूरवाः' इत्यमरः । **चक्षेः** । चक्षिङ् व्यक्तायां वाचि अस्मादसिः स्यात्स च बहुलं शित् । शित्त्वात्सार्वधातुकसंज्ञायां ख्याञ् न । नृचक्षाः राक्षसाः । शित्त्वाभावपक्षे तु ख्याञादेशः । प्रख्यः प्रजापतिः । **उषः** । उष दाहेऽस्मादसिः स्यात्स च कित् । उषः प्रभातम् । दशपाद्यां तु वसः किदिति पाठः । वसति सूर्येण सहेति उषाः देवताविशेषः । 'अपो भि' इति सूत्रे 'उषसश्चेष्यते' इति, वार्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः । **दमेः** । दमु उपशमे । 'सप्तार्चिर्दमुनाः शुक्रः' इत्यमरः। पक्षे 'अन्येषामपि दृश्यते' इति दीर्घः । 'जुष्टो दमूनाः' 'दमूनसं गृहपतिं वरेण्यम्' । दशपाद्यां तु 'दमेरूनसिः' इति सूत्र एव दीर्घः पठ्यते, तन्मते बाहुलकाद्ध्रस्वो बोध्यः । अगिर्गत्यर्थः । अङ्गिरा ऋषिभेदः । **सर्तेः** । सृ गतौ । **प्रायेणेति** । 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि' इति शब्दार्णवः । 'अप्सरस्त्वप्सराः प्रोक्ता सुमनाः

कनसिः। संप्रसारणम्। उशना।

॥ इत्युणादिषु चतुर्थः पादः ॥

अथ उणादिषु पञ्चमः पादः ।

६७९ अदि भुवो डुतच्। अद्भुतम्। ६८० गुधेरूमः। गोधूमः। ६८१ मसेरूरन्। मसूरः। प्रथमे पादे असेरुरन्, 'मसेश्च' इत्यत्र व्याख्यातः। ६८२ स्थः किच्च। स्थूरो मनुष्यः। ६८३ पातेरतिः। पतिः स्वामी।

भुजिभ्यां विश्वे। विद ज्ञाने, भुज पालनाभ्यवहरणयोः, आभ्यां विश्वशब्दे उपपदेऽसिः स्यात्। सूत्रे विश्वे इति शब्दस्वरूपपरत्वेन सर्वार्थवाचकत्वाऽभावान्न स्मिन्नादेशः। विश्वं वेत्तीति विश्ववेदाः। वशे कनसिः। वश कान्तौ अस्मात्कनसिप्रत्यय इत्यर्थः। संप्रसारणमिति। कित्वादिति भावः। 'उशना भार्गवः कविः' इत्यमरः।

इत्युणादिषु चतुर्थः पादः।

अथ पञ्चमः पादः। अदि भुवो डुतच्। भू सत्तायामस्मादाकस्मिकार्थे 'अद्' इत्यव्यये उपपदे डुतच्प्रत्यय इत्यर्थः। डित्वाट्टिलोपः। अद्भुतम्। गुधेरूमः। गुध परिवेष्टने अस्मादूमप्रत्ययः। गोधूम इति। लघूपधगुणः। मसेरूरन्। मसी परिणामे अस्मादूरन्प्रत्यय इत्यर्थः। 'मङ्गल्यको मसूरोऽथ मकुष्टकमयुष्टकौ' इत्यमरः। स्थः किच्च। ष्ठा गतिनिवृत्तौ अस्मादूरन् कित्स्यात्। स्थूर इति। कित्वादातो लोपः। पातेरतिः। पा रक्षणे अस्मादतिः स्यात्।

सुमनस्तु च' इति द्विरूपकोशः। 'एकाप्सरः प्रार्थितयोर्विवादः' इति रघुः। विदि। विद ज्ञाने, भुज पालनाभ्यवहारयोः, आभ्यां विश्वशब्दे उपपदेऽसिः स्यात्। शब्दस्वरूपपरत्वाद्विश्वे इत्यत्र स्मिन्नादेशो न कृतः। उदाहरणे विश्वं वेत्ति भुङ्क्ते इति विग्रहः। यत्तु 'तत्पुरुषे कृति—' इति सप्तम्या अलुक् विश्वेवेदाः अग्निः विश्वेभोजा इन्द्र इत्युज्ज्वलदत्तेनोक्तं तन्न। तथा सति स्मिन्नादेशस्य दुर्वारत्वापत्तेः। 'सुमृळीको भवतु विश्ववेदाः' 'पूषा भगः प्रमृडे विश्वभोजाः' इत्यादिमन्त्रेषु सुपो लुक एव दर्शनाद् ग्रन्थान्तरे तथैवोदाहरणाच्च। वशेः। वश कान्तौ। 'उशना भार्गवः कविः' इत्यमरः। इत्युणादिषु चतुर्थः पादः।

अदि भुवो। अत् इत्यव्ययं आकस्मिकार्थे। अस्मिन्नुपपदे भुधातोर्डुतच्स्यात्। डित्वाट्टिलोपः अद्भुतमाश्चर्यम्। गुधेः। गुध परिवेष्टने गुध्यते परिवेष्ट्यते प्राणिभिरिति। 'गोधूमो नागरङ्गे स्यादोषधीव्रीहिभेदयोः' इति मेदिनी। मसेः। मसी परिणामे। स्थः। ष्ठा गतिनिवृत्तावस्मादूरन् कित्वादालोपः। स्थूरो

संपातिः पक्षिराजः । ६८४ **वातेर्नित्** । 'वातिरादित्यसोमयोः' । ६८५ **अर्तेश्च** । अरतिरुद्वेगः । ६८६ **तृहेः क्नो हलोपश्च** । तृणम् । ६८७ **वृञ्लुटितनिताडिभ्य उलच् तण्डश्च** । व्रियन्ते लुठ्यन्ते तन्यन्ते ताड्यन्त इति वा तण्डुलाः । ६८८ **दंसेष्टटनौ न आ च** । 'दासः सेवकशूद्रयोः' । ६८९ **दंशेश्च** । दाशो धीवरः । ६९० **उदि चेर्डैसिः** । स्वरादिपाठादव्ययत्वम् । उच्चैः । ६९१ **नौ दीर्घश्च** । नीचैः । ६९२ **सौ रमेः क्तौ दमे पूर्वपदस्य च दीर्घः** । रमेः सुपूर्वाद्दमे वाच्ये क्तः स्यात् । कित्वादनुनासिकलोपः । सूरत उपशान्तो दयालुश्च । ६९३ **पूञो यण्णुग्घ्रस्वश्च** ।

वातेर्नित् । वा गतिगन्धनयोरस्मादतिः स्यात्, स च नित् । **अर्तेश्च** । ऋ गतौ अस्मादतिः स्यात्, स च नित् । **तृहेः क्नो हलोपश्च** । तृह हिंसायामस्मात्क्नः स्यात्, हकारस्य लोपश्च । **तृणमिति** । क्नस्य कित्वाद् गुणाभावः । **वृञ्लुटितनिताडिभ्यः** । वृञ् वरणे, लुठ विलोडने, तनु विस्तारे, तड आघाते एभ्य उलच् स्याद् धातोस्तण्डादेशश्चेत्यर्थः । **दंसेष्टटनौ न आ च** । दसि सेवने अस्मात् टटनौ स्याताम्, धातोर्नकारस्याकारश्चेत्यर्थः । **दंशेश्च** । दंश दशने अस्मादपि टटनौ स्याताम्, नकारस्याकारश्च । **दाश इति** । 'कैवर्ते दाशधीवरौ' इत्यमरः । पूर्वसूत्रेऽस्मिन्सूत्रे च टनो विधिराद्युदात्तत्वाय । **उदि चेर्डैसिः** । उदि उपपदे, चिञ् चयने, इत्यस्माड्डैसिरित्यर्थः । **उच्चैरिति** । डित्त्वाट्टिलोपः । **नौ दीर्घश्च** । नावुपपदे चिञो डैसिः उपसर्गस्थस्येकारस्य दीर्घश्चेत्यर्थः । **नीचैरिति** । डित्त्वाट्टिलोपः । **सौ रमेः क्तौ दमे** । सावुपपदे रमु क्रीडायामित्यस्माद्दमे वाच्ये क्तः स्यात् पूर्वपदस्य सोरन्त्यस्य दीर्घश्चेत्यर्थः । **कित्वादिति** । अनुदात्तोपदेशवनतीत्यादिना ।

मनुष्य इति । 'स्थूरस्य रायो बृहतो य ईशे' इति मन्त्रे तु योगपुरस्कारात्स्थिरस्येत्यर्थ इति व्याख्यातम् । **पातेः** । पा रक्षणे । **वातेः** । वा गतिगन्धनयोः । रभसकोशस्थमाह **वातिरिति** । **अर्तेः** । ऋ गतौ, अस्मादतिः स्यात्स च नित् । **तृहेः** । तृह हिंसायाम्, क्नस्य कित्वाद् गुणाभावः । **वृञ्** । वृञ् वरणे, लुठ विलोडने, तनु विस्तारे, तड आघाते, चुरादिः एभ्य उलच स्यात् तण्डादेशश्च धातोः । यद्यपि 'सानसिधर्णसि–' इति सूत्रे तण्डुलशब्दो निपातितस्तथापि प्रत्ययस्वरेण मध्योदात्तः सः, अयं तु चित्स्वरेणान्तोदात्त इति विवेकः । **दंसेः** । दसि दंशनदर्शनयोः अस्माट्टटनौ स्यातां नकारस्याकारश्च । टनो नकार आद्युदात्तार्थः । 'दासः शूद्रे दानपात्रे भृत्यधीवरयोरपि' इति विश्वः । **दंशेः** । दंश दशनेऽस्मादपि टटनौ स्तो नकारस्य चात्वं स्यात् । 'कैवर्ते दाशधीवरौ' इत्यमरः । **उदि** । चिञ् चयने । डैसो

यत्प्रत्ययः । पुण्यम् । ६९४ स्रंसेः शिः कुट् किच्च । स्रंसतेः शिरादेशो यत्प्रत्ययः कित्तस्य कुडागमश्च । शिक्यम् । ६९५ अर्तेः क्युरुच्च । उरणो मेषः । ६९६ हिंसेरीरन्नीरचौ । 'हिंसीरो व्याघ्रदुष्टयोः' । ६९७ उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च । उदरम् । ६९८ डित्खनेर्मुट् स चोदात्तः । अजल् च डित् स्याद्धातोर्मुट्, स चोदात्तः । मुखम् । ६९९ अमेः सन् । अंसः । ७०० मुहेः खो मूर्च । मूर्खः । ७०१ नहेर्हलो-

---

पूञो यण्णुक् । पूञ् पवने अस्माद्यत्प्रत्ययः णुगागमो ह्रस्वश्च । पुण्यमिति । 'स्याद्धर्ममस्त्रियां पुण्यम्' इत्यमरः । स्रंसेः शि कुट् किच्च । स्रंसु ध्वंसु अधः-पतने, अस्माद्यत्प्रत्ययः स च कित्, तस्य कुडागमः, धातोः शिः सर्वादेशश्च । शिक्यमिति । 'भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका' इत्यमरः । अर्तेः क्युरुच्च । ऋ गतौ अस्मात्क्युप्रत्ययः, धातोरुकारादेशश्चेत्यर्थः । उरण इति । उत्वं रपरत्वम् । युवोरनाकावित्यनादेशे रषाभ्यामिति णत्वम् । अट्कुप्वाङिति तु एतत्सूत्रस्यैव प्रवृत्त्युपपादकम् । हिंसेरीरन्नीरचौ । हिसि हिंसायामस्माद् ईरन् ईरच् इति प्रत्ययौ स्तः, स्वरे भेदः । उदि दृणातेरजलौ । उदि उपपदे दृ विदारणे इत्यस्मादच् अल् इति प्रत्ययौ स्तः । उदो दकारस्य लोपश्चेत्यर्थः । उदरमिति । अजलोः स्वरे भेदः । धातोर्गुणः । डित् खनेर्मुट् । अजलावित्यनुवर्तते । खनु अवदारणे अस्मादच् अल् इति प्रत्ययौ स्तः, तौ च डितौ, धातोर्मुडागमश्चेत्यर्थः । मुखमिति । डित्वाट्टिलोपः । अमेः सन् । अम गत्यादिषु अस्मात्सन्प्रत्यय इत्यर्थः । अंस इति । 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः । मुहेः खो मूर्च । मुह

डित्त्वाट्टिलोपः । सौरमेः । रमु क्रीडायाम् । पूञः । पूञ् पवने । 'पुण्यं मनोज्ञेऽभिहितं तथा सुकृतधर्मयोः' इति विश्वः । स्रंसेः । स्रंसु अधःपतने कित्त्वं तु गुणाभावार्थम् । अर्तेः । ऋ गतावस्मात्कुप्रत्ययः स्याद्धातोरुत्वं च रपरत्वम् । 'युवोरनाकौ' । 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके' इत्यमरः । हिंसेः । हिसि हिंसायाम् । उदि । दृ विदारणे । डित्खनेः । खनु अवदारणे, अस्मादजलौ स्तः । 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि । सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्' इति मेदिनी । अमेः । अम गतौ, 'स्कन्धो भुजशिरोंसोऽस्त्री' इत्यमरः । 'अंसः स्कन्धे विभागे च' इति दन्त्यान्ते विश्वः । मुहेः । मुह वैचित्त्येऽस्मात्खप्रत्ययो धातोर्मुरादेशश्च । मुह्यतीति मूर्खः । 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः । नहेः । णह बन्धने । अस्मात्खः । 'नखं कररुहे षण्ढे गन्धद्रव्ये नखं नखी' इति विश्वः । 'नखी स्त्रीक्लीबयोः शुक्तौ

पश्च। नखः। **७०२ शीङो ह्रस्वश्च** । शिखा । **७०३ माङ ऊखो मय् च** । मयूखः । **७०४ कलिगलिभ्यां फगस्योच्च** । कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः । **७०५ स्पृशेः श्वणशुनौ पृ च** । श्वणशुनौ प्रत्ययौ । पृ इत्यादेशः । पार्श्वम् । 'पार्श्वोऽस्त्री कक्षयोरधः' । पर्शुरायुधम् । **७०६ श्मनि श्रयतेर्डुन्** । श्मन्शब्दो मुखवाची । मुखमाश्रयत इति श्मश्रु । **७०७ अश्र्वादयश्च** । अश्रु नयनजलम् । **७०८ जनेष्टन्लोपश्च** । जटा ।

वैचित्र्ये अस्मात्खप्रत्ययः धातोर्मूरादेशश्च । **नहेर्हलोपश्च** । णह बन्धने अस्मात्खप्रत्ययः, हकारस्य लोपश्चेत्यर्थः । **शीङो ह्रस्वश्च** । शीङ् स्वप्ने अस्मात्खप्रत्ययः धातोर्ह्रस्वश्चेत्यर्थः, । **शिखेति** । ह्रस्वविधानसामर्थ्यान्न गुणः । **माङ ऊखो** । माङ् माने अस्मादूखप्रत्ययः धातोर्मयादेशश्चेत्यर्थः । **मयूख इति** । 'मयूखस्त्विट्करज्वालास्वलिबाणौ शिलीमुखौ' इत्यमरः । **कलिगलिभ्यां फगस्योच्च** । कल शब्दसंख्यानयोः, गल अदने, आभ्यां फक् स्यात्, अकारस्योकारश्चेत्यर्थः । **गुल्फ इति** । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । **स्पृशेः श्वणशुनौ पृ च** । स्पृश संस्पर्शे अस्मात् श्वण् शुन् स्याताम्, धातोः पृ आदेशश्च । **पार्श्वमिति** । श्वणो णित्त्वाद् वृद्धिः । **श्मनि श्रयतेर्डुन्** । श्रिञ् सेवायामस्माद् मुखवाचिनि श्मनशब्दे उपपदे डुन्प्रत्ययः । **श्मश्रु इति** । श्मनो नस्य लोपः, डित्त्वात् श्रिञ इकारस्य लोपः । 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः । **अश्र्वादयश्च** । निपात्यन्त इति शेषः । **अश्रु इति** । अशू व्याप्तौ अस्माद् रुन्प्रत्ययः । **जनेष्टन् लोपश्च** । जनी प्रादुर्भावे

नखरे पुंनपुंसकम्' इति मेदिनी । **शीङः** । शीङ् स्वप्नेऽस्मात्खः स्याद्धातोर्ह्रस्वश्च । ह्रस्वविधानसामर्थ्याद् गुणाभावः । 'शिखा शाखा बर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च' इति मेदिनी । **माङः** । माङ् माने । 'मयूखस्त्विट्करज्वालासु' इत्यमरः । **कलि** । कल शब्दसंख्यानयोः, गल अदने, आभ्यां फक् स्याद् धातोरकारस्योत्वं च । **गुल्फ इति** । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । तयोः पादयोर्ग्रन्थी इत्यर्थः । **स्पृशेः** । स्पृश संस्पर्शे, 'पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च' इति विश्वमेदिन्यौ । **श्मनि** । श्रिञ् सेवायामस्मात् श्मन्युपपदे डुन्स्याद् डित्त्वाट्टिलोपः । 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः । पुरुषस्य मुखे तेषां रोम्णां वृद्धौ श्मश्रुशब्दो वर्तत इत्यर्थः । **अश्र्वादयः** । अशू व्याप्तावस्माद् रुन् प्रत्ययो नञ्पूर्वात् श्रयतेर्डुन् च । यत्तूज्ज्वलदत्तेनोक्तम् अश्नोतेर्डुन् रुट् चेति तदयुक्तम्, डित्त्वाट्टिलोपे सति धातोरश्रवणप्रसङ्गात् । न च टिलोपाभावो निपात्यत इति वाच्यम् । तथा सति डित्त्वोत्प्रेक्षणस्य निष्फलत्वापत्तेरिति दिक् । **जनेः** । जनी

७०९ अच्तस्य जङ्ग च। तस्य जनेर्जङ्गादेशः स्यादच्। जङ्गा। ७१० हन्तेः शरीरावयवे द्वे च। जघनम्। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः'। ७११ क्लिशेरन्लो लोपश्च। लकारस्य लोपः। केशः। ७१२ फलेरितजादेश्च पः। पलितम्। ७१३ कृञादिभ्यः संज्ञायां वुन्। करकः करका। कटकः। नरकम्, नरकः। 'नरको नारकोऽपि च' इति द्विरूपकोशः। सरकं

अस्माड्डन्प्रत्ययः स्यात्, धातोरन्त्यनकारस्य लोपश्च। अच् तस्य जङ्ग च। तस्ये-त्यर्थमाह जनेरिति। जनेः अच्प्रत्ययः धातोर्जङ्गादेशश्चेत्यर्थः। अजाद्यतष्टाप्। हन्तेः शरीरावयवे। शरीरावयवे वाच्ये हन्तेरच्प्रत्ययो धातोर्द्वित्वं चेत्यर्थः। जघनमिति। हो हन्तेरिति कुत्वम्, अभ्यासाच्चेति वा। अमरोक्तिमाह पश्चान्नितम्ब इति। क्लिशेरन् लो लोपश्च। क्लिशू विबाधने अस्मादन् स्याल्ल-कारस्य लोपश्चेत्यर्थः। फलेरितजादेश्च पः। फल निष्पत्तौ अस्मादितच्प्रत्ययः, आदेः फकारस्य पकारादेशश्चेत्यर्थः। पलितमिति। 'पलितं जरसा शौक्ल्यम्' इत्यमरः। कृञादिभ्यः संज्ञायां वुन्। डु कृञ् करणे इत्यादिभ्यः संज्ञायां वुन्स्यात्। करक इति। युवोरनाकावित्यकादेशः। 'कमण्डलौ च करकः' इत्यमरः। कटक इति। कटे वर्षावरणयोः अस्माद् वुन्। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रि-

---

प्रादुर्भावे अस्माड्डन्प्रत्ययः स्याद्धातोरन्त्यलोपश्च। 'जटा लग्नकचे मूले मांस्यां स्त्रीत्वे पुन-र्जटी' इति मेदिनी। जङ्गेति। जनेरच्प्रत्यये सति 'अजाद्यतः—' इति टाप्। हन्तेः। देहावयवे वाच्ये हन्तेरच्प्रत्ययः स्याद् द्वित्वं च धातोः। अभ्यासकार्यम्, 'अभ्यासाच्च' इति कुत्वम्। अमरोक्तिमाह पश्चान्नितम्ब इति। 'जघनं च स्त्रियाः श्रोणिपुरोभागे कटावपि' इति मेदिनी। क्लिशेः। क्लिशू विबाधनेऽस्मादन्स्यात्। 'केशः स्यात्पुंसि वरुणे ह्रीबेरे कुण्डलेऽपि च' इति मेदिनी। फलेः। फल निष्पत्तौ। 'पलितं जरसा शौक्ल्यम्' इत्यमरः। 'पलितं शैलजे तापे केशपाशे च कर्दमे' इति मेदिनी। कृञादिभ्यः। डुकृञ् करणे। करकः कमण्डलुः। 'करकस्तु पुमान्पक्षि-विशेषे दाडिमेऽपि च। द्वयोर्मेघोपले न स्त्री करके च कमण्डलौ॥' इति मेदिनी। करका वृष्टिपाषाणः। कटे वर्षावरणयोः, 'कटको वलये सानौ'। 'क्वन् शिल्पिसंज्ञयोः' इति क्वनाप्ययं सिद्धस्तथा च गुणभाज इहैव वुनि उदाहार्याः, गुणनिषेधभाजस्तु क्वनि। उदासीनास्तु यत्र कुत्रचिदिति भावः। नॄ नये। 'स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्' इत्यमरः। 'नरकः पुंसि निरये देवारातिप्रभेदयोः' इति मेदिनी। उदयनाचा-र्यास्तु नच नरकाण्येव सन्तीति क्लीबं प्रयुञ्जते तन्निर्मूलमित्याहुः। सृ गतौ। 'सरको-ऽस्त्री शीधुपात्रे शीधुपानेक्षुशीधुनोः' इति मेदिनी। कुर शब्दे। 'कोरकोऽस्त्री कुड्मले

गगनम्। कोरकः। कोरकं च। ७१४ **चीकयतेराद्यन्तविपर्ययश्च**। कीचको वंशभेदः। ७१५ **पचिमच्योरिच्चोपधायाः**। पेचकः। मेचकः। ७१६ **जनेररष्ठ च**। जठरम्। ७१७ **वचिमनिभ्यां चिच्च**। वठरो मूर्खः। मठरो मुनिशौण्डयोः'। बिदादित्वान्माठरः। गर्गादित्वान्माठर्यः। ७१८ **ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च**। 'ऊर्दरः शूररक्षसोः'। ७१९ **कृदरादयश्च**। कुदरः कुसूलः। मृदरं क्षिवसत्। सूदरः सर्पः। ७२० **हन्तेर्युग्भाद्यन्तयोर्घत्वतत्वे**। घातनो मारकः। ७२१ **कमिगमिक्षमिभ्यस्तु-**

याम्' इत्यमरः। **चीकयतेराद्यन्तविपर्ययश्च**। चीक आमन्त्रणे अस्मात्संज्ञायां वुन् स्यात्, धातोराद्यन्तवर्णयोः विपर्ययश्चेत्यर्थः। 'कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः। दैत्यभेदे च। **पचिमच्योरिच्चोपधायाः**। डु पचष् पाके, मच कल्कने, आभ्यां वुन्स्यात्, उपधाया इकारादेशश्च। **पेचक इति**। उपधाया इकारे लघूपधगुणे च रूपम्। 'उलूके करिणः पुच्छमूलोपान्ते च पेचके' इत्यमरः। **जनेररष्ठ च**। जनीप्रादुर्भावे अस्मादरप्रत्ययः, धातोष्ठकारश्चान्तादेशः। 'जठरः कठिनेऽपि स्यात्' इत्यमरः। **वचिमनिभ्यां चिच्च**। वच परिभाषणे, मन ज्ञाने, आभ्यामरप्रत्ययः स्यात्, स च चित्, ठकारश्चान्तादेशः। **ऊर्जि दृणातेरलचौ पूर्वपदान्त्यलोपश्च**। ऊर्क्शब्दे दृ विदारणे इत्यस्मादलचौ प्रत्ययौ स्तः, पूर्वपदान्त्यवर्णस्य लोपश्च। **ऊर्दर इति**। पूर्वपदान्त्यस्य लोपे धातोर्गुणे च रूपम्। **कृदरादयश्च**। एते निपात्यन्ते। **कृदर इति**। कु इत्यव्ययपूर्वकदृधातोरल्प्रत्यये

स्यात्कङ्कोलकमृणालयोः' इति मेदिनी। 'विचकार कोरकाणि' इति माघः। 'कोरकः पुमान्' इत्यमरोक्तिस्तु नादर्तव्येत्याहुः। अपवरकादयोऽपि इहैव बोध्याः। **चीकयतेः**। चिक आमन्त्रणे, चीक च चुरादिः। अस्याद्यन्तविपर्ययः। पचिमच्योरित्वं चानुपदं वक्ष्यमाणं बाहुलकबललभ्यं बोध्यम्। 'कीचको दैत्यभिद्वाताहतसस्वनवंशयोः' इति मेदिनी। डुपचष् पाके। 'उलूके करिणः पुच्छमूलोपान्ते च पेचकः' इत्यमरः। 'पेचको गजलाङ्गूलमूलोपान्ते च कौशिके' इति मेदिनी। मचि मुचि कल्कने। 'मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान्। तद्युक्ते वाच्यवत्क्लीबं स्रोतोञ्जनान्धकारयोः' इति मेदिनी। **जनेः**। जन जनने, जनी प्रादुर्भावे वा। 'जठरः कठिनेऽपि स्यात्' इत्यमरः। 'जठरो न स्त्रियां कुक्षौ वृद्धकर्कटयोस्त्रिषु' इति मेदिनी। **वचि**। वच परिभाषणे, मन ज्ञाने, आभ्यामरप्रत्ययः स्यात्स च चित् ठश्चान्तादेशः। 'वठरः कुक्कुटे वराटे सरठे च' इति मेदिनी। **ऊर्जि**। दृ विदारणेऽस्मादूर्ज्युपपदे अलचौ प्रत्ययौ स्तः। **कृदरादयश्च**। कु सु मृ एतदव्ययपूर्वकदृणातिप्रकृतिका लजन्ता

न्वृद्धिश्च । क्रन्तुः पक्षी । गन्तुः पथिकः । क्षन्तुर्मशकः । ७२२ हर्यतेः कन्यन्हिरच् । कन्यन्प्रत्ययः । हिरण्यम् । ७२३ कृञः पासः । कर्पासः बिल्वादित्वात्कार्पासं वस्त्रम् । ७२४ जनेस्तु रश्च । जर्तुर्हस्ती योनिश्च । ७२५ ऊर्णोतेर्डः । ऊर्णा । ७२६ दधातेर्यन् नुट् च । धान्यम् । ७२७ जीर्यतेः क्रिन् रश्च वः । 'जिव्रिः स्यात्कालपक्षिणोः' । बाहुलकाद् 'हलि च' (सू० २५४) इति दीर्घो न । ७२८ मव्यतेर्यलोपो मश्चापतुट् चालः । मव्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य । ममापतालो

रूपम् । एवं सपूर्वकात्सुदर इति । **हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे** । हन हिंसागत्योः अस्माद्युन् स्यात्, आद्यन्तयोर्हकारनकारयोर्यथासंख्यं घकारतकारौ स्तः । **क्रमिगमिक्षमि** । क्रमु पादविक्षेपे, गम्लृ गतौ, क्षमूष् सहने एभ्यः तुन्स्यात्, वृद्धिश्च । **हर्यतेः कन्यन् हिरच्** । हर्य गतिकान्त्योः अस्मात्कन्यन्प्रत्ययः, प्रकृतेर्हिरजित्यर्थः । हिरचि चकार इत्संज्ञकः, अकार उच्चारणार्थः । **हिरण्यमिति** । कित्वान्न लघूपधगुणः । **कृञः पासः** । डु कृञ् करणे अस्मात्पासः प्रत्यय इत्यर्थः । **कर्पास इति** । धातोर्गुणः । **जनेस्तु रश्च** । जन जनने अस्मात्तुप्रत्ययः रेफश्चान्तादेश इत्यर्थः । **जर्तुरिति** । नकारस्य रेफादेशः । **ऊर्णोतेर्डः** । ऊर्णुञ् आच्छादने अस्माड्डप्रत्यय इत्यर्थः । डित्वाट्टिलोपः । 'ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः' इत्यमरः । **दधातेर्यन्नुट् च** । डु धाञ् धारणपोषणयोः, अस्माद्यप्रत्ययः तस्य नुडागमश्च । **जीर्यतेः क्रिन् रश्च वः** । जॄ वयोहानौ अस्मात्क्रिन् स्यात्, धातो रेफस्य वकारादेशश्चेत्यर्थः । **जिव्रिरिति** । क्रिनि 'ॠत इद्धातोः' इति इत्वे रपरत्वे रेफस्य वत्वे च रूपम् । नन्वत्र हलि चेति दीर्घो दुर्वार इत्यत आह **बाहुलकादिति** । **मव्यतेर्यलोपो** । मव्य बन्धने अस्मादालप्रत्ययः स्यात्, तस्यापतु-

---

निपात्यन्ते । **हन्तेः** । हन हिंसागत्योः । **क्रमि** । क्रमु पादविक्षेपे, गम्लृ गतौ, क्षमूष् सहने, एभ्यस्तुन्स्यादेषां वृद्धिश्च । **हर्यतेः** । हर्य गतिकान्त्योः । 'हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयोः । अक्षये मानभेदे स्यादकुप्ये च नपुंसकम्' इति मेदिनी । **कृञः** । डुकृञ् करणे । **जनेः** । तु इत्यविभक्तम् । जनेस्तुप्रत्ययो रेफश्चान्तादेशः स्यात् । **ऊर्णोतेः** । ऊर्णुञ् आच्छादनेऽस्मात् डः स्याद् डित्वाट्टिलोपः टाप् । 'ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः' इत्यमरः । भ्रुवोर्मध्ये य आवर्तस्तत्रेत्यर्थः । 'अन्तरान्तरेण-' इति द्वितीया । **दधातेः** । डुधाञ् धारणादौ अस्माद्यत् प्रत्ययः स्यात्तस्य नुडागमश्च । 'धान्यं व्रीहिषु धान्याके' इति मेदिनी । **जीर्यतेः** । जॄ वयोहानावस्मात् क्रिन्स्यात् । 'ॠत इद्धातोः' । रपरत्वम् । रेफस्य वकारादेशः । **मव्यतेः** । मव्य

विषये। ७२९ **ऋजेः कीकन्।** ऋजीक इन्द्रो धूमश्च। ७३० **तनोतेर्डउः सन्वच्च।** 'तितउः पुंसि क्लीबे च'। ७३१ **अर्भकपृथुकपाका वयसि।** 'ऋधु वृद्धौ'। अतो वुन्। भकारश्चान्तादेशः। प्रथेः कुकन्संप्रसारणं च। पिबतेः कन्। ७३२ **अवद्यावमाधमार्वरेफाः कुत्सिते।** वदेर्नञि यत्। अवद्यम्। अवतेरमः। वस्य पक्षे धः। अवमः अधमः। अर्तेर्वन्। अर्वा। रिफतेस्तौदा-

---

डागमः, धातोर्यलोपः, परिशिष्टान्त्यस्य वकारस्य मकारश्चेत्यर्थः। **ममापताल इति। ऋजेः कीकन्।** ऋज गतौ अस्मात्कीकन्स्यात्। **ऋजीक इति।** कित्वान्न गुणः। **तनोतेर्डउः सन्वच्च।** तनु विस्तारे अस्माड्डउप्रत्ययः, स सन्वच्च भवति। **तितउरिति।** डउप्रत्ययस्य सन्वत्त्वाद् द्वित्वमभ्यासेत्त्वं डित्वाट्टिलोपः। डउरिति पृथगुच्चारणसामर्थ्यान्न गुणः। 'प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान्' इत्यमरकोशः। **अर्भकपृथुकपाका वयसि।** एते निपात्यन्ते। निपातनप्रकारमेवाह **ऋधु वृद्धाविति।** अस्माद् वुन्, अकादेशः, धकारस्य भकारः, लघूपधगुणः। पृथुक इत्यत्राह **प्रथेरिति।** प्रथ प्रख्याने, अस्मात्कुकन्, धातोः संप्रसारणेन रेफस्य ऋकारः कित्वान्न लघूपधगुणः। **पिबतेरिति।** पा पाने इत्यस्मादित्यर्थः। 'पोतः पाकोऽर्भको डिम्भः' 'पृथुकौ चिपिटार्भकौ' इति चामरः। **अवद्यावमाधमार्वरेफाः।** एते निपात्यन्ते। निपातनमेवाह **वदेरिति।** वद व्यक्तायां वाचि अस्मान्नञि उपपदे यत्प्रत्यय इत्यर्थः। **अवतेरिति।** अव रक्षणादौ। अधम इत्यत्राह **वस्य पक्षे**

बन्धने। **अन्त्यस्येति।** वकारस्येत्यर्थः। **ऋजेः।** ऋजी गतौ। **तनोतेः।** तनु विस्तारेऽस्माद् डउः प्रत्ययस्तस्य सन्वद्भावाद् द्वित्वमभ्यासस्येत्त्वं च डित्वाट्टिलोपः। पृथगुच्चारणसामर्थ्याद् गुणो न। तितउः चालनी। 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत'। 'तितउः परिपवनं भवति' इति पस्पशायां भाष्यम्। 'चालनी तितउः पुमान्' इत्यमरः। 'चालनं तितउन्युक्तम्' इति कोशान्तरम्। 'स्याद्धा-स्तु हिङ्गु तितउ' इति पुंनपुंसकवर्गे त्रिकाण्डशेषः। **अर्भक।** एते निपात्यन्ते। निपातनप्रकारमेवाह **ऋधु वृद्धावित्यादि। प्रथेरिति।** प्रथ प्रख्याने, पा पाने, पिबति स्तनादिकमिति पाकः। 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः। 'अर्भकः कथितो बाले मूर्खेऽपि च कृशेऽपि च। पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवत्'। 'पाकः परिणतौ शिशौ। केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी। **अवद्या।** एते कुत्सिते निपात्यन्ते। वद व्यक्तायां वाचि, अव रक्षणादौ, ऋ गतौ, रिफ कत्थनयुद्धनिन्दाहिंसादानेषु। 'निकृष्टप्रतिकृष्टा-र्वरेफयाप्यावमाधमाः' इत्यमरः। 'कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इति च।

दिकाद् अः। रेफः। ७३३ लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः। तरौ प्रत्ययौ क्रमात्स्तो धातोर्ह्रस्वः, प्रत्ययस्य पुट्। लिप्तं श्लिष्टम्। रिप्रं कुत्सितम्। ७३४ क्लिशेरीच्चोपधायाः कन्लोपश्च लो नाम्च। क्लिशेः कन्स्यादुपधाया इत्वम्, लस्य लोपो नामागमश्च। कीनाशो यमः। कित्वफलं चिन्त्यम्। ७३५ अश्नोतेराशुकर्मणि वरट् च। चकारादुपधाया ईत्वम्। ईश्वरः। ७३६ चतेरुरन्। चत्वारः। ७३७ प्रा (प्रे ऽ) ततेररन्। प्रातः। ७३८

थ इति। अर्तेरिति। ऋ गतौ। रिफतेरिति। रिफ कन्थनादिषु अस्माद् अप्रत्यय इत्यर्थः। 'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः' इत्यमरः। लीरीङोर्ह्रस्वः। लीङ् श्लेषणे, रीङ् श्रवणे, आभ्यां तप्रत्ययरप्रत्ययौ क्रमात्स्तः, तस्य पुडागमः, धातोर्ह्रस्वश्चेत्यर्थः, प्रकृतिप्रत्ययसमुदायेन क्रमाच्छ्लेषणे कुत्सने च वाच्ये। क्लिशेरीच्चोपधायाः। क्लिशू विबाधने अस्मात्कन्स्याद् धातोरुपधाया ईत्वम्, लकारस्य लोपो नामागमश्च। कीनाश इति। 'कृतान्ते पुंसि कीनाशः' इत्यमरः। चिन्त्यमिति। उपधाया ईत्वविधिसामर्थ्यादेव गुणो न भविष्यतीति भावः। अश्नोतेराशुकर्मणि। अशू व्याप्तौ अस्माद्वरट् स्यात्, उपधाया ईत्वं च आशुकर्मणि वाच्ये। ईश्वर इति। ईश्वरो हि प्रार्थितः सन्वरादिकं शीघ्रं दातुं शक्तो भवति। चतेरुरन्। चते

'अधमः स्यादृर्थे ऊनेऽपि' इति मेदिनी। 'अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः। रेफो रवर्णे पुंसि स्यात्कुत्सिते पुनरन्यवत्' इति च मेदिनी। लीरीङोः। लीङ् श्लेषणे, रीङ् श्रवणे। क्रमादिति। श्लेषणे वाच्ये तप्रत्ययः कुत्सिते वाच्ये रप्रत्यय इत्यर्थः। 'लिप्तं विषाक्ते भुक्ते च वाच्यवत्स्याद्विलेपिते' इति विश्वः। क्लिशेः। क्लिशू विबाधने। नामागमश्च प्रत्ययस्येति शेषः। चिन्त्यमिति। ईत्वविधानसामर्थ्यादेव गुणाभावसिद्धेरिति भावः। 'कीनाशः कर्षकः क्षुद्रोपांशुघ्नूलिषु वाच्यवत्। यमे ना' इति मेदिनी। अश्नोतेः। अशू व्याप्तौ अस्माद्वरट् स्यात्। आशुकर्म वरदानादि-क्रिया यस्य तस्मिन्वाच्ये शीघ्रदातरीत्यर्थः। ईश्वर इति। स्त्रियां तु टित्वान्ङीप्। ईश्वरी। प्रत्ययस्वरेण मध्योदात्ता। ईशेः वनिपि 'वनो र च' इति ङीब्रयोस्तु धातु-स्वरेणाद्युदात्ता। पुंयोगलक्षणे ङीषि अन्तोदात्ता। 'स्थेशभासपिसकसः—' इति वरचि। तदन्ताट्टापि ईश्वरेति विवेकः। 'ईश्वरो मन्मथे शम्भौ नाढ्ये स्वामिनि वाच्यवत्। ईश्वरी चेश्वरोमायाम्' इति मेदिनी। ईश्वरा उमायामिति छेदः। 'ईश्वरः शङ्करेऽधीशे तत्प-त्न्यामीश्वरीश्वरा' इति श्रीपालितः। 'विन्यस्तमङ्गलमहौषधिरीश्वरायाः' इति भारविः। दशपाद्यां तु सूत्रान्तरमपि 'हन्ते रन घश्च' इति। हन हिंसागत्योरस्माद्रन्प्रत्ययः स्याद् घश्चान्तादेशः। हन्यते गम्यतेऽतिथिभिरिति घरः गृहम्। चतेः। चते याचनेऽस्मा-

अमेस्तुट् च। अन्तर्मध्यम्। ७३९ **दहेर्गो लोपो दश्च नः।** गप्रत्ययो धातोरन्त्यस्य लोपो दकारस्य नकारः। नगः। ७४० **सिचेः संज्ञायां हनुमौ कश्च।** सिञ्चतेः कप्रत्ययो हकारादेशो नुम्च स्यात्। सिंहः। ७४१ **व्याङि घ्रातेश्च जातौ।** कप्रत्ययः स्यात्। व्याघ्रः। ७४२ **हन्तेरच् घुर च।** घोरम्। ७४३ **क्षमेरुपधालोपश्च।** चादच्। क्ष्मा। ७४४ **तरतेर्ड्रिः।** त्रयः। त्रीन्। ७४५ **ग्रहेरनिः।** ग्रहणिः। ङीष्। ग्रहणी व्याधिभेदः। ७४६ **प्रथेरमच्।**

याचने अस्मादुरन्स्यात्, उरनि अकार उच्चारणार्थः, नकार इत्। **चत्वार इति।** चतुरनडुहोरित्याम्। **प्राततेररन्।** प्रपूर्वादत सातत्यगमने इत्यस्मादरन्प्रत्ययः, अकारः उच्चारणार्थः। **प्रातरिति।** स्वरादिपाठादव्ययत्वम्। **अमेस्तुट् च।** अम गत्यादिषु अस्मादरन् स्यात्, तस्य तुडागमश्च। **दहेर्गो लोपो दश्च नः।** दह भस्मीकरणे अस्माद् गप्रत्ययः, धातोरन्त्यस्य लोपः, दकारस्य नकारश्चेत्यर्थः। **सिचेः संज्ञायाम्।** षिच क्षरणे अस्मात्कप्रत्ययो धातोरन्त्यस्य हकारादेशो नुम् स्यात्। **व्याङि घ्रातेश्च जातौ।** वि आङित्युपसर्गे उपपदे घ्रा गन्धोपादान इत्यस्मात् कप्रत्ययः स्याद् जातौ वाच्यायाम्। **व्याघ्र इति।** कित्वादातो लोप इटि चेत्यालोपः। **हन्तेरच् घुर च।** हन हिंसागत्योः अस्मादच्प्रत्ययः, धातोर्घुरादेशश्च। **घोरमिति।** लघूपधगुणः। **क्षमेरुपधालोपश्च।** क्षमूष् सहने अस्मादच्प्रत्ययः धातोरुपधाया लोपश्चेत्यर्थः। 'क्ष्मावनिर्मेदिनी मही' इत्यमरः। **तरतेर्ड्रिः।** तॄ प्लवनतरणयोः अस्माद् ड्रिः स्यात्। **त्रिरिति।** डित्वाट्टिलोपः। तस्य नित्यं बहुवचनान्तत्वादाह। **त्रय इति। ग्रहेरनिः।** ग्रह उपादाने अस्मादनिप्रत्ययः। **ग्रहणिरिति।** अट्कुप्वा-

---

दुरन्स्यादकार उच्चारणार्थः। 'चतुरनडुहोरामुदात्तः' इत्याम्। चत्वारः। **प्रादतः।** अत सातत्यगमने प्रपूर्वादस्मादरन्स्यात्। रेफादकार उच्चारणार्थः। स्वरादिपाठादव्ययत्वम्। प्रातर्। **अमेः।** अम गतिशब्दसंभक्तिषु, अस्मादरन्स्यात्तस्य तुडागमश्च। अन्तःशब्दोऽपि प्रातःशब्दवद् अव्ययम्। **दहेः।** दह भस्मीकरणे। 'नगो महीरुहे शैले भास्करे पवनाशने' इति मेदिनी। **सिचेः।** षिच क्षरणे। **हकारादेश इति।** धातोरन्त्यस्येत्यर्थः। 'सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः। सिंही क्षुद्रबृहत्योः स्याद्वासके राहुमातरि' इति विश्वः। **व्याङि।** घ्रा गन्धोपादानेऽस्माज्जातौ वाच्यायां कः स्यात् कित्वादातो लोपः। 'व्याघ्रः स्यात्पुंसि शार्दूले रक्तैरण्डकरञ्जयोः। श्रेष्ठे नरादुत्तरस्थः कण्टकार्यां च योषिति' इति मेदिनी। **हन्तेः।** हन्तेरच् स्याद्धातोर्घुरादेशश्च। 'घोरं भीमे हरे' इति विश्वः। **क्षमेः।** क्षमूष् सहने। 'क्ष्मावनिर्मेदिनी मही' इत्यमरः। **तरतेः।** तॄ प्लवनतरणयोरस्माद् ड्रिः स्यात्। डित्वाट्टिलोपः। **ग्रहेः।**

प्रथमः । ७४७ चरेश्च । चरमः । ७४८ मङ्गेरलच् । मङ्गलम् ।

इत्युणादिषु पञ्चमः पादः ।

ञिति णत्वम् । ङीषिति । 'कृदिकारादक्तिनः' इत्यनेन । 'ग्रहणी रुक् प्रवाहिका' इत्यमरः । प्रथेरमच् । प्रथ प्रख्याने अस्मादमच् स्यात् । प्रथम इति रूपम् । चरेश्च । चर गतिभक्षणयोरस्मादमच्स्यात् । प्रथिचरिभ्यामित्येकयोग एव कर्तुं शक्यः । मङ्गेरलच् । मगिर्गत्यर्थः । अस्मादलच्प्रत्यय इत्यर्थः । मङ्गलमिति । धातोरिदित्त्वान्नुम्, 'श्वश्श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इत्यमरः ।
इति सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायाम् उणादिषु पञ्चमः पादः समाप्तः ।

ग्रह उपादाने । ङीषिति । 'कृदिकारात्' इत्यन्तेन । 'ग्रहणी रुक् प्रवाहिका' इत्यमरः । प्रथेः । प्रथ प्रख्याने । 'प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी । 'प्रथमचरम-' इति वैकल्पिकसर्वनामत्वात्पक्षे जसः शीभावः, प्रथमे प्रथमाः । चरेश्च । चर गतिभक्षणयोरस्मादमच्स्यात् । चरमे चरमाः । योगविभागश्चिन्त्यप्रयोजनः । प्रथिचरिभ्यामित्येव सुवचम् । मङ्गेः । उखउखीत्यादिदण्डके गत्यर्थको मगिः पठ्यते । 'कल्याणं मङ्गलं शुभम्' । मङ्गलो ग्रहभेदः । 'मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे । नपुंसकं तु कल्याणे सर्वार्थे रक्षणेऽपि च' इति मेदिनी । भावे ष्यञि माङ्गल्यम् । 'तत्र साधुः' इति यत् —'मङ्गल्यः स्यात्त्रायमाणाश्वत्थबिल्वमसूरके । स्त्रियां शम्यामधः-पुष्प्यां मिसि शुक्लवचासु च । रोचनायामथो दध्नि क्लीबं शिबकरे त्रिषु' इति मेदिनी ।

इत्युणादिषु पञ्चमः पादः ।

उणादिप्रत्ययाः सन्ति पादोत्तरशतत्रयम् । तेषां विवेचनं त्वत्र ज्ञानेन्द्रस्वामिभिः कृतम् ।

प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतो न तु सर्वेषां, सोऽप्युपन्यासो नैकप्रघट्टकतया कृतः, किंतु विच्छिद्येति स्पष्टम् । तत्रापि केचित्प्रमादा मनोरमायां प्रदर्शितास्तेष्वेव कांश्चित्प्रमादान्दर्शयामः । 'भजो ण्विः' इति ण्वि-प्रकरणे 'छन्दसि सहः' 'वहश्च' इत्युपन्यस्य 'परौ व्रजेः षः पदान्ते' इति ण्विस्तेनैव षः परिव्राडित्ययं हि प्राचो ग्रन्थस्तद्व्याख्यायां तत्पौत्रेण पञ्चपाद्युणादिसूत्रे इदं पठ्यते इत्युक्तं तदुभयमपि प्रामादिकम् । 'क्विब्वचि-' इति क्विब्दीर्घौ हि प्रकम्य 'परौ व्रजेः-' इति सूत्रस्य पाठात् । अस्मिन्नंशे पञ्चपादीदशपाद्योरेकवाक्यत्वात् । यदपि प्राचो ग्रन्थे क्वचित्पठ्यते चिणीति तदप्यपाणिनीयत्वादुपेक्ष्यम् । एतेन प्रघट्टकान्तरे 'स्तुद्रुपरिव्राजां दीर्घश्च' इति केचिदिति प्राचोग्रन्थोऽपि प्रत्युक्तः । सूत्रारूढे सर्वसंमते चार्थे केचिदि-त्युक्तेः अप्रामाणिकत्वात् । यदपि 'धनर्तिचच्छिड्वपितपिजनियजेरुस इस्' इति पठितं तदप्यनाकरम् । तथा हि जनेरुसिः अर्तिपृवपियजितनिधनितपिभ्यो नित् । ऐतेर्णिच्च । चक्षेः शिच्चेति सर्वसंमतः पाठः । 'तपूंषि तस्मै वपुषो वपुष्टरम्' इत्यादिमन्त्रेषु आद्यु-

दात्ततयानुकूलश्च । वेदभाष्ये ऐवमेव स्थितम् । इत्यादयो द्वितीयपादे प्रमादाः । तृतीयपादेऽपि स्तनिदूषिपुषिगदिमदिहृदिभ्यो णेरित्नुचिति प्राचा पठितं तत्र दूषिहृदी केषामपि वृत्तिकृतां ग्रन्थे न पठितौ । दूषयित्नुः हृदयित्नुरिति प्रयोगोऽप्याकरे न दृष्टः । स्तनिहृषिपुषिमुदिगदिमदिभ्य इति हि पञ्चपादीपाठः । 'घुषिगन्धिमण्डिजनिर्गामभ्यः' इति दशपाद्यामधिकं पठितमित्यन्यदेतत् । यदपि 'श्रुदक्षिस्पृहिगृहिदृजृभ्य आय्यः' इति पठित्वा दराय्य जराय्य इति प्राचोक्तं तदपि न । दृजूग्रहणस्याकरानारूढत्वात् । यदपि 'जृविशिभ्यां झच्' 'गण्डिमण्डिजनिनन्दिभ्यश्च' इत्युक्त्वा गण्डयतो जनयन्त इत्युदाहृतं प्राचा, यच्च गण्डयन्त इति प्रतीकमुपादाय मेघनामेदमिति व्याख्याय गडि वदनैकदेशे इति व्याख्यातृभिर्विवृतं तत्सर्वं प्रामादिकम् । तथाहि उणादिषु गडीति निरनुषङ्गं पठित्वा गड सेचने इति विवृतम्, 'अयामन्ता-' इति सूत्रे वृत्तिन्यासहरदत्तादिसकलग्रन्थेष्वेवम्, माधवग्रन्थेऽप्येवमेव । युक्तं चैतत् । मेघ इति व्याख्यानं प्रति सेचनार्थस्यैवानुगुणत्वाद् जनेः पाठोऽप्यप्रामाणिकः । जिधातुं पठित्वा जयन्तः पाकशासनिः इति सर्वैर्विवृतत्वात्, जनयन्त इति लक्ष्यस्य कैरपि अप्रदर्शितत्वात् । अप्रसिद्धत्वाच्चेत्यादयस्तृतीयपादे प्रमादाः । अथ चतुर्थे । यदपि कृगृस्तृजागृभ्यः क्विन् । कीर्विः गीर्विः स्तीर्विरिति प्राचोक्तं तदपि लिपिभ्रमप्रयुक्तमेव । कॄ विक्षेपे, गॄ निगरणे, स्तृञ् आच्छादने, इति प्राचो ग्रन्थं विवृण्वतामुक्तिरपि मूलाशुद्ध्या वाशुद्धा । 'जॄशॄस्तॄजागृभ्यः क्विन्' इति हि पाठ उणादिवृत्तिकृतां माधवादीनां च संमतः । जीर्विः पशुः । शीर्विर्हिंस्रः । स्तीर्विरध्वर्युरिति च तत्तद्ग्रन्थेषूपपादितम् । स्तॄ इत्यस्य दीर्घान्तत्व एवहि 'ॠत इद्धातोः' इतीत्वं लभ्यते न तु ह्रस्वान्तत्वेऽपि, तस्माद्यथाकरमेव हि ग्रहीतुमुचितमिति दिक् । यदपि प्राचोक्तं--'ग्लाज्याहात्वरिभ्यो निः' इति तदप्यनाकरम् । आकरे हि 'वीज्याज्वरिभ्यो निः' इति पठित्वा सूत्रद्वयानन्तरं 'वहिश्री-' इति सूत्रे 'ग्लाहात्वरिभ्यो नित्' इति सूत्रितत्वात् । 'तूर्णी रथः सदानवः' इत्यादावाद्युदात्तदर्शनाच्च । नच 'क्रियां क्विन्' इत्यधिकारस्थं वार्तिकमेवेदं प्राचोदाहृतं न तूणादिसूत्रस्थमिति वाच्यम् । एवमपि त्वरतेः पाठस्यानुचितत्वात् । न ह्यसौ वार्तिकेऽस्तीति दिक् । एवं संस्त्याने स्त्यायतेर्ड्रट् इत्यपि प्राचोदाहृतमनाकरम् । स्त्यायतेर्ड्रडित्येव सूत्रस्याकरे पञ्चपाद्यां दशपाद्यां चोपलम्भात् । 'संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप्रसवे पुमान्' इति भाष्ये लोकपाठः स एव माधवेनोपन्यस्तः न तु सूत्रपाठस्य तथात्वं दृश्यते, एवं तद्ग्रन्थव्याख्यातॄणामपि प्रमादा ऊह्याः । तथथा पाणिन्यादिमुनीनिति व्याचक्षाणैरुक्तम् 'मनेरुच्चोपधायाः' इति, न ह्येवंविधं सूत्रं पञ्चपाद्यां दशपाद्यां वास्ति, अत इत्यनुवर्तमाने 'मनेरुच्च' इत्येव सूत्रितत्वादिति दिक् । इति चतुर्थपादे प्राचः प्रमादाः ।

अथ उत्तरकृदन्तप्रकरणम् ६८।

३१६९ **उणादयो बहुलम्।** (३-३-१) एते वर्तमाने संज्ञायां च बहुलं स्युः। केचिदविहिता अप्यूह्याः। 'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' (भाष्यम्)। ३१७० भूतेऽपि

अथ उत्तरकृदन्तप्रक्रिया निरूप्यन्ते। **उणादयो बहुलम्।** तृतीयेऽध्याये तृतीयपादस्येदमादिमं सूत्रम्। **वर्तमाने संज्ञायां चेति।** 'वर्तमाने लट्' इत्यतः 'पुवस्संज्ञायाम्' इत्यतश्च तदनुवृत्तेरिति भावः। अत एव नञि हन एह च नञ्पूर्वाद्धन्तेरसिप्रत्यये प्रकृतेः एहादेशे व्युत्पन्नः अनेहस्शब्दो वर्तमानकाल एवेत्युक्तं भाष्ये। संज्ञाशब्दश्चात्र रूढशब्दपरः वैदिकानामपि शब्दानामुपलक्षणम्। अत एव 'नैगमरूढिभवं हि सुसाधु' इति वार्तिकम्। वैदिका रूढशब्दाश्चौणादिका इति भाष्यं च संगच्छते। रूढाश्चैते उणादिप्रत्ययान्ता अवयवार्थशून्या असन्तमप्यवयवार्थमाश्रित्य प्रायः कर्तरि व्युत्पाद्याः। उणादयो वेत्यनुक्त्वा बहुलग्रहणस्य प्रयोजनमाह। **केचिदविहिता अप्यूह्या इति।** तदेवाह **संज्ञास्वित्यादि।** भाष्यस्थोऽयं श्लोकः। डित्थो डिवित्थ इत्यादौ धातुरूपाणि प्रत्ययाश्च यथासंभवमूह्याः। गुणनिषेधादिकार्यवशाद् अनूबन्धं विद्यात्। अनूबन्धमित्यत्र 'उपसर्गस्य घञ्यमनुष्ये–' इति दीर्घः। एतद् उणादिषु शास्त्रं शासितव्यम्। 'कृवापाजि–' इत्यादिसूत्राणि तु शाकटायनप्रणीतानि, अस्यैव बहुलग्रह-

---

उणादयो बहुलम्। 'वर्तमाने लट्' इत्यतो वर्तमानग्रहणं 'पुवः संज्ञायाम्' इत्यतः संज्ञाग्रहणं चानुवर्तते तदाह **एते इति।** अत्र हि सूत्रे 'धातोः' 'प्रत्ययः' 'कृदतिङ्' इति चानुवर्तते, तेन 'कृवापाजिमि–' इत्यादिना विहितानामष्टाध्यायीबहिर्भूतानामप्युणादीनां प्रत्ययसंज्ञा कृत्संज्ञा च सिध्यति। तथा चोणादिप्रत्ययाः सर्वे धातोः परत्र 'कर्तरि कृत्' इति कर्त्रर्थे भवन्ति। उणादिप्रत्ययान्तस्य 'कृत्तद्धित–' इति प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिरित्यादिसर्वमपीष्टं सिध्यति। अपरिपूर्णानामुणादीनां परिपूरणार्थं बहुलग्रहणम्। तस्य फलमाह **केचिदविहिता अपीति।** हृषेरुलज्विहितः स तु शङ्केरपि भवति शङ्कुलेति प्रयोगदर्शनात्। किंच फिडफिड्डप्रत्ययौ कुत्रापि न विहितौ अतेरुह्येते ऋफिडः ऋफिड्डः इति तयोः कित्त्वं च कल्प्यते। तथा षण्ढ इत्यत्र सत्वाभावश्चेत्यादि। **संज्ञास्विति।** अनादिसंज्ञास्वेव न तु सर्वास्वित्याहुः। 'हृषेरुलच्' इति प्रत्ययं दृष्ट्वा शङ्किः प्रकृतिरुह्यते। तेन शङ्कुलेति सिद्धम्। ऋ गतावित्यादिभ्यः फिडफिड्डादिप्रत्यया गृह्यन्ते। **कार्याद्विद्यादिति।** ऋफिड इत्यादौ गुणप्रतिषेधादिकार्यानुरोधादनुबन्धं ककारादिकं विद्यात्। अनूबन्धमित्यत्र 'उपसर्गस्य

(३-३-२) ३१७१ भविष्यति गम्यादयः । (३-३-३) ३१७२ दाशगोघ्नौ संप्रदाने । (३-४-७३) एतौ संप्रदाने कारके निपात्येते । दाशन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिः । ३१७३ भीमादयोऽपादाने । (३-४-७४) भीमः । भीष्मः । प्रस्कन्दनः । प्रपत्तः । मूर्खः खलतिः । ३१७४ ताभ्यामन्यत्रोणादयः । (३-४-७५) संप्रदानापादानपरामर्शार्थं ताभ्यामिति । ततोऽसौ भवति तन्तुः । वृत्तं तदिति वर्त्म । चरितं तदिति चर्म । ३१७५ तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् (३-३-१०) क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम् । कृष्णं द्रष्टुं

णस्य प्रपञ्च इत्यर्थः । **भूतेऽपि दृश्यन्ते** । उणादय इति शेषः । वर्तमानाधिकारादिदं भूतग्रहणम् । दृशिः प्रयोगानुसारार्थः । इदं सूत्रं बहुलग्रहणप्रपञ्चार्थम् । **भविष्यति गम्यादयः** । भविष्यति काले गम्यादयः शब्दा इनिप्रत्ययान्ता निपात्यन्त इत्यर्थः । ग्रामङ्गमीति निपातनान्नात्र णित्वम् । गमिष्यन्नित्यर्थः । प्रस्थायी प्रस्थास्यमान इत्यर्थः । **तुमुन्ण्वुलौ । क्रियार्थायामिति** । क्रियोद्देशभूतक्रियावृत्तिधातौ उपपदे इत्यर्थः । भविष्यतीत्यनुवर्तते । तुमुनि नकार इत्, मकारादुकार उच्चारणार्थः । ण्वुलि णलावितौ, वोरकादेशः । **मान्तत्वादिति** । तुमुनो मान्तकृत्त्वाद् 'कृन्मेजन्तः' इत्यव्ययत्वमित्यर्थः । ततश्च 'अव्ययकृतो भावे' इति वचनाद्भावे तुमुन् । ण्वुल् तु कर्तर्येव । **कृष्णं द्रष्टुमिति** । 'न लोकाव्यय-' इति न

षणि-' इति दीर्घः । एतदुणादिषु शास्त्रं शासितव्यमित्यर्थः । **भूतेऽपि दृश्यन्ते** । नन्वेवं वर्तमानग्रहणं च 'उणादयो बहुलम्' इत्यत्र नानुवर्त्यताम् । एतच्चोत्तरसूत्रं च त्यज्यताम् । अविशेषेण कालत्रयेऽपि प्रत्ययलाभादिति चेदत्राहुः—बाहुल्येन वर्तमाने भवन्ति, भूतभविष्यतोस्तु क्वचिदेवेति विवेकप्रदर्शनार्थमिति । **भविष्यति गम्यादयः** । गमिष्यतीति गमी ग्रामम् । आगमिष्यतीति आगामी । गमेरिनिः । 'आङि णित्' इत्याङ्पूर्वस्य तु णित्वादुपधावृद्धिः । **भीमः । भीष्म इति** । 'भियो हेतुभये षुक्' इति मप्रत्ययसंनियोगेन वैकल्पिकः षुक् । प्रस्कन्दत्यस्मादिति प्रस्कन्दनः । अपादाने ल्युट् । प्रपतत्यस्मादिति प्रपत्तः, पचाद्यच् । मुह्यत्यस्मादिति मूर्खः । 'मुहेः खो मूर्च'[स्खलत्यस्मादिति खलतिर्निष्केशशिरा इति प्रागुक्तम् । **ताभ्यामिति** । ताभ्यामित्यनुक्तौ तु संनिहितापादानस्यैव परामर्शादपादानादन्यत्रेत्यर्थः स्यादिति भावः । **ततोऽसाविति** । तनोतेः कर्तरि क्तः । 'अनुदात्तोपदेश-' इत्यनुनासिकलोपः । असौ ततो भवति विस्तृतो भवतीत्यर्थे तनोतेस्तुन् । **वृत्तमिति** । गमनादिना निष्पन्नं यत्तद्वर्त्म । वृतेः कर्मणि मनिन् । 'अयनं वर्त्ममार्गाध्व-' इत्यमरः । **तुमुन्ण्वुलौ** ।

याति। कृष्णं दर्शको याति। अत्र वाऽसरूपेण तृजादयो न। पुनर्ण्वुलुक्तेः।

३१७६ **समानकर्तृकेषु तुमुन्**। (३-३-१५८) अक्रियार्थोपपदार्थमेतत्। इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्स्यात्। इच्छति भोक्तुम्, वष्टि वाञ्छति

षष्ठी। कृष्णकर्मकभविष्यद्दर्शनार्थं यानमित्यर्थः। अत्र यातीत्युपपदम्। अत्र तुमुन्-प्रत्ययप्रकृत्यर्थस्य दर्शनस्य यानार्थत्वं तुमुना द्योत्यं वाच्यं वा। **कृष्णं दर्शको यातीति**। कृष्णं द्रष्टुम् तदर्थं यातीत्यर्थः। 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति न षष्ठी। ननु तुमुनो भावार्थकत्वे तद्विषये कर्तरि विहितानां तृजादीनामप्रवृत्तावपि ण्वुल्विषये कर्तरि तृजादयः कुतो न स्युः। न च विशेषविहितेनानेन ण्वुला तृजादयो बाध्यन्त इति वाच्यम्। वासरूपविधिना तद्बाधस्य पाक्षिकत्वादित्यत आह **अत्रेति**। क्रियार्थक्रियोपपदे विषये वासरूपविधिना पक्षे प्राप्ताः ये तृजादयस्ते न भवन्तीत्यर्थः। आदिना 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यादिसंग्रहः। कुतोऽत्र तृजादयो नेत्यत आह **पुनर्ण्वुलुक्तेरिति**। 'ण्वुल्तृचौ' इति कालसामान्ये कर्तरि विहितो ण्वुल् क्रियार्थक्रियोपपदे विषये भवतीति पुनरिह ण्वुल्विधानात् तदितरतृजादयो न भवन्तीति विज्ञायत इति भावः। **समानकर्तृकेषु**। 'तुमुन्ण्वुलौ क्रियायाम्-' इत्येव सिद्धे किमर्थमिदमित्यत आह **अक्रियार्थेति**। **इच्छार्थेष्विति**। 'इच्छार्थेषु लिङ्लोटौ' इत्यतस्तदनुवृत्तेरिति भावः। **इच्छति भोक्तुमिति**। अत्र

क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था तस्याम्। अत्रेदं बोध्यम्—तुमुन्ण्वुलोः कृत्वाविशेषेऽपि 'अव्ययकृतो भावे' इति वचनाद्भावे तुमुन्। ण्वुल् तु कर्तरि क्रियायामिति सप्तमीनिर्देशात्तद्वाचकस्य यातीत्यादेः 'तत्रोपपदं सप्तमीस्थम्' इत्युपपदत्वमिति। **कृष्णं द्रष्टुमिति**। कृष्णकर्मकं यद्भविष्यद्दर्शनं तत्प्रयोजकं यानमित्यर्थः। **कृष्णं दर्शक इति**। कृष्णकर्मकभविष्यद्दर्शनकर्तृकर्तृकं दर्शनप्रयोजनकं च यानमित्यर्थः। क्रियायां किम्, भिक्षिष्ये इत्यस्य जटाः। इह भिक्षार्थी जटाः ताश्च द्रव्यं न तु क्रिया, भिक्षितुं जटा इति प्रयोगस्तु धारयतीत्यध्याहारेण समर्थनीयः। क्रियार्थायां किम्। धावतस्ते पतिष्यति दण्डः। अस्त्यत्र धावत इति क्रिया न त्वसौ दण्डपतनार्था। धावनं तु दण्डपतने हेतुर्भवति न तूद्देश्यमिति दिक्। **समानकर्तृकेषु**। **अक्रियार्थेति**। भोक्तुमिच्छतीत्यत्र भोजनविषयिणीच्छेति प्रतीयते न तु भोजनार्थेच्छेति। अतः पूर्वेणात्राप्राप्तिरिति भावः। सूत्रस्थसमानशब्द एकतावचन इत्याह **एककर्तृकेष्विति**। एकेति किम्, पुत्रस्य पठनमिच्छतीति। पुत्रस्येति कर्तरि षष्ठी। पुत्रकर्तृकं पठनमित्यर्थः। इह सूत्रे समानकर्तृकेति पदाभावे पुत्रस्य पठितुमिच्छतीति प्रयोगः स्यात्। देवदत्तं भुञ्जानमिच्छतीति काशिका। अत्र काशिकायामुक्तम् इच्छन्

वा। **३१७७ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्।** (३-४-६५) एषूपपदेषु धातोस्तुमुन्स्यात्। शक्नोति भोक्तुम्। एवं धृष्णोतीत्यादौ। अर्थग्रहणमास्तिनैव संबध्यते, अनन्तरत्वात्। अस्ति भवति विद्यते वा भोक्तुम्। **३१७८ पर्याप्तिवचनेष्वलमर्थेषु।** (३-४-६६) पर्याप्तिः पूर्णता। तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात्। पर्याप्तो भोक्तुम्, प्रवीणः कुशलः पटुरित्यादि। पर्याप्तिवचनेषु किम्—अलं भुक्त्वा। अलमर्थेषु किम्—पर्याप्तं भुङ्क्ते। प्रभूततेह गम्यते न तु भोक्तुः सामर्थ्यम्। **३१७९ कालसमयवेलासु तुमुन्।** (३-३-१६७) पर्यायोपादानमर्थो-

इच्छतीत्युपपदार्थस्य इच्छाया भोजनोद्देश्यत्वाभावेऽपि तुमुन् इच्छार्थेष्वित्यर्थग्रहणस्य प्रयोजनमाह **वष्टि वाञ्छति वेति।** यद्यपि वशेः छान्दसेषु परिगणनं धातुपाठे। तथापि 'वष्टि भागुरिः—' इति वार्तिकप्रयोगात् लोकेऽपि प्रयोग इति भावः। **शकधृष।** 'शकधृषज्ञा—' इति सूत्रमप्यक्रियोपपदार्थम्। **शक्नोति भोक्तुमिति।** अत्र शक्तेः भोजनोद्देश्यत्वाभावेऽपि तुमुन्। **एवमिति।** धृष्णोति जानाति ग्लायति घटते आरभते लभते क्रमते उत्सहते अर्हति वा भोक्तुमित्युदाहार्यम्। **अस्तिनैवेति।** न तु शकादिनेत्यर्थः। कुत इत्यत आह **अनन्तरत्वादिति।** संनिहितत्वादित्यर्थः। **पर्याप्तिवचने।** पर्याप्ति इत्यस्य विवरणम् **पूर्णतेति।** अलमर्थेष्वित्यस्य विवरणम् **सामर्थ्यवचनेष्विति। पर्याप्तो भोक्तुमिति।** अन्यूनसामर्थ्यवानित्यर्थः। वचनग्रहणस्य फलमाह **प्रवीण इत्यादि। अलं भुक्त्वेति।** अत्र अलमिति प्रतिषेधार्थकम्। न तु पर्याप्त्यर्थकमिति भावः। **पर्याप्तं भुङ्क्ते इति।**

करोतीत्यत्रानभिधानान्नेति। अत्र निष्कर्षमाहुः—उक्तविषये इच्छन्कर्तुमिति प्रयोगाभावेऽपि इच्छन् कर्तुं गच्छतीत्यादौ तु 'तुमुन्ण्वुलौ—' इति सूत्रेण स्यादिति। तच्चिन्त्यम्। करोतीत्यर्थे तुमुनः प्राप्तेरेवाभावात्। तस्य भावार्थकत्वात्। इह च लटा कर्तृप्रतीतेः। किंचिच्छन्कर्तुमिति प्रयोगो नेष्यते इति रिक्तं वचः, कर्तुमिच्छन्निति प्रयोगस्य सकलसंमतत्वात्। पदानुपूर्व्याश्चाहर पात्रं पात्रमाहरेत्यादाविव स्वेच्छाधीनत्वात्। विस्तरस्त्विह मनोरमादावनुसन्धेयः। **वष्टीति।** वश कान्तौ कान्तिरिच्छेति वशधातुरपीच्छार्थकः। **शकधृष।** अयमप्यक्रियार्थोपपदार्थ आरम्भः। भोक्तुं शक्नोति धृष्णोति जानाति इत्यत्र हि भुज्यर्थो विषयतया संबध्यते, नैपुण्यं च गम्यते। ग्लायति भोक्तुमित्यत्र भोजनविषयिण्यशक्तिर्गम्यते। भोक्तुं घटते इत्यत्र तु भोक्तुमर्हतीति योग्यता। आरभते भोक्तुमित्यत्र भोक्तुं प्रक्रमते उत्सहते इति भुजेराद्यावस्था। लभते इत्यत्राप्रत्याख्यानमस्ति भोक्तुमित्यादौ तु संभवमात्रम्। **पर्याप्तो**

पलक्षणार्थम् । कालार्थेषूपपदेषु तुमुन्स्यात् । कालः समयो वेला अनेहा वा भोक्तुम् । प्रैषादिग्रहणमिहानुवर्तते, तेनेह न—'भूतानि कालः पचतीति वार्ता' । ३१८० भाववचनाश्च । (३-३-११) । भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः । यागाय याति । 'तुमर्थात्-' (सू ५८२) इति चतुर्थी । ३१८१ अण्कर्मणि च । (३-३-१२) कर्मण्युपपदे क्रियार्थायां क्रियायां चाण्स्यात् । ण्वुलोऽपवादः । काण्डलावो

बहुलमन्नं भुङ्क्ते इत्यर्थः । **प्रभूततेति** । अन्नस्येति शेषः । **कालसमयवेलासु** । अविशेषपदेऽपि प्रवृत्त्यर्थमिदम् । ननु कालपर्यायाणां कतिपयानां ग्रहणात्तदितरस्मिन् अनेहआदिशब्दे उपपदे न स्यादित्यत आह **पर्यायोपादानमर्थोपलक्षणार्थमिति** । **अनुवर्तत इति** । प्रैषातिसर्गसूत्रादिति भावः । **भूतानीति** । पृथिव्यादिपञ्चभूतानि कालः पचति उपचयापचयादिविकारं प्रापयति इति वार्ता लोकवृत्तान्त इत्यर्थः । **भाववचनाश्च** । क्रियार्थायां क्रियायामिति भविष्यतीति चानुवर्तते । भावे चेत्येव सिद्धे वचनग्रहणस्य प्रयोजनमाह **भाव इत्यधिकृत्येति** । भावे इत्यधिकृत्य घञादयो विधास्यन्ते ये सामान्यतः ते क्रियार्थायां क्रियायाम् उपपदे भविष्यति काले विशेषविहितेनापि तुमुना समुच्चिता भवन्तीत्यर्थः । न च वाऽसरूपविधिना सिद्धमेतदिति शङ्क्यम्, 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति' इत्युक्तेरिति भावः । ननु यागाय यातीत्यत्र यागस्य संप्रदानत्वाभावात् कथं चतुर्थी । नापि तादर्थ्यचतुर्थी, तादर्थ्यस्य प्रत्ययेनैव लाभादित्यत आह **तुमर्थादिति** । **अण् कर्मणि च** । चकारेण क्रियार्थायां क्रियायामिति समुच्चीयते, तदाह **क्रियार्थायां क्रियायां चेति** । तथा च क्रियार्थायां क्रियायां कर्मणि चेत्युपपदद्वये सत्येवास्य प्रवृत्तिः नान्यतरस्मिन्निति भाष्ये स्पष्टम् । कर्त्रर्थकोऽयमण्, कर्तरि कृदित्यधिकारात् । अत्र 'ण्वुल्तृचौ' इति बाधित्वा 'कर्मण्यण्' इति सामान्यविधिना अण् प्राप्तः, तं तावत्क्रियार्थायां क्रियायामुपपदे विशेषविहितस्तुमुन्ण्वुलाविति ण्वुल बाधितुमुद्युङ्क्ते, पुनर्ण्वुल्विधिसामर्थ्येन वाऽसरूपविधेरत्राप्रवृत्तेरुक्तत्वात् । तमिमं ण्वुलं बाधितुमयमण्विधिः । तदाह **ण्वुलोऽपवाद इति** । 'तुमुन्ण्वुलौ' इति विहितस्य ण्वुलोऽपवाद इत्यर्थः । एवं च ण्वुला बाधितस्य 'कर्मण्यण्' इत्यस्य अयमण्विधिः प्रतिप्रसवार्थ इति स्थितम् ।

भोक्तुमिति । भोक्तुं समर्थ इत्यर्थः । **उपलक्षणार्थमिति** । तस्य फलमाह **अनेहेति** । 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । **तेनेह नेति** । अनुवादेन न भवतीत्यर्थः । **यागायेति** । यष्टुमित्यर्थः । 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । **ण्वुलोऽपवाद इति** । 'अव्ययकृतो भावे' इति भावे विहितत्वात्तुमुनः प्राप्तिरेव

व्रजति। परत्वादयं कादीन्बाधते। कम्बलदायो व्रजति। ३१८२ पदरुजविशस्पृशो घञ्। (३-३-१६) भविष्यतीति निवृत्तम्। पद्यतेऽसौ पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः। ३१८३ सृ स्थिरे। (३-३-१७) सृ इति लुप्तविभक्तिकम्। स्थिरे कर्तरि सर्तेः घञ्स्यात्। सरति कालान्तरमिति सारः। 'व्याधिमत्स्यबलेषु चेति वाच्यम्' (वा २१७४)। अतीसारो व्याधिः। 'उपसर्गस्य-' इति दीर्घः, अन्तर्भावितण्यर्थोऽत्र सरतिः। रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। 'सारो बले दृढांशे च'।

ननु ण्वुला बाधितस्याणः प्रतिप्रसवेऽपि 'आतोऽनुपसर्गे-' इति कप्रत्ययः कम्बलदायो व्रजतीत्यत्र दुर्निवारः, कप्रत्ययस्य कर्मण्यणपवादत्वात् सरूपत्वेन च वाऽसरूपविध्यप्रवृत्तेः। न चायं वैशेषिकोऽणविधिः कप्रत्ययस्याप्यपवाद इति शङ्क्यम्, न ह्ययमपूर्वोऽणविधिः, किंतु लाघवात् 'कर्मण्यण्' इत्यणेवात्र प्रतिप्रसूयते। स च 'कर्मण्यण्' इत्यण् सामान्यविहितः 'आतोऽनुपसर्गे कः' इति वैशेषिकस्य नापवादः, प्रत्युत कप्रत्यय एव तदपवादः। अतः कम्बलदायो व्रजतीत्यत्र कर्मण्यणपवादं तुमुन्ण्वुलाविति ण्वुलं बाधित्वा कप्रत्ययः स्यादित्यत आह **परत्वादयं कादीन् बाधत इति**। आदिना सामगो गुरुकुलं व्रजतीत्यादौ गापोष्टगित्यादिसंग्रहः। अण्कर्मणि चेति ह्यावर्तते। प्रतिप्रसवविधिरपूर्वविधिश्च। तत्र प्रतिप्रसवविधिना ण्वुला अणो बाधनिवृत्तिः। अपूर्वविधिविहितस्य त्वणः तृतीयपादीयस्य द्वितीयपादस्थकप्रत्ययापेक्षया परत्वात् कादिप्रत्यया अणा अनेन बाध्यन्त इत्यर्थः। एतच्च भाष्ये स्पष्टम्। इत ऊर्ध्वम् 'लृट् शेषे च' इत्यादिसूत्रेषु क्रियार्थायां क्रियायामिति निवृत्तम्। भविष्यतीत्येवानुवर्तते इति बोध्यम्। **पदरुज**। कर्तरीत्येव। **पद्यतेऽसाविति**। करणस्याप्यत्र विवक्षातः कर्तृत्वम्। 'एरच्' इत्यतः प्राग् घञधिक्रियते। **सृ स्थिरे। लुप्तविभक्तिकमिति**। लुप्तपञ्चमीकमित्यर्थः। **स्थिरे कर्तरीति**। स्थिरे इति कर्तृविशेषणम्। न तूपपदमिति भावः। **सर्तेरिति**। भ्वादेर्जुहोत्यादेश्च ग्रहणम्, न तु जुहोत्यादेरेव, व्याख्यानात्, तदाह **सरति कालान्तरमिति सार इति**। अर्धर्चादिपाठात् पुंस्त्वं क्लीबत्वं च। अत एव च स्थिर इति नोपपदम्। **व्याधीति**। वार्तिकम-

---

नास्तीति भावः। **पदरुज। पद्यतेऽसाविति**। करणस्य कर्तृविवक्षात्र बोध्या। पद्यते गच्छति येनेति फलितोऽर्थः। **सृस्थिरे**। सर्तेरिति भ्वादेर्जुहोत्यादेश्च ग्रहणं, स्थिरग्रहणम् प्रत्ययार्थस्य कर्तुर्विशेषणं न तूपपदमिति ध्वनयन्नाह **स्थिरे कर्तरीति**। अर्धर्चादिषु सारशब्दपाठोऽत्र मानम्। **व्याधीत्यादि**। अस्थिरार्थमिदं वचनम्। तेन विसारो मत्स्य इत्यत्र विविधं सरतीत्यर्थः संगच्छते। **अतीसार इति**। 'उप-

३१८४ भावे। (३-३-१८) सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्स्यात्। पाकः, पाकौ। ३१८५ स्फुरतिस्फुलत्योर्घञि। (६-१-४७) अनयोरेच आत्वं स्याद्घञि। स्फारः। स्फालः। 'उपसर्गस्य घञि-' (सू० १०४४) इति दीर्घः। परीहारः। 'इकः काशे' (सू १०४५)। काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः स्यात्। नीकाशः। अनूकाशः। इकः किम्-प्रकाशः। 'नोदात्तोपदेश-' (सू २७६३) इति न वृद्धिः। शमः। आचमादेस्तु आचामः। कामः। वामः। विश्राम इति त्वपाणिनीयम्। ३१८६ अकर्तरि च कारके संज्ञायाम्। (३-३-१९) कर्तृभिन्ने कारके घञ् स्यात्। ३१८७ घञि च भावकरणयोः। (६-४-२७) रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्-रज्यत्यस्मिन्रङ्गः।

स्थिरार्थम्। सारो बल इति। भाष्ये तु बले खादिरसार इत्युदाहृतम्। भावे। भावो भावना क्रिया, सा च धातुत्वेन सकलधातुवाच्येत्यादिमूलव्याख्यावसरे, सर्वधातुवाच्यं क्रियासामान्यं तद्विशेषः पाकादिश्च धातुविशेषवाच्यः, तत्र क्रियासामान्यं भावशब्दार्थः, तिङ्वाच्यं लिङ्गसंख्यान्वयायोग्यं साध्यावस्थापन्नम्, कृद्वाच्यं तु लिङ्गसंख्यान्वययोग्यं सिद्धावस्थापन्नम्, 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति भाष्यादिति प्रपञ्चितम्, तदाह सिद्धावस्थापन्न इत्यादिना। घञिति। 'पदरुज-' इत्यतस्तदनुवृत्तेरिति भावः। इकः काशे। उत्तरपदे इति। 'अलुगुत्तरपदे' इत्यतस्तदनुवृत्तेरिति भावः। 'ढ्रलोपे पूर्वस्य-' इत्यतो दीर्घ इत्यनुवर्तते। 'उपसर्गस्य घञ्यमनुष्ये-' इत्यतो घञीति। तेनैव सिद्धे नियमार्थमिदम्, तदाह इगन्तस्यैवेति। दीर्घः स्यादिति। घञीति शेषः। आचाम इति। अनाचमेरिति पर्युदासान्न वृद्धिनिषेध इति भावः। अपाणिनीयमिति। 'नोदात्तोपदेशस्य-' इति वृद्धिनिषेधादिति भावः। अकर्तरि। कारके इति प्रत्ययार्थनिर्देशः, न तूपपदम्, व्याख्यानात्। संज्ञाशब्देन रूढिर्विवक्षिता। तेन राग इति वक्ष्यमाणमुदाहरणं संगच्छते। घञि। 'अनिदिताम्-' इति नलोपप्रकरणे 'रञ्जेश्च' इत्युत्तरमिदं सूत्रम्, तदाह रञ्जेर्नलोपः स्यादिति। सूत्रे शेषपूरणमिदम्। राग इति। 'चजोः कु

सर्गस्य घञि-' इति दीर्घः। सारो बले इति। अत्रापि सृधातुरन्तर्भावितण्यर्थः। सारयति चेष्टयतीत्यर्थानुरोधात्। बलवानेव हि चेष्टते। सिद्धावस्थापन्न इति। पचतीत्यादौ तु साध्यावस्थापन्नो धात्वर्थ इति भावः। आचामेति। 'नोदात्त-' इति सूत्रे अनाचमेरित्युक्तत्वादिति भावः। तत्रैव सूत्रेऽनाचमिकमिवमीनामिति वार्तिकाद् वृद्धिनिषेधो नेत्याह। कामो वाम इति। अपाणिनीयमिति। श्रमेरुदात्तोपदेशत्वाद् घञि, वृद्धेर्दुर्लभत्वात्। यदि तु 'धुर्यान्विश्रामयन्' इत्यादिवरिण्यचि वृद्धिमा-

प्रास्यत इति प्रासः । संज्ञायाम् इति प्रायिकम् । को भवता लाभो लब्धः । इत उत्तरं 'भावे' 'अकर्तरि कारके' इति 'कृत्यल्युटो बहुलम्' (सू २८४१) इति यावद् द्वयमप्यनुवर्तते । **३१८८ स्यदो जवे ।** (६-४-२८) स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते । स्यदो वेगः । अन्यत्र स्यन्दः । **३१८९ अवोदैधौद्मप्रश्रथहिमश्रथाः ।** (६-४-२९) अवोदः अवक्लेदनम् । एध इन्धनम् । ओद्म उन्दनम् । श्रन्थेर्नलोपो वृद्ध्यभावश्च । प्रश्रथः । हिमश्रथः । ३१९०

घिण्ण्यतोः' इति जस्य गः, नलोपे कृते उपधावृद्धिः । रञ्जनक्रियेत्यर्थः रञ्जनद्रव्यं वा । **प्रास्यत इति** । प्रपूर्वाद् 'असु क्षेपणे' इत्यस्माद् 'अकर्तरि च' इति करणे घञि प्रास इति रूपमित्यर्थः । प्रास्यन्ते क्षिप्यन्ते शत्रवोऽनेनेति प्रास आयुधविशेषः । **प्रायिकमिति** । स्पष्टमिदं भाष्ये । ततश्च असंज्ञायामपि क्वचिदयं घञ् भवतीति भावः, तदाह **को भवतेति** । **लाभ इति** । भावे घञ् । कः लाभः हिरण्यादिप्राप्तिरूपः लब्धः सम्पन्न इत्यर्थः । भवतेत्यस्य लब्ध इत्यत्रान्वयाद् 'नलोक-' इति षष्ठीनिषेधः । **अनुवर्तत इति** । अत्र व्याख्यानमेव शरणम् 'स्यन्दू प्रस्रवणे' इत्यस्माद् 'अकर्तरि च-' इति घञि क्ङिदभावाद् 'अनिदिताम्-' इति नलोपो न प्राप्तः । तत्र स्यन्देश्चेत्युक्तौ यद्यपि नलोपः सिध्यति । तथापि कृते नलोपे उपधावृद्धिः स्यात् । तत्र नलोपमुपधावृद्ध्यभावं च प्रापयितुमाह **स्यदो जवे** । **स्यदो वेग इति** । वेगे रूढोऽयम् । **अन्यत्रेति** । प्रस्रवणे इत्यर्थः । **अवोदैधौद्म** । अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ, एषां द्वन्द्वः । **अवोद इति** । घञि नलोपो निपात्यते । कृते नलोपे आद्गुणः । लघूपधगुणस्तु न भवति । 'न धातुलोपे-' इति निषेधात् । **एध इति** । 'ञि इन्धी दीप्तौ' इत्यस्माद् घञि नलोपः, 'न धातुलोप-' इति निषेधं बाधित्वा गुणश्च निपात्यते । **ओद्म इति** । उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च

श्रित्य णिजन्तादेरच् क्रियते तदा रूपं सिध्यति । न च णिच्यपि वृद्धिनिषेधः शङ्क्यः । 'नोदात्त-' इत्यत्र कृतीत्यनुवृत्त्या णिचि निषेधाभावात् । न चैवमपि 'मितां ह्रस्वः' इति ह्रस्वः स्यादिति शङ्क्यम् , वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणेन ह्रस्वाभावसिद्धेः । परन्तु णिजन्तकल्पनायामर्थो भिद्यत इति भावः । वस्तुतस्तु निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिति विवक्षायां तु न दोष इत्यवधेयम् । एवं च 'रोगी चिरप्रवासी परान्नभोजी परावसथशायी । यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥' इत्यादिकविप्रयोगाः साधव एवेति बोध्यम् । **अवोदै** । **अवोद इति** । उन्दी क्लेदनेऽवपूर्वः । घञि नलोपो निपात्यते । **एध इति** । इन्धेर्घञि नलोपो गुणश्च निपात्यते । 'न धातुलोप-' इति निषेधादप्राप्तगुणस्य निपातनमिति ज्ञेयम् । **ओद्म इति** ।

परिमाणाख्यायां सर्वेभ्यः । (३-३-२०) घञ् । अजपोर्बाधनार्थमिदम् । एकस्तण्डुलनिचायः । तण्डुलानां निचायो राशिः परिच्छिद्यते । द्वौ शूर्पनिष्पावौ । शूर्पेण निष्पावौ । द्वौ कारौ । अत्र विक्षिप्यमाणो धान्यादिः परिच्छिद्यते । 'दारजारौ

निपात्यते । **अन्येरिति** । प्रपूर्वस्य द्विमपूर्वस्य च घञीति शेषः । **परिमाणाख्यायाम् । घञिति** । शेषपूरणम् । सर्वेभ्यो धातुभ्यः अकर्तरि कारके वाच्ये घञ् स्यात् प्रत्ययार्थस्य परिच्छेदे गम्ये इत्यर्थः । ननु 'अकर्तरि कारके–' इत्येव सिद्धे किमर्थमिदमित्यत आह **अजपोरिति** । 'एरच्' 'ॠदोरप्' इति वक्ष्यमाणयोर्बाधनार्थमित्यर्थः । 'अकर्तरि च' इति घञ् तु ताभ्यां विशेषविहिताभ्यां बाध्यते, सरूपत्वेन वाऽसरूपविधेरप्रवृत्तेरिति भावः । **एकस्तण्डुलनिचाय इति** । निष्कृष्य चीयते संधोक्रियते इति निचायः । कर्मकारके वाच्ये 'एरच्' इत्यस्यापवादो घञ् । तण्डुलनिचायशब्दे विग्रहं दर्शयति **तण्डुलानाम्** इति । निचायशब्दस्य विवरणं राशिरिति । **परिच्छिद्यत** इति तण्डुलावयवकसङ्घातात्मको राशिरेकत्वेन परिच्छिद्यते इत्यर्थः । **द्वौ शूर्पनिष्पावाविति** । निष्पूयते तुषापनयनेन शोध्यते इति निष्पावः तण्डुलादिराशिः । इति कर्मणि घञ् । अबपवादः । शूर्पेण निष्पावः शूर्पनिष्पावः । 'कर्तृकरणे कृता बहुलम्' समासः । द्वित्वं तु शूर्पद्वारा निष्पावेऽन्वेति । अतः शूर्पद्वित्वमार्थिकं न तु शाब्दमित्येकवचनं निर्बाधम् । तदाह **शूर्पेणेत्यादि । द्वौ काराविति ।**

उन्देरौणादिके मन्प्रत्ययो नलोपो गुणश्चात्रापि निपात्यते । **अन्येरिति ।** प्रपूर्वस्य द्विमपूर्वस्य च घञि निपात्यते इति बोध्यम् । **प्रायिकमिति ।** सर्वात्मना संज्ञाग्रहणत्यागे कृतः कट इत्यत्र कारः कट इति स्यादिति भावः । भाष्ये त्वनभिधानमाश्रित्य प्रत्याख्यातम् । **परिमाणाख्यायाम् ।** सर्वेभ्यो धातुभ्यः । परिमाणं परिच्छित्तिः । आख्यानमाख्या उक्तिः । परिच्छित्तेरुक्तौ सत्यामित्यर्थः । कस्य पुनः परिच्छित्तिरिति चेत्प्रत्ययार्थस्येत्युच्यते । आख्याग्रहणं रूढिनिरासार्थम्, तेन परिमाणग्रहणेन संख्यात्र गृह्यते । सर्वेभ्यः किम्, अन्यथा पुरस्तादपवादन्यायेनाचमेव घञ् बाधेत न त्वपम् । **तण्डुलनिचाय इति ।** निचीयते राशीक्रियते इति निचायः । अत्र राश्येकत्वेन समुदायेनापरिच्छित्तिरर्थाद्गम्यते । 'एरच्' इत्यचि प्राप्ते घञ् । निष्पूयते शोध्यते तुषापनयनेन यस्तण्डुलादिः स निष्पावः । 'ॠदोरप्' इत्यपि प्राप्ते घञ् । शूर्पेणेति करणे तृतीयान्तस्य 'कर्तृकरणे कृता बहुलम्' इति समासः । अत्र शूर्पसंख्यया तण्डुलादेरपि परिच्छित्तिः । शूर्पद्वित्वं तु आर्थिकं न तु शाब्दम्, निष्पावगतद्वित्वं तु शाब्दम् । यद्यप्यत्र 'निरभ्योः पूल्वोः' इति घञ् लभ्यते तथापि सर्वग्रहणबलादनेनापि भवितुमर्हतीति भावः । अप्रत्ययस्य मुख्योदाहरणमाह **द्वौ काराविति ।** कॄ विक्षेपे । कर्मणि घञ्

कर्तरि णिलुक्च' (वा २१८२)। दारयन्तीति दाराः। जरयतीति जारः–उपपतिः।
३१९१ इङश्च। (३-३-२१) घञ्। अचोऽपवादः। उपेत्यास्मादधीयते

कीर्यते विक्षिप्यते इति कारः। धान्यादिराशिः। कर्मणि घञ्, अबपवादः। **अत्र विक्षिप्यमाण** इति। न च धातोरित्यधिकारादेव धातुमात्रात्सिद्धे सर्वग्रहणं व्यर्थमिति शङ्क्यम्। प्रकृत्याश्रय एवापवादो बाध्यते न त्वर्थाश्रय इत्येतदर्थत्वात्। तेनेह न–एका तिलोच्छ्रितिः। उच्छ्रीयते ऊर्ध्वीक्रियते इत्युच्छ्रितिः, ऊर्ध्वं कृतो राशिः, कर्मणि स्त्रियां क्तिन्। स च अर्थाश्रयत्वात् प्रकृत्याश्रयत्वाभावाद् नानेन घञा बाध्यते। किन्तु 'एरच्' 'ॠदोरप्' इति प्रकृत्याश्रयावेव अजपौ बाध्येते इति भाष्ये स्पष्टम्। **दारजाराविति**। वार्तिकम्। दॄ विदारणे, जॄ वयोहानौ आभ्यां णयन्ताभ्यां कर्तरि घञ्। णिलोपं बाधित्वा णिलुक् चेत्यर्थः। दारयन्ति चित्तं विद्रावयन्तीति दाराः भार्या। 'दाराः पुंसि च भूम्न्येव' इत्यमरः। घञि णिलुक्। णयाश्रयवृद्धौ निवृत्तायां घञाश्रया वृद्धिः, तदाह **दारयन्तीति दारा इति**। जरयति नाशयति कुलमिति जारः, जॄधातोर्ण्यन्ताद् घञ् णिलुक्। णिलोपे सति तु तस्य परनिमित्तकत्वेन 'अचः परस्मिन्–' इति स्थानिवत्त्वाद् घञाश्रया वृद्धिः न स्यात्। न च णिनिमित्तैव वृद्धिरस्त्विति वाच्यम्, 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वे 'मितां ह्रस्वः' इति णिनिमित्तकह्रस्वापत्तेः। णिलुकि तु तस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वाभावान्न ह्रस्वप्रसङ्गः, तदाह **जरयतीति जार इति**। **उपपतिरिति**। 'जारस्तूपपतिः समौ' इत्यमरः। **इङश्च**। **घञिति**। शेषपूरणम्। इङ् अध्ययने, नित्यमधिपूर्वः। अस्मादकर्तरि कारके घञित्यर्थः। अकर्तरि चेति सिद्धेराह **अचोऽपवाद इति**। 'एरच्' इत्यस्यापवाद इत्यर्थः। **उपेत्येति**। समीपं प्राप्य

शूर्पादिना विक्षिप्तो धान्यादिराशिः कारः। इह प्रकृत्याश्रय एवापवादो नत्वर्थाश्रयः। सर्वेभ्य इति पञ्चमीनिर्देशेन तथैवावगमात्। तेनायं प्रकृत्याश्रयो घञ् क्तिनोऽपवादो न भवति। एका तिलोच्छ्रितिः। उत्पूर्वकाच्छ्रयतेः कर्मणि भावे वा क्तिन्। उर्ध्वीकृतो राशीकृत इत्यर्थः। तदेतत्सूचयितुमुक्तम् **अजपोरपवाद** इति। तयोरपि प्रकृत्याश्रयत्वादपवादयोः समानविषयौचित्यात्। स्त्रियां क्तिन् त्वर्थाश्रय इति दिक्। **दारजाराविति** अकर्तरि कारके इत्यधिकाराद् 'ॠदोरप्' इत्यस्य घञपवादत्वाच्च कर्तरि घञर्थमिदं वचनम्। **णिलुक्चेति**। चाद् घञ्। लोपे हि सति घञाश्रया वृद्धिर्न स्याण्णिलोपस्य स्थानिवद्भावेन व्यवधानात्। न च णिज्निमित्तैव वृद्धिरस्त्विति वाच्यम्, जारशब्दे

१ 'जारयन्तीति जाराः' इत्येवं क्वचित् पाठः। २ 'उपपतिः' इति क्वचिन्नास्ति।

उपाध्यायः। 'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्' (वा २१८४) उपाध्याया, उपाध्यायी। 'शॄ वायुवर्णनिवृतेषु' (वा २१८४)। 'शॄ' इत्यविभक्तिको निर्देशः। शारो वायुः, करणे घञ्। शारो वर्णः, चित्रीकरणमिह धात्वर्थः। निव्रियते आव्रियतेऽनेनेति निवृतमावरणम्, बाहुलकात्करणे क्तः। 'गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः', अकृतप्रावरण इत्यर्थः। 'प्रदक्षिणप्रसव्यगामिनां

यस्मादधीयते स उपाध्याय इत्यर्थः। अपादाने घञिति भावः। 'आख्यातोपयोगे' इत्यपादानत्वम्। **अपादाने इति**। अपादानकारके वाच्ये स्त्रीत्वे गम्ये इङो घञ उपसंख्यानमित्यर्थः। **तदन्ताच्च वा ङीषिति** 1 वार्तिकम्। 'अपादाने स्त्रियाम्' इति विहितघञन्ताद् इत्यर्थः। अत्र पठितमेव वार्तिकं स्त्रीप्रत्यया-धिकारे 'या तु स्वयमेव अध्यापिका तत्र वा ङीषित्युपन्यस्तम्' मूले। ननु 'अकर्तरि च-' इत्येव सिद्धे किमर्थं घञो विधानमिति चेन्न। 'घञनुक्रमणमजपोर्विषये' इति 'एरच्' 'ॠदोरप्' इत्यजपोरेव विषये 'अकर्तरि च-' इति घञ्विधिरिति भाष्यवचनात् स्त्रीत्वे गम्ये 'स्त्रियां क्तिन्' इति क्तिन्विषये घञि अप्राप्ते 'अपादाने स्त्रियाम्' इति घञ्वचनात्। **उपाध्यायेति**। उपेत्य अस्याः सकाशादधीयते इत्यर्थः। **शॄवा-य्विति**। वार्तिकम्। **अविभक्तिक इति**। लुप्तपञ्चमीक इत्यर्थः। वायौ वर्णे निवृते च कर्तरि शॄधातोर्घञित्यर्थः। अचोऽपवादः। **शारो वायुरिति**। शीर्यन्ते पर्णफलादीनि यैरिति विग्रहः, तदाह **करणे घञिति**। **चित्रीकरण-मिति**। शीर्यन्ते चित्रीक्रियन्ते पटादयः अनेनेति भावः। **गौरिवेति**। भाष्यस्थं

मितां ह्रस्वः' इति ह्रस्वापत्तेः। 'जनीजॄष्-' इति जॄधातोर्णौ मित्त्वात्। लुकि तु सति तस्य परनिमित्तत्वाभावेन 'क्लिलुगुपधा-' इति कौ लुप्तस्य निषेधेन वा स्थानिवत्त्वा-भावाज्जार इति रूपं सिध्यतीति भावः। एतेन दीर्यते यैस्ते दाराः, जीर्यतेऽनेनेति जारः इत्यण्यन्ताभ्यामेव करणे घञस्तु, किमनेन वचनेनेति केषांचिदुक्तिः परास्ता। 'ॠदोरप्' इत्यपवादविषये उत्सर्गस्य घञो दुर्लभत्वात्। स्त्र्यधिकारादूर्ध्वं वासरूपविधेरनङ्गी-कारादपवादोऽप्यच् करणाधिकरणयोरिति ल्युटा बाधादिह दुर्लभ इत्यन्यदेतत्। **उपेत्येति**। गुरुसमीपमेत्येत्यर्थः। **अपादान इति**। पुरस्तादपवादन्यायेन इङश्चे-त्यस्यैव एवापवादत्वात्स्त्रियां तु क्तिन् स्यादिति तद्बाधनायायमारम्भः। घञनुक्रमण-मजपोर्विषय इति वचनात्स्त्रियां घञ् न स्यादिति स्त्रियांग्रहणम्। **उपाध्यायेति**। या स्वयमध्यापयति तस्यामिदं रूपद्वयम्। पुंयोगे तु ङीषेव। आनुगागमश्च पाक्षिक इत्युक्तम्। **करणे क्त इति**। वृञ् वरण इत्यस्मादित्यर्थः। **नीशार इति**। 'उपस-

1 अयं पाठो बहुत्र नावलोक्यते।

शाराणाम्' इति वार्तिककारप्रयोगादन्येष्वपि शार इति भवति । ३१९२ **उपसर्गे रुवः।** (३-३-२२) घञ्। संरावः । उपसर्गे किम्—रवः। ३१९३ **अभिनिसः स्तनः शब्दसंज्ञायाम्।** (८-३-८६) अस्मात्स्तनः सस्य मूर्धन्यः । अभिनिष्टानो वर्णः । शब्दसंज्ञायां किम्–अभिनिःस्तनति मृदङ्गः। ३१९४ **समि युद्रुदुवः।** (३-३-२३) संयूयते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः। संद्रावः। संदावः। ३१९५ **श्रिणीभुवोऽनुपसर्गे।** (३-३-२४) श्रायः। नायः। भावः । अनुपसर्गे किम्–प्रश्रयः। प्रणयः। प्रभवः । कथं 'प्रभावो राज्ञः' इति–प्रकृष्टो भाव इति प्रादिसमासः । कथं 'राज्ञो नयः' इति–बाहुलकात् । ३१९६ **वौ क्षुश्रुवः।** (३-३-२५) विक्षावः। विश्रावः । वौ किम्–क्षवः । श्रवः। ३१९७ **अवोदोर्नियः।** (३-३-२६) अवनायोऽधोनयनम् । उन्नायः ऊर्ध्वनयनम्। कथम् 'उन्नयः उत्प्रेक्षा' इति–बाहुलकात्। ३१९८ **प्रे द्रुस्तुस्रुवः।** (३-३-२७) प्रद्रावः। प्रस्तावः। प्रस्रावः। प्रे इति किम्–द्रवः। स्तवः। स्रवः। ३१९९ **निरभ्योः पूल्वोः।** (३-३-२८) निष्पूयते शूर्पादिभिरिति निष्पावो धान्यविशेषः। अभिलावः। निरभ्योः किम्–पवः। लवः। ३२०० **उन्न्योर्ग्रः।** (३-३-२९) उद्गारः। निगारः। उन्न्योः किम्–गरः। ३२०१

श्लोकार्धम्। नीशार इत्यत्र 'उपसर्गस्य घञि' इति दीर्घः। अन्ते शारशब्दं साधयति **प्रदक्षिणेति।** **वार्तिककारप्रयोगादिति।** पञ्चमस्य द्वितीये 'अनुपदसर्वान्नायानयम्' इति सूत्रभाष्ये स्थितमिदम्। **उपसर्गे रुवः।** घञिति शेषः। उपसर्गे उपपदे रुधातोर्घञित्यर्थः। अबपवादः। **समि युद्रुदुवः।** समित्युपसर्गे उपपदे यु द्रु दु एभ्यो घञित्यर्थः, अबपवादः। **श्रिणी।** उपसर्गे असति, श्रि, नी, भू, एभ्यो घञित्यर्थः, अजपोरपवादः। **बाहुलकादिति।** 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादित्यर्थः। **वौ क्षुश्रुवः।** वि इत्युपसर्गे उपपदे क्षु, श्रु, धात्वोर्घञित्यर्थः। अबपवादः। **अवोदोर्नियः।** अव, उत्, अनयोरुपपदयोः नीधातोर्घञित्यर्थः। अजपवादः। उन्नय इत्यस्य विवरणम् **उत्प्रेक्षेति।** **प्रे द्रुस्तुस्रुवः।** प्र इत्युपपदे, द्रु, स्तु, स्रु एभ्यो घञित्यर्थः। अबपवादः। **निरभ्योः।** निर्, अभि, अनयोरुपपदयोर्घञित्यर्थः। अबपवादः। **उन्न्योर्ग्रः।** उत्, नि, इत्यु-

---

र्गस्य घञि–' इति दीर्घः । ननु 'प्रदक्षिणप्रसव्यगामिनां शाराणाम्' इति कथं प्रयोगः । वायुवर्णेत्यर्थपरिगणनादिति चेत् । अत्राहुः–अतएव वार्तिकप्रयोगादन्येष्वपि शृणातेर्घञ्। **रव इति।** 'ऋदोरप्' इत्यप्। **राज्ञो नय इति।** णीञ

कॄ धान्ये । (३-३-३०) कॄ इत्यस्माद्धान्यविषयकादुन्न्योर्घञ्स्यात् । उत्कारो निकारो धान्यस्य, विक्षेप इत्यर्थः । धान्ये किम्-भिक्षोत्करः । पुष्पनिकरः । ३२०२ यज्ञे समि स्तुवः । (३-३-३१) समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः, स देशः संस्तावः । यज्ञे किम्-संस्तवः परिचयः । ३२०३ प्रे स्त्रोऽयज्ञे । (३-३-३२) अयज्ञे इति छेदः । यज्ञे इति प्रकृतत्वात् । प्रस्तारः । अयज्ञे किम्-बर्हिषः प्रस्तरो मुष्टिविशेषः । ३२०४ प्रथने वावशब्दे । (३-३-३३) विपूर्वात्स्तृणातेर्घञ्स्यादशब्दविषये प्रथने । पटस्य विस्तारः । प्रथने किम्-तृणविस्तरः । अशब्दे किम्-ग्रन्थविस्तरः । ३२०५ छन्दोनाम्नि च । (३-३-३४) वा इत्यनुवर्तते । विष्टारपङ्क्तिश्छन्दः । विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ् । ततः कर्मधारयः । ३२०६ छन्दोनाम्नि च । (८-३-९४) विपूर्वस्य स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि । इति षत्वम् । ३२०७ उदि ग्रहः । (३-३-३५) उद्ग्राहः । ३२०८ समि मुष्टौ । (३-३-३६) मल्लस्य संग्राहः । मुष्टौ किम्-द्रव्यस्य संग्रहः । ३२०९ परिन्योर्नीणोर्द्यूताभ्रेषयोः । (३-३-३७) परिपूर्वान्नयतेर्निपूर्वादिणश्च

पपदयोर्घञित्यर्थः, अपवादः । कॄ धान्ये । कॄ इति लुप्तपञ्चमीकम्, तदाह कॄ इत्यस्मादिति । यज्ञे समि स्तुवः । समित्युपपदे स्तुधातोर्घञ् स्याद् यज्ञविषये प्रयोग इत्यर्थः । अधिकरणे ल्युटोऽपवादः । संस्तव इत्यस्य विवरणम् परिचय इति । प्रे स्त्रोऽयज्ञे । प्रकृतत्वादिति । यज्ञे इति तु च्छेदो न भवति । पूर्वसूत्राद्यज्ञग्रहणानुवृत्त्यैव सिद्धेरित्यर्थः । प्र इत्युपपदे स्तृधातोर्घञित्यर्थः । प्रस्तार इति । इष्टकासंनिवेशविशेष इति याज्ञिकाः । प्रथने वावशब्दे । वौ अशब्दे इति च्छेदः, तदाह विपूर्वादिति । छन्दोनाम्नि च विपूर्वात् स्तृधातोर्घञ् स्याद् अक्षरेयत्तात्मकच्छन्दसः संज्ञायामित्यर्थः । शब्दविषयत्वात् पूर्वेणाप्राप्ते वचनम् । कर्मधारय इति । विष्टरश्चासौ पङ्क्तिश्चेति विग्रह इति भावः । ननु 'सात्पदाद्योः' इति निषेधादादेशसकाराभावाच्च कथमिह षत्वमित्यत आह छन्दोनाम्नीति । 'वृक्षासनयोर्विष्टरः' इत्युत्तरं सूत्रम् । वेदप्रसिद्धसंज्ञायां विष्टरशब्दो निपात्यत इत्यर्थः । उदि ग्रहः । उदित्युपपदे ग्रहधातोः घञित्यर्थः । 'ग्रहवृदृनिश्चिगमश्च' इत्यप्प्रत्ययस्य वक्ष्यमाणस्यापवादः । समि मुष्टौ । समित्युपपदे ग्रहधातोर्घञ् स्याद् मुष्टिविषये धात्वर्थे

पणे इत्यस्मादचो यत् । यज्ञे समि । अधिकरणे ल्युटोऽपवादोऽयं घञ् । छन्दो । शब्दविषयत्वात्पूर्वेणाप्राप्ते वचनम् । केचित्तु प्रस्तारपङ्क्तिरित्यादिप्रयोगानुरोधेनात्र वाविति नानुवर्तयन्ति । उदि ग्रहः । भावादौ घञ् स्यात् । 'ग्रहवृद-' इति प्राप्त-

घञ्स्यात्क्रमेण द्यूते अभ्रेषे च विषये। परिणायेन शारान्हन्ति। समन्तान्नयनेनेत्यर्थः॥ एषोऽत्र न्यायः। उचितमित्यर्थः। द्यूताभ्रेषयोः किम्-परिणयो विवाहः। न्ययो नाशः। **३२१० परावनुपात्यय इणः।** (३-३-३८) क्रमप्राप्तस्यानतिपातोऽनुपात्ययः। तव पर्यायः। अनुपात्यये किम्-कालस्य पर्ययः, अतिपात इत्यर्थः। **३२११ व्युपयोः शेतेः पर्याये।** (३-३-३९) तव विशायः। तव राजोपशायः। पर्याये किम्-विशयः संशयः। उपशयः समीपशयनम्। **३२१२ हस्तादाने चेरस्तेये।** (३-३-४०) हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते। पुष्पप्रचायः। हस्तादाने किम्-वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति। अस्तेये किम्-पुष्पप्रचयः चौर्येण। **३२१३ निवासचितिशरीरोपसमाधानेष्वादेश्च कः।** (३-३-४१) एषु चिनोतेर्घञ् स्यात्। आदेश्च ककारः। उपसमाधानं राशीकरणम्, तच्च धात्वर्थः। अन्ये प्रत्ययार्थस्य

गम्य इत्यर्थः। **मल्लस्य संग्राह इति।** दृढग्रहणं मुष्टेरित्यर्थः। **परिन्योः।** **द्यूते अभ्रेषे चेति।** द्यूतविषये नयने अभ्रेषविषये गमने च। विद्यमानादित्यर्थः। अचोऽपवादः। **शारान्।** अक्षान्। **एषोऽत्र न्याय इति।** अभ्रेषेण वर्तनमित्यर्थः। उचितस्यार्थस्य अनपचारः अभ्रेषः, तदाह **उचितमिति।** **परावनुपात्यय इणः।** परौ उपपदे इणधातोर्घञ् अनुपात्यये गम्ये इत्यर्थः। **तव पर्याय इति।** अनतिक्रमणमित्यर्थः। **कालस्य पर्यय इति।** अतिक्रम इत्यर्थः। तदाह **अतिपात इति।** **व्युपयोः शेतेः।** वि, उप, इत्युपपदयोः शीङ्धातोः घञ् स्यात् पर्याये गम्ये इत्यर्थः। अजपवादः। पर्यायः प्राप्तावसरता। **हस्तादाने।** हस्तादाने गम्ये चिञ्धातोर्घञ्, न तु स्तेये इत्यर्थः। ननु वृक्षशिखरमात्रमारुह्य पुष्पावचयं करोतीत्यत्रातिव्याप्तिमाशङ्क्याह **प्रत्यासत्तिरिति।** आदेयस्य पुष्पादिद्रव्यस्य भूमिस्थितपुरुषीयहस्तग्रहणयोग्यावस्थितिरित्यर्थः। **पुष्पप्रचयं चौर्येणेति।** करोतीति शेषः। **निवास।** 'अकर्तरि च कारके' इति 'भाव' इति चानुवर्तत एव।

ण्यापोऽपवादः। **परिन्योः।** कक्षादिभिः क्रीडनं द्यूतम्। यथाप्राप्तकरणमभ्रेषः। **परावनु-'** अत्र व्याचख्युः द्विःपरिग्रहणमिह व्यर्थम्, सकृदेव कर्तुं शक्यम्। तथा हि—परौ नियो द्यूते, इणोऽनुपात्यये, नावभ्रेषे। इह इण इत्यनुवर्तनादिणोऽनुपात्यय इत्यत्र तु परावित्यनुवर्तनाचेष्टं सिध्यतीति भावः। ननु पूर्वसूत्रेऽनुपात्ययः पर्यायार्थकत्वेन व्याख्यातः। तथा च तदनुवृत्त्यैव सिद्धे पर्यायग्रहणमिह व्यर्थमिति चेदत्राहुः। पर्यायग्रहणं पुनर्विधानार्थं तेनात्राभिविधिविवक्षायां परमपि 'अभिविधौ भाव इनुण्' इति इनुणं बाधित्वाऽयमेव घञ् भवतीति। **आकाय-**

कारकस्योपाधिभूताः। निवासे—काशी निकायः। चितौ—आकायमग्निं चिन्वीत। शरीरे—चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। समूहे—गोमयनिकायः। एषु किम्—चयः। 'चः कः' इति वक्तव्ये आदेरित्युक्तिर्यङ्लुक्यादेरेव यथा स्यादिति। गोमयानां निकेचायः। पुनः पुना राशीकरणमित्यर्थः। **३२१४ संघे चानौत्तराधर्ये। (३-३-४२)** चेर्घञ्, आदेश्च कः। भिक्षुनिकायः। प्राणिनां समूहः संघः। अनौत्तराधर्ये किम्—सूकरनिचयः। (स्तन्यपानादौ उत्तराधरभावेन शेरते) संघे किम्। ज्ञानकर्मसमुच्चयः॥ **३२१५ कर्मव्यतिहारे णच् स्त्रियाम्। (३-३-४३)** स्त्रीलिङ्गे भावे णच्। **३२१६ णचः स्त्रियाञ्। (५-४-१४) ३२१७ न कर्मव्यतिहारे। (७-३-६)** अत्र ऐच्च

अन्ये इति। निवासचितिशरीरात्मका अर्था इत्यर्थः। **उपाधिभूता इति**। विशेषणभूता इत्यर्थः अजपवादः। **काशी निकाय इति**। निचीयते मोक्षोऽत्रेत्यधिकरणे घञ्। काशी मोक्षार्जनस्य निवास इत्यर्थः। 'चजोः कु घिण्ण्यतोः' इत्यस्य अव्यवहितयोरेव चजोः प्रवृत्तेरिह कत्ववचनम्। **आकायमिति**। आचीयते इति कर्मणि घञ्। **शरीरे इति**। उदाहरणसूचनमिदम्। **समूहे इति**। उपसमाधानस्योदाहरणसूचनम्। निचीयते राशीक्रियते इति भावे घञ्। ननु 'निवासचितिशरीरोपसमाधानेषु चः क' इत्येवास्तु। चकारस्य ककार इत्यर्थलाभादित्यत आह **चः क इति वक्तव्य इति। पुनःपुना राशीति**। अत्र 'रो रि' इति लोपे 'ढ्रलोप—' इति दीर्घः। **संघे चानौत्तराधर्ये। चेर्घञिति**। शेषपूरणमिदम्। चेर्घञ् स्यात् सङ्घे वाच्ये न त्वौत्तराधर्ये इत्यर्थः। उत्तराधरयोर्भाव औत्तराधर्यम्। **प्राणिनां समूहः सङ्घ इति**। व्याख्यानमेवात्र शरणम्। **कर्मव्यतिहारे**। कर्मव्यतिहारः क्रियाविनिमयः परस्परकरणम्, तस्मिन्विषये धातोर्णच् स्यात् स्त्रीत्वे गम्य इत्यर्थः। अत्र 'अकर्तरि च कारके' इति तु नानुवर्तते, व्याख्यानादिति बोध्यम्।

मिति। आचीयन्तेऽस्मिन्निष्टका इत्याकायम्। अधिकरणे घञ्। अग्निस्थलविशेषं चिन्वीत चयनेन निष्पादयेदिति श्रुत्यर्थः। **सङ्घे चानौत्तराधर्ये**। उत्तरे चाधरे चोत्तराधरास्तेषां भाव औत्तराधर्यम्। **सूकरेति**। स्तनपानार्थमुत्तराधरभावेन सूकराः शेरते तदेतत्प्रत्युदाहरणम्। यदा तु भिक्षुवत्पृथक्पृथगेवावतिष्ठन्ते तदेहापि भवत्येव घञ्। **कर्मव्यतिहारे णच्**। कर्मव्यतिहारः क्रियाव्यतिहाररूपः। परस्परकरणमिति यावत्। तत्र वर्तमानाद्धातोरित्यर्थः। **भावे णजिति**। कर्तृवर्जिते कारके न भवत्यनभिधानादित्याहुः। भावादाविति प्राचोक्तं यत्तदुपेक्ष्यमाकरविरोधात्। **णचः स्त्रि**। अनेन णजिति चकारोऽञाविशेषणार्थ

स्यात् । व्यावक्रोशी । व्यावहासी । ३२१८ अभिविधौ भाव इनुण् । (३-३-४४) (आदिवृद्धिः) । ३२१९ अणिनुणः । (५-४-१५) 'इनण्यनपत्ये' (सू १२४९) । (स्वभावतः पुंस्त्वम्,) सांराविणं वर्तते । ३२२० आक्रोशेऽवन्योर्ग्रहः । (३-३-४५) अव, नि एतयोर्ग्रहेर्घञ् स्यात् शापे । अवग्राहस्ते भूयात् । अभिभव इत्यर्थः । निग्राहस्ते भूयात् । बाध इत्यर्थः । आक्रोशे किम्-अवग्रहः पदस्य । (छेदः पदस्येत्यर्थः) । निग्रहश्चोरस्य ।

व्यावक्रोशीति । परस्परं निन्दक इत्यर्थः । व्यावहासीति । परस्परं हासक इत्यर्थः । उभयत्रापि 'णचः स्त्रियामञ्' इति स्वार्थिकोऽञ् तद्धितः । 'टिड्ढ' इति ङीप् । अभिविधौ । कात्स्न्र्येन संबन्धः अभिविधिः, तस्मिन् गम्ये इनुण् स्यात् भावेऽर्थे इत्यर्थः । 'अणिनुणः' इत्यनेन सूत्रेण इनुणन्तात् अण् तद्धितः स्वार्थिक इत्यर्थः । आदिवृद्धिरिति । तद्धितेष्वचामादेरित्यनेनेति शेषः । सांराविन् अ इति स्थिते 'नस्तद्धिते' इति टिलोपमाशङ्क्य प्रकृतिभावं स्मारयति इनण्यनपत्य इति । स्वभावत इति । लोकाश्रयत्वाल्लिङ्गस्येति भावः । आक्रोशेऽवन्योर्ग्रहः । एतयोरिति । उपपदयोरिति शेषः । 'ग्रहवृदृनिश्चिगमश्च' इति वक्ष्यमाणस्य

इति ध्वनितम् । स्त्रियां किम् । व्यतिपाको वर्तते । ऐच् नेति । 'न य्वाभ्याम्-' इति प्राप्तस्य निषेधेनादिवृद्धिरेव । णचस्तद्धितत्वाभावेऽप्यञस्तद्धितत्वादिति भावः । कृद्ग्रहणपरिभाषया सोपसर्गधातोर्णजन्तत्वात्ततोऽञि तत्प्रयुक्तादिवृद्धिरुपसर्गस्येत्या-शयेनोदाहरति-व्यावक्रोशीति । क्रुश आह्वाने, हसे हसने । स्यादेतत्—स्त्रियां क्तिन्निति प्रकरण एवायं णज्विधेयः । एवं च स्त्रियामिति न कर्तव्यमिति लाघव-मिति चेन्मैवम् । स्त्रियामित्यधिकारे वासरूपविधिनिषेधापत्तेः । इष्यते तु व्याव-क्रुष्टिरिति स्त्रियां क्तिन्नपि अपवादविषये क्वचिदिष्यते । व्यावचोरी । इह 'ण्यास-श्रन्थ-' इति युच्प्राप्तः । व्यात्युक्षी । अत्र 'गुरोश्च हलः' इत्यकारप्रत्ययः प्राप्तः । क्वचिदकार एवेष्यते न तु णच् । व्यतीक्षा, व्यतीहा । सैषा व्यवस्था न्यायतो दुर्ल-भापि बाहुलकात्स्वीकार्या । अभिविधौ । अभिविधौ किम् । संरावः । वासरूपेण घञ् क्वचिन्न भवति पुनर्भावग्रहणात् । न च कर्तृभिन्नकारकनिवृत्तये भावग्रहण-मिति वाच्यम् । पूर्वसूत्र इव शक्तिस्वाभाव्यादेवकारकेऽनुणोऽप्रवृत्तेः । ल्युटा तु समावेश इष्यते । तच्च बाहुलकाल्लभ्यत इत्याकरः । अणिनुणः । अतएवेनुणो णानुबन्धो विशेषणार्थ इति ध्वनितम् । सांराविणमिति । समन्ताच्छब्द इत्यर्थः । संशब्दोऽभिविधिद्योतकः । पूर्ववत्सगतिकादण् । अणस्तद्धितत्वादादिवृद्धिः । 'इन-ण्यनपत्ये' इत्यनपत्याणि इनः प्रकृतिभावात् 'नस्तद्धिते' इति टिलोपेन न निवृत्तिः ।

(निरोधश्चोरस्येत्यर्थः)। ३२२१ प्रे लिप्सायाम्। (३-३-४६) पात्रप्रग्राहेण चरति भिक्षुः। अन्यत्र पात्रप्रग्रहः। ३२२२ परौ यज्ञे। (३-३-४७) उत्तरः परिग्राहः। स्फ्येन वेदेः स्वीकरणम्। ३२२३ नौ वृ धान्ये। (३-३-४८) वृ इति लुप्तपञ्चमीकम्। नीवाराः। धान्ये किम्-निवरा कन्या। क्तिन्विषयेऽपि बाहुलकादप्। प्रवरा सेना प्रवरा गौरितिवत्। एवं च स्त्रीलिङ्गोऽपि। ३२२४ उदि श्रयतियौतिपूद्रुवः। (३-३-४९) उच्छ्रायः। उद्यावः। उत्पावः। उद्द्रावः। कथं 'पतनान्ताः समुच्छ्र्याः' इति। बाहुलकात्। ३२२५

अप्रत्ययस्यापवादः। अवग्रह इत्यस्य विवरणम्। छेदः पदस्येति। पुरोहितमित्यादिसमस्तपदस्य पुरः हितमित्यादि विभज्य पठनमवग्रह इत्यर्थः। अत्र शापानवगमाश्च घञ्। निग्रह इत्यस्य विवरणम् निरोधश्चोरस्येति। प्रे लिप्सायाम्। प्र इत्युपपदे ग्रहधातोर्घञ् स्यात् लिप्सायामित्यर्थः। 'ग्रहवृदृनिश्चिगमश्च' इत्यपोऽपवादः। पात्रप्रग्राहेण चरति भिक्षुरिति। भिक्षालाभायेति गम्यते। अन्यत्रेति। लिप्सायामगम्यमानायामित्यर्थः। परौ यज्ञे। परि इत्युपपदे ग्रहधातोर्घञ् स्यात् यज्ञे प्रयुज्यमाने इत्यर्थः। 'ग्रहवृद' इत्यपोऽपवादः। उत्तरः परिग्राह इति। 'वसवस्त्वा' इत्यादिमन्त्रैः पूर्वः परिग्राहो वेदेरुक्तः। तदपेक्षया द्वितीय इत्यर्थः। स्फ्येनेति। स्फ्यः खड्गाकृतिः दारुमयो पात्रविशेषः। तेन समन्तादुल्लेखया वेदिदेशस्य स्वीकरणं परिग्राह इत्यर्थः। नौ वृ धान्ये। नि इत्युपपदे वृधातोर्घञित्यर्थः। 'ग्रहवृद' इत्यपोऽपवादः। नीवारा इति। 'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः। निवरा कन्येति। नितरां वरणीयेत्यर्थः। 'ग्रहवृद' इत्यप्। ननु प्रवरा कन्येत्यत्र कथमप्, स्त्रियां क्तिनः प्रसङ्गात् नह्यत्र वाऽसरूपविधिः प्रवर्तते। 'अजब्भ्यां स्त्रीखलनाः विप्रतिषेधेन' इत्युक्तेरित्यत आह क्तिन्विषयेऽपीति। तत्र वृद्धप्रयोगं प्रमाणयति प्रवरा सेना प्रवरा गौरितिवदिति। ननु 'घञजबन्ताः पुंसि' इत्यबन्तस्य पुंस्त्वात् स्त्रीत्वं दुर्लभमित्यत आह-एवं चेति। उक्तवृद्धप्रयोगादित्यर्थः। लोकाश्रयत्वाल्लिङ्गस्येति भावः। उदि श्रयति। उत्

स्वभावतश्चेदमखिलुणान्तं नपुंसकम्। आक्रोशे। 'ग्रहवृद-' इत्यपि प्राप्तेऽयमारम्भः। अवग्रहः पदस्येति। छेदविशेष इत्यर्थः। निग्रहो निरोधः। प्रे लिप्सायाम्। लिप्सायां किम्। देवदत्तस्य प्रग्रहः। प्रकृष्टोऽभिनिवेश इत्यर्थः। पात्रप्रग्राहेणेति। भिक्षापात्रोपादानेन पात्रं गृहीत्वेति यावत्। नौ वृ। नौ उपपदे वृञो भावादौ घञ् स्यात्। निवरा कन्येति। 'ग्रहवृद-' इत्यादिना कर्मण्यप्। ननु स्त्रीत्वविशिष्टे कर्मणि परत्वात् क्तिना भाव्यम् 'अजब्भ्यां स्त्रीखलनाः' इत्युक्तेरत आह क्तिन-

विभाषाऽऽङि रुप्लुवोः । (३-३-५०) आरावः । आरवः । आप्लावः आप्लवः । ३२२६ **अवे ग्रहो वर्षप्रतिबन्धे** । (३-३-५१) विभाषेति वर्तते । देवस्य अवग्रहः अवग्राहः । देवकर्तृकमवर्षणमित्यर्थः । वर्षप्रतिबन्धे किम् । अवग्रहः पदस्य । ३२२७ **प्रे वणिजाम्** । (३-३-५२) प्रे ग्रहेर्घञ् वा वणिजां संबन्धी चेत्प्रत्ययार्थः । तुलासूत्रमिति यावत् । तुलाप्रग्राहेण चरति । तुलाप्रग्रहेण । ३२२८ **रश्मौ च** । (३-३-५३) प्रग्रहः । प्रग्राहः । ३२२९ **वृणोतेराच्छादने** । (३-३-५४) विभाषा प्र इत्येव । प्रावारः प्रवरः । ३२३० **परौ भुवोऽवज्ञाने** । (३-३-५५) परिभावः परिभवः । अवज्ञाने किम् । सर्वतो भवनं परिभवः । ३२३१ **एरच्** (३-३-५६) चयः । जयः । 'भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्' (वा २११७—१८) । भयम् ।

इत्युपपदे श्रि, यु, पू, द्रु, एभ्यः घञित्यर्थः । अजपोरपवादः । **विभाषाङि रुप्लुवोः** । पञ्चम्यर्थे षष्ठी । आङि उपपदे रु, प्लु, आभ्यां घञित्यर्थः । अपोऽपवादः । **अवे ग्रहो वर्षे** । अव इत्युपपदे ग्रहधातोर्घञ् वा स्यात् वर्षप्रतिबन्धे इत्यर्थः । पक्षे 'ग्रहवृद' इत्यप् । **देवस्येति** । पर्जन्यस्येत्यर्थः । कर्तरि षष्ठी । तदाह **देवकर्तृकमिति । अवग्रहः पदस्येति** । समस्तस्य पदद्वयस्य विच्छिद्य पाठ इत्यर्थः । **प्रे वणिजाम्** । 'ग्रहवृद' इत्यपोऽपवादः । **तुलासूत्रमिति** । व्याख्यानादिति यावत् । तुला घटा । **रश्मौ च** । प्रे उपपदे ग्रहधातोर्घञ् रश्मावपि वाच्ये इत्यर्थः । चशब्दः उक्तसमुच्चये । **वृणोतेराच्छादने** । प्रे उपपदे वृधातोर्घञ्वा स्यादाच्छादने इत्यर्थः । पक्षे 'ग्रहवृद' इत्यप् । **प्रावार इति** । पट इत्यर्थः । 'उपसर्गस्य घञि' इति दीर्घः । **परौ भुवोऽवज्ञाने** । परि इत्युपपदे अवहेलनवृत्तेर्भूधातोर्घञ् स्यादित्यर्थः **एरच्** । इवर्णान्ताद्धातोः अच् स्यात् भावे अकर्तरि च कारके इत्यर्थः ।

न्विषयेऽपीति । एवं च प्रायेण भावार्थ एव घञजन्ताः पुंसीति द्रष्टव्यम् । **रश्मौ च** । रथादियुक्तानामश्वानां संयमनार्था रज्जुः रश्मिः । तस्यामभिधेयायां प्रे उपपदे ग्रहेर्घञ्वा स्याद्भावादौ । इह द्विःकृत्वो ग्रहिरुपात्तः सकृदेव तु वक्तुं शक्यः । तथाहि उदि ग्रहः, समि मुष्टौ, आक्रोशे वन्योः, प्रे लिप्सायाम् , परौ यज्ञे, अवेर्वर्षप्रतिबन्धे, विभाषा प्रेवणिजाम् , इत्यादि 'परौ भुवोऽवज्ञाने' इत्यस्यानन्तरम् 'आङि रुप्लुवोः' इत्यस्तु तथा तु न कृतमित्येव । **वृणोतेः । प्रावार इति** । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इत्युपसर्गस्य दीर्घः । आच्छादने किम् , प्रवरो गौः । प्रशस्त इत्यर्थः । **परिभावः** । 'अनादरः परिभवः परीभावस्तिरस्क्रिया' इत्यमरः । परत्वाद्धि क्त्युटौ प्राप्तौ । तथा च पूर्वविप्रतिषेधोऽयं फलितः । एवं च वासरूपन्यायोऽत्र न

वर्षम् । ३२३२ **ॠदोरप्** । (३-३-५७) ऋवर्णान्तादुवर्णान्तादप् । करः । गरः । शरः । यवः । लवः । स्तवः । पवः । ३२३३ **वृक्षासनयोर्विष्टरः** । (८-३-९३) अनयोर्विपूर्वस्य स्तृः षत्वं निपात्यते । विष्टरो वृक्ष आसनं च । वृक्ष—इति किम् । वाक्यस्य विस्तरः । ३२३४ **ग्रहवृदृनिश्चिगमश्च** । (३-३-५८) अप्स्यात् । घञचोरपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः । 'वशिरण्योरुपसंख्यानम्' (वा २२०३) । वशः । रणः । 'घञर्थे कविधानम्' (वा २२०४) । प्रस्थः । विघ्नः । 'द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्' (वा

घञपवादः । **भयादीनामिति** । भयादीनां सिद्धये भीप्रभृतिधातुभ्यः अच्प्रत्ययस्योपसंख्यानमित्यर्थः । ननु 'एरच्' इत्येव सिद्धे भयग्रहणं व्यर्थमित्यत आह **नपुंसके क्तादिनिवृत्त्यर्थमिति** । आदिना ल्युडादिसंग्रहः । अन्यथा परत्वात् क्तादयः स्युः । वाऽसरूपविधिस्तु नात्र भवति । अपवादत्वाभावादिति भावः । **ऋर्ष्यमिति** । अत्र नपुंसके क्तल्युडादि बाधित्वा अच् अपूर्वो विधीयते । **ॠदोरप्** । पञ्चम्यर्थे षष्ठी । ॠत्, उ, अनयोः समाहारे सौत्रं पुंस्त्वम् । ॠदन्तादुवर्णान्ताच्च अप् स्याद्भावे अकर्तरि च कारके इत्यर्थः । घञपवादः । **ग्रहवृदृ** । ग्रह, वृ, दृ, निश्चि, गम्, एषां द्वन्द्वः । अप् स्यादिति शेषः । **घञचोरिति** । निष्पूर्वाच्चिञः अजपवादः, इतरेभ्यस्तु घञपवाद इति विवेकः । **वशिरण्योरिति** । वार्तिकम् । घञपवादः अप् । **वश इति** । वश कान्तौ, भावे अप् । इच्छेत्यर्थः । यद्यपि वशधातुः छान्दसः । तथापि वष्टि भागुरिरित्यादिप्रयोगात् लोकेऽपि प्रयुज्यते इति भावः । **रण इति** । रणन्ति शब्दायन्ते अस्मिन्निति रणः संग्रामः । **घञर्थे कविधानमिति** । वार्तिकमिदम् । 'स्थास्नापाव्यधिहनियुध्यर्थम्' इति वार्तिकशेषो भाष्ये पठितः । **प्रस्थ इति** । प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थः । 'आतो लोप इटि च' इत्याल्लोपः । प्रस्नान्त्यस्मिन्निति प्रस्नः । प्रपिबन्त्यस्यामिति प्रपा । आविध्यन्त्यस्मिन्नित्याविधम् ।

प्रवर्तते अनपवादत्वादिति भावः । **वर्षमिति** । 'वृषभो वर्षणात्' इति भाष्यप्रयोगात्तु ल्युडपि । वर्षणम् । **ॠदोरप्** । ॠच्च उच्च तयोः समाहारे सौत्रं पुंस्त्वम् । ॠदोरित्ययं न तकारः किं तर्हि दकारः । 'निरभ्योः पूल्वोः' इत्यपवादतया घञ्विधानाज्ज्ञापकाद्दीर्घान्तादप्युदाहरति **लवः** । **पव इति** । **घञचोरपवाद इति** । निश्चय इत्यत्राचः प्राप्तिरन्यत्र घञ इति विवेकः । हस्तादाने तु प्रपूर्वकाच्चिनोतेर्घञुदाहृतः **वशिरण्योरिति** । घञि प्राप्ते वचनम् । वशनं वशः । रणन्ति शब्दं कुर्वन्त्यस्मिन्निति रणः संग्रामः । व्यद्यते विशेषेण भक्ष्यते इति विघसः वैश्वदेवशिष्टभक्षम् । घासश्चतुष्पदां भक्ष्यम् । 'शष्पं बालतृणं घासः' इत्यमरः । उपजापो

१४२१)। चक्रम् । चिक्रिदम् । चङ्क्रमः । (चक्रणः)। ३२३५ उपसर्गेऽदः । (३-३-५६) अप्स्यात् । ३२३६ घञपोश्च । (२-४-३८) अदेर्घस्लृ स्याद्घञ्यपि च । प्रघसः । विघसः । उपसर्गे किम् । घासः । ३२३७ नौ ण च । (३-३-६०) नौ उपपदे अदेर्णः स्यादप् च । न्यादः । निघसः । ३२३८ व्यधजपोरनुपसर्गे । (३-३-६१) अप्स्यात् । व्यधः । जपः । उपसर्गे तु, आव्याधः । उपजापः मन्त्रभेदः । ३२३९ स्वनहसोर्वा (३-३-६२) अप् । पक्षे घञ् । स्वनः स्वानः । हसः हासः । अनुपसर्ग इत्येव । प्रस्वानः । प्रहासः । ३२४० यमः समुपनिविषु च । (३-३-६३) एष्वनुपसर्गे च यमेरब्वा । संयमः संयामः । उपयमः उपयामः । नियमः नियामः । वियमः वियामः । यमः यामः । ३२४१ नौ गदनदपठस्वनः । (३-३-६४) अब्वा स्यात् । निगदः निगादः । निनदः निनादः । निपठः निपाठः । निस्वनः निस्वानः । ३२४२ क्वणो वीणायां च । (३-३-६५) नावनुपसर्गे च

'ग्रहिज्यावयिव्यधि' इति संप्रसारणम् । इति सिद्धवत्कृत्य आह विघ्न इति विहन्त्यस्मिन्मनोऽनेनेति विघ्नः । 'गमहन' इत्युपधालोपः 'हो हन्तेः' इति कुत्वम् । आयुध्यतेऽनेनेत्यायुधमित्यप्युदाहार्यम् । द्वित्वप्रकरणे इति । 'एकाचो द्वे प्रथमस्य इति द्वित्वप्रकरण इत्यर्थः । के कृञादीनामिति । कप्रत्यये परे कृञादीनाम् एकाचः प्रथमस्य द्वे स्त इत्यर्थः । चक्रमिति । 'स्थास्ना' इत्यस्य उपलक्षणत्वात् कुञः कः । क्रियते शत्रुवधः अनेनेति विग्रहः । कित्वान्न गुणः । द्वित्वम् अभ्यासकार्यम् । चिक्रिदमिति । कः द्वित्वादि । चङ्क्रम इति । पूर्ववत् । उपसर्गेऽदः । अद इति छेदः । अप् स्यादिति शेषः । उपसर्गे उपपदे अदधातोः अप् स्यादित्यर्थः । घञोऽपवादः । घञपोश्च । 'अदो जग्धिः' इत्यतः अद इति 'लुङ्सनोर्घस्लृ' इत्यतः घस्लृ इति चानुवर्तते । तदाह । अदेरिति । अपि चेति । 'शष्पं बालतृणं घासः' इत्यमरः । नौ ण च । णेति लुप्तप्रथमाकम् । निघस इति । 'घञपोश्च' इति घस्लृभावः । व्यधजपोः । पञ्चम्यर्थे षष्ठी । अप् स्यादिति शेषः व्यध, जप् आभ्याम् अप् स्यात्, न तूपसर्ग इत्यर्थः । उपजापो मन्त्रभेद इति । पैशुन्यमित्यर्थः । स्वनहसोर्वा । पञ्चम्यर्थे षष्ठी । अबिति शेषः । स्वन, हस, आभ्यामब्वेत्यर्थः । यमः समुप । सम्, उप, नि, वि, एषां द्वन्द्वः । चकारादनुपसर्गे इति समुच्चीयते । तदाह । एष्वनुपसर्गे चेति । नौ गदनद । गद, नद, पठ, स्वन, एषां द्वन्द्वः । अब्वेति । शेषपूरणमिदम् । क्वणो वीणायां च । नाविति । नौ उपपदे च तदितरस्मिन्नुपसर्गे असति च वीणाविषयाच्चेत्यर्थः ।

वीणाविषयाच्च क्वणतेरब्वा स्यात् । वीणाग्रहणं प्राद्यर्थम् । निक्वणः निक्वाणः । क्वणः क्वाणः । वीणायां तु, प्रक्वणः प्रक्वाणः । ३२४३ नित्यं पणः परिमाणे । (३-३-६६) अप् स्यात् । मूलकपणः । शाकपणः । व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः । परिमाणे किम् । पाणः । ३२४४ मदोऽनुपसर्गे । (३-३ ६७) धनमदः । उपसर्गे तु, उन्मादः । ३२४५ प्रमद-संमदौ हर्षे (३-३-६८) हर्षे किम् । प्रमादः । संमादः । ३२४६ समुदोरजः पशुषु । (३-३ ६९) संपूर्वोऽजिः समुदाये उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप्स्यात् । 'अघञपोः' इत्युक्तेर्वीभावो न । समजः पशूनां संघः । उदजः पशूनां प्रेरणम् । पशुषु किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्रियाणाम् । ३२४७ अक्षेषु ग्लहः । (३-३-७०) अक्षशब्देन देवनं लक्ष्यते, तत्र यत्पणरूपेण ग्राह्यं तत्र ग्लहः इति निपात्यते । अक्षस्य ग्लहः । 'व्याप्यु-

---

ननु क्वणश्चेत्येतावता नौ उपसर्गे च क्वणः अब्वेत्यर्थलाभाद् वीणाविषयादपि क्वणः सिद्धेः वीणायामिति व्यर्थमित्यत आह वीणाग्रहणं प्राद्यर्थमिति । सोपसर्गार्थमित्यर्थः । नित्यं पणः । अबिति शेषः । 'पण व्यवहारे' इत्यस्मान्नित्यमप् स्यात् परिमाणविशेषे गम्य इत्यर्थः । नित्यग्रहणाद्वाग्रहणं निवृत्तम् । व्यवहारार्थमिति । विक्रयार्थमित्यर्थः । पण्यते विक्रयार्थं बध्यते मुष्टिमात्रमिति कर्मण्यप् । मूलकानां पण इति विग्रहः । मदोऽनुपसर्गे । अनुपसर्गे उपपदे मदेरबित्यर्थः । प्रमद-संमदौ । प्रमद, संमद एतावबन्तौ निपात्येते हर्षे गम्ये इत्यर्थः । कन्यानां प्रमदः, कोकिलानां संमदः इत्युदाहरणम् । 'प्रसमोर्मदो हर्षे' इत्येव सिद्धे निपातनं रूढिपरिग्रहार्थम् । समुदोरजः । समुदोः अजः इति च्छेदः । सम् , उत् , अनयोः उपपदयोरित्यर्थः । अक्षेषु ग्लहः । अक्षशब्दे उपपदे इत्यर्थे अक्षेष्विति बहुवचनानुपपत्तिरित्यत आह अक्षशब्देनेति । लक्ष्यते इति । प्रायेण देवनस्य अक्षसाध्यत्वादिति भावः । तत्रेति । देवने इत्यर्थः । पणरूपेणेति । देवने जितवते पराजितेन देयं द्रव्यं पणं, तेन रूपेण ग्राह्यं यद् द्रव्यं तस्मिन् कर्मणि 'ग्रह उपादाने' इति धातोः 'ग्रहवृद' इत्यप्प्रत्ययान्तः कृतलत्वो ग्लहशब्दो निपात्यते इत्यर्थः । 'ग्लह ग्रहणे' इत्यत्र तु 'ग्लह च' इति पठितम् । तत्र ग्लहेरप्प्रत्ययो निपात्यते । घञपवादः । अक्षस्य ग्लह इति । अक्ष क्रीडायां पणत्वेन ग्राह्यमित्यर्थः ।

मन्त्रभेदः । 'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः । स्वानः' इत्यमरः । क्वण । 'निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि । वीणाया क्वणिते प्रादेः प्रक्वाण-प्रक्वणादयः' इत्यमरः । मदो अनुपसर्गे सुप्युपपदे नित्यमप् स्याद्भावादौ । प्रमद ।

क्षीमभिसरणग्लहामदीव्यन्' । अक्षेषु किम् । पादस्य ग्रहः । **३२४८ प्रजने सर्तेः** । (३-३-७१) । प्रजनं प्रथमगर्भग्रहणम् । गवामुपसरः । कथम् अवसरः प्रसरः इति । अधिकरणे 'पुंसि संज्ञायाम्-' (सू० ३२३६) इति घः । **३२४९ ह्वः संप्रसारणं च न्यभ्युपविषु** । (३-३-७२) निहवः । अभिहवः । उपहवः । विहवः । एषु किम् । प्रह्वायः । **३२५० आङि युद्धे** ।

'पणोऽक्षेषु ग्लहः' इत्यमरः । अत्र देवनत्वरूपेण देवनमक्षशब्दस्य लक्ष्यम्, न त्वक्षदेवनत्वेनेत्यभिप्रेत्योदाहरति । **व्यात्युक्षीमिति** । माघकाव्यस्थमिदम् । 'दिवस्तदर्थस्य' इति करणस्य कर्मत्वाद् द्वितीया । अभिसरणग्लहाम् । अभिसरणं चौर्यसुरतार्थमभिगमनम् । तदेव ग्लहः पणरूपेण आत्तं द्रव्यं यस्याः तथाविधां व्यात्युक्षीम् 'उक्ष सेचने' परस्परं जलसेचनं व्यात्युक्षी तयेत्यर्थः । 'कर्मव्यतिहारे णच् स्त्रियाम्' इति णच् । व्यात्युक्षशब्दाद् 'णचः स्त्रियामञ्' इति स्वार्थे अञ् तद्धितः । आदिवृद्धिः । 'टिड्ढ' इति ङीप् । क्रीडायां जितवते पुंसे अभिसरणमेव पणत्वेन समयबन्धं कृत्वा प्रवृत्तेन परस्परजलसेचनेन अक्रीडन्निति यावत् । अत्र जलक्रीडायामभिसरणात्मकपणस्य अक्षसाधनकत्वाभावेऽपि ग्लेहरप् भवत्येव । सूत्रे अक्षशब्देन देवनसामान्यस्य विवक्षितत्वात् । अक्षक्रीडाया एव विवक्षितत्वे त्विह ग्लहेरप् न स्यादिति भावः । **अक्षेषु किमिति** । देवने किमित्यर्थः । **पादस्य ग्रहं इति** । वन्दनार्थमिति भावः । अत्र ग्रहधातोः ग्रहवृद' इत्यप् । न तु लत्वम् । ग्लहेस्तु घञि पादस्य ग्लाह इ[...]व । **प्रजने सर्तेः** । **प्रजनं प्रथमगर्भग्रहणमिति** । प्रशब्द आद्यर्थकः । प्रथमं जायते इति भावे घञ् । 'जनिवध्योश्च' इति नोपधावृद्धिरिति भावः । प्रजनार्थकात् सृधातोरप् स्यादिति फलितम् । **कथमिति** । उपसरणं प्रसरणमित्यर्थे प्रजनाप्रतीतेरबभावाद् घञि उपधावृद्धिः स्यादित्याक्षेपः । समाधत्ते **अधिकरण इति** । उपसरत्यस्मिन्निति प्रसरत्यस्मिन्निति च अधिकरणकारके कालेऽर्थे 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्यय इत्यर्थः । **ह्वः संप्रसारणं च** । नि, अभि, उप, वि एषु चतुर्षूपपदेषु ह्वयतेरप् स्यात् संप्रसारणं च । घञोऽपवादः । **निहव इति** । अप् । वस्य संप्रसारणमुत्त्वरः, पूर्वरूपं, तस्य गुणावादेशौ । **प्रह्वाय इति** । घञि वृद्धयायादेशौ । **आङि युद्धे** । आङि उपपदे ह्वयतेरप् संप्रसारणं च

प्रसंख्यां हर्षे इति तु नोक्तम् प्रसंमदः ॥ संप्रमद इति हर्षे माभूदिति । **प्रजने सर्तेः** । प्रजननं प्रजनः । भावे घञ्, 'जनिवध्योः-' इति वृद्धिनिषेधः । प्रशब्दबलादत्र जनेरर्थान्तरत्वम् । प्रतिष्ठते इत्यत्राप्रादुर्भावो यथा । तदेतदाह **प्रथमगर्भग्रहणमिति** । काशिकानुरोधेनेदमुक्तम् । प्रथमं द्वितीयं वेत्यनाग्रहः किन्तु गर्भग्रहण-

(३-३-७३) आहूयन्तेऽस्मिन्निरयाहवः । युद्धे किम् । आह्वायः । **३२५१ निपानमाहावः ।** (३-३-७४) आङ्पूर्वस्य ह्वयतेः संप्रसारणमब्वृद्धिश्चो-दकाधारश्चेद्वाच्यः । 'आहावस्तु निपानं स्यादुपकूपजलाशये' । **३२५२ भावेऽनुपसर्गस्य ।** (३-३-७५) अनुपसर्गस्य ह्वयतेः संप्रसारणमप् च स्याद्भावे । हवः । **३२५३ हनश्च वधः ।** (३-३-७६) अनुपसर्गाद्धन्तेर्भावेऽप्स्यात् । वधादेशश्चान्तोदात्तः । 'वधेन दस्युम्' । चाद्घञ् । घातः । **३२५४ मूर्तौ घनः** (३-३-७७) मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप्स्यात्, घनश्चादेशः । अभ्रघनः । कथम् 'सैन्धवघनमानय' इति । धर्मशब्देन धर्मी लक्ष्यते । **३२५५ अन्तर्घनो देशे ।** (३-३-७८) वाहीकग्रामविशेषस्य संज्ञेयम् । अन्तर्घणः इति पाठान्तरम् । **३२५६ अगारैकदेशे प्रघणः प्रघाणश्च ।** (३-३-७९) द्वारैकदेशे द्वौ प्रकोष्ठौ (अलिन्दौ) आभ्यन्तरो बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनमिदम् । प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः प्रघाणः । कर्मण्यप् पक्षे वृद्धिः । **३२५७ उद्घनोऽत्याधानम् ।** (३-३-८०)

युद्धे वाच्ये इत्यर्थः । **निपानमाहावः ।** आहाव इति निपात्यते निपानं चेद्वाच्यमित्यर्थः । फलितमाह-**आङ्पूर्वस्येति** । **हनश्च ।** चकारो व्युत्क्रमः । तदाह-**वधादेशश्चेति । अन्तोदात्त इति** । सूत्रे वध इत्यन्तोदात्तस्योच्चारणादिति भावः । यद्यपि स्वतन्त्रवधेरेव 'घञर्थे कविधानम्' इत्येव सिध्यति तथाप्यनुपसर्गादिति विशेषं वक्तुमिदम् । वस्तुतो वधिः स्वतन्त्रो नास्त्येवेति शब्देन्दुशेखरे । **वधेन दस्युमिति ।** ऋग्वेदस्थोऽयं मन्त्रः स्वरप्रदर्शनाय पठितः । **घात इति ।** हनस्तोऽचिण्णलोः' इति तत्वम् । 'चजोः' इति कुत्वम् । **मूर्तौ घनः । अभ्रघन इति ।** अभ्रस्य काठिन्यमित्यर्थः, भाव इत्यनुवृत्तेः । **कथमिति ।** सैन्धवकाठिन्यस्यानयनान्वयासंभवादिति भावः । समाधत्ते **धर्मशब्देनेति । अन्तर्घनो देशे ।** देशविशेषे वाच्ये अन्तरित्युपपदे हन्तेरप् प्रकृतेर्घनादेशश्चेत्यर्थः । निपातनात् 'पूर्वपदात्संज्ञायाम्' इति णत्वाभावः । **अगारैकदेशे ।** अगारैकदेशशब्देन अगारैकदेशविशेषो विवक्षितः, व्याख्यानात् । **तदाहद्वारैकदेश इत्यादि ।** प्रकोष्ठौ दीर्घचतुरश्रधिष्ण्यौ तौ अलिन्दनामानौ प्रवेशयोग्यौ । **उद्घनोऽत्याधानम् ।** अत्याधानं वाच्यं चेद्

मित्यन्ये । **हनश्च वधः । अन्तोदात्त इति** । सूत्रे वधशब्दोऽन्तोदात्तत्वयोच्चारित इति भावः । **अगारैक ।** 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके' इत्यमरः **सङ्घोद्घौ** । 'मतल्लिकामचर्चिका प्रकाण्डमुद्घतल्लजौ । प्रशस्तवाचकान्यमूनि' इत्यमरः । **इ्चितः । अयमिति ।** अतएव पाकेन निर्वृत्तमिति विगृह्यते ननु पक्वेनेति ।

अत्याधानमुपरिस्थापनम्। यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्धनः। अधिकरणेऽप्। ३२५८ अपघनोऽङ्गम् (३-३-८१) अङ्गं शरीरावयवः। स चेह न सर्वः किं तु पाणिः पादश्चेत्याहुः। करणेऽप्। अपघातोऽन्यः। ३२५९ करणेऽयोविद्रुषु। (३-३-८२) एषु हन्तेः करणेऽप्स्याद्घनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः। विघनः। द्रुघनः। द्रुघणः इत्येके। 'पूर्वपदात्संज्ञायाम्-' (सू ८५७) इति णत्वम्। संज्ञैषा कुठारस्य। द्रुघणः। ३२६० स्तम्बे क च। (३-३-८३) स्तम्ब उपपदे हन्तेः करणे कः स्यादप्च, पक्षे घनादेशश्च। स्तम्बघ्नः। स्तम्बघनः। करण इत्येव। स्तम्बघातः। ३२६१ परौ घः। (३-३-८४) परौ हन्तेरप्स्यात्करणे घशब्दश्चादेशः। परिहन्यतेऽनेनेति परिघः। ३२६२ परेश्च घाङ्कयोः। (८-२-२२) परेः रेफस्य लो वा स्याद्घशब्देऽङ्कशब्दे च। पलिघः परिघः। पल्यङ्कः पर्यङ्कः। इह 'तरप्तमपौ घः' (सूः २००१) इति कृत्रिमस्य न ग्रहणं, व्याख्यानात्। ३२६३ उपघ्न आश्रये। (३-३-८५) उपपूर्वाद्धन्तेरप्स्यादुपधालोपश्च। आश्रयशब्देन सामीप्यं लक्ष्यते। पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः। ३२६४ संघोद्घौ गणप्रशंसयोः। (३-३-८६) संहननं संघः। भावेऽप्। उद्धन्यते

उत्पूर्वाद् हन्तेरप्। हस्य घत्वे च उद्धन इति निपात्यते इत्यर्थः। **अपघनोऽङ्गम्।** अङ्गं वाच्यं चेद् अपपूर्वाद्धन्तेरप्। हस्य घत्वे चापघन इति निपात्यत इत्यर्थः। **पाणिः पादश्चेति।** अत्र व्याख्यानमेव शरणम्। **करणे इति।** अपहन्यतेऽनेनेति करणव्युत्पत्तेरिति भावः। **करणेऽयोविद्रुषु।** अयस्, वि, द्रु, एषां द्वन्द्वः। **द्रुघन इति।** असंज्ञात्वात् 'पूर्वपदात्संज्ञायाम्' इति न णत्वमिति भावः। संज्ञात्वमते आह **द्रुघण इति। स्तम्बे क च।** केति लुप्तप्रथमाकम्। **अप् च पक्षे इति।** अप्संबद्धस्यैव घनादेशस्यानुवृत्तेरिति भावः। **स्तम्बघ्न इति।** कप्रत्यये सति 'गमहन' इत्युपधालोपः। **स्तम्बघात इति।** घञि 'चजोः' इति कुत्वम्। **परौ घः।** करणे हन इति अबिति चानुवर्तते। तदाह-**परौ हन्तेरिति। परेश्च घाङ्कयोः। रेफस्य लो वेति।** 'कृपो रो लः' इत्यतो रो ल इति 'अचि विभाषा' इत्यतो विभाषेति चानुवर्तत इति भावः। ननु 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः' इति न्यायादिह घसंज्ञकयोः तरप्तमपोरेव ग्रहणं स्यात्, नतु घशब्दस्य, 'स्वं रूपं शब्दस्य' इत्यत्र अशब्दसंज्ञेति पर्युदासाच्चेत्यत आह **इहेति। उपघ्न आश्रये।** आश्रये गम्ये उपघ्न इति निपात्यते इत्यर्थः। फलितमाह **उपपूर्वादिति। लक्ष्यते इति।** व्याख्यानादिति भावः। **सङ्घोद्घौ।** यथासंख्यमन्वयः। गणे सङ्घ इति।

उत्कृष्टो ज्ञायत इत्युद्घः। कर्मण्यप्। गत्यर्थानां बुद्ध्यर्थत्वाद्धन्तिर्ज्ञाने। ३२६५ निघो निमितम्। (३-३-८७) समन्तान्मितं निमितम्। निर्विशेषं हन्यन्ते ज्ञायन्ते इति निघाः वृक्षाः। समारोहपरिणाहाः इत्यर्थः। ३२६६ ड्वितः क्त्रिः। (३-३-८८) अयं भाव एव स्वभावात्। 'क्त्रेर्मम्नित्यम्' (सू १८७०) क्त्रिप्रत्ययान्तान्मप् निर्वृत्तेऽर्थे। नित्यग्रहणात्क्त्रिर्मब्विषयः। अत एव क्यन्तेन

प्रशंसायामुद्घ इति निपात्यते इत्यर्थः। सम्, उत्, अनयोरुपपदयोः हन्तेरप्प्रत्ययः टिलोपः घत्वं च निपात्यते इति यावत्। संहननमिति। मेलनमित्यर्थः, उपसर्गवशात्। गत्यर्थानामिति। 'सर्वे गत्यर्थाः ज्ञानार्थाः' इति न्यायादिति भावः। निघो। निमितं वाच्यं चेद् निघ इति निपात्यते इत्यर्थः। इहाप्यप् टिलोपः घत्वं च निपात्यते इत्यर्थः। निमितशब्दं व्याचष्टे समन्तान्मितं निमितमिति। निः समन्तादित्यर्थे। अव्ययानामनेकार्थत्वादेति भावः। निर्विशेषमिति। इह नि इत्यव्ययं निर्विशेषे, हन्तिर्ज्ञानार्थे इति भावः। समेति। समौ आरोहपरिणाहौ औन्नत्यस्थौल्ये येषामिति विग्रहः। ड्वितः क्त्रिः। डुः इत् यस्य सः ड्वित्तस्मात् क्त्रिप्रत्ययः स्यादित्यर्थः। ककार इत्। अयं भाव एवेति। अत्र भावे इत्येवानुवर्तते, न तु 'अकर्तरि च कारके' इत्यपीति भावः। स्वभावादिति। पाकादिना निर्वृत्तमित्यर्थे पक्त्रिममित्यादौ क्त्रिप्रत्ययान्तानां पाकादिष्वेव लोके प्रयोगदर्शनादिति भावः। क्त्रेर्मम्नित्यम्। चतुर्थस्य चतुर्थपादे इदं सूत्रम्। मप् नित्यमिति छेदः। निर्वृत्ते इति। 'निर्वृत्तेऽक्षद्यूतादिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः। तद्धितप्रकरणे व्याख्यातमप्येतद् इह स्मरणाय पुनर्व्याख्यातम्। नन्विह नित्यग्रहणं व्यर्थम्। न च 'समर्थानां प्रथमाद्वा' इति महाविभाषानिवृत्त्यर्थं तदिति वाच्यम्। अत्र हि निर्वृत्तग्रहणमनुवर्तते। तथा च निर्वृत्तार्थविवक्षायां क्त्रिप्रत्ययान्ताद् मप्प्रत्ययस्य नित्यतया पक्त्यादिना निर्वृत्तमिति वाक्यनिवृत्तावपि पाकोऽस्तीत्यादिवत् पक्त्रिरस्ति भविष्यतीत्यत्रापि प्रसज्येत। तच्चानिष्टम्। क्त्रिप्रत्ययान्तस्य निर्वृत्तार्थाविवक्षायामपि सर्वदा मप्प्रत्ययशिरस्कताया एवेष्टत्वादित्यत आह नित्यग्रहणादिति। न हि महाविभाषानिवृत्त्यर्थं नित्यग्रहणम्। 'निर्वृत्तेऽक्षद्यूतादिभ्यः क्त्रेस्तु मप्' इत्येकसूत्रत्वेनैव सिद्धे पृथग्योगकरणादेव महाविभाषानिवृत्तिसिद्धेः। तथा च नित्यग्रहणसामर्थ्यान्नित्य-

---

यत्तु प्राचोक्तं भावादावेति तन्नेति भावः। क्त्रेर्मप्। तद्धितेषु व्याख्यातमिदम्। नित्यग्रहणादिति। तत्र हि नित्यमिति योगो विभज्यते तत्सामर्थ्यादर्थविशेषानादरेणैव मब्विषयत्वं निर्णीयते। एकयोगत्वे तु निर्वृत्त इत्यधिकारान्निर्वृत्तार्थस्याविवक्षायां स्वातन्त्र्यं प्रसज्येत, ततश्च मपं विनापि पक्त्रिरिति प्रयोगः स्यादिति भावः।

न विग्रहः । डु पचष् । पाकेन निर्वृत्तं पक्त्रिमम् । डु वप । उप्त्रिमम् । ३२६७ **ट्वितोऽथुच्** । (३-३-८९) अयमपि स्वभावाद्भाव एव । टु वेपृ, वेपथुः । श्वयथुः । ३२६८ **यजयाचयतविच्छप्रच्छरक्षो नङ्** । (३-३-९०) यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । 'प्रश्ने' चासन्न' (सू २७७७) इति ज्ञापकान्न संप्रसारणम् । ङित्वं तु विश्न इत्यत्र गुणनिषेधाय । रक्ष्णः ३२६९ **स्वपो नन्** (३-३-९१) स्वप्नः । ३२७० **उपसर्गे घोः किः** । (३-३-९२) प्रधिः । अन्तर्धिः । उपाधीयतेऽनेनेत्युपाधिः । ३२७१ **कर्मण्यधिकरणे च** (३-३-९३) कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे । जलानि धीयन्तेऽस्मिन्निति जलधिः ॥

मिति योगान्तरं विज्ञायते । तथा च निर्वृत्ते इति निवृत्तम् । तथा च क्त्रिप्रत्ययान्तः निर्वृत्तार्थयोगे तदयोगे च सर्वदा मप्प्रत्ययान्त एव स्यादिति लभ्यते । एवंच क्त्रिप्रत्ययो मप्प्रत्ययं विना केवलः क्वापि न प्रयुज्यते इति लभ्यत इत्यर्थः । एतच्च भाष्ये स्पष्टम् । **अत एवेति** । क्त्रिप्रत्ययस्य मप्प्रत्ययं विना प्रयोगाभावात् पक्त्रा निर्वृत्तमिति स्वपदविग्रहो नास्ति । किंतु पाकेन निर्वृत्तमित्यस्वपदविग्रह इत्यर्थः । **उप्त्रिममिति** । कित्वात् 'वचिस्वपि' इति संप्रसारणमिति भावः । **ट्वितोऽथुच्** । अथुजिति छेदः । टु इत् यस्येति विग्रहः । **श्वयथुरिति** । 'टु ओ श्वि गतिवृद्ध्योः' इत्यस्य रूपम् । **यजयाच** । 'अकर्तरि च कारके' इति भाव इति चानुवर्तते । **याच्ञेति** । नस्य श्चुत्वेन ञः । **विश्न इति** । विच्छेर्नङ् । 'च्छ्वोः' इति शः । एवं प्रच्छेर्नङि रूपम् । 'ग्रहिज्या' इति संप्रसारणमाशङ्क्य आह **प्रश्ने चेति** । ननु संप्रसारणाभावे ङित्वं व्यर्थमित्यत आह **ङित्वं त्विति** । **स्वपो नन्** । नकारो नित्स्वरार्थः । **उपसर्गे घोः किः** । भावे अकर्तरि च कारके । कित्वमातो लोपार्थम् । **प्रधिरिति** । धाञो रूपम् । **उपाधीयते इति** । स्वनिष्ठधर्मः अन्यत्रासज्यते इत्यर्थः । **कर्मण्यधिकरणे च** । इह कर्म उपपदं अधिकरणमर्थः व्याख्यानात् । तदाह

उप्त्रिममिति । वपेर्यजादित्वात्किति संप्रसारणम् । वापेन निर्वृत्तमित्यर्थः । **यजयाच** । भावेऽकर्तरि कारके चेति वर्तते । अतएव 'यज्ञेन यज्ञमयजन्त देवाः' इत्यत्र इज्यते इति यज्ञ इति व्याचक्षते । **विश्न इति** । 'च्छ्वोः शूडनुनासिके च' इति शः । **उपसर्गे घोः किः** । बाहुलकात्कर्तर्यपीति माधवः । अतएव उप समीपे स्वधर्ममादधातीत्युपाधिरिति व्याचक्षते । कित्वादातो लोपः । **अन्तर्धिरिति** । 'अन्तःशब्दस्याङ्किविधि-' इति वार्तिकादुपसर्गत्वम् । **उपाधीयतेऽनेनेति** । एतेन उप समीपे स्वधर्ममादधातीत्युपाधिः । बाहुलकात्कर्तरि किरिति माधवादिग्रन्थो नादर्तव्य इति ध्वनितम् । 'विधाता विश्वसृड्विधिः' इत्यत्रापि कर्तरि माभूत् किः

३२७२ स्त्रियां क्तिन् । (३-३-९४) स्त्रीलिङ्गे भावादौ क्तिन्स्यात् । घञोऽपवादः। अजपौ तु परत्वाद्बाधते। कृतिः। चितिः। स्तुतिः। स्फायी स्फातिः। 'स्फीतिकामः' इति तु प्रामादिकम्। क्तान्ताद्धात्वर्थे णिचि 'अच इः' इति वा समाधेयम्।'श्रुयजीषिस्तुभ्यः करणे'(वा२२११)। श्रूयतेऽनया श्रुतिः। यजेरिषेश्च इष्टिः।

कर्मण्युपपद इत्यादि । स्त्रियां क्तिन् । 'कृत्यल्युटो बहुलम्' इत्यतः प्राक् स्त्रियामित्यधिक्रियते । स्त्रीलिङ्ग इति । स्त्रीत्वविशिष्टे भावे अकर्तरि च कारके इत्यर्थः । धातुमात्रादयं क्तिन् । घञोऽपवाद इति । 'हलश्च' इति वक्ष्यमाणघञोऽपवाद इत्यर्थः । एवं च स्त्रीत्वविशिष्टे भावादौ क्तिन्नेव । घञ् तु पुंस्त्वविशिष्टभावादाविति लभ्यते । वाऽसरूपविधिर्नात्र प्रवर्तते, अस्त्रियामित्युक्तेः । ननु तर्हि इकारान्ताद् ऋकारान्ताद् उकारान्ताच्च स्त्रीत्वविशिष्टे भावादौ 'एरच्' इति 'ऋदोरप्' इति च अजपावेव क्तिनं बाधित्वा स्याताम् , विशेषविहितत्वात् । स्त्रियां वाऽसरूपविध्यभावाचेत्यत आह अजपौ त्विति । तौ तु पुंस्त्वविशिष्टे भावादौ सावकाशाविति भावः । स्फातिरिति । 'लोपो व्योः' इति यलोपः । 'तितुत्र' इति नेट् । प्रामादिकमिति । 'स्फायः स्फी निष्ठायाम्' इति स्फीभावस्य निष्ठायामेव प्रवृत्तेरिति भावः । कथंचित्समाधत्ते क्तान्तादिति । (स्फायेः क्तप्रत्यये स्फीभावे स्फीतशब्दः । स्फीतस्याख्यानं क्रिया वा स्फीतिः । 'तत्करोति तदाचष्टे' इति णिच्, अल्लोपः । 'अच इः' इति भावे इप्रत्ययः । स्फीतिं कामयते इति स्फीतिकाम इति वा कथंचित्समाधेयमिति भावः) श्रुयजीषिस्तुभ्यः करणे । वार्तिकम् । एभ्यश्चतुर्भ्यः करणे स्त्रियां क्तिन्नित्यर्थः । श्रुधातोः स्तुधातोश्च 'एरच्' इति 'ओरप्' इति च प्राप्ते यजीष्योस्तु 'हलश्च' इति घञि च प्राप्ते वचनम् । भावे कर्तृव्यतिरिक्तकारके च सर्वत्र प्राप्ते करणग्रहणम् । इष्टिरिति । यजेः 'वचिस्वपि' इति संप्रसारणम् । व्रश्चादिना

किन्तु विध विधान इत्यस्मादिगुपधात्किदितीनि रूपसिद्धेः । स्त्रियां क्तिन् । घञोऽपवाद इति । यत्तु प्रक्रियाग्रन्थं व्याचक्षाणा आहुः—भाष्ये त्वधिकः कारोऽधिकार इति घञप्युदाहृत इति तद्भ्रमात् । न हि तत्र स्त्रीत्वविशिष्टो भावोऽर्थः किंतु पुंस्त्वविशिष्ट इति ध्येयम् । अजपौ त्विति । तयोरवकाशः । चयः । लवः । क्तिनोऽवकाशः । कृतिः । हातिः । चिनोतिस्तौतिभ्यां तु स्त्रियामुभयप्रसङ्गे परत्वात् क्तिन्नित्यर्थः । प्रामादिकमिति । 'स्फायः स्फी निष्ठायाम्' इति निष्ठायामेव स्फीभावविधानादिति भावः । श्रुयजीति । परत्वात् 'करणाधिकरणयोश्च' इति ल्युटि प्राप्ते वचनम् । श्रुतिः श्रोत्रम् । यजेरिति । यजेः क्तिनि 'वचिस्वपि–' इति संप्रसारणे 'व्रश्चभ्रस्ज–' इति षत्वे इष्टिरिति रूपम् । इज्यतेऽनयेति विग्रहः । एवमिष्यते-

स्तुतिः। ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः (वा ४८२६)। तेन नत्वम्। कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। 'ह्लादः' (सू ३०७२) इति योगविभागात् क्तिनि ह्रस्वः। प्रह्लत्तिः। 'ति च' (सू ३०३७)। चूर्तिः। फुल्तिः। 'चायतेः क्तिनि चिभावो वाच्यः' (वा ४४३३)। अपचितिः। 'संपदादिभ्यः क्विप्' (वा २२३३) संपत्। विपत्। 'क्तिन्नपीष्यते'। संपत्तिः। विपत्तिः। ३२७३ स्थागापापचो भावे (३-३-९५) क्तिन्स्यादङोऽपवादः। प्रस्थितिः। उप-

षत्वम्। ऋल्वादिभ्य इति। ऋकारान्ताल्ल्वादिभ्यश्च पर इत्यर्थः। तेनेति। निष्ठावद्वचनेनेत्यर्थः। नत्वमिति। 'रदाभ्यां निष्ठातः' इति नत्वस्य प्रकृतत्वादिति भावः। कीर्णिरिति। कॄधातोः क्तिनि इत्वे रपरत्वे 'हलि च' इति दीर्घः। तकारस्य नत्वम्, णत्वम्। एवं गॄधातोः गीर्णिः। ल्वादिभ्यः उदाहरति लूनिरित्यादि। अथ प्रह्लत्तिरित्यत्र उपाधाह्रस्वं साधयति ह्लाद इतीति। 'ह्लादो निष्ठायाम्' इत्युपधाह्रस्वविधौ ह्लाद इति योगविभागाद् अनिष्ठायामपि क्वचिद्ध्रस्व इति भावः। भाष्ये तु नैतद् दृष्टम्। अथ चरेः फलेश्च क्तिनि अकारस्य उत्वं स्मारयति ति चेति। चरफलोश्च, उत्परस्यातः, इत्युत्तरमिदं सूत्रम्। तादौ प्रत्यये परे चरफलोरत उकारः स्यादिति व्याख्यातं यङ्लुक्प्रकरणे। चूर्तिरिति। चरेः क्तिनि अकारस्य उत्वे 'हलि च' इति दीर्घः। फुल्तिरिति। फलेः क्तिनि उत्वे रूपम्। रेफवान्तत्वाभावान्न दीर्घः। उभयत्रापि 'तितुत्र' इति नेट्। सम्पदादिभ्यः क्विप्। वार्तिकम्। भावे अकर्तरि च कारके स्त्रियाम् इति शेषः। ननु अस्त्रियामिति निषेधेन वाऽसरूपविधेरभावात् क्विपाऽनेन क्तिनो बाधात् संपत्तिरित्यादि कथमित्यत आह क्तिन्नपीष्यते इति। 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणेन सिद्धमित्याहुः। भाष्ये तु नैतद् दृश्यते। स्थागापा। क्तिन् स्यादिति। क्विप् तु अस्वरितत्वान्नानुवर्तत इति भावः। अङ इति। स्थादिभ्यस्त्रिभ्यः 'आतश्चोपसर्गे' इति वक्ष्यमाणस्य, पचेस्तु 'षिद्भिदादिभ्यः' इति विहितस्याङ्प्रत्ययस्यापवाद इत्यर्थः। प्रस्थितिरि-

ऽनया इष्टिः। स्तूयतेऽनया स्तुतिः। तेन नत्वमिति। कीर्णिरित्यादौ 'रदाभ्याम्-' इत्यनेन नत्वम्। लूनिरित्यादौ तु 'ल्वादिभ्यः' इत्यनेनेति विवेकः। ह्लाद इति। 'ह्लादो निष्ठायाम्' इत्यत्रेत्यर्थः। चूर्तिरिति। 'ति च' इति चरफलोरुत्वे 'र्वोरुपधाया दीर्घः' इति दीर्घः। चायतेः। चायृ पूजानिशामनयोः। क्तिन्नपीति। अस्त्रियामिति प्रतिषेधेन स्त्रियां वासरूपविधेरबाधादिदमुक्तम्। अङोऽपवाद इति। पुरस्तादपवादन्यायेन स्थादिभ्यः 'आतश्चोपसर्गे' इति, पचेस्तु 'षिद्भिदादिभ्यः-' इति प्राप्तस्याङोऽपवादो नतु ण्वुलिञोरिति भावः। ण्वुलिञौ तु परत्वा-

स्थितिः। संगीतिः। संपीतिः। पक्तिः। कथम् अवस्था संस्था इति। 'व्यवस्थायाम्' इति ज्ञापकात्। ३२७४ **ऊतियूतिजूतिसातिहेतिकीर्तयश्च।** (३-३-९७) अवतेः 'ज्वरत्वर' (सू २६५४) इत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। 'द्यतिस्यति' (सू ३०७४) इतीत्वे प्राप्ते इह इत्वाभावो निपात्यते। सनोतेर्वा 'जनसन' (सू २५०४) इत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः। ३२७५ **व्रजयजोर्भावे क्यप्।** (३-३-९८)

त्यादि। 'द्यतिस्यतिमास्थाम्' इति इत्वम् 'घुमास्थागापा' इति च ईत्वम्। **कथमिति।** 'स्थागापा' इति क्तिना 'आतश्चोपसर्गे' इति वक्ष्यमाणस्य अङो बाधादिति भावः। समाधत्ते **व्यवस्थायामिति ज्ञापकादिति। ऊतियूति।** एते स्त्रियां क्तिन्नन्ता निपात्यन्त इत्यर्थः। **ऊठिति।** अकारवकारयोरित्यर्थः। ननु 'स्त्रियां क्तिन्' इत्येव सिद्धे किमर्थमिदमूतिग्रहणमित्यत आह **स्वरार्थमिति।** कः स्वर इत्यत आह **उदात्त इतीति।** 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इति पूर्वसूत्रस्थमुदात्तग्रहणमेकवचनान्ततया विपरिणतमिहानुवर्तत इत्यर्थः। तथा च क्तिन उदात्तत्वं लभ्यते। अन्यथा ञ्नित्यादिर्नित्यमिति प्रकृतेरुदात्तत्वं स्यादित्यर्थः। **अनयोरिति।** युधातोर्जुधातोश्चेत्यर्थः। **स्यतेरिति।** 'षोऽन्तकर्मणि' इत्यस्मात् क्तिनि सातिरिति रूपमित्यर्थः। 'आदेचः' इत्यात्वम्। तत्र 'द्यतिस्यतिमास्थामित्ति किति' इति इत्वमाशङ्क्य आह **इह इत्वाभाव इति।** सनधातोर्वा सातीति निपातनमित्याह **सनोतेर्वेति।** सनेर्वा क्तिनि 'जनसन' इत्यात्वे कृते सातीति निपातनमित्यर्थः। अत्र 'द्यतिस्यति' इतीत्वस्याप्रसक्तेस्तदभावो न निपात्यते इति लाघवमिति भावः। ननु सनोतेः स्त्रियां क्तिनि सातीति रूपसिद्धेः किमर्थमिह सातीति निपातनमित्यत आह **स्वरार्थमिति।** 'मन्त्रे वृष' इति पूर्वसूत्राद् उदात्तग्रहणानुवृत्तेः क्तिन उदात्तत्वं सिध्यति। अन्यथा प्रकृतेरुदात्तत्वं स्यादित्यर्थः। **हन्तेरिति।** हनः क्तिनि नकारस्य

द्रुवत एव। का त्वं स्थायिका त्वं स्थायिमिति भाष्यकारप्रयोगात्। **प्रस्थितिरिति।** 'द्यतिस्यतिमास्थाम्–' इत्यात इत्वम्। **सङ्गीतिरिति।** 'घुमास्था–' इत्यादिना ईत्वम्। **उदात्त इतीति।** 'मन्त्रे वृषेष–' इति सूत्रादनुवर्तत इत्यर्थः। एवं च क्तिन्नन्तस्याद्युदात्तत्वे प्राप्ते 'ऊतियूति–' इत्यादयोऽन्तोदात्ता इति पर्यवसन्नोऽर्थः। **इत्वाभाव इति।** 'द्यतिस्यति–' इति प्राप्तस्याभाव इत्यर्थः। **हन्तेरिति।** नकारस्येत्वं, हिनोतेस्तु गुण इति बोध्यम्। **कीर्तिरिति।** कीर्तयतेः 'ण्यासश्रन्थ–' इति युचि प्राप्ते क्तिन्निपात्यते उदात्तत्वं च। 'तां सुते कीर्तिम्' **व्रजयजोः।** उदात्त

व्रज्या । इज्या । ३२७६ **संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।** (३-३-९९) समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात्स चोदात्तः संज्ञायाम् । 'अजेः क्यपि वीभावो नेति वाच्यम्' (वा १२१६) । समजन्त्यस्यामिति समज्या सभा । निषीदन्त्यस्यामिति निषद्या आपणः । निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः । मन्यतेऽनयेति मन्या गलपार्श्वशिरा । विदन्त्यनया विद्या । सुत्या अभिषवः । शय्या । भृत्या । ईयतेऽनया इत्या शिबिका । ३२७७ **कृञः श च ।** (३-३-१००) कृञः इति योगविभागः । कृञः क्यप्स्यात् । कृत्या । 'श च' । चात्क्तिन् । क्रिया । कृतिः । ३२७८ **इच्छा ।**

निपातनादित्वे आद्गुणे हेतिरिति रूपम् । **हिनोतेरिति** । हिधातोः क्तिनि तु 'क्ङिति च' इति निषेधं बाधित्वा निपातनाद् गुणे रूपमित्यर्थः । **कीर्तिरिति** । कृत संशब्दने । स्वार्थिकणयन्ताद् 'ण्यासश्रन्थो युच्' इति युचं बाधित्वा क्तिनिपात्यते । उदात्तश्च सः । **व्रजयजोः** । पञ्चम्यर्थे षष्ठी । स्त्रियामित्येव । **व्रज्येति** । 'व्रज गतौ' क्यप् । 'वृजयजोः' इति पाठे 'वृजी वर्जने' इत्यस्मात् क्यप्, वृज्या । **इज्येति** । 'वचिस्वपि' इति संप्रसारणम् । **संज्ञायां समजनिषद** । समज, निषद, निपत, मन, विद, षुञ्, शीङ्, भृञ्, इण्, नवानां समाहारद्वन्द्वात्पञ्चमी । 'अजेर्व्यघञपोः' इति प्राप्ते आह **अजेः क्यपीति** । **समजन्तीति** । सङ्गीभवन्तीत्यर्थः । **समज्या सभेति** । संपूर्वादजेः क्यप् । 'समज्या तु सभा गोष्ठी' इत्यमरः । **निषद्येति** । निपूर्वात्सदेः क्यप् । 'सदिरप्रतेः' इति षत्वम् । 'आपणस्तु निषद्यायाम्' इत्यमरः । **निपत्येति** । निपूर्वात्पतेः क्यप् । **पिच्छिलेति** । निम्नोन्नता भूमिरित्यर्थः । **गलेति** । 'पश्चाद्ग्रीवा शिरा मन्या' इत्यमरः । **विद्येति** । वेदशास्त्रादिरित्यर्थः । **सुत्येति** । सोमेज्या । षुञः क्यप् । तुक् । **इत्या शिबिकेति** । कोशो मृग्यः । **कृञः श च** । चात् क्यप् । शेति लुप्तप्रथमाकम् । कृञः शः स्यात् क्यप् चेति प्रतीयमानार्थः । एवं सति कृतिरिति क्तिन्न स्यात्, स्त्रियां वाऽसरूपविध्यभावात् । तत्राह **कृञ इति योगविभाग इति** । तत्र क्यबित्यनुवृत्तिं मत्वा आह **कृञः क्यप् स्यादिति** । **कृत्येति** । कृञः क्यपि तुक् । श चेति द्वितीयखण्डोऽयम् ।

इत्येव । पित्करणं तूत्तरत्र तुगर्थम् । **गलपार्श्वेति** । तया हि क्रुद्धो ज्ञायत इति भावः । शेरतेऽस्यामिति शय्या । भरणं भृत्या जीविका । 'कुमारभृत्याकुशलैरधिष्ठितः' इति रघुः । 'कुमारभृत्या गर्भिण्याः परिचर्याभिधीयते' इति हारावली । संज्ञायां किम् । मतिः । भृतिः । आसुतिः । तथा च व्यवहृतम् 'मतिबुद्धिपूजार्थेभ्यश्च' 'कर्मणि भृतौ' 'रजःकृष्यासुति–' इत्यादि । एतेन 'मतिबुद्धि–' इत्यादिसूत्रप्रयोगा-

(३-३-१०१) इषेर्भावे शो यगभावश्च निपात्यते। इच्छा। 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्' (वा २२१५)। शो यक्च निपात्यते। परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोऽपि। मृग अन्वेषणे चुरादावदन्तः। अतो लोपाभावोऽपि। शे यकि णिलोपः। मृगया। अटतेः शे यकि अशब्दस्य द्वित्वम्। पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या। 'जागर्तेरकारो वा' (२२१६) पक्षे शः। जागरा जागर्या। ३२७९ अ प्रत्ययात्। (३-३-१०२) प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा।

चात्क्लिन्निति। क्यपः पूर्वेणैव खण्डेन सिद्धत्वादिति भावः। **क्रियेति**। कृञः शः 'रिङ्शयग्लिङ्क्षु' इति रिङ्। शित्वेन सार्वधातुकतया ङित्वाच्च गुणः। इयङिति भावः। **इच्छा**। **भावे श इति**। न त्वकर्तरि कारके चेत्यर्थः, निपातनसामर्थ्यादिति भावः। **यगभावश्चेति**। अन्यथा शित्वेन सार्वधातुकत्वाद् यक् स्यादिति भावः। **परिचर्येति**। परिपूर्वाच्चरेः भावे शः यक् च। **परिसर्येति**। परिपूर्वात्सृधातोः शः, यक् च। अत्र शप्रत्ययस्य शित्वेन सार्वधातुकतया ङित्वाद् गुणनिषेधमाशङ्क्य आह **अत्र गुणोऽपीति**। परिसर्याशब्दे गुणोऽपि निपातित इत्यर्थः। **द्वित्वमिति**। निपात्यते इति शेषः। **यकारनिवृत्तिरिति**। निपात्यत इति शेषः। हलादिशेषस्तु नात्र प्रवर्तते। तस्य षाष्ठद्वित्वविषयत्वादित्याहुः। यङन्तात्तु 'अ प्रत्ययात्' इति वक्ष्यमाणः अकारप्रत्ययः। तत्र अतो लोपे यलोपे च अटाटेति बोध्यम्। **जागर्तेरकारो वेति**। भावे वक्तव्य इति शेषः। अकारप्रत्यये उदाहरति **जागरेति**। आर्धधातुकलक्षणो गुणः। शप्रत्यये उदाहरति **जागर्येति**। शित्वेन सार्वधातुकत्वाद् यक् 'जाग्रोऽविचिण्णल्ङित्सु' इति च गुणः। **अ प्रत्ययात्**। अ इति लुप्तप्रथमाकम्। भावे अकर्तरि च

देव मतिभृतीत्यादीनां साधुत्वमिति दुर्घटाद्युक्तिः प्रत्युक्ता। **क्रियेति**। यदा भावकर्मणोः शः तदा 'सार्वधातुके यक्'। 'रिङ् शयग्लिङ्क्षु' इति रिङादेशः। अन्यत्र तु यगभावेऽपि शे परतो रिङादेशे कृते इयङि सति रूपं तुल्यम्। **इच्छा**। **इषेर्भाव इति**। न त्वकर्तरि कारकेऽपीत्यर्थः। अतएव करणेऽर्थे इष्यतेऽनया इष्टिरिति प्रागुक्तम्। **यकारनिवृत्तिरिति**। हलादिःशेषस्तु नास्ति। षाष्ठद्वित्वे धातुद्वित्वे वाभ्याससंज्ञास्वीकारात्। इह च तदुभयाभावादिति भावः। **अटाट्येति**। यदा तु अटतेर्यङन्तादप्रत्ययादित्यकारस्तदाऽल्लोपे 'यस्य हलः' इति यलोपेऽटाटेति रूपं बोध्यम्। द्वित्वे हलादिःशेषे इति 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घप्रवृत्तेः। **जागर्तेरिति**। शे

पुत्रकाम्या । ३२८० गुरोश्च हलः । (३-३-१०३) गुरुमतो हलन्तास्त्रिया-मकारः स्यात् । ईहा । ऊहा । गुरोः किम् । भक्तिः । हलः किम् । नीतिः । 'निष्ठायां सेट इति वक्तव्यम्' (वा २२०८)। नेह । आप्तिः । 'तितुत्र—' (सू ३१६३) इति नेट् । दीप्तिः । 'तितुत्रेष्वग्रहादीनामिति वाच्यम्' (४३१३) निगृहीतिः । निपठितिः । ३२८१ षिद्भिदादिभ्योऽङ् । (३-३-१०४) षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् । जॄष्—जरा । त्रपूष्—त्रपा । भिदा—विदारण एवायम् । भित्तिरन्या । ('छिदा द्वैधीकरणे' । अन्यत्र छित्तिः छिद्रम् । गुहा

कारके इत्येव । **गुरोश्च हलः** । धातोरित्यनुवृत्तं हला विशेष्यते । तदन्तविधिः । हलन्तधातोर्गुरुत्वासंभवाद् गुरुमान् लक्ष्यते । तदाह **गुरुमत इति** । भावे अकर्तरि च कारके इत्येव । **निष्ठायामिति** । निष्ठायां परतो यः सेट्, तस्मादेव गुरुमतो हलन्तादकारप्रत्यय इत्यर्थः । **आप्तिरिति** । आप्धातोर्निष्ठायां सेट्त्वाभावाद् नायमकारप्रत्ययः, किंतु क्तिन्नेवेति भावः । दीप्तिरित्यत्र इटमाशङ्क्य आह **तितुत्रेति** । **तितुत्रेष्विति** । 'तितुत्रतथसिसु' इति सूत्रे अग्रहादीनामिति वाच्यमित्यर्थः । **निगृहीतिरिति** । इटि 'ग्रहोऽलिटि' इति दीर्घः । 'ग्रहिज्या' इति संप्रसारणम् । निगृहीतिः उपस्निहितिः निकुपितिः निपठितिः इति ग्रहादयो भाष्ये स्थिताः । **षिद्भिदादिभ्योऽङ्** । भावे अकर्तरि च कारके इत्येव । **जरेति** । ङित्वलक्षणं गुणनिषेधं बाधित्वा 'ऋदृशोऽङि' इति गुणः । **विदारण इति** । वार्तिकम् । विदारणं ऊर्ध्वविदलनम् । तस्मिन्नेवार्थे भिदेरङन्तमित्यर्थः । **छिदा द्वैधीकरण इति** । इदमपि वार्तिकम् । यथाकथंचित्तिर्यग्गतिर्यग्वा द्वैधीभावे एव छिदेरङन्तमित्यर्थः । छित्तिरित्यस्य विवरणम्—**छित्तिश्छिद्रमिति** । भिदिर् विदारणे, छिदिर् द्वैधीकरणे,

---

परतः सार्वधातुके यक् । 'जाग्रोऽविचिण्णल्—' इति गुणः । **गुरोश्च** । धातोरित्यनुवृत्त्या हल इति धातोर्विशेषणात्तदन्तविधौ हलन्तो धातुर्लभ्यते । न चायं गुरुरिति संभवति । अज्विषयो हि गुरुः, अतो मत्वर्थो लक्ष्यते तदाह **गुरुमत इति** । ननु विपरीत-मस्तु गुर्वन्ताद्धल इति तादृशस्यापि धातुर्डुक्रीञित्यादेः सत्त्वादिति चेन्मैवम् । 'नेष्ठायामनध्वनि' 'आशंसायां भूतवच्च' इति निर्देशेन विपरीतशङ्काया अप्रवृत्तेः । **षिद्भिदा** । कथं तर्हि 'मुखाब्जगन्धलब्धेः' इति माघः । 'प्रेक्षोपलब्धिः' इत्यमरश्च । षित्त्वादङि लभेत्येव हयुचितम् । सत्यम् । अनर्थकास्तु प्रतिवर्णमनुपलब्धेरिति भाष्य-प्रयोगाद्बाहुलकाद्वा क्तिन्नपि बोध्यः । विस्तरस्त्विह मनोरमायां बोध्यः । **भिदेति** । एवमादयोऽदन्ताः समुदाया एव गणे पठ्यन्ते तत्र ये प्रकृतिभागा भिदछिद इत्यादयस्ते

गिर्योषध्योः । अत्र गिरेरेकदेशो गिरिशब्देन विवक्षितः । अन्यत्र गूढिः । अन्यत्र आरा हारा कारा तारा धारा अत्र दीर्घत्वं निपात्यते । (आरा शस्त्र्यामिति वक्तव्यम् । आर्तिरन्या । आङोऽर्तेश्च क्तिन् । रेखा लेखा । अत्र गुणः । चूडा । (धारा प्रपात इति वक्तव्यम् | धृतिरन्या) मृजा । 'कृपेः संप्रसारणं च (गण ३२) कृपा । ३२८२ **चिन्तिपूजिकथिकुम्बिचर्चश्च** । (३-३-१०५) अङ् स्यात् । युचोऽपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । (चातुला)। ३२८३ **आतश्चोपसर्गे** (३-३-१०६) अङ् स्यात् । क्तिनोऽपवादः । प्रदा । उपदा ।

विद ज्ञाने, क्षिप प्रेरणे, गुह संवरणे, डु धाञ् धारणपोषणयोः, मिथृ मेथृ हिंसासेचनयोः ऋ गतौ, हृञ् हरणे, क्षि क्षये, क्षि निवासगत्योः, तॄ प्लवनतरणयोः, धृञ् धारणे, लिख अक्षरविन्यासे, चुद प्रेरणे, पीड अवगाहने, टु वप् बीजसन्ताने, कॄ विक्षेपे, वस निवासे, मृजू शुद्धौ, कृप कृपायाम् , इति भिदादिगणः। **गुहा गिर्योषध्योरिति** । वार्तिकम् । **गूढिरिति** । क्तिनि ढत्वधत्वष्टुत्वढलोपदीर्घाः । **आरा हारा कारा तारा धारा अत्रेति** । ऋ, हृ, कॄ, तॄ, धृञ् , एभ्यः अङि 'ऋदृशोऽङि गुणः' इति गुणे उपधाया दीर्घत्वं चेत्यर्थः । **आरा शस्त्र्यामिति** । वार्तिकम् । शस्त्री प्रतोदः तस्यामेव आरेत्यवन्तमित्यर्थः । ननु ऋधातोः क्तिनि ऋतिरित्येवोचितम्, न त्वार्तिरित्यत आह **आङोऽर्तेश्चेति** । आङ्पूर्वात् ऋधातोः क्तिनि 'उपसर्गादृति धातौ' इति वृद्धिरेकादेश इत्यर्थः । **रेखा लेखेति** । गणसूत्रम् । **गुण इति** । लिखेरङि उपधागुणः लकारस्य रेफश्चेत्यर्थः । **चूडेति** । गणसूत्रम् । **धारा प्रपात इति** । वार्तिकम् । द्रवद्रव्यप्रपातने इत्यर्थः । **कृपेः संप्रसारणं चेति** । गणसूत्रम् । कृप्धातुर्घटादौ अकारमध्यः । अत्र भाष्ये इष्टानां गणसूत्रत्वं विज्ञेयम् । **चिन्तिपूजि** । एते चुरादयः । तेभ्यो 'ण्यासश्रन्थो युच्' इति प्राप्ते अङ्विधिः । तदाह **युचोऽपवाद इति** । चिन्तेत्यादौ अङि णिलोपः । चकारोऽनुक्तसमुच्चयार्थः। अतस्तोलयतेरपि संग्रहः । तदाह **चातुलेति** । **आतश्चोपसर्गे** । **अङ् स्यादिति** । उपसर्गे उपपदे आदन्ताद्धातोरङ् स्यात् भावे अकर्तरि च कारके इत्यर्थः । **प्रदेति** । प्रपूर्वाद्दाधातोरङ् । 'आतो लोप इटि च' इत्याल्लोपः । एवमुपदा । ननु अदिति

आदिशब्देन सूत्रे निर्दिष्टाः । गणे विशिष्टपाठस्तु लोकप्रसिद्धार्थविशेषस्य क्वचिद्-लाक्षणिकार्थस्य संग्रहार्थः । **भित्तिरन्येति** । भिद्यत इति भित्तिः कुड्यम् । **छिदेति** । द्वैधीकरण एवायम् । अन्यत्र तु छित्तिश्छिदम् । **मृजेति** । मृजू शुद्धौ अस्याषित्त्वाद्भिदादौ पाठः । **चिन्तिपूजि** । चकारोऽनुक्तसमुच्चयार्थः । तेन तोलयते-स्तुलेति हरदत्तः । अत एव 'तुलां यदारोहति दन्तवाससा' इति नैषधकृदाह । **युचो-**

'श्रदन्तरोरुपसर्गवद्वृत्तिः' (वा ११३१—११४७)। श्रद्धा। अन्तर्धा। 'उपसर्गे घोः किः' (सू ३२७०) इत्यनेन किः। अन्तर्धिः। ३२८४ **ण्यासश्रन्थो युच्** (३-३-१०७) अकारस्यापवादः। कारणा। हारणा। आसना। श्रन्थना। 'घट्टिवन्दिविदिभ्यश्चेति वाच्यम्' (वा २२२२) घट्टना। वन्दना। वेदना। 'इषेरनिच्छार्थस्य' (वा २२२३) अन्वेषणा। 'परेर्वा' (वा २२२४)। पर्येषणा परीष्टिः। ३२८५ **रोगाख्यायां ण्वुल्बहुलम्।** (३-३-१०८) प्रच्छर्दिका वमिः। प्रवाहिका ग्रहणी। विचर्चिका पामा। क्वचिन्न। अर्दिः, शिरोऽर्त्तिः

अन्तरिति च अव्ययपूर्वाद्वाग्रः कथमङ्, तयोरुपसर्गत्वाभावादित्यत आह। **श्रदन्तरोरुपसर्गवद् वृत्तिरिति।** 'श्रच्छब्दस्य अङ्विधौ उपसर्गत्वं वाच्यम्' इति 'अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्' इति च वार्तिकात्तयोरुपसर्गत्वात्तत्पूर्वकाद्दादन्ताद्धातोरङ्प्रत्ययात्मककृत्प्रत्ययरूपा वृत्तिरित्यर्थः। वृत्तिरिति णत्वस्याप्युपलक्षणम्। तेन अन्तर्धा अन्तर्धिः अन्तर्णयतीत्यादीति दिक्। **ण्यास।** णि, आस, श्रन्थ्, एभ्यः स्त्रियां भावादिषु युच् स्यादित्यर्थः। **अकारस्येति।** 'अ प्रत्ययात्' इति विहितस्येत्यर्थः। **घट्टिवन्दीति।** अण्यन्तत्वाद्युचो विधिः। **वेदनेति।** लाभार्थाद्विदेर्युच्। व्याख्यानात्। 'विद ज्ञाने' इत्यस्य तु वित्तिः। 'विद वेदनाख्यानानिवासेषु' इति चुरादेस्तु 'ण्यासश्रन्थ' इति युचि वेदनेत्यपि। **इषेरनिच्छार्थस्येति।** युज्वक्तव्य इति शेषः। **अन्वेषणेति।** मार्गणे इत्यर्थः। इच्छायां तु अन्विष्टिः। **परेर्वेति।** परिपूर्वकादिषेर्युज्वेत्यर्थः। **परीष्टिरिति।** 'व्रश्च' इति षः। **रोगाख्यायाम्।** क्रियामित्येव। प्रच्छर्दिकेत्यस्य विवरणम्। **वमिरिति।** वमनमित्यर्थः। प्रवाहिकेत्यस्य विवरणम्। **ग्रहणीति।** अतिसारविशेषः। विचर्चिकेत्यस्य विवरणम्। **पामेति।** **क्वचिन्नेति।** ण्वुलिति शेषः। बहुलग्रहणादिति भावः। **अर्दिति।** अर्तिशब्दस्य 'अर्द हिंसायाम्' इति प्रकृतिदर्शनमिदम्।

ऽपवाद इति। 'ण्यासश्रन्थ-' इति वक्ष्यमाणस्येत्यर्थः। **आसनेति।** आस्यतेऽस्यामिति विग्रहः। 'ऋहलोर्ण्यत्' इति ण्यत्प्रत्यये त्वास्या। न च स्त्रीप्रत्यये वासरूपविधिर्नेति शङ्क्यम्। अपवादस्य युचः स्त्रीप्रकरणस्थत्वेऽपि उत्सर्गस्य ण्यतस्तदभावात्। **घट्टिवन्दि।** विदिर्लाभार्थो गृह्यते। ज्ञानार्थस्य तु संवित्तिः। **इषेरिति।** अनिच्छार्थस्य युच्। इच्छार्थस्य त्विषेरिच्छेत्येव। **रोगाख्या।** धातोर्बहुलं ण्वुल् स्यात्प्रत्ययान्तं चेद्रोगस्य संज्ञा। क्तिन्नादीनामपवादः। **प्रच्छर्दिकेति।** छर्द वमने। **प्रवाहिकेति।** प्रवाहयति मुहुर्मुहुः प्रवर्तयतीति प्रवाहिका ग्रहणी। **विचर्चिकेति।** चर्च अध्ययने। प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः। 'पाम पामा विचर्चिका' इत्यमरः।

'धात्वर्थनिर्देशे ण्वुल्वक्तव्यः' (वा २२२५)। आसिका। शायिका। 'इक्श्तिपौ धातुनिर्देशे' (वा २२२६)। पचिः पचतिः। 'वर्णात्कारः' (२२२७)। निर्देश इत्येव। अकारः। ककारः। 'रादिफः' (वा २२२८)। रेफः। 'मत्व-

---

शिरोऽर्त्तिरिति । शिरःपीडेत्यर्थः । अर्देः क्तिन् । 'तितुत्र' इति नेट्। **धात्वर्थनिर्देश इति** । धात्वर्थे निर्देष्टव्ये धातोः स्वार्थे ण्वुल् बहुलमित्यर्थः। क्रियामित्येव। **आसिका शायिकेति**। आसनं शयनमित्यर्थः। **इक् श्तिपाविति**। धातुस्वरूपे निर्देष्टव्ये इक्श्तिपौ वक्तव्यावित्यर्थः। धातुस्वरूपमेव वाच्यमिति फलितम्। **पचिः पचतिरिति** । पचधातुरित्यर्थः । श्तित्वेन सार्वधातुकत्वाच्छप् । अकर्तृकवाचकत्वेऽपि 'उपसर्गात्सुनोतिसुवति' इति निर्देशात् शबादिविकरणाः। शित्त्वसामर्थ्यादिति तु प्राञ्चः। तन्न, पिबतिः गायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या आत्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वादित्यलम्। अत्र स्त्रियामिति न संबध्यते। व्याख्यानात्। **वर्णात्कार इति**। वार्तिकम्। **निर्देश इत्येवेति**। अ, इ, उ, इत्यादिवर्णनिर्देशे कर्तव्ये वर्णानुकरणाद् अ, इ, उ, इत्यादिप्रातिपदिकात्स्वार्थे कार-प्रत्ययः स्यादित्यर्थः। **अकार इति**। अवर्ण इत्यर्थः। इह कारप्रत्ययस्य धातोर-विहितत्वेऽपि अधिकारबलात् कृत्संज्ञा। अतः प्रातिपदिकत्वात् सुबुत्पत्तिः। ककारस्य नेत्संज्ञा, प्रयोजनाभावात्। अनार्धधातुकतया आकार इत्यादौ आतो लोपाप्रसक्तेः। अनार्धधातुकत्वादेव नेट्। बहुलग्रहणानुवृत्तेः क्वचिन्न। 'अस्य च्वौ' इत्यादौ। **ककार इति**। कवर्ण इत्यर्थः। प्रकृतावकार उच्चारणार्थः। 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति 'उच्चैरुदात्तः' इति सूत्रभाष्यात्। क्वचित्संघातादपि कप्रत्ययः, यथा एवकार इत्यादौ, वषट्कार इति सूत्रनिर्देशात्, सर्वे चकाराः प्रत्या-ख्यायन्त इति भाष्याच्च। **रादिफ इति**। वाच्य इति शेषः। वाऽसरूपविधिना

शिरोर्तिरिति । शिरापीडा। अर्द हिंसायाम्। 'तितुत्र–' इति नेट्। **धात्वर्थ-निर्देश इति** । क्रियानिर्देश इत्यर्थः । **आसिका** । **शायिकेति**। आसनं शयनमित्यर्थः। **इक्श्तिपौ–**। धातोर्निर्देशोऽनुकरणम्। बहुलमित्यनुवृत्तेः क्वचिन्न। 'गुप्तिज्किद्भ्यः सन्' 'भुवो वुग्लुङ्लिटोः'। **पचतिरिति**। 'उपसर्गात्सुनोतिसुवति-स्यति–' 'ध्यायतेः संप्रसारणं च' इत्यादिनिर्देशादकर्तृवाचिन्यपि सार्वधातुके परे शबादयः । एवं भावकर्मवाचिन्यपि सार्वधातुके क्वचिद्यक्, 'विभाषा लीयतेः' इति यथा । तत्र हि लीलीङोर्यका निर्देशो न तु श्यनेत्युक्तम् । यत्तु प्राचा श्तिपः शित्करणसामर्थ्याच्छबादय इत्युक्तम्। तन्न। पिबतिर्ग्लायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या आत्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वात्। **वर्णादिति**। वर्णानुकरणादित्यर्थः। न

र्थाच्छः' (वा २२२९) । बहुलवचनादकारलोपः । मत्वर्थीयः । 'इणजादिभ्यः' (वा २२३०) । आजिः । आतिः । 'इञ्वपादिभ्यः' (वा २२३१) । वापिः । वासिः । स्वरे भेदः । इक्कृष्यादिभ्यः' (वा २२३२) कृषिः । गिरिः । ३२८६ संज्ञायाम् । (३-३-१०९) अत्र धातोर्ण्वुल् । उद्दालकपुष्पभञ्जिका । (वर-

---

कारप्रत्ययोऽपि । अत्र स्त्रियामित्यस्य अनुवृत्तेरनभ्युपगमेन अस्त्रियामिति निषेधाभावात् । **मत्वर्थाच्छ इति** । मत्वर्थशब्दात् स्वार्थे छप्रत्ययो वाच्य इत्यर्थः । ननु मत्वर्थीय इत्यत्र कथं 'यस्येति च' इत्यकारलोपः, अतद्धितपरत्वाद् अभत्वाच्चेत्यत आह **बहुलवचनादकारलोप इति । मत्वर्थीय इति** । मतोरर्थो यस्य प्रत्ययस्य स मत्वर्थः । स एव मत्वर्थीयः । 'तसौ मत्वर्थे' इत्यत्र तु बहुलग्रहणान्न । 'शैषिकान्मतुबर्थीयात्' इत्यत्र भवार्थे गहादित्वात् छो बोध्यः । **इणजादिभ्य इति** । वाच्य इति शेषः । स्त्रियामित्येव । (आजिरित्यत्र अजेर्वीभावमाशङ्क्य आह । **बहुलमिति**) । **इञ्वपादिभ्य इति** । वाच्य इति शेषः । स्त्रियामित्येव । ननु इणोऽनुवृत्त्यैव सिद्धे इञ्ग्रहणमनर्थकम् इत्यत आह । **स्वरे भेद इति** । 'ञ्नित्यादिर्नित्यम्' इति स्वरविशेष इञ्विधेः फलमित्यर्थः । **इक्कृष्यादिभ्य इति** । वाच्य इति शेषः । **कृषिरिति** । कित्वान्न लघूपधगुणः । **गिरिरिति** । गृधातोरिक् कित्वान्न गुणः । 'ॠत इद्धातोः' इति इत्वे रपरत्वम् ।

तु वर्णादुच्चार्यमाणादिति । तथा हि सत्यंकार इत्यादावेव स्यान्न तु ककार इत्यादौ । अत्र हि संघातस्योच्चारणात् । अनुकार्ये त्विह वर्णमात्रम् । अकारस्योच्चारणार्थत्वात् । कथं तर्हि समुच्चयार्थश्चकारः । एवकारोऽन्यनिवृत्त्यर्थ इत्यादिप्रयोगा इति चेदत्राहुः--क्वचित्सङ्घातादपि भवति 'उच्चैस्तरां वा वषट्कारः' इति सूत्रनिर्देशात् । सर्वे चकाराः प्रत्याख्यायन्ते भाष्यप्रयोगाद्बहुलवचनाच्चेति । इह कारप्रत्ययस्य धातोरविहितत्वेऽपि धात्वधिकारस्थत्वात्कृत्संज्ञा । तेन कृदन्तत्वात्प्रातिपदिकत्वम् । प्रयोजनाभावान्न ककारस्येत्संज्ञा । आर्धधातुकत्वाभावादिडागमो न । 'अस्य च्वौ' इत्यादौ तु कारप्रत्ययाभावो बाहुलकादेव । **रादिफ इति** । वासरूपविधिना कारोऽपि । तेन 'रकारादीनि नामानि शृण्वतो मम पार्वति' इत्यादिप्रयोगः साधुरेव । **अकारलोप इति** । अतद्धितपरत्वादभत्वाच्च 'यस्य--' इति लोपस्याप्राप्तिरिति भावः । कृदन्तत्वात्प्रातिपदिकत्वमिह पूर्ववद्बोध्यम् । 'तसौ मत्वर्थे' इत्यत्र बाहुलकाच्छो न । 'शैषिकान्मतुबर्थीयात्--' इत्यत्र तु बाहुलकादेव मतुबर्थशब्दाच्छः । अन्ये तु नैतत्कृदन्तं, मत्वर्थे भव इति विगृह्य गहादित्वाच्छप्रत्यये तद्धितान्तमेवेत्याहुः । **इणजा** । धात्वर्थनिर्देशे प्राप्तस्य ण्वुलोऽपवादोऽयम् । एवमग्रेऽपि । **आजिरिति** । बाहुलकादजेर्वीभावो न ।

णपुष्पप्रवाहिका। अभ्यूषखादिका। अभ्यूषः पूरिका अपूपविशेषः)। ३२८७ **विभाषाख्यानपरिप्रश्नयोरिञ्च**। (३-३-११०) परिप्रश्ने आख्याने च गम्ये इञ् स्यात्। चात् ण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्येऽपि। कां त्वं कारिं-कारिकां-क्रियां-कृत्यां-कृतिं वा अकार्षीः। सर्वां कारिं-कारिकां-क्रियां-कृत्यां-कृतिं वा अकार्षम्। एवं गणिं-गणिकां-गणनाम्। पाचिं-पाचिकां-पचां-पक्तिम्। इज्याम्-इष्टिम्। ३२८८ **पर्यायार्हर्णोत्पत्तिषु ण्वुच्**। (३-३-१११) पर्यायः परिपाटी क्रमः। अर्हणमर्हः योग्यता। पर्यायादिषु द्योत्येषु ण्वुज्वा

संज्ञायाम्। **वरणेति**। वरणः वृक्षविशेषः। वारणान्यहोमार्थानीत्यादौ याज्ञिकानां प्रसिद्धः। अभ्यूष इत्यस्य विवरणम्। **पूरिकेति**। तस्यापि विवरणम्। **अपूपविशेष इति**। 'समितावेसने जीरहिङ्गुमारीचयोजिते। घृताक्ते जलसंयुक्ते पीठस्योपरि वेल्लिते। घृतेन वाथ तैलेन भर्जिता पूरिका मता।' इति भोजनकौतूहले तल्लक्षणात्। **विभाषाख्यान**। स्त्रियामित्येव। पूर्वं परिप्रश्नः पश्चादुक्तकथनमाख्यानम्। अल्पाच्तरत्वादाख्यानशब्दस्य पूर्वनिपातः। तदाह। **परिप्रश्न इति**। वाऽसरूपविधिना सिद्धे विभाषाग्रहणं व्यर्थमित्यत आह। **विभाषोक्तेरिति**। स्त्रियां वाऽसरूपविधेरप्रवृत्त्या विभाषाग्रहणाभावे इञ्ण्वुलावेव स्याताम्। न तु प्रत्ययान्तरमित्यर्थः। परिप्रश्ने उदाहरति। **कां त्वमिति**। कां त्वं कारिमकार्षीरित्यन्वयः। इञि रूपम्। एवं कारिकामित्यादावपि कां त्वमित्यस्य कार्षीरित्यस्य चान्वयो बोध्यः। **कारिकामिति**। ण्वुलि रूपम्। क्रियामित्यत्र 'कृञः श च' इति शः। कृत्यामित्यत्र 'कृञः श च' इति चकारात् क्यपि तुक्। कृतिमित्यत्र क्तिन् 'कृञः श च' इति चकारादित्युक्तम्। आख्याने उदाहरति। **सर्वां कारिमित्यादि**। अत्रापि सर्वां कारिमित्यादिपञ्चसु सर्वामित्यस्य अकार्षमित्यस्य चान्वयः। **एवं गणिमिति**। अत्रापि काममकार्षीः सर्वामकार्षमिति प्रश्नप्रतिवचनानि योज्यानि। गणधातोरदन्तात् चुरादिणिजन्तादिञादि। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। **गणनामिति**। 'ण्यासश्रन्थः' इति युच्। अत्र क्तिन् तु न, युचा बाधात्। पचामित्यत्र षिद्भिदादिभ्यः' इति षित्वादङ्। इज्यामित्यत्र 'व्रजयजोर्भावे' इति क्यप्। 'वचिस्वपि' इति संप्रसारणम्। इष्टिरित्यत्र यजेः क्तिन्,

---

संज्ञायाम्। अधिकरणे ण्वुलर्थोऽयमारम्भः। उद्दालकः श्लेष्मातकः तस्य पुष्पाणि भज्यन्ते यस्यां क्रियायां सा तथा। भञ्जनं भञ्जिका। भावे ण्वुल्। उद्दालकपुष्पाणां भञ्जिकेत्यन्ये॥ सूत्रे आख्यानशब्दस्याल्पाच्तरत्वेन पूर्वनिपाते कृते व्याख्यानस्य प्रश्नपूर्वकतयार्थप्राप्तक्रममनुसृत्य व्याचष्टे **परिप्रश्ने आख्याने चेति**। **परिपाटीति**।

स्यात् । भवत आसिका । शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋणे-इक्षुभक्षिकां मे धारयसि । उत्पत्तौ—इक्षुभक्षिका उदपादि । ३२८६ आक्रोशे नञ्यनिः । (३-३-११२) विभाषेति निवृत्तम् । नञ्युपपदेऽनिः स्यादाक्रोशे । अजीवनिस्ते शठ भूयात् । अप्रयाणिः । 'कृत्यल्युटो बहुलम्'

ण्वुचेति णः । **पर्यायार्ह** । पर्यायशब्दस्य विवरणम् । **परिपाटीति** । तस्यापि विवरणम् । **क्रम इति** । परिपूर्वात्पटेः क्रमर्थादिणजादिभ्य इति स्त्रियां भावे इण् । 'कृदिकारादक्तिनः' इति ङीष् । **अर्हणमर्ह इति** । भावे घञिति भावः । **घोत्पत्ते-ष्विति** । भाव एवार्थे प्रत्यय इति भावः । क्रमे उदाहरति । **भवत आसिकेति** । आदौ आसनं ततः शयनं ततोऽग्रगमनमित्यर्थः' अर्हे उदाहरति । **भवानिति** । 'ऋणे' इत्युदाहरणसूचनम् । इक्षुभक्षणमृणत्वेन धारयसीत्यर्थः । 'उत्पत्तौ' इत्युदाहरणसूचनम् । **उदपादीति** । उत्पन्नेत्यर्थः । उत्पूर्वात्पदेः कर्तरि लुङि 'चिण् ते पदः' इति चिण् । **आक्रोशे नञ्यनिः । निवृत्तमिति** । व्याख्यानादिति भावः । **अजीवनिरिति** । अजीवनमित्यर्थः । **अप्रयाणिरिति** । अप्रयाणमित्यर्थः । क्तिन् तु न भवति । अनिना बाधात् । स्त्रियां वाऽसरूपविधेरभावात् । विभाषानुवृत्तौ क्वचित्क्तिन् स्यादिति भावः । इति स्त्र्यधिकारः । **कृत्यल्युटो बहुलम्** । कृत्यसंज्ञकाः प्रत्ययाः 'तयोरेव कृत्यक्तखलर्थाः' इति भावे कर्मणि च विहिताः ।

पट गतौ परिपूर्वः । 'इणजादिभ्यः' इतीण् । 'कृदिकारात्—' इति ङीष् । **आक्रोशे** । आक्रोशः शापः । नपुंसके भावे क्तः । ननु 'तयोरेव कृत्यक्तखलार्थाः' इति लिङ्गत्रयसाधारण्येन भावकर्मणोः कृत्यादिविधानात्तेनैव नपुंसके भावे क्तः सिध्यति किमनेन पुनर्विधानेनेति चेत्, अत्राहुः—भूते इत्यधिकृत्य 'निष्ठा' इति सूत्रेण विहितस्य क्तस्य भावोऽर्थः 'तयोरेव'—इति सूत्रेण विहितः, अनेन तु कालसामान्ये नपुंसके भावे क्तो विधीयते । एवं च स्वविषये परत्वाद् घञादीनां बाधक इति परिशेषादेवैषां पुंविषयत्वं सिध्यति । किंच इह भावे चाकर्मकेभ्य इत्यस्यासन्निधानात्सकर्मकेभ्योऽप्ययं भवति घञादिवत् । 'गतं तिरश्चीनमनूरुसारथेः' इत्यादिदर्शनात् । तथा च नास्त्येव शङ्केति । नन्वेवं क्तयोगे कर्मणि द्वितीया स्यात् क्तयोगलक्षणषष्ठ्या 'न लोका—' इति निषेधात् । एवं च घटं कृतं वृक्षं भिन्नमित्यादि प्रसज्येत । अनूरुसारथेरित्यत्र तु कर्तरि तृतीया नापद्यते, कारकषष्ठ्या निषेधेऽपि शेषत्वविवक्षया षष्ठीति समाधानसंभवादिति चेन्मैवम् । नपुंसके भावे क्तस्य योगे षष्ठ्या लुक उपसंख्यातत्वात्कर्मणि द्वितीयाया अभावात् । शेषत्वविवक्षामाश्रित्य वार्तिकमिदं प्रत्याख्यातमाकरे इति चेत्तर्हि तत्प्रामाण्यात्प्रायेण शेषत्वविवक्षैवेत्यस्तु । तथा च घटं कृतमित्यादि तु न प्रसज्यत एव । कश्चित्तु

(सू २८४) भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तम् । राज्ञा भुज्यन्ते राजभोजनाः शालयः । 'नपुंसके भावे क्तः' (सू ३०१०)। ३२६० ल्युट् च। (३-३-११५) हसितम् हसनम्। योगविभाग उत्तरार्थः। ३२६१ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्। (३-३-११६) येन कर्मणा स्पृश्यमानस्य कर्तुः शरीरस्य सुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात्। पूर्वेण सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम्। (ओदनभोजनं सुखम्। नन्वत्र पानादेव सुखम्। चन्दनानुलेपनं सुखमितिवत्। सत्यम्। यत्र संस्पर्शं विना सुखाभावस्तदर्थकत्वात्। यत्र साक्षात्परम्परया वा सुखं तत्रेति यावत्)।

करणे अधिकरणे भावे च ल्युड् विहितः । ततोऽन्यत्रापि कृत्यल्युटः स्युरित्यर्थः। स्नानीयं चूर्णम्। करणे अनीयर् इति सिद्धवत्कृत्य ल्युटि उदाहरति। **राज्ञेति।** कर्मणि ल्युडिति भावः। **नपुंसके भावे क्तः।** इदं सूत्रं 'निष्ठा' इति सूत्रप्रस्तावे प्रागेव प्रसङ्गाद् व्याख्यातं मूले। इह तु क्रमप्राप्तत्वात् पुनरुपन्यस्तम्। **ल्युट् च।** चात् क्तः। नपुंसके भावे इत्येव। ननु 'नपुंसके भावे क्तल्युटौ' इत्येव सिद्धे योगविभागो व्यर्थ इत्यत आह। **योगेति।** कर्मणि च येनेत्युत्तरसूत्रे ल्युट एवानुवृत्त्यर्थ इत्यर्थः। **कर्मणि च येन।** संस्पर्शशब्दः कृदन्तः, कृद्योगे कर्तुरिति कर्मणि षष्ठी। येनेति कर्तरि तृतीया। 'उभयप्राप्तौ कर्मणि' इति नियमात्। **येन कर्मणेति। कर्तुः शरीरस्येति।** शरीरावच्छिन्नस्येत्यर्थः। अर्धर्चादित्वाच्छरीरशब्दः पुंलिङ्गोऽपि। तेन कर्तृण इत्येव भाव्यमिति निरस्तम्। **ल्युट् स्यादिति।** भावे नपुंसके इति शेषः। **पूर्वेणेति।** 'ल्युट् च' इति पूर्वसूत्रेणेत्यर्थः। **नित्येति।** उपपदसमासार्थमित्यर्थः। तस्य नित्यत्वात्। **पयःपानं सुखमिति।** पयसा स्पृश्यमानशरीरावच्छिन्नस्य सुखजनकमित्यर्थः। उदाहरणान्तरमाह। **ओदनभोजनं सुखमिति।** शङ्कते। **अत्र पानादिति।** पानादेव सुखम्, न तु संस्पर्शनेनेत्यर्थः। भोजनादित्यपि द्रष्टव्यम्। तत्र दृष्टान्तमाह। **चन्दनानुलेपनं सुखमितिवदिति।** तथा च पयसा ओदनेन च स्वरूपतस्तावद्देवदत्तसुखाभावात् कथमिदमुदाहरणमिति भावः। समाधत्ते। **सत्यमिति। यत्र संस्पर्शमिति।** यत्र विषये संस्पर्शं विना स्वरूपतैव सुखं नोत्पद्यते तादृशविषयोपलक्षणं संस्पर्शग्रहणमित्यर्थः। फलितमाह। **यत्रेति।** स्पर्शनेन यत्र सुखं यथा चन्दनानुलेपनं सुखमिति, यत्र

द्वितीयापि दृश्यते 'भ्रान्तं देशमनेकदुर्गविषमम्' इति दिक्। **कर्मणि च।** कर्तुरिति कर्मणि षष्ठी 'उभयप्राप्तौ कर्मणि' इति नियमाद्येनेति तृतीया तदाह **येन स्पृश्यमानस्य कर्तुरिति। ल्युट् स्यादिति।** नपुंसके भावे इति बोध्यम्। अतएवाह

कर्तुरिति किम् । गुरोः स्नापनं सुखम्, नेह गुरुः कर्ता, किंतु कर्म । (कर्मणीति किम् । तूलिकाया उत्थानं सुखम् । अग्निकुण्डस्य सेवनं सुखम् । प्रत्युदाहरणेष्वसमासः) । **३२९२ वा यौ ।** (२-४-५७) अजेर्वी वा स्याद्यौ । प्रवयणम् । प्राजनम् । **३२९३ करणाधिकरणयोश्च ।** (३-३-११७) ल्युट् स्यात् । इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली । खलः प्राक्करणाधिकरणयोरित्यधिकारः । **३२९४ अन्तरदेशे ।** (८-४-२४) अन्तःशब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । तपरः किम् । अन्तरघानि **३२९५ अयनं च** (८-४-२५) अयनस्य णोऽन्तःशब्दात्परस्य । अन्तरयणम् । अदेश इत्येव । अन्तरयनो देशः । **३२९६ पुंसि संज्ञायां घः प्रायेण** (३-३-११८) **३२९७ छादेर्घेऽद्व्युपसर्गस्य** (६-४-९६) द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे । दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः । प्रच्छदः । अद्वीति किम् । समुपच्छादः । आकुर्वन्त्यस्मिन्नाकरः । **३२९८ गोच-**

संस्पर्शपूर्वकपानादेर्वा सुखम् यथा पयःपानं सुखमित्यादौ, तत्र सर्वत्रास्य प्रवृत्तिरित्यर्थः। **तूलिकाया उत्थानं सुखमिति** । अत्र न कर्मोपपदमिति भावः । **अग्निकुण्डस्येति** । शीतकाल इति शेषः । अत्राग्निकुण्डेन संस्पर्शो नास्ति, दाहप्रसङ्गादिति भावः । ननु तूलिकाया उत्थानम् इत्यादिप्रत्युदाहरणेषु पूर्वसूत्रेण ल्युट् स्यादेवेति कर्मणीत्यादि व्यर्थमित्यत आह । **प्रत्युदाहरणेष्विति । असमास इति ।** नित्यस्योपपदसमासस्याभाव इत्यर्थः । **करणाधिकरणयोश्च** । अर्थनिर्देशोऽयं, न तूपपदं, व्याख्यानात् । अजपौ परत्वादयं बाधते । तदुक्तम् 'अजब्भ्यां स्त्री खलनाः स्त्रियाः खलनौ विप्रतिषेधेन' इति । **इध्मप्रव्रश्चन इति** । प्रवृश्च्यतेऽनेनेत्यर्थे ल्युट् । इध्मस्य प्रव्रश्चन इति विग्रहः । **गोदोहनीति** । दुह्यतेऽस्यामित्यर्थे ल्युट् । गोदोहनीति विग्रहः । **खलः प्रागिति** । व्याख्यानादिति भावः । **पुंसि** । करणाधिकरणयोरित्येव । पूर्वसूत्रापवादः । **छादेर्घे** । 'अद्व्युपसर्गस्य' इति छेदः । **ह्रस्वः स्यादिति** । 'खचि ह्रस्वः' इत्यतस्तदनुवृत्तेरिति भावः । णिच्प्रकृतिभूतस्य छाद उपधाया इति शेषः । 'ऊदुपधायाः' इत्यतस्तदनुवृत्तेः । एतेन णेरेव ह्रस्वः तत्सामर्थ्यात्तस्य

पूर्वेणेति । ल्युट् चेत्यनेनेत्यर्थः । **नेहेति** । स्नानकर्तृत्वेऽपि स्नापने न गुरुः कर्ता किंतु शिष्य इत्यर्थः । शरीरग्रहणं किम् । पुत्रस्य परिष्वजने सुखम् । मानसी प्रीतिरत्र । **करणाधिकरणयोः** । येन नाप्राप्तिन्यायेन घञोऽपवादोयमजपौ स्त्रीप्रत्ययांश्च परत्वाद् बाधते । उक्तं हि–'अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन' इति । **इध्मेति** । इध्मानि प्रवृश्च्यन्ते येन, गौर्दुह्यते यस्यामिति विग्रहः । **आकुर्वन्तीति** ।

रसंचरवहव्रजव्यजापणनिगमाश्च । (३-३-११९) घान्ता निपात्यन्ते । 'हलश्च' (सू ३३००) इति वक्ष्यमाणस्य घञोऽपवादः । गावश्चरन्त्यस्मिन्निति गोचरो देशः । संचरन्त्यनेन संचरो मार्गः । वहन्त्यनेन वहः स्कन्धः । व्रजः । व्यजस्तालवृन्तम् । निपातनाद्वीभावो न । आपणः पण्यस्थानम् । निगच्छन्त्यनेन निगमः छन्दः । चात्कषः । निकषः । **३२९९ अवे तॄस्त्रोर्घञ्** । (३-३-१२०) अवतारः कूपादेः । अवस्तारो जवनिका । **३३०० हलश्च** । (३-३-१२१) हलन्ताद्घञ्स्यात् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः । विमार्गः समूहनी । **३३०१ अध्यायन्यायोद्यावसंहाराश्च** (३-३-१२२) अधीयतेऽस्मिन्नध्यायः । नियन्त्युद्युवन्ति संहरन्त्यनेनेति विग्रहः । 'अवहाराधारावायानामुपसंख्यानम्' (वा २२३६)। **३३०२ उदङ्कोऽनुदके** । (३-३-१२३) उत्पूर्वादञ्चतेर्घञ्स्यात् न तूदके । घृतमुदच्यत उद्ध्रियतेऽस्मिन्निति घृतोदङ्कश्चर्ममयं भाण्डम् । अनुदके किम् । उदकोदञ्चनः । **३३०३ जालमानायः** । (३-३-१२४) आनीयन्ते मत्स्या-

लोपो नेति परास्तम् । **गोचर** । ननु 'पुंसि संज्ञायां घः' इत्येव सिद्धे किमर्थमिदमित्यत आह—**हलश्चेति** **वक्ष्यमाणस्येति** । **चात्कषः इति** । व्याख्यानादिति भावः । **अवे तॄस्त्रोर्घञ्** । अवेत्युपसर्गे उपपदे तॄ स्तॄ आभ्यां घञ् स्यात् पुंसि संज्ञायां प्रायेणेत्यर्थः । **घापवाद इति** । 'पुंसि संज्ञायाम्' इति विहितस्य घस्यापवाद इत्यर्थः । **हलश्च** । स्पष्टम् । **अध्याय** । अधिपूर्वक इङ्, निपूर्वक इण्, उत्पूर्वकः युधातुः, संपूर्वको हृञ्, एते घञन्ता निपात्यन्ते । 'पुंसि संज्ञायाम्' इति घापवादः । **अवहारेति** । अवहारः, आधारः, आवायः, एषां घञन्तानां निपातनस्योपसंख्यानमित्यर्थः । **उदङ्कोऽनुदके** । घस्यापवादः । **घृतोदङ्क इति** । 'चजोः कु घिण्ण्यतोः' इति कुत्वम् । **जालमानायः** । जालं वाच्यं चेद् आनाय इति घञन्तमित्यर्थः ।

एत्य कुर्वन्त्यस्मिन् व्यवहारमित्याकर उत्पत्तिस्थानम् । **अवे-** । अवे उपपदे तॄस्तॄभ्यां करणाधिकरणयोः पुंसि संज्ञायां घञ् स्यात् । घस्यापवादः । **अवहारेत्यादि** । वृत्तिकारस्त्वाधारावायशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं संजग्राह तदसंबद्धमिति स्पष्टमेव । **उदङ्क** । 'हलश्च' इत्येव सिद्धे उदकप्रतिषेधार्थमिदम् । **उदकोदञ्चन इति** । 'पुंसि संज्ञायाम्' इति घे प्राप्ते घञ्विहितः । उदके तु घञि प्रतिसिद्धे घ एव स्यान्न तु ल्युडिति चेन्नैवम् । प्रतिषेधसामर्थ्याद् घस्याप्यप्रवृत्तेः । न हि इह घे घञि वा रूपे विशेषोऽस्ति । न च स्वरे विशेषः । घे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तता घञ्यपि थाथादिस्वरेण तथैवेति । **जालमा** । जल धान्ये । 'ज्वलिति-

द्यतेऽनेनेत्यानायः । जालम् इति किम् । आनयः । ३३०४ **खनो घ च ।** (३-३-१२५) चाड्ड्य् । आखनः आखानः । घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम् । तेन भजेः भगः पदम् । करणे घः । खल सञ्चये । अधिकरणे घः । खल इत्यादि । 'खनेर्डडरेकेकवका वाच्याः' (वा २२३८) आखः-आखरः-आखनिकः-आखनिकवकः । एते खनित्रवचनाः । ३३०५ **ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।** (३-३-१२६) करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खलस्यात् । 'तयोरेव-' (सू २८३३) इति भावे कर्मणि च । कृच्छ्रे-दुष्करः कटो भवता । अकृच्छ्रे-भवता ईषत्करः । सुकरः । 'निमिमीलियां खलचोरात्वं नेति वाच्यम्' (वा ३४८७) ईषन्निमयः ।

खनो घ च । घ इति लुप्तप्रथमाकम् । खनो घञ् स्यात् घश्चेत्यर्थः । नन्वत्र घित्करणं व्यर्थम्, चजोरभावेन कुत्वस्याप्रसक्तेरित्याशङ्क्य आह **घित्करणमिति ।** **भजेर्भग इति ।** भज्यते इति कर्मणि घः । **पदमिति ।** पद्यते गम्यतेऽनेनेति विग्रहः । **खनेरिति ।** ड, डर, इक, इकवक, एषां चतुर्णां द्वन्द्वः । **आख इति ।** डे रूपम् । **आखर इति ।** डरे रूपम् । उभयत्रापि डित्त्वसामर्थ्याट्टिलोपः । इके उदाहरति **आखनिक इति ।** इकवके उदाहरति **आखनिकवक इति ।** **ईषद्दुःसुषु । निवृत्तमिति ।** व्याख्यानादिति भावः । तर्हि 'कर्तरि कृत्' इति कर्तरि स्यादित्यत आह **तयोरेवेति ।** इह दुरिति कृच्छ्रार्थे एवान्वेति अकृच्छ्रार्थे तु ईषदिति सु इति चान्वेति । योग्यताबलात् । तदेतदाह **कृच्छ्रे दुष्कर इत्यादिना ।** **भवतेति ।** 'न लोक' इति षष्ठीनिषेधात् कर्तरि तृतीया । कृच्छ्रेत्यादि किम् । ईषत्कार्यम् । अल्पमित्यर्थः । **निमीति ।** निपूर्वो मिञ्, मीनातिः, लीङ्, एषामित्यर्थः । 'मीनातिमिनोतिदीङां ल्यपि च' 'विभाषा लीयतेः' इति प्राप्तमात्वं खलचोर्निषिध्यते । खलि उदाहरति **ईषन्निमय इत्यादि ।** 'एरच्' इत्यचि उदाहरति

कसन्तेभ्यो णः' इति णप्रत्यये जालशब्दः सिद्धः । तेन जलशब्दोऽत्र निपात्यत इति न भ्रमितव्यम् । **खनो ।** **घित्करणमिति ।** आखन इत्यादौ 'चजोः-' इति कुत्वस्य प्रसक्त्यभावादिति भावः । **भगः । पदमिति ।** ननु पदमित्यत्र घस्य किं प्रयोजनमिति चेदत्राहुः—'करणाधिकरणयोः' 'पुंसि संज्ञायाम्-' इति यदि घः स्यात्तदा पदमिति नपुंसकं न स्यात्, अनेन चेत घो भवति तदा त्विष्टसिद्धिरिति । **एते इति ।** आखनादयः षडित्यर्थः । **ईषद्दुःसुषु ।** इह सामान्योक्तावपि योग्यताबलाद्विशेषणस्य विषयविभागो लभ्यते, दुरिति कृच्छ्रार्थे । इतरौ त्वकृच्छ्रार्थे । तदेतद्दर्शयति । **कृच्छ्रे । दुष्कर इत्यादिना । भवतेति ।** 'न लोका-' इति

दुष्प्रमयः। सुप्रमयः। निमयः। मयः। लयः। ३३०६ **उपसर्गात्खल्घञोः** (७-१-६७) उपसर्गादेव लभेर्नुम् स्यात्। ईषत्प्रलम्भः। दुष्प्रलम्भः। सुप्रलम्भः। उपालम्भः। उपसर्गात् किम्। ईषल्लभः। लाभः। ३३०७ **न सुदुर्भ्यां केवलाभ्याम्।** (७-१-६८) उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम्न स्यात्खल्घञोः। सुलभम्। दुर्लभम्। केवलाभ्याम् किम्। सुप्रलम्भः। अतिदुर्लम्भः। कथं तर्हि अतिसुलभमतिदुर्लभमिति। यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति। ३३०८ **कर्तृकर्मणोश्च भूकृञोः।** (३-३-१२७) कर्तृकर्मणोरीषदादिषु च भूकृञोः खल् स्यात्। 'यथासख्यं नेष्यते'। कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये।

निमय इत्यादि। **उपसर्गात्खल्घञोः।** **लभेर्नुमिति।** 'लभेश्च' इत्यतः 'इदितो नुम्' इत्यतश्च तदनुवृत्तिरिति भावः। **न सुदुर्भ्याम्।** केवलाभ्यामित्येतद् व्याचष्टे–**उपसर्गान्तरेति।** **सुप्रलम्भः अतिदुर्लम्भ इति।** अत्र सुदुरोरुपसर्गान्तरसहितत्वात् पूर्वसूत्रप्राप्तस्य न निषेधः। **कथं तर्हीति।** सुदुरोरुपसर्गान्तरसहितत्वेन नुमोऽनिषेधादिति भावः। समाधत्ते **यदेति।** 'स्वती पूजायाम्'। यदा पूजार्थकाविमौ कर्मप्रवचनीयौ तदा उपसर्गत्वाभावाद् न सुदुरोरुपसर्गसहितत्वम्। अतो निषेधो भविष्यतीति भावः। सोः पूजार्थतया उपसर्गत्वाभावात् पूर्वसूत्रान्न तत्र प्राप्तिरित्यपि बोध्यम्। **कर्तृकर्मणोश्च।** कर्तृकर्मणोरिति सप्तमी। उपपदयोरिति लभ्यते, व्याख्यानात्। चकारादीषद्दुस्सुष्विति समुच्चीयते। भूकृञोरिति पञ्चम्यर्थे षष्ठी। तदाह **कर्तृकर्मणोरीषदादिषु चोपपदेष्विति।** अत्र कर्तृकर्मणोरन्यतरस्मिन् ईषद्दुःसुनामन्यतमे च इत्युभयस्मिन् समुच्चिते उपपदे इत्यर्थो विवक्षितः। न तु प्रत्येकमुपपदत्वम्, व्याख्यानात्। भाष्ये तथैवोदाहरणाच्च। **नेष्यत इति।**

षष्ठीनिषेधात्कर्तरि तृतीया। कृच्छ्रेत्यादि किम्। ईषत्कार्यम्, स्वल्पं कार्यमित्यर्थः। **खलिति।** लकारः स्वरार्थः। खित्करणं तूत्तरत्र मुमर्थम्। **निमिमीति।** 'मीनातिमिनोतिदीङां ल्यपि च' 'विभाषा लीयतेः' इति प्राप्तं निषिध्यते। **नियम इत्यादि।** एरच्। **उपसर्गात्खल्घञोः।** 'लभेश्च' इत्यनेनैव सिद्धे नियमार्थमिदमित्याह। **उपसर्गादेवेति।** **तदा स्वती इति।** 'सुः पूजायाम्', 'अतिरतिक्रमणे च' इति तयोः कर्मप्रवचनीयत्वम्। **कर्तृकर्मणोः।** चकारः संनियोगार्थः। यदा कर्तृकर्मणोरीषदादीनां च युगपत्प्रयोगस्तदैव प्रत्ययो यथा स्यात्। न च कर्तृकर्मणोः प्रत्ययार्थत्वमेवास्तु न तूपपदत्वमिति वाच्यम्। ईषदादीनामेवोपपदत्वे तु खलः खित्त्वस्य वैयर्थ्यापत्तेः मुमर्थं हि तत्। मुम् चानव्ययस्य विधीयते तस्मात्कर्तृकर्मणोरिति उपपदत्वमेव। तदेतदाह। **ईषदादिषु चेति।** कर्तृकर्मणी द्वे भूकृञौ च द्वौ तयोर्यथासंख्यं प्राप्तम्। स्वीकृतं च काशिकाकृता न्यासकारहरदत्तादिभिश्च,

ईषदादयस्तु ततः प्राक् । 'कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्' (वा २२४१) । खित्वा-न्मुम् । अनाढ्येन आढ्येन दुःखेन भूयते दुराढ्यंभवम् । ईषदाढ्यंभवम् । स्वाढ्यंभवम् । ईषदाढ्यंकरः । दुराढ्यंकरः । स्वाढ्यंकरः । च्व्यर्थयोः किम् । आढ्येन सुभूयते । ३३०९ **आतो युच्** । (३-३-१२८) खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' (वा २२४३) । दुःशासनः । दुर्योधन इत्यादि । ३३१० **षात्पदान्तात्** । (८-४-३५) नस्य णो न । निष्पानम् । सर्पिष्पानम् । षात् किम् । निर्याणः । पदा-न्तात् किम् । पुष्णाति । पदे अन्तः पदान्तः इति सप्तमीसमासोऽयम् । तेनेह न । सुसर्पिष्केण । ३३११ **आवश्यकाधमर्ण्ययोर्णिनिः** । (३-३-१७०) अवश्यंकारी । शतंदायी । ३३१२ **कृत्याश्च** । (३-३-१७१) आवश्यकाध-

---

भूकृञोः कर्तृकर्मणोरित्यस्य च न यथासंख्यमित्यर्थः । ननु कर्तृकर्मणोरस्य ईषदादी-नामन्यतमस्य च उपपदस्य प्रयोगसंनिपाते कथं पौर्वापर्यमित्यत आह **कर्तृकर्मणी चेत्यादि** । भाष्ये तथैवोदाहरणादिति भावः । **च्व्यर्थयोरिति** । अभूततद्भाव इत्यर्थः । **भूयत इति** । भावे लट् । **दुराढ्यंभवमिति** । भावे खल् । अत्रा-ढ्यस्य दुरुपपदस्य भूधातोः प्रागव्यवधानेन प्रयोगः । दुरस्तु ततः प्राक् । **दुराढ्यंकर इति** । अनाढ्यः आढ्यः दुःखेन क्रियते इत्यर्थः । अत्र आढ्यः कर्म उपपदम् । ईषदाढ्यंभवमित्याद्यप्युदाहार्यम् । अत्र ईषद्दुस्सुनां व्यवहितत्वात् पूर्वसूत्रेणाप्राप्ताविद-मारब्धमिति बोध्यम् । **आतो युच्** । कर्तृकर्मणोरिति नानुवर्तते, अस्वरितत्वात् । ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु आदन्ताद्धातोर्युच् स्यादित्यर्थः । तयोरेवेति भावे कर्मणि च । **खलोऽपवाद इति** । वाऽसरूपविधिस्तु न भवति 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्न' इत्युक्तेः । **दुष्पान इति** । 'इदुदुपध' इति षः । **भाषायामिति** । 'छन्दसि गत्यर्थेभ्यः' 'अन्येभ्योऽपि दृश्यन्ते' इत्युत्तरमिदं वार्तिकम् । ईषद्दुस्सुष्वित्येव । खलोऽपवादः । इति । खलर्थाः प्रत्ययाः । **आवश्यकाधमर्ण्ययोर्णिनिः** । कर्तरि

प्राचापि तथैवोक्तं, तद्व्याख्यातृभिश्चानुमोदितं, तत्सर्वं नादर्तव्यम् । यथासंख्यसूत्रस्थ-भाष्यविरोधादिति ध्वनयन्नाह । **यथासंख्यं नेष्यत इति** । ननूपपदयोर्मध्ये पूर्वा-परीभावव्यवस्था न सिध्यति भूकृञोरव्यवहितत्वं कर्तृकर्मणोरेवेष्यते न त्वीषदादी-नाम् । एवं च कथमत्रेष्टव्यवस्था सिध्यतीति चेदत्राहुः—बहुलग्रहणानुवृत्त्या दुराढ्यं-भवमिति भाष्योदाहरणाच्चेष्टव्यवस्था सिध्यतीति तदेतदभिप्रेत्याह । **कर्तृकर्मणी चेति** । भवतेः कर्तयुदाहरति । **अनाढ्येनाढ्येनेति** । कर्मणि त्वनाढ्य आढ्यो भूयते इति विग्रहः । भाव्यते इति तदर्थः । एवमग्रेऽपि विग्रहद्वयमुन्नेयम् । अनाढ्ये-नाढ्येन स्वयमेव क्रियते अनाढ्य आढ्यः क्रियत इति । **इत्यादीति** । आदिशब्देन

मयर्थयोरित्येव। अवश्यं हरिः सेव्यः। शतं देयम्। **३३१३ क्तिच्क्तौ च संज्ञायाम्।** (३-३-१७४) धातोः क्तिच्क्तश्च स्यादाशिषि संज्ञायाम्। 'तितुत्र—' (सू ३११३) इति नेट्। भवताद्भूतिः। **३३१४ न क्तिचि दीर्घश्च।** (६-४-३९) अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे। यन्तिः। रन्तिः। वन्तिः। तन्तिः। **३३१५ सनः क्तिचि लोपश्चास्यान्यतरस्याम्।** (६-४-४५) सनोतेः क्तिच्यात्वं वा स्याल्लोपश्च वा। सनुतात्। सातिः। सतिः। सन्तिः। देवा एनं देयासुः देवदत्तः। **३३१६ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा।** (३-४-१८) प्रतिषेधार्थयोरलं-

क्रदित्येव। **अवश्यंकारीति**। अवश्यमित्यव्ययम्। **शतंदायीति**। 'अकेनो-र्भविष्यदाधमर्ण्ययोः' इति षष्ठी न। **कृत्याश्चेत्यादि**। स्पष्टम्। **क्तिच्क्तौ च**। **आशिषीति**। 'आशिषि लिङ्लोटौ' इत्यतस्तदनुवृत्तेरिति भावः। **भवतादिति**। 'आशिषि लोट्। भूतिरित्यस्य विवरणमिदम्। कर्तरि क्तिच्। **न क्तिचि दीर्घश्च**। **अनिटामिति**। 'अनुदात्तोपदेश, इति सूत्रमिहानुवर्तते इति भावः। **रन्तिरिति**। अत्र 'श्र्युकः किति' इत्यस्याप्रवृत्तेः 'तितुत्र' इत्येव नेट्। भूतिरित्यत्र तु परत्वात् 'श्र्युकः किति' इत्येवोचितम्। **सनः**। **आत्वमिति**। 'विड्वनोरनुनासिकस्यात्' इत्य-तस्तदनुवृत्तेरिति भावः। **लोपश्चेति**। अन्त्यस्य नकारस्येति शेषः। क्ते उदाहरि-ष्यन्नाह **देवा एनं देयासुरिति**। आशीर्लिङ्। **देवदत्त इति**। तयोरेवेति कर्मणि क्तः। क्तिचा बाधा मा भूदिति क्तविधिः। अन्यथा अपवादेन क्तिचा क्तो बाध्येत। वाऽसरूपविधिस्तु 'स्त्रियां क्तिन्' इत्यतः प्रागेवेति 'प्रैषातिसर्ग' इति सूत्रे

दुर्दर्शनः। दुर्धर्षणः। दुर्मर्षणः। **क्तिच्क्तौ**। क्तिचश्चकारो 'न क्तिचि' इति विशेषणार्थः। न क्त्वा चेत्युक्ते हि क्तिनोऽपि ग्रहणं स्यादिति प्राञ्चः। तत्र एकानु-बन्धपरिभाषयैव क्तिनो व्यावृत्तिसिद्धेरिति हरदत्तः। यत्तु वदन्ति—'तितुत्र–' इत्यत्र सामान्यग्रहणार्थश्चकारः। अन्यथा एकानुबन्धत्वादस्यैव ग्रहणं स्यान्न तु क्तिन इति तदसत्। 'तितुत्र–' इति सूत्रेऽनुबन्धविशिष्टरूपानुच्चारणेनैकानुबन्धपरिभाषाया उक्तिसंभवस्यैवाभावात्। एतेन 'तितुत्र–' इति सूत्रे एकानुबन्धत्वात्क्तिनेव गृह्यते न त्वयं क्तिच्। ततश्च रोदितीति रूपं न स्यादिति शङ्काप्यपास्ता। **भूतिरिति**। यद्यपीह परत्वात् 'श्र्युकः किति' इत्येवेण्निषेधो न्याय्यस्तथापि वन्तितन्त्योरिण्निषे-धार्थमावश्यकत्वात्फले विशेषाभावाच्च 'तितुत्र–' इत्युपन्यस्तम। **दीर्घानुनासि-केति**। 'अनुनासिकस्य क्विझलोः–' इति दीर्घस्य 'अनुदात्तोपदेश–' इत्यादिनानु-नासिकलोपस्य च प्राप्तिरिति बोध्यम्। **यन्तिरित्यादि**। यम उपरमे, रम क्रीडा-

खल्वोरुपपदयोः किम्। मा कार्षीत्। प्रतिषेधयोः किम्। अलंकारः। ३३१७ **उदीचां माङो व्यतीहारे।** (३–४–१९) व्यतीहारेऽर्थे माङः क्त्वा स्यात्। अपूर्वकालार्थमिदम्। ३३१८ **मयतेरिदन्यतरस्याम्।** (६–४–७०) मेङ इकारोऽन्तादेशः स्याद्वा ल्यपि। अपमित्य याचते। अपमाय। उदीचांग्रहणात्-

---

भाष्ये स्पष्टम्। **अलंखल्वोः।** **क्त्वा स्यादिति।** भावार्थकोऽयम्। 'अव्ययकृतो भावे' इति वचनात्। एतच्च 'तुमर्थे सेसेन' इति सूत्रे भाष्ये स्पष्टम्। ननु 'उदीचां माङो व्यतीहारे' इत्युत्तरसूत्रे उदीचांग्रहणादस्य नित्यत्वावश्यकत्वात् प्राचांग्रहणं व्यर्थमित्यत आह। **प्राचांग्रहणं पूजार्थमिति।** न च वाऽसरूपविधिराशङ्क्यः। तस्य 'स्त्रियां क्तिन्' इत्यतः प्रागेव प्रवृत्तेरुक्तत्वात्। **अलं रोदनेनेत्यादि** तु बहुलग्रहणा-त्समाधेयमित्यलम्। उपपदसमासे ल्यपमाशङ्क्य आह **अमैवाव्ययेनेति।** **अलं दत्त्वेति।** दानेन किञ्चिदपि साध्यं नास्तीत्यर्थः। ईत्वं स्मारयति **घुमास्थेति।** **पीत्वा खल्विति।** पानेन साध्यं नास्तीत्यर्थः। **उदीचां माङो।** व्यतीहारो विनिमयः 'समानकर्तृकयोः पूर्वकाले' इत्यनेन सिद्धिमाशङ्क्य आह **अपूर्वकालार्थ-मिति।** **मयतेरिदन्यतरस्याम्।** 'वाऽन्यस्य संयोगादेः' इत्यतो वेति 'न ल्यपि' इति चानुवर्तते इति भावः। **अपमित्य याचत इति।** त्वया गौर्दत्ता चेत् मया महिषो दीयते इत्येवं विनिमयं कर्तुं गां याचते इत्यर्थः। इह विनिमयस्य पूर्वकालिकत्वाभा-वात् समानकर्तृकयोरित्यस्य न प्राप्तिः। प्रत्युत याचनाया एव पूर्वकालिकत्वाद् याचेः क्त्वाप्राप्तिः। गतिसमासे क्त्वो ल्यप् इत्वं तुक्। **अपमायेति।** इत्वाभावे रूपम्। 'ईद्यति' इति ईत्वं तु न, 'न ल्यपि' इति निषेधात्। **उदीचांग्रहणादिति।** तेन

याम्, वनु याचने, तनु विस्तारे। **अलंखल्वोः।** **पूजार्थमिति।** ननु विकल्पार्थ-मेवास्तु अलं रुदित्वा अलं रोदनेनेति रूपद्वयसिद्ध्यर्थमिति चेन्मैवम्। वासरूपन्याये-नैतत्सिद्धेः। न च 'क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्न' इति सिद्धान्तात् ल्युटि वासरूपन्यायो नास्तीति वाच्यम्। 'क्तल्युडादयोऽपवादभूताः स्वबाध्यं नित्यं बाधन्त' इति हि तस्य निष्कृष्टोऽर्थः। इह तु ल्युटोऽपवादः क्त्वा चेति वैषम्यात्। ननु 'प्रैषादिषु कृत्याश्च' इति वचनेन स्त्र्यधिकारादूर्ध्वं वासरूपविधिर्नावश्यमस्तीति ज्ञापितमिति चेत्किं ततः। 'ज्ञापकसिद्धं न सर्वत्र' इतीष्टानुरोधेन तदभ्युपगमे बाध-काभावात्। **अलं दत्त्वेति।** अपात्रे न देयमिति फलितोऽर्थः। **उदीचाम्।** व्यतीहारो व्यतिक्रमः। मेङः कृतात्वस्यायं माङ इति निर्देशो 'नानुबन्धकृतमनेज-न्तत्वम्' इति परिभाषां ज्ञापयति, तेन घुसंज्ञायां दैपोऽप्यदाबिति पर्युदासः सिध्यति। **अपमित्येति।** 'समासेऽनञ्पूर्वे–' इति वक्ष्यमाणेन क्त्वो ल्यपि तुक्। याचित्वा

थाप्रासमपि। याचित्वा अपमयते। **३३१९ परावरयोगे च। (३-४-२०)** परेण पूर्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। परनदीयोगोऽत्र पर्वतस्य। अतिक्रम्य पर्वतं स्थिता नदी। अवरपर्वतयोगोऽत्र नद्याः। **३३२० समानकर्तृकयोः पूर्वकाले। (३-४-२१)** समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति।

भेदः क्त्वाप्रत्ययस्य विकल्पलाभात् तदभावे याचेः पूर्वकालक्रियावृत्तित्वात् समानकर्तृकयोरिति क्त्वेति भावः। **परावरयोगे च।** परावरयोर्योगे इति विग्रहः। योगशब्दस्य प्रत्येकमन्वयः। परयोगे अवरयोगे च क्त्वेति लभ्यते। परेण कस्य योग इत्याकाङ्क्षायाम् अवरस्येति लभ्यते। अवरेण कस्य योग इत्याकाङ्क्षायां परस्येति लभ्यते। तदाह **परेण पूर्वस्येति।** अवरस्येत्यर्थः परावरशब्दौ हि क्रमात् व्यवहिताव्यवहितदेशवृत्तवाचिनौ। **क्त्वा स्यादिति।** 'अव्ययकृतो भावे' इति वचनादयमपि भावार्थक एव अवरस्य परयोगे उदाहरति **अप्राप्य नदीं पर्वत इति।** दक्षिणदेशे निवसतः विन्ध्यं गङ्गां च नदीमधिकृत्य प्रवृत्तमिदं वाक्यम्। विन्ध्यस्योत्तरत एव हि गङ्गा। तथा च दक्षिणदेशस्थानां गङ्गोत्तरणेन विना विन्ध्यपर्वतः प्राप्यत्वेन स्थित इत्यर्थः, विन्ध्यस्य दक्षिणतो गङ्गाया अभावादिति भावः। तथा च दक्षिणदेशस्थानां विन्ध्यव्यवहिता गङ्गा। दक्षिणदेशीयापेक्षया अव्यवहितस्य विन्ध्यस्य दाक्षिणात्यापेक्षया व्यवहितया गङ्गया योगो गम्यते। तदाह—**परनदीयोगोऽत्र पर्वतस्येति।** अथापरेण परस्य योगे उदाहरति **अतिक्रम्य पर्वतं स्थिता नदीति।** दाक्षिणात्यानाम् अव्यवहितविन्ध्यपर्वतातिक्रमेणैव व्यवहिता गङ्गा प्राप्यत्वेन स्थितेत्यर्थः। अत्र अव्यवहितेन विन्ध्येन दाक्षिणात्यापेक्षया व्यवहितायाः गङ्गायाः योगो गम्यते। तदाह **अवरपर्वतयोगोऽत्र नद्या इति।** इह अप्राप्तेरतिक्रमणस्य च विन्ध्यस्थितिपूर्वकालकत्वाभावात् 'समानकर्तृकयोः पूर्वं' इत्यस्य न प्राप्तिः। **समानकर्तृकयोः।** समानकर्तृकयोरिति निर्धारणे षष्ठी। पूर्वकाल इत्यस्य

प्रणिददातीत्यर्थः। **परावर। अप्राप्येति।** दक्षिणदेशस्थानां गङ्गामप्राप्य विन्ध्यः। गङ्गाप्राप्तिविरहविशिष्टदेशस्थो विन्ध्यः इत्यर्थः। अत्र विन्ध्यात्परा गङ्गेति गम्यते। **अतिक्रम्येति।** दक्षिणदेशस्थानामेवायमपि प्रयोगः। अत्र हि गङ्गायाः पूर्वो विन्ध्य इति गम्यते। इह त्रिसूत्र्यां क्त्वाप्रत्ययस्य भावमात्रार्थत्वेऽपि विशेषणविशेष्यसंसर्गा भिद्यन्त इति नास्ति वैयर्थ्यमिति दिक्। **समानकर्तृक।** इह धात्वधिकारेऽपि सामानकर्तृकत्व क्रिययोरेव संभवतीत्यशयेनाह। **धात्वर्थयोरिति।** निर्धारणे षष्ठी सप्तमी वा। धात्वर्थयोर्मध्ये पूर्वः कालो यस्य धात्वर्थस्य तस्मिन्विद्यमानादि-

द्वित्वमतन्त्रम्। स्नात्वा भुक्त्वा पीत्वा व्रजति । 'अनुदात्त-' (सू २४२८) इत्यनुनासिकलोपः। विष्णुं नत्वा स्तौति। स्वरत्यादेः 'श्र्युकः किति' (सू २३८१) इति नित्यमिडभावः पूर्वविप्रतिषेधेन । स्वृत्वा । सूत्वा । धूत्वा। ३३२१ क्त्वि स्कन्दिस्यन्दोः (६-४-३१) एतयोर्नलोपो न स्यात्क्त्वि परे ।

पूर्वकालके धात्वर्थे इत्यर्थः। विद्यमानादिति शेषः । क्त्वा स्यादिति। अव्यय-कृत्वाद्भावार्थकोऽयम् । भुक्त्वा व्रजतीति। पूर्वकालिकाद्भोजनाद् उत्तरकालिकं व्रजनमित्यर्थः । द्वित्वमिति । समानकर्तृकयोरिति द्वित्वमविवक्षितमिति भावः। स्नात्वेति। स्नानभोजनपानोत्तरकालिकं व्रजनमित्यर्थः । अत्र व्रजनापेक्षया स्नाना-दीनां बहूनां पूर्वकालिकत्वेऽपि क्त्वेति भावः। एतच्च भाष्ये स्पष्टम् । पूर्वं भुङ्क्ते ततो व्रजतीत्यत्र तु पूर्वशब्देनैव पूर्वत्वस्यावगमाद् 'उक्तार्थानामप्रयोगः' इति न्यायात् न क्त्वा। पूर्वं भुक्त्वा ततो व्रजतीत्यत्र तु न क्रिययोः पौर्वापर्यं, किंतु कर्त्रोरेव। अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा पश्चाद्व्रजत्यन्येभ्यो भोक्तृभ्य इत्यर्थः। आस्यते भोक्तुमित्यत्र तु वासरूपविधिना लट् इति भाष्यादौ विस्तरः। नमधातोः क्त्वाप्रत्यये आह । अनुदात्तेतीति । स्वरतिसूतिसूयतिधूञ्भ्यः क्त्वाप्रत्ययस्य श्र्युकः किति' इति निषेधं बाधित्वा 'स्वरतिसूतिसूयति' इति इड्विकल्पमाशङ्क्य आह। स्वरत्यादेरिति। 'आर्धधातुकस्येट्' इत्यादेरिड्विधिकाण्डात् प्राक् 'नेड्वशि कृति' इत्यादेरिण्निषेधकाण्डस्यारम्भसामर्थ्याद् इह पूर्वविप्रतिषेधमाश्रित्य 'श्र्युकः

त्यर्थः। एवं च निर्धारणविभक्तिरेव पूर्वकाल इत्यस्य बहुव्रीहित्वद्योतिकेति फलि-तम्। क्त्वा स्यादिति। स च भावे, अव्ययकृत इति वचनात्। भावोऽपि घञा-द्यविव नेह सिद्धावस्थः किंतु साध्यावस्थः। स च धातुनैव लभ्यः। क्त्वाप्रकृत्यर्थ-भूता क्रिया च क्रियान्तरं प्रति विशेषणं धातुसंबन्धाधिकारात्। संसर्गश्चेह सामाना-धिकरण्यं पूर्वोत्तरकालत्वं च। तत्र संसर्गविशेषतात्पर्यग्राहकाः क्त्वाणमुलादयः। अत्र च 'समानकर्तृकयोः-' इति सूत्रांशेन सामानाधिकरण्यमुपनिबद्धम्। धातूपात्त-व्यापाराश्रयस्य कर्तृतया तथा पर्यवसानादिति दिक्। द्वित्वमिति। नन्वमीषां ब्राह्मणानां पूर्वमानयेत्युक्ते मध्यमो नानीयते, तथेहापि बहुक्रियासमभिव्याहारे मध्यम-क्रियावाचकात् क्त्वाप्रत्ययो न स्यादिति चेदत्राहुः—इहाप्याख्यातवाच्या क्रिया प्रधानं, तां प्रति क्त्वान्तोपस्थिताः क्रियाः सर्वा एव विशेषणं न तु तासां परस्पर-संबन्धः 'गुणानां च परार्थत्वात्' इति न्यायात्। अतएव स्नात्वा पीत्वा भुक्त्वा व्रजतीत्याद्यनियमेन प्रयुज्यत इति । 'स्वरतिसूति-' इत्यादिना विकल्पे प्राप्ते नित्यार्थमाह। स्वरत्यादेरिति। क्त्वि स्कन्दि। स्कन्दिर्गतिशोषणयोः। 'इर

स्कन्त्वा। ऊदित्वादिड् वा। स्यन्त्त्वा–स्यन्दित्वा। ३३२२ **न क्त्वा सेट्।** (१-२-१८) सेट् क्त्वा किन्न स्यात्। शयित्वा। सेट् किम्। कृत्वा। ३३२३ **मृडमृदगुधकुषक्लिशवदवसः क्त्वा।** (१-२-७) एभ्यः सेट् क्त्वा कित्। मृडित्वा। 'क्लिशः क्त्वा—' (सू ३०४६) इति वेट्। क्लिशित्वा क्लिष्ट्वा। उदित्वा। उषित्वा। 'रुदविद–' (सू २६०८) इति कित्त्वम्। रुदित्वा। विदित्वा। मुषित्वा। गृहीत्वा। ३३२४ **नोपधात्थफान्ताद्वा** (१-२-२३) सेट् क्त्वा कित्स्याद्वा। श्रथित्वा श्रन्थित्वा। गुम्फित्वा। नोपधात् किम्। कोथित्वा। रेफित्वा। ३३२५ **वञ्चिलुञ्च्यृतश्च।** (१-२-२४) सेट् क्त्वा

किति' इति इण्निषेध एव प्रवर्तते इति भावः। **क्त्व स्कन्दिस्यन्दोः। नलोपो नेति।** 'श्नान्नलोपः' इत्यतो नलोप इति 'नाञ्चेः पूजायाम्' इत्यतो नेति चानुवर्तते इति भावः। **क्त्वीति।** क्त्वाशब्दस्य सप्तम्येकवचनम्। आत इति योगविभागादा-ल्लोपः। **स्कन्त्वेति।** स्कन्दिर् धातोः रूपम्। अनुदात्तोपदेशात्वान्नेट्। स्यन्दूधातोः क्त्वाप्रत्यये आह। **उदित्वादिड् वेति। न वक्त्वा सेट्। किन्नेति।** 'असंयोगाल्लिट् कित्' इत्यतः किदित्यनुवृत्तेरिति भावः। **शयित्वेति।** कित्त्वाभावाद् न गुणनिषेधः। **मृडमृद।** 'न क्त्वा सेट्' इति निषेधस्यापवादः। **मृडित्वेति।** कित्त्वान्न लघूपधगुणः। मृदित्वेत्याद्यप्युदाहार्यम्। **क्लिश इति।** 'क्लिश हिंसायाम्' दिवादौ। ततः क्त्वाप्रत्ययस्य 'क्लिशः क्त्वानिष्ठयोः' इति वेडित्यर्थः। क्लिशू विबाधने' इत्यस्य तु ऊदित्त्वाद्वेट्। **उदित्वेति।** वदधातोः क्त्वाप्रत्ययः। 'वचिस्वपि' इति संप्रसारणम्। **उषित्वेति।** वसधातोः क्त्वा 'वसतिक्षुधोः' इति इट्, संप्रसारणम्। 'शासिवसि' इति षः। **रुदविद इति कित्त्वमिति।** 'न क्त्वा सेट्' इति निषेधस्यापवाद इति भावः। **नोपधात्थफान्ताद्वा।** थफौ अन्तौ यस्येति विग्रहः। 'न क्त्वा सेट्' इति नित्यनिषेधे प्राप्ते विकल्पोऽयम्। कित्त्वे सति नलोपः।

इत्संज्ञा–' इति वार्तिकादिकारमात्रस्येत्संज्ञा नेति 'अनिदिताम्–' इति पर्युदासोऽत्र न प्रवर्तत इति स्कन्दिग्रहणम्। **स्कन्त्वेति।** 'एकाच–' इति नेट्। **मृडमृद।** मृड सुखने, मृड क्षोदे, गुध परिवेष्टने, गुध रोषे च, कुष निष्कर्षे, क्लिश हिंसायां दिवादिः, क्लिशू विबाधने क्र्यादिः, वद व्यक्तायां वाचि, वस निवासे। **किदिति।** 'असंयोगाल्लिट् कित्' इत्यतः किदित्यनुवर्तत इति भावः। **उदित्वेति।** यजादित्वा-त्संप्रसारणम्। **उषित्वेति।** 'वसतिक्षुधोः–' इतीट्। यजादित्वात्संप्रसारणम्। 'शासिवसि–' इति षः। **गृहीत्वेति।** 'ग्रहिज्या–' इति संप्रसारणम्, 'ग्रहोऽलिटि' इति इटो दीर्घः। **नोपधात्थ।** अन्तग्रहणं स्पष्टार्थम्। थफादित्युक्तेऽपि धातोरेव

किद्वा। वचित्वा वञ्चित्वा। लुचित्वा लुञ्चित्वा। ऋतित्वा अर्तित्वा। ३३२६ तृषिमृषिकृषेः काश्यपस्य (१-२-२५) एभ्यः सेट् क्त्वा किद्वा। तृषित्वा तर्षित्वा। मृषित्वा मर्षित्वा। कृषित्वा कर्षित्वा। 'रलो व्युपधात्–' (सू २६१७) इति वा कित्वम्। द्युतित्वा द्योतित्वा। लिखित्वा लेखित्वा। रलः किम्। सेवित्वा। व्युपधात् किम्। वर्तित्वा। हलादेः किम्। एषित्वा। सेट् किम्। भुक्त्वा। 'वसतिक्षुधोरिट्' (सू ३०४६)। उषित्वा। क्षुधित्वा क्षोधित्वा। 'अञ्चेः पूजायाम्' (सू ३०४७) इति नित्यमिट्। अञ्चित्वा। गतौ तु

तदभावे तु नेति मत्वा आह। अथित्वेत्यादि। कोथित्वा रेफित्वेति। कुथ पूतीभावे, रिफ कत्थनयुद्धहिंसादानेषु। इह 'रलो व्युपधात्' इति विकल्पोऽपि न भवति नोपधग्रहणसामर्थ्यात्। वञ्चिलुञ्च्यृतश्च। 'न क्त्वा सेट्' इत्यस्यापवादः। कित्वविकल्पान्नलोपविकल्पः। ऋतेरुदाहरति। ऋतित्वा अर्तित्वेति। कित्वविकल्पाल्लघूपधगुणनिषेधविकल्पः। ऋतिः सौत्रो धातुः घृणायाम्। तस्यार्धधातुकविषये 'ऋतेरीयङ्' इत्यस्य विकल्पनात् तदभावे कित्वमिह विकल्प्यते। तृषि मृषि। 'न क्त्वा सेट्' इत्यस्यापवादः। रल इति। उकारोपधाद् इकारोपधाच्च रलन्ताद् हलादेः परः सन् क्त्वा च सेटौ वा किताविति व्याख्यातं प्राक्। रल् प्रत्याहारः। वर्तित्वेति। 'वृतु वर्तने' इत्यस्य रूपम्। एषित्वेति। इषधातोः रूपम्। इह हलादित्वाभावान्न कित्वविकल्पः। किन्तु 'न क्त्वा सेट्' इति नित्यमेव कित्वाभावाच्च गुणनिषेधः। वसधातोः क्षुधधातोश्च अनुदात्तोपदेशत्वाद् इण्निषेधे प्राप्ते तदपवादं स्मारयति। वसतिक्षुधोरिडिति। उषित्वेति। 'मृडमृद' इति कित्वाद् 'वचिस्वपि' इति संप्रसारणम्। 'शासिवसि' इति षः। अञ्चुधातोः क्त्वाप्रत्ययस्य 'उदितो वा' इति इड्विकल्पे प्राप्ते आह। अञ्चेः पूजायामिति।

क्त्वाप्रत्ययविधानाद्विशेष्यसंनिधानेन तदन्तविधिना थफान्तादिति लाभात्। कोथित्वा। रेफित्वेति। कुथ पूतीभावे, रिफ कत्थनयुद्धनिन्दाहिंसादानेषु। इह 'रलो व्युपधात्–' इति विकल्पोऽपि न भवति नोपधग्रहणसामर्थ्यात्। वचित्वेति। वञ्चु प्रलम्भने। लुचित्वेति। लुञ्चु अपनयने। ऋतित्वेति। ऋतिः सौत्रो धातुर्घृणार्थकः, तस्यार्धधातुकविषये 'ऋतेरीयङ्' इत्यस्य वैकल्पिकत्वात्तदभावे कित्वमनेन विकल्प्यते। तृषिमृषि। ञितृषा पिपासायाम्, मृष तितिक्षायाम्, कृष तनूकरणे। 'नोपधा–' इत्यतो वेत्यनुवर्तनात्काश्यपग्रहणं पूजार्थम्। अञ्चेरिति। 'उदितो वा' इति विकल्पप्राप्तावयमारम्भः। अञ्चित्वेति। 'न क्त्वा सेट्–' इति कित्वाभावान्नलोपो न। एवं चेह 'नाञ्चेः पूजायाम्' इति नलोपो नेति प्रसादकारो-

भवत्वेत्यपि। लुभित्वा लोभित्वा। 'लुभो विमोहने' (सू ३०४८) इतीट्। अविमोहने तु लुब्ध्वा। ३३२७ जॄव्रश्च्योः क्त्वि। (७-२-५५) आभ्यां परस्य क्त्व इट् स्यात्। जरीत्वा जरित्वा। व्रश्चित्वा। ३३२८ उदितो वा। (७-२-५६) उदितः परस्य क्त्व इड्वा। शमित्वा। 'अनुनासिकस्य क्वि—' (सू २६६६) इति दीर्घः। शान्त्वा। द्यूत्वा देवित्वा। ३३२९ क्रमश्च क्त्वि। (६-४-१८) क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे। क्रान्त्वा क्रन्त्वा। झलि किम्। क्रमित्वा। 'पूङश्च' (सू ३०५०) इति वेट्। पवित्वा पूत्वा। ३३३० जान्तनशां विभाषा। (६-४-३२) जान्तानां नशेश्च

गतौ त्विति। तत्र 'उदितो वा' इति वेट्कत्वात्। **लुभित्वा लोभित्वेति।** व्याकुलीकृत्येत्यर्थः। 'लुभ विमोहने' तुदादिः। विमोहनं व्याकुलीकरणमिति वृत्तिः। 'रलो व्युपधात्' इति कित्त्वविकल्पः। तत्र 'तीषसह' इति इड्विकल्पे आह। **लुभो विमोहने इतीडिति।** नित्यमिति शेषः। विमोहनार्थाल्लुभः क्त्वानिष्ठयोरिट् स्यात् न तु गार्ध्ये इति व्याख्यातं प्राक्। **अविमोहने त्विति।** गार्ध्ये तु 'तीषसह' इति इड्विकल्पे लुभित्वेत्यपि भवति। अभिकाङ्क्ष्येत्यर्थः। विमोहने तु लुब्ध्वेत्यपपाठः। **जॄव्रश्च्योः क्त्वि। जरीत्वा जरित्वेति।** 'श्र्युकः किति' इति निषेधे प्राप्ते विधिः। 'वॄतो वा' इति इटो दीर्घविकल्पः। **व्रश्चित्वेति।** अत्र ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। 'न क्त्वा सेट्' इति कित्त्वनिषेधान्न संप्रसारणम्। **उदितो वा। क्त्व इति।** 'जॄव्रश्च्योः' इति पूर्वसूत्रात्तदनुवृत्तेरिति भावः। अप्राप्तविभाषेयम्। शमुधातोरिट्पक्षे उदाहरति-**शमित्वेति।** इडभावे त्वाह **अनुनासिकस्येति। द्यूत्वा देवित्वेति।** दिवुधातोरुदित्त्वात् क्त्वायामिड्विकल्पः। इडभावपक्षे 'च्छ्वोः' इति वस्य ऊठि इकारस्य यणि द्यूत्वेति रूपम्। इट्पक्षे तु 'न क्त्वा सेट्' इति कित्त्वनिषेधाद् उपधागुण इति भावः। **क्रमश्च क्त्वि।** 'नोपधायाः' इत्यतः उपधाया इति 'तनोतेर्विभाषा' इत्यतः विभाषेति 'ढ्लोपे पूर्वस्य' इत्यतः दीर्घ इति 'अनुनासिकस्य क्वि' इत्यतः झल्ग्रहणं चानुवर्तते। तदाह **क्रम उपधाया इत्यादि।** 'अनुनासिकस्य क्वि' इति नित्ये प्राप्ते विकल्पोऽयम्। **क्रान्त्वेति।** क्रमुधातोरुदित्त्वादिड्विकल्पः। दीर्घपक्षे रूपम्। **जान्तनशाम्।** 'श्नान्नलोपः' इत्यतो नलोप इति 'क्त्वि स्कन्दिस्यन्दोः' इत्यतः क्त्वीति चानुवर्तते। तदाह **जान्तानामित्यादि।**

क्लिन्नेत्याहुः। **जॄव्रश्च्योः।** जॄ इत्यस्मात् 'श्र्युकः किति' इति निषेधे प्राप्ते व्रश्चेरूदित्वाद्विकल्पे प्राप्ते वचनमिदम्। **जरीत्वेति।** 'वॄतो वा' इति इटो वा दीर्घः। **व्रश्चित्वेति।** इह 'न क्त्वा सेट्' इति कित्त्वनिषेधाद् 'ग्रहिज्या–' इति संप्रसारणं

नलोपो वा स्यात् क्त्वि परे। भक्त्वा भङ्क्त्वा । रक्त्वा रङ्क्त्वा । 'मस्जिनशो–' (सू २५१७) इति नुम् । तस्य पक्षे लोपः । नंष्ट्वा नष्ट्वा । 'रधादिभ्यश्च' (सू २५१५) इतीट्पक्षे नशित्वा । 'झलादाविति वाच्यम्' (वा ५०६६)। नेह । अञ्जित्वा ऊदित्त्वाद्वेट् । पक्षे अक्त्वा अङ्क्त्वा । 'जनसन–' (सू २५०४) इत्यात्त्वम् । खात्वा । 'द्यतिस्यति' (सू ३०७४) इतीत्त्वम् । दित्वा । सित्वा । मित्वा । स्थित्वा । 'दधातेर्हिः' (सू ३०७६) । हित्वा । **३३३१ जहातेश्च क्त्वि** । (७-४-४३) हित्वा । हाङस्तु हात्वा । 'अदो जग्धिः–' (सू ३०८०) जग्ध्वा **३३३२ समासेऽनञ्पूर्वे क्त्वो ल्यप्** । (७-१-३७) । अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात् । तुक् । प्रकृत्य । अनञ् किम् । अकृत्वा ।

भक्त्वा भङ्क्त्वेति । 'भञ्जो आमर्दने' इत्यस्य रूपम् । **रक्त्वा रङ्क्त्वेति** । 'रञ्ज रागे इत्यस्य रूपम् । नष्ट्वा नष्ट्वेत्यत्राह **मस्जि इति** । **तस्येति** । नशो नकारस्य 'जान्तनशाम्' इत्यनेन पाक्षिको लोप इत्यर्थः । **झलादाविति** । 'जान्तनशां विभाषा' इति नलोपविकल्पः झलादावित्यर्थः । **अञ्जित्वेति** । इटि झलादित्वाभावाद् 'जान्तनशाम्' इति नलोपो नेति भावः । **पक्षे इति** । इडभावपक्षे झलादित्वाद् नलोपविकल्प इति भावः । **आत्त्वमिति** । 'खनु अवदारणे' 'उदित्त्वाद्वेट् । इडभावपक्षे झलादित्वात् 'जनसनखनाम्' इत्यात्त्वमित्यर्थः । **दित्वेति** । 'दो अवखण्डने' इत्यस्य रूपम् । **सित्वेति** । 'षोऽन्तकर्मणि' इत्यस्य रूपम् । **मित्वेति** । माधातोः रूपम् । **स्थित्वेति** । स्थाधातोः रूपम् । धाधातोः क्त्वाप्रत्यये आह **दधातेर्हिरिति** । 'ओ हाक् त्यागे' इत्यस्य क्त्वायां हिभावं दर्शयति **जहातेश्च क्त्वि** । **हित्वेति** । त्यक्त्वेत्यर्थः । **हाङस्त्विति** । 'जहातेश्च क्त्वि' इति हिभावविधौ जहातेरिति निर्देशात् 'ओ हाक् त्यागे इत्यस्य ग्रहणम्, न तु 'ओ हाङ् गतौ' इत्यस्य । तस्य 'भृञामित्' इति इत्त्वे जिहातेरिति निर्देशापत्तेः । **जग्ध्वेति** । जघ् क्त्वा इति स्थिते 'झषस्तथोर्धोऽधः' इति धः । 'झरो झरि' इति प्रकृतिधकारस्य पाक्षिको लोपः । **समासे** । 'अनञ्पूर्वे' इति इति पर्युदासाद् अव्ययपूर्वपद इति लभ्यते इति मत्वा आह **अव्ययेत्यादि** **तुगिति** । 'ह्रस्वस्य पिति' इत्यनेनेति भावः । **प्रकृत्येति** । प्रशब्दः प्रकर्षे । तस्य

न । **धूत्वेति** । इडभावपक्षे 'च्छ्वोः–' इत्यूठ् । **झलादावितीति** । 'जान्तनशाम्–' इति सूत्रे वक्तव्यमित्यर्थः । **खात्वा** । **खनित्वेति** । 'उदितो वा' इति वेट् । **जग्ध्वेति** । 'झरो झरि–' इति पाक्षिको धलोपः । **समासेऽनञ्** । नञ्भिन्न नञ्सदृशमव्ययमिति यावत् । तत्पूर्वं पूर्वपदं यस्य समासस्येति व्याचष्टे । **अव्ययेति** । **प्रकृत्येति** । प्रशब्दः क्त्वाप्रत्ययार्थगतप्रकर्षस्य द्योतकः, स तु 'कुगतिप्रादयः'

पर्युदासाश्रयणान्नेह। ३३३३ षत्वतुकोरसिद्धः। (६-१-८६) षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात्। कोऽसिचत्, इह षत्वं न। अधीत्य। प्रेत्य। 'ह्रस्वस्य--' (सू २८५८) इति तुक्। ३३३४ वा ल्यपि (६-४-३८)। अनुदात्तोपदेशानां वनतितनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि। व्यवस्थितविभाषेयम्। तेन मान्तानिटां वा, नान्तानिटां वनादीनां च नित्यम्। आगत्य आगम्य। प्रणत्य प्रणम्य। प्रहत्य। प्रमत्य। प्रतत्य। वितत्य।

'कुगति' इति क्त्वान्तेन नित्यसमासः। परमकृत्वेति। अव्ययपूर्वपदत्वाभावान्न ल्यबिति भावः। षत्वतुकोरसिद्धः। 'एकः पूर्वपरयोः' इत्येकादेशप्रकरणे उक्तमिदं सूत्रम्। ततश्च 'असिद्ध' इत्यस्य एकादेश इति शेषः। फलितं त्वाह एकादेशशास्त्रमिति। कार्यासिद्धत्वं निराकृत्य शास्त्रासिद्धत्वस्यैव भाष्ये सिद्धान्तितत्वादिति भावः। कोऽसिचदिति। 'एङः पदान्तादति' इति पूर्वरूपमिहैकादेशः। तस्य 'अन्तादिवच्च' इति परादित्वे ओसिचदिति पदम्। तस्य सकारस्य अपदादितया सात्पदाद्योः' इति निषेधाभावाद् 'आदेशप्रत्यययोः' इति षत्वं प्राप्तम् एकादेशस्यासिद्धत्वान्न भवति, एकादेशस्यासिद्धत्वेन को असिचदिति स्थिते सकारस्य अकारेण व्यवधानाद् इणः परत्वाभावात्। तदाह इह षत्वं नेति। षत्वे एकादेशस्यासिद्धत्वे प्रासङ्गिकमुदाहृत्य प्रकृते ल्यपि तुग्विधावसिद्धमुदाहरति अधीत्येति। 'इङ् अध्ययने' नित्यमधिपूर्वः तस्मात् क्त्वो ल्यप्। प्रेत्येति। प्रपूर्वादिणधातोः क्त्वो ल्यप्। इहोभयत्र सवर्णदीर्घस्य चासिद्धत्वात् 'ह्रस्वस्य पिति' इति तुक्। एकादेशस्यासिद्धत्वाभावे तु ह्रस्वाभावात्तुक् न स्यात्। तदाह ह्रस्वस्येति तुगिति। वा ल्यपि। 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः' इत्युत्तरमिदं सूत्रम्। तदाह अनुदात्तेत्यादि। अनुदात्तोपदेशानां वनतितनोत्यादीनां च अनुदात्तोपदेशेत्युक्तो नलोपो ल्यपि वा स्यादित्यर्थः। व्यवस्थितविभाषेति। व्याख्यानादिति भावः। मान्तानिटां वेति। गम्नम्रम्यमां पाक्षिको मलोप इत्यर्थः। नान्तेति। नान्तेषु मन्यहनाव-निटौ, तयोः वनादीनां च 'अनुदात्तोपदेश' इत्यनेन नलोपो नित्यं स्यादित्यर्थः। नान्तानिटामिति बहुवचनं तु प्रयोगबहुत्वाभिप्रायम्। मान्तानामुदाहरति आगत्येति।

इति क्त्वान्तेन नित्यं समस्यते। पर्युदासेति। प्रसज्यप्रतिषेधाश्रयणे तु स्यादेवात्र ल्यबिति भावः। षत्वतुकोः। प्रासङ्गिकषत्वविषयमुदाहरति। कोऽसिचदिति। को असिचदिति स्थिते 'एङः पदान्तादति' इति पूर्वरूपमेकादेशः। तस्य 'अन्तादिवच्च' इति परादिवत्त्वेन 'सात्पदाद्योः' इति निषेधाभावादिणः परत्वेन षत्वं प्राप्तम् एकादेशस्यासिद्धत्वे सति अकारेण व्यवधानादिणः परत्वाभावान्न भवति। प्रकृतं

'अदो जग्धिः—'(सू ३०८०)। 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते'। जग्धिविधौ ल्यब्ग्रहणात्। तेन हित्वदत्वात्वेत्वदीर्घत्वशूठिटो ल्यपि न। विधाय। प्रदाय। प्रखन्य। प्रस्थाय। प्रक्रम्य। आपृच्छ्य। प्रदीव्य। ३३३५ न ल्यपि।

गमेरनुनासिकलोपे तुक्। प्रणत्येति। नमेरनुनासिकलोपपक्षे तुक्। विरम्य विरत्य, प्रयत्य प्रयम्य, इत्यप्युदाहार्यम्। नान्तयोरुदाहरति प्रहत्य प्रमत्येति। हनो मन्यतेश्च नित्यं नलोपः। प्रवत्येति। वनेर्नित्यं नलोपः तुक्। वितत्येति। तनोतेर्नित्यं नलोपः, तुक्। भाष्ये तु 'वा ल्यपि' इति सूत्रं न दृश्यते। 'अनुदात्त' इति सूत्रे 'अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च' इति 'वा मः' इति च वार्तिकं पठितम्, ल्यपि च अनुदात्तोपदेश इति नलोपो भवति। मकारान्तानां तु वेत्यर्थः। अथ प्रजग्ध्येत्युदाहरणं मनसि निधाय तत्र अदधातोः क्त्वो ल्यपि 'अदो जग्धिर्ल्यप्ति किति' इति जग्ध्यादेशविधिं स्मारयति अदो जग्धिरिति। आदेशे इकार उच्चारणार्थः। ननु विधायेत्यत्र 'दधातेर्हिः' इति हिभावः प्राप्नोति। न च तस्य तादौ किति विधानात् ल्यपि कृते कथं तत्प्राप्तिः। अलाश्रयविधौ स्थानिवत्त्वाभावादिति वाच्यम्। परस्मादपि ल्यपः प्रागेवान्तरङ्गत्वाद् हिभावप्रवृत्तेर्दुर्निवारत्वात्। तथा प्रदायेत्यत्र तादौ किति विहितमित्त्वं ल्यपः प्रागेवान्तरङ्गत्वात् प्राप्नोति। तथा प्रखन्येत्यत्र 'जनसनखनां सञ्झलोः' इति झलादिलक्षणमात्वं ल्यपः प्रागेव प्राप्नोति। तथा 'द्यतिस्यतिमास्थामित्ति किति' इति इत्त्वं ल्यपः प्रागेव प्राप्नोति। तथा प्रक्रम्येत्यत्र 'क्रमश्च क्त्वि' इति झलादौ क्त्वि विहितमुपधादीर्घत्वं ल्यपः प्रागेव प्राप्नोति। तथा आपृच्छ्य प्रदीव्येत्यत्र 'च्छ्वोः' इति शूठौ झलादित्वलक्षणौ ल्यपः प्रागेव स्याताम्। तथा प्रदीव्येत्यत्र वलादिलक्षणः इट् ल्यपः प्रागेव प्राप्नोतीत्याशङ्क्य आह अन्तरङ्गानपीति। कुत एतदित्यत आह जग्धिविधाविति। 'अदो जग्धिस्ति किति' इत्येतावतैव प्रजग्ध्य इत्यत्रापि ल्यपः प्रागेवान्तरङ्गत्वाद् जग्ध्यादेशः सिद्धः। अतो ल्यब्ग्रहणम् 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति ज्ञापयति। एवं च अन्तरङ्गजग्ध्यादेशापेक्षया प्राबल्याल्ल्यपि कृते सति तकारादित्वलक्षणजग्धिभावस्याप्रसक्तेः जग्धिविधौ ल्यब्ग्रहणमर्थवदिति भावः। तेनेति। हित्वं दत्वम् आत्वम् इत्वं दीर्घत्वं शूठौ इट् च ल्यपि

ल्यपि कार्यमुदाहरति। अधीत्येति। विधायेति। दधातेर्हिर्न। प्रदायेति। 'दो दद्घोः' इति दीर्घो न। प्रखन्येति। 'जनसनखन—' इत्यात्वं न। प्रस्थायेति। 'द्यतिस्यति-' इतीत्वं न। प्रक्रम्येति। 'क्रमश्च क्त्वा—' इति दीर्घो न। आपृच्छ्य। प्रदीव्येति। छकारवकारयोश्छ्वोरिति शूठौ न। इडभावस्योदाहरणं तु प्रखन्य प्रदीव्येत्यादावेव बोध्यः। न ल्यपि। कथं तर्हि 'निपीय यस्य'

(६-४-६९) ल्यपि परे घुमास्थादेरीत्वं न । धेट् । प्रधाय । प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय । 'मीनातिमिनोति-' (सू २१०८) इत्यात्वम् । प्रमाय । निमाय । उपदाय । 'विभाषा लीयतेः' (सू २१०९) । विलाय विलीय । णिलोपः । उत्तार्य । विचार्य । **३३३६ ल्यपि लघुपूर्वात् ।** (६-४-५६) लघुपूर्वात्परस्य णेरयादेशः स्याल्ल्यपि । विगणय्य । प्रणमय्य । प्रवेभिदय्य । लघुपूर्वात् किम् । संप्रधार्य । **३३३७ विभाषाऽऽपः ।** (६-४-५७)

नेत्यर्थः । **न ल्यपि ।** 'घुमास्थागापाजहातिसाम्' इत्यनुवर्तते । 'ईद्यति' इत्यतः ईत् इति च । तदाह **ल्यपि परे इत्यादि । धेडिति ।** प्रकृतिप्रदर्शनम् । **प्रधायेति ।** 'आदेचः' इत्यात्वम् । **प्रपायेति ।** निपीयेति तु पीङ् पाने इत्यस्य रूपम् । **प्रसायेति ।** 'षोऽन्तकर्मणि' इत्यस्य रूपम् । लीङः क्त्वो ल्यपि आत्वविकल्पं स्मारयति **विभाषा लीयतेरिति । णिलोप इति ।** उत्पूर्वात् तॄधातोर्णिचि वृद्धौ रपरत्वे उत्तारि इति रूपम् । विपूर्वाच्चरधातोर्णिचि उपधावृद्धौ विचारीति रूपम्, ताभ्यां क्त्वो ल्यपि णिलोप इत्यर्थः । **ल्यपि लघुपूर्वात् ।** 'णेरनिटि' इत्यतो णेरिति 'अयामन्ताल्वाय्य' इत्यतः अय् इति चानुवर्तते । तदाह **लघुपूर्वादिति ।** लघुः पूर्वो यस्माद्वर्णादिति विग्रहः, णिलोपापवादः । **विगणय्येति ।** 'गण संख्याने' चुरादिः, कथादिरदन्तः । तस्माण्णिच् । अतो लोपः । क्त्वो ल्यपि णेरयादेशः । **प्रवेभिदय्येति ।** भिदधातोर्यङि द्वित्वम् । 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः, अशत्वं, 'यस्य हलः' इति यकारलोपः, अतो लोपः, क्त्वो ल्यपि णेरयादेशः । **विभाषा-**

इति श्रीहर्षप्रयोग इति चेदत्राहुः—पीङ् पाने इति दिवादिगणस्थाद् ल्यपि न दोष इति । इह प्रशाय प्रच्छायेत्यत्र 'शाच्छोरन्यतरस्याम्' इति प्राप्तस्येत्वस्याप्यभावो बोध्यः । **लघुपूर्वादिति ।** लघुः पूर्वो यस्माद्वर्णात् । लघुपूर्ववर्णात्परस्येत्यर्थः । **विगणय्येति ।** नन्विह णौ कृतस्याल्लोपस्य पूर्वस्माद्विधौ स्थानिवद्भावाल्लघुपूर्वकवर्णात्परत्वं नास्ति । न चारम्भसामर्थ्यम् । अनुगमय्येत्यादौ मित्सु चरितार्थत्वात् । अत्रोच्यते—पूर्वस्माद्विधौ स्थानिवत्त्वमनित्यम् । 'निष्ठायां सेटि' इति लिङ्गात् । तथा चात्र स्थानिवत्त्वाभावाण्णेरयादेशो भवत्येव । 'निष्ठायां सेटि' इत्यस्यानित्यत्वज्ञापकं तु 'अचः परस्मिन्-' इति सूत्र एवास्माभिरुपपादितमिति नात्रोपपाद्यते । **प्रणमय्येति ।** अमन्तत्वान्मित्त्वे मितां ह्रस्वः । **प्रवेभिदय्येति ।** भिदेर्यङन्ताद्वेभिद्येत्यस्माण्णिच्यल्लोपे 'यस्य हलः' इति यलोपः । ननु ह्रस्वयलोपाल्लोपानामाभीयत्वेनासिद्धत्वाल्लघुपूर्वकवर्णात्परो णिर्नास्तीति कथमिह णेरयादेशः स्यादिति चेन्मैवम् । 'असिद्धवदत्राभात्' इत्यत्र 'समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्' इति हि व्याख्या-

आप्नोतेर्णेरयादेशो वा स्याल्ल्यपि। प्रापय्य। प्राप्य। ३३३८ क्षियः। (६-४-५९) क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय। ३३३९ ल्यपि च। (६-१-४१) वेञो ल्यपि संप्रसारणं न स्यात्। प्रवाय। ३३४० ज्यश्च। (६-१-४२) प्रज्याय। ३३४१ व्यश्च। (६-१-४३)। उपव्याय। ३३४२ विभाषा परेः। (६-१-४४) परेर्व्येञो वा संप्रसारणं स्याल्ल्यपि। तुकं बाधित्वा परत्वात् 'हलः' (सू २५५९) इति दीर्घः। परिवीय परिव्याय। कथम् 'मुखं व्यादाय स्वपिति' 'नेत्रे निमील्य हसति' इति। व्यादाननिमीलनो-

ऽपः। लघुपूर्वत्वाभावात् पूर्वेण अप्राप्ते विभाषेयम्। क्षियः। 'ल्यपि लघुपूर्वात्' इत्यतो ल्यपीति 'युप्लुवोर्दीर्घश्छन्दसि' इत्यतो दीर्घ इति चानुवर्तते। तदाह क्षियो ल्यपीति। ल्यपि च। 'वेञः' इति सूत्रमनुवर्तते। 'न संप्रसारणे संप्रसारणम्' इत्यतः न संप्रसारणमिति च। तदाह वेञो ल्यपीत्यादि। प्रवायेति। 'वेञ् तन्तुसन्ताने' क्त्वो ल्यप्। 'आदेच उपदेशे' इत्यात्वम्। इह 'ग्रहिज्यावयिव्यधिवष्टिविचति' इति संप्रसारणं न। ज्यश्च। ज्याधातोर्ल्यपि संप्रसारणं न स्यादित्यर्थः। प्रज्यायेति। इह 'ग्रहिज्यावयि' इति संप्रसारणं न। व्यश्च। व्येञो ल्यपि संप्रसारणं नेत्यर्थः। उपव्यायेति। 'व्येञ् संवरणे' क्त्वो ल्यपि 'आदेचः' इत्यात्वम्। 'ग्रहिज्यावयि' इति संप्रसारणं न। विभाषा परेः। व्यः इति ल्यपीति संप्रसारणमिति चानुवर्तते। तदाह। परेर्व्येञः इति। परिपूर्वाद् व्येञः क्त्वो ल्यपि यकारस्य संप्रसारणे पूर्वरूपे च कृते परि वि य इति स्थिते आह। तुकमिति। कथमिति। स्वापकाल एव मुखव्यादानं हासकाल एव नेत्रनिमीलनम्। एवं च व्यादाननेत्रनिमीलनयोः स्वापहासपूर्वकालत्वाभावात् कथं क्त्वाप्रत्यय इत्याक्षेपः। समाधत्ते। व्यादानेति। यद्यपि स्वापहसनोत्पत्त्युत्तरकालके व्यादाननिमीलने, न तु

तम्। तेनात्राशङ्कैव नास्ति, ह्रस्वादयो हि णौ, णेरयादेशस्तु ल्यपि परत इति व्याश्रयत्वात्। विभाषा परेः। अप्राप्तविभाषेयम्। आप्नोतेरिति। यद्यपीको णिचि परतः 'क्रीङ्जीनां णौ' इत्यात्वे 'अर्तिह्री—' इत्यादिना पुकि आपिति शब्दोऽस्ति, तथापि तस्य नेह ग्रहणं लाक्षणिकत्वादिति भावः। प्राप्येति। एतेन 'अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते, इति श्रीहर्षप्रयोगो व्याख्यातः। अवाप्येत्यस्यावापय्येत्यर्थसंभवात्। एतेन तत्रान्तर्भावितण्यर्थतेति क्लेशमनुभवन्तः परास्ताः। ल्यप्स्थानिनो कित्त्वाद् 'वचिस्वपि—' इति प्राप्तसंप्रसारणं निषेधयितुमाह। ल्यपि चेति। ज्यश्च। संप्रसारणं न स्यात्। एवं व्यश्चेत्यत्रापि व्याख्येयम्। कथमिति। ल्यबादेशस्य स्थानिभूतः क्त्वाप्रत्ययो दुर्लभः तद्विधौ पूर्वकाल इत्युक्तेः।

त्तरकालेऽपि स्वापहासयोरनुवृत्तेस्तदंशविवक्षया भविष्यति। ३३४३ आभीक्ष्ण्ये णमुल्च। (३-४-२२) पौनःपुन्ये द्योत्ये पूर्वविषये णमुल्स्यात् क्त्वा च।

तत्पूर्वकालके तथापि व्यादानोत्पत्त्युत्तरकाले निमीलनोत्पत्त्युत्तरकालेऽपि स्वापहासौ अनुवर्तेते। तत्र स्वापोत्पत्तिकालीनव्यादानस्य हासोत्पत्तिकालीननिमीलनस्य च तत्कालीनस्वापहासपूर्वकालकत्वाभावेऽपि तदुत्तरकालानुवृत्तस्वापहासापेक्षया पूर्वकालकत्वसत्त्वात् क्त्वाप्रत्यय इत्यर्थः। 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इत्यादौ तु समानकर्तृकत्वाऽविघाताय स्थितस्येत्याद्यध्याहार्यम्। आभीक्ष्ण्ये णमुल् च। 'समानकर्तृकयोः पूर्वकाल' इत्युत्तरमिदं सूत्रम्। तदाह **पूर्वविषये इति**। यद्यपि वाऽसरूपविधिना क्त्वा सिद्धः। स्त्र्यधिकारात्प्रागेव वाऽसरूपविधिपक्षेऽपि क्त्वाविधौ वाऽसरूपवचनस्य वाऽसरूपसूत्रभाष्ये प्रपञ्चितत्वात्। तथापि 'विभाषाग्रेप्रथमे' इति सूत्रे उभयोर्विधानाय चकारः। तत्र हि अग्रेभोजं व्रजति देवदत्तः अग्रे भुक्त्वा इत्यादौ देवदत्तकर्तृकभोजने यज्ञदत्तादिकर्तृकभोजनापेक्षया पूर्वकालत्वमग्रशब्देन बोध्यते, न तु व्रजनादिक्रियापेक्षया पूर्वकालत्वम्। ततश्च 'समानकर्तृकयोः' इति क्त्वाप्रत्ययस्य तत्र न प्रसक्तिः। नापि 'विभाषाग्रे' इत्यनेन आभीक्ष्ण्ये तत्राप्राप्त-

न चेह तदस्ति। पूर्वं हसौ स्वपिति पश्चान्मुखं व्यादत्ते। यदैव हसति तदैव नेत्रे संमीलयति। तथा च क्त्वाप्रत्ययस्य दुर्लभत्वाल्ल्यपः प्रसक्तिरेव नास्तीति प्रश्नः। समाधत्ते। **व्यादानेत्यादिना**। एतेनेश्वरः सर्वं व्याप्य वर्तते, ज्ञात्वा तिष्ठतीत्यादि व्याख्यातम्। 'श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते' इत्यादौ तु समानकर्तृकतानिर्वाहार्थं स्थितस्येत्यादि यथासंभवमध्याहार्यम्। **आभीक्ष्ण्ये णमुल् च**। ननु वासरूपन्यायेन क्त्वाप्रत्ययो भविष्यतीति चग्रहणमिह व्यर्थमिति चेन्मैवम्। उक्तन्यायस्वीकारे तु लडादिरपीह प्रवर्तेत। न चेष्टापत्तिः, 'विभाषाग्रे–' इति वक्ष्यमाणसूत्रस्थविभाषाग्रहणस्य वैयर्थ्यप्रसङ्गात्। तत्र हि क्त्वाणमुलौ विभाषाग्रहणेन लडादिसमावेशार्थं विकल्प्येते। यद्यपि वासरूपन्यायेनैव लडादिः सिध्यति, तथापि णमुला सहैव क्त्वाप्रत्ययो यत्र विधीयते तत्र वासरूपविधिर्न प्रवर्तत इति ज्ञापनार्थं विभाषाग्रहणम्। तत्फलं तु 'आभीक्ष्ण्ये णमुल् च' इत्यत्र लडाद्यप्रवृत्तिः। ततश्च चकारेणैव क्त्वाप्रत्ययो लभ्यत इति नास्त्येव तस्य वैयर्थ्यम्। किं च वासरूपं विनैव क्त्वालडाद्योः स्वीकारे तु 'न यद्यनाकाङ्क्षे' इत्यत्र क्त्वाप्रत्ययवत् लडादिरपि न विरुध्येत। तथा च यदयं भुङ्क्ते ततः पठतीत्युदाहरणं न स्यात्। सिद्धान्ते तु 'आभीक्ष्ण्ये णमुल् च' इति विशेषविहितयोः क्त्वाणमुलोरेव निषेधात्सामान्यविहितलडादिर्भवत्येवेति नास्त्येवानुपपत्तिरिति दिक्। **पूर्वविषय इति**। 'समानकर्तृकयोः

छित्वम्। स्मारंस्मारं नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। 'चिण्णमुलोः—' (सू २७६२) इति णमुल्परे णौ वा दीर्घः। गामंगामम्। गमंगमम्। 'विभाषा चिण्णमुलोः' (सू २७६१) इति नुम्वा। लम्भंलम्भम्। लाभंलाभम्। व्यवस्थितविभाषयोपसृष्टस्य नित्यं नुम्। प्रलम्भंप्रलम्भम्। 'जाग्रोऽविचिण्णल्—' (सू २४८०) इति गुणः। जागरंजागरम्। ण्यन्तस्याप्येवम्। ३३५४ **न यद्यनाकाङ्क्षे**। (३-४-२३) यच्छब्द उपपदे पूर्वकाले यत्प्राप्तं तन्न, यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षति चेत्। यदयं भुङ्क्ते ततः पठति। इह क्त्वाणमुलौ न। अनाकाङ्क्षे किम्। यदयं भुक्त्वा व्रजति ततोऽधीते। ३३५५ **विभाषाऽग्रेप्रथमपूर्वेषु**। (३-४-२४)

विधिरिति युज्यते। आभीक्ष्ण्ये पूर्वविप्रतिषेधेन 'आभीक्ष्ण्ये णमुल् च' इत्यस्यैव प्रवृत्तेरिष्टत्वादिति शब्देन्दुशेखरे विस्तरः। **छित्वमिति**। 'नित्यवीप्सयोः' इत्यनेनेति शेषः। **स्मृत्वास्मृत्वेति**। नमति शिवम् इत्यनुषज्यते। **पायंपायमिति**। 'आतो युक् चिण्कृतोः' इति युक्। **वा दीर्घ इति**। गमेर्ण्यन्ताण्णमुलि 'मितां ह्रस्वः' इति ह्रस्वे कृते 'चिण्णमुलोः' इति दीर्घविकल्प इत्यर्थः। **व्यवस्थितेति**। व्याख्यानादिति भावः। **उपसृष्टस्येति**। उपसर्गपूर्वस्येत्यर्थः। जागृधातोर्णमुलि वृद्धिमाशङ्क्य आह **जाग्र इति**। **ण्यन्तस्याप्येवमिति**। जागृधातोर्णौ वृद्धिं बाधित्वा 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणे णिलोपे जागरमित्येव रूपमिति भावः। **न यद्यनाकाङ्क्षे**। **यत्प्राप्तमिति**। क्त्वा णमुल् चेत्यर्थः। **यत्रेति**। यस्मिन्वाक्ये पूर्वोत्तरकालिकक्रियापदे स्तः, तद्वाक्यं वाक्यान्तरं नाकाङ्क्षति चेदित्यर्थः। पूर्वोत्तरकालिकक्रियापदद्वययुक्तं वाक्यं वाक्यान्तरं नाकाङ्क्षति चेद् इति यावत्। **यदयमिति** यदित्यव्ययम्। यदायं भुङ्क्ते ततः परं पठतीत्यर्थः। इदमेकं वाक्यं भुजिपठिक्रियापदद्वययुक्तं न वाक्यान्तरमाकाङ्क्षतीति भावः। **यदयं भुक्त्वा व्रजतीति**। भुजिव्रजिक्रियापदयुक्तमिदं वाक्यम्। ततः अधीत इति वाक्यान्तरमाकाङ्क्षति। नात्रायं निषेध इति भावः। **विभाषाग्रे**। अग्रे, प्रथम, पूर्व, एषां द्वन्द्वः। अग्रे

पूर्वकाले' इत्यर्थे। **पायंपायमिति**। आतो युक्। **वा दीर्घ इति**। गमेर्ण्यन्ताण्णमुलि मितां ह्रस्वे च कृते वा दीर्घ इत्यर्थः। **ण्यन्तस्यापीति**। यत्तु प्राचा ण्यन्तजागर्तेश्चिण्णमुलोर्वा वृद्धिरिति मतमुपन्यस्तं तदपाणिनीयमिति भावः। **न यदि**। अनाकाङ्क्ष इति पचाद्यजन्तेन नञ्समासस्तद्दर्शयति। **नाकाङ्क्षते चेदिति इहेति**। नन्वेवम् 'अनन्तरस्य' इति न्यायात् णमुल मा भूत्। क्त्वा तु 'समानकर्तृकयोः' इति सूत्रान्तरेण स्यादेवेति चेदत्राहुः—पूर्वकाले यत्प्राप्नोति तन्नेति व्याख्या-

आभीक्ष्ण्य इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः। अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजम्। प्रथमं भुक्त्वा। पूर्वं भोजम्। पूर्वं भुक्त्वा। पक्षे लडादयः। अग्रे भुङ्क्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः। अग्रे भोजंभोजं व्रजति। भुक्त्वाभुक्त्वा। **३३४६ कर्मण्याक्रोशे कृञः खमुञ्।** (३-४-२५) कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञ् स्यात्। चोरंकारमाक्रोशति। करोतिरुच्चारणे। चोरशब्दमुच्चार्येत्यर्थः। **३३४७ स्वादुमि णमुल्।** (३-४-२६)। स्वाद्वर्थेषु कृञो

इत्यव्ययम्। एदन्तं वा निपातनात्। **नानुवर्तते इति**। एतच्च भाष्ये स्पष्टम्। **प्रथमं भोजमिति**। प्रथममिति क्रियाविशेषणम्। **पूर्वं भोजमिति**। पूर्वमिति क्रियाविशेषणम्। **पक्षे इति**। क्त्वाणमुलौ तावदव्ययकृत्त्वार्थकौ। यदा तु कर्तृविवक्षा तदा लडादय इत्यर्थः। ननु अग्रेप्रथमपूर्वपदेषूपपदेषु क्त्वाणमुलौ परत्वादाभीक्ष्ण्येऽपि स्यातामित्यत आह—**आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेनेति**। व्याख्यानादिति भावः। **कर्मण्याक्रोशे**। कर्मणीत्युपपदनिर्देशः। आक्रोश इति धात्वर्थ इति मत्वा व्याचष्टे—**कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञिति**। स्पष्टत्वात् न व्याख्येयमिति भावः। **चोरङ्कारमिति**। उपपदसमासे 'अरुर्द्विषदजन्तस्य' इति मुम्। **स्वादुमि णमुल्**। स्वादुमीत्यर्थग्रहणम्। व्याख्यानात्। तथा च स्वादुपर्याये उपपद इति लभ्यते। 'कर्मण्याक्रोशे' इति पूर्वसूत्रात् कृञ इत्यनुवर्तते न तु खमुञ्, अस्वरितत्वात्। ततश्च 'आभीक्ष्ण्ये णमुल् च' इत्यतः णमुलित्यनुवर्तते, 'समानकर्तृकयोः पूर्वकाले' इति सूत्रं च। तदाह—**स्वाद्वर्थेष्वित्यादिना**। ननु

नात् क्त्वाप्रत्ययोऽपि न भवतीति। **विभाषाग्रे**। यद्यप्यग्रेशब्दो देशविशेषवचनोऽप्यस्ति, प्रभोरग्रे भुङ्क्ते इत्यादिप्रयोगात्तथापीह कालविशेषवाच्येव गृह्यते प्रथमशब्दसाहचर्यात्। प्रथमं भुङ्क्ते इत्यादौ तु काल एव प्रतीयते। अग्रे इति सप्तम्यन्तस्यानुकरणम्। 'प्रकृतिवदनुकरणम्' इत्यस्य वैकल्पिकत्वाद्विभक्तेर्लुङ् न कृतः अस्यवामीयमिति वत्। **अग्रेभोजमिति**। 'अमैवाव्ययेन' इति नियमाद् व्यस्तमेवेदं, न त्वत्रोपपदसमासः। नन्वग्रेप्रथमपूर्वशब्दैः पूर्वकालत्वमुच्यत इति कथमिह क्त्वाणमुलौ स्यातामिति चेदत्राहुः—अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीति हि वाक्यार्थस्तत्राग्रेप्रभृतिभिर्भोक्रपेक्षया पूर्वत्वमुच्यते चेदत्रापि अन्येभ्यो भोक्तृभ्यः पूर्वं व्रजतीति, व्रजनापेक्षया पूर्वत्वं तु क्त्वाणमुलभ्यां द्योत्यत इत्याशङ्कैवात्र नास्तीति। **नित्यमेव विधिरिति**। अग्रे भुङ्क्ते इत्येव लडादिर्न प्रयुज्यत इति भावः। **स्वा-**

णमुल्स्यादेककर्तृकयोः पूर्वकाले। स्वादुशब्दस्य मान्तत्वं निपात्यते। अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते। संपन्नंकारम्। लवणंकारम्। संपन्नलवणशब्दौ स्वादुपर्यायौ। वाऽसरूपेण क्त्वापि। स्वादुं कृत्वा भुङ्क्ते। ३३४८ **अन्यथैवं-कथमित्थंसु सिद्धाप्रयोगश्चेत्।** (३-४-२७)। एषु कृञो णमुल्स्यात्

स्वादुशब्दस्य स्वादावित्येव निर्देश उचित इत्यत आह—**स्वादुशब्दस्येति**। नन्वत्र खमुञेवानुवर्तताम्। एवं च स्वादुमि मान्तत्वनिपातनमपि न कर्तव्यमित्या-शङ्क्य स्त्रियां च्व्यन्तमुदाहरति—**अस्वाद्वीमिति**। यवागूमपूरिकामित्यादि विशेष्यम्। अत्र णमुलि विवक्षिते मान्तत्वे निपातिते उदन्तत्वाभावाद् 'वोतो गुणवचनात्' इति न ङीप्। खमुञि कृते 'अरुर्द्विषत्' इति मुमि तु स्वाद्विङ्कार-मित्येव प्रसज्येत। किंच च्व्यन्तस्याव्ययत्वाद् 'अरुर्द्विषत्' इति मुम् दुर्लभः, तत्र मुम्विधौ अनव्ययस्येत्यनुवृत्तेः। ततश्च अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते इत्यत्रापि मुम न स्यात्, खमुञः खिरवस्य चोरंकारमित्यत्र सावकाशत्वात्। किंच 'च्वौ' इति दीर्घापत्तिः। अतो णमुलि स्वादुशब्दे मान्तत्वनिपातनमिति भावः। स्वादुमीत्यर्थग्रहणस्य प्रयोजनमाह। **संपन्नकारमिति**। अत्र 'अस्य च्वौ' इति ईत्त्वाभावोऽपि मान्तत्वनिपातनस्य फलं बोध्यम्। **स्वादुपर्यायाविति**। वृत्त्यादिग्रन्थेषु तथा दर्शनादिति भावः। **वाऽसरूपेण क्त्वापीति**। यद्यपि 'स्त्रियां क्तिन्' इत्यतः प्रागेव वाऽसरूपविधिरिति भाष्ये स्थितम्। तथापि तत्रैव भाष्ये 'क्त्वायां वावचनम्' इति क्त्वाप्रत्ययविषये वाऽसरूपविधिप्रवृत्तेर्विशिष्य वचनादिह क्त्वापि भवतीत्यर्थः। वाऽसरूपविधिः स्त्रियामित्याधिकारात् प्रागूर्ध्वं च भवतीति पक्षान्तरमपि तत्रैव भाष्ये स्थितम्। तत्पक्षे क्त्वायां वाऽसरूपप्रवृत्तिर्निर्बाधेत्यास्तां तावत्। **अन्यथैवम्**। अन्यथा, एवम्, कथम्, इत्थम्, एषामव्ययानां द्वन्द्वात्सप्तमीबहुवचनम्। सिद्धः अप्रयोगः प्रयोगाभावः यस्य कृञः स सिद्धाप्रयोग इति विग्रहः। तदाह। **एषु कृञ इत्यादि**। ननु कृञः अप्रयोगे कथं तदर्थावगतिः।

दुमि। स्वादुमीत्यर्थग्रहणं व्याख्यानात्तदाह। **स्वाद्वर्थेष्विति**। **मान्तत्वमिति**। ननु स्वादौ इत्येव सूत्रमस्तु मास्त्वत्र णमुल्। खमुञेवानुवर्त्यताम्। 'अरुर्द्विषत्-' इति मुम्भविष्यति। एवं च निपातनं विनापि मान्तत्वं सिध्यतीति महल्लाघवमिति चेन्नैवम्। च्व्यन्तस्य मुम् न स्यादनव्ययस्येति वचनात्तथा स्वादुंकारमित्यत्र 'च्वौ च' इति दीर्घः स्यात्, संपन्नंकारमित्यादिषु 'अस्य च्वौ' इतीत्वं स्यात्। किं च स्त्रियां 'वोतो गुणवचनात्' इति ङीषि स्वाद्वीकारमिति स्यात्। अतोऽत्र स्वादुमीति रूपं निपात्यते। ततश्चानजन्तत्वान्नेत्वदीर्घौ न वा ङीष्। निपातनमिह भावप्रत्ययमात्र-

सिद्धोऽप्रयोगोऽस्यैवंभूतश्चेत्कृञ् । व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः । अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारम् भुङ्क्ते । इत्थं भुङ्क्ते इत्यर्थः । सिद्ध -इति किम् । शिरोऽन्यथा कृत्वा भुङ्क्ते । ३३४९ **यथातथयोरसूयाप्रतिवचने ।** (३-४-२८) कृञ सिद्धाप्रयोग इत्येव, असूयया प्रतिवचने । यथाकारमहं भोक्ष्ये, तथाकारं भोक्ष्ये, किं तवानेन । ३३५० **कर्मणि दृशिविदोः साकल्ये** (३-४-२९) कर्मण्युपपदे णमुल्स्यात् । कन्यादर्शं वरयति । सर्वाः कन्या

अर्थावगत्यभावे तत्प्रयोगो वा किमर्थं इत्यत आह । **व्यर्थत्वादिति** । निष्फलत्वादिति भावः । अर्थस्याविवक्षितत्वेऽपि णमुलप्रत्ययसाधुत्वार्थं तत्प्रयोग इति भावः । तदेव दर्शयति । **इत्थं भुङ्क्ते इत्यर्थ इति** । 'समानकर्तृकयोः पूर्वकाले' इत्यसंभवान्नानुवर्तते इति भावः । **सिद्धेति किमिति** । सिद्धाप्रयोगश्चेदिति किमर्थमित्यर्थः । भाष्ये अन्यथा कृत्वा चोदितमिति प्रयोगात् समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो बोध्यः । **यथातथयोः । इत्येवेति** । यथा तथा अनयोरुपपदयोः कृञः णमुल् स्यात्सिद्धाप्रयोगश्चेत् कृञिति फलितम् । असूयया प्रतिवचनमिति विग्रहः । 'कर्तृकरणे कृता बहुलम्' इति समासः । तदाह । **असूययेति । कर्मणि दृशिविदोः** । कर्मणीति नार्थनिर्देश इत्याह **कर्मण्युपपदे इति** । कर्मण्युपपदे तदर्थस्य धात्वर्थं प्रति कर्मभूतस्य साकल्ये गम्ये दृशिविदिभ्यां णमुल् इति फलितम् । समानकर्तृकयोः पूर्वकाले इत्यनुवर्तत एव । **वरयतीति** । 'वर ईप्सायाम्' चुरादौ कथादिरदन्तः । अल्लोपस्य

विषयकम् । तेन स्वादुंकृत्वेत्यपि सिध्यति । स्यादेतत्—उक्तदोषपरिहाराय स्वादुमीत्येव सूत्रमङ्गीक्रियतां, णमुल् तु त्यज्यतां, कृञः खमुञि कृतेऽपि स्वादुङ्कारमित्यादिरूपसिद्धिरिति चेन्मैवम् । तथा सत्युत्तरसूत्रेषु संनिहितत्वात् खमुञेवानुवर्तेत इति कन्यादर्शं ब्राह्मणवेदमित्यादिषु पूर्वपदस्य मुमागमः स्यादिति दिक् । **व्यर्थत्वादिति** । निष्प्रयोजनत्वादित्यर्थः । तदेतद्दर्शयति । **इत्थं भुङ्क्ते इत्यर्थ इति** । इह शाब्दबोधे विशेषसत्त्वेऽपि फलितार्थकथनपरतया कारमिति णमुलन्तस्य निष्फलत्वमुक्तमनतिप्रयोजनत्वात् । विस्तरस्तु मनोरमादावनुसन्धेयः । **शिरोऽन्यथेति** । इह शिरोऽन्यथा कृत्वौदनादिकं भुङ्क्ते इत्यर्थलाभाय करोतेः प्रयोग आवश्यकः । तदभावे तु भुक्तिक्रियागत एव प्रकारो गम्येत न तु शिरसोऽन्यथाकरणम् । अतः करोतेः प्रयोगार्हत्वमस्तीति णमुलन्तः करोतिरिह न प्रयुज्यत इति भावः । **यथाकारमिति** । प्रष्टुमनर्हः सन्यदि पृच्छति तदेदमुत्तरम् । अत्रापि वासरूपन्यायेन पक्षे क्त्वाप्रत्ययो बोध्यः । **कन्यादर्शमिति** । अत्र दर्शनविषयीभूतानां सर्वासां कन्यानां वाक्यार्थेऽन्वयात्साकल्यं बोध्यम् । **सर्वा इति** । दर्शनविषयीभूताः सर्वा इत्यर्थः । अतिशय-

इत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः । **३३५१ यावति विन्दजीवोः** (३-४-३०) यावद्वेदं भुङ्क्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते । **३३५२ चर्मोदरयोः पूरेः ।** (३-४-३१) कर्मणीत्येव । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते । **३३५३ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ।** (३-४-३२) कर्मण्युपपदे पूरेर्णमुल्स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये । गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । अस्य इति किम् । उपपदस्य मा भूत् । मूषिकाबिलप्रम् । **३३५४ चेले क्नोपेः ।** (३-४-३३) चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल्स्याद्वर्षप्रमाणे । चेलक्नोपं (शब्दाययन्) वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् । यथा वर्षेण

स्थानिवत्त्वाल्लोपधावृद्धिः । विन्दि विवृणोति **जानाति लभते विचारयति वेति ।** "सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्" इति प्रागुक्तम् । तत्र सत्तार्थकस्य विदेरिह न ग्रहणम् अकर्मकत्वादिति भावः । **यावति विन्दजीवोः ।** यावच्छब्द उपपदे विन्दतेः जीवतेश्च णमुलित्यर्थः । इह पूर्वकाल इति न संबध्यते, अयोग्यत्वाद् अप्रतीतेश्च । एवमन्यत्रापि । यावज्जीवमधीत । यावन्तं कालं जीवति तावन्तं कालमधीत इत्यर्थः । 'अकर्मकधातुभिर्योगे' इति कर्मत्वाद् यावच्छब्दाद् द्वितीया । **चर्मोदरयोः पूरेः ।** चर्मणि उदरे च कर्मण्युपपदे पूरयतेर्णमुलित्यर्थः । **चर्मपूरं स्तृणातीति ।** चर्म पूरयन् छादयतीत्यर्थः । **गोष्पदप्रमिति ।** पूरेर्णमुलि णिलोपे ऊलोपपक्षे च रूपम् । अत्र वृष्टगोष्पदपूरणक्षमत्वादल्पत्वं गम्यते । **अस्येति किमिति ।** पूरेरित्यर्थकम् । अस्येति किमर्थमित्यर्थः । **मूषिकाबिलप्रमिति ।** अस्येत्यनुक्तौ उपपदेऽपि ऊकारस्य लोपः स्यादिति भावः । **चेले क्नोपेः ।** चेल इत्यर्थग्रहणम्, व्याख्यानादिति भावः ।

प्रतिपादनपरमेतत् । **ब्राह्मणवेदमिति ।** विद ज्ञाने, विद्लृ लाभे, विद विचारणे इति धात्वर्थान् पर्यालोच्य व्याचष्टे । **जानातीत्यादि ।** सत्तार्थस्य विदेरनेकार्थत्वान्नेह ग्रहणमिति भावः । **यावति विन्द ।** विदेर्लाभार्थस्यानुकरणम् । तस्य हि विन्दतीत्यादौ 'शे मुचादीनाम्' इति नुमस्ति । **यावल्लभत इति ।** असाकल्यमनेन दर्शयति । साकल्ये हि 'कर्मणि दृशिविदोः–' इत्यनेनैव सिद्धम् । **चर्मोदर । कर्मणीवेति ।** एवं च पूरेरिति णयन्तस्य निर्देशो न तु केवलस्य । 'इक्श्तिपौ–' इति इका निर्देशः । तस्याकर्मकत्वादिति भावः । **चर्मपूरमित्यादि ।** चर्म पूरयित्वा । उदरं पूरयित्वा । उदरपूरणविशिष्टा भुजिक्रियेत्यर्थः । इह पूर्वकाले इति न संबध्यतेऽसंभवादप्रतीतेश्च । एवमन्यत्रापि यथासंभवं बोध्यम् । **चेले ।** व्याख्याना-

वस्त्रं शब्दायते तथाऽवर्षदित्यर्थः)। ३३५५ निमूलसमूलयोः कषः। (३-४-३४)। कर्मणीत्येव। कषादिष्वनुप्रयोगं वक्ष्यति। अत्र प्रकरणे पूर्वकाल इति न संबध्यते। निमूलकाषं कषति। समूलकाषं कषति। निमूलं समूलं कषतीत्यर्थः। एकस्यापि धात्वर्थस्य निमूलादिविशेषणसंबन्धाद्भेदः। तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः। ३३५६ शुष्कचूर्णरूक्षेषु पिषः (३-४-३५) एषु कर्मसु पिषेर्णमुल्। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषम्। रूक्षपेषम्। ३३५७ समूलाकृतजीवेषु हन्कृञ्ग्रहः। (३-४-३६)। कर्मणीत्येव। समूलघातं हन्ति। अकृतकारं करोति। जीवग्राहं गृह्णाति। जीवतीति जीवः। इगुपधलक्षणः कः। जीवन्तं गृह्णातीत्यर्थः। ३३५८ करणे हनः। (३-४-३७) पादघातं हन्ति। पादेन हन्तीत्यर्थः। यथाविध्यनु-

---

'क्नूयी शब्दे' इति भ्वादौ। तदाह। चेलक्नोपमिति। क्नोपशब्दार्थं स्फोरयति। शब्दाययन्निति। वर्षप्रमाणं स्फोरयितुमाह। यथा वर्षण इति। निमूलसमूलयोः कषः। निमूले समूले च कर्मण्युपपदे कषेर्णमुलित्यर्थः। वक्ष्यतीति। 'कषादिषु यथाविध्यनुप्रयोगः' इति णमुलप्रकृतेरनुप्रयोगं वक्ष्यतीत्यर्थः। न संबध्यते इति। अयोग्यत्वादप्रतीतेश्च इति भावः। णमुल्प्रकृतेरनुप्रयुज्यमानधातोश्च पौनरुक्त्यं परिहरति। एकस्यापीति। निमूलसमूलकषणापेक्षया केवलकषणमन्यत्। यथा इन्द्रो महेन्द्र इति भावः। तेन सामान्येति। निमूलसमूलकषणात्मकं कषणमिति बोधः। यथा महादेवो देव इत्यादाविति भावः। शुष्कचूर्णरूक्षेषु पिषः। कर्मस्विति। उपपदेष्विति शेषः। अत्र पिषधातोरनुप्रयोगः। समूलाकृत। समूल अकृत जीव एषां द्वन्द्वः। कर्मणीत्येव। समूलादिषु कर्मसूपपदेषु हन् कृञ् ग्रह् एभ्यो णमुलित्यर्थः। यथासंख्यमत्रेष्यते। जीवशब्दस्य भावघञन्तत्वे प्राणधारणं गृह्णातीत्यर्थः स्यात्, न तु जीवन्तं गृह्णातीत्यर्थः स्यादित्यत आह जीवतीति जीव इति। ननु 'अकर्तरि च कारके' इति पर्युदासात् कथं कर्तरि घञित्यत आह

दर्थग्रहणमित्याहुः। चेलार्थेष्विति। चेलक्नोपमित्यादि। यथा वर्षणे चेलानि शब्दायन्ते तथा वृष्ट इत्यर्थः। अन्ये तु क्नूयी शब्दे उन्दे च, उन्दी क्लेदने, क्लिदू आर्द्रीभावे, इत्येवं क्नोपमिति णमुलन्तस्य प्रकृत्यर्थं पर्यालोच्य यथा वर्षणेन चेलान्यार्द्रीभवन्ति तावद् वृष्ट इति व्याचख्युः। निमूलमिति। नियतं मूलमस्य निमूलम्। सह मूलेन समूलम्। निमूलसमूलकषणाभिन्नं कषणमिति। शाब्दबोधः। तेनेति। अत्रेदं बोध्यम्—सामान्यं विशेष्यं, विशेषस्तु विशेषणम्। आम्रो वृक्ष इत्यादौ आम्रो विशेषणं वृक्षस्तु विशेष्यमिति सर्वजनानुभवात्। यतश्चात्र निमूल-

प्रयोगार्थः सान्नित्यसमासार्थोऽयं योगः । भिन्नधातुसंबन्धे तु 'हिंसार्थानां च—' (सू ३३११) इति वक्ष्यते । ३३५९ स्नेहने पिषः । (३-४-३८) । स्निह्यते येन तस्मिन्करणे पिषेर्णमुल् । उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः । ३३६० **हस्ते वर्तिग्रहोः** । (३-४-३९) । हस्तार्थे करणे । हस्तवर्तं वर्तयति । करवर्तम् । हस्तेन गुलिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् । ३३६१ **स्वे पुषः** । (३-४-४०) करण इत्येव । स्व इत्यर्थग्रहणम् । तेन स्वरूपे पर्याये विशेषे च णमुल । स्वपोषं पुष्णाति । धनपोषम् । गोपोषम् । ३३६२ **अधिकरणे बन्धः** । (३-४-४१) । चक्रबन्धं बध्नाति ।

इत्युपधेति । **करणे हनः** । ननु 'हिंसार्थानां च समानकर्मकाणाम्' इत्यनुपदं वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह **यथाविधीत्यादि** । कषादिषु यथाविध्यनुप्रयोगसिद्ध्यर्थः सन् 'उपपदमतिङ्' इति नित्यसमासार्थोऽयमारम्भ इत्यर्थः । अनुप्रयोगार्थो नित्यसमासार्थश्चेति यावत् । हिंसार्थानां चेति सूत्रं च कषादिबहिर्भूतं, तस्यात्र प्रवृत्तौ तु अनुप्रयोगो न स्यात् । किंच 'हिंसार्थानां च' इति सूत्रम् 'उपदंशस्तृतीयायाम्' इत्युत्तरं पठितम् । तस्यात्र प्रवृत्तौ 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति वैकल्पिक उपपदसमासः स्यादिति भावः । भाष्ये तु अहिंसार्थं नित्यसमासार्थं चेति स्थितम् । तर्हि हिंसार्थानां चेत्यस्य को विषय इत्यत आह **भिन्नेति** । णमुल्प्रकृतिभूतहनधात्वपेक्षया धात्वन्तरयोगे तु दण्डोपघातं गाः कालयति दण्डेनोपघातमित्यत्र 'हिंसार्थानां च' इत्यस्य प्रवृत्तिर्वक्ष्यते इत्यर्थः । **स्नेहने पिषः** । **उदपेषमिति** । 'पेषंवासवाहनधिषु च' इति उदकशब्दस्य उदादेशः । **हस्ते वर्तिग्रहोः** । पञ्चम्यर्थे षष्ठी । हस्त इत्यर्थग्रहणं व्याख्यानात् । तथा च हस्तार्थक इति लभ्यते, करण इत्यनुवर्तते, तदाह **हस्तार्थे करणे इति** । करणकारकीभूतहस्तपर्याये उपपदे ण्यन्तवृतुधातोर्ग्रहधातोश्च णमुलित्यर्थः । **स्वे पुषः** । **अर्थग्रहणमिति** । व्याख्यानादिति भावः । **तेनेति** । स्वरूपे स्वशब्दे, स्वपर्याये धनादिशब्दे, विशेषेषु स्वविशेषवाचिगवादिशब्देषु चोपपदेषु णमुलित्यर्थः । एतच्च 'स्वं रूपम्' इति सूत्रे भाष्ये स्पष्टम् । तत्र स्वशब्दे उपपदे उदाहरति **स्वपोषमिति** । धनेन पुष्णातीत्यर्थः । पर्याये उपपदे उदाहरति **धनपोषमिति** । स्वविशेष उपपदे उदाहरति **गोपोषमिति** । **अधिकरणे** । अधिकरणे उपपदे बन्धधातोर्ण-

---

कषणादिकं विशेषणं केवलकषणं तु विशेष्यमिति । **स्नेहने** । 'शुष्कचूर्ण-' इति सूत्रे एव स्नेहनग्रहणं न कृतम् । तत्र हि 'कर्मणि दृशिविदोः' इति सूत्रात्कर्मणीत्यनुवर्तते इह तु पूर्वसूत्रात्करण इत्यनुवर्तनीयमिति । **हस्ते** । हस्त इत्यर्थग्रहणं

चक्रे बध्नातीत्यर्थः ३३६३ संज्ञायाम् । (३-४-४२) । बध्नातेर्णमुल्संज्ञायाम् । क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धम् । अट्टालिकाबन्धम् । बन्धविशेषाणां संज्ञा एताः । ३३६४ कर्त्रोर्जीवपुरुषयोर्नशिवहोः । (३-४-४३) । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः । ३३६५ ऊर्ध्वे शुषिपूरोः । (३-४-४४) । ऊर्ध्वे कर्तरि । ऊर्ध्वशोषं शुष्यति । वृक्षादिरूर्ध्व एव तिष्ठञ्छुष्यतीत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः । ३३६६ उपमाने कर्मणि च । (३-४-४५) चात्कर्तरि । घृतनिधायं निहितं जलम् । घृतमिव सुरक्षित-मित्यर्थः । अजकनाशं नष्टः । अजक इव नष्ट इत्यर्थः । ३३६७ कषादिषु यथाविध्यनुप्रयोगः । (३-४-४६) । यस्मात्णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः । तथैवोदाहृतम् । ३३६८ उपदंशस्तृतीयायाम् । (३-४-४७) । इतः प्रभृति पूर्वकाल इति संबध्यते । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (सू ७८४) इति वा समासः । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशम् । दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया । यद्यप्युपदंशिना सह न शाब्दः

मुलित्यर्थः । संज्ञायाम् । अनधिकरणार्थ आरम्भः । कर्त्रोः । 'नशिवहोः' इति पञ्चम्यर्थे षष्ठी । कर्तरि जीवे उपपदे नशेः, कर्तरि पुरुषे उपपदे वहधातोर्णमुलित्यर्थः । ऊर्ध्वे शुषि । ऊर्ध्वे कर्तरीति । उपपदे शुषेः पूरेश्च णमुलिति शेषः । उप-माने । चात्कर्तरीति । कर्मणि कर्तरि च उपमाने उपपदे धातोर्णमुलित्यर्थः । कषादिषु । यस्मादिति । धातोरिति शेषः । णमुलुक्त इति । 'निमूलसमूलयोः कषः' इत्यारभ्य 'उपमाने कर्मणि च' इत्यन्तैः सूत्रैरिति शेषः । तथैवोदाहृत-मिति । निमूलकाषं कषतीत्यादीति शेषः । एवं च पृथगिह नोदाहर्तव्यमिति भावः । उपदंशस्तृतीयायाम् । संबध्यते इति । मण्डूकप्लुत्येति शेषः । तृतीयान्ते उपपदे उपपूर्वाद्दंशधातोर्णमुल् समानकर्तृकयोः पूर्वकाले इत्यर्थः । नित्य-मुपपदसमासमाशङ्क्य आह । तृतीयाप्रभृतीनीति । ननु मूलकेनोपदंशं भुङ्क्ते इत्यत्र मूलकस्य उपदंशनं प्रति कर्मत्वात् कथं मूलकात् तृतीया, कथं वा उपदंशात् णमुल् इत्यतः आह । दश्यमानस्येत्यादि । प्रधानक्रियानुरोधात् परत्वाच्चेति भावः । ननु मूलस्य भुजिक्रियां प्रति करणत्वे उपदंशनेन असामर्थ्यात्समासानुपपत्ति-रिति शङ्कते । यद्यपीति । उपदंशिना सह मूलकस्य कर्मत्वेनान्वयः शब्दगम्यो

तदाह । हस्तार्थे इति । संज्ञायाम् । अनधिकरणार्थ आरम्भः । तथैवेति । निमूलकाषं कषतीत्याद्युदाहृतमित्यर्थः । मूलकोपदंशमिति । अयमर्थः—मूलकेन

संबन्धस्तथाप्यार्थोऽस्त्येव, कर्मत्वात् । एतावतैव सामर्थ्येन प्रत्ययः समासश्च । तृतीयायामिति वचनसामर्थ्यात् । (ततश्चायमर्थः । मूलकेन भुङ्क्ते इति

न भवति । तस्य भुजिक्रियां प्रति करणत्वेनान्वयस्योक्तत्वादित्याक्षेपः । समाधत्ते । **तथापीति** । भुजिक्रियां प्रति शाब्दमर्यादया करणत्वेनान्वितस्यापि मूलकस्योपदंशनं प्रति आर्थिकः कर्मत्वान्वयोऽस्त्येव । मूलकस्योपदंशनं प्रति वस्तुतः कर्मत्वस्य सत्त्वादित्यर्थः । नन्वार्थिककर्मत्वान्वयमादाय कथं तृतीया, कथं वा णमुल, कथं वा समास इत्यत आह । **एतावतैवेति** । कुत एतदित्यत आह । **तृतीयायामिति वचनसामर्थ्यादिति** । यदि तृतीयान्ते शाब्दान्वय एवात्र विवक्ष्येत, तदा करण इत्येवावक्ष्यत् 'करणे हनः' इतिवदिति भावः । मूलकस्य भुजिक्रियां प्रति करणत्वान्वयः शाब्दः । उपदंशे कर्मत्वान्वयः आर्थिक इत्येतदुपपादयति । **ततश्चायमर्थ**

भुङ्क्ते । किं कृत्वा, उपदश्य । किमुपदश्य, अर्थान्मूलकमिति संबध्यते । **एतावतैवेति** । शाब्दान्वयाभावेऽपि आर्थिकान्वयमात्रेणेत्यर्थः । **वचनसामर्थ्यादिति** । यदि हि तृतीयान्तेन शाब्दान्वये सत्येव प्रत्ययो भवेत्तर्हि 'करणे हनः' इतिवत् 'उपदंशः करणे' इत्येव ब्रूयात् । ततश्च क्रियान्तरं प्रति करणत्वं मूलकेनेत्यस्येष्टमिति भावः । एतच्च मनोरमाग्रन्थानुसारेणोक्तम् । अत्र केचित्—नन्वेवम् 'उपदंशः कर्मणि' इत्येव सूत्रमस्तु । अत्रोपदंश इत्येवास्तु उपमाने कर्मणीत्यतः कर्मणीत्यनुवर्त्य कर्मण्युपपदे उपपूर्वकाद्दशेर्णमुलिति । व्याख्यायतां किमनया कुसृष्ट्येति । न चैवं कर्मण्युपपदे नित्यसमासः स्यादिति वाच्यम् । करणे इत्युक्तेऽप्युक्तदोषस्य तुल्यत्वात् । न च 'तृतीयाप्रभृतीनि–' इति सूत्रे करणप्रभृतीनीत्युक्ते नास्त्येव दोषः । 'करणे हनः' इत्यारभ्य विकल्प इति संदेहवारणाय 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति परिभाषास्वीकारादिति वाच्यम् । 'तृतीयाप्रभृति–' इति सूत्रे कर्मणिप्रभृतीत्युक्तेऽपि दोषाभावात् । ''कर्मण्याक्रोशे कृञः खमुञ्' 'कर्मणि दृशिविदोः–' इत्यारभ्य वा विकल्प इति संदेहस्य 'व्याख्यानतो विशेषप्रतिपत्तिः' इति परिभाषया वारयितुं शक्यत्वात् । तस्माद् 'उपदंशः करणे' इत्येव ब्रूयात् इति मनोरमा चिन्त्येत्याहुः । वस्तुतस्तु कर्मणि प्रभृतीत्यन्यतरस्यामित्युक्ते 'उपमाने कर्मणि च' इत्यतः कर्मणीत्यनुवर्त्य उपदंश इत्येव सूत्रमिति स्वीकारपक्षे कषादिषु यथाविध्यनुप्रयोगोऽपि विकल्पेन स्यात् । मण्डूकप्लुत्याश्रयणं त्वगतिकगतिः । उपदंशः कर्मणीति सूत्रस्वीकारपक्षेऽपि मूलकोपदंशमिति समासस्य वैकल्पिकत्वात्समासाभावपक्षे मूलकमुपदंशमिति वाक्यं स्यात्, इष्यते तु मूलकेनोपदंशमिति । करणे प्रभृतीनीति मनोरमोक्तौ तु समासाभावपक्षे मूलकेनोपदंशमिति सिध्यत्येव, करणतृतीयायाः

शाब्दान्वये किं कृत्वेत्याकाङ्क्षया उपदर्श्येति तदेव कर्मत्वेनान्वेति)। ३३६९ **हिंसार्थानां च समानकर्मकाणाम् । (३-४-४८)**। तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थात् णमुल्स्यात् । दण्डोपघातं गाः कालयति दण्डेनोपघातम् । दण्डताडम् । समानकर्मकाणाम् इति किम्? दण्डेन चोरमाहत्य गाः कालयति । ३३७० **सप्तम्यां चोपपीडरुधकर्षः । (३-४-४९)** । उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्स्यात् । पार्श्वोपपीडं शेते, पार्श्वयोरुपपीडम्, पार्श्वाभ्यामुपपीडम्। व्रजोपरोधं गाः स्थापयति । व्रजेन व्रजे उपरोधं वा। पाण्युदकर्षं धानाः संगृह्णाति पाणावुपकर्षम् पाणिनोपकर्षम्। ३३७१ **समासत्तौ (३-४-५०)**।

इति । मूलकेन भुङ्क्ते इत्यन्वयः शाब्दः। प्रधानक्रियानुरोधात्परत्वाच्च तृतीयाविभक्तेः प्रवृत्तेरिति भावः । **किं कृत्वेति** । किं कृत्वा मूलकेन भुङ्क्ते इत्याकाङ्क्षायां उपदर्श्येत्यन्वेतीत्यर्थः । **तदेवेति** । किमुपदर्श्येत्याकाङ्क्षायां तदेव मूलकमर्थात् कर्मत्वेनान्वेतीत्यर्थः । **हिंसार्थानां च । दण्डोपघातं गाः कालयतीति** । 'कल विक्षेपे' चुरादिः । तत्रानुप्रयुज्यमानकालयतेरुपहन्तेश्च गावः कर्म । अतः समानकर्मकत्वमुपहन्तेरिति भावः । **दण्डेनोपघातमिति** । तृतीयाप्रभृतीन्यन्यतरस्यामिति उपपदसमासविकल्प इति भावः । **दण्डताडमिति** । 'तड आघाते' चुरादिः। **सप्तम्यां चोपपीड** । चात्तृतीयायामिति समुच्चीयते । 'कृष विलेखने' इति धातोः शपि कृतलघूपधगुणस्य कर्षेति निर्देशः । अतस्तौदादिकस्य निरासः । पीड, रुध, कर्ष, एषां समाहारद्वन्द्वात्पञ्चम्यर्थे प्रथमा । पुंस्त्वं चार्षम् । उपपूर्वः पीडरुधकर्षः इति मध्यमपदलोपिसमासः । तदाह । **उपपूर्वेभ्य इति** । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पं मत्वा आह । **पार्श्वयोरुपपीडमिति** । तौदादिकात्तु कृषेः क्त्वाप्रत्यय एव न तु णमुल् । क्षेत्रे उपकृष्य बीजान्यावपति । हलेनोपकृष्येति । यद्यपि तौदादिकोऽपि विलेखनार्थक एव तथापि

प्रवृत्तेरिति दिक् । **कालयतीति** । कल विक्षेपे चुरादिः । प्रेरयतीत्यर्थः । **दण्डताडमिति** । तड आघाते । अयमपि चुरादिरेव । **सप्तम्यां चो । उपपूर्वेभ्य इति** । सूत्रे पीडादीनां समाहारद्वन्द्वं कृत्वा उपपूर्वः पीडरुधकर्ष इति उत्तरपदलोपी समास इति भावः । इह सौत्रं पुंस्त्वं पञ्चम्यर्थे प्रथमेति ज्ञेयम् । कर्षेति शपा निर्देशः। कृष विलेखने इत्यस्य गुणसहितस्योच्चारणात् । तत्फलं तुदादेर्व्युदासः । यद्यपि विलेखन एव सोऽपि पठ्यते तथापि क्षेत्रविषयकविलेखन एव स प्रयुज्यते । पञ्चभिर्हलैः कर्षतीति दर्शनात् । एवंच तौदादिकात् कृषेः क्त्वाप्रत्यय एव भवति क्षेत्रे

तृतीयासप्तम्योर्धातोर्णमुल्स्यात्सन्निकर्षे गम्यमाने । केशग्राहं युध्यन्ते (युद्धसंरम्भात्) । केशेषु गृहीत्वा । हस्तग्राहम् हस्तेन गृहीत्वा । ३३७२ **प्रमाणे च ।** (३-४-५१) तृतीयासप्तम्योरित्येव । व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति । व्यङ्गुलेन व्यङ्गुले वोत्कर्षम् । ३३७३ **अपादाने परीप्सायाम् ।** (३-४-५२) परीप्सा त्वरा । शय्योत्थायं धावति । एवं नाम त्वरते यदवश्यकर्तव्यमपि नापेक्षते । शय्योत्थानमात्रमपेक्षते । ३३७४ **द्वितीयायां च ।** (३-४-५३) परीप्सायामित्येव । यष्टिग्राहं युध्यन्ते । लोष्टग्राहम् । ३३७५ **अपगुरो णमुलि ।** ६-१-५३) । 'गुरी उद्यमने' इत्यस्यैचो वा आत्स्याण्णमुलि । अस्यपगारं युध्यन्ते । अस्यपगोरम् । ३३७६ **स्वाङ्गेऽध्रुवे ।** (३-४-५३) द्वितीयायामित्येव । अध्रुवे स्वाङ्गे द्वितीयान्ते धातोर्णमुल् ।

क्षेत्रविषयविलेखन एव तस्य प्रवृत्तेरित्याहुः । **समासत्तौ ।** समासत्तिपदं विवृणोति **संनिकर्षे गम्यमाने इति ।** संनिकर्षोऽव्यवधानेन संयोगः । **केशग्राहमिति ।** संनिकर्षपरमेतत् । अत्यन्तं संनिहिता युध्यन्ते इत्यर्थः । तदाह **युद्धसंरम्भादिति ।** युद्धातिशयवशाथोद्धारः परस्परम् अत्यन्तं संनिहिता भवन्तीत्यर्थः । **प्रमाणे च । इत्येवेति ।** तृतीयान्ते सप्तम्यन्ते चोपपदे धातोर्णमुल् स्यात् प्रमाणे गम्ये इत्यर्थः । ह्रस्वः खण्डः खण्डिका । **द्व्यङ्गुलेनेति ।** 'तत्पुरुषस्याङ्गुलेः' इति टजिति भावः । **अपादाने ।** अपादाने उपपदे धातोर्णमुल् स्यात् परीप्सायां गम्यमानायामित्यर्थः । त्वरां दर्शयितुमाह **एवं नामेत्यादि । द्वितीयायां च ।** द्वितीयान्ते उपपदे

उपकृष्य हलेनोपकृष्येति, न त्विह णमुलिति स्थितमाकरे । **समासत्तौ । केशग्राहमिति ।** केशेषु ग्रहणं भवतु वा मा भूत् संनिकर्षप्रतिपादनपरमेतत् । **द्व्यङ्गुलोत्कर्षमिति ।** द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम् । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' इत्यच् समासान्तः । द्व्यङ्गुलेनोत्कृष्य । परिच्छिद्येत्यर्थः । स्वल्पः खण्डः खण्डिका ह्रस्वः खण्डः खण्डिकेति मनोरमायामुक्तम् । यद्यपि ह्रस्वशब्दो वामनपर्यायतया चेतनेष्वेव प्रायेण प्रयुज्यते अल्पे ह्रस्वे इति पृथक् सूत्रस्वारस्यात्, तथापि ह्रस्वदीर्घ इत्यादिनिर्देशादचेतनेष्वपि क्वचिद्भवतीत्याहुः । **द्विती- । परीप्सायामित्येवेति ।** कथं तर्हि 'अनुदात्तं पदमेकवर्जम्' इति । नह्यत्र त्वरा गम्यते । अत्राहुः—अस्यां हि परिभाषायां त्वरा विवक्षिता । तेनायमर्थः—उदात्तः स्वरितो वा यत्र विधीयते तत्र तत्समकालमेवैकमचं वर्जयित्वा परिशिष्टमनुदात्तं कर्तव्यं न विलम्बितव्यमिति । **यष्टिग्राहमित्यादि ।** एवं खलु युद्धाय त्वरन्ते यदासन्नं यष्ट्यादिकमपि गृहीत्वा धावन्ति नायुधं प्रतीक्षन्त इति भावः । **अस्य-**

भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपम् । अध्रुवे किम् । शिर उत्क्षिप्य । येनाङ्गेन विना न जीवनं तद् ध्रुवम् । ३३७७ **परिक्लिश्यमाने च** । (३-४-५५) सर्वतो विबाध्यमाने स्वाङ्गे द्वितीयान्ते णमुल्स्यात् । उरःप्रतिपेषं युध्यन्ते । कृत्स्नमुरः पीडयन्त इत्यर्थः । 'उरोविदारं प्रतिचस्करे नखैः' । ध्रुवार्थमिदम् । ३३७८ **विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः** । (३-४-५६) द्वितीयायामित्येव । द्वितीयान्त उपपदे विश्यादिभ्यो णमुल्स्याद्व्याप्यमाने आसेव्यमाने चार्थे गम्ये । गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन संबन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा । 'नित्यवीप्सयोः' (सू २१४०) इति द्वित्वं तु न भवति । समासेनैव स्वभावतस्तयोरुक्तत्वाद् । यद्यप्याभीक्ष्ण्ये णमुलुक्त एव, तथापि असति आसेवार्थकणमुलि आभीक्ष्ण्यणमुलः 'तृतीयाप्रभृतीनि' इत्यत्र संग्रहाभावाद् उपपदसंज्ञार्थमासेवायामिह पुनर्विधिः । गेहानुप्रवेशमास्ते । गेहंगेहमनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशम् । एवं गेहानुप्रपातम् । गेहानुप्रपादम् ।

धातोर्णमुलित्यर्थः **स्वाङ्गेऽध्रुवे** । अध्रुवे इति छेद इति मत्वा आह **अध्रुव इति** । ननु शिर उत्क्षिप्येति कथं प्रत्युदाहरणम् । शिरसोऽपि अध्रुवत्वादित्यत आह **येनाङ्गेनेति** । **परिक्लि** । **उरोविदारमिति** । कृत्स्नमुर इत्यर्थः । **प्रतिचस्कर इति** । कॄ विक्षेपे प्रतिपूर्वात्कर्मणि लिट् । 'सुट्कात्पूर्व' इति 'अडभ्यासव्यवायेऽपि' इति चानुवृत्तौ 'किरतौ लवने' 'हिंसायां प्रतेश्च' इति सुट् । नखैः प्रतिचिक्षिपे इत्यर्थः । ननु उरःप्रतिपेषमित्यादौ स्वाङ्गत्वादेव पूर्वसूत्रेणैव सिद्धमित्यत आह **ध्रुवार्थमिति** । उरो विना जीवनाभावाद् उरः ध्रुवमिति भावः । **विशिपति** । **गेहादिद्रव्याणामिति** । तथा च गेहानुप्रवेशमास्ते इत्यत्र सर्वाणि गेहान्यनुप्रविश्येति पुनःपुनर्गेहमनुप्रविश्येति वा अर्थः । उभयथापि न द्वित्वमित्याह **नित्यवीप्सयोरिति द्वित्वं तु न भवतीति** । कुत इत्यत आह **समासेनैवेति** । ननु समासेन कथमिह कथनं व्याप्त्यासेवयोरित्यत आह **स्वभावत इति** । ननु 'आभीक्ष्ण्ये णमुल् च' इत्यनेनैव सिद्धत्वाद् इह आसेवाग्रहणं व्यर्थम् । न च क्त्वानिवृत्तिः फलमिति शङ्क्यम् । क्त्वाप्रत्ययस्यापि पक्षे इष्टत्वादिति शङ्कते **यद्यपीति** । समाधत्ते **तथापीति** । द्वितीयान्तस्योपपदसंज्ञार्थमित्यर्थः । नन्विह आसेवाग्रहणाभावे 'तत्रोपपद'मिति उपपदसंज्ञा कुतो नेत्यत आह **असति हीति** । यद्यप्यासेवायां णमुलविध्यभावेऽपि 'आभीक्ष्ण्ये णमुल् च' इति णमुल् सिध्यति तथापि 'आभीक्ष्ण्ये णमुल् च' इति सूत्रे द्वितीयान्तस्य सप्तम्या निर्देशेन ग्रहणाभावादुपपदसंज्ञा न स्यात् । ततश्च 'तृतीया-

---

पगोरमिति । असिमुद्यम्येत्यर्थः । **उपपदसंज्ञार्थमिति** । 'विशिपति-' इति

गेहानुस्कन्दम् । असमासे तु गेहस्य णमुलन्तस्य च पर्यायेण द्वित्वम्। **३३७९ अस्यतितृषोः क्रियान्तरे कालेषु।** (३-४-५७) क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः । तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु द्वितीयान्तेषूपपदेषु णमुल्स्यात् । द्व्यहात्यासं गाः पाययति । द्व्यहमत्यासम्। द्व्यहतर्षम् । द्व्यहं तर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः। **३३८० नाम्न्यादिशिग्रहोः।** (३-४-५८) द्वितीयायामित्येव । नामादेशमाचष्टे । नामग्राहमाह्वयति । **३३८१ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ।** (३-४-५९) अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य च नीचैः कथनम्। उच्चैःकृत्य, उच्चैः कृत्वा, उच्चैःकारमप्रियमाचष्टे। नीचैःकृत्य, नीचैःकृत्वा, नीचैःकारं प्रियं ब्रूते। **३३८२ तिर्यच्यपवर्गे।** (३-४-६०) तिर्यक्छब्द उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम् । तिर्यक्कृत्य गतः। तिर्यक्कारम्। समाप्य गत

प्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पो न स्यादिति भावः । **असमासे त्विति।** व्याप्तिणमुलि गेहस्य व्याप्यमानत्वाद् द्वित्वम् । आसेवायां णमुलि तु णमुलन्तस्य द्वित्वम्। क्रियापौनःपुन्यस्यैव आसेवात्वादिति भावः । **अस्यतितृषोः। द्व्यहात्यासमिति।** द्व्यहमतिक्रम्येत्यर्थः। अतिपूर्वादस्यतेर्णमुल् । **द्व्यहतर्षमिति।** द्व्यहं तृष्णावतीः कुर्वन्त्यर्थः। **नाम्न्यादिशिग्रहोः।** नाम्नि आदिशिग्रहोरिति छेदः। पञ्चम्यर्थे षष्ठी। द्वितीयान्ते नामन्शब्दे उपपदे आङ्पूर्वकदिशेः ग्रहधातोश्च णमुलित्यर्थः **अव्ययेऽयथाभि।** अप्रियस्य नीचैः कथनं, प्रियस्योच्चैः कथनं च अभिप्रेतम् इष्टम्, तद्विपरीतम् अनभिप्रेतम् । तदाह **अयथाभिप्रेताख्यानं नामेत्यादि।** 'तृतीया प्रभृतीन्यन्यतरस्याम्' इति समासविकल्पं मत्वा आह **उच्चैःकृत्य उच्चैः कृत्वेति।** समासपक्षे ल्यबिति भावः। **उच्चैःकारमिति ।** अत्र समासतदभावयोर्नास्ति विशेषः । स्वरे तु विशेषः। **तिर्यच्यपवर्गे।** 'तिरश्चीति

सूत्रे द्वितीयायामित्यनुवर्तनात्तदन्तस्योपपदसंज्ञार्थमित्यर्थः । **अव्यये। अयथेति।** न यथाभिप्रेतमयथाभिप्रेतं तथाख्यान इत्यर्थः। प्रियस्योच्चैः, अप्रियस्य नीचैः कथनं यथाभिप्रेताख्यानम् । तद्विपरीताख्याने इति यावत् । नन्वप्रियाख्याने इत्येव कुतो नोक्तमिति चेदत्राहुः—प्रियस्य नीचैः कथनमपि प्रियाख्यानमेव, न त्वप्रियाख्यानमिति 'नीचैःकृत्य नीचैःकारं प्रियं ब्रूते' इति प्रयोगो न स्यात्। तथा अप्रियस्य नीचैः कथनमप्यप्रियाख्यानमिति । नीचैःकृत्य नीचैःकारमप्रियं ब्रूत इति प्रयोगोऽपि स्यादित्ययथाभिप्रेताख्याने इत्युक्तमिति । **तिर्यक्कृत्वेति।** अनृजुत्वादप्रतः

इत्यर्थः। अपवर्गे किम्। तिर्यक्कृत्वा काष्ठं गतः। **३३८३ स्वाङ्गे तस्प्रत्यये कृभ्वोः।** (३-४-६१) मुखतःकृत्य गतः, मुखतः कृत्वा, मुखतः कारम्। मुखतो भूय, मुखतो भूत्वा, मुखतो भावम्। **३३८४ नाधार्थप्रत्यये च्व्यर्थे।** (३-४-६२) नाधार्थप्रत्ययान्ते च्व्यर्थविषय उपपदे कृभुवोः क्त्वाणमुलौ स्तः। अनाना नाना कृत्वा नानाकृत्य नानाकृत्वा नानाकारम्। विनाकृत्य विनाकृत्वा विनाकारम्। नानाभूय नानाभूत्वा नानाभावम्। अनेकं द्रव्यमेकं भूत्वा एकधाभूय एकधाभूत्वा एकधाभावम्। एकधाकृत्य एकधाकृत्वा एकधाकारम्। प्रत्ययग्रहणं किम्। हिरुक्कृत्वा। पृथग्भूत्वा। **३३८५**

भवितव्यं सौत्रो निर्देश' इति भाष्यम्। अपवर्ग इत्यस्य विवरणम् **समाप्ताविति।** **स्वाङ्गे तस्प्रत्यये।** पञ्चम्यर्थे षष्ठीद्विवचनम्। तस प्रत्ययो यस्मादिति बहुव्रीहिः। तस् प्रत्ययान्ते स्वाङ्गे उपपदे कृञो भुवश्च क्त्वाणमुलावित्यर्थः। इह न यथासंख्यं व्याख्यानात्। **नाधार्थ।** 'विनञ्भ्यां नानाञौ नसह' इति सूत्रे असहत्वे विनञ्भ्यां नाप्रत्ययो विहितः। 'संख्याया विधार्थे धा' इति धाप्रत्ययो विहितः। तस्य अर्थ इव अर्थो यस्य सः धार्थः। नाप्रत्ययो धार्थकश्च प्रत्ययो यस्मादिति बहुव्रीहिः। तदाह **नाधार्थप्रत्ययान्ते इति।** नाप्रत्ययान्ते धार्थप्रत्ययान्ते उपपद इत्यर्थः। अर्थग्रहणं धाप्रत्ययमात्रेऽन्वेति। तेन धमुञोऽपि ग्रहणं लभ्यते। नाप्रत्यये त्वर्थग्रहणं नान्वेति. नाप्रत्ययान्ते धार्थप्रत्ययान्ते च्व्यन्तविषये उपपदे इत्यर्थः। अत एव भाष्ये अर्थग्रहणं

स्थितं पार्श्वतः कृत्वा गत इत्यर्थः। **स्वाङ्गे।** तस्प्रत्ययो यस्मात्तस्प्रत्ययस्तस्मिन्स्वाङ्गे उपपदे इत्येके। प्रत्ययग्रहणपरिभाषया तस्प्रत्ययान्ते स्वाङ्गे इत्यन्ये। तस चासौ प्रत्ययश्चेति कर्मधारयः। तस्प्रत्यये परतो यत्स्वाङ्गं तस्मिन्नुपपद इति तु प्राञ्चः। तत्र यद्यपि स्वाङ्गमात्रं नोपपदं तथापि तस्मिन्नित्येतत्प्रकृतिप्रत्ययसमुदायपरमिति बोध्यम्। **मुखतःकारं मुखतोभूयेति।** क्त्वाणमुलोः कृभुवोश्च यथासङ्ख्यं नेष्यत इति भावः। **मुखत** इत्यत्राद्यादित्वात्सप्तम्यर्थे तसिः। प्रत्ययग्रहणं किम्?। मुखे तस्यति मुखतः। तसु उपक्षये क्विप्। धातुत्वादिह 'अत्वसन्तस्य' इति दीर्घो न। मुखतः कृत्वा गत इति काशिकादौ स्थितम्। वस्तुतस्तु प्रत्ययाऽप्रत्ययपरिभाषयै-वेष्टसिद्धेः प्रत्ययग्रहणं सुत्यजम्। **नाधार्थ।** नाञौ 'विनञ्भ्या' मिति विहितौ नानाञौ। **धार्थाः।** 'द्वित्र्योश्च धमुञ्' इति धमुञादयः। 'सङ्ख्याया विधार्थे धा' इति धाप्रत्ययो धाऽर्थको भवतीत्याशयेनोदाहरति। **एकधाभूयेत्यादि।** एवं द्वैधङ्कृत्य द्वैधम्भूय द्वैधम्भावमित्याद्युदाहर्तव्यम्। ननु नानाञौ प्रत्ययौ, धा च प्रत्ययः, धमुञादिविधौ तु एकाद्धो ध्यमुञन्यतरस्या' मित्यतो 'ध' इत्यनुवर्त्य तेषामादेशत्वाश्रयणेऽपि स्थानि-

तूष्णीमि भुवः। (३-४-६३) तूष्णींशब्दे उपपदे भुवः क्त्वाणमुलौ स्तः। तूष्णींभूय तूष्णींभूत्वा तूष्णींभावम्। भूग्रहणं कृञो निवृत्त्यर्थम्। ३३८६ **अन्वच्यानुलोम्ये।** (३-४-६४) अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्त आनुकूल्ये गम्यमाने। अन्वग्भूय आस्ते। अन्वग्भूत्वा अन्वग्भावम्। अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्त इत्यर्थः। आनुलोम्ये किम्। अन्वग्भूत्वा तिष्ठति। पृष्ठतो भूत्वेत्यर्थः।

इत्युत्तरकृदन्तप्रकरणम्।

किम्? द्विधाकृत्य द्वैधंकृत्येत्येवोक्तम्। **तूष्णीमि भुवः।** ननु 'स्वाङ्गे तस्प्रत्यये कृभ्वोः' इत्यतः अनुवृत्त्यैव सिद्धे भूग्रहणं व्यर्थमित्यत आह **कृञो निवृत्त्यर्थमिति।** **अन्वच्यानुलोम्ये।** अनूचीत्येव वक्तुमुचितं सौत्रोऽयं निर्देशः। तिर्यच्यपवर्गे इतिवत्। आनुलोम्यम् आनुकूल्यम्। **पृष्ठतो भूत्वेति।** अग्निप्रथमाः प्रतिपद्यन्ते अन्वगध्वर्युः' इत्यादौ अन्वक्शब्दस्य पृष्ठभागे प्रसिद्धेरिति भावः। इत्युत्तरकृदन्तप्रकरणम्।

वद्भावेन धमुआदिर्णप्रत्ययो भवतीति किमर्थं प्रत्ययग्रहणमित्याक्षिपति। **प्रत्ययग्रहणमिति।** यद्यप्युक्तरीत्या धाग्रहणेन धमुआदेर्ग्रहणं संभवतीत्यर्थग्रहणमिह व्यर्थं तथापि 'धमुञन्तात्स्वार्थे डदर्शन' मिति डप्रत्ययान्तसङ्ग्रहार्थमर्थग्रहणं, तत्फलं तु द्वैधीकृत्येत्यादिप्रयोगः। **तूष्णीमि।** कृञो निवृत्त्यर्थं तूष्णीङ्ग्रहणम्। **अन्वच्या।** नन्विह 'अचः' इत्यकारलोपे 'चौ' इति पूर्वस्याऽणो दीर्घेऽनूचीति निर्देष्टुमुचितम्। 'द्युप्रागपागिति' सूत्रे 'प्रतीचो य' दितिवत्। एवं 'तिर्यच्यपवर्गे' इति सूत्रेऽपि 'तिरश्ची' त्येव निर्देष्टुमुचितमिति चेत्। अत्र केचित्—शास्त्रोक्तं कार्यमर्थवत्येव भवति। अर्थश्च लोके प्रसिद्ध एव गृह्यते। 'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः' इति न्यायात्। अतोऽनुकरणे न भविष्यतीत्यन्वचीति सम्यगेवेति। तच्चिन्त्यम्। एवं तर्हि 'ज्ञियो दीर्घात्' इत्यादावियङादिकं न स्यात्। 'प्रतीचो य' दित्यपि न सिध्येदिति। वस्तुतस्तु 'प्रकृतिवदनुकरण' मित्यस्य वैकल्पिकत्वादन्वचीत्यादिनिर्देशे तु न दोषः। वैकल्पिकत्वं च 'यत्तदेतेभ्यः' इति सूत्रे त्यदाद्यत्वस्य करणादेकशेषाऽभावदर्शनाच्च निर्णीयत इति प्रागेव प्रपञ्चितम्। **अग्रत इत्यादि।** अन्वक्शब्दस्यानुकूल्यमात्रे विश्रान्तेर्देशविशेषवाचित्वे नियमो नेति ध्वनयितुमिदम्। **पृष्ठतो भूत्वेत्यर्थ इति।** इहान्वक्शब्देनानुकूलोऽननुकूलो वेति न स्पृश्यति, तस्य देशविशेषमात्रे पर्यवसानात्। प्रमाणान्तरेण क्वचिदिहानुकूल्यलाभेऽपि अन्वक्शब्दस्य तत्समर्पणे व्यापाराऽभावाण्णमुल् न, किन्तु क्त्वैव भवतीति व्यवस्था बोध्या। इत्युत्तरकृदन्तम्।

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम् ॥

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशारथचक्राकारादिबहुगुणविराजमानप्रौढापरिमितमहाध्वरस्य श्रीशाहजी शरभजी तुकोजी भोसल-चोलमहीमहेन्द्रामात्य-धुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तद्यानिर्वर्तितापरिमिताग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन पदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण बौधायनापस्तम्बसत्याषाढभारद्वाजकात्यायनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायाम् उत्तरार्धं सम्पूर्णम्

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणसेवकज्ञानेन्द्रसरस्वतीकृतायां सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां कृदन्तं समाप्तम् ।

समाप्ता चेयं तत्त्वबोधिनी ।

॥ सुबोधिनीव्याख्यासंवलिता ॥
वैदिकी प्रक्रिया ॥ २७ ॥
प्रथमोऽध्यायः ।

३३८७ छन्दसि पुनर्वस्वोरेकवचनम् । (१-२-६१) द्वयोरेक

श्रीगणाधीशाय नमः ।

सिन्दूरेण विराजितं त्रिनयनं दिक्संख्यदोर्भिर्युतं
भक्तानुग्रहकारकं प्रमदयाश्लिष्टं सदानन्दनम् ।
अष्टाविंशतिवर्णकैश्च सततं यं चिन्तयन्ते जना-
स्तं देवं गणपं स्मरामि सततं चन्द्रार्धचूडं विभुम् ॥ १ ॥
यस्तर्कादिसमस्ततन्त्रकमलव्रातप्रसादेष्विव
प्रत्यक्षप्रमितः परः किरणवानन्वर्थगोवर्धनः ।
सोऽयं पण्डितमण्डलोद्भटरटद्वादीन्द्रवृन्दाग्रणीः
श्रीरामाङ्घ्रिनिषेवकः समजनि श्रीमौनिगोवर्धनः ॥ २ ॥
रघुनाथपदारविन्दसेवावशतस्तस्य बभूव नन्दनः ।
रघुनाथ इतीज्यनामगम्यो रघुनाथाङ्घ्रिनिषेवकः सुधीः ॥ ३ ॥
बभूवुस्तस्य चत्वारस्तनयाः सुनया बुधाः ।
महादेवाभिधः श्रेष्ठो महाभाष्यसुभाषितः ॥ ४ ॥
रामकृष्णो द्वितीयोऽसौ रामकृष्णाङ्घ्रिसेवकः ।
तृतीयो जयकृष्णोऽस्मि श्रीकृष्णो नाम सूद्भवः ॥ ५ ॥
श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः ।
नत्वा मुनित्रयं हृद्यां टीकां कुर्वे सुबोधिनीम् ॥ ६ ॥
सुशब्दव्रातश्रीकुमुदवनविद्योतनकरी सदा सद्व्युत्पत्तिप्रसरणपरानन्दनकरी ।
कुशब्दध्वान्तस्य प्रसभमभिविध्वंसनकरी कृतिर्भूयादेषा बुधजनमनःप्राङ्गणचरी ७

इयता प्रबन्धेन लौकिकेषु शब्देष्वन्वाख्यातेष्वपि वैदिकान्वाख्यानमवशिष्यते । न चेदमप्रयोजनम् । 'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' इति वदता भाष्यकारेण

श्रीगणेशाय नमः। अथ वैदिकेषु विशेषमाह-**छन्दसि पुन**। पुनर्वस्वोर्द्वि

वचनं वा स्यात्। पुनर्वसु नक्षत्रं पुनर्वसू वा। लोके तु द्विवचनमेव। ३३८८ **विशाखयोश्च (१-२-६२)** प्राग्वत्। विशाखा नक्षत्रम्। विशाखे वा। ३३८९ **षष्ठीयुक्तश्छन्दसि वा। (१-४-९)** षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात्। क्षेत्रस्य पतिना वयम्। इह वेति योगं विभज्य छन्दसीत्यनुवर्तते। सर्वे विधयश्छन्दसि वैकल्पिकाः। तेन 'बहुलं छन्दसि' (३४०१) इत्यादिरस्यैव प्रपञ्चः। 'यचि भम्' (२३१)। **नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्।** नभसा तुल्यं नभस्वत्। भत्वाद्रुत्वाभावः। अङ्गिरस्वदङ्गिरः।

वेदरक्षाया व्याकरणारम्भस्य प्रयोजनत्वेन मुख्यतयाऽभिधानात्। 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे' ति वेदार्थज्ञानोपायतया वेदाङ्गत्वेनैव व्याकरणाध्ययनविधानाच्च। नन्वेवमपि वैदिकशब्दानां लौकिकशब्दाभिन्नत्वात्तदनुशासनेनैव सिद्धे किमर्थमेषामनुशासनमिति चेन्न। लौकिकशब्देभ्यो भिन्ना अपि वैदिकशब्दाः सन्ति। तद्यथा 'त्मना देवेषु' 'मध्वा जभार' गृभ्णामि ते' इत्यादयो वेदे दृश्यन्ते। लोके तु आत्मना जहार गृह्णामीत्यादयः। अत एव भाष्यकारो लौकिकेभ्यो वैदिकान्भेदेन व्यपदिशति,-अथ शब्दानुशासनं, केषां शब्दानां ? लौकिकानां वैदिकानां चेति' इति तेषामन्वाख्यानमावश्यकमिति मनसि विभाव्याह **छन्दसीत्यादि**। पुनर्वसुशब्देनोद्भूतावयवस्य ज्योतिःसमुदायस्याभिधानाद् द्वयोर्द्विवचने प्राप्ते एकवचनं विधीयते। तदाह **द्वयोरित्यादि। वा स्यादिति।** द्वयोरेकवचनं वा स्यादिति 'आत्याख्यायाम्' इत्यतोऽन्यतरस्यामित्यनुवर्तनात्। **लोके त्विति।** 'गां गताविव दिवः पुनर्वसू' इत्यादौ। **विशाखा प्राग्वदिति।** द्वयोरेकवचनं वा स्यादित्यर्थः। **विशाखेति।** अमरस्तु विशाखेति प्रयुञ्जानो द्विवचननियमं नेच्छति। सूत्रं तूदासीनम्। **षष्ठीयुक्तश्छन्दसि वा।** 'पतिः समास एव' इत्यतः पतिरिति वर्तते। 'पतिः समास एव' इति नियमादसमासे न प्राप्नोतीति वचनमारभ्यते **पतिनेति**। घित्वात् 'आङो ना' इति नाभावः। षष्ठीति किम्। 'मया पत्या जरदष्टिर्यथासः'। छन्दसीति किम्। ग्रामस्य पत्ये। **योगं विभज्येति।** 'षष्ठीयुक्तश्छन्दसि' इति उक्त एवार्थः। ततो 'वा छन्दसि' इत्यनुवर्तते। यावदिह शास्त्रे कार्यं, तच्छन्दसि वा भवति। तदाह **तेनेत्यादिना। नभोङ्गिरसेति।** नभस् अङ्गिरस् मनुष् एषां वति परे भत्वं वक्तव्यमित्यर्थः। **नभस्वदिति।** 'तेन तुल्यम्-' इति वतिः। भत्वफलमाह

तारे। **लोके त्विति।** उद्भूतावयवभेदे समुदाये रूढत्वादिति भावः। एवं विशाखयोरपि द्वे तारे। तेन लोके द्विवचनमेव। योगविभागश्छन्दसीत्यस्योत्तरत्र निवृत्त्यर्थः। एवं हि चानुकृष्टत्वान्नोत्तरत्रानुवृत्तिः। **वतीति।** वत्प्रत्यये इत्यर्थः।

मनुष्वद्ग्ने । (उ.) 'जनेरुसिः' इति विहित उसिप्रत्ययो मनेरपि बाहुलकात् । वृषण्वस्वश्वयोः । वृषन् वर्षुकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्यासौ वृषणश्वः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते। अत एव 'पदान्तस्य' (१९८) इति णत्वनिषेधोऽपि न । 'अल्लोपोऽन' (२३४) इत्यल्लोपो न। अनङ्गत्वात्। ३३६० अयस्मयादीनि छन्दसि । (१-४-२०)। एतानि छन्दसि साधूनि । भपदसंज्ञाधिकाराद्यथायोग्यं संज्ञाद्वयं बोध्यम्। तथा च वार्तिकम्—॥ उभयसंज्ञान्यपीति वक्तव्यमिति । स सुष्टुभा स ऋक्वता गणेन । पदत्वात्कुत्वम् । भत्वाज्जश्त्वाभावः । जश्त्वविधानार्थायाः पदसंज्ञाया भत्वसामर्थ्येन बाधात् । नैनं हिन्वन्त्यपि वाजिनेषु । अत्र पदत्वाज्जश्त्वम् । भत्वात्कुत्वाभावः । 'ते प्राग्धातोः' (२२३०)। ३३६१

रुत्वाभाव इति । 'ससजुषोः–' इति प्राप्तस्य । तत्र हि पदस्येत्यनुवर्तते । अङ्गिरसा तुल्यमङ्गिरस्वत् । अत्रापि देहलीदीपकन्यायेन रुत्वाभाव इति संबध्यते । मनुष्वदिति । मनुषा तुल्यम् । अत्र भत्वाद् 'आदेशप्रत्ययोः' इति षः । पदसंज्ञायां तु रुत्वं स्यात् न षत्वम् । अपदान्तस्येति वचनात् । बाहुलकादिति । बहूनर्थान् लातीति बहुलम् । ला आदाने अस्मात् 'आतोऽनुपसर्गे' इति कः । बहुलस्य भावो बाहुलकम् । मनोज्ञादित्वाद्वुञ् । वृषण्वित्येतद्वसु, अश्व, एतयोश्च परतो भं स्यात् । 'निपातनान्येतानि छन्दोविषयाणी' ति कैयटः । वृषण्वसुरिति । लोके वृषवसुः । वृषाश्वः । नलोपः प्राप्त इति । 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन । अतएवेति । भत्वादेवेत्यर्थः । अनङ्गत्वादिति । 'अल्लोपोऽनः' इत्यत्राङ्गस्येत्यधिकारात् । अयस्मयादीनि । आनन्तर्याद्भसंज्ञाद्वारेणैव निपातनं प्राप्तमित्याह । संज्ञाद्वयमिति । ननु 'अनन्तरस्य–' इति न्यायं बाधित्वोभयसंज्ञाविधाने किं प्रमाणमित्याशङ्क्याह । तथा च वार्तिकमिति । कुत्वमिति । 'चोः कुः' इत्यनेन । जश्त्वाभाव इति । 'झलां जशोऽन्ते' इति प्राप्तस्य । ऋक्वतेति । अयस्मयादिषु ऋक्वतेत्यादयः समुदाया एव बोध्याः । तेन जश्त्वमस्तु कुत्वं मा भूदिति वैपरीत्येन प्रसज्येतेति बोध्यम् । नैनमिति । वाजिनाः प्रभवन्तस्तेष्वप्येनं विद्वांसं न हिन्वन्ति । विवदितुं न गच्छन्तीत्यर्थः । ते प्रागिति–।

मनेरिति । 'आदेशप्रत्यययो'रिति षत्वम् । अनङ्गत्वादिति । 'अङ्गस्य' 'भस्ये'ति तत्राऽधिकारात्प्रत्यासत्त्याऽङ्गभसञ्ज्ञानिमित्तयोरैकत्वाश्रवणेन भसञ्ज्ञानिमित्तवसुशब्दनिरूपिताङ्गत्वाऽभावादिति भावः । एतद्वार्तिकद्वयं छन्दोविषयमिति कैयटः । संज्ञाद्वयमिति । तत्प्रयुक्तं कार्यमित्यर्थः । अयस्मया । अयसो विकार इत्यर्थे

छन्दसि परेऽपि । (१-४-८) ३३६२ व्यवहिताश्च । (१-४-८२) हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्र हरिभिर्याहि । ३३६३ इन्धिभवतिभ्यां च । (१-२-६) आभ्यां परोऽपिल्लिट् कित् स्यात् । समीधे दस्युहन्तमम् । पुत्र ईधे अथर्वणः । बभूव । इदं प्रत्याख्यातम् । इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति ।

इति प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

३३६४ तृतीया च होश्छन्दसि । (२-३-३) जुहोतेः कर्मणि

व्याख्यातम् । अस्यापवादमाह । **छन्दसीत्यादि** । गत्युपसर्गसंज्ञकाश्छन्दसि परे प्रयोक्तव्याः । अपिशब्दात्पूर्वे । **व्यव–**। व्यवहिता अपि गत्युपसर्गसंज्ञकाः प्रयोक्तव्याः । सूत्रद्वयस्योदाहरणे आह । **हरिभ्यामित्यादि** । आयाहीति प्राप्तम् । 'ते प्राग्' इत्यत्र संज्ञानियमपक्षो भाष्ये उक्तः ते इत्यनेन प्रादीनुपेत्येतत्पर्यन्तान्स्वरूपेण परामृश्य धातोः प्राक् प्रयुक्तानामेषां पूर्वसूत्रैकवाक्यतया संज्ञाविधानात् । अस्मिंश्च पक्षे 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति सूत्रद्वयं च कर्तव्यम् । **इन्ध–**। इन्धीत्युच्चारणार्थेनेकारेण निर्देशः । 'सुद्तिथोः' इतिवत न तु 'इक्श्तिपौ–' इति इका, नलोपापत्तेः । 'असंयोगात–' इत्यतः लिट् किदित्यनुवर्तते । तदाह । **लिट् किदिति** । ञि इन्धी दीप्तौ, लिटः कित्वाद् 'अनिदिताम्–' इति नलोपः । संयोगात्परत्वात्पूर्वेणाप्राप्तौ वचनम् । **बभूवेति** । कित्वाद् वृद्ध्यभाव 'भुवो वुक्–' इति वुक् । अत्र पित्वात्पूर्वेणाप्राप्तौ वचनम् । **इदमिति** । इन्धीति सूत्रम् । **छन्दोविषयत्वादिति** । अयमभिप्रायः—इन्धेर्भाषायाम्' इजादेश्च–' इत्यामा भाव्यम् । छन्दसि तु अमन्त्रे इति प्रतिषेधाद् यद्यप्याम् नास्ति तथापि 'छन्दस्युभयथा' इति लिटः सार्वधातुकत्वे ङित्वात्समीधे इति नलोपः । श्नमभावस्त्वार्धधातुकत्वाच्छन्दसि दृष्टानुविधानात् । **वुको नित्यत्वादिति** । 'परनित्या–' इति परिभाषया परान्नित्यस्य बलीयस्त्वात् । कृताकृतप्रसङ्गित्वेन नित्यत्वात् । इति वैदिकीप्रकरणे प्रथमोऽध्यायः ।

तृतीया—। 'कर्मणि द्वितीया' इत्यतः कर्मणीति वर्तते । अत्र द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात्सापि भवति । तदाह—**कर्मणीति** ।

'ह्यचश्छन्दसी'ति मयट् । **'ते प्रा'**गित्यनुवृत्तिप्रदर्शनार्थम् । 'इन्धिभवतिभ्याञ्चे'त्यस्य क्रमप्राप्तप्रथमोपन्यासत्यागे बीजमाह–**इन्धेरिति । इति प्रथमोऽध्यायः ।**

तृतीया स्याद्द्वितीया च। यवाग्वाऽग्निहोत्रं जुहोति। अग्निहोत्रशब्दोऽत्र हविषि वर्तते। 'यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत' इत्यादिप्रयोगदर्शनात्। अग्नये हूयत इति व्युत्पत्तेश्च। यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः। **३३६५ द्वितीया ब्राह्मणे।** (२-३-६०) ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात्। षष्ठ्यपवादः। गामस्य तदहः सभायां दीव्येयुः। **३३६६ चतुर्थ्यर्थे बहुलं छन्दसि।** (२-३-६२) षष्ठी स्यात्। पुरुषमृगश्चन्द्रमसः। गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्। वनस्पतिभ्य इत्यर्थः। **षष्ठ्यर्थे चतुर्थीति वाच्यम्।** या खर्वेण पिबति तस्यै खर्वः। **३३६७ यजेश्च करणे** (२-३-६३) इह छन्दसि बहुलं षष्ठी। घृतस्य घृतेन वा यजते। **३३६८ बहुलं छन्दसि।** (२-४-३९) अदो घस्लादेशः स्यात्। घस्तान्नूनम्। लुङि '(मन्त्रे घस)' ३४०२ इति च्लेर्लुक्। अडभावः। सग्धिश्च मे।

यवाग्वेति। अत्र यवागूशब्दात्तृतीया अग्निहोत्रशब्दाच्च द्वितीया। अग्निहोत्रशब्दो हविर्वाचकः। जुहोतिश्च प्रक्षेपणार्थः। यवागूभिन्नं हविरग्नौ प्रक्षिपतीत्यर्थः। तदाह-**यवाग्वाख्यमित्यादि।** भिन्नविभक्त्यवरुद्धत्वेऽपि भिन्नार्थकविभक्त्यनवरुद्धत्वान्नामार्थयोरभेदान्वयः। भाष्ये चैतत्सूत्रं प्रत्याख्यातम्। अग्निहोत्रशब्दो ह्यग्नावपि वर्तते। यस्याग्निहोत्रे प्रज्वलितमिति दर्शनात्। हूयतेऽस्मिन्निति व्युत्पत्तेश्च। तथा यदा यवागूशब्दात्तृतीया तदाग्निहोत्रशब्दो ह्यग्नौ वर्तते जुहोतिश्च प्रीणने। यवाग्वा अग्निं प्रीणयतीत्यर्थः। यदा यवागूशब्दाद् द्वितीया तदाग्निहोत्रशब्दो हविषि वर्तेत जुहोतिश्च प्रक्षेपणे। यवाग्वाख्यं हविर्द्रव्यं प्रक्षिपतीत्यर्थः। **द्वितीया।** 'दिवस्तदर्थस्य' इति वर्तते। तदाह **ब्राह्मणेत्यादि।** सोपसर्गस्य च्छन्दसि 'विभाषोपसर्गे' व्यवस्थितविभाषयापि सिद्धे निरुपसर्गार्थ आरम्भः। **षष्ठ्यपवाद इति।** 'दिवस्तदर्थस्य' इति प्राप्तायाः, **चतुर्थ्यर्थे।** बहुलग्रहणात् चन्द्रमसेऽदमी रात्र्यै (?) इत्यादौ षष्ठ्यभावः। **यजेः।** यजेर्धातोः करणे कारके छन्दसि विषये बहुलं षष्ठी स्यात्। **बहुलम्।** 'अदो जग्धिः—' इत्यतः अद इति, 'लुङ्सनोः—' इत्यतः घस्लृ इति च। अदो बहुलं घस्लादेशः। स्याच्छन्दसि। **घस्तामिति।** अदेर्लुङि

अथ द्वितीयः। हविषि वर्तत इति। हूयते तद्-होत्रम्। ततोऽग्निपदेन षष्ठीतत्पुरुषः। 'अग्नये हूयते' इति त्वर्थप्रदर्शनम्। **'यवाग्वा'** इति वाक्ये जुहोतिस्त्यागपूर्वके प्रक्षेपे वर्तते। **द्वितीया ब्राह्मणे।** सोपसर्गस्य दिवेः 'विभाषोपसर्गे' इति व्यवस्थितविभाषया सिद्धे निरुपसर्गार्थोऽयमारम्भः। **पुरुषमृगश्चन्द्रमसे इति।** बहुलग्रहणाच्चन्द्रमसश्चतुर्थी। 'व्यत्ययो बहुल'मित्यस्यैवायं प्रपञ्चः।

३३९९ हेमन्तशिशिरावहोरात्रे च छन्दसि (२-४-२८) द्वन्द्वः पूर्ववल्लिङ्गः। हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ। अहोरात्रे। 'अदिप्रभृतिभ्यः शपः' (२४२३)। ३४०० बहुलं छन्दसि। (२-४-७३) वृत्रं हनति वृत्रहा। अहिः शयत उप पृक्पृथिव्याः। अत्र लुङ् न। अदादिभिन्नेऽपि क्वचिल्लुक्। त्राध्वं नो देवाः। 'जुहोत्यादिभ्यः श्लुः' (२४८१)। ३४०१ बहुलं छन्दसि। (२-४-७६) दाति प्रियाणि चिद्वसु। अन्यत्रापि। पूर्णा विवष्टि। ३४०२ मन्त्रे घसह्वरण-

---

रूपम्। अडभाव इति। 'बहुलं छन्दसि' 'न माङ्योगे' इत्यनेन। नन्विदं 'लुङ्सनोः–' इत्यनेन सिद्धमित्याशङ्क्योदाहरणान्तरमाह। सग्धिरिति। अदनं सिधः। अदेः क्तिनि घस्लादेशे 'घसिभसोर्हलि च' इत्युपधालोपे 'झलो झलि' इति सलोपः। 'झषस्तथोः–' इति धत्वम्। धस्य जश्त्वम्। न च जश्त्वे कर्तव्येऽल्लोपस्य स्थानिवत्त्वम्। 'न पदान्त–' इति सूत्रेण जश्त्वे तन्निषेधात्। ततः समानशब्देन समासे कृते 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इति सूत्रेण समानस्य सः। हेमन्तशिशिरौ। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति प्राप्तम्। अहोरात्रे इति। अहश्च रात्रिश्चेति द्वन्द्वे कृते 'अहःसर्वैकदेश–' इत्यनेन समासान्तोऽच्। 'यस्येति च' इतीकारलोपः। 'रात्राह्नाहाः पुंसि' इति प्राप्तं द्विवमतन्त्रम्। 'अहोरात्राणि विदधत्'। छन्दसि किम्। हेमन्तशिशिरे। अहोरात्रौ। यद्यपि पाठक्रमेणेदं 'बहुलं छन्दसि' इति घस्लादेशविधायकसूत्रात्पूर्वं व्याख्यातुं युक्तं तथापि 'व्यत्ययो बहुलम्' इति वक्ष्यमाणेन लिङ्गव्यत्ययविधायकेन गतार्थमिति ध्वनयितुं तथा न व्याख्यातम्। बहुलं छन्दसि। बहुलं शपो लुक् स्यात्। 'अदिप्रभृतिभ्यः' इत्युक्तं ततो न भवति। तथैवोदाहरति। वृत्रं हनतीत्यादि। हन्ति शेते इति लोके। त्राध्वमिति। त्रैङ् पालने 'आदेच उपदेशेऽशिति' इत्यात्वम्। त्रायध्वमिति लोके। दातीति। ददातीति लोके। अन्यत्रापीति। जुहोत्यादिभिन्नेऽपि श्लुर्भवतीति शेषः। विवष्टीति। वश कान्तौ अदादिः। 'श्लौ' इति द्वित्वम्। 'भृञामित्'। 'बहुलं छन्दसि' इति सूत्रेणाभ्यासस्येकारः। 'व्रश्च–' इति पुराण्ढुत्वम्। मन्त्रे घस।

अडभाव इति। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्युक्तेः। सग्धिरिति। क्तिनि 'घसिभसोर्हलि च' इत्युपधालोपः। 'समानस्य छन्दसी'ति सः। न च भवति अत्ता। प्रकृत्यन्तरन्तु सार्वधातुकमात्रविषयमिति बोध्यम्। हेमन्तशि। शिशिरशब्दस्य 'हेमन्तः शिशिरोऽस्त्रिया'मित्यमरादुभयलिङ्गत्वेऽपि हेमन्तशिशिरे इत्येतन्निवृत्तये स्पष्टार्थम्। हेमन्तशिशिरावित्यमरस्य प्रमाद इत्यन्ये। अहोरात्रे इति। 'रात्राह्नाहाः'

शवृदहाद्वृच्कृगमिजनिभ्यो लेः । (२-४-८०) एभ्यो लेर्लुक् स्यान्मन्त्रे । अघस्मीमदन्त हि । घस्लादेशस्य 'गमहन' (२३६३) इत्युपधालोपे 'शासिवसि' (२४१०) इति षः । माह्वर्मित्रस्य । धूर्तिः प्रणङ्मर्त्यस्य । 'नशेर्वा' (४३१) इति कुत्वम् । सुरुचो वेन आवः । मा न आधक् । आदित्याकारान्तग्रहणम् । आ प्रा द्यावापृथिवी । परावर्ग्भारभृद्यथा । अक्रन्नुषासः । त्वे रयिं जागृवांसो अनुग्मन् । मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् । अज्ञत वा अस्य दन्ताः ।

घस अत्तेरादेशः । ह्वर । ह्वृ कौटिल्ये । अस्य कृतगुणानुकरणं ह्वरेति । अकारस्तूच्चारणार्थः । णश अदर्शने । वृञ् वरणे । वृङ् संभक्तौ । दह भस्मीकरणे । आत् । आकारान्ताः प्रा पूरणे इत्यादयः । वृजी वर्जने । डुकृञ् करणे । गम्लृ गतौ । जनी प्रादुर्भावे । **अघस्मिति** । अत्तेर्लुङि झिः । **घस्लादेशस्येति** । 'लुङ्सनोः–' इति विहितस्य । **माह्वरिति** । माङि उपपदे ह्वरतेर्लुङिः तिप् । 'इतश्च' इतीकारलोपः । च्लेर्लुकि कृते 'सार्वधातुके–' इति गुणे कृते रपरत्वे 'हल्ङ्याप्–' इति लोपः । **प्रणगिति** । प्रपूर्वान्नशेर्लुङ् । 'हल्ङ्याप्–' इति लोपः 'उपसर्गादसमासेऽपि–' इति णत्वम् । **मर्त्यस्येति** । मकारेऽनुनासिके परे 'यरोऽनुनासिके–' इति ङः । **कुत्वमिति** । पक्षे 'व्रश्च–' इति षत्वेन नडिति रूपं बोध्यम् । **आव इति** । वृञो रूपम् । **आधगिति** । माङ्पूर्वाद्दहेर्लुङ् । 'दादेर्धातोः–' इति घः । 'एकाचो बश–' इति भष्भावः । **आप्रा इति** । आङ्पूर्वात्प्राधातोः सिप् । रुत्वे यत्वे च यलोपः । **परावर्गिति** । परापूर्वाद्वृजेस्तिप् । उपधागुणे 'चोः कुः' इति कुत्वम् । **अक्रन्निति** । झेर्ङित्त्वाद् गुणाभावे यण् । **अनुग्मन्निति** । अनुपूर्वाद्गच्छतेर्झिः । 'गमहन–' इत्युपधालोपः । ननु मन्त्रशब्दः संहितायां रूढ इति अज्ञतेत्यादौ ब्राह्मणप्रयोगे लुङ् न प्राप्नोतीत्याशङ्क्याह । **मन्त्रग्रहणमित्यादि** । **अज्ञतेति** । 'गमहन–' इत्युपधालोपः ब्राह्मणप्रयोगोऽयम् । मन्त्रेति किम् ? अघसत् । अह्वार्षीत् । अनशत् । अवारीत् । अधाक्षीत् । अप्रासीः । अवर्जीत् । अकार्षीत् । अगमत् । अजनि । अजनिष्ट । इति वैदिकीप्रकरणे द्वितीयोऽध्यायः ।

इति पुंस्त्वं प्राप्तम् । द्वित्वमतन्त्रम् । 'अहोरात्राणि विदधत्' । **घस्लादेशस्येति** । 'लुङ्सनो'रिति विहितस्य । **'वृ' इति**,–वृङ्वृञोः सामान्येन ग्रहणम् । **आप्रेति** । 'प्रा' पूरणे, आङ्पूर्वः, मध्यमपुरुषैकवचनम् । **परावर्गिति** । परापूर्वस्य वृजेः । **अक्रन्निति** । कृञः । **अनुग्मन्निति**–गमेः । 'गमहने'त्युपधालोपः । 'अज्ञतवे'त्यस्यैतरेयब्राह्मणे सत्त्वादाह–**मन्त्रग्रहणमिति** । **इति द्वितीयः** ।

विभाषानुवृत्तेर्नेह ; न ता अगृभ्णन्नजनिष्ट हि षः। इति द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

३४०३ अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि। (३-१-४२) आद्येषु चतुर्षु लुङि आम् अक इत्यनुप्रयोगश्च। अभ्युत्सादयामकः। अभ्युदसीषददिति लोके। प्रजनयामकः। प्राजीजनदित्यर्थः। चिकयामकः। अचैषीदित्यर्थे चिनोतेराम् द्विर्वचनं कुत्वं च। रमयामकः। अरीरमत्। पावयांक्रियात्। पाव्यादिति लोके। विदामक्रन्। अवेदिषुः। ३४०४ गुपेश्छन्दसि। (३-१-५०) च्लेश्चङ् वा। गृहानजूगुपतं युवम्। अगौप्तमित्यर्थः। ३४०५ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः।

अभ्युत्सादयाम्। अभ्युत्सादयामित्यादयश्छन्दसि विषयेऽन्यतरस्यां निपात्यन्ते। षद्लृ विशरणगत्यवसादनेषु। जनी प्रादुर्भावे। रमु क्रीडायाम्। णयन्तेभ्य एभ्यो लुङि आम्प्रत्ययो निपात्यते। चिञ् चयने। शुद्धादस्मादाम्प्रत्यये द्विर्वचनं कुत्वं च। अक इति प्रत्येकं सम्बध्यते। तदाह—आद्येष्विति। अक इति। कृञो लुङि तिपि च्लेः 'मन्त्रे घस' इत्यादिना लुक्। तिपो हल्ङ्यादिलोपः। अभ्युत्सादयामक इति। 'आम' इति लुङो लुक्। अभ्युदसीषददिति। सदेर्ण्यन्ताल्लुङि चङि 'णौ चङ्युपधायाः' इति ह्रस्वः। 'चङि' इति द्विर्वचनम्। हलादिःशेषः। 'सन्वल्लघुनि' इति सन्वद्भावे 'सन्यतः' इतीत्वम्। लघोर्दीर्घः। लोक इति। वेदेऽपि पाक्षिकमिदं बोध्यम्। 'विदांकुर्वन्तु' इति सूत्रादन्यतरस्यांग्रहणानुवृत्तेः। पावयामिति। पवतेः पुनातेर्वा णयन्तादाशीर्लिङ्याम्। क्रियादित्यनुप्रयोगश्च। क्रियादिति। करोतेराशीर्लिङि रूपम्। 'लिङाशिषि' इत्यार्धधातुकत्वाद्विकरणाभावः। 'रिङ् शयग्' इति रिङ्। विदामक्रन्निति। विदेर्लुङि आम्, गुणाभावः लुङन्तकरोत्यनुप्रयोगश्च। गुपेः। आयप्रत्ययाभावस्थल एवेदं, सूत्रे केवलस्योच्चारणात्। अजूगुपतमिति। गुपू रक्षणे। 'तस्थस्थमिपाम्' इति थसस्तम्। 'तुजादीनां दीर्घोऽभ्यासस्य' इत्यभ्यासस्य दीर्घः। अगौप्तमिति। ऊदित्त्वादिडभावे 'वदव्रज' इति वृद्धिः। 'झलो झलि' इति सिचो लोपः। इट्पक्षे अगोपिष्टम्। आयप्रत्यये अगोपायिष्टम्। इत्थं चत्वारि छन्दसि। लोके तु चङं वर्जयित्वा त्रीण्येवेति विवेकः। नान्यतीति। ऊन परिहाणे। ध्वन शब्दे। इल प्रेरणे।

अकरिति कृञो लुङि तिपि 'मन्त्रे घसे'ति च्लेर्लुकि सार्वधातुकगुणे तिपो हल्ङ्यादिलोपे रूपम्। अजूगुपतमिति। गुपेर्लुङ्। थसस्तम्। तुजादित्वादभ्यासस्य

(३-१-५१) च्लेश्चङ् न। मा त्वायतो जरितुः काममूनयीः। मा त्वाग्निर्ध्वनयीत्। **३४०६ कृमृदृरुहिभ्यश्छन्दसि।** (३-१-५९) च्लेरङ् वा। इदं तेभ्योऽकरं नमः। अमरत्। अदरत्। सानुमारुहत्। **३४०७ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि** (३-१-१२३) कृन्ततेर्निस्पूर्वात्क्यपि प्राप्ते ण्यत्। आद्यन्तयोर्विपर्यासो निसः षत्वं च। निष्टर्क्यं चिन्वीत पशुकामः। देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च। स्पर्धन्ते वा उ देवहूये। प्र उत् आभ्यां नयतेः क्यप्। प्रणीयः। उन्नीयः। उत्पूर्वाच्छिषेः क्यप्। उच्छिष्यः। मृङ्स्तृध्वृभ्यो यत्। मर्यः। स्तर्या। स्त्रियामेवायम्। ध्वर्यः। खनेर्यण्यतौ। खन्यः। खान्यः। यजेर्यः। शुन्धध्वं दैव्याय कर्मणे देवयज्यायै। आङ्पूर्वात्पृच्छेः क्यप्। आपृच्छ्यं धरुणं वाज्यर्षति। सीव्यतेः क्यप् षत्वं च।

अर्द गतौ याचने च। एभ्यो ण्यन्तेभ्यश्च्लेः 'णिश्रि' इति प्राप्तश्चङादेशो नेत्यर्थः। तत्रोनयत्येलयती चुरादौ ण्यन्तौ। ध्वनयतिरापि चुरादिरदन्तो घटादिर्णि-न्तश्च। अर्दयतिस्तु हेतुमण्ण्यन्तः **ऊनयीरिति**। मध्यमपुरुषैकवचनम्। 'न माङ्योगे' इति आट्प्रतिषेधः। इदमिन्द्रं प्रति सव्यस्य ऋषेर्वचनम्। त्वायतस्त्वामि-च्छतः जरितुः स्तोतुः मम काममभिलाषं मा ऊनयीः। ऊनं मा कार्षीरित्यर्थः। औनन-दिति भाषायाम्। **ध्वानयदिति**। तिप्। 'न माङ्योगे' इत्यट्प्रतिषेधः। भाषायां तु घटा-देरदिध्वनत्। चुरादेरदिध्वनत्। ऐलयीत्। आर्दयीत्। आर्दिदत्। ऐलिलदिति लोके। **कृमृदृ**। 'च्लि लुङि' इत्यतः च्लिरिति 'अस्यतिवक्ति' इत्यतोऽङिति 'इरितो वा' इत्यतो वेत्यनुवर्तते। तदाह। **च्लेरित्यादि**। **अकरमिति**। डु कृञ् करणे मिप्। अङि कृते 'ऋदृशोऽङि' इति गुणः। **अमरदिति**। मृङ् प्राणत्यागे। व्यत्ययेन परस्मैपदम्। **अदरदिति**। दॄ विदारणे। **अरुहदिति**। रुह बीजजन्मनि प्रादु-र्भावे च। लोके तु अकार्षीत्। अमृत। अदारीत्। अरुक्षत्। **छन्दसि**। निष्ट-र्क्यादयः शब्दाश्छन्दसि निपात्यन्त इति सूत्रार्थः। **क्यपि प्राप्त इति**। 'ऋदुप-धाच्च' इति सूत्रेण। **आपृच्छ्यमिति**। प्रच्छ ज्ञीप्सायाम्। 'प्रहिज्या' इति

दीर्घः। **छन्दसि निष्टर्क्ये**। 'निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातना'दिति व्यत्ययोऽत्र प्रत्ययवर्णयोः। **दीर्घश्चेति**। अत एव तुगभावः। **शिषेरिति**। शासेरित्यन्ये। 'ध्वृ हूर्च्छने'। **यजेर्य इति**। 'देवशब्दे उपपदे' इत्यादिः। प्रत्यय-स्वरेणाऽन्तोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरः। स्त्रीलिङ्गे एवेदं निपातनम्। पृच्छेः=

प्रतिषीव्यः । ब्रह्मणि वदेर्यत् । ब्रह्मवाद्यम् । लोके तु 'वदः सुपि क्यप् च' (२८२४) इति क्यब्ण्यतौ । भवतेः स्तौतेश्च ण्यत् । भाव्यः । स्ताव्यः । उपपूर्वाच्चिनोतेर्ण्यद् आयादेशश्च पृडे उत्तरपदे । उपचाय्यपृडम् । हिरण्य इति वक्तव्यम् । उपचेयपृडमन्यत् । मृड सुखने मृड चेत्यस्मादिगुपधलक्षणः कः । **३४०८ छन्दसि वनसनरक्षिमथाम् ।** (३-२-२७) एभ्यः कर्मण्युपपदे इन् स्यात् । ब्रह्मवनिं त्वा क्षत्रवनिम् । उत नो गोषणिं धियम् । ये पथां पथिरक्षयः । चतुरक्षौ पथिरक्षी । हविर्मथीनामभि । **३४०९ छन्दसि सहः ।** (३-२-६३) सुप्युपपदे सहेर्ण्विः स्यात् । पृतनाषाट् । **३४१० वहश्च ।** (३-२-६४) प्राग्वत् । दित्यवाट् । योगविभाग उत्तरार्थः । **३४११ कव्यपुरीषपुरीष्येषु ञ्युट् ।** (३-२-६५) एषु वहेर्ञ्युट् स्याच्छन्दसि । कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः । **३४१२ हव्येऽनन्तःपादम् ।**

संप्रसारणम् । **प्रतिषीव्येति** । षिवु तन्तुसन्ताने । 'हलि च' इति दीर्घः । **उपचाय्यपृडमिति** । उपचाय्यं च तत्पृडं चेति कर्मधारयः । **हिरण्य इति** । हिरण्येऽभिधेये इत्यर्थः । **छन्दसि । एभ्य इति** । वन षण संभक्ताविति भ्वादिगणेन सह निर्दिष्टयोरेव ग्रहणं न तु वनु याचने, षणु दाने इति तानादिकयोः सानुबन्धकत्वात् । **ब्रह्मवनिमिति** । ब्रह्म वनति, क्षत्रं वनति सनतीति विवक्षायामिन् तदन्ताद्द्वितीयैकवचनम् । सुषामादित्वात्षत्वम् । **पथिरक्षय इति** । पन्थानं रक्षयन्तीति विग्रहः । **पथिरक्षीति** । पन्थानं रक्षतीति विग्रहः । हविर्मन्थतीति विग्रहः । **छन्दसि** । षह मर्षणे 'भजो ण्विः' इति वर्तते । तदाह । **ण्विः स्यादिति** । ननु 'तुरासाहं पुरोधाय' इति लोके प्रयोगा दृश्यन्ते तेषां का गतिरिति चेत्, णिजन्ताद्क्विप् बोध्यः । **पृतनाषाडिति** । 'सहेः साडः

'प्रच्छ ज्ञीप्सायां'मित्यतः । **सीव्यतेरिति** । 'प्रतिपूर्वा'दित्यादिः । **ब्रह्मणीति** । उपपदे इत्यर्थः । **लोके त्विति** । 'ब्रह्मोद्यं वदन्ती'त्यादौ व्यत्ययेन क्यब्बोध्यः । **गोषणिमिति** । गां सनतीति विग्रहः । अत्र 'सनोतेरनः' इति नकारान्तस्य निषेधात् गोसनिशब्दस्य सवनादिषु पाठः करिष्यते' इति 'सनोतेरनः' इतिसूत्रस्थभाष्याच्च यद्यप्यत्र षत्वं न प्राप्नोति; तथापि दन्त्यस्यैव मूर्धन्यत्वपाठो वैदिकसंप्रदायात् । अत एव पदकाले दन्त्यमेव पठन्ति-गो-सनिमिति । यत्तु सुषामादित्वात्षत्वमिति, तन्न । उक्तसूत्रतद्भाष्यविरोधात् । **ये पथामिति** । पन्थानं रक्षन्ति, हविर्मन्थन्तीति विग्रहः । **छन्दसि सहः** । लोके 'तुरासाह'मित्यादिप्रयोगाश्चिन्त्या इति हरदत्तः ।

(३-२-६६) अग्निश्च हव्यवाहनः। पादमध्ये तु 'वहश्च' (३४१०) इति ण्विरेव। हव्यवाळग्निरजरः पिता नः। ३४१३ जनसनखनक्रमगमो विट्। (३-२-६७) 'विड्वनोः' (२९८२) इत्यात्वम्। अब्जाः। गोजाः। गोषा इन्दो नृषा असि। 'सनोतेरनः' (३६४२) इति षत्वम्। इयं शुष्मेभिर्बिसखा इवारुजत्। आ दधिक्राः शवसा पञ्च कृष्टीः। अग्रेगाः। ३४१४ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्। (३-२-७१) * श्वेतवहादीनां डस्पदस्येति वक्तव्यम्। यत्र पदत्वं भावि तत्र ण्विनोऽपवादो डस् वक्तव्य इत्यर्थः। श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंसति उक्थशा यजमानः। उक्थशासौ। उक्थशासः। पुरो दाश्यते दीयते पुरोडाः। ३४१५ अवे यजः। (३-२-७२) अवयाः। अवयाजौ। अवयाजः। ३४१६ अवयाः श्वेतवाः

सः' इति षत्वम्। वहः। प्राग्वदिति। ण्विः स्यादित्यर्थः। हव्ये। अन्तःशब्दो मध्यवाची। हव्यशब्दे उपपदे वहेर्ञ्युट् स्यात् पादमध्ये चेन्न। पदान्ते इति फलितोऽर्थः। हव्यवालग्निरिति। अत्र डस्य लः. 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो लकार' इति प्रातिशाख्ये विहितः। जनसन। जनादिभ्यो धातुभ्यश्छन्दसि विट् स्यात्। अग्रेगा इति। 'हलदन्तात्' इति सप्तम्यलुक्। मन्त्रे श्वेतवहो। श्वेतादिपूर्वेभ्यो वहादिभ्यो ण्विन्स्यात्। अलाक्षणिककार्यार्थं निपातनम्। श्वेतशब्दे कर्तृवाचिन्युपपदे वहेः कर्मणि कारके ण्विन्प्रत्ययः। उक्थे कर्मणि करणे चोपपदे शंसतेः प्रत्ययः नलोपश्च। पुरःपूर्वस्य दाशृ दाने इत्यादेर्डत्वं कर्मणि च प्रत्ययः डस्पदस्येति प्रत्येकमभिसंबध्यते। भाविपदत्वाश्रयणेन चेदमुच्यते तदाह। यत्र पदत्वं भावीति। डसन्तस्येत्यर्थः। श्वेतवा इति। श्वेता एनं वहन्ति श्वेतवाः इन्द्रः। 'अत्वसन्तस्य' इति दीर्घः। उक्थशासाविति नलोपे कृते 'अत उपधायाः' इति वृद्धिः। अवे। योगविभाग उत्तरार्थः। पुरोडाशावयजोर्ण्विन इत्येकयोगे श्वेतवहादीनामप्युत्तरत्रानुवृत्तिः स्यात्। यजेश्चावपूर्वस्यैवानुवृत्तिः स्यात्केवलस्यैवेष्यत इति। अवयाः श्वेतवाः। ननु मन्त्रे श्वेतवहेत्यादिना डसि कृते

वहश्च। अस्य लोकेऽपि प्रवृत्तिं केचिदिच्छन्ति। हव्येऽनन्तः। हव्यशब्दे उपपदे वहेर्ञ्युट्। पादयोर्मध्यस्थे नेत्यर्थः, तदाह-पादमध्ये त्विति। जनसन। उपसर्गे सुपि चोपपदे एभ्यश्छन्दसि विट्। 'विड्वनो'रित्यत्र विशेषणार्थष्टकारः, 'वेरपृक्तस्ये'त्यत्र सामान्यग्रहणार्थश्च। अप्सूत्पद्यते, गोषूत्पद्यते, गाः सनति, नॄन् सनति, बिसानि खनति, दधि क्रामति, अग्रेगच्छतीत्युदाहरणार्थः। सर्वत्र 'विड्वनो'रित्यात्वम्। अग्रेगा इति।

पुरोडाश्च। (८-२-६७) एते संबुद्धौ कृतदीर्घा निपात्यन्ते। चादुक्थशाः। ३४१७ विजुपे छन्दसि। (३-२-७३) उपे उपपदे यजेर्विच्। उपयट्। ३४१८ आतो मनिन्क्वनिब्वनिपश्च। (३-२-७४) सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चाद्विच्। सुदामा। सुधीवा। सुपीवा | भूरिदावा। घृतपावा | विच्। कीलालपाः। 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (२९९८)। ३४१९ बहुलं छन्दसि। (३-२-८८) उपपदान्तरेऽपि हन्तेर्बहुलं क्विप् स्यात्। मातृहा। पितृहा। छन्दसि लिट् (३०९३)। भूतसामान्ये। अहं द्यावापृथिवी आ ततान। 'लिटः कानज्वा' (३०९४)। 'क्वसुश्च' (३०९५)। छन्दसि लिटः कानच्क्वसू वा स्तः। चक्राणा वृष्णि। यो नो अग्ने अररिवाँ अघायुः। 'घोश्छन्दसि' (३११७)।

सौ 'अत्वसन्तस्य' इति दीर्घे रुत्वे च श्वेतवा इत्यादि सिद्धे नार्थोऽनेन योगेनेत्याशङ्क्याह। **एते संबुद्धाविति**। संबुद्धौ हि 'अत्वसन्तस्य' इति न प्राप्नोति, तत्रासंबुद्धावित्यनुवर्तनात्। **विजुपे**। ननु छन्दसीति व्यर्थं मन्त्रे इत्यनुवृत्तेरेव भाषायां न भविष्यतीति चेत्, सत्यम्। ब्राह्मणसंग्रहार्थं छन्दोग्रहणम्। मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणम्। तदुक्तम्—'तचोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्दः'। **सुधीवा सुपीवेति**। 'घुमास्था' इतीत्वम्। **कीलालपा इति**। कीलालं जलम्। 'पयः कीलालममृतं जीवनं भुवनं वनम् इत्यमरः। तत् पिबतीति। पा पाने विच्। **उपपदान्तरेऽपीति**। ब्रह्मभ्रूणवृत्रभिन्नेष्वपीत्यर्थः। **आततानेति**। 'णलुत्तमो वा' इति णित्वपक्षे वृद्धिः। **अररिवाँ इति**। रा दाने। लिटः क्वसुः। 'वस्वेकाजाद्घसाम्' इत्यादन्तत्वादिट्। ततो नञ्समासः। 'दीर्घादटि—' इति वक्ष्यमाणेन नस्य रुत्वम् 'आतोऽटि नित्यम्' इति रोः पूर्वस्यातो नित्यमनुनासिकः। प्रसङ्गादघायुशब्दं व्युत्पा-

---

सप्तम्या अलुक्। **अवे यज इति**। योगविभाग उत्तरार्थः। **विजुपे**। 'मन्त्रे' इत्यनुवर्तमाने छन्दोग्रहणं स्पष्टार्थम्। 'छन्दोब्राह्मणानि' इति सूत्रबलेन ब्राह्मणे मुख्यछन्दस्त्वस्याऽनङ्गीकारात्। **'सुधीव'**। इत्यादौ 'घुमास्थ' इतीत्वं। वनिपि तु कित्वाऽभावादेत्वम्। **उपपदान्तरे इति**। 'ब्रह्मभ्रूणेति' नियमादप्राप्तः क्विप् प्रतिप्रसूयत इति भावः। बहुलग्रहणात्कचिन्न-पितृघातः। **छन्दसि लिट्**। 'छन्दसि लुङ्लङ्लिटः' इति तु धातुसम्बन्धाधिकारस्थम्। **'क्वसुश्च'** इति योगविभागः उत्तरार्थः। अनन्तरस्यैव लिटोऽयमादेशः। **लिट इति** तु प्रत्ययान्तरत्वाऽभावाय। अनयोः कित्वन्तु 'ऋच्छत्यृता'मिति प्रतिषेधविषयगुणस्य 'तेरतु' रित्यादाविव

यन्ताद्धातोश्छन्दसि इष्णुच् स्यात्तच्छीलादौ। वीरुधः पारयिष्णवः। 'भुवश्च' (३११८)। अस्मात् केवलात्प्रागुक्तत्। भविष्णुः। * छन्दसि परेच्छायां क्यच उपसंख्यानम्। 'क्याच्छन्दसि (३१२०)। उप्रत्ययः स्यात्। अघायुः। * एरजधिकारे जवसवौ छन्दसि वाच्यौ। जवे याभिर्यूनः। ऊर्वोर्मे जवः। देवस्य सवितुः सवे। ३४२० मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः। (३-३-९६) वृषादिभ्यः क्तिन्स्यात्स चोदात्तः। वृष्टिं दिवः। सुम्नमिष्टये पर्यारपक्तीरुत। इयं ते नव्यसी मतिः। वित्तिः। भूतिः। अग्न आ याहि वीतये। रातौ स्यामोभयासः। ३४२१ छन्दसि गत्यर्थेभ्यः। (३-३-१२९) ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् स्यात्। खलोऽपवादः। सूपसदनोऽग्निः। ३४२२ अन्येभ्योऽपि दृश्यते। (३-३-१३०) गत्यर्थेभ्यो येऽन्ये

दयितुमाह। छन्दसीति। 'सुप आत्मनः–' इत्यत्र आत्मन इति विशेषणात्परेच्छायां न प्राप्नोतीति वचनम्। क्याच्छन्दसि। 'सनाशंसभिक्ष उः' इत्यत उरिति वर्तते। क्यान्ताद्धातोरुः स्याच्छन्दसि। अघायुरिति। परस्याघमिच्छतीत्यर्थे क्यच् 'अश्वाघस्यात्' इति वक्ष्यमाणेनाकारादेशः। तदन्तादुप्रत्ययः। जवसवाविति। जु इति सौत्रो धातुः षूङ् प्राणिगर्भविमोचने। षु प्रसवैश्वर्ययोरिति। आभ्याम् 'ऋदोरप्' इति अपि प्राप्तेऽज्विधीयते। स्वरे भेदः। मन्त्रे वृषेष। 'स्त्रियां क्तिन्' इत्यतः क्तिन्निति वर्तते। वीरा इति। पञ्चम्यर्थे प्रथमा। तदाह। वृषादिभ्य इति। वृष्टिमिति। वृषु सेचने। इष्टये इति। इषु इच्छायाम्। चतुर्थ्येकवचनम्। मतिरिति। मन ज्ञाने क्तिन्। 'अनुदात्तोपदेश–' इत्यनुनासिकलोपः। वित्तिरिति। विद सत्तायाम्। कित्वान्न लघूपधगुणः। वीतये इति। वी गतिव्याप्ति-

'तितिराणः' 'तितीर्षा' नित्यादौ प्रवृत्तिवारणाय। 'ईजानः' इत्यादौ लिटः कित्वादेव सम्प्रसारणं सिद्धम्। अञ्जेः 'आजिवान्' इत्यादौ नलोपोऽपि 'छन्दस्युभयथा' इत्यनेन सार्वधातुकत्वाङ्कित्त्वादेव सिद्धः। न चैवमारिवानित्यत्रापि गुणो न स्यात्, ऋकारान्तरप्रश्लेषेण ऋधातौ पुनर्विधानादिति। प्राञ्चः। क्याच्छन्दसि। 'क्यो य' इति व्याख्यानात्कण्ड्वादियगन्तादपि। 'यमस्य योनौ शकुनं भुरण्यु'मिति यथा। लोके 'ऽ।नसूयवः' इति तु लोहितादिसूत्रभाष्यरीत्या साधु। मन्त्रे वृषेष। अत्र पञ्चम्यर्थे प्रथमा। 'वृषु सेचने,' 'इष इच्छायाम्,' 'मन ज्ञाने' 'मनु बोधने' इत्युभयोर्ग्रहणम्। विदादीनामपि यथादर्शनम्। क्तौ विधातव्ये उदात्तवचनमुत्तरार्थम्–व्रजयजोर्भावे क्यबुदात्तो यथा स्यादिति, प्रमतौ 'तादौ च निति' इति पूर्वपदप्रकृतिस्वरार्थञ्च।

धातवस्तेभ्योऽपि छन्दसि युच् स्यात् । सुवेदनामकृणोर्ब्रह्मणे गाम् । ३४२३ छन्दसि लुङ्लङ्लिटः । (३-४-६) धात्वर्थानां संबन्धे सर्वकालेष्वेते वा स्युः । पक्षे यथास्वं प्रत्ययाः । देवो देवेभिरागमत् । लोडर्थे लुङ् इदं तेभ्योकरं नमः । लङ् -अग्निमद्य होतारमवृणीतायं यजमानः । लिट् अद्या ममार । अद्य म्रियत इत्यर्थः । ३४२४ लिङर्थे लेट् । (३-४-७) विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि । ३४२५ सिब्बहुलं लेटि । (३-४-३४) ३४२६ इतश्च लोपः परस्मैपदेषु । (३-४-९७) लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु । ३४२७ लेटोऽडाटौ । (३-४-९४) लेटः अट् आट् एतावागमौ स्तस्तौ च पितौ । * सिब्बहुलं णिद्वक्तव्यः । वृद्धिः । प्रण आयूंषि तारिषत् । सुपेशसस्करति जोषिषद्धि । आ साविषदर्शसानाय । सिप इलोपस्य चाभावे । पताति दिद्युत् । प्रियः सूर्ये प्रियो अग्ना भवाति । ३४२८

प्रजनकान्त्यसनखादनेषु । रातावितिः । रा दाने । छन्दसि लुङ्लङ्लिटः । उदाहरणेषु धातुसम्बन्धो मृग्यः । अगमदिति । गम्लृ गतौ 'पुषादि-' इति लृदित्वादङ् । अकरमिति । 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ् 'ऋदृशोऽङि-' इति गुणः । अवृणीतेति । वृञ् वरणे । लङ् । 'क्र्यादिभ्यः श्ना' 'ई हल्यघोः' इतीत्वम् । इतश्च । 'लेटोऽडाटौ' इत्यतः लेट इति 'वैतोऽन्यत्र' इत्यतो वेति चानुवर्तते । तदाह । लेट इत्यादि । लेटो-। आगमौ स्त इति । तौ च पर्यायेण, न तु यौगपद्येन अड्विधिसामर्थ्यात् । अन्यथा सवर्णदीर्घे कृते विशेषाभावाद् 'आद्युत्तमस्य' इति सूत्रान्मण्डूकप्लुत्या पिच्चेत्यनुवर्तते इत्याशयेनाह । तौ च पिताविति । तत्फलं तु 'विकन्दसी उर्वरासु ब्रतैते' इत्यादिषु गुणः । वृद्धिरिति । 'अचोऽञ्णिति' इत्यनेन । तारिषदिति । तॄ प्लवनतरणयोः । तिप इकारलोपः । सिप् इट् । जोषिषदिति । जुषी प्रीतिसेवनयोः । अनुदात्तेत् । व्यत्ययेन परस्मैपदम् । आसाविषदिति । आङ्पूर्वात् षु प्रसवैश्वर्ययोरित्यस्माल्लेट् । पता-

लोडर्थ इति । पूर्वपरान्वयि । अकरमिति । 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ् । 'ऋदृशोऽङि गुणः' उदाहरणेषु धातुसम्बन्धो मृग्यः । सिब्बहुलम् । अयं विकरणः । 'यासिसीड्याः' इत्यादौ सिपा व्यवधानादिरिनषेधो न, विहितविशेषणेऽपि छन्दसत्वाच्च, अत एव च लसार्वधातुकानुदात्तत्वम् । 'वैतोऽन्यत्र' इत्यतो वेति वर्तते, तदाह । लोपे वेति । परस्मैपदेष्विति । षष्ठ्यर्थे सप्तमी । परस्मै-

स उत्तमस्य । (३-४-९८) लेडुत्तमसकारस्य वा लोपः स्यात् । करवाव । करवावः । टेरेत्वम् । **३४२९ आत ऐ** । (३-४-९५) लेट आकारस्य ऐ स्यात् । सुतेभिः सुप्रयसा मादयैते । आतामित्याकारस्य ऐकारः । विधिसामर्थ्यादाट ऐत्वं न । अन्यथा हि ऐटमेव विदध्यात् । यो यजाति यजात इत् । **३४३० वैतोऽन्यत्र** (३-४-९६) लेट एकारस्य ऐ स्याद्वा 'आत ऐ' (३४२९) इत्यस्य विषयं विना । पशूनामीशै । ग्रहा गृह्यान्तै । अन्यत्र किम् । सुप्रयसा मादयैते । **३४३१ उपसंवादाशङ्कयोश्च** । (३-४-८) पणबन्धे आशङ्कायां च लेट् स्यात् । अहमेव पशूनामीशै । नेज्जिह्मायन्त्यो नरकं पताम । 'हलः श्नः शानज्झौ' (२५५७) । **३४३२ छन्दसि शायजपि** । ३-१-८४) अपिशब्दाच्छानच् ।

तीति । पत्लृ पतने तिप् । आडागमः । **करवावेति** । कृञो लेटो वस् 'तनादिकृञ्भ्यः' इति उः । गुणः रपरः । 'लेटोऽडाटौ' इत्याह । तस्य पित्वेनाङित्वाद्विकरणस्य गुणः । 'अत उत्सार्वधातुके' इत्युत्वाभावश्च । मदी हर्षे । णिच् तदन्ताल्लेट् । आतामि कृते आह । **टेरेत्वमिति** । 'टित आत्मनेपदानाम्' इत्यनेन । **आकारस्येति** । प्रथमस्येत्यर्थः । द्वितीयस्य 'टित आत्मनेपदानाम्' इत्यनेनैत्वमेव नित्यत्वात् । न च शब्दान्तरप्राप्त्याऽनित्यत्वं कृताकृतप्रसङ्गित्वमात्रेण क्वचिन्नित्यताश्रयणात् । उत्तरसूत्रेऽन्यत्रेति लिङ्गाच्च । आट ऐत्वं नेत्युक्तं, तस्य फलमाह । **यजाति यजात इति** । यज देवपूजादौ । लेट आडागमः । **वैतो** । अन्यत्र किमपेक्षयेत्याकाङ्क्षायां पूर्वसूत्रविषयादिति लभ्यते सन्निधानात् । तदाह । **आत इत्यादि** । **ईशै इति** । ईश ऐश्वर्ये । उत्तमैकवचनमिट् । 'इतश्च' इति लोपो नास्ति परस्मैपदेषु इत्युक्तेः । टेरेत्वे तस्य ऐः । **गृह्यान्ता इति** । ग्रहेः कर्मणि लेट् झिः । तस्याऽऽडागमः । यक् 'ग्रहिज्या' इति संप्रसारणम् , टेरेत्वम् , पूर्ववदैत्वम् । **पणबन्ध इति** । यदि मे भवानिदं कुर्यात्तर्हीदमहं दास्यामीति समयकरणं पणबन्धः । आशङ्का संभावना । **अहमेवेति** । त्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदं वचनम् । पशवः संसारिणः । **नेदिति** । इच्छब्द आशङ्कां द्योतयति । जिह्माऽऽचरणेन नरकपातः, स माभूदित्यर्थः । **पतामेति** । 'स उत्तमस्ये'ति सलोपः । **छन्दसि शाय-** । छन्दसि श्नः शाय-

---

पदतिङाभिकारान्तात्म्भित्यर्थः । **पतातीति** । 'पत्लृ गतौ ।' तिप् आट । **जिह्मायन्त इति** । 'छन्दसि परेच्छायाम्' इति क्यच् । 'अश्वाघस्यात्' इति योगविभागेनात्वम् । अन्यस्य पापेच्छावन्त इति । इदमेव जिह्माचरणं नाम । अन्ये तूपमानादन्यत्रापि छान्दसत्वादाचारे क्यचमाहुः । **अपिशब्दाच्छानजिति** । अपिशब्दा-

*हृग्रहोर्भश्छन्दसि इति हस्य भः । गृभाय जिह्वया मधु । बधान देव सवितः । 'अनिदिताम्' (४१५) इति बध्नातेर्नलोपः । गृभ्णामि ते । मध्वा जभार ।

३४३२ व्यत्ययो बहुलम् । (३-१-८५) विकरणानां बहुलं व्यत्ययः स्यात् छन्दसि । आण्डा शुष्णस्य भेदति । भिनत्तीति प्राप्ते । जरसा मरते पतिः । म्रियत इति प्राप्ते । इन्द्रो वस्तेन नेषतु । नयतेर्लोट् शप्सिपौ द्वौ विकरणौ । इन्द्रेण युजा तरुषेम वृत्रम् । तरेमेत्यर्थः । तरतेर्विध्यादौ लिङ् । उः शप् सिप् चेति त्रयो विकरणाः ।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥ १ ॥

जप्यादेशः स्याद्धौ परे । गृभायेति । ग्रह उपादाने । लोटः सेर्हिः 'क्र्यादिभ्यः श्ना' 'ग्रहिज्या' इति संप्रसारणम् । बधानेति । बन्ध बन्धने । 'अतो हेः' इति लुक् प्रसङ्गात् 'हृग्रहोर्भश्छन्दसि' इत्यस्योदाहरणमाह—गृभ्णामि त इति । जभारेति । हृञ् हरणे । लिटो णलि वृद्धौ हस्य भः । गृह्णामि जहारेत्यर्थः । भेदतीति । भिदिर् विदारणे रौधादिकः, श्नमि प्राप्ते शप् । म्रियत इति । मृङ् प्राणत्यागे । 'तुदादिभ्यः' इति शे कृते 'रिङ् शयग्लिङ्क्षु' इति रिङादेशः । इयङ् । नेषत्विति । नयत्वित्यर्थः । द्वौ विकरणाविति । तत्र शप् न्याय्यः, सिप्तु बाहुलकात् । एतेन 'सेमामविड्ढि' इत्यादि व्याख्यातम् । अव रक्षणे । अस्माल्लोटि शपि प्राप्ते बाहुलकात्सिप् । 'हुझल्भ्यो हेर्धिः' । षत्वं ष्टुत्वम् । तरुषेमेति । तरुष मसिति जाते यासुट् 'लिङः सलोपोऽनन्त्यस्य' । 'नित्यं ङितः' । 'अतो येयः' । लोपो व्योर्वलि' । 'आद्गुणः' । अत्रोप्रत्ययान्तस्य सिपं प्रत्यङ्गत्वात् 'सार्वधातुक' इति गुणः प्राप्तः । सिबन्तस्य शपि लघूपधगुणश्च प्राप्तो बाहुलकान्न भवति ।

सुप्तिङिति । शास्त्रकृत्पाणिनिराचार्य एषां सुप्प्रभृतीनां व्यत्ययमिच्छति । सोऽपि तथाविधो व्यत्ययो बाहुलकेन सिध्यति । बहुलस्य भावो बाहुलकम् । मनोज्ञादित्वाद् वुञ् । तत्पुनर्बहुलशब्दस्य प्रवृत्तिनिमित्तं बह्वर्थादानत्वं.चशब्दो हेतौ । यस्मादेवमुक्तप्रकारो

देवेह्यऽपि—योऽस्कभायदुत्तरम् । 'अस्कभ्ना'दित्यर्थः । व्यत्ययः । व्यतिक्रम्य गमनम् । व्यतिपूर्वादिणो भावे णच् । तच्च क्वचिदन्यविषयावगाहनं, क्वचिद्द्वौ, क्वचित्त्रय इत्यादि । लिङिति । तस्य मस् , धातोर्गुणः । 'नित्यं ङितः' इति सलोपः । यासुट् , अतो येयः । यलोपः । आद्गुणः । विकरणप्रकरणे व्यत्यय इत्येव सिद्धे बहुलग्रहणं सर्वविधिव्यभिचारार्थं, तदाह । सुप्तिङिति । बहूनर्थान् लाति—

धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । उपग्रहः परस्मैपदात्मनेपदे । ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । प्रतीपमन्य ऊर्मिर्युध्यति । युध्यत इति प्राप्ते । मधोस्तृप्ता इवासते । मधुन इति प्राप्ते । नरः पुरुषः । अधा स वीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते । कालः कालवाची प्रत्ययः । श्वोऽग्नीनाधास्यमानेन । लुटो विषये लृट् । तमसो गा अदुक्षत् । अधुक्षदिति प्राप्ते । मित्र वयं च सूरयः । मित्रा वयमिति प्राप्ते । स्वरव्यत्ययस्तु वक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः । अन्नादाय । अविवक्षये अच् । अवग्रहे विशेषः । यङो यशब्दादारभ्य 'लिङ्याशिष्यङ्' (३४३४) इति ङकारेण प्रत्याहारः । तेषां व्यत्ययो भवतीत्यादिरुक्त एव। ३४३४ लिङ्याशिष्यङ् । (३-१-८६) आशीर्लिङि परे धातोरङ् स्याच्छन्दसि । 'वच उम्'

व्यत्ययो बहुलग्रहणेनैव सिध्यति तस्माद्बहुलग्रहणं कृतमित्यर्थः । वियूया इति । यु मिश्रणे विपूर्वः । आशिषि लिङ् । आधास्यमानेनेति । आङ्पूर्वाद्धधातेः 'लृटः सद्वा' इत्यनेन शानजादेशः । 'स्यतासी' इति स्यः । 'आने मुक्' इति मुक् । मित्र वय मिति । दीर्घस्य ह्रस्वव्यत्ययः । स्वरव्यत्ययस्त्विति । गवामिव श्रियसे इत्यत्र 'तुमर्थे' इत्यनेन कसेनि कृते 'ञ्नित्यादि' इत्याद्युदात्ते प्राप्ते व्यत्ययेन मध्योदात्तता । कृत्तद्धितानामिति । 'तेन दीव्यति' इत्यादौ विधीयमानानां ठगादीनां देवनादिकर्तृत्वादेवमुक्तम् । न त्विह कारकवाचित्वेऽप्याग्रहः कृत्तद्धितमात्रे तात्पर्यात् । तथा च क्विपो विहितोऽप्यतिर्यच्छब्दादपि भवति । 'त्वं वेत्थ यति ते जातवेदः' । 'विश्वेदेवासो मरुतो यतिष्ठन' । अन्नादायेति । अन्नमत्तीत्यन्नादस्तस्मै अन्न कर्मण्युपपदेऽदेः कर्मण्यणि प्राप्तेऽच् । अवग्रह इति । अणि कृते अन्न आदायेति, अचि तु अन्न अदायेति भावः ।

आदत्ते इति बहुलं, तस्य भावो बाहुलकम् । मनोज्ञादित्वाद्वुञ् । दक्षिणायाः इत्यत्र स्याडभावश्छान्दसत्वात् । उपग्रहपदेन लादेशव्यङ्ग्यं स्वार्थत्वपरार्थत्वादि । तत्प्रतीतिनिमित्तलादेशोऽप्युपग्रहपदेनोच्यते इत्याशयेनाह । उपग्रह इत्यादि । मधुन इति प्राप्ते इति । अमृतक्षीरयोर्वाचको मधुशब्दो नित्यक्लीब इति भावः । वियूयादिति 'यु मिश्रणे' विपूर्वः । विशेष इति । अचि अन्न अदायेत्यवग्रहः, अणि आदायेति स्यात् । 'न लक्षणेन पदकाराः' इति न्यायेनाऽत्र फलान्तराऽभावाद्व्यत्ययफलं चिन्त्यम् । लिङ्याशिष्यङ् । स्था-गा-गमि-वचि-विदि-शकि-रुहिष्वेवायमङ् विकरणः

(२४२४)। मन्त्रं वोचेमाग्नये। दृशेरग्वक्तव्यः। पितरं च दृशेयं मातरं च। अङि तु 'ऋदृशोऽङि' (२४०६) इति गुणः स्यात्। **३४३५ छन्दस्युभयथा।** (३-४-११७) धात्वधिकारे उक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात्। वर्धन्तु त्वा सुष्टुतयः। वर्धयन्त्वित्यर्थः। आर्धधातुकत्वाण्णिलोपः। विशृण्विरे। सार्वधातुकत्वात् श्नुः श्नभावश्च। 'हुश्नुवोः' (२३८७) इति यण्। 'आदृगमहनजनः किकिनौ लिट् च' (३१५१)। आदन्तादृवर्णान्ताद्गमादेश्च किकिनौ स्तस्तौ च लिड्वत्। बभ्रिर्वज्रं पपिः सोमं ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रममित्रियम्। जज्ञिः। लिड्वद्भावादेव सिद्धे 'ऋच्छत्यृताम्' (२३८३) इति गुणबाधनार्थं कित्वम्। 'बहुलं छन्दसि (३२७८) इत्युत्वम्। ततुरिः। जगुरिः। **३४३६ तुमर्थे सेसेनसेअसेनक्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः।** (३-४-९) से। वक्षे रायः। सेन्। ता वामेषे। असे। शरदो जीवसे

वोचेमेति। वचेराशीर्लिङो मस् अङ्। 'वच उम्' यासुट्। **छन्दस्युभयथेति।** लिङः सार्वधातुकसंज्ञाप्यस्ति तेन यासुट इयादेशः। वलिलोपः। **आह।** परार्थे प्रयुज्यमानाः शब्दा वतिमन्तरेणापि वत्यर्थं गमयन्ति गौर्वाहीक इतिवदित्याशयेनाह— **लिड्वदिति।** किकिनौ भवतः। लिट् प्रत्ययस्य भवतीत्ययमर्थस्तु न भवति। तथा हि सति लिट् किकिन इत्येव ब्रूयात्। **बभ्रिरिति।** भृञ् अस्मात् किः लिड्वद्भावाद् द्वित्वम्। किकिनोस्थाने तिबादयस्तु न। लिड्वदित्यतिदेशेन स्वरूपाबाधेनैव कार्यातिदेशात्। 'न लोकाव्यय–' इति षष्ठीनिषेधे वज्रशब्दाद्द्वितीया। **जग्मिरिति।** 'गमहन–' इत्युपधालोपः। **जघ्निरिति।** 'हो हन्तेः–' इति कुत्वम्। **जज्ञिरिति।** श्चुत्वम्। जज्ञोर्ज्ञः। ननु लिड्वद्भावे सति 'असंयोगाल्लिट् कित्' इत्येव सिद्धे कित्त्वकरणमनर्थकमित्याशयेनाह **लिड्वद्भावादिति।** 'असंयोगाल्लिट् कित्' इति कित्त्वं सिद्धमिति भावः। आदिति मुखसुखार्थो दकारो न तु तकारः। तेन तात्परत्वाभावाद्दीर्घस्यापि ॠकारस्य ग्रहणम्। तदाह **ततुरिः। जगुरिरिति।** तॄ प्लवनतरणयोः। गॄ निगरणे। आभ्यां किः। द्वित्वात्परत्वाद् 'बहुलं छन्दसि' इत्युत्वे प्राप्ते 'द्विर्वचने–' इति निषेधादुत्वाभावे द्वित्वम्। उरदत्वम्। उत्तरस्योत्वम्। **तुमर्थे।** तुमुनोऽर्थस्तुमर्थो भावः। ननु 'कर्तरि कृत्' वचनात्कर्तरि तुमुनो विधानात्कथं भावोऽर्थ इति चेच्छृणु। 'अव्ययकृतो भावे' इति वचनात्तुमुनो भावे विधानात्। तुमर्थे पञ्चदश प्रत्यया भवन्ति।

प्रायेण दृश्यते। **बहुलं छन्दसीति।** अन्यथा 'ॠत इद्' इतीत्वं स्यात्। गुणस्तु न, कित्वादिति भावः। **तुमर्थे।** तुमर्थो–भावः, अव्ययकृतो भावे' इत्युक्तेः। भाव

धाः। असेन्। नित्त्वादाद्युदात्तः। क्से। प्रेषे। कसेन्। गवामिव श्रियसे। अध्यै। अध्यैन्। जठरं पृणध्यै। पक्षे आद्युदात्तम्। कध्यै। कध्यैन्। आहुवध्यै। पक्षे निस्स्वरः। शध्यै। राधसः सह मादयध्यै। शध्यैन्। वायवे पिबध्यै। तवै। दातवाउ। तवेङ्। सूतवे। तवेन्। कर्तवे। **३४३७ प्रयै रोहिष्यै अव्यथिष्यै।** (३-४-१०) एते तुमर्थे निपात्यन्ते। प्रयातुं रोढुमव्यथितुमित्यर्थः। **३४३८ दृशे विख्ये च।** (३-४-११) द्रष्टुं विख्यातुमित्यर्थः। **३४३९ शकि णमुल्कमुलौ।** (३-४-१२) शक्नोतावुपपदे तुमर्थे एतौ स्तः। विभाजं नाशकत्। अपलुपं नाशकत्। विभक्तुमपलोप्तुमित्यर्थः। **३४४० ईश्वरे तोसुन्कसुनौ।** (३-४-१३) ईश्वरो विचरितोः। ईश्वरो विलिखः। विचरितुं विलेखितुमित्यर्थः। **३४४१ कृत्यार्थे तवैकेन्केन्यत्वनः।** (३-४-१४) न

वक्षे इति। वचः से कुत्वे षत्वम्। कषसंयोगे क्षः। **एषे इति**। इणो गुणः। नकारो 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तार्थः। **प्रेषे इति**। इणः से कित्त्वाद्गुण आद्गुणः। **श्रियसे इति**। इयङ् नित्त्वादाद्युदात्तः। इह मन्त्रे मध्योदात्तः पठ्यते। तत्र बाहुलकात्प्रत्ययस्वरो बोध्यः। **आहुवध्यै इति**। जुहोतेरुवङ्। **मादयध्यै इति**। मदी हर्षे णयन्ताच्छध्यैप्रत्ययः। तस्य भाववाचिसार्वधातुकत्वात्सार्वधातुके यकि प्राप्ते व्यत्ययेन शप् गुणायादेशौ। **पिबध्यै इति**। अत्रापि यक्प्रसङ्गे व्यत्ययेन शप्। 'पाघ्रा-' इति पिबादेशः। **दातवा उ इति**। ददातेस्तवे आयादेशे 'लोपः शाकल्यस्य' इति यलोपः। **सूतवे इति**। ङित्त्वान्न गुणः। **कर्तवे इति**। कृञो गुणः। कर्तुमित्यर्थः। **प्रयै**। प्रपूर्वाद्यातेः कैप्रत्ययः। रुहेरिष्यै। नञ्पूर्वाद्व्यथेश्च। **दृशे**। योगविभागश्चिन्त्यप्रयोजनः। दृशेः ख्यातेश्च केप्रत्ययः कित्त्वाद्दर्शेर्न गुणः। ख्यातेरालोपश्च। **विभाजमिति**। विपूर्वाद्भजतेर्णमुल्। णित्वाद् 'अत उपधायाः' इति वृद्धिः। **अपलुपमिति**। लुप्लृ छेदने कित्त्वाद् गुणाभावः। **ईश्वरे**। ईश्वरशब्दे उपपदे धातोस्तोसुन्कसुनौ स्तश्छन्दसि। **विचरितोरिति**। चर गतौ। **विलिख इति**। लिख विलेखने कित्त्वान्न गुणः। 'क्त्वातो सुन्कसुनः' इत्यव्ययत्वाद् 'अव्ययादाप्सुपः' इति विभक्तेर्लुक् 'न लुमता-' इति निषेधाद् 'अत्वसन्तस्य' इति दीर्घो न **कृत्यार्थे**। कृत्यानामर्थो भावकर्मणी तयोरेवेति कृत्यानां भावकर्मणोर्विधानात तत्र एते प्रत्ययाः

इत्येव सिद्धे तुमर्थग्रहणात्साध्यावस्थभावस्याऽत्र ग्रहणम्। **पृणध्यै इति**। बाहुलकादगुणत्वं 'पिबध्यै' इत्यादौ यगभाववत्। एवञ्च बाहुलकेनैव पिबाद्यादेशकित्त्वकार्ये स्वीकृत्य कध्यैकध्यैन्शध्यैशध्यैनिति प्रत्ययचतुष्टयं व्यर्थमिति सूचयति। **आहु-**

म्लेच्छितवै । अवगाहे । दिदृक्षेण्यः । भूर्यस्पष्ट कर्त्वम् । ३४४२ अवचक्षे च । (३-४-१५) रिपुणा नावचक्षे । अवख्यातव्यमित्यर्थः । ३४४३ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् । (३-४-१६) आसंस्थातोः सीदन्ति । आसमाप्तेः सीदन्तीत्यर्थः । उदेतोः । अपकर्तोः । प्रवदितोः । प्रचरितोः । होतोः । आतमितोः । 'काममाविजनितोः संभवामः' इति श्रुतिः । ३४४४ सृपितृदोः कसुन् । (३-१-१७) भावलक्षणे इत्येव । पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जत्रुभ्य आतृदः । इति तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

३४४५ रात्रेश्चाजसौ (४-१-३१) रात्रिशब्दान्ङीप्स्यात् अजस्विषये

स्युः । यद्यपि कृत्यानामर्थो 'भव्यगेय–' इत्यादौ कर्तापि, वद्यं स्नानीयमित्यादौ करणादिरपि, तथापि न तत्र कृत्यत्वेन कर्त्रादिषु विधानं, किं तर्हि स्वरूपेण । कृत्यतया विधानं तु भावकर्मणोरेवेति भावः । **न म्लेच्छितवै इति** । न म्लेच्छितव्यमित्यर्थः । **अवगाहे इति** । गाहू विलोडने । **दिदृक्षेण्य इति** । दृशेः सन्नन्तात्केन्यः । अतो लोपः । **कर्त्वमिति** । कृञः त्वन् । कृत्यमित्यर्थः । यद्यपि 'तुमर्थे सेसेन्–' इत्यनेन तुमर्थे तवै विहितस्तथापि भावभिन्नेऽपि कर्मकारके तवै यथा स्यादित्येवमर्थम् । **अवचक्षे** । अवपूर्वाच्चक्षिङ एश् प्रत्ययो निपात्यते । शित्त्वात्सार्वधातुकत्वं तेन ख्याञादेशो न । **भावलक्षणे** । कृत्यार्थे इति निवृत्तम् । तुमर्थे इति वर्तते । प्रकृत्यर्थविशेषणं भावलक्षणग्रहणम । भावो लक्ष्यते येन तस्मिन्नर्थे वर्तमानेभ्यः स्थादिभ्यो धातुभ्यस्तुमर्थे तोसुन् स्याच्छन्दसि । संस्थानादीनामवधित्वेन लक्षणं भावः । **आ समाप्तेरिति** । संपूर्वो हि तिष्ठतिः समाप्तौ रूढः । संतिष्ठते पिण्डपितृयज्ञ इत्यादौ तथा दर्शनात् । **आतमितोरिति** । तमु ग्लानौ । **सृपितृदोः** । सृप्लृ गतौ । उतृदिर् हिंसानादरयोः । भावलक्षणेऽर्थे वर्तमानयोः सृपितृदोस्तुमर्थे कसुन् । **विसृप इति** । गमनादित्यर्थः । इति तृतीयोऽध्यायः ।

रात्रेश्चाजसौ । न जसिः अजसिस्तस्मिन् । इकार उच्चारणार्थः । 'आहो

वध्यै इति । ह्वञः संप्रसारणे उवङि रूपम् । **न म्लेच्छितवै इति** । म्वादेर्म्लेच्छधातोस्तवै । इट् । **अवगाहे इति** । अत्र केन् । **भावलक्षणे** । भावस्य लक्षणत्वे गम्ये इत्यर्थः । **आविजनितोः** । आप्रसवादित्यर्थः । **इति तृतीयः** ।

अथ चतुर्थः । रात्रेश्चाऽजसौ । अजसादिष्विति वक्तव्यं, रात्रिं रात्रिं

छन्दसि । रात्री व्यख्यदायती । लोके तु (ग.) कृदिकारादिति ङीष्यन्तोदात्तः। **३४४६ नित्यं छन्दसि ।** (४-१-४६) बह्वादिभ्यश्छन्दसि विषये नित्यं ङीष् । बह्वीषु हि त्वा । नित्यग्रहणमुत्तरार्थम् । **३४४७ भुवश्च ।** (४-१-४७) । ङीष् स्यात् छन्दसि । विभ्वी । प्रभ्वी । 'विप्रसंभ्य' (३१६०) इति डुप्रत्ययान्तं सूत्रेऽनुक्रियते । उत इत्यनुवृत्तेः । उवङादेशस्तु सौत्रः । मुद्गलाच्छन्दसि लिच्च । ङीषो लिखमानुक् चागमः । लित्स्वरः । रथीरभून्मुद्गलानी । **३३४८ दीर्घजिह्वी च छन्दसि ।** (४-१-५९) संयोगोपधत्वादप्राप्तो ङीष् विधीयते । आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट् । **३४४९ कद्रुकमण्डल्वोश्छन्दसि ।** (४-१-७१) ऊङ् स्यात् । कद्रूश्च वै कमण्डलूः । गुग्गुलुमधुजतुपतयालूना-

---

प्रभूतादिभ्यः' इतिवत् । **छन्दसीति** । ननु 'तिमिरपटैरवगुण्ठिता रात्र्यः' इति प्रयोगो न स्यात् । छन्दसीत्युच्यते । न चेदं छन्दः । अजसाविति निषेधाच्च । किं च वेदेऽपि रात्र्य इति प्रयोगो न स्याद् इत्याशङ्क्याह । **लोके त्विति** । तुशब्दो ऽनुक्तसमुच्चयार्थः । लोके जसि वेदे चेत्यर्थः । **कृदिकारादिति** । राशदिभ्यां त्रिरिति व्युत्पत्तिपक्षे कृदिकारान्तः । अव्युत्पत्तिपक्षे तु 'सर्वतोऽक्तिन्नर्थात्' इति ङीष् बोध्यः । **नित्यम्** । 'बह्वादिभ्यश्च' इति वर्तते 'अन्यतो ङीष्' इत्यतो ङीषिति च । तदाह । **बह्वादिभ्य इति** । नन्वारम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणं व्यर्थमित्याशङ्क्याह । **नित्यग्रहणमुत्तरार्थमिति** । **भुवः** । **विभ्वीति** । 'विप्रसंभ्यो ड्वसंज्ञायाम्' इत्यतो डुप्रत्ययान्तात् ङीष् । ननु स्वयंभूरत्रापि स्यादित्याशङ्क्याह । **डुप्रत्ययान्तमिति** । ननु डुप्रत्ययान्तानुकरणे प्रमाणं किमत आह । **उत इत्यनुवृत्तेरिति** । 'वोतो गुणवचनात्' इति सूत्रात् । ननु तर्हि डुप्रत्ययान्तस्य 'घेर्ङिति' इति गुणे कृते भोः इति निर्देशः प्राप्नोति। तदाह । **उवङादेशस्तु सौत्र इति** । **मुद्गला** । 'इन्द्रवरुण' इति सूत्रस्थं वार्तिकमिदम् । **लित्स्वर इति** । लितीत्यानुगाकारस्योदात्तत्वम् । **दीर्घजिह्वी** । दीर्घजिह्वीति निपात्यते छन्दसि । **अप्राप्तो ङीषिति** । 'स्वाङ्गाच्चोपसर्जनात्' इति न प्राप्नोति तत्र ह्यसंयोगोपधादिति प्रतिषेधात् । **कद्रु** । 'ऊङुतः' इत्यत ऊङिति वर्तते । कद्रुशब्दात्कमण्डलुशब्दाच्च स्त्रियामूङ् स्याच्छन्द-

---

सहोषित्वा । अजसाविति किम् ?, यास्ता रात्रयः । **लोके त्विति** । असञ्ज्ञाविषये इत्यर्थः । सञ्ज्ञायान्तु लोकेपि ङीबन्त एव । वृत्तौ सञ्ज्ञाछन्दसोरित्यनुवर्त्तनात् 'राशदिभ्यान्त्रिबिति' त्रिबन्त आद्युदात्तो रात्रिशब्दः । **नित्यग्रहणमिति** । आरम्भ-

मिति वक्तव्यम् । गुग्गुलूः । मधूः । जतूः । पतयालूः । 'अव्ययात्त्यप्' (१३२४) आविष्ट्यस्योपसंख्यानं छन्दसि । आविष्ट्यो वर्धते । ३४५० छन्दसि ठञ् । (४-३-१९) वर्षाभ्यष्ठकोऽपवादः । स्वरे भेदः । वार्षिकम् । ३४५१ वसन्ताच्च । (४-३-२०) ठञ् स्यात् छन्दसि । वासन्तिकम् । ३४५२ हेमन्ताच्च । (४-३-२१) छन्दसि ठञ् । हैमन्तिकम् । योगविभाग उत्तरार्थः । 'शौनकादिभ्यश्छन्दसि' (१४८६) णिनिः प्रोक्तेऽर्थे । छणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । छन्दसि किम् । शौनकीया शिक्षा । ३४५३ द्व्यचश्छन्दसि । (४-३-१५०) विकारे मयट् स्यात् । शरमयं बर्हिः । यस्य पर्णमयी जुहूः । ३४५४ नोत्वद्वर्ध्रबिल्वात् । (४-३-१५१) उत्वान् उकारवान् । मौञ्जं शिक्यम् । वर्ध्रं चर्म तस्य विकारो वार्ध्री रज्जुः । बैल्वो यूपः । 'सभाया यः' (१६२७) । ३४५५ ढश्छन्दसि । (४-४-१०६) सभेयो युवा ।

सि । **गुग्गुलुमधु** । एषां व्यत्ययेन छन्दसि स्त्रीत्वम् । पतयालुशब्दः 'स्पृहिगृहि' इत्यादिना आलुजन्तः । **अव्यया** । व्याख्यातमपि त्यबनुवृत्तिप्रदर्शनार्थं स्मारितम् । **आविष्ट्यस्येति** । 'अव्ययात्त्यप्' इत्यत्र 'अमेहक्कतसित्रेभ्यः' इति नियमादप्राप्तः शैषिकस्त्यब् विधीयते । **आविष्ट्य इति** । आविर्भूतमाविष्ट्यम् । 'ह्रस्वात्तादौ' इति षत्वं तकारस्य ष्टुत्वम् । **ठकोऽपवाद इति** । वर्षाभ्यष्ठक्' इति प्राप्तस्य । ननु ठक्ठञोः को विशेषस्तत्राह **स्वरे भेद इति** । ठञि कृते 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं, ठकि तु सति 'कितः' इत्यनेनान्तोदात्तत्वं स्यादिति भावः । **वार्षिकमिति** । ठस्येकः । **उत्तरार्थ इति** । 'सर्वत्राण् च तलोपश्च' इत्येतदर्थः । तत्र ह्यस्यैवानुवृत्तिर्यथा स्यात् वसन्तस्य माभूत् । **शौनक** । 'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' इति वर्तते । तदाह **णिनिरिति** । **प्रोक्ते इति** । 'तेन प्रोक्तम्' इत्येतस्मिन्नर्थे । **शौनकीयेति** । वृद्धाच्छः । **द्व्यचः** । 'मयड्वैतयोर्भाषायाम् ।' इत्युक्तेर्वेदेऽप्राप्तौ विधीयते । **नोत्वत्** । उकारवतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यां च मयण्न स्यात् । 'द्व्यचश्छन्दसि' इति प्राप्तः प्रतिषिध्यते । **मौञ्जमिति** । मुञ्जशब्दादौत्सर्गिकोऽण् । **वार्ध्रीति** । वर्ध्रशब्दादौत्सर्गिकोऽण् । 'टिड्ढाणञ्' इति ङीप् । **ढश्छन्दसि** ।

सामर्थ्याच्छित्यत्वासिद्धेरिति भावः । **उत्तरार्थं**–'भुवश्च' इत्यर्थम् । ड्डुप्रत्ययान्तस्य भोरिति स्यादत आह । **उवङिति** । **गुग्गुल्वादीनां** छन्दसि व्यत्ययेन स्त्रीत्वम् । **पतयालु**र्विशेष्यलिङ्गः । **शौनकादिभ्यश्छन्दसि** । अस्याऽत्र लेखो लेखकप्रमादात् । छन्दसि अभिधेये इति तदर्थात् । अत एव 'शौनकीया शिक्षा' इति तत्प्रत्युदाहरणमाकरे । **वद्ध्रमिति** । 'वद्ध्रीति' तु वधेरौणादिके ष्ट्रनि बोध्यम् ।

३४५६ भवे छन्दसि। (४-४-११०) सप्तम्यन्ताद्भवार्थे यत्। मेध्याय च विद्युत्याय च। यथायथं शैषिकाणामणादीनां घादीनां चापवादोऽयं यत्। पक्षे तेऽपि भवन्ति। सर्वविधीनां छन्दसि वैकल्पिकत्वात्। तद्यथा। मुञ्जवान्नाम पर्वतः। तत्र भवो मौञ्जवतः। सोमस्येव मौजवतस्य भक्षः। आ चतुर्थसमाप्तेश्छन्दोऽधिकारः। **३४५७ पाथोनदीभ्यां ड्यण्।** (४-४-१११) तमु त्वा पाथ्यो वृषा। चनो दधीत नाद्यो गिरो मे। पाथसि भवः पाथ्यः। नद्यां भवो नाद्यः। **३४५८ वेशन्तहिमवद्भ्यामण्।** (४-४-११२) भवे। वैशन्तीभ्यः स्वाहा। हैमवतीभ्यः स्वाहा। **३४५९ स्रोतसो विभाषा ड्यड्ड्यौ।** (४-४-११३) पक्षे यत्। ड्यड्ड्ययोस्तु स्वरे भेदः। स्रोतसि भवः स्रोत्यः। स्रोतस्यः। **३४६० सगर्भसयूथसनुताद्यन्।** (४-४-११४) अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्य उत वा जिघत्नुः। नुतिर्नुतम्। 'नपुंसके भावे क्तः' (३०९०)। सगर्भादयस्त्रयोऽपि कर्मधारयाः। 'समानस्य छन्दसि' (१०१२) इति सः। ततो भवार्थे यन्। यतोऽपवादः। **३४६१ तुग्राद्घन्।** (४-४-११५) भवेऽर्थे। पक्षे यदपि। आ वः शमं वृषभं तुग्र्यासु। इति बह्वृचाः। तुग्रियास्विति शाखान्तरे। वनाकाशयज्ञवरिष्ठेषु तुग्रशब्द इति वृत्तिः। **३४६२ अग्राद्यत्।** (४-४-११६)। **३४६३ घच्छौ च।** (४-४-११७)

सप्तम्यन्तात्सभाशब्दात् ढः साध्वर्थे। **अणादीनां चेति।** 'तत्र भवः' इति प्राप्तानाम्। **पाथोनदीभ्याम्।** सप्तम्यन्ताभ्यामाभ्यां भवार्थे ड्यण् स्यात्। **पाथसीति।** पाथो जलम्। 'कबन्धमुदकं पाथः' इत्यमरात्। 'पाथोऽन्तरिक्षं' इति श्रुतिः। **वैशन्तीभ्य इति।** विशेर्झच्। वेशन्तः पल्वलम्। तत्र भवा अपः वैशन्त्यः। **सगर्भसयूथस।** अर्तिगृभ्यां भन्। गिरति गीर्यते वा गर्भः। युता भवन्त्यस्मिन्निति यूथम्। 'तिथपृष्ठयूथगूथप्रोथाः' इति थक्प्रत्ययान्तो निपातितः। दीर्घोऽपि निपातनादेव। **कर्मधारया इति।** समानश्चासौ गर्भश्च तत्र भवः सगर्भ्ये

'वर्धिका पश्यन्ति' इति भाष्ये प्रयोगात्। **मेध्यायेति।** 'यतोऽनावः' इत्याद्युदात्तत्वं प्राप्नोति, अन्तस्वरितश्च पठ्यते इति हरदत्तः। **वैशन्तीभ्य इति।** वेशन्ते–पल्वले भवा आप इत्यर्थः। **स्रोतो** जलप्रवाहः। **सगर्भस।** **यन्**–नित्। **यदपीति।** छान्दसत्वात्। **चाद्घनिति।** यतः पूर्वेणैव सिद्धे व्यवहितस्याऽपि घनः समुच्चय इति भावः। लोके तु 'अग्रिमः' इत्येव। 'अग्रा' दित्येव सूत्रयितुमुचितं, यतोऽधिका-

चाद्यत् । अग्रे भवोऽग्र्यः । अग्रियः । अग्रीयः । **३४६४ समुद्राभ्राद्घः ।** (४-४-११८) समुद्रिया अप्सरसो मनीषिणम् । नानदतो अभ्रियस्येव घोषाः । **३४६५ बर्हिषि दत्तम् ।** (४-४-११९) 'प्राग्घिताद्यत्' (१६२६) इत्येव । बर्हिष्येषु निधिषु प्रियेषु । **३४६६ दूतस्य भागकर्मणी ।** (४-४-१२०) भागोंऽशः । दूत्यम् । **३४६७ रक्षोयातूनां हननी ।** (४-४-१२१) या ते अग्ने रक्षस्या तनूः । **३४६८ रेवतीजगतीहविष्याभ्यः प्रशस्ये ।** (४-४-१२२) प्रशंसने यत्स्यात् । रेवत्यादीनां प्रशंसनं रेवत्यम् । जगत्यम् । हविष्यम् । ३४६९

इति विग्रहः । **यतोऽपवाद इति** । 'भवे छन्दसि' इति प्राप्तस्येति । **अग्राद्यत्** । 'भवे छन्दसि' इत्येव सिद्धे घादिभिर्बाधा माभूदिति यद्विधीयते । **समुद्रा** । समुन्दतीति समुद्रः । 'स्फायितञ्चि' इति रक् । अपो बिभर्ति इत्यभ्रम् । मूलविभुजादित्वात्कः । 'अभ्रसमुद्रा'दिति वक्तव्ये समद्राभ्रादित्युक्तिः पूर्वनिपातस्यानित्यत्वज्ञापनार्था । **बर्हिषि** । तत्र भव इति निवृत्तम् । बर्हिःशब्दाद्दत्तमित्यर्थे यत्प्रत्ययो भवति । **बर्हिष्येति** । 'बृंहतेर्नलोपश्च' इतीस्प्रत्ययान्तो बर्हिस्तस्माद्यत् । **दूतस्य** । दूतशब्दात्षष्ठीसमर्थाद्भागे कर्मणि चाभिधेये यत्प्रत्ययः स्यात् । भागे 'तस्येदम्' इत्यणि प्राप्ते वचनम् । कर्मणि तु 'दूतवणिग्भ्यां च' इत्यौपसंख्यानिके ये दूत्यमित्यादि । दूतस्य भागो दूत्यः' कर्म दूत्यम् । **रक्षोयातूनाम्** । षष्ठीबहुवचनान्ताभ्यां रक्षस्यातुशब्दाभ्यां हननीत्यस्मिन्नर्थे यत्स्यात् । रक्षेरसुनि रक्षः 'कमितनिमनि' इत्यादिना यातेस्तुन् । यातुशब्दो रक्षःशब्दपर्यायः । न च 'विरूपाणामपि समानार्थानाम्' इत्येकशेषः स्यादिति वाच्यम् । बह्वर्थाभिधायिस्वरूपवचनेन सूत्रस्य भिन्नार्थत्वात् । **रक्षस्येति** । हन्यतेऽनया सा हननी रक्षसाम् । एवं यातव्या । बहुवचनं स्तुतिवैशिष्ट्यज्ञापनाय । बहूनां रक्षसां हनने हि स्तुतिः प्रतीयते । **रेवतीजगती** । प्रशंसनं प्रशस्यम् । प्रपूर्वाच्छंसु स्तुतावित्यस्माद्भावे क्यप् । तदाह **प्रशंसने इति** । रयिरस्यास्तीति रेवती । रयिशब्दान्मतुप् 'छन्दसीरः' इति वत्वम्, 'रयेर्मतौ बहुलम्' इति संप्रसारणम् । उगित्त्वान्ङीप् नक्षत्रे गौरादित्वान्ङीप् । जगच्छब्दात् 'वर्तमाने' इत्यनेन,

---

रात् । **बर्हिषि दत्तम्** । भव इति निवृत्तम् । 'बर्हिः कुशहुताशयोः' । **दूतस्य** । **कर्म**=क्रिया । तत्र भागे 'तस्येद'मित्यणि, कर्मणि 'दूतवणिग्भ्याञ्च' इति ये प्राप्ते वचनम् । **रक्षोयातूनाम्** 'विरूपाणामपीत्येकशेषो न कृतोऽसन्देहाय । शैषिकाऽणञ्योरपवादः । **प्रशस्ये इति** । बाहुलकाद्भावे क्यप, तद्योगे कर्मणि षष्ठी । तदाह **रेवत्यादीनामिति** । रयिरस्त्यस्या रेवती । 'रयेर्मतौ बहुल'मिति संप्रसारणम् ।

असुरस्य स्वम्। (४-४-१२३) असुर्यं देवेभिर्धायि विश्वम्। ३४७० **मायायामण्।** (४-४-१२४) आसुरी माया। ३४७१ **तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः।** (४-४-१२५) वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः। ऋतव्याः। ३४७२ **आश्विमानण्।** (४-४-१२६)

शतृवद्भावात् 'उगितश्च' इति ङीप्। हविषे हिता हविष्या। उगवादित्वाद्यत्। तासां प्रशंसनं हविष्यं, 'यस्य' इति लोपे कृते 'हलो यमां यमि' इति यलोपः। **असुरस्य स्वम्।** असुरशब्दात्षष्ठीसमर्थात्स्वमित्येतस्मिन्नर्थे यत्स्यात्। **असुर्यमिति।** न सुरोऽसुरः। सुरप्रतिपक्षी। अथ वा असेरुरच्। अस्यति अस्यते वा असुरः। तस्य स्वमसुर्यम्। **मायायामण्।** मीयतेऽनयेति माया असदर्थप्रकाशनशक्तिः। माङः औणादिको यः। तस्यां वाच्यायामसुरशब्दादण् स्यात्पूर्वसूत्रापवादः। **आसुरीति।** 'टिड्ढाणञ्–' इति ङीप्। **तद्वानासा।** मत्वन्तात्प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्स्यात् यत्प्रथमासमर्थमुपधानो मन्त्रश्चेत्स भवति, यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति, मतोश्च लुक्। **वर्चस्वानिति।** वर्चःशब्दो यस्मिन्मन्त्रेऽस्ति वर्चस्वान्। कुम्भेष्टकोपधानमन्त्रः 'भूतं च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसवे' इत्यादिकः। उपधीयतेऽनेनेत्युपधानम्। चयनं रचनमित्यर्थः। **ऋतव्या इति।** ऋतुशब्दो यस्मिन्मन्त्रेऽस्ति स ऋतुमान्, स च मधुश्च माधवश्चेत्यादिकः। ऋतुमानुपधानो मन्त्र आसामिष्टकानामृतव्याः। तद्वानिति किम्। मन्त्रादेव समुदायान्माभूदिति काशिका। अत्र हरदत्तः। ननु तद्वानित्यस्मिन्नसति 'समर्थानां प्रथमाद्वा' इति वचनादासामिति प्रथमानिर्दिष्टत्वात्षष्ठ्यन्तादिष्टकाभिधायिनः उपधानमन्त्रे प्रत्ययः स्यादिति वाक्यार्थः स्यात्। तथा च समुदायान्न प्राप्नोतीति चेत्सत्यम्। आसामिति प्रथमं न करिष्यत इति मत्वा प्रश्नप्रतिवचने, ततश्चोपधानो मन्त्र आसामिष्टकासु लुक् च मतोरिति योगः करिष्यते। तथा च तद्वानित्यस्याभावे 'भूतं च स्थ भव्यं च स्थ' इत्ययमुपधानो मन्त्र आसामिष्टकानामिति वाक्यं स्यात्। तथा चेतिना परामृष्टान्मन्त्रसमुदायादेव प्रत्ययः प्राप्नोतीति भावः। उपधान इति किम्। वर्चस्वदभिमन्त्रणमासामित्यत्र माभूत्। 'शिवेन मा चक्षुषा' इत्यनुवाकः कुम्भेष्टकाभिमन्त्रणे विनियुक्तः। मन्त्र इति किम्। अङ्गुलिमानुपधानो हस्त आसामित्यत्र माभूत्। इष्टकास्विति किम्। वर्चस्वानुपधान आसां शर्कराणामित्यत्र माभूत्। इति करणं नियमार्थम्। अनेकपदसम्भवे केनचिदेव पदेन तद्वान्मन्त्रो गृह्यते न सर्वेण। मतुब्ग्रहणमुत्तरार्थम्। आश्विमानित्यत्र मतुप एव लुक् यथा स्यात् इनेर्माभूत्। इह तु मत्वन्तात्प्र-

मायाया। असदर्थप्रकाशनशक्तिः–माया। असुरस्य–सुरप्रतिपक्षस्य, माया आसुरी।

आश्विनीरुपदधाति । ३४७३ **वयस्यासु मूर्ध्नो मतुप्** । (४-४-१२७) तद्वानासामिति सूत्रं सर्वमनुवर्तते । मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यम् । मतुबन्तो यो मूर्धशब्दस्ततो मतुप्स्यात्प्रथमस्य मतोर्लुक्च वयःशब्दवन्मन्त्रोपधेयास्विष्टकासु । यस्मिन्मन्त्रे मूर्धवयःशब्दौ स्तस्तेनोपधेयासु । मूर्धन्वतीरुपदधातीति प्रयोगः । ३४७४ **मत्वर्थे मासतन्वोः** । (४-४-१२८) नभोऽभ्रम् । तदस्मि-

---

त्ययविधानात्तस्यैव लुक् भविष्यति । **अश्विमान्** । अश्विशब्दो यस्मिन्मन्त्रेऽस्ति सोऽश्विमान्मन्त्रः स च ध्रुवक्षितिरित्यादिकः । प्रथमान्तादश्विमच्छब्दादासामिति षष्ठ्यर्थे अण् स्यात् यत्प्रथमानिर्दिष्टमुपधानो मन्त्रश्चेत्स भवति । यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति मतोश्च लुक् । **अश्विनीरुपदधातीति** । अश्वशब्दाद् 'अत इनिठनौ' इत्यस्त्यर्थे इनिः । तदन्तान्मतुप् । अश्विमान्स उपधानो मन्त्र आसामिष्टकानामिति विगृह्याणि विहिते मतोश्च लुकि कृते 'इनण्यनपत्ये' इति प्रकृतिभावः । **वयस्यासु** । वयस्वानुपधानो मन्त्र आसामिष्टकानां ता वयस्यास्तास्वभिधेयासु प्रथमासमर्थान्मतुबन्तमूर्धशब्दादासामिति षष्ठ्यर्थे मतुप्स्यात् । यत्प्रथमानिर्दिष्टमुपधानो मन्त्रश्चेत्स भवति, यदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति । यस्मिन्मन्त्रे मूर्धशब्दो वयःशब्दश्च विद्यते स मूर्धवान् वयस्वान्, यथा मूर्धा वयः प्रजापतिश्छन्द इति, तत्र वयस्वच्छब्दादिव मूर्धवच्छब्दादपि पूर्वेण यति प्राप्ते मतुब्विधीयेतेत्याशयेनाह । **यस्मिन्मन्त्रे इति** । **मूर्धन्वतीरिति** । 'अनो नुट्' इति नुडागमः । मूर्धवत इति वक्तव्ये भाविनं मतुब्लुकं चेतसि कृत्वा मूर्ध इत्युक्तम् । **मत्वर्थे** । यस्मिन्नर्थे मतुब्विहितस्तस्मिन्नर्थे प्रथमान्ताद्यत्स्याद् मासतन्वोरभिधेययोः । ननु प्रथमासमर्थमिति कस्मादागतमिति चेन्मत्वर्थग्रहणादित्यवेहि । 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' इति ऊकारान्तस्तनूशब्दः सूत्रे निर्दिष्टः । न तु 'भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः' । इत्युकारान्तः । 'द्वन्द्वे घि' इति

मूर्धन्वतीरिति । यद्यपि । 'मूर्धा वयः प्रजापतिश्छन्द' इत्यन्त्यमन्त्र एव मूर्धन्शब्दोऽस्ति तथाऽपि तत्साहचर्याच्छत्रिन्यायेन 'विष्टम्भो वय' इत्यादयश्चत्वारोऽपि मन्त्रा 'मूर्धन्वन्त' उच्यन्ते । वयस्यास्विति । किम् ? । अग्ने यशस्विन् यशसेसमर्पयाऽयं मूर्धा परमेष्ठी'ति केवलमूर्धशब्दवता वयःशब्दरहितेन मन्त्रेणोपधेयासु माभूदिति । **मत्वर्थे** । **मा** । मत्वर्थे यत् स्याच्छन्दसि मासतन्वोर्वाच्ययोः । मासतन्वोः किम् ? । स्वध्वरासो मधुमन्तोऽग्नयः । सूत्रे 'तनू' शब्दो दीर्घान्त इति हरदत्तः । 'अनन्तरार्थे वेति वक्तव्यम्' । मध्वनन्तरमस्मिन्–मधव्यो माधवो मासः । 'लुगकारेकाररेफाश्चेति वक्तव्यम्' । लुक्–मधुः, तपः, नभः । अन्त्ययोः क्लीबत्व-

स्त्यस्तीति नभस्यो मासः। ओजस्या तनूः। ३४७५ **मधोर्ञ च**। (४-४-१२९) माधवः। मधव्यः। ३४७६ **ओजसोऽहनि यत्खौ**। (४-४-१३०) ओजस्यमहः। ओजसीनं वा। ३४७७ **वेशोयशआदेर्भगाद्यल्**। (४-४-१३१) यथासंख्यं नेष्यते। वेशो बलं तदेव भगः। वेशोभग्यः। वेशोभगीनः। यशोभग्यः। यशोभगीनः। ३४७८ **ख च**। (४-४-१३२) योगविभाग उत्तरार्थः क्रमनिरासार्थश्च। ३४७९ **पूर्वैः कृतमिनयौ च**। (४-४-१३३) गम्भीरेभिः पथिभिः पूर्विणेभिः। ये ते पन्थाः सवितः पूर्व्यासः। ३४८० **अद्भिः संस्कृतम्**। (४-४-१३४) यस्येदमप्यं हविः। ३४८१ **सहस्रेण संमितौ घः**। (४-४-१३५) सहस्रियासो अपां नोर्मयः। सहस्रेण तुल्या इत्यर्थः। ३४८२ **मतौ च**। (४-४-१३६) सहस्रशब्दान्मत्वर्थे घः स्यात्। सहस्रमस्यास्तीति सहस्रियः। ३४८३ **सोममर्हति यः**। (४-४-१३७) सोम्यो ब्राह्मणः।

पूर्वनिपातप्रसङ्गात्। **ओजस्या इति**। ओजो यस्या यस्यां वा अस्तीत्योजस्या। **मधोः**। मधुशब्दान्मत्वर्थे ञः स्याद्यत्। **मधव्या इति**। ओर्गुणः। 'वान्तो यि–' इति अवादेशः। **ओजसोऽहनि**। ओजःशब्दान्मत्वर्थे यत्खौ स्तोऽहन्यभिधेये। ननु यद्ग्रहणं व्यर्थं खश्चेत्येवास्त्विति चेन्मैवम्। खश्चेत्युच्यमानेऽनन्तरसूत्रविहितस्य ञमात्रस्य समुच्चयो विज्ञायेत तस्माद्यद्ग्रहणम्। **वेशोयश**। वेशश्च यशश्च वेशोयशसी ते आदौ यस्य तस्माद्वेशोयशआदेर्भगात्प्रातिपदिकाद्यल्खौ स्तो मत्वर्थे। लकारः स्वरार्थः। **पूर्विणेभिरिति**। पूर्वैः कृताः पूर्विणाः तैः। एवं पूर्व्यासः पूर्विणाः। **अद्भिः**। तृतीयान्तादप्शब्दात्संस्कृतमित्यर्थे यत्स्यात्। **सहस्रेण**। तृतीयान्तात्सहस्रशब्दात्संमितमित्येतस्मिन्नर्थे घः स्यात्। संमितः सदृशस्तुल्य इत्यर्थः। **सहस्रिया इति**। सहस्रेण संमिताः सहस्रियाः। 'यस्येति च' इत्यकारलोपः। समिताविति पाठान्तरम्। **मतौ**। 'तपःसहस्राभ्यां विनीनी' इत्यस्यापवादः। **सोममर्हति**। द्वितीयान्तात्सोमशब्दादर्हतीत्यस्मिन्नर्थे यत्स्यात्। **सोम्य इति**।

मार्षम्। **अकारः**–इषः, ऊर्जः। इट्=अन्नम्, ऊर्क्=बलम्, तद्वानित्यर्थः। **इकारः**–आतपाधिक्येन देहशोषरूपा शुगस्मिन्नस्ति=शुचिः। **रेफो** रशब्द.–शुक्रः। अयस्मयादित्वाज्जश्त्वं न। **ओजसोऽह**। ओजःशब्दान्मत्वर्थे यत्खौ स्तोऽहनि वाच्ये। **वेशोय**। एतदादिकाद्भगशब्दाद्यल्खौ। 'भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु। **पूर्वैः कृत**। पूर्वशब्दात्तृतीयाबहुवचनान्तात् कृतमित्यर्थे इन इति, य इति च प्रत्ययः। **अद्भिः**। संस्कृतमित्यर्थे यदित्यर्थः। **सोममर्ह**। सोमशब्दा-

यज्ञार्ह इत्यर्थः । ३४८४ मये च । (४-४-१३८) सोमशब्दाद्यः स्यान्मयडर्थे । सोम्यं मधु । सोममयमित्यर्थः । ३४८५ मधोः । (४-४-१३६) मधुशब्दान्मयडर्थे यत्स्यात् । मधव्यः । मधुमय इत्यर्थः । ३४८६ वसोः समूहे च । (४-४-१४०) चान्मयडर्थे यत् । वसव्यः ।✽अक्षरसमूहे छन्दस उपसंख्यानम् । छन्दःशब्दादक्षरसमूहे वर्तमानात्स्वार्थे यदित्यर्थः । आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामहे इति पञ्चाक्षरं, द्व्यक्षरो वषट्कार एष वै सप्तदशाक्षरश्छन्दस्यः । ३४८७ नक्षत्राद्धः । (४-४-१४१) स्वार्थे । नक्षत्रियेभ्यः स्वाहा । ३४८८ सर्वदेवात्तातिल् । (४-४-१४२) स्वार्थे । सविता नः सुवतु सर्वतातिम् । प्रदक्षिणिद्देवतातिमुराणः । ३४८९ शिवशमरिष्टस्य करे । (४-४-१४३) करोतीति करः । पचाद्यच् । शिवं करोतीति शिवतातिः । याभिः शन्ताती भवथो ददाशुषे । अथो अरिष्टतातये । ३४९० भावे च । (४-४-१४४) शिवादिभ्यो भावे तातिः स्याच्छन्दसि । शिवस्य भावः शिवतातिः । शन्तातिः । अरिष्टतातिः ।

इति चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

३४९१ सप्तनोऽञ्छन्दसि । (५-१-६१) 'तदस्य परिमाणम्' (१७२३) इति वर्ग इति च । सप्त साप्तानि असृजत् ।✽शन्शतोर्डिनिश्छन्दसि तदस्य

सोममर्हतीति सोम्यः । **मये च** । आगतविकारावयवप्रकृता मयडर्थाः । तत्रागते पञ्चमी समर्थविभक्तिः, विकारावयवयोः षष्ठी, प्रकृतवचने प्रथमा । **मधोः । यत्स्यादिति** । वृत्तिकारस्तु यतमेवानुवर्तयति न तु यम् । **नक्षत्रात्** । **स्वार्थ इति** । समूह इति नानुवर्तते । तेनाऽनिर्दिष्टार्थत्वात्स्वार्थे प्रत्यय उत्पद्यत इत्यर्थः । **सर्वदेवात्** । सर्वशब्दाद्देवशब्दाच्च तातिल् स्यात् । **शिवशम** । करशब्दसामानाधिकरण्यात् 'शिवशमरिष्टस्य–' इति 'उभयप्राप्तौ कर्मणि' इति षष्ठी ।

इति वैदिकसुबोधिन्यां चतुर्थोऽध्यायः,

सप्तनोऽञ् सप्तन्शब्दादञ् स्याच्छन्दसि । **साप्तानीति** । सप्तन्शब्दा-

---

द्द्वितीयान्तादर्हतीत्यर्थे यप्रत्ययः । **मधोः** । 'य' इति निवृत्तम् । **चान्मयडर्थे इति** । स्वार्थे इत्यपि बोध्यम् । अग्निरीशेव सव्यस्येत्यादिः । **स्वार्थे इति** । समूह इति निवृत्तम् । **शिवशम** । **पचाद्यजिति** । एवञ्च कृद्योगलक्षणा षष्ठी समर्थविभक्तिः । फलितमाह । **शिवं करोतीति** । **अरिष्टाः** । प्रकृतयः । **इति चतुर्थः** ।

परिमाणमित्यर्थे वाच्यः। पञ्चदशिनोऽर्धमासाः। त्रिंशिनो मासाः। *विंशतेश्चेति वाच्यम्। विंशिनोऽङ्गिरसः। *युष्मदस्मदोः सादृश्ये मतुब्वाच्यः। त्वावतः पुरूवसो। न त्वावाँ अन्यः। यज्ञं विप्रस्य मावतः। ३४६२ छन्दसि च। (५-१-६७) प्रातिपदिकमात्रात्तदर्हतीति यत्। सादन्यं विदथ्यम्। ३४६३ वत्सरान्ताच्छश्छन्दसि। (५-१-६१) निर्वृत्तादिष्वर्थेषु। इद्वत्सरीयः। ३४६४ संपरिपूर्वात्ख च। (५-१-६२) चाच्छः। संवत्सरीणः। संवत्सरीयः। परिवत्सरीणः। परिवत्सरीयः। ३४६५ छन्दसि घस्। (५-१-१०६) ऋतुशब्दात्तस्य प्राप्तमित्यर्थे। भाग ऋत्वियः। ३४६६ उपसर्गाच्छन्दसि धात्वर्थे।

दश्च 'नस्तद्धिते' इति टिलोपे तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां जस्। 'जश्शसोः शिः'। 'नपुंसकस्य–' इति नुम्। उपधादीर्घः। शन्शतोः। डित्करणं शदन्तस्य टिलोपार्थम्। पंचदशिन इति। पञ्चदशाहानि परिमाणमेषामिति डिनिः टिलोपः। एतेन त्रिंशिनो व्याख्याताः। विंशिनोऽङ्गिरस इति। विंशतिर्गोत्राणि परिमाणमेषामिति विग्रहे डिनि कृते 'तिविंशतेर्डिति' इति तिशब्दलोपे कृते यस्येति लोपः। आङ्गिरसाऽयास्यगार्ग्यगौतम इत्यादिप्रवरभेदभिन्नानि विंशतिरवान्तरगोत्राणि परिमाणमेषामित्यर्थः। त्वावत इति। त्वमिव त्वावान् तस्य त्वावतः। अहमिवेति मावान् तस्य मावतः। 'प्रत्ययोत्तरपदयोश्च' इति त्वमादेशौ। 'आ सर्वनाम्नः' इत्यात्वम्। सादन्यमिति। सदनं गृहमर्हतीति सादन्यः। 'अन्येषामपि–' इति दीर्घः। विदथ्यमिति। विदथो यज्ञस्तमर्हतीत्यर्थः। इद्वत्सरीय इति। इद्वत्सरेण निर्वृत्तः इद्वत्सरमधीष्टो भृतो भूतो भावी वा इद्वत्सरीयः। इद्वत्सरेदावत्सरशब्दौ पञ्चवर्षे युगे द्वयोर्वर्षयोः संज्ञे। एवं संवत्सरपरिवत्सरशब्दावपि। संपरिपूर्वात्। संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः स्याच्चाच्छः। छन्दसि घस्। 'समयस्तदस्य प्राप्तम्' इत्यतस्तदस्य प्राप्तमिति 'ऋतोरण्' इत्यतः ऋतोरिति चानुवर्तते। तदाह ऋतुशब्दादित्यादि। ऋत्विय इति। 'सिति च' इति पदत्वेन भत्वे निरस्ते 'ओर्गुणः' इति गुणाभावे यण्। उपसर्गात्। इह धातुशब्देन धातुवाच्या क्रिया लक्ष्यते। सोऽर्थः प्रयोजनं यस्य

अथ पञ्चमः। साप्तानीति। आर्षं क्लीबत्वम्। वर्गः=प्राण्यप्राणिविषयः। विंशिन इति। आङ्गिरस–अयास्य–गार्ग्य–गौतमेत्यादिप्रवरभेदभिन्नानि विंशतिस्वान्तरगोत्राणि परिमाणमेषामित्यर्थः। सादन्यमिति। सदनमर्हतीत्यर्थः।

(५-१-११८) धात्वर्थविशिष्टे साधने वर्तमानात्स्वार्थे वतिः स्यात् । यदुद्वतो निवतः । उद्गतान्निर्गतादित्यर्थः । ३४६७ थट् च छन्दसि । (५-२-५०) नान्तादसंख्यादेः परस्य डटस्थट् स्यान्मट् च । पञ्चथम् । पञ्चमम् । 'छन्दसि परिपन्थि-परिपरिणौ पर्यवस्थातरि' (१८८१) । पर्यवस्थाता शत्रुः । अपत्यं परिपन्थिनम् । मात्वा परिपरिणो विदन् । ३४६८ बहुलं छन्दसि । (५-२-१२२) मत्वर्थे विनिः स्यात् । *छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यम् । इति दीर्घः । मंहिष्ठमुभयाविनम् । शुनमष्ट्राव्यचरत् । *छन्दसीवनिपौ च वक्तव्यौ । ई । रथीरभूत् । सुमङ्गलीरियं वधूः । मघवानमीमहे ।

साधनस्य तस्मिन् वर्तमानादित्यर्थस्तदाह धात्वर्थविशिष्ट इति । उपसर्गाश्च पुनरेवमात्मकाः यदु ते श्रुतायां क्रियायां तामेव विशिंषन्ति । यथा आगच्छति । यत्र तु न श्रूयते तत्र क्रियाविशिष्टसाधनमाहुः । निष्कौशाम्बिः । तथा च यत्र क्रियापदं श्रूयते तत्रैव यथा स्यादित्येवमर्थं धात्वर्थ इत्युक्तम् । थट् च । 'तस्य पूरणे' इत्यतः डडिति 'नान्तादसंख्यादेः—' इति च । तदाह नान्तादित्यादि । पञ्चथमिति । पञ्चानां पूरणमित्यस्मिन्नर्थे डटि कृते तस्य थडागमः । छन्दसि । परिपन्थिन् परिपरिन् एतौ निपात्येते छन्दसि पर्यवस्थातरि वाच्ये । पर्यवस्थाता प्रतिपक्षः सपत्न इत्युच्यते । निपातनं चात्र पर्यवस्थातृशब्दात्स्वार्थे इनिप्रत्ययोऽवस्थातृशब्दस्य पन्थि परि एतावादेशौ च निपात्येते । बहुलम् । 'अस्मायामेधास्रजो विनिः' इति वर्तते । तदाह विनिः स्यादिति । अष्ट्रावीति । अशेः ष्ट्रन् अष्ट्रा । दंष्ट्रापर्यायोऽयम् । मेखलावी द्वयावी उभयावी । रुजावी हृदयावी । अत्र द्वयोभयहृदयान्येव दीर्घत्वं प्रयोजयन्ति । अन्येषां स्वत एव दीर्घत्वात् । छन्दसि । ईश्च वनिप् च ईवनिपौ । ई इति । ईप्रत्ययोदाहरणमुच्यते । रथीरिति । रथोऽस्यास्तीति रथी । सुमङ्गलीरिति । सुष्ठु मङ्गलमिति 'सुः पूजायाम्' इति समासः । ततोऽनेन मत्वर्थीय ईकारप्रत्ययः । मघवानिति । मघं धनं तदस्यास्तीति वनिपि, मतुपि तु

इद्वत्सरेदावत्सरसंवत्सरपरिवत्सराः पञ्चवर्षे युगचतुर्णां वर्षाणां सञ्ज्ञाः । उद्गत इत्यादि । देशा विशेष्याः । साधनशब्देन शक्तिमद्द्रव्यमिति लिङ्गसङ्ख्यायोगादन्वर्थाऽव्ययसञ्ज्ञा न । थट् च । चात्पक्षे मट् । थुक्तु अत्र न कृतः, नलोपाऽनापत्तेः । दीर्घश्चेति । द्वयोभयहृदयविषयमिदम् । छन्दसीव । चाद्वः । अन्यतरस्याङ्ग्रहणानुवृत्तेर्मतुप् च । रथोऽस्या अस्ति, सुमङ्गलमस्या अस्तीत्यर्थः । (छान्द-

३४९९ तयोर्दार्हिलौ च छन्दसि। (५-३-२०) इदन्तदोर्यथासंख्यं स्तः। इदा हि व उपस्तुतिम्। तर्हि। ३५०० था हेतौ च छन्दसि। (५-३-२६) किमस्था स्याद्धेतौ प्रकारे च। कथा ग्रामं न पृच्छसि। कथा दाशेम। ३५०१ पश्च पश्चा च छन्दसि। (५-३-३३) अवरस्य अस्तात्यर्थे निपातौ। पश्च हि सः। नो वे पश्चा। 'तुश्छन्दसि (२००७) तृजन्तात्तृन्नन्ताच्च इष्ठन्नीयसुनौ स्तः। आसुतिं करिष्ठः। दोहीयसी धेनुः। ३५०२ प्रत्नपूर्वविश्वेमात्थाल्छन्दसि।

मघवच्छब्दः। तयोः। तच्छब्देन 'इदमोर्हिल्' 'तदो दा च' इति संनिहिताविदन्तदौ परामृश्येते। तदाह इदन्तदोरिति। सूत्रे व्यत्ययेन पञ्चम्याः स्थाने षष्ठी। यथासंख्यं स्त इति। इदंशब्दाद्दा तच्छब्दाद् र्हिल्। इदा। इदम्शब्दाद्दा 'इदम इश्' इत्यनेनेशादेशः। था हेतौ। 'प्रकारवचने थाल्' इत्यतः प्रकारवचन इति किमश्चेति तदाह किमस्था स्यादित्यादि। कथा ग्रामं न पृच्छसीति। केन हेतुना पृच्छसीत्यर्थः। तस्य 'प्राग्दिशो विभक्तिः' इत्यधिकाराद्विभक्तिसंज्ञायां 'किमः कः' इति कादेशः। प्रकारवचने उदाहरणमाह कथा दाशेमेति। केन प्रकारेणेत्यर्थः। पश्चपश्चा। अवरस्य पश्चभावः अकाराकारौ च प्रत्ययौ निपात्येते। अस्तात्यर्थे इति। दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। करिष्ठ इति। कर्तृशब्दादिष्ठन्। 'तुरिष्ठेमेयःसु' इति तृलोपः। दोहीयसीति। अतिशयेन दोग्ध्रीत्यर्थः। लिङ्गविशिष्टपरिभाषया दोग्ध्रीशब्दात्प्रत्ययः। 'भस्याढे–' इति पुंवद्भावेन ङीपो निवृत्तिः। ततः 'तुरिष्ठेमेयःसु' इति तृचि निवृत्ते निमित्ताभावाद्धत्वकुत्वयोरपि निवृत्तिः। प्रत्नपूर्व। प्रत्न पूर्व

सत्त्वात्कर्मधारयादप्यत्र मत्वर्थीयः)। मघं=धनमस्यास्ति–मघवा। उद्वतसम्बन्धिनीत्यर्थे उद्वा उद्वतीति वमतुपोरुदाहरणे। तयोरिति व्याचष्टे। इदन्तदोरिति। आनन्तर्ययोगे षष्ठी। कथेति। कुतो हेतोः; केन प्रकारेण वेत्यर्थः। तुश्छन्दसि। 'अजादी गुणवचनादेवे'ति नियमबाधेन प्रकृत्यन्तराभ्यनुज्ञामात्रमत्र क्रियते, न त्वपूर्वो विधिः। तेनोगाधिसङ्करो न। करिष्ठ इति। कर्तृशब्दात्तृन्नन्तादिष्ठनि कर्मणि द्वितीया। अतिशयरूपेष्ठनर्थस्य विशेषणत्वात्तृन्नन्तस्य शक्तेश्च न 'कृतपूर्वी' कटवुल्यता। तेन तद्वदत्र तृजन्तप्रकृतिकत्वेऽपि न षष्ठीति परास्तम्। दोग्ध्रीशब्दे 'सिद्धश्च प्रत्ययविधौ' इति वचनाद् 'भस्याऽढे' इति पुंवत्त्वेन दोग्धृशब्दात्प्रत्यये 'तुरिष्ठेमेयस्सु' इति तृलोपः। ततः प्राग्घत्वजश्त्वे तु न, असिद्धत्वात्। प्रत्नपूर्व

(५-३-१११) इवार्थे। तं प्रत्नथा पूर्वथा विश्वथेमथो। ३५०३ अमु च छन्दसि। (५-४-१२) किमेत्तिङव्ययघादित्येव। प्र तं नय प्रतरम्। ३५०४ वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि। (५-४-४१) स्वार्थे। यो नो दुरेवो वृकतिः। ज्येष्ठतातिं बर्हिषदम्। ३५०५ अनसन्तान्नपुंसकाच्छन्दसि। (५-४-१०३) तत्पुरुषाट्टच् स्यात्समासान्तः। ब्रह्मसामं भवति। देवच्छन्दसानि। ३५०६ बहुप्रजाश्छन्दसि च। (५-४-१२३) बहुप्रजा निर्ऋतिमाविवेश। ३५०७ छन्दसि च। (५-४-१४२) दन्तस्य दतृशब्दः स्याद्बहुव्रीहौ। उभयतोदतः प्रतिगृह्णाति। ३५०८ ऋतश्छन्दसि। (५-४-१५८) ऋदन्ताद्बहुव्रीहेर्न कप्। हता माता यस्य हतमाता। इति पञ्चमोऽध्यायः।

विश्व इम एभ्यस्थाल् स्यात्। **अमु च**। किमेत्तिङव्ययघाद् द्रव्यप्रकर्षे वर्तमानादमुप्रत्ययो भवति। **प्रतरमिति**। प्रकर्षार्थात् प्रकर्षे तरप्। प्रकृष्टतर इतिवत् तदन्तादमुः। स्वरादिषु अम् आम् इति पठ्यते तेन तदन्तस्याव्ययत्वे सुपो लुक्। अत्रेदित्करणम् 'इच एकाचोऽम्प्रत्ययवच्च' इत्यत्रास्य ग्रहणं माभूत्। यदि स्यात्तर्हि अत्रापि यद्दृष्टं कार्यं तदप्यतिदिश्येत। तत्र को दोषः। इह स्त्रियंमन्यमानः। यस्येति लोपः प्राप्नोति। **अनसन्तात्**। अन्नन्तस्योदाहरणमाह। **ब्रह्मसाममिति**। असन्तस्याह। **देवच्छन्दसानीति**। **बहुप्रजाः**। बहुप्रजा इति निपात्यते छन्दसि। **बहुप्रजा इति**। बह्वयः प्रजा यस्येति बहुव्रीहिः, असिच् प्रत्ययः। 'यस्येति च' इत्यकारलोपः। 'अत्वसन्तस्य' इति दीर्घः। रुत्वविसर्गौ। **छन्दसि च**। 'वयसि दन्तस्य दतृ' इत्यतो 'दन्तस्य दतृ' इत्यनुवर्तते। तदाह। **दन्तस्य दतृ स्यादिति**। **उभयतोदत इति**। उभयतो दन्ता यस्येति विग्रहः। **हतमाता इति**। 'नद्यृतश्च' इति नित्यं कप् प्राप्तः। इति सुबोधिन्यां पञ्चमोऽध्यायः।

[विश्वेमात्थाल्]। इमशब्द इदमासमानार्थः प्रकृत्यन्तरम्। **प्रतरमिति**। प्रकर्षप्रकर्षे तरप्, प्रकृष्टतर इत्यर्थः। उदित्त्वम् 'इच एकाचोऽम्प्रत्ययव'दित्यत्रास्य ग्रहणं माभूदिति। तेन 'स्त्रियंमन्यः' इत्यादौ 'यस्ये'ति लोपो न। **स्वार्थे इति**। प्राशस्त्यविशिष्टे स्वार्थे इत्यर्थः। 'सस्नौ प्रशंसाया' मित्यतस्तदनुवृत्तेः। **अनस**। ब्रह्मणः साम, देवस्य छन्दांसीति विग्रहः। **बहुप्रजा इति**। बहुव्रीहिः। **इति पञ्चमः**।

षष्ठोऽध्यायः ।

'एकाचो द्वे प्रथमस्य' (२१७५) ॐ छन्दसि वेति वक्तव्यम् । यो जागार । दाति प्रियाणि । ३५०९ तुजादीनां दीर्घोऽभ्यासस्य । (६-१-७) तुजादिराकृतिगणः । प्रभरा तूतुजानः । सूर्यं मामहानम् । दाधार यः पृथिवीम् । स तूताव । ३५१० बहुलं छन्दसि । (६-१-३४) ह्वः संप्रसारणं स्यात् । इन्द्रमाहुवे ऊतये । * ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि । ऋच्शब्दे परे त्रेः संप्रसारणमुत्तरपदादेर्लोपश्चेति वक्तव्यम् । तृचं सूक्तम् । छन्दसि किम्—त्र्यृचानि । * रयेर्मतौ बहुलम् । रेवान् । रयिमान्पुष्टिवर्धनः । ३५११ चायः की । (६-१-३५) न्यु१न्यं चिक्युर्न निचिक्युरन्यम् । लिटि उसि रूपम् । बहुल-

---

जागारेति । जागृ निद्राक्षये । लिटि प्रथमपुरुषैकवचनम् । दातीति । डुदाञ् दाने लट् । शपः श्लुः । 'श्लौ' इति नित्यं द्वित्वे प्राप्ते विकल्पः । तूतुजान इति । तुजेर्लिट् तस्य कानजादेशः । मामहानमिति । मह पूजायां कानच् । तूतावेति । तुः सौत्रो धातुः तस्माल्लिट् । बहुलं छन्दसि । 'ह्वः संप्रसारणम्' इति वर्तते तदाह ह्वः संप्रसारणं स्यादिति । आहुवे इति । आङ्पूर्वाद् ह्वेञो लडात्मनेपदोत्तमैकवचनम् । 'बहुलं छन्दसि' इति शपो लुकि कृते संप्रसारणमुवङा-देशश्च । तृचं सूक्तमिति । तिस्रः ऋचो यस्मिंस्तत् तृचम् । 'ऋक्पूरब्धूः पथा-मानक्षे' इति समासान्तः अः । रयेर्मतौ । रयिशब्दस्य मतौ परतः संप्रसारणं स्याच्छन्दसि । रेवानिति । 'छन्दसीरः' इति वत्वम् । रयिमानिति । बहुल-ग्रहणात्संप्रसारणवत्वयोरभावः । चायः की । चायतेर्बहुलं कीत्ययमादेशः स्याच्छ-न्दसि । चिक्युरिति । 'कुहोश्चुः' इति चुः । निचाय्येति । चायृ पूजा-निशामनयोः अस्मात्क्त्वा । गतिसमासे 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यबादेशः ।

अथ षष्ठः । छन्दसि वेतीति । 'लिटि धातोः' इति सूत्रे भाष्ये स्पष्ट-मेतद् । 'तुजादीनामित्यत्रापि छन्दसीति वक्तव्य'मिति भाष्यम् । तुजादीनाम् । छन्दसि सर्वविधीनां वैकल्पिकत्वात्—ममहान इत्यपि । माहुव इति । आङ्पूर्वात् ह्वयतेर्लटि आत्मनेपदोत्तमैकवचने 'बहुलं छन्दसि' इति शपो लुकि संप्रसारणे उवङ् । न च भवति—ह्वयामि मरुतः शिवानिति । रेवानिति । रयेर्यस्य संप्रसारणे इकारेण पूर्वरूपे आद्गुणे 'छन्दसीरः' इति वत्वम्, तत्र विहितविशेषणाश्रयणात् । चायः

महृणानुवृत्तेर्नेह । अग्ने ज्योतिर्निचाय्य । ३५१२ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्ताः (६-१-३६) एते छन्दसि निपात्यन्ते। इन्द्रश्च विष्णो यदपस्पृधेथाम् । स्पर्धेर्लङि आथाम् । अर्कमानृचुः । वसून्यानृहुः । अर्चेरर्हेश्च लिट्युसि । चिच्युषे । च्युङो लिटि थासि । यक्षित्याज । त्यजेर्णलि । श्रातास्त इन्द्र सोमाः । श्रिता नो ग्रहा । श्रीञ् पाके निष्ठायाम् । आशिरं दुहे । मध्यत आशीर्तः । श्रीञ एव क्विप्यपि निष्ठायां च । ३५१३ खिदेश्छन्दसि । (६-१-५२)

स्पर्धेर्लङ्याथामिति । द्विर्वचनं रेफस्य संप्रसारणमकारलोपश्च निपातनात् । अस्पर्धेथामिति भाषायाम् । अपरे तु अपपूर्वस्य स्पर्धेर्लङ्याथामि संप्रसारणमलोपश्च निपातनात् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडागमाभावः । तन्मते प्रत्युदाहरणमपास्पर्धेथामिति भाषायाम् । **अर्चेरर्हेश्चेति** । संप्रसारणमलोपश्च निपातनात् । ततो द्विर्वचनमुरदत्वम् 'अत आदेः' इति दीर्घत्वम् । 'तस्मान्नुड् द्विहलः' इति नुडागमः । आनर्चुरानर्हुरिति भाषायाम् । **च्युङो लिटीति** । अभ्यासस्य संप्रसारणमनिट्त्वं च निपातनात् । चुच्युविषे इति भाषायाम् । **त्यजेर्णलीति** । त्यज वयोहानौ । अभ्यासस्य संप्रसारणं निपात्यते । तत्याजेति भाषायाम् । **श्राता इति** । श्रीञ् पाके इत्यस्य निष्ठायां श्राभावः । **श्रिता इति** । तस्यैव श्रीणातेर्ह्रस्वत्वं च । **आशिरमिति** । आङ्पूर्वस्य श्रीणातेः क्विप् धातोः शिर् आदेशः । तस्माद् द्वितीयैकवचनम् । **आशीर्त इति** । श्रीञः आङ्पूर्वस्य शिर् इत्यादेशः । निष्ठायाश्च नत्वाभावो निपातनात् । 'हलि च' इति दीर्घः । **खिदेश्छन्दसि** । 'आदेच उपदेशे-' इत्यत आदिति एच् इति च वर्तते, 'विभाषा लीयतेः'

की । चायतेश्छन्दसि बहुलं कीत्यादेशः । **स्पर्द्धेर्लङीति** । अपपूर्वस्य स्पर्द्धेः संप्रसारणमकारलोपः 'बहुलं छन्दसी'त्यडभावः । द्वे पदे,-अपेति, स्पृधेथामिति प्रकारान्तरं-मनोरमायाम् । **लिट्युसीति** । 'संप्रसारणाऽकारलोपौ निपात्येते' इति शेषः । आनर्चुरानर्हुरिति भाषायाम् । **थासीति** । अभ्यासस्य सम्प्रसारणमनिट्त्वञ्च निपातनात् । थासः से, षत्वम् । चुच्युविषे इति भाषायाम् । **णलीति** । अभ्यासस्य संप्रसारणं निपातनात् । तत्याजेति भाषायाम् । **निष्ठायामिति** । आद्ये श्राभावोऽन्त्ये ह्रस्वो निपातनात् । बहुषु सोमेषु श्राभावोऽन्यत्र ह्रस्व एव । सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावः-'यदि श्रातो जुहोतने'त्यादौ । श्राता इति बहुत्वमविवक्षितम् । सोमे तु बहुत्व एवेति **भाष्ये** स्पष्टम् । **निष्ठायाञ्चेति** । शिरादेशो निष्ठाया

खिद दैन्ये। अस्यैव आद्धा स्यात्। चिखाद। चिखेदेत्यर्थः। ३५१४ शीर्षंश्छन्दसि। (६-१-६०) शिरःशब्दस्य शीर्षन् स्यात्। शीर्ष्णः शीर्ष्णो जगतः। ३५१५ वा छन्दसि। (६-१-१०६) दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात्। वाराही। वाराह्यौ। मानुषीरीळते विशः। उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन संबध्यते। तेनामि पूर्वत्वं वा स्यात्। शमीं च शम्यं च। सूर्म्यं सुषिरामिव। 'संप्रसारणाच्च' (३३०) इति पूर्वरूपमपि वा। इज्यमानः। यज्यमानः। ३५१६ शेश्छन्दसि बहुलम्। (६-१-७०) लोपः स्यात्। या ते गात्राणाम्। ताता पिण्डानाम्। एमन्नादिषु छन्दसि पररूपं

इत्यतो विभाषेति च। तदाह **आद्धा स्यादिति। चिखादेति**। व्यत्ययेन परस्मैपदम्। **शीर्ष्णे इति** 'अल्लोपोऽनः' इत्यल्लोपः। 'रषाभ्याम्–' इति णत्वम्। 'पूर्वस्मादपि विधौ स्थानिवद्भावः' इति पक्षे तु 'अट्कुप्वाङ्–' इत्यनेन। **वा छन्दसि**। 'नादिचि' 'दीर्घाज्जसि च' इति वर्तते। तदाह **दीर्घादित्यादि**। **वाराही इति**। वराहस्य विकार इति 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति प्राणिरजतादिभ्योऽञ् ङीप्। द्विवचने पूर्वसवर्णदीर्घः। पूर्वसवर्णाभावे यणादेशः। **मानुषीरिति**। प्रथमाबहुवचनम्। मनोर्जातावञ्यतौ षुक् च' इति अञ् मनोः षुगागमः। **सूत्रद्वये इति**। 'अमि पूर्वः' 'संप्रसारणाच्च' इत्यत्र। **वाक्यभेदेनेति**। अकः अमि पूर्वरूपं वा स्याच्छन्दसि, तथा 'संप्रसारणाच्च' इति पूर्वरूपं वा स्याच्छन्दसि। तदाह **तेनेति। शम्यं चेति**। विकल्पविधानसामर्थ्यात्पूर्वरूपत्वाभावे पूर्वसवर्णदीर्घोऽपि न भवति। तयोरत्र विशेषाभावादिति यणादेश एव भवति। **यज्यमान इति**। यजेर्लटः शानच्। 'सार्वधातुके–' इति यक् 'आने मुक्' इति मुक्। 'ग्रहिज्या–' इति संप्रसारणं पूर्ववैकल्पिकत्वादभावे यण्। **या ते इति**।

नत्वाऽभावश्च निपातनात्। **चखादेति**। व्यत्ययेन परस्मैपदम्, आत्वस्याऽनैमित्तिकत्वेन 'द्विर्वचनेऽचि' इत्यस्याऽभावादभ्यासेवर्णान्तता। **चिखादेति**। क्वचित्कोऽप्यपाठः। इदं **पदमज्ञर्या** स्पष्टम्। **शीर्षन्**। छन्दसि सर्वविधीनां वैकल्पिकत्वाच्छिरस्शब्दस्यापि वेदे प्रयोगः। **वाराहीति**। वराहस्य विकार इत्यञन्तान्ङीप्। द्विवचने पूर्वसवर्णदीर्घः। उपानहौ विशेष्ये। **मानुषीरिति**। जसि पूर्वसवर्णदीर्घः। **शम्यं चेति**। पूर्वत्वाऽभावे विकल्पविधानसामर्थ्यात्पूर्वसवर्णदीर्घो न, तयोरत्र विषये विशेषाऽभावात्। **या ते इति**। यानि ते इत्यर्थः। शेर्लोपे प्रत्ययलक्षणेन

वक्तव्यम्। अपां त्वेमन्। अपां त्वोद्मन्। ३५१७ भय्यप्रवय्ये च छन्दसि (६-३-८३) बिभेत्यस्मादिति भय्यः। वेतेः प्रवय्या इति स्त्रियामेव निपातनम्। प्रवेयमित्यन्यत्र। छन्दसि किम्—भेयम्। प्रवेयम्। ❀ हृद्य्या उपसंख्यानम्। हृदे भवा हृदय्या आपः। भवे छन्दसि यत्। ३५१८ प्रकृत्यान्तःपादमव्यपरे। (६-१-११५) ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादति परे न तु वकारयकारपरेऽति। उपप्रयन्तो अध्वरम्। सुजाते अश्वसूनृते। अन्तः—पादं किम्-एतास एतेऽर्चन्ति। अव्यपरे किम्—तेऽवदन्। ३५१९ अव्याद्वद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। (६-१-११६) एषु व्यपरेऽ-

यानीत्यर्थः। यच्छब्दात्परस्य शेर्लोपे कृते प्रत्ययलक्षणेन 'त्यदादीनामः' इति अत्वे 'नपुंसकस्य झलचः' इति नुम्। 'सर्वनामस्थाने च' इति दीर्घः। नलोपः। **ताता इति**। तानि तानीत्यर्थः पूर्ववत्। **भय्यप्रवय्ये**। बिभेतेः प्रपूर्वस्य वी इत्येतस्य च यति प्रत्यये परतश्छन्दसि विषये यादेशो निपात्यते। **भय्य इति**। 'कृत्यल्युटः—' इति अपादाने यत्। **हृदय्या इति**। अकारस्यायादेशः। **प्रकृत्या**। पादस्य मध्ये इत्यन्तःपादमित्यव्ययीभावः। अन्तरित्यव्ययमधिकरणशक्तिप्रधानं मध्यमाचष्टे। पादश्चेह ऋक्पाद एव गृह्यते न श्लोकस्य। 'वा छन्दसि' इत्यतो मण्डूकप्लुत्या छन्दसीति वर्तते। तेनास्य वैदिकत्वं संपद्यत इत्याशयेनाह **ऋक्पादमध्यस्थ इति**। 'एङः पदान्तात्—' इति सूत्रादेङः इति पञ्चम्यन्तमनुवृत्तं प्रथमया विपरिणम्यतेऽन्यस्य कार्थिणोऽसंभवादित्यभिप्रेत्याह **एङ् प्रकृत्येति**। सन्धिरूपं विकारं न यातीत्यर्थः। **उपप्रयन्तो अध्वरमिति**। 'एङः पदान्तादति' इति प्राप्तम्। **अन्तः—पादं किमिति**। ऋचीत्येव किं नोक्तमित्यर्थः। **एतेऽर्चन्तीति**। 'कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया' इति। अत्र एते इति पादस्यान्ते एङस्ति अकारश्च परस्य ...आदाविति तन्निमित्तिनिमित्तयोः पादमध्यस्थत्वमिति सत्यपि ऋक्त्वे प्रकृतिभावः। **अव्यात्**। एषामनुकरणत्वात्सुबन्तेन समासः। अव रक्षणे। आशीर्लिङ्। अवद्यादिति पञ्चम्येकवचनान्तम्। अवक्रमुरित्यवपूर्वस्य क्रमेर्लिट्युसि द्विर्वचनप्रकरणे 'छन्दसि वा वचनम्' इति द्विर्वचनाभावे रूपम्। केचित्तु अवचक्रमुरिति

नुमि 'सर्वनामस्थाने चे'ति दीर्घे नलोपः। त्वा-एमनिति, त्वा—ओद्मनिति च विग्रहः। **हृदय्या इति**। अकारस्यायादेशः। **प्रकृत्याऽन्तः**। अतीति वर्तते। **प्रकृत्या** स्वभावेन। न विकारमापद्यते इति यावत्। **अव्याद्**। **अयमिति**। इदमःसौ।

ष्यति एङ् प्रकृत्या। वसुभिर्नो अव्यात्। मित्रमहो अवद्यात्। मा शिवासो अवक्रमुः। ते नो अव्रत। शतधारो अयं मणिः। ते नो अवन्तु। कुशिकासो अवस्यवः। यद्यपि बह्वृचैस्तेनोऽवन्तु रथतूः, सोऽयमागात्, तेऽरुणेभिरित्यादौ प्रकृतिभावो न क्रियते तथापि बाहुलकात्समाधेयम्। प्रातिशाख्ये तु वाचनिक एवायमर्थः। ३५२० यजुष्युरः। (६-१-११७) उरःशब्द एङन्तोऽति प्रकृत्या यजुषि। उरो अन्तरिक्षम्। यजुषि पादाभावादनन्तःपादार्थं वचनम्। ३५२१ आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे। (६-१-११८) यजुषि अति प्रकृत्या। आपो अस्मान्मातरः। जुषाणो अग्निराज्यस्य। वृष्णो अंशुभ्याम्। वर्षिष्ठे अधि नाके। अम्बे अम्बाले अम्बिके। अस्मादेव वचनात् 'अम्बार्थ' (२६७) इति ह्रस्वो न। ३५२२ अङ्ग इत्यादौ च। (६-१-११९) अङ्गशब्दे य एङ् तदादौ च अकारे य एङ् पूर्वः सोऽति

सूत्रे कृतं द्विर्वचनं ये पठन्ति तेषामुदाहरणं मृग्यम्। बह्वृचास्तावदवक्रमुरित्यधीयते। **अव्रतेति**। वृङ्वृञो 'मन्त्रे घस-' इति च्लेर्लुक्। 'आत्मनेपदेषु' इति झस्यादादेशः। **अयमिति**। इदमः सौ 'इदोऽय् पुंसि'। अवतेर्लोट्। **अवन्तु**। **अवस्यव इति**। अवेरसुन् औणादिकः। ततः क्यच् 'क्याच्छन्दसि' इत्युः। **यजुष्युरः। उरो अन्तरिक्षमिति**। नन्वत्र 'प्रकृत्यान्तःपादम्' इत्यनेनैव सिद्धे व्यर्थोऽयं योग इत्याशङ्क्याह **यजुषि पादाभावादित्यादि**। **आपो जुषाणो**। आपो इत्यादीनि पृथक्पदान्यनुकरणानि विभक्तिस्तु अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वान्न भवति 'सुपां सुलुक्' इति विभक्तेर्लुग्वा। अम्बिके पूर्वे इत्येतदप्यनुकरणमेव। तत्र प्रथमं जसन्तमनुकरणम्। द्वितीयं स्वन्तम्। तृतीयं शसन्तम्। चतुर्थं ङ्यन्तमितरे संबुद्ध्यन्ते। आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते शब्दाः अम्बिकेशब्दात्पूर्वौ यौ अम्बेअम्बालेशब्दौ तौ च अति परतः प्रकृत्या स्युः। **अङ्ग इत्यादौ**

अवतेर्लोटि अवन्तु। **आपो जु**। **'आपो'** इत्यादीनि लुप्तविभक्तिकानि पृथक्पदानि अनुकरणानि। आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते शब्दाः, अम्बिकेशब्दात्पूर्वौ अम्बेऽम्बाले इत्येतौ च यजुषि स्थितावति प्रकृत्येत्यर्थः। अम्बिकेपूर्वे इति चाऽस्मादेव निपातनात्पञ्चमीसमासः। **'आपो'** इति जसन्तं, **'जुषाणो'** इति स्वन्तं, **'वृष्णो'** इति शसन्तं, **'वर्षिष्ठे'** इति ङ्यन्तम्, इतरे संबुद्ध्यन्ते, अम्बेऽम्बालेऽम्बिके इति यजुष्ये[वमे]व पठ्यते। **अस्मादेवेति**। 'अम्बे' इत्येतद्विषयमिदम्। **अङ्ग-**

प्रकृत्या यजुषि । प्राणो अङ्गे अङ्गे अदीध्यत् । **३५२३ अनुदात्ते च कुधपरे ।** (६-१-१२०) कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते किम्–अधोऽग्ने रुद्रे । अग्रशब्द आद्युदात्तः । कुधपरे किम्–सोयमग्निमतः । **३५२४ अवपथासि च ।** (६-१-१२१) अनुदात्ते अकारादौ अवपथाःशब्दे यजुषि एङ् प्रकृत्या । त्रीरुद्रेभ्यो अवपथाः । वपेस्थासि लङि 'तिङ्ङतिङः' (३९३९) इत्यनुदात्तत्वम् । अनुदात्ते किम्–यद्रुद्रेभ्योऽवपथाः,'निपातैर्यद्यदि' (३९३७) इति निघातो न । **३५२५ आङोऽनुनासिकश्छन्दसि ।** (६-१-१२६) आङोऽचि परेऽनुनासिकः स्यात् स च प्रकृत्या । अभ्र आँ अपः । गभीर आँ उग्रपुत्रे । * ईषाअक्षादीनां छन्दसि

च । **अङ्गशब्दे य एङिति ।** प्रकृत्या भवतीति वक्ष्यमाणेन संबन्धः । **तदादौ अकारे च य एङ्पूर्व इति ।** अत्रापि पूर्ववत्संबन्धः । अतिक्रान्तपरामर्शिना तच्छब्देन इतिशब्दार्थमाचष्ट–तस्याङ्गशब्दस्य आदिस्तदादिस्तद्रूपो यः अकारस्तस्मिन्परे पूर्वो य एङ् स इत्यर्थः । नन्वत्र चकारः किमर्थ इति चेच्छृणु–असति चकारेऽङ्गशब्दस्यैवैङ् तदादावति परतः प्रकृत्या भवतीत्यर्थः स्यात्ततश्चाङ्गे अङ्गे इत्यत्रैव स्यात् । अङ्गे अदीध्यदित्यत्र न स्यात् । सति तु तस्मिन्नङ्गशब्दस्य य एङ् यत्र कुत्रचिदति प्रकृत्या भवति तदादौ चाति परतो यः कश्चिदेङ् स प्रकृत्या भवतीत्ययमर्थो भवति । तेन अङ्गे अङ्गे अदीध्यत् । प्राणो अङ्गे इत्युभयत्रापि भवति । **अनुदात्ते च कुधपरे ।** कुधौ परौ यस्मात्स तथोक्तः । **कवर्गधकारेति ।** धकारे अकार उच्चारणार्थः । **अग्निरिति ।** अग्निशब्दो 'अङ्गेर्निर्नलोपश्च' इति निप्रत्ययान्तोऽन्तोदात्तः । अध्वरशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । **आद्युदात्त इति** 'ऋज्रेन्द्र–' इत्यादिना सूत्रेण निपातितः । **आङो ।** आङिति ङिद्विशिष्ट आकारो गृह्यते । यः 'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्' इत्यनेन लक्षितः । यद्यपि अभ्र आँ अप इत्यत्र आकारो न ईषदर्थादिचतुष्टयवृत्तिः सप्तम्यर्थद्योतकत्वात् । तथापि वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम् । अन्यत्र सर्वत्राङ् ङिद्वेदितव्यः । एवं तावद्भाष्ये स्थितम् । **अभ्र आँ अप इति ।**

शब्द इति । विद्यमान इति शेषः । **तदादौ चेति ।** षष्ठीतत्पुरुषः । सूत्रे 'इति' शब्दस्तच्छब्दसमानार्थः । **कुधपर इति ।** बहुव्रीहिः, धकारेऽकार उच्चारणार्थः । **आद्युदात्त इति ।** 'ऋज्रेन्द्राग्रे'त्यत्र निपातनादिति भावः । **आङोऽनु ।** विभक्त्यर्थ-

प्रकृतिभावो वक्तव्यः। ईषा अक्षो हिरण्ययः। ज्या इयम्। पूषा अविष्टु। ३५२६ स्यश्छन्दसि बहुलम्। (६-१-१३३) स्य इत्यस्य सोर्लोपः स्याद्धलि एष स्य भानुः। ३५२७ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे। (६-१-१५१) ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे। हरिश्चन्द्रो मरुद्गणः। सुश्चन्द्र दस्म। ३५२८ पितरामातरा च छन्दसि। (६-३-३३) द्वन्द्वे निपातः। आ मा गन्तां पितरामातरा च। चाद्विपरीतमपि। न मातरापितरा नू चिदिष्टौ। 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' (१०१२) समानस्य सः स्यान्मूर्धादिभिन्ने उत्तरपदे। सगर्भ्यः। * छन्दसि स्त्रियां बहुलम्। विष्वग्देवयोरद्र्यादेशः। विश्वाची च घृताची च। देवद्रीचीं नयत देवयन्तः। कद्रीची। ३५२९

सप्तम्यर्थद्योतकोऽत्राङ्। 'उपदेशेऽजनुनासिकः–' इतीत्संज्ञा तु न उपदेशग्रहणात्। **स्यश्छन्दसि**। स्य इति त्यदित्येतस्य प्रथमान्तस्यानुकरणम्। 'सुपां सुलुक्' इति लुप्तषष्ठीकम्। **एष स्येति**। एतदस्त्यदश्च त्यदाद्यत्वे 'तदोः सः सौ' इति सः। एतदस्त्यदश्च परस्य सोः 'एतत्तदोः सुलोपः–' इति 'स्यश्छन्दसि' इति च लोपः। **ह्रस्वात्**। चन्द्रशब्दे उत्तरपदे ह्रस्वात्परः सुडागमो भवति। स च भवन् चन्द्रशब्दस्यैवोभयनिर्देशे पञ्चमीनिर्देशो बलीयानित्याशयेनाह **चन्द्रशब्दस्योत्तरपदस्येति**। **सुडागमः स्यादिति**। 'सुट् कात्पूर्वः' इत्यतः सुडित्यनुवर्तनात्। **पितरा**। पूर्वपदस्याराङादेशो निपात्यते। उत्तरपदे तु 'सुपां सुलुक्–' इत्यादिना विभक्तेराकारादेशः। 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः। **समानस्य सः स्यादिति**। 'सहस्य सः' इत्यतः स इत्यनुवर्तते। **सगर्भ्य इति**। समानो गर्भः सगर्भः। तत्र भवः सगर्भ्यः। 'सगर्भसयूथसनुताद्यत्' इति यत् प्रत्ययः। अमूर्धेत्यादिकिम्। समानमूर्धा। समानप्रभृतयः। समानोदर्काः। **छन्दसि स्त्रियाम्**। 'विष्वग्देवयोः–' इति सर्वनाम्नोऽप्युपलक्षणम्। बहुलग्रहणात्क्वचिन्न भवति। **विश्वाची**। **देवद्रीचीति**। विश्वमञ्चतीति देवानञ्चतीति क्विन्। 'उगितश्च' इति ङीप्। 'अचः' इत्यकारलोपः। 'चौ' इति दीर्घत्वम्। अत्र विष्वग्देवयोरद्र्यादेशः

वृत्तेराङोऽत्र ग्रहणमिति हरदत्तः। **प्रकृतिभाव इति**। तन्मात्रमित्यर्थः। न तु ह्रस्वोऽपि। **एष स्य इति**। एष स भानुरित्यर्थः। 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इत्याह। **चन्द्रशब्दस्येति**। **विष्वग्देवयोरिति**। इदं सर्वनाम्नोऽप्युपलक्षणं, तदाह। **विश्वाचीति**। विश्वमञ्चतीति विग्रहः। बहुलग्रहणादन्य-

सधमादस्थयोश्छन्दसि । (६-३-९६) सहस्य सधादेशः स्यात् । इन्द्र त्वास्मिन्सधमादे । सोमः सधस्थम् । ३५३० **पथि च छन्दसि** । (६-३-१०८) पथिशब्दे उत्तरपदे कोः कवं कादेशश्च । कवपथः । कापथः । कुपथः । ३५३१ **साढ्यै साढ्वा साढेति निगमे** । (६-३-११३) सहेः क्त्वाप्रत्यये आद्यं द्वयं तृनि तृतीयं निपात्यते । मरुद्भिरुग्रः पृतनासु साळ्हा । अचोर्मध्यस्थस्य डस्य ळः ढस्य ळ्हश्च प्रातिशाख्ये विहितः । आह हि—द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्त इति । ३५३२ **छन्दसि च** । (६-३-१२६) अष्टन आत्वं स्यादुत्तर-

---

प्राप्तौ बाहुलकाच्च । क्वचिन्न भवतीत्याह **कद्रीचीति** । कुत्सितमञ्चतीति कद्रीची । किंशब्दस्य टेरद्र्यादेशः क्विब्लोपदीर्घाः पूर्ववत् । **सध माद** । 'सहस्य सध्रिः' इत्यतः सहस्येति वर्तते । माद स्थ इत्येतयोरुत्तरपदयोः सहस्य सध इत्ययमादेशः स्यात् । सधेत्यविभक्तिको निर्देशः । **सधमादे इति** । सह माद्यन्ति देवा अस्मिन्निति सधमादो यज्ञ इति । 'मदोऽनुपसर्गे' इत्यपि प्राप्ते 'अजब्भ्यां स्त्रीखलनाः' इति तद्बाधके ल्युटि 'हलश्च' इति घञ् । सूत्रे मादेत्यकार उच्चारणार्थः । तेन मादयतेः क्विबन्तस्य मादिति यद्रूपं तत्रापि भवति । 'आ त्वा बृहन्तो हरयो युज्यमाना अर्वागिन्द्र सधमादो वहन्तु' । **सधस्थमिति** । सह तिष्ठतीति सधस्थः । 'आतोऽनुपसर्गे' इति कः । **साढ्यै** । एते त्रयो निपात्यन्ते निगमे । सहेः क्त्वाप्रत्यय इति पक्षे क्त्वाप्रत्ययस्य ध्यै आदेशश्च निपात्यते । साढ्यै सहेः क्त्वाप्रत्ययस्य ध्यै 'हो ढः' ष्टुत्वं 'ढो ढे लोपः' । 'ढ्रलोपे-' इति दीर्घः । **साढ्वा इति** । ढत्वादि पूर्ववत् । **तृनि तृतीयमिति** । तृचि त्वन्तोदात्तं स्यात्तथा 'भूरि चक्र' इति मन्त्रे साढेत्याद्युदात्तं पठ्यते तत्र संगच्छेतेति भावः । सूत्रे इतिशब्द प्रकारार्थः । तेन निष्ठायामपि निपातनं बोध्यम् । आषाढळ अग्रे वृषभः । **द्वयोरिति** । अस्य आचार्यस्य द्वयोः स्वरयोर्मध्यमेत्य डकारो ळकारतां संपद्यते ऊष्मणा संप्रयुक्तः डकारः ळ्हकारतामेतीत्य-

---

त्रापि क्वचित् । तेन कद्रीची सिद्धा । **सधस्थमिति** । सह तिष्ठतीत्यर्थः । **पथि च छन्दसि** । 'विभाषा पुरुषे' इत्यतो विभाषेति वर्तते, चात् 'का' । **साढ्यै** । **द्वयोश्चेति** । अस्य-आचार्यस्य । एत्य । 'स्थित' इति शेषः । **स डकारः**—जिह्वामूलतालुस्थानीयो डः । जिह्वामूलन्तालु चाचार्य आह स्थानं डकारस्य तु वेदे मित्र इत्युपक्रमात् । स एव = स्वरद्वयमध्यगः । ऊष्मणा सम्प्रयुक्तः । ऊष्मयोगे जात इत्यर्थः । यद्वा स लकारो हकारेणोष्मणा संप्रयुक्तो ह्ळकारतामापद्यतेऽतोऽस्याचार्यस्य

पदे। अष्टापदी। ३५३३ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ। (६-३-१३१) दीर्घः स्यान्मन्त्रे। अश्वावतीं सोमावतीम्। इन्द्रियावान्मदिन्तमः। विश्वकर्मणा विश्वदेव्यावता। ३५३४ ओषधेश्च विभक्तावप्रथमायाम्। (६-३-१३२) दीर्घः स्यान्मन्त्रे। यदोषधीभ्यः। अदधात्योषधीषु। ३५३५ ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणाम्। (६-३-१३३) दीर्घः स्यात्। आ तू न इन्द्र। नू मर्तः। उत वा घा स्यालात्। मक्षू गोमन्तमीमहे। भरता जातवेदसम्। तङिति थादेशस्य ङित्वपक्षे ग्रहणम्। तेनेह न—शृणोत ग्रावाणः। कूमनाः। अत्रा ते भद्रा। यत्रा नश्चक्रा। उरुष्याणः। ३५३६ इकः सुञि। (६-३-१३४) ऋचि दीर्घ इत्येव। अभीषु णः सखीनाम्। 'सुञः' (३६४४) इति षः। 'नश्च धातुस्थोरुषुभ्यः' (३६४१) इति णः। ३५३७ द्व्यचोऽतस्तिङः। (६-३-१३५) मन्त्रे दीर्घः। विद्मा हि चक्रा जरसम्। ३५३८ निपा-

---

न्वयः। अष्टापदीति। अष्टौ पादा अस्या इति बहुव्रीहौ 'संख्यासुपूर्वस्य' इति पादस्य लोपे कृते 'पादोऽन्यतरस्याम्' इति ङीप्। मन्त्रे। सोम, अश्व, इन्द्रिय, विश्व, देव्य, एषां मतुप्प्रत्यये परे दीर्घः स्यान्मन्त्रे। ओषधेश्च। न च 'कृदिकारादक्तिनः' इति ङीषा गतार्थता, अन्तोदात्ततापत्तेः। इष्यते त्वाद्युदात्तः 'लघावन्ते' इति फिट्सूत्रात्। ऋचि तुनु। घ इति स्वरूपग्रहणं न तरप्तमपोश्छन्दसि घशब्दस्यैव दीर्घदर्शनात्। उत वेति। भार्याया भ्राता श्यालस्ततः पञ्चमी। भरतेति। लोण्मध्यमपुरुषबहुवचनस्य थस्य 'लोटो लङ्वत्' इत्यतिदेशात्तस्य स्थाने तादेशः 'तस्थस्थमिपाम्–' इत्यनेन। शृणोतेति। 'तप्तनप्तनथनाश्च' इति तबादेशः। अत्र पित्वान्ङित्त्वं नास्ति। उरुष्याण इति। उरुष्येति कण्ड्वादियगन्तो रक्षणार्थः। लोटः सेर्हिः 'अतो हेः' इति लुक्। न इत्यस्य 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। इकः। इगन्तस्य सुञि परतो दीर्घः स्यादृचि। द्व्यचो। द्व्यचस्तिङन्तस्यातो दीर्घः स्यादृचि। विद्मेति। विद ज्ञाने लट्। 'विदो लटो वा' इति मसः

मतेन ढकारो ळ्हकारतां यातीत्यर्थः। छन्दसि च। अष्टन इति, दीर्घ इति चानुवर्तते। फलितमाह आत्वं स्यादिति। नलोपे कृते टकाराऽकारस्य दीर्घः। ऋचि तु। ऋग्वेदे इत्यर्थः। अष्टानां दीर्घः। थादेशस्येति। 'तस्थस्थमिपा' मित्यनेन। इकः सुञि। ऋचीति। 'अन्येषामपी'ति सूत्रे 'मन्त्रे' इति निवृत्तमिति हरदत्तोक्तेर्मन्त्र इत्यस्यानुवृत्तिरेव युक्ता। द्व्यचोऽतः। द्व्यचस्तिङन्तस्याऽतो

तस्य च। (६-३-१३६) एवा हि ते। ३५३९ अन्येषामपि दृश्यते। (६-३-१३७) अन्येषामपि पूर्वपदस्थानां दीर्घः स्यात्। पूरुषः। दयडादण्डि। ३५४० छन्दस्युभयथा। (६-४-५) नामि दीर्घो वा। धाता धातॄणाम्। इति बह्वृचाः। तैत्तिरीयास्तु ह्रस्वमेव पठन्ति। ३५४१ वा षपूर्वस्य निगमे। (६-४-९) षपूर्वस्याच उपधाया वा दीर्घोऽसंबुद्धौ सर्वनामस्थाने परे। ऋभुक्षाणम्। ऋभुक्षणम्। निगमे किम्—तक्षा। तक्षाणौ। ३५४२ जनिता मन्त्रे। (६-४-५३) इडादौ तृचि णिलोपो निपात्यते। यो नः पिता जनिता। ३५४३ शमिता यज्ञे। (६-४-५४) शमयितेत्यर्थः। ३५४४ युप्लुवोर्दीर्घश्छन्दसि। (६-४-५८) ल्यपीत्यनुवर्तते। वियूय। विप्लूय। 'आडजादीनाम्' (२२५४)। ३५४५ छन्दस्यपि दृश्यते। (६-४-७३) अनजादीनामित्यर्थः। आनट्। आवः। 'न माङ्योगे' (२२२८) ३५४६ बहुलं छन्दस्यमाङ्योगेऽपि। (६-४-७५) अडाटौ न स्तः, माङ्योगेऽपि स्तः। जनिष्ठा उग्रः सहसे तुराय। मा

स्थाने मः। चकेति लिटो मध्यमपुरुषबहुवचनम्। **निपातस्य च**। दीर्घः स्यान्मन्त्रे। एवशब्दश्चादिषु पाठान्निपातः। **छन्दस्यु**। नामीति वर्तते। 'ढ्रलोपे-' इत्यतो 'दीर्घ' इति च। तदाह **नामीत्यादि**। **ऋभुक्षाणमिति**। ऋभुक्षिन्-शब्द उणादिषु निपातितः। 'इतोऽत्सर्वनामस्थाने' इतीकारस्याकारादेशः। **जनितेति**। जनयितेत्यर्थः। **शमित** । निपातनं पूर्ववत्। **आनडिति**। नशेर्लुङि 'मन्त्रे घस-' इति लेर्लुक् 'नशेर्वा' इत्यस्याभावे 'व्रश्च-' इति षः। जश्त्वेन डः। तस्य चर्त्वेन टः। **आवरिति**। वृञो लुङि लेर्लुक्। गुणो रेफस्य विसर्गः। **बहुलं छन्दसि**। माङ्योगेऽप्यमाङ्योगेऽपि बहुलमडाटौ भवतः। अमाङ्योगेऽपि न भवतः। माङ्योगे-

---

दीर्घः। **मन्त्रे इति**। ऋग्वेद इत्यर्थः। ध्यच इति किम्- अश्वा भवत वाजिनः। **धातॄणामिति**। वृत्तिकृतस्तिसृचतसृोरत्राऽनुवृत्तिस्त्वयुक्तेति भावः। **षपूर्वस्याच इति**। दीर्घश्रुत्योपस्थितःचाऽच इत्यस्य षपूर्वस्येति विशेषणम्, उपधाया इति च। अत एव पुंलिङ्गाऽविरोधः। **जनितेति**। जनयितेत्यर्थः। तृचि रूपम्। **शमिता यज्ञे**। यज्ञविषये प्रयोगे मन्त्रे इडादौ णिलोपो निपात्यते। सूत्रे प्रथमैकवचनमविवक्षितम्। 'शमितार उपेतन यज्ञम्' 'शमितारो यदत्र सुकृतं' 'शमितृभ्यश्चैवैनं शामित्र' मित्यादिदर्शनात्। **वियूयेति**। यु मिश्रणे, वियुत्य। **विप्लूय**, विप्लुत्येत्यर्थः। **आनडिति**। नशे रूपम्। **आवरिति**। वृञो लुङि 'मन्त्रे घसे'ति च्लेर्लुकि रूपम्। **अमाङ्यो-**

वः क्षेत्रे परबीजान्यवाप्सुः । ३५४७ इरयो रे । (६-४-७६) प्रथमं गर्भं दध्रे आपः । रेभावस्याभीयत्वेनासिद्धत्वादाल्लोपः । अत्र रेशब्दस्येटि कृते पुनरपि रेभावस्तदर्थं च सूत्रे द्विवचनान्तं निर्दिष्टमिरयोरिति । ३५४८ छन्दस्युभयथा । (६-४-८६) भूसुधियोर्यण् स्यादियङुवङौ च । वनेषु चित्रं विभ्वम् , विभुवं वा । सुध्यो३ हव्यमग्ने । सुधियो वा । *तन्वादीनां छन्दसि बहुलम् ।(३११२) तन्वं पुषेम, तनुवं वा । त्र्यम्बकम् , त्रियम्बकम् । ३५४९ तनिपत्योश्छन्दसि । (६-४-९९)एतयोरुपधालोपः क्ङिति प्रत्यये । वितत्निरे कवयः । शकुना इव पप्तिम । भाषायां वितेनिरे, पेतिम । ३५५० घसिभसोर्हलि च । (६-

ऽपि च भवतः । जनिष्ठा इति । जनेर्लुङ् थास् अडागमाभावः । माङ्योगेऽप्यडागममुदाहरति मा व इति । वो युष्माकं क्षेत्रे भार्यायां परबीजानि परेषां बीजानि वीर्याणि मा अवाप्सुः उप्तानि माभूवन् । वपेः कर्मणि लुङ् । व्यत्ययेन परस्मैपदम् । 'च्लेः सिच्' 'वदव्रज-' इति वृद्धिः । इदं काशिकानुरोधेनोदाहृतम् । अध्ययने तु वाप्सुरित्येव दृश्यते । माङ्यडभावे तूदाहरणान्तरमन्वेषणीयम् । इरयो । इरे इत्येतस्य रे आदेशः स्याच्छन्दसि । दध्रे इति । धाञो लिटि भस्य 'लिटस्तझयोः-' इतीरेचि कृते रेभावः । ननु चात्र परत्वादिभावे कृतेऽनजादित्वादाल्लोपो न प्राप्त इत्यत आह रेभावस्येति । नन्वेवमपि रेभावस्यैव क्रादिनियमादिडागमः प्राप्नोति । न च रेभावस्य वैयर्थ्यम् । कृसृप्रभृतिषु चरितार्थत्वादत आह अत्रेति । कथं पुनर्लाक्षणिकस्य रेशब्दस्य रेभावो भवति । तत्राह तदर्थं चेति । द्विवचननिर्देशाल्लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति भावः । तन्वादीनाम् । बहुलमियङुवङादेशः स्याच्छन्दसि । तनुवमिति । अधातुत्वादप्राप्त उवङ् विधीयते । तन्वमिति । 'वा छन्दसि' इत्यमि पूर्वत्वाभावे यण् । त्र्यम्बकमिति । त्रीणि अम्बकानि नेत्राणि यस्यासौ त्र्यम्बको रुद्रः । वितत्निरे इति । तनु विस्तारे लिटः प्रथमपुरुषबहुवचनम् । अत्राल्लोपस्यासिद्धत्वेऽपि 'अत एकहल्मध्ये-' इति एत्वाभ्यासलोपौ न लोप-

गेऽपीति । अपिशब्दान्माङ्योगेऽपि । ननु परत्वादिभावे कृतेऽनजादित्वादातो लोपो न प्राप्नोतीत्यत आह रेभावस्येति । नन्वेवं रेभावे कृते तस्यैवेट् प्राप्नोति । न च रेभावो व्यर्थः, क्रादिष्वनिट्सु चरितार्थत्वादत आह अत्रेति । ननु लाक्षणिकत्वात् 'लक्ष्ये लक्षणस्य' इति न्यायाच्च कथं रेभावः पुनरत आह तदर्थंचेति । द्विवचनसामर्थ्यात्परिभाषाया अप्रवृत्तिरिति भावः । क्ङितीति । अजादावित्यर्थः । वितत्निर इति । वितेनिर इत्यर्थः । लोपविधानसामर्थ्यात्तस्याऽसिद्धत्वे-

१—'गर्भम्' इति क्वचिन्नास्ति ।

४-१००) सग्धिश्च मे । बब्धां ते हरी धानाः । 'हुझल्भ्यो हेर्धिः' (२४२४) । **३५५१ श्रुशृणुपृकृवृभ्यश्छन्दसि । (६-४-१०२)** श्रुधी हवम् । शृणुधी गिरः । रायस्पूर्धि । उरुणस्कृधि । अपावृधि । **३५५२ वा छन्दसि ।(३-४-८८)** हिनुधि । **३५५३ अङितश्च । (६-४-१०३)** हेर्धिः स्यात् । रारन्धि । रमेर्व्यत्ययेन परस्मैपदम् । शपः श्लुरभ्यासदीर्घश्च । अस्मे प्रयन्धि । युयोधि जातवेदः । यमेः शपो लुक् । यौतेः शपः श्लुः । **३५५४ मन्त्रेष्वाङ्यादेरात्मनः । (६-४-१४१ ।** आत्मन्शब्दस्यादेर्लोपः स्यादाङि । त्मना देवेषु । **३५५५ विभाष-**

विधानसामर्थ्यात् । **पप्तिमेति** । पत्लृ पतने लिटो मसो मस्य इट् । वितेनिरे पेतिमेति भाषायाम् । **घसिभसोः** । अनयोरुपधालोपः स्याद्धलादावजादौ च क्ङिति । **सग्धिरिति** । अदेः क्तिन् 'बहुलं छन्दसि' इति घस्लादेशे उपधालोपे च कृते 'झलो झलि' इति सलोपस्तकारस्य धत्वं धस्य जश्त्वम् । ततः समाना ग्धिः सग्धिरिति समासे कृते 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इति सूत्रेण समानस्य सः । **बब्धामिति** । भसेर्लोटि ताम् श्लुः । परं नित्यमप्युपधालोपं बाधित्वा बाहुलकात्प्रथमं 'श्लौ' इति द्वित्वम् । तत उपधालोपसलोपधत्वजश्त्वानि । **श्रुशृणु** । एभ्यो हेर्धिः स्यात् । **श्रुधीति** । 'बहुलं छन्दसि' इति शपो लुक् । 'अन्येषामपि–' इति दीर्घत्वम् । **शृणुधीति** । श्रुवः श्नभावश्च विधानसामर्थ्याद् 'उतश्च प्रत्ययात्–' इति न हेर्लुक् दीर्घः पूर्ववत् । **पूर्धीति** । पृ पालने । शपो लुक् 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । 'हलि च' इति दीर्घः । **उरुणस्कृधीति** । 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम् । 'कः करत्–' इत्यादिना विसर्जनीयस्य सत्वम् । **अपावृधीति** । दीर्घः पूर्ववत् । **अभ्यासस्य दीर्घश्चेति** । तुजादित्वादिति भावः । रारन्धीत्यत्र 'अनुदात्तोपदेश–' इत्यादिना मलोपो न, हेरङित्त्वात् । **यमेः शपो लुगिति** । 'बहुलं छन्दसि' इत्यनेन । एवमुत्तरत्रापि । **विभाषजोः** । 'र ऋतो हलादेर्लघोः' इत्यतः

प्येत्वाभ्यासलोपौ न । **पप्तिमेति** । लिट् । मस् । इट् । पेतिमेत्यर्थः । **श्रुशृणु** । एभ्यो हेर्धिः स्याच्छन्दसि । **श्रुधी हवमिति** । 'अन्येषामपी'ति दीर्घः । 'पृ पालनादौ' । **उरुणसिति** । 'नश्च धातुस्थोरुषभ्य' इति णत्वम् । '**शृणुधी**'त्यत्र धिभावविधानसामर्थ्याद् 'उतश्चेति' लुक् च न । इतोऽन्यत्र व्यत्ययेन शप् , 'बहुलं छन्दसी'ति लुक् । **अङित** इति हेर्विशेषणम् । छन्दसि पक्षे पित्त्वादङित्त्वम् । अत एव 'रारन्धी'त्यत्र मलोपो न । **शपो लुगिति** । 'बहुलं छन्दसीति । **आ-**

जोश्छन्दसि। (६-४-१६२) ऋजुशब्दस्य ऋतः स्थाने रः स्याद्वा इष्ठेमेयस्सु। त्वं रजिष्ठमनुनेषि, ऋजिष्ठं वा। ३५५६ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि। (६-४-१७५) ऋतौ भवमृत्व्यम्। वास्तुनि भवं वास्त्व्यम् वास्त्वं च। मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते। माध्वीर्नः सन्त्वोषधीः। हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते। हिरण्ययेन सविता रथेन॥ इति षष्ठोऽध्यायः॥

सप्तमोऽध्यायः।

'शीङो रुट्' (२४४२)। ३५५७ बहुलं छन्दसि। (७-१-८) रुडागमः स्यात्। 'लोपस्त आत्मनेपदेषु' (३५६३) इति पक्षे तलोपः। धेनवो दुह्रे। लोपाभावे घृतं दुह्रते। अदृश्रमस्य। 'अतो भिस ऐस्' (२०३)। ३५५८ बहुलं छन्दसि। (७-१-१०) अग्निर्देवेभिः। ३५५९ नेतराच्छन्दसि। (७-१-२६) स्वमोरद्ड् न। वार्त्रघ्नमितरम्। छन्दसि किम्—इतरत्काष्ठम्। 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (३३३२)। ३५६० क्त्वापि

र ऋत इति 'तुरिष्ठेमेयःसु' इति च, तदाह ऋतः स्थाने इत्यादि। ऋत्व्य। ऋतुशब्दाद्यति वास्तुशब्दादण्णि यति च यणादेशो निपात्यते। मशब्दस्येति। तस्यासिद्धत्वाद् 'यस्य-' इति लोपो न। 'अकृत्सार्व-' इति दीर्घस्त्वज्ञ्न्तपरिभाषया वारणीयः। यद्वा मकारमात्रस्य लोपः। ततो 'यस्य-' इति लोपे कृते प्रत्ययाकारस्य श्रवणम्। इति षष्ठोऽध्यायः।

बहुलं छन्दसि। छन्दसि विषये बहुलं रुडागमः स्यात्। दुह्रे इति। दुहेर्लट् टेरेत्वे झस्यादादेशे रुट् तलोपः। लोपाभावे इति। 'लोपस्त आत्मनेपदेषु' इत्यस्य वैकल्पिकत्वादित्यर्थः। अदृश्रमिति। दृशिर् प्रेक्षणे लुङ् व्यत्ययेन प्रथमपुरुषबहुवचनस्थाने उत्तमपुरुषैकवचनं मिप्। तस्य रुडागमः। नेतरा। इतरशब्दात्परयोः स्वमोरद्डादेशो न स्याच्छन्दसि। इतरामिति। 'अद्ड्डतरादिभ्यः'

ङिति टासञ्ज्ञा। त्मना समञ्जन्नित्यादौऽन्यत्रापि लोपदर्शनादाङीति व्यर्थम्। 'आत' इत्यनुवृत्तेरादेरित्यपि व्यर्थम्। ऋत्व्यवास्त्व्य। ऋतुवास्तुशब्दयोर्भवार्थे यति यणादेशो निपात्यते, वास्तोरणि च। इति षष्ठोऽध्यायः।

अथ सप्तमोऽध्यायः। पक्षे इति। सार्वविधीनां छन्दसि वैकल्पिकत्वात्। दुह्रे इति। झस्याऽत्। तलोपे रुटि अतो गुणे। अदृश्रमिति। इरित्त्वादङ्।

छन्दसि । (७-१-३८) यजमानं परिधापयित्वा । ३५६१ **सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ।** (७-१-३९) ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते सुः । परमे व्योमन् । व्योमनि इति प्राप्ते ङेर्लुक् । धीती मती सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः । या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना । यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ । नताद्ब्राह्मणाम् । नतमिति प्राप्ते आत् । या देव विद्म ता त्वा । यं तमिति प्राप्ते । न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती । युष्मासु अस्मभ्यमिति प्राप्ते शे । उरुया ।

इत्यदङभावे 'अतोऽम' इत्यम् । **क्त्वो ल्यबिति ।** समासेऽनञ्पूर्वे क्त्वो ल्यबिति प्राप्ते छन्दसि क्त्वापि विधीयते, तदाह **क्त्वापि ।** अनञ्पूर्वे समासे क्त्वा इत्ययमादेशः स्यात् । अपिशब्दाल्ल्यबपि, स च समासेऽसमासे च भवति । अप्राप्तिविषये ल्यपः प्रापणार्थत्वादपिशब्दस्य । अन्यथा 'वा छन्दसि' इत्येव ब्रूयात् । तथा च छन्दोविधिमनविदधानाः कल्पसूत्रकारा अपि प्रयुञ्जते । आज्येनाक्ष्णी अञ्ज्येति । **परिधापयित्वेति ।** णिजन्तात्परिपूर्वाद्धधातेः क्त्वा तस्य ल्यबादेशे प्राप्ते क्त्वादेशः । **सुपाम् ।** सुपां स्थाने सुलुक्पूर्वसवर्णआआत्शेयाडाड्यायाच्आल् एते आदेशाः स्युश्छन्दसि । **पन्था इति ।** 'व्यत्ययो बहुलम्' इत्येव सिद्धमिदम् । उक्तं हि तत्र 'सुप्तिङुपग्रह–' इत्यादि तस्यैवायं प्रपञ्चः । **धीतीत्यादि ।** धीतीमतीसुष्टुतीशब्देभ्यस्तृतीयैकवचनस्य पूर्वसवर्णो ईकारः प्रमाणत आन्तर्यात्सवर्णदीर्घत्वम् । **दिविस्पृशाविति । प्राप्ते आ इति ।** अनेनादित्यत्राकारोऽपि प्रश्लिष्यत इति दर्शितम् । **नतादिति ।** नतशब्दादम्प् । तस्यादादेशः । 'न विभक्तौ तु–' इतीत्संज्ञाप्रतिषेधः । **या देवेत्यादि ।** यत्तच्छब्दादम् । **न युष्मे इति ।** युष्मदः सप्तमीबहुवचनस्य शे आदेशः । शेषे

देवेभिरिति । अतो न भवति । क्वचिदनतोऽपि भवति–नद्यैरिति । **क्त्वाऽपि ।** अपिना ल्यबपि । उद्धृत्य तान् जुहोतीति । **सुपां सु ।** सुपां स्थाने एते आदेशा इत्यर्थः । **पन्था इति ।** जसः स्थाने सुः । छान्दसत्वात्सर्वादेशः । उकारोच्चारणसामर्थ्येन भीतपर्विकाऽनेकाल्त्वेन वा । 'व्यत्ययो बहुल'मित्यस्यायं प्रपञ्चः । 'सुपा सुपा' इत्याद्यप्येवम् । **पूर्वसवर्णे इति ।** आन्तर्यादीकारस्ततः सवर्णदीर्घः । **'परमे व्योमन्' ।** अत्र पूर्वसवर्णे दकारे 'न ङी'ति निषेधान्नलोपाऽभावे संयोगान्तलोपेन सिद्धावपि संयोगान्तलोपस्याऽसिद्धत्वाल्लुगेवेति बोध्यम् । 'यत्सुन्वन्ती'त्यादौ यत् इ इति स्थिते पूर्वसवर्णे दकारे स्त्रियाप्त्तिरिति तदर्थमनेकाल्त्वार्थश्च लुगावश्यक इति

१—'रथीतमा दिविस्पृशा' इत्येव बहुत्र पाठः ।

धृष्णुया। उरुया। धृष्णुनेति प्राप्ते या। नाभा पृथिव्याः। नाभाविति प्राप्ते डा। ता अनुष्ठ्योच्यावयतात्। अनुष्ठानमनुष्ठा, व्यवस्थावदङ्, आङो ड्या। साधुया। साध्विति प्राप्ते याच्। वसन्ता यजेत। वसन्ते इति प्राप्ते आल्। * इयाडियाजीकाराणामुपसंख्यानम्। (वा. ४३०८) उर्विया। दार्विया। उरुणा दारुणेति प्राप्ते इया। सुक्षेत्रिया। सुक्षेत्रियेति प्राप्ते डियाच्। दृतिं न शुष्कं सरसी शयानम्। ङेरीकार इत्याहुः। तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता। वस्तुतस्तु ङीषन्ताद् ङेर्लुक्। ईकारादेशस्य तूदाहरणान्तरं मृग्यम्। * आङ्याजयारामुपसंख्यानम्। * (वा. ४३०९) बाहवा सिसृतम्। बाहुनेति प्राप्ते आङादेशः। 'घेर्ङिति' (सू. २४५) इति गुणः। स्वप्नया। स्वप्नेनेति प्राप्ते अयाच्। स नः सिन्धुमिव नावया। नावेति प्राप्ते अयार्, रित्स्वरः। ३५६२ अमो मश। (७-१-४०) मिबादेश-

---

लोपः। अस्मे इन्द्रेति। शे इति प्रगृह्यत्वादयादेशाभावः। नाभा इति। डित्वाट्टिलोपः। ता अनुष्ठ्येति। षड्विंशतिरस्य वङ्कय इति प्रक्रम्य इदमध्वर्युप्रैषे पठितं ता वङ्क्रीः अनुष्ठ्य अनुष्ठानेन अनुक्रमेण गणनया गणयित्वा उच्यावयतात् भवान् विशसनं करोत। पृथक करोत भवानित्यर्थः। अनुष्ठानमनुष्ठेति। अनुपूर्वात्तिष्ठतेरङ् तृतीयैकवचनस्य ड्यादेशे डित्वाट्टिलोपः। नन्वनुपूर्वात्तिष्ठतेः 'आतश्चोपसर्गे' इत्यङं बाधित्वा 'स्थागापापचो भावे' इति क्तिना भाव्यमिति चेत्सत्यम्। 'पूर्वपरावरदक्षिणोत्तरा–' इति सूत्रे व्यवस्थायामिति निर्देशादङपि सामान्यापेक्षज्ञापकाश्रयणात्। तदेतद् ध्वनयति व्यवस्थावदिति। साधु इति प्राप्त इति। सोर्लुकि प्राप्त इत्यर्थः। वसन्ते इति प्राप्ते आल् इति। पूर्वसवर्णे तु 'अतो गुणे' इति स्यात्। उर्वियेति। उरुदारुशब्दात्तृतीयैकवचनस्येयादेशः। सुक्षेत्रियेति। सुक्षेत्रिन्शब्दात्तृतीयैकवचनस्य डियाजादेशः। डित्वाट्टिलोपः। बाहुनेति प्राप्त इति। काशिकायां तु प्रबाहुनेति प्राप्त इत्युक्तं तत्समासभ्रमादित्यवधेयम्। प्रेति न समस्तं पृथक्स्वरदर्शनात् पदकारैर्विच्छिद्य पाठाच्च। अत आख्यातान्वयीति ध्येयम्। स्वप्नयेति। अयाचोऽकारः 'सुपि च' इति दीर्घनिवृत्त्यर्थः। 'अतो गुणे' इति पररूपम्। नावयेति। नौशब्दाट्टा इत्यस्याऽयार्। रित्स्वर इति। 'रिति' इति सूत्रेण। अमो। अम इति मिबादेशो गृह्यते न द्वितीयैकवचनं छन्दसि दृष्टानुविधा-

---

दिक्। यमिति प्राप्ते इति। अम आत्। 'न विभक्तौ' इति इत्वनिषेधः। आङः = तृतीयैकवचनस्य। मृग्यमिति। शाखान्तरे आद्युदात्तपाठादिदमेवेति भाष्यस्वरसः।

स्यामो मश् स्यात्। अकार उच्चारणार्थः। शित्वात्सर्वादेशः। 'अस्तिसिचः–' (सू. २२२५) इतीट्। वधीं वृत्रम्। अवधिषमिति प्राप्ते। ३५६३ लोपस्त आत्मनेपदेषु। (७-१-४१) छन्दसि देवा अदुह। अदुहतेति प्राप्ते। दक्षिणतः शये। शेते इति प्राप्ते। आत्मने इति किम्—उत्सं दुहन्ति। ३५६४ ध्वमो ध्वात्। (७-१-४२) अन्तरेवोष्माणं वारयध्वात्। वारयध्वमिति प्राप्ते। ३५६५ यजध्वैनमिति च। (७-१-४३) एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते। यजध्वैनं प्रियमेधाः। वकारस्य यकारो निपात्यत इति वृत्तिकारोक्तिः प्रामादिकी। ३५६६ तस्य तात्। (७-१-४४) लोटो मध्यमपुरुष-

---

नात्। तदेतदाह मिवादेशस्येति। शित्वात्सर्वादेश इति। शित्करणाभावे तु 'अलोऽन्त्यस्य' इति मकारस्य स्यात्। 'आदेः परस्य' इति तु न, पञ्चमीनिर्देशाभावात्। न च मकारस्य मकारवचने प्रयोजनाभावात् सर्वादेशो भविष्यतीति वाच्यम्। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं स्याद् 'मो राजि समः क्वौ' इत्यत्र यथा। वधीमिति। हन्तेर्लुङ् 'हनो वध लिङि' 'लुङि च' इति वधादेशः। 'च्लेः सिच्' इट् 'तस्थस्थ–' इति मिपोऽम्भावः। तस्य मश् 'अस्तिसिचः–' इति मस्यापृक्तस्येट् 'इट ईटि' इति सिचो लोपः। सवर्णदीर्घत्वम्। 'बहुलं छन्दसि' इत्यडभावः। लोपस्त। आत्मनेपदेषु यस्तकारस्तस्य च्छन्दसि विषये लोपः स्यात्। अदुहेति। दुहेर्लुङ् 'आत्मनेपदेष्वनतः' इति झस्यादादेशः। 'बहुलं छन्दसि' इति रुट् तकारस्य लोपे द्वयोरकारयोः 'अतो गुणे' इति पररूपम्। शये इति। शेते इत्यत्र तलोपे कृतेऽयादेशः। ध्वमो। ध्वमो ध्वादित्यादेशः स्याच्छन्दसि। वारयध्वादिति। वृञो णिचि लोट्। यज। वृत्तिकारस्तु यजध्यैनमिति पाठं ज्ञात्वा वकारस्य यकारश्च निपात्यत इत्याह। तद् दूषयति वकारस्येत्यादि। प्रामादिकीति। लक्ष्ये वकारपाठस्य निर्विवादत्वाद्। वेदभाष्येऽपि प्रकृतसूत्रस्य मलोपमात्रपरतोक्तेश्चेति भावः। तस्य। मध्यमपुरुषबहुवचनस्येति। प्रथमपुरुषैकवचनस्य तु न ग्रहणम्। छन्दसि

तत्र च व्यत्ययेन ङीप्। शित्त्वादिति। मस्यापि मवचनमनुस्वारनिवृत्त्यर्थं स्यादिति भावः। वधीमिति। हन्तेर्लुङि वधादेशः, सिच इट्, मिपोऽमो मश्, तस्य 'अस्तिसिचः–' इतीट्, सिज्लोपः, सवर्णदीर्घत्वम्। लोपस्त। आत्मनेपदेषु विद्यमानतकारस्य लोपः स्यात्। अदुहेरि। दुहेर्लङो झस्याऽतो 'बहुलं छन्दसी'ति रुट्, तलोपे द्वयोरकारयोः पररूपम्' छान्दसत्वादेव कचिन्न। 'तत एवात्मातमादतं कुरुते'।

१—'ध्वमोध्वाद् इत्यादेशः स्याच्छन्दसि' इत्यादौ कचित् पाठः। स च प्रक्षिप्तः।

बहुवचनस्य स्थाने तात्स्यात्। गात्रमस्यानूनं कृणुतात्। कृणुतेति प्राप्ते। सूर्यं चक्षुर्गमयतात्। गमयतेति प्राप्ते। ३५६७ तप्तनप्तनथनाश्च। (७-१-४५) तस्येत्येव। शृणोत ग्रावाणः। शृणुतेति प्राप्ते तप्। सुनोतन पचत ब्रह्मवाहसे। दधातन द्रविणं चित्रमस्मे। तनप्। मरुतस्तज्जुजुष्टन। जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च। विश्वेदेवासो मरुतो यतिष्ठन। यत्संख्याकाः स्थेत्यर्थः। यच्छब्दाच्छान्दसो डतिः, अस्तेस्तस्य थनादेशः। ३५६८ इदन्तो मसि। (७-१-४६) मसीत्यविभक्तिको निर्देशः। इकार उच्चारणार्थः। मस् इत्ययमिकाररूपचरमावयवविशिष्टः स्यात्। मस इगागमः स्यादिति यावत्। नमो भरन्त एमसि। त्वमस्माकं तव स्मसि। इमः स्मः इति प्राप्ते। ३५६९ क्त्वो यक्। (७-१-

---

दृष्टानुविधानात्। पूर्वोत्तराभ्यां बहुवचनाभ्यां साहचर्याच्च। **कृणुतादिति**। कृवि हिंसाकरणयोश्च। 'धिन्विकृण्व्योर च' इत्युप्रत्ययः वकारस्य चाकारः। अतो लोपः। **गमयतादिति**। गमेर्णिच्। 'जनीजॄष्–' इति अमन्तत्वान्मित्संज्ञायां मितां ह्रस्वः लोएमध्यमपुरुषबहुवचनस्य तादेशः। **तप्तनप्त**। तस्य स्थाने एते आदेशा स्युः। **शृणोतेति**। श्रु श्रवणे। 'श्रुवः शृ च' इति श्नुप्रत्ययः शृभावश्च। पित्त्वेनाङित्त्वाद् गुणः। **सुनोतनेति**। षुञ् अभिषवे 'स्वादिभ्यः श्नुः' त इत्यस्य तनप्। **दधातनेति**। अत्राप्यङित्वात् 'श्नाभ्यस्तयोः–' इत्याकारलोपाभावः। **इदन्तो**। अन्तशब्दोऽवयववचनः। इत् अन्तो यस्य स इदन्तः। तपरकरणमसंदेहार्थम्। तथा चायमर्थो मस् इत्ययं शब्द इकारान्तो भवति। मसः सकारान्तस्य इसागमो भवति स च तस्यान्तो भवतीत्यर्थस्तदेतदाह **मस् इत्ययमिति**। तत्र यदि सकारोपमर्देन इकारान्तत्वमभिप्रेतं स्यात्तर्हि मस् इदिति वाच्यं स्यात्। तस्मादवस्थित एव सकारे इकार उपसञ्जनीयः। अन्तग्रहणाच्च तद्ग्रहणेन गृह्यते। ततश्च टित्त्वकित्त्वादेरागमलिङ्गस्याभावेऽप्यर्थादागमोऽयं संपद्यते, तदेतद्ध्वनयन्नाह **मस इगागमः स्यादिति**। एवं च मस इगिति वक्तव्यं प्रत्याहारसंदेहप्रसङ्गात्तथा नोक्तम्। **एमसीति**। इण् गतौ मस् तस्य इकारः अन्तावयवः। **स्मसीति**। अस्तेर्मस् 'श्नसोर-

---

छन्दसि दृष्टानुविधानादाह **मध्यमपुरुष इति**। **कृणुतादिति**। 'धिन्विकृण्व्योर च'त्युप्रत्ययः। वस्याऽकारेऽतो लोपः। **शृणोतेति**। पित्त्वेनाऽङित्त्वाद् गुणः। अत एव 'दधातने'त्यत्र 'श्नाभ्यस्तयो'रित्यालोपो न। थादेशस्यैते आदेशाः। **यतीत्यस्य** व्याख्या। **यत्सङ्ख्याका इति**। **यतिष्ठनेति**। सुषामादित्वात् षत्वम्। **एम-**

४७) दिवं सुपर्णो गत्वाय । ३५७० इष्ट्वीनमिति च । (७-१-४८) क्त्वाप्रत्ययस्य ईनम् अन्तादेशो निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा इति प्राप्ते । ३५७१ स्नात्व्यादयश्च । (७-१-४९) आदिशब्दः प्रकारार्थः । आकारस्य ईकारो निपात्यते । स्विन्नः स्नात्वी मलादिव । पीत्वी सोमस्य वावृधे । स्नात्वा पीत्वेति प्राप्ते । ३५७२ आज्जसेरसुक् । (७-१-५०) अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः । ३५७३ श्रीग्रामण्योश्छन्दसि । (७-१-५६) आमो नुट् । श्रीणामुदारो धरुणो रयीणाम् । सूतग्रामणीनाम् । ३५७४ गोः पादान्ते । (७-१-५७) विद्मा हि त्वा गोपतिं शूर गोनाम् । पादान्ते किम्—गवां शता पृक्षयामेषु । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् । विराजं गोपतिं गवाम् । ३५७५ छन्दस्यपि दृश्यते । (७-

---

लोपः' । **क्त्वो** । क्त्वा इत्यस्य यगागमः स्याच्छन्दसि । **गत्वायेति** । गमेः क्त्वा । 'अनुदात्तोपदेश–' इत्यनुनासिकलोपः । क्त्वा इत्यस्य यगागमः । **इष्ट्वीन । क्त्वाप्रत्ययस्येति** । यजेः परस्येति शेषः । **इष्ट्वीनमिति** । यजेः क्त्वा । 'वचिस्वपि–' इति संप्रसारणम् । 'व्रश्च–' इति षत्वम् । ष्टुत्वम् । आकारस्येनमादेशः । **पीत्वेति** । पिबतेः क्त्वा । 'घुमास्था–' इतीत्वम् । **आज्जसेः** । जसेरिति पूर्वाचार्यानुरोधेन निर्देशः । **देवास इति** । असुकि कृते जसः सकारस्य श्रवणम् । असुकः सकारस्य विसर्गः । **श्रीणामिति** । अस्य 'वामि' इति नदीत्वविकल्पान्नदीत्वाभावे उदाहरणमिदं बोध्यम् । नदीत्वपक्षे तु 'ह्रस्वनद्यापो नुट्' इत्यनेनैव सिद्धम् । **सूतग्रामणीनामिति** । सूताश्च ग्रामण्यश्चेतीतरेतरयोगः । **गोः पा** । गो इत्येतस्मादुत्तरस्यामो नुडागमः स्यात्पादान्ते । पादश्चेह ऋक्पादो गृह्यते छन्दसीत्यधिकारात् । **छन्दस्य** । 'छन्दसि च' इत्येव सिद्धे 'अपि दृश्यत' इत्येतत्सर्वोपाधिव्यभि-

---

सीति । इण आङ्पूर्वस्य रूपम् । यगागमेऽकारो विवक्षितः । **आज्जसेर** । असुकि कृते जसः सकारस्य श्रवणम् । असुकः सस्य विसर्गः । 'उभयासः' इत्यादौ परत्वादसुकि 'सकृद्गति' न्यायेन पुनः शी न । **श्रीग्रामण्योरिति** । पञ्चम्यर्थे षष्ठी । इदं व्यर्थम्, श्रीणामित्यस्य 'वाऽऽमी'ति नदीत्वेन सिद्धेः । छन्दस्यापाद्यमानरूपाऽऽभावात् । 'सूतग्रामणीना'मित्यपि समाहारद्वन्द्वोत्तरमेकशेषे सिद्धम् । 'छन्दसी'ति तु 'गोः पादान्ते' इति सूत्रे ऋक्पादस्यैव ग्रहणार्थमावश्यकम् । ऋक्पादान्ते वर्तमानगोशब्दात्परस्याऽऽमो नुडिति तदर्थः । **छन्दस्यपि दृ** । यत्र विहितस्ततोऽन्यत्रापि दृश्यते ।

१-७६) अस्थ्यादीनामनङ्। इन्द्रो दधीचो अस्थभिः। ३५७६ **ई च द्विवचने।** (७-१-७७) अस्थ्यादीनामित्येव। अक्षीभ्यां ते नासिकाभ्याम्। ३५७७ **दृक्स्ववस्स्वतवसां छन्दसि।** (७-१-८३) एषां नुम् स्यात्सौ। कीदृङ्ङिन्द्रः। स्ववान्। स्वतवान्। 'उदोष्ठ्यपूर्वस्य' (सू.२४९४)। ३५७८ **बहुलं छन्दसि।** (७-१-१०३) ततुरिः। जगुरिः पराचैः। ३५७९ **ह्रु ह्वरेश्छन्दसि।** (७-२-३१) ह्वरेर्निष्ठायां ह्रु आदेशः स्यात्। अह्रुतमसि हविर्धानम्। ३५८० **अपरिह्वृताश्च।** (७-२-३२) पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते। अपरिह्वृताः सनुयाम वाजम्। ३५८१ **सोमे ह्वरितः।** (७-२-३३) इड्गुणौ निपात्येते। मा नः सोमो ह्वरितः। ३५८२ **ग्रसितस्कभितस्तभितोत्तभित-**

चारार्थम्। अन्यथा आरम्भसामर्थ्यात्कस्यचिदेव व्यभिचारः संभाव्येतेति। टादावचीत्युक्तं हलादावपि भवति। **अस्थभिः।** विभक्तावित्युक्तमविभक्तावपि भवति। 'अस्थन्वन्तं यदनस्था बिभर्ति'। अस्थन्वन्तमित्यत्रास्थिशब्दान्मतुप्। अनङि कृतेऽनो नुडिति मतुपो नुट्। अनङो नकारलोपः। दृक्। 'आच्छीनद्योर्नुम्' 'सावनडुहः' इत्यतो नुम् सावित्यनुवर्तते। तदाह **नुम् स्यादिति। कीदृङ्ङिन्द्र इति।** किम्शब्दे उपपदे 'त्यदादिषु दृशोऽनालोचने कञ्च' इति दृशेः क्विन्। 'इदंकिमोरीश् की' इति किमः की आदेशः, नुम् 'संयोगान्तस्य लोपः' 'क्विन्प्रत्ययस्य–' इति कुत्वेन नस्य ङः 'ङमो ह्रस्वादचि–' इति ङमुट्। **स्ववानिति।** अवतेरसुन्। सुष्ठु अवो यस्येति विग्रहः स्ववःशब्दान्नुमि कृते 'सान्तमहतः–' इति दीर्घः संयोगान्तलोपः। तस्यासिद्धत्वान्नलोपो न। **स्वतवानिति।** तुधातुः सौत्रो वृद्ध्यर्थः। ततोऽसुन्। स्वं तवो वृद्धिर्यस्येति विग्रहः। **ततुरिरिति।** तरतेः 'आदृगम–' इति क्विन्प्रत्ययः। उत्वं तस्य 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् इत्येतस्य द्विर्वचनम्,उरदत्त्वम्। ह्रु ह्वरे। 'श्वीदितो निष्ठायाम्' इत्यतो निष्ठायामिति वर्तते। तदाह **निष्ठायामिति। अह्रुतमिति** न ह्रुतमह्रुतम्। **अपरिह्वृताः।** छन्दसि बहुवचनान्तस्यैव प्रयोगदर्शनाद्बहुवचनान्तस्य निर्देशः। **सोमे। इड्गुणाविति।** ह्रु इत्यादेशस्याभावोऽपि बोध्यः। **ग्रसित।** ग्रसु अदने। स्कम्भु स्तम्भु रोधानर्थौ सौत्रौ। चते

'अस्थाभिरस्थीन्युत्कृत्य'। **अस्थन्वतेत्यादि।** 'अनो नुडि'ति मतुपो नुटि अनङो नस्य लोपः। **ई च द्वि।** अस्थ्यादीनामीकार उदात्तो द्विवचने छन्दसि। **अपरिह्वृता इति।** बहुवचननिर्देशश्छन्दसि तदन्तस्यैव प्रयोगदर्शनात्। **उत्तभिते।**

चत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमिति च। (७-२-३४) अष्टादश निपात्यन्ते। तत्र ग्रसु स्कम्भु स्तम्भु एषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इण्निपात्यते। युवं शचीभिर्ग्रसितामभुञ्चतम्। विष्कभिते अजरे। येन स्वः स्तभितम्। सत्येनोत्तभिता भूमिः। स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति। चते याचने। कस गतौ। आभ्यां क्तस्येडभावः। चत्ता इतश्चत्तामुतः। त्रिधा ह श्यावमश्विना विकस्तम्। उत्तानाया हृदयं यद्विकस्तम्। निपातनबहुत्वापेक्षं सूत्रे बहुवचनं विकस्ता इति। तेनैकवचनान्तोऽपि प्रयोगः साधुरेव। शसु शंसु शासु एभ्यस्तृच इडभावः। एकस्त्वष्टुरश्वस्याविशस्ता। ग्रावग्राभ उत शंस्ता। प्रशास्ता पोता। तरतेर्वृङ्वृञोश्च तृच उट् ऊट् एतावागमौ निपात्येते। तरुतारं रथानाम्। तरूतारम्। वरुतारं, वरूतारम्। वरूत्रीभिः सुशरणो नो अस्तु। अत्र ङीबन्तनिपातनं प्रपञ्चार्थम्। वरूतृशब्दो हि निपातितः। ततो ङीपा गतार्थत्वात्। उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते। ज्वल दीप्तौ। क्षर संचलने। टुवम उद्गिरणे। अम गत्यादिषु। इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्

याचने। कस गतौ। शसु हिंसायाम्। शंसु स्तुतौ। शासु अनुशिष्टौ। तॄ प्लवनतरणयोः। वृङ् संभक्तौ। वृञ् वरणे। ज्वल दीप्तौ। क्षर संचलने। क्षमूष् सहने। टुवम् उद्गिरणे। अम गत्यादिषु। **अष्टादशेति।** क्षमितेः पाठपक्षे तु एकोनविंशतिः। **उदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इति।** 'उदितो वा' इति क्त्वायां वेट्त्वाद् 'यस्य विभाषा' इति निषेधे प्राप्ते इत्यर्थः। **विष्कभित।** 'अनिदिताम्–' इति नलोपः। 'वेः स्कभ्नातेर्नित्यम्' इति षत्वम्। **उत्तभितेति।** 'उदः स्थास्तम्भोः–' इति पूर्वसवर्णः। सकारस्य थकारः। तस्य 'झरो झरि सवर्णे' इति लोपः। **अन्योपसर्गपूर्वस्य माभूदिति।** यदि स्याद् उत्तभितग्रहणं व्यर्थं स्यात्। **चत्ता इति।** चत्तशब्दादापि उत्वा सह आद्गुणः निपातेन सह एकीकृत्य छेदस्तु पदकाराणां संप्रदायसिद्धः। 'भूयामो' इति मन्त्रे भूयामो इति यथा। **निपातनं बहुत्वापेक्षमिति।** तेन छान्दसः प्रयोग एकवचनान्तोऽप्युदाहृत इति भावः। **अश्वस्याविशस्तेति।** 'अन्येषामपि–' इति पूर्वपदस्य दीर्घः। **तत ङीपा इति।**

'उदस्थे'ति पूर्वसवर्णः। **माभूदिति।** इणिति शेषः। सूत्रे इतिः प्रकारे। तेन कचि-

पठन्ति । तत्र षमूष् सहने इति धातुर्बोध्यः । भाषायां तु ग्रस्तस्कब्धस्तब्धोत्तब्धचत्तविकसिताः । विशसिताः । शंसिता । शासिता । तरीता । तरिता । वरीता । वरिता । उज्ज्वलति । क्षरति । पाठान्तरे, क्षमति । वमति । अमति । 'बभूथाऽऽततन्थजगृम्भववर्थेति निगमे (२५२७) । विद्या तमुत्सं यत आबभूथ । येनान्तरिक्षमुर्वाततन्थ । जगृम्भा ते दक्षिणमिन्द्र हस्तम् । त्वं ज्योतिषा वितमो ववर्थ । भाषायां तु बभूविथ । आतेनिथ । जगृहिम । ववरिथेति । ३५८३ **सनिंससनिवांसम्** । (७-२-६९) सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिड् एत्त्वाभ्यासलोपाभावश्च निपात्यते । अग्ने त्वामे सनिंससनिवांसम् । ॐ **पावकादीनां छन्दसि प्रत्ययस्थात्कादित्वं नेति वाच्यम्** । (वा. ४५२७) हिरण्यवर्णाः शुचयः पावकाः । ३५८४ **घोर्लोपो लेटि वा** । (७-३-७०) दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । यदग्निरग्नयेददात् । ३५८५ **मीनातेर्निगमे** । (७-३-८१) शिति ह्रस्वः । प्रमिणन्ति व्रतानि । लोके प्रमीणन्ति । 'अस्तिसिचोऽपृक्ते' (सू.२२२५) । ३५८६ **बहुलं छन्दसि** । (७-३-९७) सर्वमाः इदम् । आसीदिति प्राप्ते । [अस्ते-

---

'ऋतेभ्यः–' इति विहितेन । **बभूथा** । निगमो वेदः । एषां वेद इडभावो निपात्यते । अत्र क्रादिसूत्रेणेडभावे सिद्धे निगम एवेति नियमार्थं निपातनम् । तदेतदाह **भाषायां तु ववरिथेति** । **सनिंस** । सनिंपूर्वात्सनतेः सनोतेर्वा सनिंससनिवांसमिति निपात्यते । **क्वसोरिडिति** । 'नेड्वशि कृति' इति निषेधे प्राप्ते निपातनम् । **पावका इति** । पुनन्ति पावयन्ति वा पावकाः । पुनातेः पावयतेर्वा ण्वुल् टाप् । **दधदिति** । दधातेर्लेट् तिप् 'श्लौ' इति द्वित्वम् । दधाति इति स्थिते आकारलोपः । 'लेटोऽडाटौ' इत्यडागमः । 'इतश्च लोपः परस्मैपदेषु' इतीकारलोपः । दाशुषे यजमानाय रत्नानि दधत् । दध्यादित्यर्थः । ददिति ददाते रूपम् । लोपाभावे उदाहरणमाह **ददादिति** । **मीनातेः** । 'प्वादीनां ह्रस्वः' इत्यतो ह्रस्व इति वर्तते । तदाह **शिति ह्रस्व इति** । **प्रमिणन्तीति** । 'हिनुमीना' इति णत्वम् । **आ इदमिति** । अस्तेर्लङ् तिप्

दीकारोऽपि । वित्तमभ्यमीति वरुण इतिश्रुतिः । **सनिंस** । 'सनि'मित्यस्य छान्दसत्वादानुपूर्व्या अविवक्षितत्वाच्छन्दस्येवैतन्निपातनम् । **पावका** इति । पुनन्ति पावयन्ति वेत्यर्थः । **घोर्लोपो** । घुसञ्ज्ञकानां लेटि परतो लोपो वा । दधातेर्ददातेश्च लेट् । तिप् । 'इतश्च लोपः परस्मैपदेषु' इतीकारलोपः । लोपेऽप्याडागमेन 'ददा'-

लेङ् तिप् इंडभावः अपृक्तत्वाद्धल्ङ्यादिलोपः। रुत्वविसर्गौ। संहितायां तु 'भोभगो-' (१६७) इति यत्वम्। 'लोपः शाकल्यस्य' (६७) इति यलोपः। गोभिरश्वाः। सिच इडभावश्छान्दसः। अट्। शेषं पूर्ववत्] 'ह्रस्वस्य गुणः' (२४२)। 'जसि च' (२४१) ॐ जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः। अधा शतक्रत्वो यूयम्। शतक्रतवः। पश्वे नृभ्यो यथा गवे। पशवे। ॐ नाभ्यस्तस्याचि (२५०३) इति निषेधे 'बहुलं छन्दसी'ति वक्तव्यम्। अनुषग्जुजोषत्। ३५८७ नित्यं छन्दसि (७-४-८) छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋत्वियम्। अवीवृधत्। ३५८८ न छन्दस्यपुत्रस्य। (७-४-३५) पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न। मित्रयुः 'क्याच्छन्दसि' (३१५०) इति उः। अपुत्रस्य किम्—पुत्रीयन्तः सुदानवः। ॐ अपुत्रादीनामिति वाच्यम्। जनीयन्तोऽन्वग्रवः। जनमिच्छन्त इत्यर्थः। ३५८९ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति। (७-४-३६) एते क्यचि निपात्यन्ते। भाषायां तु उप्रत्ययाभावात् दुष्टीयति। द्रविणीयति।

'आडजादीनाम्' इत्याट्। शपो लुक्। 'अस्तिसिचः-' इतीडभावे अपृक्तत्वाद्धल्ङ्यादिलोपः रुत्वविसर्गौ। संहितायां तु 'भोभगो-' इति रोर्यत्वम्। 'लोपः शाकल्यस्य' इति यलोपः। **जसादिष्विति**। आदिशब्दः प्रकारे, तेन पूर्वयोगनिर्दिष्टानामपि ग्रहणम्। **शतक्रत्व इति**। 'जसि च' इति गुणाभावपक्षे प्रथमयोः पूर्वसवर्णदीर्घोऽपि 'वा छन्दसि' इति वचनादत्र न भवतीति यणादेशः प्रवर्तते। **पश्वे इति**। 'घेर्ङिति' इत्यस्याभावे यण्। **जुजोषदिति**। जुषी प्रीतिसेवनयोः। लेट व्यत्ययेन परस्मैपदं तिप्। 'इतश्च लोपः परस्मैपदेषु' 'लेटोऽडाटौ' इत्यट् व्यत्ययेन शपः श्लुः द्विर्वचनम्। **न छन्दसि**। इह यद्यानन्तर्यादीत्वमात्रं प्रतिषिध्येत तर्हि 'अकृत्सार्व-' इति दीर्घः स्यात्। अपवादे पुनरुत्सर्गस्थितेः। अत आह **ईत्वदीर्घौ नेति**। क्यचि यदुक्तं तन्नेति व्याख्यानादिति भावः। अत्र च ज्ञापकमनुपदमेव वक्ष्यति। **पुत्रीयन्त इति**। पुत्रमिच्छन्तः पुत्रीयन्तः। जनमिच्छन्तो जनीयन्तः। लटः शत्रादेशः। 'उगिदचाम्-' इति नुम्। **दुरस्यु**। दुष्टशब्दस्य दुरस्भावो द्रविणशब्दस्य द्रविणस्भावो वृषस्य वृषण्भावो रिष्टस्य रिषण्भावश्च निपात्यते। **दुष्टीयतीति**। प्रकृतिमात्रे तात्पर्यम्। उप्रत्ययस्य समानार्थेन तृना दुष्टीयितेत्यादि

दित्यस्य सिद्धौ वाग्रहणं स्पष्टार्थम्। **जसादिष्विति**। आदिशब्दः प्रकारे। तेन दर्वे दर्वि अम्बे अम्बेत्यादि सिद्धम्। **नाभ्यस्तस्येत्यादि**। जुजोषदित्युदाहरणम्।

वृषीयति। रिष्टीयति। ३५९० अश्वाघस्यात्। (७-४-३७) अश्व अघ एतयोः क्यचि आत्स्याच्छन्दसि। अश्वायन्तो मघवन्। मा त्वा वृका अघायवः। 'न च्छन्दसि' (३८८८) इति निषेधो नेत्वमात्रस्य किंतु दीर्घस्यापीति। अत्रेदमेव सूत्रं ज्ञापकम्। ३५९१ देवसुम्नयोर्यजुषि काठके। (७-४-३८) अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम्। देवायन्तो यजमानाः। सुम्नायन्तो हवामहे। इह यजुःशब्दो न मन्त्रमात्रपरः किंतु वेदोपलक्षकः। तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति। किं च ऋग्वेदेऽपि भवति। स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः। यजुषीति किम्—देवाञ्जिगाति सुम्नयुः। बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्तः। ३५९२ कव्यध्वरपृतनस्यर्चि लोपः। (७-४-३९) एषामन्त्यस्य लोपः स्यात् क्यचि ऋग्विषये। सपूर्वया निविदा कव्यतायोः। अध्वर्युं वा मधुपाणिम्। दमयन्तं पृतन्युम्। 'दधातेर्हिः' (३०७६) 'जहातेश्च क्त्वि' (३३३१) ३५९३ विभाषा छन्दसि (७-४-४४) हित्वा शरीरम्। हीत्वा वा। ३५९४ सुधित वसुधित नेमधित धिष्व धिषीय च। (७-४-४५)

बोध्यम्। **अश्वायन्त इति**। अश्वशब्दात् क्यच्। लटः शत्रादेशः। **अघायव इति**। छन्दसि परेच्छायां क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। **इदमेव सूत्रं ज्ञापकमिति**। अन्यथा दीर्घेणैव सिद्धत्वादात्त्ववचनमनर्थकं स्यात्। **देवाञ्जिगातीति**। नन्विदं प्रत्युदाहरणमङ्गद्वयविकलम्। यजुषि काठक इत्यंशद्वयस्यापि तत्राभावादित्याशङ्क्याह **बह्वृचानामप्यस्तीति**। तत्रेदं दृष्टमिति भावः। काठक इति किम्। यजुर्वेदे शाखान्तरे माभूत्। अन्यत्र सुम्नयुरिदमस्ति। **कव्यध्वर**। कवि अध्वर पृतना एषामन्त्यस्य लोपः स्यात् क्यचि परे ऋचि विषये। मृगय्वादिगणेऽध्वर्युशब्दः पठ्यते तत्प्रत्ययान्तरं बोध्यम्। **विभाषा**। जहातेरस्य विभाषा हि आदेशः स्यात्। **हीत्वेति**। हिआदेशाभावे 'घुमास्था–' इतीत्वम्। कचित्तु हात्वेति पाठस्तत्र छान्दसत्वाद् 'घुमास्था–' इतीत्वाभावः। **वसुधितमिति**। कर्मधारय इति हरदत्तः। वसूनां धातारं प्रदातारमित्यर्थ इति वेदभाष्यम्। **नेमधितमिति**।

अपुत्रादीनामिति। आदिग्रहणस्य प्रयोजनान्तरं मृग्यमिति हरदत्तः। **यजुर्वेदस्थे**। यजुर्वेदीयकठशाखास्थे। **कव्यध्वर**। कव्येत्युदाहरणम्। **विभाषा**। जहातेर्हिर्वा स्यात् क्त्वि। 'हात्वे'ति पाठे छान्दसत्वादीत्वाऽभावः। **वसुधितमिति**

सु वसु नेम एतत्पूर्वस्य दधातेः क्तप्रत्यये इत्वं निपात्यते। गर्भं माता सुधितं वक्ष-णासु। वसुधितमग्नौ। नेमधिता न पौंस्या। क्तिन्यपि दृश्यते। उत श्वेतं वसु-धितिं निरेके। धिष्व वज्रं दक्षिण इन्द्र हस्ते। धत्स्वेति प्राप्ते। सुरेता रेतो धिषीय। आशीर्लिङि इट्। 'इटोऽत्' (२२५७) धासीयेति प्राप्ते। 'अपो भि' (४४२)। * मासश्छन्दसीति वक्तव्यम्। माद्भिः। शरद्भिः। * स्ववःस्वतवसोरुषसश्चेष्यते। स्ववद्भिः। अवतेरसुन्, शोभनमवो येषां ते स्ववसस्तैः। तु इति सौत्रो धातुस्तस्मादसुन्। स्वं तवो येषां तैः स्वतवद्भिः। समुषद्भिरजायथाः। मिथुनेऽसिः। वसेः किच्चेत्यसिप्रत्यय इति हरदत्तः। पञ्च-पादीरीत्या तु उषः किदिति प्राग्व्याख्यातम्। 'न कवतेर्यङि' (२६४१)। ३५६५ कृपेश्छन्दसि। (७-४-६४) यङि अभ्यासस्य चुत्वं न। करीकृष्यते। ३५६६ दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संस-निष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्याऽऽगनीगन्तीति च। (७-४-६५) एतेऽष्टादश निपा-त्यन्ते। आद्यास्त्रयो धृङो धारयतेर्वा। भवतेर्यङ्लुगन्तस्य गुणाभावः। तेन

सामिपर्यायो नेमशब्दः। अयं कर्मधारयः। धत्स्वेति। 'आभ्यस्तयोरातः' इत्या-कारलोपः। 'दधस्तथोश्च' इति भष्भावः। धिषीयेति। आशीर्लिङात्मनेपदोत्त-मपुरुषैकवचने दधातेरित्वं निपात्यते। तदाह आशीर्लिङीति। माद्भिरिति। 'पद्दन्नोमास्–' इति मासशब्दस्य मास्आदेशः। न कवतेरिति। अनुवृत्त्यर्थ उपन्यासः। करीकृष्यत इति। 'रुग्रिकौ च लुकि इति रीगागमः। लोके तु चरी-कृष्यते कृषीवलः। धृङ इति। धृङ् अवस्थाने। धारयतेर्वेति। स एव एयन्तः। तत्र दाधर्तीत्यत्र धारयतेः शपः श्लौ णिलुक् अभ्यासस्य दीर्घत्वं च निपात्यते। धृङो वा शे प्राप्ते व्यत्ययेन शप् तत्र श्लावभ्यासस्य दीर्घत्वं च। अत्र परस्मैपदमपि

कर्मधारय इति हरदत्तः। नेम इत्यर्धे। नेमधिते कर्मधारयः। माद्भिरिति। 'पद्दन्नो' इति मासस्य मासादेशः। आद्यास्त्रय इति। धृङः शपः श्लुरभ्यासस्य दीर्घः, परस्मैपदञ्च निपात्यते, धारयतौ तु श्लुणिलुगभ्यासदीर्घत्वानि, अन्त्ययोः श्लुणिलुग्रुगागमाः, धृङस्तु श्लुरुक्परस्मैपदानि। यद्वा धृङो यङ्लुकि रुगभावमात्र-मादेः, रुक्निपातनप्राप्तरुगभावस्य बाधाय दर्धर्तीत्यत्र रुग्निपातनम्। दर्धर्षीत्यत्र तु यङ्लु-क्यपत्ते न किञ्चिन्निपात्यम्, किं तु श्लावेव। यङ्लुगन्तस्येति। 'लोटी'ति शेषः।

भाषायां गुणो लभ्यते । तिजेर्यङ्लुगन्तात्तङ् । इयर्तेर्लटि हलादिः शेषापवादो रेफस्य लत्वमित्वाभावश्च निपात्यते । अलर्षि युध्म खजकृत्पुरन्दर । सिपा निर्देशो न तन्त्रम् । अलर्ति दक्ष उत । फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीगागमो निपात्यते । अन्त्रा पनीफणत् । स्यन्देः संपूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक् । धातुसकारस्य षत्वम् । करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः क्रन्देर्लुङि च्लेरङ्द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च । कनिक्रदज्जनुषम् । अक्रन्दीदित्यर्थः । बिभर्तेरभ्यासस्य जश्त्वाभावः । वि यो भरिभ्रदोषधीषु । ध्वरतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य विगागमो धातोरृकारलोपश्च । दविध्वतो रश्मयः सूर्यस्य । द्युतेरभ्यासस्य संप्रसारणाभावोऽत्वं विगा-

---

निपात्य तस्यैव यङ्लुक्यभ्यासस्य रुगाद्यपवादकं दीर्घत्वं निपात्यत इति । दर्धर्तीत्यत्र यङ्लुक्पक्षे दाधर्तीति निपातनेन प्राप्तस्य दीर्घस्याभावो निपात्यते । 'रुग्रिकौ च लुकि' 'ऋतश्च' इत्येव रुक् सिद्धः । श्लुपक्षे तु रुगपि निपात्यः । दर्धर्षीत्यत्र यङ्लुक्पक्षे न किंचिन्निपातनं किं तु श्लावेव । भवतेर्यङ्लुगन्ताल्लोट् गुणाभाव इति । ननु 'भूसुवोस्तिङि' इत्येव गुणनिषेधे सिद्धे निपातनमनर्थकमिति चेत्सत्यम् । ज्ञापकार्थं तर्हि निपातनम् । एतज्ज्ञापयति अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति । तेन बोभवीतीत्यत्र भाषायां गुणः सिद्धः । तदेतदाह **तेन भाषायामिति** । तिजेर्यङ्लुक्यात्मनेपदं निपात्यते । तदाह **तिजेरिति** । ऋ गतौ लटि सिपि 'श्लौ' इति द्वित्वम् । अभ्यासस्य हलादिःशेषापवादो रेफस्य लत्वं निपात्यते । 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य प्राप्तस्येत्वस्याभावो निपात्यते । तदाह **इयर्तेरिति** । करोतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य चुत्वाभावो निपात्यते । 'ऋतश्च–' इति रिगागमः । तदाह **करोतेरिति** । **चुत्वाभाव इति** । 'कुहोश्चुः' इति प्राप्तस्य बिभर्तेर्यङ्लुगन्तस्य शतरि अभ्यासस्य जश्त्वाभावो निपात्यते । तदाह **बिभर्तेरिति** । **जश्त्वाभाव इति** । 'अभ्यासे चर्च' इति प्राप्तस्य । **दविध्वत इति** । ध्वरतेर्यङ्लुगन्तस्य शतरि रूपम् । 'नाभ्यस्ताच्छतुः' इति नुम्प्रतिषेधः । द्युतेर्यङ्लुगन्तस्य

तेन भाषायामिति । लोडतिरिक्ते च 'बोभवीति' 'बोभोति' इति । 'यङो वा' इति पक्षे ईट् । **संपूर्वस्येति** । 'संपूर्वत्वमतन्त्रम् , आसनिष्यदिति दर्शना'दिति वृत्तिः । **करोतेर्यङ्लुगन्तस्येति** । 'शतरी'ति शेषः । रिक्तु 'रुग्रिकौ चे'ति सिद्धः । **निगागमश्चेति** । चादङभावः । **बिभर्तेरिति** । 'यङ्लुगन्तस्य शतरी'ति शेषः ।

गमश्च । दविद्युतद्दीद्यच्छोशुचानः । तरतः शतरि श्लौ अभ्यासस्य रिगागमः । सहोर्जा तरित्रतः । सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य । वृजेः शतरि श्लावभ्यासस्य रीक् । मृजेर्लिटि णल् अभ्यासस्य रुक् धातोश्च युक् । गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च । वधयन्ती वेदागनीगन्ति कर्णम् । ३५९७ ससूवेति निगमे । (७-४-७४) सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते । गृष्टिः ससूव स्थविरम् । सुषुवे इति भाषायाम् । ३५९८ बहुलं छन्दसि । (७-४-७८) अभ्यासस्य इकारः स्याच्छन्दसि । पूर्णां विवष्टि । वशेरेतद्रूपम् । इति सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

३५९९ प्रसमुपोदः पादपूरणे । (८-१-६) एषां द्वे स्तः पादपूरणे । प्रप्रायमग्निः । संसमिद्युवसे । उपोप मे परामृश । किं नोदुदु हर्षसे । ३६०० छन्दसीरः । (८-२-१५) इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । हरिवते हर्यश्वाय । गीर्वान् । ३६०१ अनो नुट् । (८-१-१६) अन्नन्तान्म-

---

शतरि अभ्यासस्य संप्रसारणाभावोऽत्वं च निपात्यते । तदाह द्युतेरिति । संप्रसारणाभाव इति । 'द्युतिस्वाप्योः संप्रसारणम्' इति प्राप्तस्य । ससूवेति निगमे । दाधर्त्यादिष्वेतत्पठितव्यम् । विवष्टीति । वश कान्तौ । लटि तिपि शपः श्लौ द्वित्वम् अभ्यासस्येत्वं 'व्रश्च–' इति षत्वम्, ष्टुत्वम् ।

इति सुबोधिन्यां सप्तमोऽध्यायः ।

प्रसमुपोदः पादपूरणे । समाहारद्वन्द्वः । समासान्तविधेरनित्यत्वाद् 'द्वन्द्वाच्चुदषहान्तात्' इति न टच् । प्रप्रायमग्निरिति । नात्र द्विर्वचनस्य किंचिद्द्योत्यं केवलं पादपूरणमेव कार्यम् । न चैवंविधस्य भाषायां प्रयोगोऽस्तीति सामर्थ्याच्छन्द-

---

द्युतेरिति । यङ्लुगन्ताच्छतरीति शेषः । तरित्रत इति जसन्तम् । 'नाभ्यस्ता'-दिति नुम्न । 'मर्मृज्ये'त्यत्र वृद्ध्यभावोपि छान्दसत्वात् । इतिशब्द एवंप्रकाराणामन्येषामपि सङ्ग्रहार्थः । 'ससूवे'त्यपि दाधर्त्यादिष्वेव पठितुं युक्तम् । इकार इति, 'श्ला'विति शेषः । न च भवति 'ददातीत्येव ब्रूया'दिति । इति सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः । प्रसमु । समाहारद्वन्द्वः, अनित्यत्वान्न टच् समासान्तः

तोर्नुट् स्यात्। अक्षण्वन्तः कर्णवन्तः। अस्थन्वन्तं यदनस्था। ३६०२ नाद्घस्य। (८-२-१७) नान्तात्परस्य घस्य नुट्। सुपथिन्तरः। * भूरिदाव्नस्तुड्वाच्यः। भूरिदावत्तरो जनः। * ईद्रथिनः। रथीतरः। रथीतमं रथीनाम्। ३६०३ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि (८-२-६१) सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठायां नत्वाभावो निपात्यते। नसत्तमञ्जसा। निषत्तमस्य चरतः। असन्नं निषण्णमिति प्राप्ते। उन्देर्नञ्पूर्वस्यानुत्तम्। प्रतूर्तमिति

स्येवेदं विधानमित्याहुः। छन्दसीरः। हरिवते इति। हरयो विद्यन्ते यस्येति हरिवान् तस्मै। हरिशब्दान्मतुप् मकारस्य वकारः। गीर्वानिति। 'र्वोरुपधाया दीर्घ इकः' इति दीर्घः। अक्षण्वन्त इति। अक्षिशब्दान्मतुप् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'। 'छन्दस्यपि दृश्यते' इत्यनङ्। नुटोऽसिद्धत्वात्पूर्वं नलोपे भूतपूर्वगत्या नुट् णत्वम्। ननु यदि परादिर्नुट् क्रियते तस्य मतुब्ग्रहणेन ग्रहणाद् 'मादुपधायाः—' इति वत्वं मतुपस्तु न स्याद् नुटा व्यवधानात्। यदि तु पूर्वान्तो नुट् क्रियते तर्हि णत्वं न स्यात्। 'पदान्तस्य' इति निषेधादिति चेत्सत्यम्। नुटोऽसिद्धत्वाक्तोक्तदोषः। नन्वेवमवग्रहे दोषः स्यात्। अक्षण्विति णान्तं ह्यवगृह्णन्ति अक्षेत्यकारान्तमवग्रहीतुमुचितमिति चेत्सत्यम्। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नामलक्षणमनुवर्तनीयं तस्माद्यथालक्षणं पदं कर्तव्यमिति महाभाष्ये स्थितम्। किंच ईयिवांसमित्यादौ पदत्वं विनापि अवग्रहः क्रियते। पूर्वेभिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियत इति। घस्येति। तरप्तमपोरित्यर्थः। 'तरप्तमपौ घः' इति तरप्तमपोर्घसंज्ञाविधानात्। सुपथिन्तर इति। सुपथिन्शब्दात् 'द्विवचनविभज्योपपदे' इति तरप् नलोपः। तरपो नुट् तस्यानुस्वारः परसवर्णः। भूरिदाव्न इति। भूरिदाव्नः परस्य घस्य तुट् वाच्य इत्यर्थः। भूरिदावत्तर इति। 'आतो मनिन्' इत्यादिना दाधातोर्वनिप् तदन्तात्तरप् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः तुडागमः। ईद्रथिन इति। रथिन ईकारोऽन्त्यादेशो घे परे। रथीतर इति। रथशब्दाद् 'अत इनिठनौ' इति मत्वर्थीय इनिः। तदन्तात्तरप् नकारलोपे कृते इकारस्य ईकारादेशः। यदि तु नकारलोपापवादो नकारस्थाने ईकारो विधीयते तदा तस्यासिद्धत्वादेकादेशो न स्यात्। रथीतममिति। इह पदकारा ह्रस्वान्तमवगृह्णन्ति। 'अन्येषामपि—' इति संहितायां दीर्घ इति तदाशयः। नसत्त। एतानि छन्दसि विषये निपात्यन्ते। नत्वाभाव इति। 'रदाभ्याम्—' इति प्राप्तस्य। निषत्तमिति। 'सदिरप्रतेः' इति

घस्येति। तरप्तमपोरित्यर्थः। नसत्तनि। एषां शब्दपराणां द्वन्द्वः। निषत्ते

त्वरतेः, तुर्वीत्यस्य वा। सूर्तमिति सृ इत्यस्य। गूर्तमिति गूरी इत्यस्य। ३६९४ **अम्नरूधरवरित्युभयथा छन्दसि (८-२-७०)** रुर्वा रेफो वा। **अम्न एव।** अम्नरेव। ऊधएव। ऊधरेव। अवएव। अवरेव। ३६०५ **भुवश्च महाव्याहृतेः। (८-२-७१)** भुवइति। भुवरिति। ३६०६ **ओमभ्यादाने। (८-२-८७)** ओंशब्दस्य प्लुतः स्यादारम्भे। ओ३म् अग्निमीळे पुरोहितम्। अभ्यादाने किम्—ओमित्येकाक्षरम्। ३६०७ **ये यज्ञकर्मणि। (८-२-८८)**

षत्वम्। **अनुत्तमिति।** अनुत्तमिति भाषायाम्। एतन्निपातनारम्भसामर्थ्याद्भाषायां 'नुदविदोन्दत्रा—' इति विकल्पो नेत्याहुः। **प्रतूर्तमिति।** यदा त्वरतेस्तदा 'ज्वरत्वर—' इत्यादिना ऊठ्। यदा तुर्वी हिंसायामित्यस्य तदा राल्लोपः। **सृ इत्यस्येति।** निपातनादुत्वम्। रपरत्वं तु 'उरण् रपरः' इत्येव सिद्धम्। कार्यकालपक्षाश्रयणेन परिभाषाणामसिद्धत्वप्रकरणेऽपि प्रवृत्तेः। **गूर्तमिति।** गूर्णमिति भाषायाम्। **अम्न।** उभयथेति व्याचष्टे। **रुर्वा रेफो वेति।** 'ससजुषो रुः' इति नित्यं रुत्वे प्राप्ते पक्षे रेफादेशार्थमिदम्। अम्नस्शब्द ईषदर्थे। अम्नरस्तमितमिति यथा अवो रक्षणम्। **अम्न एवेति।** यदा रुत्वं तदा 'भोभगो—' इति रोर्यत्वं 'लोपः शाकल्यस्य' इति लोपः। **भुवश्च।** महाव्याहृतेर्भुवस् इत्येतस्य छन्दसि विषये रुर्वा रेफो वा। तिस्रो महाव्याहृतयः पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः। इह तु मध्यमाया ग्रहणम्। महाव्याहृतेरिति किम्। भुवो विश्वेषु भुवनेषु। तिङन्तमेतद्भवतेः 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङ् सिप् शपि गुणाभावश्छान्दसः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। लाक्षणिकत्वादेवास्याग्रहणे सिद्धे महाव्याहृतिग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थम्, तेन ज्ञापयतीत्यादौ युक् सिध्यति। **भुव इति।** भुव इत्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः। **ओम।** अभ्यादानमारम्भः। तदाह **आरम्भ इति।**

'सदिरप्रतेः' इति षत्वम्। **अवो**—रक्षणम्। **भुवश्च म।** रुर्वा रेफो वा। महाव्याहृतोरिति किम्? भुवो विश्वेषु सवनेषु। भवतेः 'छन्दसि लुङ्लङ्लिट' इति वर्त्तमाने लङ्। सिप् शप्। अगुणश्छान्दसः। तत एवाऽडभावः। **ओम।** अभ्यादानम्—आरम्भः. तत्र वर्त्तमानस्येत्यर्थ इति वृत्तिः। 'न सुब्रह्मण्यायां'मिति सूत्रे कैयटस्तु 'सुब्रह्मण्यो'मित्यत्र 'ओमभ्यादाने' इति प्लुतोदात्तत्वं न भवति, तस्याऽयज्ञकर्मविषयत्वा'दिति वदन्नप्रारम्भेऽपि अनेन प्लुतमाह। अत एव शुद्धप्रणवजपेऽपि तं प्लुतमेव जपन्ति। अभ्यादानपदेनाऽयज्ञकर्मोच्यते इति तदाशयं वर्णयन्ति। प्लुतश्रुत्या 'अचः' इत्युपस्थितेरचः प्लुतः, मकारस्त्वर्द्धमात्र इति अर्धचतुर्थमात्रोऽयम्। **ये यज्ञकर्मणि।**

ये३यजामहे। यजेति किम्—ये यजामहे। ३६०८ प्रणवष्टेः। (८-२-८९) यज्ञकर्मणि टेरोमित्यादेशः स्यात्। अपां रेतांसि जिन्वतो३म्। टेः किम्—हलन्ते अन्त्यस्य माभूत्। ३६०९ याज्यान्तः। (८-२-९०) ये याज्या मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि। जिह्वामग्ने चकृषे हव्यवाहा३म्। अन्तः किम्—याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात्। सर्वान्तस्य चेष्यते। ३६१० ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः। (८-२-९१)

अत्र प्लुतश्रुत्याच्परिभाषोपस्थानादच एव प्लुतः। मकारस्त्वर्धमात्रः इति समुदायोऽध्यर्धतुर्यमात्रः संपद्यते। **ये यज्ञे**। ये इत्येतस्य यज्ञकर्मणि प्लुतो भवति। **प्रणवः**। यज्ञकर्मणीति वर्तते। यज्ञकर्मणि टेः प्रणवादेशः स्यात्। तदाह **यज्ञकर्मणीत्यादि**। **जिन्वतोमिति**। जिविः प्रीणनार्थः। लट् तिप्। टेः प्रणवादेशः। **टेः किमिति**। 'वाक्यस्य टेः—' इत्यतः टेरित्यनुवर्तमाने पुनष्टिग्रहणं किमर्थमिति प्रश्नः। असति हि टिग्रहणे 'अलोऽन्त्यस्य' इति वचनाट्टेः योऽन्त्योऽल् तस्यौकारः स्यात्। तस्मात्सर्वादेशार्थं टिग्रहणमित्याह **हलन्तेऽन्त्यस्य माभूदिति**। अजन्ते विशेषाभावाद्धलन्ते इत्युक्तम्। **याज्यान्तः**। **ये याज्या मन्त्रा इति**। याज्याकाण्डे पठ्यन्ते ये मन्त्रा याज्यानुवाक्याकाण्डमिति समाख्याते प्रकरणे ये मन्त्रा इत्यर्थः। **तेषामिति**। मन्त्राणामित्यर्थः। तासामिति पाठे तासां याज्यानाम्। इहेदमन्तग्रहणं टेरित्यस्य निवर्तकं वा स्याद्विशेषणं वा। आद्य चान्ते विशेषिते अजन्ताया एव याज्यायाः प्लुतः स्यात्। पक्षान्तरे त्वन्तग्रहणमनर्थकं टेरन्तत्वाव्यभिचारादित्यभिप्रायेणाह **अन्तः किमिति**। इतरोऽपि विदिताभिप्राय आह **याज्यानामृचामिति**।

यज्ञेतिकिम्? स्वाध्यायकाले माभूदिति। 'ये यजामहे' इत्यत्रैवाऽयं प्लुत इष्यते। तेनेह न— ये देवासो दिव्येकादश स्थः' इति। 'पित्र्यायां ये३स्वधा' इत्यत्रापि भवति, एतत्स्थानाऽऽपन्नत्वात्तस्य। **प्रणवष्टेः**। टिस्थानिकत्रिमात्र ओकार ओङ्कारो वा प्रणव इति भाष्यादौ स्पष्टम्। इदमाथर्वणप्रातिशाख्येऽपि स्पष्टम। टेरिति तु प्रातिशाख्योक्तटिस्थानिकत्वानुवादः। **हलन्ते इति**। तदभावे टेरित्यनुवृत्त्या तदन्त्यस्यैव स्यात्। व्यभिचाराऽभावाद्धि प्रणवः प्लुतत्वेन न विशेष्यते येनाऽच्परिभाषाप्रवृत्त्याऽदोषः स्यादिति भावः। **याज्या मन्त्रा इति**। 'याज्यानवाक्याकाण्ड'मिति समाख्यातप्रकरणस्था इत्यर्थः। **अन्तः किमिति**। 'यद्यन्तग्रहणं टेरित्यस्य निवृत्त्यर्थन्तदा प्लुतश्रुत्योपस्थितेनाऽचाऽन्ते विशेषितेऽजन्ताया एव याज्यायाः स्यात्, टिविशेषणत्वे त्वनर्थकम्, टेरन्तत्वाऽव्यभिचारादिति **प्रश्नः**। **ब्रूहि प्रे**। ब्रूहिस्थानापन्ने 'पित्र्यायाम-

एषामादेः प्लुतो यज्ञकर्मणि । अग्नयेऽनुब्रू३हि । अग्नये गोमयानि प्रे३ष्य । अस्तु श्रौ३षट् । सोमस्याग्ने वीही वौ३षट् । अग्निमा३वह । ३६११ अग्नीत्प्रेषणे परस्य च । (८-२-९२) अग्नीधः प्रेषणे आदेः प्लुतस्ततस्मात्परस्य च । ओ३श्रा३वय । ३६१२ विभाषा पृष्टप्रतिवचने हेः । (८-२-९३) प्लुतः । अकार्षीः कटम् । अकार्षं हि३ । अकार्षं हि । पृष्टेति किम्- कटं करिष्यति हि । हेः किम्-कटं करोति ननु । ३६१३ निगृह्यानुयोगे च । (८-२-९४) अत्र यद्वाक्यं तस्य टेः प्लुतो वा अद्यामावास्येत्यात्थ३ । अमावास्येत्येवंवादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुप्रयुज्यते । ३६१४ आम्रेडितं भर्त्सने । (८-२-९५) दस्यो३ दस्यो३ घातयिष्यामि त्वाम् । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । चौर३

याज्या नाम ऋचः काश्चिद्वाक्यसमुदायरूपाः तत्र यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति, स चान्तस्यैवेष्यते तदर्थमन्तग्रहणमिति भावः । **अग्नीत्प्रेषणे परस्य च** । अग्नीधः प्रेषणमग्नीत्प्रेषणं तदाह **अग्नीधः प्रेषण इति** । **विभाषा पृष्टप्रतिवचने** । विभाषा हेः प्लुतो भवति । **निगृह्य** । निगृह्येति ल्यबन्तम् । स्वमतात्प्रच्यावनं निग्रहः तस्यैव स्वमतस्य । एवं किल त्वं निरुपपत्तिकमात्थेति शब्देन प्रतिपादनमनुयोगः तत्र यद्वाक्यं तदाह **अत्र यद्वाक्यमिति** । निगृह्यानुयोगे यद्वाक्यमित्यर्थः । अद्यामावास्येत्येवं केनचित्प्रतिज्ञातं तमुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते । **अद्यामावास्येत्यात्थेति** । तदेव विवृणोति **अमावास्येत्येवमित्यादि** । **दस्यो३दस्यो३इति** । 'वाक्यादेरामन्त्रितस्य इत्यादिना द्विर्वचनम् । ननु द्विरुक्तसमुदाये परभागस्यैव प्लुतः प्राप्नोति न तु पूर्वस्य 'तस्य परमाम्रेडितम्' इति परभागस्यैवाम्रेडितसंज्ञाविधानाद् इष्यते द्वयोरपीत्याह **आम्रेडितग्रहणमित्यादि** । **द्विरुक्तोपलक्षणार्थमिति** । द्विरुक्तसमुदाये

नुस्वधा' इति प्रैषेऽपि प्लुतो भवति, एवं श्रौषट्स्थानापन्ने 'अस्तु स्वधे'ति प्रत्याश्रावणेऽपि भवति, एवं वौषडिति [वोषट्] वौषट् वौस्ट् वौत्ताडित्येवंविधसर्ववषट्काराणामुपलक्षणमिति हरदत्तः । 'आवह देवान् यजमाने'त्यादौ न प्लुतः, छन्दसि सर्वविधीनां वैकल्पिकत्वात् । **तस्मादिति** । आदिभूतादित्यर्थः । 'ओ३ श्रा३ वय' 'आ३ श्रा३ वय' इत्यनयोरेवायम् । नेह-'अग्निदमीन्विहरे'ति । प्लुतमात्रस्य वैकल्पिकत्वात्सिद्धमिदम् । आ३ स्व३धेति प्रत्याश्रावणे तत्स्थानापन्नत्वाद्भवत्येव । **पृष्टप्रतिवचनं** प्रश्नोत्तरम् । **निगृह्येति** ल्यबन्तम् । वादिनं स्वमतात्प्रच्याव्येत्यर्थः । **अनुयोगः** यस्मादसौ प्रच्यावितस्तस्य पक्षस्य शब्देन प्रकाशनम्-'एवन्त्वं निरुपपत्तिकमात्थे'ति । **आम्रेडितं भ** । ल्यबन्ते उदाहरणे 'वाक्यादेरामन्त्रितस्ये'ति द्वित्वम् ।

चौर३ । ३६१५ अङ्गयुक्तं तिङाकाङ्क्षम् । (८-२-९६) अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म । तिङ् किम्—अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षं किम्—अङ्ग पच । नैतदपरमाकाङ्क्षति । भर्त्सन इत्येव । अङ्गाधीष्व भक्तं तव दास्यामि । ३६१६ विचार्यमाणानाम् । (८-२-९७) वाक्यानां टेः प्लुतः । होतव्यं दीक्षितस्य गृहा३ इ । न होतव्य३मिति । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तु तत्त्वपरीक्षणं विचारः । ३६१७ पूर्वं तु भाषायाम् । (८-२-९८) विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नु३ रज्जुर्नु । प्रयोगापेक्षं पूर्वत्वम् । भाषाग्रहणात्पूर्वयोगश्छन्दसीति ज्ञायते । ३६१८ प्रतिश्रवणे च । (८-२-९९) वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । गां मे देहि भोः । हन्त ते ददामि ३ । नित्यः शब्दो भवितुमर्हति३ ।

भागद्वयोपलक्षणमित्यर्थः । एतच्चाम्रेडितस्य भर्त्सने वृत्त्यसंभवाल्लभ्यते । अङ्गयुक्तम् । आकाङ्क्षतीत्याकाङ्क्षं पचाद्यच् । तिङन्तमिति । आकाङ्क्षं तिङन्तमित्यर्थः । अङ्ग कूज३ इति । अङ्गशब्दोऽमर्षे । कूज अव्यक्ते शब्दे । लोण् मध्यमपुरुषैकवचनम् । ज्ञास्यसि जाल्मेति । कूजनफलमस्मिन्नेव क्षणे ज्ञास्यसीत्यर्थः । अङ्ग देवदत्तेति । अङ्गशब्दोऽनुनये । अङ्ग देवदत्तेत्येकं वाक्यम् । एतच्च मिथ्या वदस्येतदपेक्षते । विचार्यमाणानाम् । 'कोटिद्वयस्पृग्विज्ञानं विचार इति कथ्यते । विचार्यमाणस्तज्ज्ञानविषयीभूत उच्यते ।' इह तु विचार्यमाणविषयत्वाद्वाक्यानि विचार्यमाणानि । गृहा३इ इति । सप्तम्येकवचनान्तस्य गृहे इत्यस्य 'एचोऽप्रगृह्यस्ये'ति प्लुतविकारः । पूर्वं तु । पूर्वेणैव सिद्धे नियमार्थमिदम् । तुशब्दस्त्वर्थतोऽवधारणार्थः । यथैवं विज्ञायेत पूर्वमेव प्लुत इति मैवं विज्ञायि पूर्वं भाषायामेवेति । उदाहरणे नुशब्दो वितर्के । प्रतिश्रव । प्रतिश्रवणार्थमाह अभ्युपगमे इत्यादि । अङ्गीकारे इत्यर्थः । प्रतिज्ञाने इति । अत्रोभयत्रापि गतिसमासः । अर्थद्वयेऽपि

'वाक्यस्य टे'रित्यधिकारेप्यत्रानन्त्यस्य भवति । वाक्यादेरेव पदस्य भर्त्सने द्वित्वविधानात् । 'उपलक्षण'मिति । तत्रैकैकस्येत्यनुवृत्त्या पर्यायलाभः । अङ्गयुक्तम् । आकाङ्क्षतीत्याकाङ्क्षम्, पचाद्यच् । इदानीमिति । कूजनफलमिदानीमेव ज्ञास्यसीत्यर्थः । 'अङ्ग'शब्दोऽमर्षे । प्रत्युदाहरणे त्वनुनये । 'अङ्ग ! देवदत्त'त्येकं वाक्यम् । एतच्च 'मिथ्या वदसी'त्येतदपेक्षते । विचार्य्य । कोटिद्वयस्पृग्ज्ञानं विचारः, तादृशज्ञानविषयीभूतो विचार्यमाणः । इह तु विचार्यमाणार्थविषयत्वाद्वाक्यानि विचार्यमाणानि । गृहा३ इ इति । गृहेशब्दस्य प्लुतविकारः । पूर्वन्तु । पूर्वमेवेत्यर्थः । उदाहरणे 'नु' शब्दो वितर्के । प्रतिश्रवणम्=अभ्युपगमः, प्रतिज्ञानम्, श्रवणाभि-

दत्त किमात्थ३। ३६१९ **अनुदात्तं प्रश्नान्ताभिपूजितयोः**। (८-२-१००) अनुदात्तः प्लुतः स्यात्। दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते। अग्निभूत३ इ। पट३ उ। अग्निभूते पटो—एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः। शोभनः खल्वसि माणवक३। ३६२० **चिदिति चोपमार्थे प्रयुज्यमाने**। (८-२-१०१) वाक्यस्य टेरनुदात्तः प्लुतः। अग्निचिद्भायात्३त्

प्रतिपूर्वः शृणोतिः प्रसिद्धः। **आभिमुख्ये चेति**। अत्र 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः। **दत्त किमात्थ३ इति**। किं ब्रूषे इत्येव पृच्छ्यते। अत्र श्रवणाभिमुख्यं गम्यते। **अनुदात्तं प्रश्नान्त**। प्रश्नवाक्ये यच्चरमं प्रयुज्यते स प्रश्नान्तः। नानेन प्लुतो विधीयते किं तु दूराद्धूतादिषु विहितस्य प्लुतस्योदात्तत्वे प्राप्ते प्रश्नान्ताभिपूजितयोरनुदात्तत्वगुणमात्रं विधीयते। तदाह **दूराद्धूतादिष्विति**। तत्रैषा वचनव्यक्तिः। प्रश्नान्ते अभिपूजिते च यः प्लुतः सोऽनुदात्तो भवतीति। तत्राभिपूजिते 'दूराद्धूते च' इति प्लुत इति। इतरत्र तु अनन्त्यस्यापि 'प्रश्नाख्यानयोः' इति। **अग्निभूत३इ इति। पट३ उ इति**। अगमः पूर्वान् ग्रामान् इत्येतद्वाक्यम् अग्निभूते पटो इत्यनन्तरेण समाप्तं तत्र अगम इत्येवमादीनामनन्त्यस्यापि 'प्रश्नाख्यानयोः' इति स्वरितः प्लुतः। अग्निभूते पटो अनयोरनुदात्तः। अभिपूजिते उदाहरणमाह **शोभनः खल्वसीत्यादि**। **चिदिति चोप**। चिदित्येतन्निपाते उपमानेऽर्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवतीत्यर्थः। प्लुतोऽप्यत्राविधीयते न गुणमात्रम्। इतीति किम्? अक्रियमाणे तस्मिन्नुपमानेऽर्थे कस्मिंश्चिच्छब्दे प्रयुज्यमाने चिच्छब्दः प्लुत इति विज्ञायते। इतिशब्दे तु सति प्रयुज्यमाने इत्येतच्चिच्छब्दस्य विशेषणं प्लुतस्तु 'वाक्यस्य टेः' इत्यधिकारात्तस्यैव भवतीति मनसि विभाव्योदाहरणमुखेनाह **अग्निचिद्व भायादिति**। अत्र न चिच्छब्दस्य प्लुतः किं तु भायादित्यस्यैव। अक्रियमाणे तु इतिशब्दे चिच्छब्दस्यैव

मुख्ये च। **हन्त ते इति**। प्रार्थिताङ्गीकारो गम्यते। आद्ययोरर्थयोः प्रतिश्रवणशब्दे गतिसमासः, तृतीये 'लक्षणेनाभिप्रती' इति अव्ययीभावः। क्रमेणोदाहरणानि। **अनुदात्तं प्र**। प्रश्नवाक्ये यच्चरमं प्रयुज्यते स प्रश्नान्तः। **दूराद्धूतादिष्विति**। प्रश्नान्ताभिपूजितयोर्यः प्लुतः सोऽनुदात्तो भवतीत्यर्थादिति भावः। तत्राऽभिपूजिते 'दूराद्धूते चे'ति प्लुतः। इतरत्र 'अनन्त्यस्यापि प्रश्नाख्यानयो'रिति। आद्योदाहरणे 'अगमः पूर्वा३न् ग्रामान्' इत्यादिः। **टेरनुदात्त इति**। 'अगम' इत्यादौ अनन्त्यस्यापी'ति प्लुतः स्वरितः। **प्लुत इति**। स च पूर्वभागस्य, उत्तरस्य तु उदात्ताविदुतौ

अग्निरिव भायात्। उपमार्थे किम्—कथंचिदाहुः । प्रयुज्यमाने किम्—अग्निर्माणवको भायात्। ३६२१ उपरिस्विदासीदिति च ।(८-२-१०२) टेः प्लुतोऽनुदात्तः स्यात्। उपरिस्विदासी३त् । अधः स्विदासी३दित्यत्र तु 'विचार्यमाणानाम्' (३६१६) इत्युदात्तः प्लुतः। ३६२२ स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु। (८-२-१०३) स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । असूयायाम्—अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम्। संमतौ—अभिरूपक ३ अभिरूपक शोभनोऽसि। कोपे—अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने—शाक्तीक ३ शाक्तीक रिक्ता ते शक्तिः । ३६२३ क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् । (८-२-१०४) आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यादाचारभेदे। स्वयं ह रथेन याति३। उपाध्यायं पदातिं गमयति। प्रार्थनायाम्—पुत्रांश्च लप्सीष्ट ३ धनं च तात। व्यापारणे। कटं कुरु ३ ग्रामं गच्छ। आकाङ्क्षं किम्—दीर्घायुरसि अग्नीदग्नी-

---

प्लुतः स्यात्। अग्निचिद्भाया३दित्यत्र न स्यादिति भावः। **कथंचिदिति**। अत्र कष्टे चिच्छब्दः। **अग्निर्माणवको भायादिति**। अग्निरिव माणवको दीप्यत इत्यर्थः। अत्रोपमानार्थस्य गम्यमानत्वादस्ति चिच्छब्दस्य प्रतीतिः। प्रयोगस्तु नास्ति। यद्यन्येषामप्युपमानार्थानामिवादीनामस्ति प्रतीतिस्तथापि चिच्छब्दस्यापि तावदस्तीति भावः। **उपरिस्विदासीदिति**। अत्रापि विचार्यमाणानामिति विहितस्य प्लुतस्य गुणमात्रं विधीयते। **स्वरितमाम्रेडिते**। उदाहरणे सर्वत्र 'वाक्यादेरामन्त्रितस्ये'ति द्विर्वचनम्। **क्षियाशीः**। क्षिया आचारोल्लङ्घनम्। इष्टाशंसनमाशीः। **दीर्घायुरसि अग्नीदग्नीन्विहरेति**। क्षियायां तु न प्रत्युदाहृतं नित्यसाकाङ्क्षत्वात्। न हि स्वयं ह रथेन यातीत्युक्ते आचारभेदो गम्यते किं तर्हि उपाध्यायं पदातिं गम-

---

भवतः। 'अग्निचि'दिति व्याचष्टे **अग्निरिवेति**। **कथञ्चिदिति**। कृच्छ्रेऽत्र चिच्छब्दः। **अग्निर्माणवक इति**। अग्निरिव माणवको दीप्येतेत्यर्थः। यद्यप्यन्येषामप्युपमार्थानामिवादीनामस्ति प्रतीतिस्तथापि चिच्छब्दस्याप्यस्ति इति स्यादेव प्लुतः, प्रयोगाऽभावात्तु नेति भावः। चः प्लुतसमुच्चयार्थः। एतदेव ज्ञापयति—'पूर्वसूत्रे गुणमात्रं विधीयते' इ[ती]ति बोध्यम्। **उपरिस्वि**। अनेन 'विचार्यमाणाना'मिति विहितप्लुतस्यानुदात्तत्वमात्रं विधीयत इति हरदत्तः। 'उपरी'त्यादेः कृत्यं दर्शयति **अधःस्विदिति**। **स्वरितमा**। उदाहरणे 'वाक्यादेरामन्त्रितस्ये'ति द्वित्वम्। अयमपि प्लुतो वैकल्पिकः। **क्षियाशीः**। **क्षिया** आचारोल्लङ्घनम्। इष्टप्रार्थनम्=

न्विहर। ३६२४ अनन्त्यस्यापि प्रश्नाख्यानयोः। (८-२-१०५) अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः। अगमः३ पूर्वां३न् ग्रामा३न्। सर्वपदानामयम्। आख्याने—अगम३म् पूर्वां३न् ग्रामा३न्। ३६२५ प्लुतावैच इदुतौ। (८-२-१०६) दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ३तिकायन। औ३पगव। चतुर्मात्रावत्र ऐचौ संपद्येते। ३६२६ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्याऽऽदुत्तरस्येदुतौ। (८-२-१०७) अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः। * प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव। प्रश्नान्ते—अगमः३ पूर्वां३न् ग्रामा३न् अग्निभूत३ इ। अभिपूजिते—करोषि पट३ उ। विचार्यमाणे—होतव्यं दीक्षितस्य गृह३ इ। न होतव्य३मिति। प्रत्याभिवादे—आयुष्मानेधि अग्निभूत३ इ। याज्यान्ते—स्तोमैर्विधेमाग्नया३ इ। परिगणनं

यतीत्युक्तं। प्लुतावै। उदाहरणे 'गुरोरनृतः—' इति प्लुतः। चतुर्मात्राविति। ऐचौ समाहारवर्णौ तत्र मात्रा अवर्णस्य मात्रेवर्णोवर्णयोः। तत्र इदुतोः प्लुते कृते तयोस्तिस्रो मात्रा अवर्णस्य चैका मात्रेति समुदायश्चतुर्मात्र इत्यर्थः। नन्वत्रार्धमात्राऽवर्णस्याध्यर्धमात्रेवर्णोवर्णयोरिति। मतेऽर्धचतुर्थमात्रावप्यैचौ प्राप्नुतः। सत्यम्, 'चतुर्मात्रः प्लुत इष्यते' इति भाष्यात् समविभाग एवात्राश्रीयत इति भावः परिगणनमाह प्रश्नान्तेत्यादि। 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' अनन्त्यस्यापि 'प्रश्नाख्यानयोः' इति चानुदात्तः स्वरितो वा प्लुतः। अभिपूजिते 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' इति प्लुतः। विचार्यमाणे 'विचार्यमाणानाम्' इति प्लुतः। प्रत्य-

---

आशीः। प्रैषः=प्रेषणम्। उदाहरणेषु पूर्वतिङन्तमुत्तरमाकाङ्क्षति। अनन्त्यापि प्र। आद्योदाहरणे 'भो अग्निभूता३ इ'इति शेषः। तत्रान्त्यस्य तु 'अनुदात्तं प्रश्नान्ताभिपूजितयो'रिति अनुदात्तोऽपि पक्षे इति वृत्तिः। यद्यपि तत्र विकल्पो न श्रुतस्तथाप्यपिशब्देनान्त्यस्याप्यनेन स्वरितप्लुतविधानात्पाक्षिकत्वं फलति। आख्यानम्—प्रश्नस्योत्तरम्। तदवयवाविति। वचनसामर्थ्याद्वर्णैकदेशयोरिह ग्रहणम्। उदाहरणे दूराद्धूते 'गुरोरनृत' इति प्लुतः। चतुर्मात्राविति। ऐचोर्मात्राऽवर्णस्य मात्रेवर्णोवर्णयोरिति उत्तरखण्डस्य त्रिमात्रत्वे चतुर्मात्रतेति भावः। स्पष्टञ्चेदं भाष्ये। अत्र चतुर्मात्रस्याऽच्त्वमपि, तेन प्रत्यङ्ङैतिकायनेत्यादौ ङमुडादि सिध्यतीति बोध्यम्। याज्यान्तेष्वेवेति। अनेनास्य परिगणनत्वं दर्शयति। 'पूर्वार्धस्य आ'दिति च्छेदः। अत्राऽऽकारः प्लुतः स प्रश्नान्तेऽनुदात्तः, स्वरितो वा, शेषेषूदात्त

किम्– विष्णुभूते घातयिष्यामि त्वाम्। अदूराद्धूत इति न वक्तव्यम्। पदान्तग्रहणं तु कर्तव्यम्। इह मा भूत्। भद्रं करोषि गौरिति। अप्रगृह्यस्य किम्–शोभने माले। * **आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः।** अग्ना३ इ पत्नी वः। **३६२७ तयोर्य्वावचि संहितायाम्। (८-२-१०८)** इदुतोर्यकारवकारौ स्तोऽचि संहितायाम्। अग्ना३ याशा। पटा३ वाशा। अग्ना३ यिन्द्रम्। पटा३ वुदकम्। अचि किम्– अग्ना३ इ वरुणौ। संहितायां किम्–अग्ना३ इ इन्द्रः। संहितायामित्यध्यायसमाप्तेरधिकारः। इदुतोरसिद्धत्वादय-

---

भिवादे 'प्रत्यभिवादेऽशूद्रे' इति प्लुतः। याज्यान्ते 'याज्यान्ते' इति प्लुतः। **विष्णुभूते इति।** नन्विदं परिगणनस्योदाहरणमयुक्तं यावता सूत्रे एवादूराद्धूत इत्युच्यते अत आह **अदूराद्धूत इति न वक्तव्यमिति।** अन्यार्थमवश्यं कर्तव्ये परिगणने तेनैव सिद्धत्वाद् अदूराद्धूत इति न वक्तव्यम्। **भद्रं करोषि गौ३रिति।** अत्रासर्वनामस्थान इति प्रतिषेधात्सौ परतः पूर्वपदं न भवति। **शोभने माले३ इति।** 'ईदूदेद्–' इति प्रगृह्यसंज्ञा। **आमन्त्रिते इति।** अप्राप्ते एव प्लुते वचनम्। **अग्न३ इ इति।** अग्निशब्दस्य संबुद्धौ रूपं 'सामन्त्रितम्' इति आमन्त्रितसंज्ञा। **तयोर्य्वा।** नन्विदं व्यर्थम् 'इको यणचि' इत्यनेनैव सिद्धमत आह **इदुतोरसिद्धत्वादिति।** ननु सिद्धः प्लुतः स्वरसन्धिषु कथं ज्ञायते। 'प्लुतप्रगृह्या अचि–' इति प्रकृतिभावविधानात्। यस्य हि विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः,

---

इति बोध्यम्। इदुतौ 'उदात्त' इत्यधिकारादुदात्तावेव। व्याख्यानादुदात्तग्रहणं प्लुतेनेदुद्भ्यां संबध्यते। प्लुतपदं च अत एवाऽऽद्ग्रहणेनैव संबध्यते, नेदुद्भ्याम्। **अदूराद्धूत इति न वक्तव्यमिति।** परिगणनसत्त्वे तेनैव सिद्धत्वादिति भावः। इदञ्च **भाष्यानुरोधेन। केचित्तु** परिगणनेऽपीदं कार्यमेव। अत्र दूराद्धूतपदं न संबोधनमात्रोपलक्षणम्, किं तु यथाश्रुतमेवेति दूरादाह्वानसंबोधनविशिष्टाभिपूजितार्थे 'स्वागच्छ भो माणवकाग्निभूते' इत्यादौ नाऽस्य प्रवृत्तिरिति न परिगणनेन प्रत्याख्यानं युक्तम्। 'अदूराद्धूत इति न वक्तव्य'मित्यनुक्त्या भाष्यात्तथैव लाभादित्याहुः। **गौ३रिति।** 'सावपि पद'मिति पक्षे वाक्यान्तत्वाऽभावाच्च दोषः। पदशब्देन वाक्यमप्युच्यत इति बोध्यम्। **आमन्त्रिते छन्दसीति।** अप्राप्ते प्लुतविकारे इदम्। दूरादाह्वानसत्त्वेऽपरिगणनाच्चाऽप्राप्तिः। प्लुतस्तु 'गुरोरनृत–' इति प्राप्तस्यैव। तेन वाक्यान्तपदाऽनन्त्यस्यैव प्लुत इत्यत्र तु न मानम्। **तयोर्य्वा। तयोः**=पूर्वसूत्राभ्यां विहितयोरिदुतोरित्यर्थः। ननु 'इको यणची'त्येव सिद्धे इदं व्यर्थमत आह **इदुतोरसिद्धत्वादिति।** ननु प्लुतस्य प्रकृतिभावविधानात्सामान्यापेक्षज्ञापकात्

मारम्भः सवर्णदीर्घत्वस्य शाकल्यस्य च निवृत्त्यर्थः । यवयोरसिद्धत्वाद् 'उदात्त-स्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (३६५७) इत्यस्य बाधकमेवं वा । ३६२८

प्लुतस्यासिद्धत्वे न तस्य स्वरसन्ध्याख्यो विकारः प्राप्नोति । अस्तु प्लुतः सिद्धः । किमायातमिदुतोः ? उच्यते । प्लुतकरणे यत्कार्यं तत्स्वरसन्धिषु सिद्धमिति सामान्येन ज्ञापकमाश्रयिष्यते, ततश्चेदुतोरपि सिद्धत्वात्सिद्ध एव यणादेशोऽत आह **सवर्ण-दीर्घत्वस्येति** । यदीदं नोच्यत अग्न३ इ इन्द्रम्, पट३ उ उदकमित्यत्र षाष्ठिकं यणादेशं बाधित्वा सवर्णदीर्घः स्यात् । अग्न३ याशेत्यादौ च 'इकोऽसवर्णे शाकल्यस्य-' इति प्रकृतिभावः स्यात्तद्बाधनार्थमिदं वक्तव्यमेव । ननु च तन्निवृत्तये यत्नान्तरमस्ति किं पुनस्तत्प्लुतस्य यणादेशो वक्तव्यः सवर्णदीर्घनिवृत्त्यर्थः शाकल-निवृत्त्यर्थश्च । तच्चावश्यं वक्तव्यं य इक् प्लुतपूर्वः न च प्लुतविकारः भो इ इन्द्रं भो इ यिन्द्रं गायतीति भोशब्दस्य छान्दसः प्लुतः, ततः परस्येकारस्य निपातत्वात् प्रकृतिभावे प्राप्ते तं बाधित्वा यणादेशः । तदेवं तस्यावश्यंकर्तव्यत्वेनैव यणा सिद्धेऽत आह **यवयोरिति** । तथाचोक्तं वृत्तिकृता—'किं तु यणा भवतीह न सिद्धं प्लाविदुतोर्यदयं विदधाति । तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ । इक् च यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् । तेन तयोश्च न शाकल-दीर्घौ यणास्वरबाधनमेव तु हेतुः' । अयमर्थः । 'इको यणचि' इति यणादेशेन किं रूपं प्रसिध्यति यतोऽयमाचार्यः इदुतोर्यवौ विदधाति तौ चेदुतौ स्वरसन्धिषु सिद्धौ । ममेति सूत्रकारैकीभूतस्य वचनम् । एवं चोदिते परिहरति—**शाकलदीर्घविधी तु निवर्त्याविति** । शाकलस्येदं शाकलं 'कण्वादिभ्यो गोत्रे' इत्यण् । पुनश्चोदयति—इक् च यदेति । वार्तिककारोऽपि इकः प्लुतपूर्वस्य यणं विदधाति । स च प्रकृतिभाव-स्येव शाकलदीर्घविध्योरप्यपवादः । ततश्च तेनैव यणा एतयोरपि इदुतोः शाकल-दीर्घौ न भविष्यति इति नार्थ एतेन । परिहरति । **यणः स्वरेति** । यणस्वरबाध-

---

प्लुतप्रकरणीयकार्यस्य स्वरसन्धिषु सिद्धत्वज्ञापनेन सिद्धो यणत आह **सवर्णदीर्घ-त्वस्येति** । 'अग्ना३ इ इन्द्र'मित्यादौ । **शाकल्यस्य वेति** । 'अग्ना३ याशे'त्यादौ । **शाकल्यम्**—'इकोऽसवर्णे' इति प्रकृतिभावः । ननु भो इ इन्द्रेति स्थिते भोःशब्दस्य छान्दसे प्लुते ततः परस्येकारस्य निपातत्वात्प्रकृतिभावे प्राप्ते यणादेशार्थम् 'इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः, सवर्णदीर्घशाकलनिवृत्त्यर्थ'मिति वचनमावश्यकम् । न च तत्राऽनेन सिद्धिः, इकः प्लुतविकारत्वाऽभावात् । एवञ्च तेनैव यणिसद्धोऽत आह **यवयोरसिद्धत्वादुदात्तेत्यादि** । तेन हि यणि तस्य सिद्धत्वादयं स्वरो दुर्वार इति भावः । यद्यपीह प्लुतप्रकरणे बहूनि सूत्राणि लोकवेदसाधारणानि तथापि

मतुवसो रु संबुद्धौ छन्दसि । (८-३-१) रु इत्यविभक्तिको निर्देशः । मत्वन्तस्य वस्वन्तस्य च रुः स्यात् । 'अलोऽन्त्यस्य' (४२) इति परिभाषया नकारस्य । इन्द्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । 'छन्दसीरः' (३६००) इति वत्वम् । ३६२९ दाश्वान्साह्वान्मीढ्वांश्च । (६-१-१२) एते क्वस्वन्ता निपात्यन्ते । मीढ्वस्तोकाय तनयाय । * वन उपसंख्यानम् । क्वनिब्वनिपोः सामान्यग्रहणम् । अनुबन्धपरिभाषा तु नोपतिष्ठते । अनुबन्धस्येहानिर्देशात् । यस्त्वायन्तं वसुना प्रातरित्वः । इणः क्वनिप् । ३६३० उभयथर्क्षु । (८-३-८) अम्परे छवि नकारस्य रुर्वा । पशूंस्तांश्चक्रे । ३६३१

नार्थत्वमेव हेतुः सूत्रारम्भस्येति । **मतु** । अनुबन्धपरित्यागेन सकारान्तस्य वस् इत्यस्य मतुपा सह द्वन्द्वः । अल्पाच्तरस्यापि सौत्रः परनिपातः । **मरुत्व इति** । मरुतो यस्य सन्तीति मतुप् । 'झयः' इति वत्वं 'तसौ मत्वर्थे' इति भत्वाज्जश्त्वं न । **हरिवो मेदिनमिति** । हरयो विद्यन्ते यस्येति मतुप् । हरिच्छब्दात्संबुद्ध्येकवचने 'उगिदचाम्–' इति नुम् । हल्ङ्यादिलोपे संयोगान्तलोपे च कृते नकारस्य रुः 'संयोगान्तलोपो रुत्वे सिद्धो वक्तव्यः' इति वचनाद् 'हशि च' इत्युक्तम् । प्रसङ्गादाह **दाश्वानिति** । **क्वनिब्वनिपोः सामान्येन ग्रहणमिति** । अनुबन्धनिर्देशात्तदनुबन्धकपरिभाषाया अनुपस्थानात् क्वनिपोऽपि ग्रहणम् । **प्रातरित्व इति** । प्रातरेतीति इणः 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप् । 'ह्रस्वस्य पिति कृति तुक्' । तदाह **इणः क्वनिबिति** । **उभयथा** । 'नश्छव्यप्रशान्' इति वर्तते । तेनैव प्राप्ते विकल्पार्थं वचनम् । **पशूंस्तांश्चक्रे इति** । पशून् तानिति स्थिते नस्य रुः । पूर्वत्र

तस्य वैकल्पिकत्वेन लोके तदादराऽभावाद्वेदे च तदादराद्वैदिकग्रन्थमेव लिखितानीति ध्येयम् । **मतुवसो रु** । पदस्येति वर्तते । प्रसङ्गादाह **दाश्वानिति** । दाशेः क्वसावद्वित्वमनिट्त्वञ्च निपात्यते । 'षह मर्षणे' इत्यस्य परस्मैपदं क्वसुरद्वित्वमनिट्त्वमुपधादीर्घत्वं च निपात्यते । 'मिह सेचने' इत्यस्मात्क्वसावद्वित्वमनिट्त्वं च निपात्यते । सूत्रे एकवचनमतन्त्रम् । 'दाश्वांसः', 'दाशुषः सुत'मिति प्रयोगदर्शनात् । यद्यपीदं लोकवेदसाधारणं तथापि लोके प्रयोगप्राचुर्याऽभावादत्रैवोदाहृतम् । **मीढ्व इति** । अत्र 'मतुवसो'रिति रुत्वम् । 'अत्रानुनासिकः' इत्यादि वसो रुत्वे फलम् । **अनुबन्धस्येहेति** । अत एव 'वनो र चे'ति सूत्रे सामान्यग्रहणमुक्तम् । एवञ्च 'दृश्वा'वीही'त्यादौ सामान्यग्रहणस्य निर्बाधत्वे 'जहातेः ककारः सामान्यग्रहणनिर्वाहार्थ' इति प्राचां ग्रन्थाश्चिन्त्याः । **इणः क्वनिबिति** । प्रातरेतीत्यर्थे 'अन्येभ्योऽपि दृश्यन्ते'

दीर्घादटि समानपादे । (८-३-९) दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नाटौ एकपादस्थौ स्याताम् । देवाँ अच्छा सुमती । महाँ इन्द्रो य ओजसा । उभयथेत्यनुवृत्तेर्नेह । आदित्यान्याचिषामहे । ३६३२ आतोऽटि नित्यम् । (८-३-३) अटि परतो रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः । महाँ इन्द्रः । तैत्तिरीयास्तु अनुस्वारमधीयते । तत्र छान्दसो व्यत्यय इति प्राञ्चः । एवं च सूत्रस्य फलं चिन्त्यम् । ३६३३ स्वतवान्पायौ (८-३-११) रुर्वा । भुवस्तस्य स्वतवाँः पायुरग्ने । ३६३४ छन्दसि वाऽप्राम्रेडितयोः । (८-३-४९) विसर्गस्य सो वा स्यात् कुप्वोः, प्रशब्दमाम्रेडितं च वर्जयित्वा । अग्ने त्रातर्ऋतस्कविः । गिरिर्न विश्वतस्पृथुः । नेह, वसुनः पूर्व्यस्पतिः । अप्रेत्यादि किम्—

'अत्रानुनासिकः—' इति वा नुनासिकः । उत्तरत्र तु 'आतोऽटि नित्यम्' इत्यनुनासिकः । रेफस्य विसर्गः । तस्य 'विसर्जनीयस्य' इति सः । **दीर्घादटि समानपादे** । एकपर्यायः समानशब्दस्तदाह **तौ चेन्नाटावेकपादस्थाविति** । नाटौ नकाराटौ । **देवाँ अच्छा । महाँ इन्द्रो इति** । देवान् अच्छा महानिति नस्य रुः । 'आतोऽटि नित्यम्' इति नित्यमनुनासिकः । **नेहेति** । एतेन महान् हि स इति बह्वृचानां पाठोऽपि व्याख्यातः । आकरे तु महां हीत्युदाहृतं तच्छाखान्तरे अन्वेषणीयम् । **एवं चेति** । विकल्पस्यैव व्यवस्थिततया प्रकृतसूत्रत्यागेन महल्लाघवं सूत्रारम्भे तु व्यत्ययोऽपि शरणीकरणीय इति महान् क्लेश इति भावः । **स्वतवान्** । स्वतवानित्येतस्य नकारस्य रुर्वा पायुशब्दे परे । **स्वतवा इति** । तु वृद्धौ सौत्रो धातुः ततोऽसुन् । स्वं तवो यस्यासौ स्वतवान् । 'दस्स्ववःस्वतवसां छन्दसि' इति नुम् ।

इत्यनेन । ह्रस्वस्य तुक् । **नस्येति** । नान्तपदस्येत्यर्थः । **एकपादेति** । ऋच्विति प्रकृतत्वादृक्पाद एवेह गृह्यते । समानशब्द एकार्थीयः । **देवाँ अच्छेति** । वक्ष्यमाणेन 'आतोऽटि' इत्यनेनाऽनुनासिकः । **उभयथेति** । एवञ्चाऽटि समानपाद इति व्यर्थम्, छन्दस्यापाद्यमानरुत्वाऽभावात् । एतेन 'महान् हि सः' इति बह्वृचानां पाठो व्याख्यातः । आकरे तु 'महाँ ही'त्युदाहृतम्, तच्छाखान्तरेऽन्वेष्टव्यम् । भिन्नपादेऽपि क्वचिद्दृश्यते तत्तत्परीत्या छन्दस्त्वाद्बोध्यम् । **आतः** । आकारस्य । **महाँ इन्द्र इति** । 'दीर्घादटि' इति रुत्वम् । **एवञ्चेति** । सर्वविकल्पानां छन्दसि व्यवस्थिततया प्रकृतसूत्रत्यागे महल्लाघवम् । सूत्रारम्भे तु व्यत्ययः शरणीकर्तव्य इति महान् क्लेश इति भावः । तुधातोरसुन् । स्वन्तवो यस्यासौ **स्वतवान्** । 'दस्स्ववःस्वतवसां छन्दसी'ति नुम् । **छन्दसि वा** । व्यवस्थितविकल्पेनैव सिद्धे'ऽप्रे' त्यादि स्पष्टार्थम्,

अग्निः प्र विद्वान्। परुषः परुषः। ३६३५ कःकरत्करतिकृधिकृतेष्वनदितेः। (८-३-५०) विसर्गस्य सः स्यात्। प्रदिवो अपस्कः। यथा नो वस्यसस्करत्। सुपेशसस्करति। उरुणस्कृधि। सेमं न चारुं मघवत्सु नस्कृतम्। अनदितेरिति किम्—यथा नो अदितिः करत्। ३६३६ पञ्चम्याः परावध्यर्थे। (८-३-५१) पञ्चमीविसर्गस्य सः स्यादुपरिभवार्थे परिशब्दे परतः। दिवस्परि प्रथमं जज्ञे। अध्यर्थे किम्—दिवस्पृथिव्याः पर्योजः। ३६३७ पातौ च बहुलम् (८-३-५२) पञ्चम्या इत्येव। सूर्यो नो दिवस्पातु। ३६३८ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु। (८-३-५३) वाचस्पतिं विश्वकर्माणम्। दिवस्पुत्राय सूर्याय। दिवस्पृष्ठं भन्दमानः। तमसस्पार-

---

परुषः परुष इति। वीप्सायां द्विर्वचनम्। कः करत्। करिति कृञो लुङ् 'मन्त्रे घस–' इत्यादिना च्लेर्लुक् तिपि गुणः। हल्ङ्यादिलोपः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। करदिति कृञ एव लुङ्। 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ्। 'ऋदृशोऽङि–' इति गुणः। करतीति लट् व्यत्ययेन शप्। कृधीति लोट् सेर्हिः। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः। कृत इति कृञ एव क्तः। पर्योज इति। अत्र परिः सर्वतोभावे। पातौ च। क्वचित्पठ्यते पताविति। धातुनिर्देश इति। अन्ये तदाहरणस्यार्थोऽनया लोडन्तानुकरणं मन्यन्ते। षष्ठ्याः। वाच-

---

एवमुत्तरसूत्राण्यपि। करिति। कृञो लुङ्। 'मन्त्रे घसे'ति च्लेर्लुक्। तिपि गुणः। तिपो हल्ङ्यादिलोपः। 'बहुलं छन्दसी'त्यडभावः। करदिति। कृञ एव लुङ्। 'कृमृद' इति च्लेरङ्। करतीति। लट्। व्यत्ययेन शप्। कृधीति। कृञो लोट्। सेर्हिः। 'बहुलं छन्दसी'ति शपो लुक्, छान्दसत्वाद्विकरणाऽभावो वा। 'श्रुशृणुपृकृवृभ्यः' इति हेर्धिः। कृतमिति। कृञः क्तः। सः स्यादिति। षत्वस्याप्युपलक्षणम्। अत एवाऽदिति प्रतिषेधः। यत्र तु 'शं नः कर'दित्यादौ सत्वं न दृश्यते तत्र छान्दसत्वात्सत्वाऽभावो बोध्यः। पञ्चम्याः प। अध्यर्थे इति परेर्विशेषणम्। दिवस्परीति। दिव उपरीत्यर्थः। व्यत्ययेन षष्ठीस्थाने पञ्चमी। पर्योज इति। अत्र परिः सर्वतोभावे। पातौ च। न च भवति–'परिषदः पातु'। पाताविति लोडन्तं 'पातु' इत्यस्याऽनुकरणम्। षष्ठ्याः प। षष्ठीविसर्गस्य सादेशः पत्यादिषु परेषु। वाचस्पत्यादौ—'तत्पुरुषे कृती'त्यलुक्। षष्ठ्या इति किम्? मनुः पुत्रेभ्यो

मस्य। परिवीत इळस्पदे। दिवस्पयो दिधिषाणाः। रायस्पोषं यजमानेषु। ३६३९ इडाया वा। (८-३-५४) पतिपुत्रादिषु परेषु। इळायास्पुत्रः। इळायाः पुत्रः। इळायास्पदे। इळायाः पदे। 'निसस्तपतावनासेवने' (२४०३) निसः स-कारस्य मूर्धन्यः स्यात्। निष्टप्तं रक्षो निष्टप्ता अरातयः। अनासेवने किम्—निस्त-पति। पुनःपुनस्तपतीत्यर्थः। ३६४० युष्मत्तत्ततक्षुष्वन्तःपादम्। (८-३-१०३) पादमध्यस्थस्य सस्य मूर्धन्यः स्यात्तकारादिषु परेषु। युष्मदादेशाः त्वंत्वातेतवाः। त्रिभिष्ट्वं देव सवितः तेभिष्ट्वा। अभिष्टे। अप्स्वंग्ने सधिष्टव। अग्निष्टद्विश्वम्। द्यावा पृथिवी निष्टतक्षुः। अन्तःपादं किम्—तद्ग्निस्तदर्यमा। यन्मे आत्मनो मिन्दाभूदग्निस्तत्पुनराहाजातवेदा विचर्षणिः। अत्राग्निरिति पूर्व-पादस्यान्तो न तु मध्यः। ३६४१ यजुष्येकेषाम्। (८-३-१०४) युष्मत्त-त्ततक्षुषु परतः। सस्य मूर्धन्यो वा। अर्चिभिष्ट्वम्। अग्निष्टे अग्रम्। अर्चिभि-ष्टतक्षुः। पक्षे अर्चिभिस्त्वमित्यादि। ३६४२ स्तुतस्तोमयोश्छन्दसि। (८-३-१०५) नृभिष्टुतस्य नृभिः स्तुतस्य। गोष्टोमम्। गोस्तोमम्। पूर्व-पदादित्येव सिद्धे प्रपञ्चार्थमिदम्। ३६४३ पूर्वपदात्। (८-३-१०६)

स्पतिमिति। 'तत्पुरुषे कृति बहुलम्' इति षष्ठ्यलुक्। निसस्तपता। आसे-वनं पौनःपुन्यं ततोऽन्यस्मिन्नित्यर्थः। युष्मत्तत्ततक्षुष्विति। सकारान्तानुकर-णात् परस्य सुप्सकारस्य 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति षत्वम्। 'ह्रस्वात्तादौ—' इत्यतः तादाविति वर्तते। तदाह तकारादिष्विति। एतद्युष्मद एव विशेषणं नेतरयोरव्यभिचारात्। त्वं त्वा ते तव इति। एतेषामेव संभव इत्यर्थः। स्तुत-स्तोमयोः। एतयोः परतः सस्य षत्वं स्यात्। पूर्वपदादित्येव सिद्ध इति।

दायमिति। इडाया इति षष्ठ्यन्तानुकरणम्। पत्यादयनुवर्तते। निसस्तपता। अस्य लोकवेदसाधारणत्वादत्रोपन्यासश्चिन्त्यः। उदाहरणे सकृत्तप्तमित्यर्थः। युष्म-त्तत। 'ह्रस्वात्तादौ—' इत्यतस्तादाविति वर्तते। तच्च युष्मदो विशेषणम्, नेतरयोः, अव्यभिचारात्। ततक्षुष्ष्विति सान्तानुकरणात्परस्य सुप्सकारस्य 'नुम्विसर्जनीये'ति षत्वम्। पूर्वस्य ष्टुत्वम्। सूत्रे तादाविति विशेषणाद्युष्मदादेशानां ग्रहणम्, तदाह त्वमि-त्यादि। यजुष्ये। यजुर्विषय इत्यर्थः। स्तुतस्तो। एकेषामिति वर्तते। प्रपञ्चा-र्थमिति। पूर्वं पदं पूर्वपदमिति सामान्येन तत्राश्रीयते न तु समासावयव एव इति वाक्येऽपि तेनैव सिद्धं षत्वमिति भावः। पूर्वपदात्। छन्दसीति वर्तते, एकेषामिति

पूर्वपदस्थान्निमित्तात्परस्य सस्य षो वा। यदिन्द्राग्नी दिविष्ठः। युवं हि स्थः स्वर्पती। ३६४४ सुञः। (८-३-१०७) पूर्वपदस्थान्निमित्तात्परस्य सुञो निपातस्य सस्य षः। ऊर्ध्वं ऊ षु णः। अभी षु णः। ३६४५ सनोतेरनः। (८-३-१०८) गोषा इन्दो नृषा असि। अनः किम्-गोसनिः। ३६४६ सहेः पृतनर्ताभ्यां च। (८-३-१०९) पृतनाषाहम्। ऋताषाहम्। चात् ऋतीषाहम्। ३६४७ निव्यभिभ्योऽड्व्यवाये वा छन्दसि। (८-३-११९) सस्य मूर्धन्यः। न्यषीदत्। न्यसीदत्। व्यषीदत्। व्यसीदत्। अभ्यष्टौत्।

पूर्वं पदं पूर्वपदमिति सामान्यत आश्रीयते न तु समासावयव एवेति वाक्येऽपि तेनैव सिद्धं षत्वमिति भावः। ततश्च स्तुतस्तोमग्रहणं प्रपञ्चार्थं छन्दोग्रहणं तूत्तरार्थं कर्तव्यमेव। ऊषुण इत्यादि। 'इकः सुञि' इति पूर्वपदस्य दीर्घत्वं नस् इत्यादेशस्य 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। सनोतेरनः। अनन्तस्य सनोतेः सस्य षः स्यात्। गोषा इति। 'जनसनखनक्रमगमो विट्'। 'विड्वनो' इत्यात्वम्। गोसनिरिति। 'छन्दसि वनसनरक्षिमथाम्' इतीन्प्रत्ययः। निव्यभिभ्यो। 'न रपर'

च। पूर्वपदमात्रस्य ग्रहणमित्याशयेन षत्वाऽभावे उदाहरति युवं हि स्थ इति। सुञः। सुञिति निपातग्रहणम्। छन्दसीति वर्तते। अभिषुण इति। 'इकः सुञी'ति दीर्घत्वम्। 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। सनोतेरनः। अनकारान्तसनोतेरिणकुभ्यां परस्य सस्य षश्छन्दसि। गोषा इति। 'जनसने'ति विट्। 'विड्वनो'रित्यात्वम्। गोसनिरिति। 'छन्दसि वनसनरक्षिमथा'मितीन् प्रत्ययः। 'पूर्वपदा'दित्येव सिद्धे नियमार्थमिति भावः। केचिद्गोसनेः सवनादिपाठात्सिद्धिमङ्गीकृत्य सिषाणयिषतीति नियमफलं वदन्ति। यथप्यण्यन्तः सूत्रे उपात्तस्तथाप्यण्यन्तस्य प्रतिषेधवचने फलाऽभावाण्ण्यन्तार्थत्वं विज्ञायते। 'स्तौतिण्योरेवे'ति नियमात् 'सिसनिषती'त्यादौ षत्वाऽप्राप्तेरिति तदाशयः। सिसनिषतेरप्रत्यये 'सिसनी'रिति नियमफलमित्यन्ये। अत्र सन् षत्वभूतो नेति 'स्तौतिण्यो'रिति नियमाऽविषयोऽयम्। एवञ्च सामर्थ्याऽभावाण्ण्यन्तस्य नियमाऽभावात् 'सिषाणयिषती'त्यादौ षत्वं भवत्येव। सामर्थ्यात्पूर्वपदाऽभवेऽपि नियमप्रवृत्तिरिति तद्भावः। सर्वञ्चेदं भाष्ये स्पष्टम्। सहेः पृ। छन्दसीति वर्तते। चकारोऽनुक्तसमुच्चयार्थ इत्याशयेनाह चादिति। ऋतिशब्दस्य संहितायां 'नहिवृती'ति दीर्घः, षत्वं च, उभयत्र संहिताधिकारात्, अवग्रहे ऋतिसाहमित्येव। 'छन्दसि सहः' इति ण्विः। ऋतिशब्दस्य 'अन्येषामपि' इति दीर्घ इति मनोरमा। निव्यभि। एभ्यः परस्य सुनोत्यादेः सस्याऽड्व्यवाये षत्वं वा। प्रकरण-

अभ्यष्टौत्। ३६४८ छन्दस्यृदवग्रहात्। (८-४-२६) ऋकारान्तादवग्रहात्परस्य नस्य णः। नृमणाः। पितृयाणम्। ३६४९ नश्च धातुस्थोरुषुभ्यः। (८-४-२७) धातुस्थात्। अग्ने रक्षा णः। शिक्षा णो अस्मिन्। उरु णस्कृधि। अभीषु णः। मो षु णः। इत्यष्टमोऽध्यायः।

इति सिद्धान्तकौमुद्यां वैदिकी प्रक्रिया।

इत्यतो नेति वर्तते। तत्र निषेधविकल्पे विधिविकल्प एव फलतीत्याह **मूर्धन्यो वा स्यादिति। अभ्यष्टौदिति**। 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः। **छन्दस्यृदव**। अवगृह्यते विच्छिद्य पठ्यते इत्यवग्रहः। ऋचासाववग्रहश्च ऋदवग्रहस्तस्मात्। **नृमणा इति**। अत्र संहिताधिकारात्संहिताकाल एव एतेषां णत्वं पदकाले चावग्रहः क्रियते। तेनावग्रहयोग्यत्वादृकारोऽवग्रह इत्युक्तः, न तु तद्दशापन्नः। अत्र हि नृमना इति पदकालेऽवगृह्यते। **नश्च**। धातुस्थान्निमित्तादुत्तरस्य उरुशब्दात् षुशब्दाच्च परस्य नस् इत्येतस्य णः स्यात्। धातौ तिष्ठतीति धातुस्थो रेफः षकारश्च। उरु इति स्वरूपग्रहणम्। षु इति कृतषत्वस्य सुञो ग्रहणं न सप्तमीबहुवचनस्य। तेन इन्द्रो धर्ता गृहेषु नः इत्यादौ न। नसिति नासिकादेशस्य नसादेशस्य च सामान्येन ग्रहणम्। **रक्षा ण इति**। रक्षेति लोटो मध्यमपुरुषैकवचनान्तं 'द्व्यचोऽतस्तिङः' इति दीर्घः। **उरुणस्कृधीति**। कृञो लोट् सेर्हिः 'श्रुशृणुपॄकृवृभ्यश्छन्दसि' इति हेर्धिः। 'कः करत्' इत्यादिना विसर्जनीयस्य सत्वम्।

प्राप्तस्य षत्वमात्रस्याऽपि विकल्पः। **अभ्यष्टौदिति**। 'उतो वृद्धिर्लुकि' इति वृद्धिः। **छन्दस्यृदव**। पूर्वपदादिति वर्तते। अवग्रहविषयऋकारान्तपूर्वपदादुत्तरस्य नस्य णः। अवग्रहविषयत्वञ्च अवग्रहयोग्यत्वम्। संहिताकाले णत्वम्, पदकाले चावग्रहात्। अत एव पदपाठे णत्वं न प्रयुञ्जते। **नश्च धा**। धातुस्थान्निमित्तादुरुशब्दात्षुशब्दाच्च परस्य नस्शब्दस्य नस्य णो भवति। धातौ तिष्ठतीति धातुस्थम्। षु इति कृतषत्वस्य सुञोऽनुकरणम्। तेन 'गृहेषु नः' इत्यत्र न। 'न'सिति नासिकादेशस्याऽस्मदादेशस्य च सामान्येन ग्रहणम्। तत्र प्रकृतसूत्रेऽस्मदादेश एव कार्यी, तस्यैव धातुस्थात्परत्वसम्भवात्। 'उपसर्गादनोत्परः' इत्युत्तरसूत्रे तूभयोः कार्यित्वमिति हरदत्तः। 'उत्तरसूत्रे नस्ग्रहणानुवृत्तेर्न फलम्। भाष्ये 'अनोत्पर' इत्यस्य स्थाने बहुलग्रहणस्य कृतत्वेन तेनैव सर्वाऽनिष्टवारणा'दित्यन्ये। **रक्षा ण इति**। रक्षेति लोण्मध्यमपुरुषैकवचनम्, 'द्व्यचोऽतस्तिङः' इति दीर्घत्वम्। एवं दानकर्मणः शिक्षतेः **शिक्षा ण इति**। उरु=अधिनम्। **अभीषु ण इति**। 'इक सुञि' इति दीर्घ इति शिवम्।

स्वरप्रक्रिया । ७०।

३६५० अनुदात्तं पदमेकवर्जम् । (६-१-१५८) परिभाषेयं स्वरविधिविषया। यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जे-

---

अभीषुण इति। 'इकः सुञि' इति दीर्घः। एवं मोषुण इत्यत्रापि। सर्वत्रोदाहरणे अस्मदादेशो नस्।

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथभट्टात्मजेन जयकृष्णेन कृतायां सुबोधिन्याख्यायां सिद्धान्तकौमुदीव्याख्यायां वैदिकी प्रक्रिया समाप्तिमगमत्।

अनुदात्तं पदम्। परिभाषेयमिति। नाधिकारोऽस्वरितत्वात्। 'आद्युदात्तश्च' 'समानोदरे शयित ओ चोदात्तः–' इत्यादीनामसंग्रहश्च स्यात्। परिभाषाया लिङ्गापेक्षायामाह **स्वरविधीति।** सूत्रे अनुदात्तशब्दोऽर्शआद्यजन्तः पदसामानाधिकरण्यात्। अत्रानुदात्तस्य क्रियमाणत्वात् तद्भिन्न उदात्तः स्वरितो वा वर्ज्यत इत्याह **तमेकमिति।** यत्तदोर्नित्यसंबन्धाद्यस्योदात्तस्वरितविधानं तस्यैव

इत्यर्थः। इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टविरचिते सिद्धान्तकौमुदीव्याख्याने **लघुशब्देन्दुशेखरे वैदिकी प्रक्रिया समाप्ता।**

साधारण-प्रकृति-प्रत्यय-समास-तिङन्तविषयकतया पञ्चभिः प्रकरणैरुदात्तादिस्वरान् व्युत्पिपादयिषुः साधारणस्वरांस्तावदाह **अनुदात्तमिति। एकवर्जमिति।** 'द्वितीयायाञ्च'ति णमुल्। ननु तत्र त्वरायामित्यर्थकपरीप्सायामित्यनुवर्तत इति चेत्, इहाप्यस्ति परीप्सा। तथा हि–यत्रोदात्तादिर्विधीयते तत्र तत्समकालमेव शिष्टमनुदात्तं कर्तव्यम्, न तु विलम्बितश्रमित्यर्थात्। एतच्च णमुल्विधायके **पदमञ्जर्यां** स्पष्टम्। यद्वा परीप्सायामिति प्रायिकम्। एतच्चाऽत्रैव **पदमञ्जर्यां** स्पष्टम्। **परिभाषेयमिति।** नाऽधिकारः, अस्वरितत्वात्, एकवर्जमित्यस्य वैयर्थ्यापत्तेश्च, तत्तत्सूत्रविधेयानां वचनसामर्थ्यादेव निघाताऽप्रवृत्तेः। किं च 'आद्युदात्तश्च' 'समानोदरे शयित ओ चोदात्तः' इत्याद्यसङ्ग्रहापत्तेः। नापि विधिः। तथा सति क एको वर्जनीय इति न ज्ञायेत। एवञ्च विनिगमनाविरहाच्छास्त्रविहितोदात्तस्वरितकानां सर्वेषामेव वर्जनापत्तौ 'आमलकीजः' इत्यादावुदात्तचतुष्टयं श्रूयेत। तत्र हि ङीष् प्रत्ययस्वरेणोदात्तः। 'गतिकारक' इति कृत्स्वरः, 'दीर्घकाशतुषभ्राष्ट्रवटञ्जे'इति पूर्वपदान्तोदात्तत्वम्, 'अन्त्यात्पूर्वं बह्वचः'इति लकाराऽकारस्योदात्तत्वमिति विरोधाऽभावाद्युगपदुदात्तचतुष्टयं स्यात्, अस्य तु मकाराऽकारोऽवकाशः स्यादिति भावः। परिभाषाया लिङ्गमाह

वर्जनम्। एकग्रहणं विधीयमानस्योपलक्षणम्। तेन 'तवै चान्तश्च युगपत्' इति द्वयोर्वर्जनम्। इन्द्राबृहस्पती इत्यत्र 'देवताद्वन्द्वे च' इति सूत्रेण पदद्वयस्यापि प्रकृतिस्वरे

स्वरविधीति। सूत्रेऽनुदात्तशब्दोऽर्शआद्यजन्तः, पदसामानाधिकरण्यात्। अनुदात्तस्य विधीयमानत्वात्तद्भिन्न उदात्तः स्वरितो वा वर्ज्यत इति तद्विधावेवाऽस्योपस्थानमित्याह **यस्मिन् पदे इति**। अत्र पदत्वे भाविन्यन्तरङ्गत्वात्पूर्वमेव स्वरप्रवृत्तिः। पदग्रहणन्तु परिमाणार्थम्। अत एव 'धातो'रित्यादौ न दोषः। तद्घटकन्तु पदसमुदायः। यस्य पदत्वं भावि तस्यैवैकवर्जमनुदात्तमित्यर्थात्। स्पष्टञ्चेदं विकाराधिकारे 'अनुदात्तादेश्चे'ति सूत्रे भाष्यकैयटयोः। **तमेकमिति**। एकग्रहणं विधीयमानोपलक्षणम्। एवञ्च 'तवै चाऽन्तः' इत्यादौ द्वयादीनां वर्जनसिद्धिः। 'इन्द्राबृहस्पती'[1] इत्यत्र 'देवताद्वन्द्वे च' इति पदद्वयस्यापि प्रकृतिस्वरे विधेये त्रयाणां वर्जनम्। बृहस्पतिशब्दो हि वनस्पत्यादित्वाद् द्व्युदात्त इति बोध्यम्। [नचैवं 'समाने ख्यः स चोदात्तः' इत्यनेन प्रत्ययोदात्तत्वस्य, सादेशोदात्तत्वस्य चैकेनैव सूत्रेण विधानादुभयोर्वर्जनापत्तिरिति उदात्तद्वयश्रवणं स्यादिति वाच्यम्, 'तवै चान्तश्च' इत्यादौ युगपद्ग्रहणेन यत्नं विनोभयोरेकत्राऽसमावेशज्ञापनादिति भावः]। अत्र यस्मिन् पदे यस्यामवस्थायां यस्याऽच उदात्तादिर्विधीयते तत्र पदे तस्यामवस्थायां सन्निहितमजन्तरं निहन्यत इति बोध्यम्। स्पष्टञ्चेदम् 'आद्युदात्तश्चे'ति सूत्रे पदमञ्जर्याम्। नचैवं 'चिनुत' इत्यत्र श्नोर्निघातो न सिद्ध्यति, तस्योदात्तत्वप्रवृत्तिकालेऽसन्निहितत्वादिति वाच्यम्, युगपद्ग्रहणेनाऽनुदात्तातिरिक्तस्वरयोरसमावेशज्ञापनात्तत्सिद्धेः। वस्तुतस्तु 'आद्युदात्तश्च' 'द्वित्रिभ्यां पाद्दन्' 'पुंसोऽसुङि'ति सूत्रस्थभाष्यप्रामाण्येन यावत्पदत्वं भावि तावत्संनिहिताऽजन्तस्य निघातप्रवृत्तिरित्यर्थाङ्गीकारेणाऽदोषात्। 'चिनु' इति तु 'अन्तरङ्गानपि' इति न्यायेन साध्यम्। एवं च 'आगमा अनुदात्ताः' इति नाऽपूर्वमितीति दिक्। यत्तु इयं यथोद्देशेव न कार्यकालेति त्रिपाद्यां न प्रवर्त्तते, अत एव तव्यतस्तित्त्वं चरितार्थम्। तद्धि 'तित्स्वरित'मित्यन्तस्वरितार्थम्। तत्र त्यन्त इति वर्तते। त्रिपाद्यां परिभाषाप्रवृत्तौ प्रत्ययस्वरेणाद्युदात्तत्वे शेषनिघातेनाऽनुदात्तस्यान्तस्य 'उदात्तादनुदात्तस्ये'ति स्वरिते शेषनिघातेन सिद्धौ तद्वैयर्थ्यं स्पष्टमेव। एवं 'यतोऽनावः' इत्यपि ज्ञापकम्। अन्यथा 'यतोऽनावः' इत्याद्युदात्ते कृते शेषनिघाते 'उदात्तादनुदात्तस्ये'ति स्वरिते शेषनिघाते तित्स्वप्रयुक्ताऽन्तस्वरितादविशेषेण तद्वैयर्थ्यं स्पष्टमेवेति **प्राञ्चः**। तन्न। सन्निपातपरिभाषया 'उदात्ता-

१—कोष्ठान्तर्गतः क्वाचित्कः पाठः।

यित्वा शेषं तत्पदमनुदात्ताच्कं स्यात्। गोपायत नः। अत्र 'सनाद्यन्ताः-'

विधेये त्रयाणां वर्जनम्। बृहस्पतिशब्दो हि वनस्पत्यादित्वादाद्युदात्त इति स्थितम्।
गोपायतमिति। गुप इत्यस्य 'धातो' इत्यन्त उदात्तः। ततः आयः प्रत्ययः 'आद्युदा-

दनुदात्तस्ये'ति विषये शेषनिघाताऽप्रवृत्त्या तयोश्चारितार्थ्येन भवदुक्तार्थे दृढतरमानाऽभावात्। किं च 'कर्तव्यं तत्रे' 'कर्तव्यं के'त्यादौ 'करण्यः के', 'करण्यस्तत्रे'त्यादौ 'नोदात्तस्वरितोदय'मिति 'उदात्तादनुदात्तस्य' इत्यस्य निषेधविषये तव्यतस्वित्वं 'यतोऽनाव' इति चरितार्थमिति ज्ञापकं दुरुपपादम्। तस्मादत्र लक्ष्यानुसारेण 'अनुदात्तं पद'मित्यस्याऽधिककार्यार्थात्स्वरितत्वप्रतिज्ञानादसिद्धेऽप्रवृत्तिः। यथोद्देशत्वन्स्वरथा न युक्तम्। अत्रैव सूत्रे 'कार्यकालं सञ्ज्ञापरिभाष'मिति भाष्यविरोधात्। अत एव आमलकीज इत्यादौ 'दीर्घकाशे'त्यपेक्षयाऽन्त्यात्पूर्वं बह्वच इति परत्वादित्युपपद्यते। अन्यथोभयोः सम्भवेनाऽप्रम्भवाऽभावाद्विप्रतिषेधानुपपत्तिः। कार्यकालत्वे तूभाभ्यामप्यस्यैकवाक्यतया तेन वर्ज्यमानताऽनेन वेत्युपपद्यते विरोधः। अत एव 'अनुदात्तं पद'मित्यस्याधिकारत्वे षाष्ठ एकः सङ्गृहीतः, येऽन्ये सप्ताध्याय्यां स्वरास्ते न सङ्गृहीताः स्युरिति षाष्ठभाष्योक्तं सङ्गच्छते। अन्यत्वे षाष्ठस्य प्रतियोगित्वेन षाष्ठस्यापि सप्ताध्याय्यन्तर्गतत्वप्रतीतेः। अष्टमे प्रथमे पादेऽनुदात्तस्यैव विधानम्, त्रिपाद्यान्तूक्तरीत्याऽप्रवृत्तिरेवेति तद्भावः। अत एव देवदत्तेत्यादौ प्लुताऽसिद्धत्वात्पूर्वं षाष्ठाद्युदात्तत्वे ततः प्लुते तदेकवाक्यतापन्नशेषनिघाताऽभावेनोदात्तत्रयसमावेशः। न च षाष्ठे प्रवृत्तेऽसिद्धेनाऽनेन सिद्धस्य तस्य कथं निवृत्तिरिति वाच्यम्, बाधकाऽभावात्। ध्वनितं चेदं 'गुरोरनृतः' इत्यत्र भाष्ये। अत एव कन्याऽनूपे इत्यत्र न शेषनिघातः। कन्याशब्दो हि 'कन्याराजमनुष्याणामन्तः' इत्यन्तस्वरितः। अनूपश्च 'अनोरप्रधानकनीयसी' इत्यन्तोदात्तः। तयोः स्वरिताऽनुदात्तयोः सवर्णदीर्घे आन्तर्यतः स्वरितः। तदेकवाक्यतापन्नशेषनिघातेन 'पे'कारस्यानुदात्तत्वं स्यात्। इष्यते तूदात्तस्वरितयोः समावेशः। मम तु एकादेशस्य बहिरङ्गतयाऽसिद्धत्वेन तत्स्वरस्यापि तत्त्वेन नाऽनेनैकवाक्यतेति न दोषः। स्पष्टश्चेदं 'स्वरितो वाऽनुदात्ते पदादा' इति सूत्रे भाष्ये इत्याहुः। **गोपायतमिति**। गुपेः 'धातोः' इत्यन्तोदात्तः। ततः प्रत्ययस्वरेणाद्युदात्ते आये गोपायेत्यायान्तस्य धातुत्वाद्धातुस्वरे यकाराऽकार उदात्तः। तस्य शबकारेण पित्त्वादनुदात्तेनैकादेश उदात्तः। तमित्यस्य लसार्वधातुकस्वरेणानुदात्तस्य 'उदात्तादनुदात्तस्य' इति स्वरितः। न च अनुदात्तातिरिक्तस्वरयोरसमावेशस्य ज्ञापनात्कथमत्रोदात्तस्वरितयोः समावेशः? न च सन्निपातपरिभाषया निर्वाहः, तस्या अनित्यत्वेन स्वरविधावप्रवृत्तेः,

(२३०४) इति धातुत्वे धातुस्वरेण यकाराकार उदात्तः शिष्टमनुदात्तम् । *** सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम्** । तेनोक्तो-

त्तश्च' इति प्रत्ययस्वरेणाद्युदात्तः । ततः 'सनाद्यन्ताः-' इति धातुसंज्ञायां 'धातोः' इति यकाराकार उदात्तः । स च प्रागुक्तयोरुदात्तयोः सतोः पश्चात्प्रवृत्तत्वात्सति शिष्टः अतो बलवान् । तस्य 'अनुदात्तौ सुप्पितौ' इत्यनेनानुदात्तेन शबकारेण सह 'अतो गुणे' इति पररूपे कृते 'एकदेश उदात्तेनोदात्तः' इत्युदात्तः । थसस्तमादेशः । तस्य 'तास्यनुदात्तेन्ङिददुपदेशात्-' इत्यनेनादुपदेशात्परत्वादनुदात्तत्वम् । तस्य 'उदात्तादनुदात्तस्य-' इति स्वरितः । नन्वत्र तमिति स्वरितमाश्रित्य 'अनुदात्तं पदम्-' इति परिभाषया शेषनिघात स्यादिति चेन्नैवम् । यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां न प्रवर्तते इत्यत्र ज्ञापकं तव्यतस्तित्त्वं 'यतोऽनावः' इति च । **सति शिष्टेति** । यो हि यस्मिन् सति शिष्यते स सतिशिष्टः तस्य बाधको भवतीत्यर्थः । एतच्च सति शिष्टस्य बाधकत्वं न्यायसिद्धम् । तथा हि उदात्तस्वरितविधिभिरेकवाक्यतामापन्नयाऽनया शेषनिघातः क्रियते तत्रोत्सर्गस्यापवादस्य वा चरमा या प्राप्तिस्तत्रास्या उपस्थाने पूर्वा प्रवृत्तिर्बाध्यते । तद्यथा औपगवत्वमित्यत्राण्प्रत्यये त्वप्रत्यये च 'आद्युदात्तश्च' इति प्रवर्तमानं स्वस्यैव प्रथमप्रवृत्तिं बाधते द्वितीयप्रवृत्त्या लक्ष्यं परिनिष्ठापयतीति दिक् । ननु यदि सति शिष्टः स्वरो बलीयस्तर्हि सति शिष्टत्वाद्विकरणस्वरोऽपि बलीयः स्यात् । तथा च गृणीत इत्यादि मध्योदात्तं पदं स्यादत आह

अन्यथा 'अन्तोदात्तादुत्तरपदादन्यतरस्याम्' 'ह्रस्वनुड्भ्यां मतु'बित्यादिभिरपि स्वरे कृते शेषनिघातो न स्यात् । किंचाऽग्ने भद्रं करिष्यसीत्यादौ ककारनिष्ठस्वरितत्वमादाय स्यप्रभृतीनां निघातः स्यात्, न हि तत्र परिभाषाया उक्तिसम्भवोऽस्तीति वाच्यम्, अस्य स्वरितस्याऽसिद्धत्वेनाऽदोषादिति दिक् । ननु 'गोपायत'मित्यादौ'गुपेरपि धातुत्वात्तन्निमित्तकोकारोदात्तत्वस्य, प्रत्ययस्वरनिमित्तक'पा'कारोदात्तत्वस्य च श्रवणापत्तिरत आह **सतिशिष्टेति** । तस्मिन्सति विहितेत्यर्थः । **सतीत्यस्य** उत्पन्ने इत्यर्थः, 'अस भुवि' इति स्मरणात् । 'यागात्स्वर्गो भवति' इत्यादौ भवतेरुत्पत्त्यर्थकत्वात् । एतच्च न्यायसिद्धम् । यदा यदा यो य उदात्तस्वरितविधिः प्रवर्तते तदा तदा तेन सह 'अनुदात्तं पद'मिति एकवाक्यतया प्रवर्तते । ततश्चोत्सर्गस्यापवादस्य वा यस्यैव चरमा प्रवृत्तिस्तदेकवाक्यतापन्नयाऽनया लक्ष्यं व्यवस्थाप्यते । अत एवौपगवत्वमित्यत्राऽण्प्रत्यये त्वप्रत्यये आवृत्त्या 'आद्युदात्तश्चे'ति प्रवर्तमानं स्वस्यैव प्रथमप्रवृत्तिबाधेन द्वितीयप्रवृत्त्या लक्ष्यं परिनिष्ठापयति । 'आद्युदात्तश्च' 'धातोः' इत्यादीनां निमित्तभेदेन भिन्नत्वात् । एवञ्च यदा प्रत्ययाद्युदात्तत्वं तदा गुपो निहतत्वम्, ततो धातुत्वे पुनर्धातु-

दाहरणे गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते। अन्यत्रेति किम्-युष्मं यज्ञमभिवृधे गृणीतः। अत्र सति शिष्टोऽपि श्नः इत्यस्य स्वरो न शिष्यते किं तु तस एव। ३६५१ अनुदात्तस्य च यत्रोदात्तलोपः। (६-१-१६१)

अन्यत्रेति। सति शिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधत इत्यर्थः। अत्र च ज्ञापकं तासेः परस्य लसार्वधातुकस्यानुदात्तविधानम्। तथाहि यद्यपि लावस्थायां तासिर्विधीयते तथापि लकारमात्रापेक्षत्वादन्तरङ्गेषु परेषु च लादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सति शिष्टत्वात् शेषनिघातेनैव सिद्धेरनर्थकं तत्स्यात्। **गृणीत इति**। अन्तोदात्तं पदम्। अत्र 'तास्यनुदात्त–' इति लसार्वधातुकनिघातो न, अदुपदेशेति तपरकरणात् श्नाप्रत्ययस्यादन्तत्वाभावात्। 'तिङ्ङतिङः' इति निघातस्तु न भवति 'यद्वृत्तान्नित्यम्' इति निषेधात्। स हि व्यवहितेऽपि प्रवर्तते। **तस एवेति**। तस 'आद्युदात्तश्च' इत्याद्युदात्तः स्वरः शिष्यत इत्यर्थः। **अनुदात्तस्य**। देवीशब्दोऽच्प्रत्ययान्तत्वात् 'चितः' इत्यन्तोदात्तः पचादिषु देवडिति पाठात् 'टिड्ढा–' इति ङीप् तस्य 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वे 'यस्येति च' इत्यकारलोपः। नन्वनुदात्तस्येति व्यर्थं न ह्याद्युदात्ते स्वरिते वा परे उदात्तलोपोऽस्ति। न च प्रसज्यत इति प्रासङ्गः कर्मणि घञ् 'कर्षात्वतो घञोऽन्त उदात्तः' इत्यन्तोदात्तम्। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इत्युपसर्गस्य दीर्घः 'तं वहति' इति प्राग्घिताद्यत् तित्त्वात्स्वरितः, तस्मिन् परे 'यस्य' इति लोपः। अत्र स्वरिते परे उदात्तलोपोऽस्त्येवेति वाच्यम्। स्वरिते हि विधीयमाने परि-

---

स्वरप्रवृत्तौ पाशब्दोऽप्यनुदात्त इत्यादि बोध्यम्। **अन्यत्रेति**। अत्र च ज्ञापकं तासेः परस्य लसार्वधातुकस्य निघातविधानम्। अन्यथा परनिमित्तकत्वाऽभावेन तिपादीनामन्तरङ्गत्वेन तिपादिषु कृतेषु क्रियमाणस्य तासिस्वरस्य सतिशिष्टत्वाच्छेषनिघातेन सिद्धे तद्वैयर्थ्यं स्पष्टमेव। यदि तु 'स्यतासी' इत्यत्रार्द्धधातुक इत्यनुवर्त्य लावस्थायामेव स्यादयस्तदेदं वाचनिकमिति बोध्यम्। अस्य च विशेषापेक्षत्वात् सार्वधातुकस्वरापेक्षयैव विकरणस्वरस्य दुर्बलत्वम्, धात्वादिस्वरापेक्षया तु प्राबल्यमेव। अत एव गृणातीत्यादौ श्न उदात्तत्वेन धातोर्निघातसिद्धिः। इदमपि सार्वधातुकस्य श्रूयमाणत्वे एव। तेन 'चिनु' इत्यादौ न दोषः। **गृणीत इति**। अन्तोदात्तं पदम्। अत्र लसार्वधातुकनिघातो नास्ति, 'अदुपदेशे'ति तपरकरणात्। 'श्ना' इत्यस्याऽदन्तत्वाऽभावात्। 'तिङ्ङतिङ' इति तु न, 'स होता यस्य रोदसी चिदुर्वी' इति पूर्वचरणे यद्वृत्तस्य सत्त्वेन 'यद्वृत्तान्नित्य'मिति निषेधात्। तस्य च व्यवहितेऽपि प्रवर्तनादिति बोध्यम्। **अनुदात्तस्य च यत्र**। अत्र 'कर्षात्वत' इत्यतोऽन्त इति नानुवर्त्तते,

यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात् । दे॒वीं वाच॑म् । अत्र ङीबुदात्तः । ३६५२ चौ (६-१-२२२) लुप्ताकारेऽञ्चतौ परे पूर्वस्यान्तोदात्तः स्यात् । उदात्तनिवृत्तिस्वरापवादः । दे॒व॒द्रीचीं॑ नयत दे॒व॒यन्तः॑ । * अतद्धित

शिष्टम् 'अनुदात्तं पदमेकवर्जम्' इत्यनुदात्तं तत्कृत उदात्तलोप इति चेत्सत्यम् । मा हि धुक्षातामित्यत्र दुहेर्लुङात्मनेपदमातां 'शल इगुपधा–' इति च्लेः क्सः आतामित्यस्य 'तास्यनुदात्तेन्ङिददुपदेशात्' इति लसार्वधातुकमनुदात्तत्वम् । क्सः प्रत्ययस्वरेणोदात्तः 'क्सस्याचि' इत्यकारलोपः । अत्र 'कर्षात्वतो घञोऽन्त उदात्तः' इत्यत अन्त इत्यधिकारादन्त्यस्योदात्तत्वं स्यात् सति त्वस्मिन्नादेर्भवति । ननु यत्रोदात्तलोप इत्युच्यमाने कथमन्त्यस्य प्रसङ्गः । न हि तदुदात्तलोपस्य निमित्तमिति चेत्तर्हि आदेरपि न प्राप्नोति । तस्याप्युदात्तलोपं प्रत्यनिमित्तत्वात् । 'क्सस्याचि' इत्यजादौ प्रत्यये विधानात् । तस्माद्यत्र प्रत्यय उदात्तलोपस्तत्संबन्धिनोऽनुदात्तस्योदात्तो भवतीति सूत्रार्थेनान्ताधिकारादन्त्यस्य प्रसङ्गः । यदि तु निमित्तत्वानादरेण यत्रानुदात्ते परत उदात्तलोपस्तस्योदात्तो भवतीति सूत्रार्थस्तदानुदात्तस्येति न वक्तव्यम् । अन्त्यस्य प्रसङ्गाभावात् । न च मा हि धुक्षातामित्यत्र 'तिङ्ङतिङः' इति निघातः स्यादिति वाच्यम् । 'हि च' इति निषेधात् । **उदात्तनिवृत्तीति** । कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्याञ्चत्यकारस्य 'अच' इति लोपे सति 'अनुदात्तस्य च' इति सूत्रेणोदात्तः

अयोग्यत्वात् । तथा हि यत्रेत्यनेनात्रानुदात्तवर्णपरामर्शः । उदात्तत्वानुदात्तत्वयोर्वर्णधर्मत्वात् । अनुवृत्तौ वा व्यपदेशिवद्भावेनैव तत्त्वं बोद्धयम् । एवञ्च सप्तमीनिर्देशेनानुदात्तवर्णस्य बुद्ध्या लोपात्परस्यैव ग्रहणाद् 'युष्मभ्य'मित्यादावादेरुदात्तत्वसिद्धिः । न चैवमपि युष्मभ्यमित्यत्र सुप उदात्तलोपनिमित्तत्वेऽपि नावयवस्य तत्त्वमिति कथं 'यत्र' ग्रहणेन वर्णग्रहणमिति वाच्यम् , उदात्तयोरुदात्तस्वरितयोर्वैकत्र पदेऽभावेन तयोः परयोरुदात्तलोपाऽभावेन व्यर्थमनुदात्तस्येति अनुदात्तमात्रग्रहणार्थम् , अतो निमित्तभूतसमुदायप्रविष्टस्याऽपि ग्रहणमिति न दोषः । तद्भावभावितामात्रेणापि निमित्तत्वव्यवहारात् । ननु 'मा हि धुक्षाता'मित्यादौ एतत्प्रवृत्तिरिति भाष्यात्स्पष्टम् ,तदसङ्गतम् ,अत्र हि आताम् प्रत्ययस्वरेणोदात्तः। क्सोऽपि विकरणत्वादनुदात्तः । ततः'अदुपदेशा'दिति स्वरं बाधित्वा परत्वात् 'क्सस्याऽचि' इति लोपे अनुदात्ते परे उदात्तलोपाऽभाव इति चेन्न, अन्तरङ्गत्वात्तदवस्थायामेवोदात्ते क्से जातस्याऽऽतामोऽन्तरङ्गत्वात्लसार्वधातुकानुदात्तत्वे ततो लोपेनाऽदोषात् । पक्षान्तरेऽपि एतद्भाष्यप्रामाण्येन ज्ञापकसिद्धस्याऽसार्वत्रिकतया क्वचिदन्यत्र विकरणेभ्य इत्यंशाऽप्रवृत्तेरदोषात् । अत्रानुदात्तपदेनाऽविद्यमानोदात्तस्यैव ग्रहणमिति स्पष्टं 'हारौरसः' इत्यत्र भाष्ये । **देवीमिति** । पचादौ

इति वाच्यम् । दाधीचः । माधूचः । प्रत्ययस्वर एवात्र । ३६५३ आमन्त्रितस्य च । (६-१-१९८) आमन्त्रितस्यादिरुदात्तः स्यात् । अग्न इन्द्र वरुण मित्र देवाः । ३६५४ आमन्त्रितस्य च । (८-१-१९) पदात्परस्यापादादिस्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यात् । प्रागुक्तषाष्ठस्यापवादोऽयमाष्टमिकः । इमं मे गङ्गे यमुने सरस्वति । अपादादौ किम्–शुतुद्रि स्तोमम् । 'आमन्त्रितं

प्राप्तस्तस्यायमपवाद इत्यर्थः । देवद्रीचीमिति । देव अच् इति स्थिते 'विष्वग्देवयोः–' इति देवशब्दस्याद्रि आदेशः । 'उगितश्च' इति ङीप् 'अचः' इत्यचतेरकारलोपः । 'चौ' इति दीर्घत्वम् । द्रीतीकार उदात्तः । ततः परस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम् । अतद्धित इति । चौ यः स्वरः स तद्धिते परतो न भवतीत्यर्थः । अन्यथा देवद्रीचीमित्यादौ यथोदात्तनिवृत्तिस्वरं बाधते तथा दाधीच इत्यादौ प्रत्ययस्वरमपि सति शिष्टस्वरो बाधेत । तस्मादतद्धित इति वक्तव्यम् । अस्मिंश्च सति उदात्तनिवृत्तिस्वरस्यायमपवाद इति फलितम् । दाधीच इति । दधि अच् अण् इति स्थितेऽण्स्वर उदात्तत्वे कृते 'अचः' इत्यकारलोपः । ततः सति शिष्टत्वात् 'चौ' इति स्वरः प्राप्तो निषिध्यते । तथा चण्प्रत्ययस्वरेणैव व्यवस्था । तदाह प्रत्ययस्वर एवात्रेति । अग्न इत्यादि । 'सामन्त्रितम्' इत्यनेनामन्त्रितत्वम् । प्रागुक्तषाष्ठस्येति । आमन्त्रितस्य चेत्यस्य । इमं म इति । मेशब्दात्परत्व-

---

'देव'ङिति पाठेन टित्वान्ङीप् । 'चौ' । उदात्तनिवृत्तीति । 'देवद्रीचो'मित्यादौ कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्य अञ्च् इत्यकारस्य 'अचः' इति लोपे ङीपः 'अनुदात्तस्य च' इति सूत्रेण प्राप्तस्येत्यर्थः । न च पराच इत्यादौ कृत्स्वरं बाधित्वा 'अनिगन्तोऽञ्चतौ' इति पूर्वपदप्रकृतिस्वरत्वेनाऽऽद्युदात्तत्वे 'अच' इत्यकारलोपे इदञ्चरितार्थम् , न ह्यत्रोदात्तलोपोऽस्तीति वाच्यम् , 'अनिगन्तोऽञ्चतौ' इति विषये चुस्वराऽप्रवृत्तेर्वेदयमाणत्वादित्याहुः । ननु 'दाधीच' इत्यादौ उदात्तेऽणि 'अचः' इति लोपे इदं चरितार्थमिति कथं तदपवादत्वमत आह अतद्धित इति । वस्तुतो 'न गोश्वन्' इतिसूत्रं यत्किंचिल्लक्षणप्राप्तविभक्तिस्वरस्य निषेधक'मिति अत्र सूत्रे, 'असिद्धवत्'सूत्रे 'विप्रतिषेध' सूत्रे च भाष्ये उक्तत्वेन दधीच इत्यादावुदात्तनिवृत्तिस्वराऽप्राप्तिविषयेऽस्य चरितार्थ्यान्नाऽस्य तदपवादत्वम् । परत्वेन तूक्तोदाहरणे तद्बाधकम् । 'दाधीच' इत्यादौ तु सतिशिष्टत्वेनैतत्प्राप्तौ 'अतद्धित' इत्यावश्यकमिति भाष्यारूढः पन्थाः । आमन्त्रितस्यादिरिति । 'आमन्त्रितविभक्त्यन्तस्ये'ति पाठस्तु लेखकप्रमादात् । एकपदस्वरे लुकि प्रतिषिद्धमपि प्रत्ययलक्षणं 'सर्वामन्त्रितसिज्लुक्स्वरवर्ज'मितिवचनादिहेष्यत एव–प्रियवारि । इमं मे इति । अत्र गङ्गेप्रभृतीनामविद्यमानवत्त्वेऽपि 'मे' शब्दमेवाश्रित्य सर्वेषामचां

पूर्वमविद्यमानवत्' (४१२)। अग्न इन्द्र। अत्रेन्द्रादीनां निघातो न। पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात्। 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (४१३)। सामानाधिकरणे आमन्त्रिते परे विशेष्यं पूर्वमविद्यमानवन्न। अग्ने तेजस्विन्। अग्ने त्रातः। सामान्यवचनं किम्-पर्यायेषु मा भूत्। अघ्न्ये देवि सरस्वति। ३६५५ (सामान्यवचनं) विभाषितं विशेषवचने (८-१-७४) अत्र भाष्यकृता बहुवचनमिति पूरितम्। सामान्यवचनमिति च पूर्वसूत्रे योजितम्। आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा। देवीः षळुर्वीरुरु नः कृणोत। अत्र देवीनां विशेषणं षडिति। देवाः शरण्याः। इह द्वितीयस्य निघातो वैकल्पिकः। ३६५६ सुबामन्त्रिते पराङ्ग-

---

माश्रित्य गङ्गेप्रभृतीनां त्रयाणामनुदात्तः। स च पदपाठे स्पष्ट एव। संहितायां तु 'स्वरितात्संहितायामनुदात्तानाम्' इति वक्ष्यमाणा प्रचयापरपर्याया एकश्रुतिः प्रवर्तते। शुतुद्रीति। षाष्ठेन 'आमन्त्रितस्य च' इत्यनेनाद्युदात्तः। आमन्त्रितं पूर्वम्। अग्न इन्द्रेति। सर्वाणि षाष्ठेनाद्युदात्तानि। निघातो नेति। आष्टमिकेनेति भावः। नामन्त्रिते। अत्रोत्तरसूत्रस्थं सामान्यवचनमत्र संबन्धनीयमिति भाष्यम्। तदाचष्टे विशेष्यमिति। विशेष्यसमर्पकमित्यर्थः। क्वचित्तु 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति पाठः स वृत्त्यनुरोधेनेति ज्ञेयम्। अग्ने तेजस्विन्नित्यादि। अग्ने इत्यस्य विद्यमानत्वात्तेजस्विन्नित्यस्य त्रातरित्यस्य चाष्टमिकनिघातः। अघ्न्ये देवि सरस्वतीति। तैत्तिरीयके ब्राह्मणे सहस्रमर्तां प्रकृत्य 'इडेरन्ते दिते सरस्वति प्रिये प्रेयसि महि विश्रुति एतानि ते अघ्निये नामानि'। वृत्तौ तु 'इडे काल्ये विहव्ये' इति पाठः। स तु शाखान्तरे द्रष्टव्यः। समानाधिकरणग्रहणं पाणिनिमतेऽग्न इन्द्र वरुण इत्यादौ व्यधिकरणनिवृत्त्यर्थम्। भाष्यकृन्मते विस्पष्टार्थं सामान्यवचनापेक्षत्वात्तत्र सामानाधिकरण्यस्यावश्यं स्थितत्वात्। सामान्य। बहुवचनमिति पूर्वनिषेधस्यास्य विकल्पस्य च विषय विभागार्थम्। देवीः षडिति। अत्र देवीरित्यामन्त्रितं नाविद्यमानवत्। तेन षडित्यस्य निघातः। शरण्या इति। शरणं रक्षितृत्वं तत्र साधवः शरण्याः। इति यत्। द्वितीयस्येति। षड्शब्दस्य

निघातः। स च पदपाठे स्पष्ट एव। संहितायान्तु 'स्वरितात्संहिताया'मित्येकश्रुति प्रचयाऽपरपर्याया प्रवर्तते। अग्ने त्रातरिति। अग्निरिह विशेष्यम्। त्राणकर्तरिति विशेषणम्। 'अग्ने भ्रातः सहस्कृते'ति मन्त्रे छान्दसत्वाद् भ्रातरित्यस्याऽनिघातः। एवं तत उत्तरेषामपि बोद्धव्यम्। देवीः षडिति। अत्र देवीरित्यामन्त्रितं वाऽविद्य-

वत्स्वरे । (२-१-२) सुबन्तमामन्त्रिते परे परस्याङ्गवत्स्वरे कर्तव्ये । द्रुवंस्पाणी शुभस्पती । शुभ इति शुभेः क्विबन्तात्षष्ठ्यन्तस्य, परशरीरानुप्रवेशे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । न चाष्टमिको निघातः शङ्क्यः । पूर्वामन्त्रितस्याविद्यमानत्वेन पादादित्वात् । यत्ते दिवो दुहितर्मर्तभोजनम् । इह दिवःशब्दस्याष्टमिको निघातः । परशुना वृश्चन् । ॐ षष्ठ्यामन्त्रितकारकवचनम् । षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकं चेति परिगणनं कर्तव्यमित्यर्थः । तेनेह न । अयमग्ने जरिता । एतेनाग्ने ब्रह्मणा । समर्थानुवृत्त्या वा सिद्धम् । * पूर्वाङ्ग-

शरण्यशब्दस्य चेत्यर्थः । **सुबामन्त्रिते । परस्याङ्गवदिति** । तस्यैव परस्यामन्त्रितस्याङ्गवदेकदेशवद्भवति । तद्ग्रहणेन गृह्यत इत्यर्थः । **षष्ठ्यामन्त्रित** । अत्र षष्ठीशब्देन षष्ठ्यर्थो विभक्तिरुच्यते । तेन गोषु स्वामिन्नित्यत्रापि पराङ्गवद्भावः सिध्यति । **परशुना वृश्चन्निति** । आङ्परयोः 'खनिशृभ्यां डिच्च' इति कुप्रत्ययान्तोऽन्तोदात्तः । **षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकमिति** । यद्यप्यामन्त्रितस्य द्रव्यवचनत्वान्न कारकापेक्षा तथापि आमन्त्रिततया धातुवाच्या या क्रिया

मानवत् । तेन षडित्यस्य निघातो वैकल्पिकः । **षष्ठ्यन्तमिति** । अत्र षष्ठीशब्देन तदर्था विभक्तिरुच्यते । तेन 'गोषु स्वामि'न्नित्यत्रापि पराङ्गत्वं सिद्धमित्याहुः । **आमन्त्रितान्तं प्रतीति** । आमन्त्रितार्थैकदेशक्रियां प्रतीत्यर्थः । 'मद्राणां राजन्' 'सूच्या सीव्यन्' इत्युदाहरणे । अत्र विशिष्टस्यामन्त्रिताद्युदात्तत्वम् । अत्रेदं बोध्यं–षष्ठ्यन्तस्य कारकस्य च समानाधिकरणं यद्विशेषणं तस्यापि पराङ्गवत्त्वमिष्यते । तेन 'आर्द्रस्य राज्ञः पुरुषः' 'तीक्ष्णया सूच्या सीव्यन्नि'त्यादौ पदत्रयस्यैकमाद्युदात्तत्वं भवति । **समर्थानुवृत्त्या वेति** । सामर्थ्यञ्चाऽत्र व्यपेक्षैव, शब्दाधिकारात् । सा च 'वस्त्रं राज्ञः, पुरुषागच्छे'त्यादौ पराङ्गवत्त्ववारणाय तवाप्यावश्यकीति भावः । वस्तुतस्तन्निमित्तग्रहणञ्चार्थम् । आमन्त्रितार्थं प्रति यन्निमित्तं, तत्प्रतिपादकं यत्तदेव पराङ्गवदित्यर्थः । अत एव गोषु स्वामिन्नित्यादेः पराङ्गवत्त्वसिद्धिः । समर्थग्रहणानुवृत्तिस्तु भाष्याऽसंमतेति निरूपितं मञ्जूषायां समासवादे । 'स्वरे'इत्युक्तेः 'कूपे सिञ्च'न्नित्यादौ षत्वादिकं न । न च पूर्वस्य पराङ्गवत्त्वेन पूर्वस्मिन् परप्रयुक्तकार्यप्रवृत्तिःस्वनिष्ठस्वाश्रयनिवृत्तिश्चास्तु, परस्मिंस्तु पूर्वनिष्ठकार्यप्रवृत्तौ तन्निष्ठस्वाश्रयनिवृत्तौ च मानाऽभावात्पदादित्वेन न षत्वप्राप्तिः, तथा 'चर्मनम'न्नित्यादावखण्डपदत्वाऽभावेन णत्वप्राप्तिश्च नेति स्वरग्रहणं व्यर्थमिति वाच्यम्,भाष्ये प्रत्याख्यातत्वेनेष्टापत्तेः । [परग्रहणं स्पष्टार्थम्] । अङ्गग्रहणमुभयोराद्युदात्तत्वाऽभावाय । [वत्करणात्स्वाश्रयमपि । तेनाऽऽम्

१—कोष्ठान्तर्गतः क्वाचित्कः पाठः ।

वक्ष्येति वक्तव्यम् । आ ते पितर्मरुताम् । प्रति त्वा दुहितर्दिवः । ॐ अव्ययानां च । उच्चैरधीयान । ॐ अव्ययीभावस्य त्विष्यते । उपाग्न्यधीयान ।

३६५७ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । (८-२-४) उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् । अभ्यभि हि । स्वरितस्य यणः । खलप्वाशा । अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वा-

---

तस्यास्तदपेक्षास्तीति तत्कारकमित्यर्थः । **पितर्मरुतामिति** । अत्र मरुतामिति परं पदं पूर्वस्य पितरित्यस्याङ्गवद्भवति । पितरित्यामन्त्रितनिघातेनानुदात्त ततः परं मरुतामित्येतदप्यनुदात्तमेव भवतीत्यर्थः । **अव्ययानां नेति** । तेनोच्चैरधीयानेत्यत्र 'आमन्त्रितस्य च' इत्याद्युदात्तत्वं न । न च निषेधवैयर्थ्यम् । 'निपाता आद्युदात्ताः' इत्याद्युदात्तत्वस्यानिवारणादिति वाच्यम् । स्वरादिष्वन्तोदात्तयोरुच्चैर्नीचैःशब्दयोः पाठात् । **अव्ययीभावस्य त्विति** । 'अव्ययीभावश्च' इति अव्ययीभावस्याव्ययसंज्ञा सूत्रे लुङ्मुखस्वरोपचारा इति गणनादन्यत्राव्ययसंज्ञाभावेन 'अव्ययानां न' इति निषेधो न प्रवर्तते इति भावः । **उपाग्न्यधीयानेति** । पराङ्गवद्भावेनामन्त्रितस्येत्याद्युदात्तत्वम् । **अभ्यभीति** । अभिशब्द 'उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तनिषेधात् फिट्स्वरेणान्तोदात्तः । तस्य 'नित्यवीप्सयोः' इति द्वित्वम् 'तस्य परमाम्रेडितम्' 'अनुदात्तं च' इति परस्यानुदात्तत्वं तस्मिन्नेव परे इकारस्योदात्तस्य यणि कृते उदात्तयणः परत्वाद्यकारात्स्वरितः । खलपूशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । तस्य 'ओः सुपि' इति यण् । स उदात्तयण् । ततः परो ङिप्रत्ययः सुप्त्वादनुदात्तः । तस्यानेन स्वरितः । 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वं तु न । 'नोङ्धात्वोः' इति निषेधात् । तस्य च स्वरितेकारस्य यणि ततः परस्य शाशब्दाकारस्यानेनैव स्वरितः । आशाशब्दो हि 'आशाया अदिगाख्या चेत्' इत्यन्तोदात्तत्वादनुदात्तादिः । **अस्येति**

कुण्डेनाटन्नित्यादौ 'आम एकान्तर'मिति 'अट'न्नित्यस्य निघाताऽभावे कुण्डेनेत्यस्यापि न भवति] । **पूर्वाङ्गवदिति** । सुबन्तमामन्त्रिते पूर्वस्मिन् पूर्वाऽङ्गवदित्यर्थः । छन्दोविषयमेतत् । **उदात्तस्थाने इति** । इदमत्रैवाकरे स्पष्टम् । **अभ्यभीति** । अभिः 'उपसर्गाश्चाऽभिवर्ज'मित्यन्तोदात्तः । 'नित्यवीप्सयो'रिति द्वित्वम् । 'अनुदात्तं चे'ति परोऽनुदात्तः पूर्वस्य यणि उदात्तयणः परत्वात्स्वरितः । '**खलपू**' । शब्दः कृदुत्तरपदप्रकृतिस्वरेणाऽन्तोदात्तः । ततः सप्तम्येकवचनस्य 'उदात्तयणो हल्पूर्वा'दिति प्राप्तोदात्तस्य 'नोङ्धात्वो'रिति निषेधेन स्वरितः । तस्य यणि ततः पराऽऽशाशब्दाद्याकारस्यानेन स्वरितः । आशाशब्द 'आशाया अदिगाख्या चे'दिति फिट्सूत्रेणा-

स्यशेषनिघातो न। ३६५८ एकादेश उदात्तेनोदात्तः। (८-२-५) उदा-

आशाशब्दप्रथमाकारस्थानिकस्येत्यर्थः। **शेषेति**। आशाशब्दस्य निघातो नेत्यर्थः। ननु यणादेशं प्रति स्वरितस्यासिद्धत्वात्स्थानिन्येव यण् प्रवृत्तः यथा औजढदित्यत्र हृतशब्दे द्वित्वं प्रवर्तते न तु ढशब्दे। न च स्वरितयणः परस्येत्याश्रयणात्सिद्धत्वं शङ्क्यम्। तथा सति 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन यत्र स्वरितः क्रियते तत्रापि ह्यसिद्धत्वं न स्यात्। न चेष्टापत्तिः लक्ष्यविरोधात्। 'प्रत्यग्निरुषसामग्रमख्यत्' इत्यादौ स्वरितादर्शनात्। न च नोदात्तस्वरितोदयमिति निषेधः शङ्क्यः। 'अनन्तरस्य-' इति न्यायेन 'उदात्तादनुदात्तस्य' इति यत्र प्राप्तिस्तन्मात्रस्य निषेधात्। अन्यथा खलप्व्याशान्या अभिप्रोक्षा अस्मानित्यादावपि निषेधापत्तिरिति चेत्। अत्राहुर्भाष्यकारः—'योगविभागः करिष्यते उदात्तयणः परस्यानुदात्तस्य स्वरितो भवति। ततः स्वरितयणः, उदात्तयण इत्यनुवर्तते, उदात्तयण इत्येवं योऽभिनिर्वृत्तः स्वरितस्तद्यणः परस्यानुदात्तस्य स्वरितः स्यादित्यर्थः। एवं चास्यैवाश्रयात्सिद्धत्वं नान्यस्य। **एकादेश इति**। उदात्तयोरेव स्थानित्वे आन्तरतम्यादेव सिद्धम्। अन्यतरस्यानु-

ऽन्तोदात्तः। **अस्येति**। आशाशब्दप्रथमाकारे जातस्येत्यर्थः। **शेषेति**। 'शा'-शब्दाकारस्य निघातो नेत्यर्थः। नन्विकारस्थानिकयणं प्रति स्वरितस्याऽसिद्धत्वात्स्थानिन्येव यण् प्रवृत्त इति नाऽस्य स्वरितयणः परत्वम्। न च प्रगृह्यसञ्ज्ञासूत्रस्थभाष्यकैयटरीत्या 'औजढ'दित्यादावन्तरङ्गत्वाड्ढुत्वादिषु कृतेषु हृतशब्दबुद्ध्या ढशब्दे द्वित्वं प्रवर्तते इति प्रतीयते तथाऽत्र स्वरितबुद्ध्यभावेऽपि वस्तुतः स्वरितस्थानिकयणः सत्त्वाददोष इति वाच्यम्, वाक्यसंस्कारपक्षे स्वरितयणोरेककालप्रवृत्तिकत्वेन तथा वक्तुमशक्यत्वात्। न च 'स्वरितयण' इत्याश्रयात्सिद्धत्वम्, अतिप्रसङ्गात्। 'उदात्तादनुदात्तस्ये'ति विहितस्यापि सिद्धत्वापत्तेः। तथा च प्रत्यग्निरित्यादावपि एतत्प्रवृत्त्यापत्तिः। न च 'नोदात्तस्वरितोदय'मिति निषेधः, 'अनन्तरस्ये'ति न्यायेन 'उदात्तादनुदात्तस्ये'ति स्वरितस्यैव तेन निषेधात्। अन्यथा 'खलप्व्याशाऽन्याऽभि'मित्यादावप्यस्य निषेधापत्तिः। अत एव 'तिरस्वरितं' 'स्वरितो वाऽनुदात्ते' इत्यादीनां न निषेध इति चेन्न। योगविभागेन भाष्ये एव समाधानात्। **'उदात्तयणः'**। उक्तोऽर्थः। ततः **'स्वरितयणः'**। इह पूर्वसूत्रमनुवर्तते। उदात्तयण इत्येवंनिर्वृत्तस्वरितस्थानिकयणः परस्येत्यर्थः। एवञ्चास्यैवाश्रयात्सिद्धत्वम्, नान्यस्येति न दोषः। यद्वा इह स्वरितग्रहणं न करिष्यते, 'खलप्व्याशे'त्यादावप्युदात्तयणः परत्वादेव सिद्धम् न च स्वरितयणा व्यवधानम्, स्वरविधौ व्यञ्जनस्याऽविद्यमानवत्त्वात्। न चैवं 'सन्त्यग्ने' इत्यादौ वेदे 'त्य'काराऽकारे पठ्यमानस्वरिताऽसङ्गतिः, तत्र हि सन्तीति इकारस्य

तेन सहैकादेश उदात्तः स्यात् । क्व॑ वोऽश्वाः । क्वा॑वरं मरुतः । ३६५९ स्वरितो वानुदात्ते पदादौ । (८-२-६) अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् । पक्षे पूर्वसूत्रेणोदात्तः । वी॑दं ज्योतिर्हृदये । अस्य

दात्तत्वे स्वरितत्वे वा आन्तरतम्यात् स्वरिते प्राप्ते विधिरयमिति ध्वनयन्नुदाहरणद्वयमाह क्व वोऽश्वा इत्यादि । 'बहुवचनस्य वस्नसौ' इत्यत्र 'अनुदात्तं सर्वमपादादौ' इत्यधिकाराद्वस् अनुदात्तः । अशेः क्वनिति व्युत्पादनादश्वशब्द आद्युदात्तः । वसो रुत्वम् । उत्वम् । 'एङः पदान्तादति' इति पूर्वरूपम् । क्वेति । 'किमोत्' 'क्वाति' इति किमः क्वादेशः 'तित्स्वरितम्' । अवरशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तः । तयोर्दीर्घ उदात्तः । स्वरितो । वीदमित्यादि । विशब्दो निपात-

---

'उदात्तादनुदात्तस्ये'ति स्वरितत्वम्, तत्र सन्तीति प्रत्ययस्वरेणाद्युदात्तम् । ते शेषनिघातः, अग्ने इत्यामन्त्रितानुदात्तमिति वाच्यम्, सशब्दाऽकारमाश्रित्योदात्तादनुदात्तस्येत्येवाऽग्निशब्दाऽकारस्य स्वरितसिद्धेः । न च स्थानिवद्भावादचा व्यवधानम्, पूर्वत्रासिद्धीये तन्निषेधात् । एतेन 'द्वितीयपक्षोऽयुक्तः स्थानिवद्भावेनाऽचा व्यवधानात्, व्यञ्जनस्य ह्यविद्यमानवत्त्वं न त्वचः' इति वृत्त्युक्तमपास्तम् । 'स्वरे कर्तव्ये लोपाऽजादेश एव न स्थानिव'दिति नियमस्य 'स्वरविधौ ने'ति प्रतिपदोक्तस्यैव निषेधस्य, न तु पूर्वत्राऽसिद्धीयत्वप्रयुक्तस्येत्यन्यत्र विस्तरः । एकादेश उ । उदात्तयोरेव स्थानित्वे आन्तरतम्यादेव सिद्धम् । अन्यतरस्याऽनुदात्तत्वे, स्वरितत्वे वा 'सिद्धन्तूभयान्तर्या'दिति न्यायेनान्तरतम्यादेव स्वरिते प्राप्ते विधिरयम् । तद्ध्वनयन्नुदाहरणद्वयमाह वोऽश्वा इति । व इत्यनुदात्तम् । अश्वशब्दः क्वनन्तत्वादाद्युदात्तः । वसः सस्य रुः, तस्य उः, सोऽस्वरकः, संसनधनहल्स्थानिकत्वात्, अनुदात्तो वा, उभयथापि तदेकादेशोऽनुदात्तः प्राप्तः । क्वेति स्वरितम् । अवरशब्दः 'स्वाङ्गशिटा'मित्याद्युदात्तः एवञ्च यद्वृत्तौ–पूर्वसूत्रादनुदात्तस्येत्यत्रानुवर्त्य उदात्तानुदात्तयोरेकादेश इति व्याख्यातम्, तच्चिन्त्यम्, क्वावरमित्यसिद्ध्यापत्तेः । तत्र हि बह्वृचानामुदात्तपाठो निर्विवाद इत्याहुः । वस्तुतस्तु 'तस्यादित' इति सूत्रस्थभाष्यादितोऽप्यनुवृत्तिरेव लभ्यते इति सैव युक्ता । तत्र हि सुब्रह्मण्याशब्देव स्वरितान्तेन ओमित्युदात्तस्यैकादेशः स्वरितः, तस्य 'न सुब्रह्मण्याया'मित्यनेनोदात्त इत्युक्तम् । क्वावरमिति तु छान्दसत्वाद्बोध्यम् । तथा च बह्वृचप्रातिशाख्यम्–'उदात्तवत्येकीभावे उदात्तं सन्ध्यमक्षरम् । अनुदात्तोदये पुनः स्वरितं स्वरितोपधे' इति । 'यस्मिन्नेकीभावे पूर्वमुत्तरं वोदात्तं भवति, इतरस्तूदात्तानुदात्तस्वरितप्रचितानामन्यतमस्तस्मिन्नेकीभावे सन्ध्यमक्षरमुदात्तं ज्ञातव्यम् । स्वरितोपधे-

श्लोकौ दिवीयते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः। दीर्घप्रवेशे तूदात्तः। किंच 'एङः पदान्तात्' (८६) इति पूर्वरूपे स्वरित एव। तेऽवदन्। सो३ऽयमागात्। उक्तं च प्रातिशाख्ये। इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु चेति।

त्वादाद्युदात्तः। इदंशब्दः फिट्स्वरेणान्तोदात्तः। तयोरेकादेशः स्वरितः। दिविशब्दे 'ऊडिदंपदाद्' इति विभक्तिरुदात्ता। ईयते 'ईङ् गतौ' दिवादिः। 'तिङ्ङतिङः' इति निहतम्। अत्रैकादेश उदात्तः। **इकारयोः स्वरित इति**। ह्रस्वेकारयोरेवेत्यर्थः। **दीर्घप्रवेशे त्विति**। दिवीयत इत्यत्र। **उदात्त इति**। 'एकादेश उदात्त' इत्यनेन। इयं च बह्वृचानां व्यवस्थोक्ता अन्येषामपि तदीयप्रातिशाख्यानुसारेण ज्ञेया। **पूर्वरूपे इति**। तेऽवदन्नित्यादौ ते इति तच्छब्दः फिट्स्वरेणान्तोदात्तः जसः सुप्त्वात् 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तः। तयोरेकादेश उदात्तः। **अवदन्निति**। वदेर्लङि प्रथमपुरुषबहुवचनम्। ते इत्यतिङन्तात्परस्य तस्य 'तिङ्ङतिङः' इति निघातः। **सोऽयमिति**। स इति तच्छब्दस्य प्रथमैकवचनम्। तच्छब्दः फिट्स्वरेणान्तोदात्तः। सु इति। 'सुप्त्वादनुदात्तः' तस्य रुत्वे उत्वे गुणे च कृते एकादेशेनौकार उदात्तः। अयमितीदमः प्रथमैकवचनं फिट्स्वरेणान्तोदात्तम्। तयोः 'एङः पदान्ता–' इति पूर्वरूपं ओकारः स्वरितः। **इकारयोश्च प्रश्लेष इति**। ह्रस्वयोरिकारयोः सवर्ण-

---

ऽनुदात्तोदये सन्ध्यमक्षरं स्वरितत्वमापद्यते 'क्षीरं सर्पिर्मधूदक'मित्युदाहरणम्। शौनकीयप्रातिशाख्येऽपि स्वराष्टकमुपक्रम्य 'एकादिष्टमुदात्तेन तं तमेव नयेत्स्वर'मिति। उदात्तेनैकादिष्टं तं स्वरं तमेव=उदात्तमेव, नयेत्=उदात्तत्वमेव प्रापयेदिति तदर्थ इति तद्भाष्ययोः स्पष्टम्। लोके तु कावरमित्यादौ न भवत्येवोदात्त इति युक्तमाभाति। अयमेकादेशस्वरोऽन्तरङ्गस्त्रैपादिकोऽपि सिद्धो वाच्य इति 'स्वरितो वा' इति सूत्रे भाष्ये स्पष्टम्। अत एव 'शतुरनुम' इत्यत्राऽनुम इति प्रतिषेधश्चरितार्थः। अन्तरङ्ग इत्युक्तेः 'प्रपचतीति'इत्यादौ एकादेशस्य पूर्वान्तत्वात् 'तिङि चोदात्तवती'ति न प्रवर्तते। 'सोमस्तुत् पचतीति' इत्यादौ 'तिङ्ङतिङ' इति निघातो न। सिद्धत्वफलन्तु 'वृत्त्यिदं' 'वृक्षावत्र' इत्यत्राऽशवावुदात्तौ भवतः। एतद्विषये शेषनिघातश्च। फलान्तराण्यपि भाष्ये स्पष्टानि। **वीदमिति**। विः–निपातत्वादाद्युदात्तः। इदम्शब्दः फिट्स्वरेणाऽन्तोदात्तः। **दिवीयत इति**। दिवीति विभक्तिः–'ऊडिदंपदादी'त्युदात्ता, ईङो दिवादेः 'ईयते' इति 'तिङ्ङतिङः' इति निहतम्। **इकारयोरिति**। ह्रस्वेकारयोरित्यर्थः। **किं चेति**। इदं वेद एव। अत एव 'गाङ्गेऽनूपे' इत्यत्रायमेकादेशः स्वरितो वेति भाष्ये उक्तम्। **त इति**। तच्छब्दस्य बहुवचनम्। **इकारयोश्च प्रश्लेषे**

३६६० उदात्तादनुदात्तस्य स्वरितः । (८-४-६६ ।) उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् । अग्निमीळे । अस्याप्यासिद्धत्वाच्छेषनिघातो न । तमीशानासः । **३६६१ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् । (८-**

दीर्घे । ह्रस्वयोर्यत्र सवर्णदीर्घः स प्रश्लेष इत्युच्यते । उदात्तस्वरितस्थाने यो यण् स क्षैप्रः सन्धिः । यत्र 'एङः पदान्तात्–' इति स अभिनिहतसन्धिरुच्यते । तेषु स्वरितः स्वीक्रियत इत्यर्थः । 'वीदं ज्योतिः', 'अभ्यभि हि', 'तेऽवदन्' इति क्रमेणोदाहरणानि । **उदात्तादनुदात्तस्य** । यत्र 'तयोर्य्वावचि' इत्यतः संहितायामित्यनुवर्तते तेन पदकालेऽनुदात्तमेव । **अग्निमीळे इति** । अग्निशब्दः फिट्स्वरेण प्रत्ययस्वरेण वान्तोदात्तः । अम् सुप्त्वादनुदात्तः । 'अमि पूर्वः' इति एकादेश उदात्तः । ईळे इति तु 'ईड स्तुतौ' लटि उत्तमपुरुषैकवचनम् । 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो लकारः' इति वक्ष्यमाणेन प्रातिशाख्येन डस्य लः । 'तिङ्ङतिङः इति निहतम् । ईकारस्य स्वरितः। न च मकारेण व्यवधानम् । 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषणात् । एवं सर्वत्र ज्ञेयम् । ननु 'तित्स्वरितम्' इत्यस्यानन्तरमिदं वक्तव्यम् । एवं स्वरितग्रहणं न कर्तव्यं भवतीत्याशङ्कयाह **अस्येति** । यदि तत्र क्रियेत 'अनुदात्तं पदमेकवर्जम्' इत्येतत्प्रवर्तेत, इह प्रकरणे न प्रवर्तते स्वरितस्यासिद्धत्वात् । तेन द्वयोरप्युदात्तस्वरितयोः श्रवणं सिद्धम् । **तमीशानास इति** । तमिति तच्छब्दस्य द्वितीयैकवचनमन्तोदात्तम् । ईशानशब्दाज्जसि 'आज्जसेरसुक्' इत्यसुगागमे कृते रूपम् । 'ईश ऐश्वर्ये' अस्माच्छानच् । चित्त्वादन्तोदात्तः । जसः सुप्त्वादनुदात्तत्वम् । ईकारस्य सकाराकारस्य च स्वरितत्वम् । **नोदात्त** । उदात्तस्व-

---

इति । ह्रस्वयोरिकारयोः प्रश्लेषे, क्षैप्रसन्धिषु चाऽभिनिहितसन्धिषु चाऽविशेषेण उदात्तपूर्वरूपेषु अनुदात्तोत्तररूपेषु शाकल्यस्य मते स्वरितः कार्यः । 'उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरे'दिति तद्वाक्यशेषात् । 'एव'मिति स्वरितनिर्देशः । 'स्रुचीव घृते' 'यो जान्विन्द्र ते हरी' 'तेऽवर्द्धन्त स्वतवस' इति क्रमेणोदाहरणानीति तद्भाष्यकृतः । 'सन्धिविशेषस्य क्षैप्र इति सञ्ज्ञा, तद्विशेषस्याभिनिहिते'ति प्रातिशाख्ये द्वितीयपटले स्पष्टम् । तत्र हि–'एङः पदान्तादित्यादिरभिनिहितसन्धिः, ह्रस्वद्वयस्थानिकसवर्णदीर्घगुणवृद्ध्यादिः प्रश्लिष्टसन्धिः' दीर्घद्वयस्थानिकसवर्णदीर्घयणादिः क्षैप्रसन्धिः' इत्युक्तम् । वस्तुतस्तु वेदे आपाद्यमानरूपाऽभावाद्व्यवस्थितविभाषाश्रयणे फलं चिन्त्यम् । **उदात्तादनुदात्तस्य** । अत्र 'तयोर्य्वावची'त्यतः संहितायामित्यनुवर्त्तते । तेन पदकाले न । **नोदात्तस्वरितोदय** । उदयशब्दः परवाची शास्त्रान्ते मङ्गलार्थे

४-६७) उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् । गार्ग्यादिमते तु स्यादेव । । प्र य आ रुः । वोश्वाः कां १ भीशवः । ३६६२ एकश्रुति दूरात्संबुद्धौ । (१-२-३३) दूरात्संबोधने वाक्यमेकश्रुति स्यात् । त्रैस्वर्यापवादः । आगच्छ भो माणवक । ३६६३ यज्ञकर्मण्यजपन्यूङ्खसामसु । (१-२-३४)

रितौ उदयौ यस्मादिति बहुव्रीहिः । उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः । लाघवार्थं परशब्दे प्रयोक्तव्ये मङ्गलार्थमुदयशब्दः प्रयुक्तः । तथा चोक्तं भाष्ये 'मङ्गलादीनि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च' । इहादौ वृद्धिशब्दो, मध्ये शिवशब्दः 'शिवशमरिष्टस्य करे' इति, अन्ते चायमुदयशब्द इति पाणिनीये मङ्गलं कृतम् । **प्र य आरुरिति** । ये इति यच्छब्दस्य प्रथमाबहुवचनं फिट्स्वरेणान्तोदात्तम् । **आरुरिति** । ऋतेर्लिटि प्रथमपुरुषबहुवचनं झिः । तस्य 'परस्मैपदानाम्-' इत्युस् प्रत्ययस्वरेणोदात्तः । न च 'तिङ्ङतिङः' इति निघातः शङ्क्यः । 'यद्वृत्तान्नित्यम्' इति निषेधात् । आकारस्य 'उदात्तस्वरितपरस्य' इति वक्ष्यमाणेन सन्नतरादेशः । **वोऽश्वाः केति** । अत्रापि श्वेत्याकारस्य सन्नतरः । **केति** । 'किमोत्', 'तित्स्वरितम्' । **एकश्रुति** । संबोधनं संबुद्धिरित्यनेनान्वर्थस्य संबुद्धिशब्दस्य ग्रहणम् , न 'एकवचनं संबुद्धिः' इति पारिभाषिकस्य । सति तु ग्रहणे आगच्छत देवब्राह्मणा इत्यत्र न स्यात्तदाह **दूरात्संबोधने इति** । अन्वर्थग्रहणं च दूरादित्यनेन संबन्धाल्लभ्यते । न ह्यामन्त्रितविभक्तेः दूरत्वमदूरत्वं च संभवति । संबोधनस्य तु क्रियारूपत्वादपादानत्वाद् दूरादिति विशेषणसंभवः,दूरत्वं न देशस्वरूपमाश्रीयते अनवस्थितत्वात् किं तर्हि संबोधनक्रियापेक्षया दूरत्वं यावति देशे प्रकृतिप्रयत्नोच्चारितं संबोध्यमानेन न श्रूयते किं त्वधिकं प्रयत्नमपेक्षते तत्संबुद्धौ दूरं भवति । **एकश्रुतिरिति** । उदात्तादीनां स्वराणामविभागेनावस्थानमेकश्रुतिः । **आगच्छेत्यादि** । 'दूराद्धूते च' इति 'वाक्यस्य टेः प्लुत उदात्तः' । प्रत्युदाहरणे

प्रयुक्तः । यद्यपि नञ्द्वयमन्यतरत्यक्त्वा 'गार्ग्यादीनामेवे'ति नियमो व्याख्यातुं शक्यते तथापि 'गार्ग्यादीनामुदात्तादिपरमेवे'ति विपरीतनियमशङ्कां वारयितुं नञ्द्वयोपादानम् । **प्र य आरुरिति** । ये इत्युदात्तम् । आरुरिति ऋधातोर्लिटयसि रूपम्—अन्तोदात्तम् । **वोश्वाः काभीषव इति** । अश्वशब्द आद्युदात्तः । केति स्वरितम् । **एकश्रुति** । संबुद्धिग्रहणं संबोधनोपलक्षणम् । अन्यथा 'आगच्छत भो माणवकाः' इत्यादौ न स्यात् । तदाह **दूरात्संबोधने इति** । स्वराणामविभागेनाऽवस्थानमेकश्रुतिः । यद्वोदात्तादिभ्यो भिन्नः स्वर एकश्रुतिः । आद्ये उच्चनीचसमुदितं स्थानम् , परं तु भेदेनाऽनुपलब्धिरिति स्वरिताद्भेदः । अन्त्ये तु तयोर्मध्यमेकश्रुतेः स्थानम् । **आग-**

यज्ञक्रियायां मन्त्र एकश्रुतिः स्याज्जपादीन्वर्जयित्वा । अग्निर्मूर्धा दिवः ककुत् ।

यज्ञेति किम्—स्वाध्यायकाले त्रैस्वर्यमेव । अजपेति किम्—ममाग्ने वर्चो विहवे-

---

ष्वस्त्विति त्रैस्वर्यमेव भवति । तत्र 'आङुपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तः । गच्छेति तिङन्तस्य निघातः । भोगशब्दो 'नेपाता आद्युदात्ताः' इत्याद्युदात्तः । शेषस्यामन्त्रितनिघातः । यज्ञ । त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते । मन्त्र इति । एतच्चाजपेति पर्युदासाल्लभ्यते तेनोहादिषु न । अत एव स्वाहेन्द्रशत्रुर्वर्धस्वेति समासान्तोदात्तत्वे कर्तव्ये आद्युदात्तं प्रयुक्तमिति प्रसिद्धिः । जपादीनिति । जपन्यूङ्खसामानीत्यर्थः । अग्निर्मूर्धेति । 'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतोम् ३' 'अङ्गेर्नलोपश्च' इति अग्निशब्दः प्रत्ययस्वरेण फिट्स्वरेण वान्तोदात्तः । 'मुर्वी बन्धने' 'कनिन् युवृषितक्षिराजिधन्वि' इत्यतः कनिनि वर्तमाने 'श्वन्नुक्षन्पूषन्' इत्यत्र मूर्धन्शब्दः कनिन्प्रत्ययान्तोऽन्तोदात्तो निपातितः । दिवशब्दात्परस्य षष्ठ्येकवचनस्य 'ऊडिदम्पदाद्' इत्युदात्तत्वम् । ककुच्छब्दः प्रातिपदिकस्वरेणान्तोदात्तः । पातेर्डतिः । पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः । 'प्रथेः षिवन् संप्रसारणं च' षित्वान्ङीष् । षष्ठ्येकवचनस्य 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वम् । इदम्शब्दः प्रातिपदिकस्वरेणान्तोदात्तः । आप्नोतेः क्विप् ह्रस्वश्च । 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । रीङ्सृजिभ्यां तुड्वेत्यसुन्प्रत्ययः नित्स्वरेणाद्युदात्तो रेतःशब्दः । जिन्वतीति । जिन्वतेः प्रीणनार्थस्य तिपि 'तिङ्ङतिङः' इति निघातः । 'प्रणवष्टेः' इति प्रयोगकाले प्रणवः । ममेत्यादि । 'युष्मदस्म-

---

च्छेति । आङ् उपसर्गत्वादाद्युदात्तः । गच्छेति निहतम् । भोःशब्दो निपात आद्युदात्तः । माणवकेत्यस्यामन्त्रितनिघातः । अत्राऽन्त्यस्य पक्षे प्लुतोदात्तत्वमपि भवति, वचनसामर्थ्यात् । तदा चोभयोः समुच्चितयोर्दूरात्संबोधनं द्योत्यम् । यज्ञकर्मण्यजप । रूढश्च जपशब्दः करणमन्त्रेषु, यत्र 'जपती'ति कल्पसूत्रकृतां व्यवहारः । न्यूङ्खा नाम षोडश ओंकाराः । साम प्रसिद्धम् । गीतेषु सामाख्येति । यज्ञकर्म च यजतिनोदनानोदितं कर्म । जपादिपर्युदासान्मन्त्रेष्वेवैषा एकश्रुतिर्नोहितादिषु, तेषाममन्त्रत्वात् । तत्र संपूर्णो य ऊहितस्तस्यैवाऽतत्त्वम्, यत्किञ्चिदूहितपदघटिते तु मन्त्रत्वमेव, तन्मध्यपतितन्यायात् । तदाह मन्त्रे इति । ममाग्ने इति । यद्यप्ययं मन्त्रो हविरभिमर्शने विनियुक्तस्तत्र चैकश्रुत्यैव पठ्यते तथापि 'अधिश्रिते उन्नीयमाने वा 'ममाग्ने वर्चो विहवेष्वस्त्वि'ति चतस्रो जपित्वा' इत्यग्निहोत्रप्रकरणे आपस्तम्बसूत्रे उक्तत्वेन न दोषः । एषु यथाविहितं त्रैस्वर्यं भवति । न चैतेषु नित्यैक-

स्वेषु। जपो नाम उपांशुप्रयोगः। यथा जले निमग्नस्य। न्यूङ्खा नाम षोडश

दोर्जसि' इत्याद्युदात्तत्वम्। अग्नेः शब्दस्यामन्त्रितनिघातः। वर्चःशब्दोऽसुन्प्रत्ययान्तः। विपूर्वाद् ह्वयतेः 'ह्वः संप्रसारणं च' इत्यप्रत्ययः। थाथादिसूत्रेणान्तोदात्तत्वम्।

श्रुतेर्निषेधेऽपि 'विभाषा छन्दसी'ति विकल्पापत्तिरिति वाच्यम्, 'यज्ञकर्मणि जपन्यूङ्ख-सामसु वा' 'उच्चैस्तरां वा वषट्कारः' 'विभाषा छन्दसी'त्येव सिद्धे नञुच्चारणवैयर्थ्या-पत्तेः। यत्तु हरदत्तः—अजपेत्यादि प्रसज्यप्रतिषेधः। नचोहितानामच्छन्दस्त्वात्तत्र साव-काशस्य पूर्वसूत्रस्य मन्त्रेषु परत्वाद् 'विभाषा छन्दसी'त्यनेन बाधः स्यादिति वाच्यम्, 'यज्ञकर्मणी'ति कर्मग्रहणसामर्थ्यादूहिताऽनूहितेषु सर्वेषु पूर्वस्यैव प्रवृत्तेरिति, तन्न, पर्युदासस्य लघुत्वात्। अत एव 'इन्द्रशत्रुर्वर्धस्वे'त्यत्र समासान्तोदात्तत्वे कर्तव्ये पूर्व-पदप्रकृतिस्वरत्वं प्रयुक्तमिति शतपथब्राह्मणतद्भाष्यायुक्तं सङ्गच्छते। एवं हि तद्-ब्राह्मणम्—'अथ यदब्रवीदिन्द्रशत्रुर्वर्धस्वे'ति तस्मादुहैनमिन्द्र एव जघान। अथ यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्वर्धस्वेति शश्वदुह स एवेन्द्रमहनिष्य'दिति। आद्येऽनुकरणं पूर्वपदप्रकृतिस्वरविशिष्टस्य, अन्त्ये त्वेतदर्थकमन्तोदात्तम्। यदवक्ष्यदित्यर्थ इति तद्भा-ष्यम्। अत एव महाभाष्ये 'मन्त्रो हीनः' इति पठितोऽपि श्लोको 'दुष्टः शब्द' इति पठितः। एवञ्च 'इषे त्वा' इत्यादियजुर्मन्त्रेषु शाखाच्छेदनादिकरणेषु एकश्रुतिरेव भवति। एतेन—'पर्युदासेऽपि यज्ञाऽऽज्ञशब्दत्वेन सादृश्यम्। एवञ्चोहविषये चरितार्थ-स्याऽस्य मन्त्रेषु परत्वा'द्विभाषा छन्दसी'त्यनेन बाधः। सा च व्यवस्थितविभाषा, अतो नातिप्रसङ्गः। अत एव बह्वृचानां संहितायां त्रैस्वर्यम्, ब्राह्मणे ऐकश्रुत्यम्, तैत्तिरी-याणामुभयत्रापि त्रैस्वर्यमिति व्यवस्था संगच्छते। एवञ्च हौत्रमन्त्रेष्वेकश्रुतिरेव। 'इषेत्वे'त्यादौ यजुषि त्रैस्वर्यमेव। अत एव 'सकलदेशीयशिष्टाचारविरोधोपि न'— इति परास्तम्। कोऽयं चरितार्थस्य मन्त्रेषु बाध, उत मन्त्रेषु चरितार्थस्याऽछन्दसि 'विभाषे'त्यनेन कोऽयं बाध इत्यत्र विनिगमनाविरहेणास्य विभाषा छन्दसीत्येतदप-वादकताया एव युक्तत्वाच्च। अत एव कात्यायनेन 'मन्त्रे स्वरक्रिया यथाऽऽम्नातम-विशेषा'दिति पूर्वपक्षे 'तानो वा नित्यत्वात्, स्मर्यते चैवम् एकश्रुतिदूरात्संबुद्धौ यज्ञ-कर्मणि सुब्रह्मण्या-साम-जप-न्यूङ्ख-याजमानवर्ज'मित्युक्तम्। अत्र वाशब्दः पक्षव्या-वृत्तौ। तान एवेत्यर्थः। 'तान एकश्रुति'रिति तद्भाष्यकृतः। यत्तु सूत्रस्थं वाशब्दं विकल्पार्थकमाहुस्तेषां 'नित्यत्वा'दिति वाक्यशेषविरोधः। तस्माद्यजुष्यप्येकश्रुतिरेव। अत्र सूत्रे जपादिग्रहणं याजमानमन्त्राणामप्युपलक्षणम्, कात्यायनसूत्रस्वरसात्। वस्तुतः कात्यायनप्रातिशाख्ये 'तानलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि सामजपन्यूङ्खवर्जम्, प्रवचनो

ओकाराः । गीतिषु सामाख्या । ३६६४ **उच्चैस्तरां वा वषट्कारः** । (१-२-३५) यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा । ३६६५ **विभाषा**

उच्चैस्तराम् । वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते समानार्थत्वात् । द्वावपि हि तौ देवतासंप्रदानकस्य दानस्य द्योतकौ । नन्वेवं प्रतिपत्तिलाघवार्थं वौषट्शब्द एव कुतो नोक्त इति चेत्, विचित्रा हि सूत्रस्य कृतिः पाणिनेः क्वचिदक्षरलाघवमाश्रीयते क्वचित्प्रतिपत्तिलाघवमिति । ननु वषट्कार इत्यत्र कारप्रत्ययो न स्याद् वर्णनिर्देशे हि स विहित इति चेत्सत्यम् । एतदेव ज्ञापयति समुदायादपि कारप्रत्ययो भवतीति । तेन एवकार इत्यादि सिद्धम् । उच्चैःशब्दोऽधिकरणप्रधानोऽपि तद्विशिष्टभवनक्रियायां वर्तते, तेन क्रियाप्रकर्षादाम्प्रत्यय उदात्ततरो भवतीति फलितोऽर्थः । 'ब्रूहि प्रेष्य' इति सूत्रेण वौषट्शब्दस्यादेः प्लुत उदात्तो विहितः तदपेक्षयायमुदात्ततरोऽन्त्यस्य विधीयते । अन्ये तु स्वार्थिकस्तरबित्याहुः । **विभाषा** । वाग्रहणेऽनुवर्तमाने विभाषाग्रहणं अच्छन्दसीति पदच्छेदेन मन्त्रादिना भाषायामपि विधानार्थम् । अत एव 'श्वेतो धावति' अलंबुसानां यातेति द्व्यर्थं वाक्यमिति पस्पशान्ते भाष्यम् । तत्र श्वेतेति प्रातिपदिकस्वरेणान्तोदात्तम् । इत इति इदंशब्दात्तसिल् । 'ऊडिदम्–' इत्यनेन श्वेत इति 'वर्णानां तण–' इत्याद्युदात्ते प्राप्ते घृतादित्वादन्तोदात्तम् । अलंशब्दो निपातस्याद्यु-

---

वा यजुषि' इत्युक्तेर्यजुषि त्रैस्वर्यमपि । तत्र प्रवचनशब्देन पाठ उच्यते । तत्र भवो वा स्वरो यजुषि यज्ञकर्मणि त्रैस्वर्यलक्षण इति तद्भाष्यकृतः । यद्यपि तत् समाख्याबलात्तच्छाखीयानामेव, तथापि अविरुद्धत्वात्सर्वशाखां प्रत्येकं कर्मेति न्यायाच्चाऽन्येषामपि त्रैस्वर्यम् , परन्तु प्रागुक्तकल्पसूत्र-पाणिनिसूत्र-तद्भाष्यादिपर्यालोचनया एकश्रुतौ धर्माधिक्यं बोध्यम् । 'वैकल्पिकेष्वादितोऽवधारणा'मिति न्यायात्संकल्पकाले एतदन्यतरोल्लेख आवश्यकः । यज्ञशब्देन यजतिचोदनाचोदितानामेव ग्रहणमिति स्मार्तेषु स्थालीपाकोपाकर्मादिप्रयोगेषु नैकश्रुत्यमित्यन्यत्र विस्तरः । **उच्चैस्तरां वा** । अधिकरणशक्तिप्रधानोच्चैःशब्दात्तद्विशिष्टभवनक्रियाकर्तरि वर्तमानात्क्रियाप्रकर्षे प्रत्ययः । तेनोदात्ततर इत्यर्थः । वषट्शब्देन वौषट्शब्दो लक्ष्यते, व्याख्यानात् । तत्रौकारस्य 'ब्रूहिप्रेष्ये'त्यनेन प्लुतोदात्तत्वविधानात् षकारस्याऽनेन तदपेक्षयोदात्ततरो विधीयत इत्येके । अन्ये तु द्वयोरप्युदात्ततरत्वम् , याज्यावाक्यैकश्रुत्यपेक्षया प्रकर्ष इत्याहुः । इदमेव युक्तम् , भाष्यसम्मतत्वेति बहवः । अस्योदात्तस्य इत उत्कृष्य शास्त्रान्ते कर्तव्यत्वेनोक्तत्वादसिद्धत्वात् , प्लुतोदात्तत्वस्याऽप्यसिद्धत्वाच्च शेषनिघातो नेति बोद्धव्यम् । पक्षे एकश्रुतिः । **विभाषा छन्दसि** । ननु विभाषाग्रहणं व्यर्थम्, वाग्रहणानुवृत्त्यैव सिद्धेः । न च 'यज्ञकर्मणी'त्यस्य निवृत्त्यर्थम्, इष्टानुरोधेन व्याख्यानत एव तन्निवृत्तेः सम्भवा-

छन्दसि। (१-२-३६) छन्दसि विभाषा एकश्रुतिः स्यात् । व्यवस्थितविभाषेयम्। संहितायां त्रैस्वर्यम्। ब्राह्मणे एकश्रुतिर्बह्वृचानाम्। अन्येषामपि

दात्तः। बुसशब्दः। प्रातिपदिकस्वरेणान्तोदात्तः। अलंबुसशब्दः फिट्स्वरेणान्तो-

---

दिति चेदुच्यते । आवृत्त्या विभाषाऽच्छन्दसीति पदच्छेदाऽर्थम् । तेन भाषायामपि पाक्षिकैकश्रुतिः। अत एव 'श्वेतो धावति अलम्बुसानां याता' इति द्व्यर्थं वाक्यमिति पस्पशान्ते भाष्यं सङ्गच्छते। अत्र श्वेत्यन्तोदात्तः। 'इत' इति 'ऊडिदम्, इत्यनेन। 'श्वेत' इति घृतादित्वादन्तोदात्तम्। अलमिति निपातत्वादाद्युदात्तम्, बुसशब्दोऽन्तोदात्तः,। एवमलम्बुसशब्दोऽपि। एकश्रुत्यभावे हि स्वरभेदे कथमेकं वाक्यं द्व्यर्थं स्यादिति बोद्धथम्। अत एव 'दाण्डिनायने'ति सूत्रे भाष्ये उक्तम्—'एकश्रुतिः स्वरसर्वनाम' इति। अत एवाभियुक्तानां विरुद्धस्वरकतत्पुरुषबहुव्रीह्याश्रयणेन श्लिष्टकाव्यादिनिर्माणं सङ्गच्छते। अत एव काव्यप्रकाशकृता 'वेद इव लोके स्वरो न विशेषावसायहेतु'रित्युक्तम्। एकश्रुत्या व्यवहारादिति तदाशयः। किमर्थं तर्हि 'भ्रल्युपोत्तम'मिति प्रक्रम्य 'विभाषा भाषाया'मिति सूत्रितमिति चेत्, त्रैस्वर्येण प्रक्रमे पाक्षिकानुदात्तत्वलाभायेति गृहाण। एतेन 'भाषायां स्वरो नास्त्येवे'ति भ्राम्यन्तः परास्ताः, स्वरविधौ छन्दोऽधिकाराऽभावाश्चेति दिक्। परे तु—संहितायां त्रैस्वर्यम्, ब्राह्मणे एकश्रुतिर्बह्वृचानाम्। तैत्तिरीयाणामुभयत्रापि त्रैस्वर्यमिति व्यवस्थितविभाषात्वमस्य छन्दसि स्वीकृतं कैश्चित्, तन्न युक्तम्, 'शाच्छो'रिति सूत्रे भाष्ये परिगणितव्यवस्थितविभाषास्वपाठात्। तत्र हि—'देवत्रातो गलो ग्राह इतियोगे च सद्विधिः। मिथस्तेन विभाष्यन्ते गवाक्षः संशितव्रत' इत्युक्तम्। अत एव केषुचिद्देशेषु स्वाध्यायकाले सर्ववेदानामैकश्रुत्येन पाठो दृश्यते। न चैवं छन्दोग्रहणवैयर्थ्यम्, छन्दसि त्रैस्वर्ये धर्माधिक्यम्, लोके तु समतेत्येतदर्थं तत्सत्त्वात्। त्वयापि छन्दोग्रहणसामर्थ्याद्भाषापेक्षया वैलक्षण्यं कल्प्यं व्यवस्थितविभाषात्वेन, मया त्वेवमिति विशेषाऽभावात्। न हि छन्दसीत्यनेन त्वदुक्तार्थोऽपि वाच्यत्वेन लभ्यते, 'एकश्रुतिः स्वरसर्वनामे'ति भाष्येणाप्येवं बोधनाच्च। यथा सर्वनामशब्दास्तदादयः सर्वपदस्थाने प्रयुज्यन्ते, एवं सर्वस्वरस्थाने एकश्रुतिः प्रयोक्तव्येति तदर्थः। अनेन स्पष्टमेव त्रैस्वर्यैकश्रुत्योरैच्छिकविकल्पविषयतोक्ता। वृत्तिकारोऽपि छन्दसि ऐच्छिकमेवैकश्रुत्यमाह। इदानीं केषाञ्चिद्धर्माधिक्याय त्रैस्वर्येण पाठः, परम्परासंप्रदायेन अन्येषामैकश्रुत्येनेति संप्रदायश्रद्धाजाड्येन तु ते नान्यथा पठन्ति। नैतावता विकल्पस्यैच्छिकत्वभङ्गः। न च 'इन्द्रशत्रुर्वर्धस्वे'त्यूहे यज्ञकर्मणीत्यस्याऽप्रवृत्तौ अच्छन्दसीति च्छेदेन नैकश्रुत्यापत्तिः, धर्माधिक्याय त्रैस्वर्येण ऋत्विग्भिः

यथासंप्रदायं व्यवस्था। ३६६६ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। (१-२-३७) सुब्रह्मण्याख्ये निगदे 'यज्ञकर्मणि' (३६६३) इति 'विभाषा छन्दसि' (३६३५) इति च प्राप्ता एकश्रुतिर्न स्यात्स्वरितस्योदात्तश्च स्यात्। सुब्रह्मण्योम्। [सुब्रह्मणि साधुरिति यत्। नच 'एकादेश उदात्तेनोदात्तः' (३६५८) इति सिद्धे पुनरत्रेदमुदात्तविधानं व्यर्थमिति वाच्यम्। तत्रानुदात्त इत्यस्यानुवृत्तेः] ॐ असावित्यन्तः। तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः स्यात्। गार्ग्यो यजते। ञित्वात्प्राप्त आद्युदात्तोऽनेन बाध्यते। * अमु-

---

दात्तः। तत्र भाषायां यद्येकश्रुतिर्न स्यात्तर्हि स्वरभेदे कथमेकवाक्यं द्यर्थं स्यात्। न सु। सुब्रह्मण्याख्ये निगदे इति। अपादबन्धे गदिर्वर्तते। यथा गद्यमिति निः-शब्दः प्रकर्षे। ऋचैरपादबन्धं यजुरात्मकं यन्मन्त्रवाक्यं पठ्यते स निगदः। नितरां गद्यते इति कर्मणि 'नौ गदनद--' इत्यप्। तस्य च सुब्रह्मण्यशब्दोपलक्षकत्वात् सुब्रह्मण्याशब्दोऽयमित्यलक्ष्योलिङ्ग एव निगदविशेषस्य नाम। सुब्रह्मण्योमिति। 'तत्र साधुः' इति यत्। 'तित्स्वरितम्', 'यतोऽनावः' इति तु न, तत्र द्व्यच इत्यनुवृत्तेः टापा सहैकादेशः। 'स्थानेऽन्तरतमः' इति स्वरितः ततो निपातत्वादाद्युदात्तेन ओम्-शब्देन 'ओमाङोश्च' इत्युदात्तस्वरितयोरेकादेशः स्वरित एवेति हरदत्तादयः। असा-विति प्रथमान्तस्योपलक्षणम्। तदाह प्रथमान्तस्येति। गार्ग्य इति। 'गर्गादिभ्यो

पाठेनाऽदोषादित्याहुः। न सुब्रह्म। ननु विभाषित्यस्य व्यवस्थितविभाषात्वात्स्वरि-तस्य तूदात्त इति ज्ञापकाच्च सुब्रह्मण्यायां तदभावसिद्धौ 'ने'ति व्यर्थमिति चेन्न, व्यव-हित 'यज्ञकर्मणी'त्यस्यापि निषेधार्थं तत्सत्त्वात्। स्पष्टश्चेदं कात्यायनसूत्रे। तदाह यज्ञेत्यादि। एवञ्चेदं सूत्रं यज्ञकर्मणि, स्वाध्यायकाले च प्रवर्तते इत्याहुः। केचित्तु यज्ञकर्मण्येवास्य प्रवृत्तिः। नेति तु स्पष्टार्थमेव। तेन स्वाध्यायकाले स्वरित एव। 'विभाषा छन्दसी'ति तु व्यवस्थितविभाषात्वान्न। ततः परेषामनुदात्तानामेकश्रुतिश्चेति वदन्ति। सुब्रह्मण्योमिति। सुब्रह्मणि साधुरिति यत्। तित्स्वरितम्। टापा सहैका-देशोऽन्तरतमत्वात्स्वरितः। ओमिति निपातत्वादाद्युदात्तम्। तेनैकादेशोऽप्यान्तरत-म्यात्स्वरितः। 'एकादेश उदात्तेन' इति तु न प्रवर्तते, 'अनुदात्तस्ये'त्यस्यानुवृत्तेः। तस्याऽनेनोदात्तः। स्पष्टञ्चेदं भाष्ये। 'इन्द्रागच्छे' त्यत्र इन्द्रेत्यामन्त्रिताद्युदात्तं द्वितीय-वर्णोऽनुदात्तः। स च 'उदात्तादनुदात्तस्ये'ति स्वरितः,तस्यानेनोदात्तः। न चात्र कर्तव्ये स्वरितोऽसिद्धः। 'एतत्काण्डमुत्कृष्यते' इत्युक्तेः। अत एवाऽस्मिन्नुदात्ते शेषनिघातो न। एवमग्रेऽप्यूह्यम्। असावितीति। असाविति प्रथमान्तोप-

ष्येत्यन्तः। षष्ठ्यन्तस्यापि प्राग्वत्। दाक्षेः पिता यजते। * स्यान्तस्योपोत्तमं च। चाद्न्तश्चेन द्वावुदात्तौ। गार्ग्यस्य पिता यजते। * वा नामधेयस्य। स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात्। देवदत्तस्य पिता यजते। ३६६७ देवब्रह्मणोरनुदात्तः। (१-२-३८) अनयोः स्वरितस्यानुदात्तः स्यात्सुब्रह्मण्यायाम्। देवा ब्रह्माण आगच्छत। ३६६८ स्वरितात्संहितायामनुदात्तानाम्। (१-२-३९) स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात्। इमं मे गङ्गे यमुने सरस्वति। ३६६९ उदात्तस्वरित-

---

यम्'। अमुष्येति। षष्ठ्यन्तस्योपलक्षणम्। दाक्षेरिति। दक्षशब्दादपत्येऽत इञ्। अत्रापि ञित्स्वरः प्राप्तः। स्यान्तस्येति। स्येति रूपं विवक्षितं पूर्ववार्तिकारम्भात्। स्यशब्दान्तस्योपोत्तममन्त्यश्चोभयमुदात्तं भवति। देवब्रह्मणो। सुब्रह्मण्यायामेव देवा ब्रह्माण इति पठ्यते। तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते। देवा ब्रह्माण इति। देवब्रह्मणोर्वैयधिकरण्ये द्वयोरप्याद्युदात्तत्वम्। ततः परस्यानुदात्तस्य स्वरितः। तस्यानेनानुदात्तः। आमन्त्रितनिघातस्तूत्तरस्य न। पूर्वामन्त्रिताविद्यमानत्वेन पदात्परत्वाभावात्। यदा तु सामानाधिकरण्यं तदा 'विभाषितं विशेषवचने' इति पूर्वस्य पक्षे विद्यमानत्वात् पदात्परत्वाद् ब्रह्माण इत्यस्य निघातोऽपि भवति। अस्मिन् पक्षे देवशब्दे वशब्दस्यैवानेनानुदात्तत्वं विधेयम्। ब्रह्मग्रहणं तु न कर्तव्यम्। स्वरिति। अनुदात्तानामिति। जातौ बहुवचनम्। तेनैकस्य द्वयोर्बहूनां च भवति। एकस्य पचति। द्वयोः। अग्निमीळे पुरोहितम्।

लक्षणम्। एवममुष्येत्यपि षष्ठ्यन्तस्य। एतानि वार्तिकानि। गार्ग्य इति। नन्वनेनान्तस्योदात्तत्वेऽपि अस्याऽसिद्धत्वाच्छेषनिघाताऽभावे गाकारोऽनुदात्तो न स्यादिति चेन्न, इष्टापत्तेः। स्वरितोदात्तयोः समावेशवत्तयोरपि समावेशात्। स्यान्तस्येति। अत्र 'स्ये'ति विवक्षितम्, पूर्ववार्तिकारम्भात्। देवब्रह्मणोः। सुब्रह्मण्यानिगदान्तर्गतयोरित्यर्थः। देवा ब्रह्माण इति। इदं वैकल्पिकं 'देवब्रह्मणोरनुदात्तत्वमेके' इति भाष्यात्। पक्षे त्वेकश्रुतिः, दूरात्संबोधनसत्त्वात्। अत एव 'एकश्रुतिदूरा'दिति सूत्रे इदमेकश्रुतेरुदाहरणं भाष्ये उक्तम्। स्वरितात्संहितायाम्। अत्रानुदात्तानामिति बहुत्वमविवक्षितम्। तेन 'अग्निमीळे' इत्यादिसिद्धिः। बहुवचनोच्चारणं त्वनेकत्वे सर्वेषां यथा स्यात्। अन्यथा तस्मादिति परिभाषयाऽऽद्यस्यैव स्यात्। यदि तु 'स्वरविधौ सङ्घातः कार्यी'त्युच्यते तदा स्पष्टार्थम्। संहितायामित्येतज्ज्ञापयति 'अन्यत्र पञ्चमीनिर्देशे कालो न व्यवधायक' इति। तेन 'तिङ्ङतिङ' इति

उदात्तस्वरितपरस्य सन्नतरः । (१-२-४०) उदात्तस्वरितौ परौ यस्मात्तस्यानुदात्तस्यानुदात्ततरः स्यात् । सरस्वति शुतुद्रि व्यचक्षयत्स्वः 'तस्य परमाम्रेडितम्' (८३) ।

बहूनां तु मूल एव दर्शितम् । **इमं मे इति** । इदम्शब्दः प्रातिपदिकस्वरेणान्तोदात्तः। विभक्तिरनुदात्ता । तदादायत्वे 'अमि पूर्वः' एकादेश उदात्तः । मे इत्यनुदात्तम् । 'अनुदात्तं सर्वमपादादौ' इत्यधिकारात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' । तस्मात्परेषां गङ्गेप्रभृतीनामुदात्तानामेकश्रुतिः । सर्वे एते आमन्त्रितनिघातानुदात्ताः । ननु मे इत्यस्य स्वरितस्य उदात्तविधायकं प्रति त्रिपादीस्थत्वादसिद्धत्वं स्यात् । न च स्वरितादित्याश्रयात्सिद्धम् । 'क्व वः सुम्ना–' इत्यादौ चरितार्थत्वादिति चेन्मैवम् । 'तस्यादितः–' इत्यारभ्य नवसूत्र्याः स्वस्थानादुत्कृष्य शास्त्रान्ते भाष्यवार्तिकयोर्निवेशात् । 'न सुब्रह्मण्यायाम्–' इति सूत्रे स्वरितस्य तूदात्त इति वदता एव काण्डोत्कर्षस्य ज्ञापितत्वाच्च । न च सुब्रह्मण्ययोर्मिलित सिद्धः स्वरितोऽस्तीति वाच्यम् । तत्र 'एकादेश उदात्तेन–' इति सूत्रप्रवृत्तेरावश्यकत्वात् । तत्र ह्यनुदात्तस्य ग्रहणं नानुवर्तते । **उदात्त** । सन्नशब्देन नीचैरर्थ उच्यते । तेन त्वनुदात्तत्वं लक्ष्यत इत्याह **अनुदात्ततर इति** । प्रकर्षस्त्वन्यानुदात्तापेक्षः । **सरस्वतीत्यादि** । अत्र मेशब्दमाश्रित्य सरस्वतीत्यस्यामन्त्रितनिघातः । शुतुद्रिशब्दस्य तु न, पादादित्वात् । 'आमन्त्रितस्य' इति षाष्ठेन शुतुद्रीत्यस्योदात्तं प्रथममक्षरं तस्मिन्परे पूर्वस्य सरस्वतीकारस्य सन्नतरः । **व्यचक्षयत्स्व इति** । वीति उपसर्गत्वादाद्युदात्तः । ततः परस्याचक्षयदिति तिङन्तस्य

निघातः पदपाठेऽपि सिध्यति । **इमं मे इति** । मेशब्दोऽनुदात्तः, तस्योदात्तात् परत्वेन स्वरितः । न चाऽस्य स्वरितस्य प्रकृतसूत्रदृष्ट्याऽसिद्धत्वम्, न च स्वरितादित्याश्रयात्सिद्धत्वम्, 'क्व वः सुम्ने'त्यादौ चारितार्थ्यादिति वाच्यम्, 'तस्यादित' इत्यादिनवसूत्र्याः स्वस्थानादुत्कृष्य शास्त्रान्ते भगवता निवेशितत्वात् । अत एव 'देवब्रह्मणो'रिति सूत्रं सार्थकमित्याहुः । **उदात्तस्वरितप** । **सन्नः**–अनुदात्तः । **तस्यानुदात्तस्येति** । 'एकश्रुतिदूरा'दिति सूत्रस्थभाष्ये 'उदात्तादनुदात्ताऽनुरागवशादेकश्रुतिरुदात्ताऽनुदात्ता वेति सन्दिह्य, नोदात्ता, 'उच्चैस्तरां वा वषट्कारः' इति ज्ञापकात् । अतन्त्रन्तरनिर्देशः । नानुदात्ता, 'उदात्तस्वरितपरस्ये'त्यत्र 'सन्नतर' इति ज्ञापकात् । अतन्त्रं तरनिर्देशः । **अपर आह** एकश्रुतिरुदात्ता, उच्चैस्तरामिति ज्ञापकात् । तन्त्रं तरनिर्देशः, उच्चैर्दृष्ट्वा उच्चैस्तरामित्येतद्भवति । अनुदात्ता च, सन्नतर इति ज्ञापकात, तन्त्रं तरनिर्देशः, 'सन्नं दृष्ट्वा सन्नतर इति भवती'त्युक्तम् । तत्राद्ये ज्ञापकमेवं कैयटेनोक्तं–यद्येकश्रुतिरुदात्ता तदा, वषट्शब्दस्यापि 'यज्ञकर्मणी'त्येकश्रुतेः सिद्धत्वाद् 'उच्चैस्तरा'मिति सूत्रं नाऽकरिष्यत् । तेन हि पक्षे उदात्तः, पक्षे एकश्रुति

३६७० अनुदात्तं च । (८-१-३) द्विरुक्तस्य परं रूपमनुदात्तं स्यात् । दिवेदिवे ।

इति साधारणस्वराः ।

अथ धातुस्वराः ।

३६७१ धातोः । (६-१-१६२) अन्त उदात्तः स्यात् । गोपायतं नः ।

'तिङ्ङतिङः' इति निघातः । **स्वरिति** । न्यङ्स्वरौ स्वरिताविति स्वरितः तस्मिन् परे यकारस्य सन्नतरः । **साधारणस्वरा इति** । एकस्मिन् पदे पदद्वयेऽपि च वर्तमानत्वात्साधारण्यम् । 'आद्युदात्तश्च' 'ञ्नित्यादिर्नित्यम्' इत्यादयस्तु एकस्मिन्नेव पदे वर्तमानत्वान्न साधारणाः ।

प्रकृतिर्द्विधा । धातुः प्रातिपदिकं च । तत्र धातुस्वरानाह **धातोरिति** ।

विधीयते । एवमनुदात्तत्वे एकश्रुत्यनुवृत्त्यैव सिद्धे सन्नतरग्रहणमनर्थकम् । तस्मादुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुति'रिति । अन्त्यमते 'उच्चैर्दृष्टे'ति प्रतीकमुपादाय सोमस्याग्ने वीही३ वौष' डिति मन्त्रे यज्ञकर्मण्येकश्रुतौ प्राप्तायां तदपेक्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते । सति चैकश्रुतेरुदात्ताऽनुरागे तदपेक्षः प्रकर्षो युज्यते । यथा मलिने वस्त्रे शौक्ल्यानुरागे तदपेक्षो वस्त्रान्तरे शुक्लतरव्यपदेशः । 'सन्नं दृष्टेति' । एकश्रुतिगतमित्यर्थः । एवञ्च पक्षद्वयेऽपि स्वभाविकोदात्तानुदात्तापेक्षयोदात्ततरानुदात्ततरयोर्न कश्चिच्छ्रुतौ विशेषः, नाऽप्युच्चारणे यत्नविशेष इति लभ्यते । सप्तस्वरगणनायामपि भाष्ये उदात्ततरानुदात्ततरौ एकश्रुतिगतोदात्ताद्यपेक्षयैवातिशयविशिष्टौ बोध्यौ । अनुदात्तस्य च तद्विधानन्त्वेकश्रुतिबाधनार्थम् । यत्त्वेकश्रुतेः स्थाने सन्नतरविधानमिति, तन्न, मानाऽभावात् । किंचैकश्रुतिपदस्य षष्ठ्यन्तत्वकल्पने न मानम् । अपि चैकश्रुतिशब्दस्य स्त्रीलिङ्गत्वेन 'स्वरितपरस्ये'ति लिङ्गविरोधः । एकश्चैकश्रुतिविषये एवाऽस्य विधानमिति 'अग्निं कन्ये'त्यादावपि सन्नतरापत्तिरित्यपास्तम् । अनुदात्तानामित्युपक्रमात्सर्वेषां माभूदन्त्यस्यैव यथा स्यादित्यर्थं परग्रहणम् । नन्वेवं सति नवसूत्र्याः शास्त्रान्ते उत्कर्षेणाऽसिद्धत्वाद्गङ्गे इत्यादिवत्स्वरस्वतीकारस्यापि पूर्वेणैकश्रुतिः प्राप्नोति, मम तु न दोषः । तस्या एव स्थाने सन्नतरविधानादिति चेन्न । अत्र पाठेन परस्परं प्रतिनवसूत्र्या असिद्धत्वाऽभावबोधनात् । अन्यं प्रति त्वसिद्धत्वमस्त्येव । एतेनाऽयं सन्नतर एकश्रुतेरिव 'उदात्तादनुदात्तस्ये'ति स्वरितस्यापि परत्वाद्बाधकः स्यादिति 'नोदात्तस्वरितोदय'मिति सूत्रं व्यर्थं स्यादिति परास्तमित्याहुः । **शुतुद्रीति** । आमन्त्रितत्वेऽपि पादादित्वान्न निहतम् । **इति साधारणस्वराः** ।

अथ धातुस्वराः । प्रकृतिर्द्विधा—धातुः, प्रातिपदिकञ्च । तत्रादौ सर्वमूल-

असि सत्यः । ३६७२ स्वपादिर्हिंसामच्यनिटि । (६-१-१८८) स्वपादीनां हिंसेश्चानिटयजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् । स्वपादिरदाद्यन्तर्गणः । स्वपन्ति । श्वसन्ति । पक्षे प्रत्ययस्वरेण मध्योदात्तता । ङित्येवेष्यते । नेह, स्वपानि । हिनसानि । ३६७३ अभ्यस्तानामादिः । (६-

'कर्षात्वतः-' इत्यत अन्तउदात्त इत्यनुवर्तते । तदाह **अन्त उदात्त इति । गोपायेति** । यकाराकारस्योदात्तत्वे तमित्यस्य 'तास्यनुदात्तेत्-' इत्यनुदात्तत्वे 'उदात्तादनुदात्तस्य-' इति स्वरितः । 'बहुवचनस्य वस्नसौ' इति नसादेशस्य, 'स्वरितात्संहितायाम्-' इति प्रचयापरपर्याया एकश्रुतिः। **असीति** । अस्तेः सिप् 'तासस्त्योः-' इति सलोपः । अकारस्योदात्तत्वम् । ततः परस्य स्वरितः । सत्यशब्दे सकारस्य 'उदात्तस्वरितपरस्य' इत्यनुदात्ततरादेशः । **स्वपादि** । 'तास्यनुदात्तेत्-' इत्यतो लसार्वधातुकमित्यनुवर्तते तदच्यनिटीति संबन्धादिदं सप्तम्यन्तं संपद्यते । तदाह **अनिट्यजादावित्यादि । अदाद्यन्तर्गण इति** । आ गणान्तादिति भावः । **हिंसन्तीति** । हिंसि हिंसार्थो रुधादिः । 'श्नान्नलोपः' । 'श्नसोरल्लोपः' । **ङित्येवेष्यत इति** । वृत्त्यनुरोधादेतदुक्तम् । भाष्ये तु प्रायेणेदं न दृश्यते । एवं च हिनसानीत्यत्राद्युदात्तत्वमपि पक्षे भवति । यदि तु आद्युदात्तत्वं पक्षे नेष्यते तर्हि व्यवस्थितविभाषाश्रयणाश्र । केचित्तु स्वपानीत्यत्रैतदभावे धातुस्वरेणाद्युदात्तत्वमेवेति विशेषाभावादयं विधिर्न प्रवर्तते तत्साहचर्याद्धिनसानीत्यत्राप्ययं न प्रवर्तते इति वृत्तिकाराशयं कल्पयन्ति । **हिनसानीति** । अत्र श्नमः 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति न्यायाद् धातुग्रहणे नकाराकार उदात्तः । ततः परस्य स्वरितत्वम् । अनिटि किम् । स्वपितः । 'रुदादिभ्यः सार्वधातुके' इतीट् । **अभ्यस्तानाम्** । 'आदिः सिचोऽन्यतरस्याम्' इत्यत आदिरिति वर्तमाने पुनरादिग्रहणं नित्यार्थम् । अन्यथाऽऽदिग्रहण-

त्वाद्धातुस्वरामाह **धातोः** । 'कर्षात्वतः' इत्यतोऽन्त उदात्त इति वर्तते । **गोपायतमिति** । गुपेरन्तोदात्तादयः । तदन्तमप्यन्तोदात्तम् । एकाच्चपि व्यपदेशिवद्भावादस्य प्रवृत्तेः । येऽपि उपदेशेऽनुदात्ताः पचादयस्तेष्वप्ययं विधिः, अनुदात्तोपदेशस्येणिनषेधविधौ चारितार्थ्यात् । पिबाद्यादेशानामाद्युदात्तत्वनिपातनसामर्थ्यात्तेषु नाऽयं विधिः। **स्वपादि** । अदादिषु आगणान्तात् स्वपादयः । 'लसार्वधातुक'मित्यस्य सप्तम्या विपरिणामः, 'अच्यनिटी'ति सप्तमीदर्शनात् । अनिटीति किम् ? स्वपितः । अचीति किम् ? स्वप्यात् । लेति किम् ? चानशि—स्वपानः । सार्वधातुकेति किम् ? सुषुपतुः । **ङित्येवेति** । नैतद्भाष्ये दृष्टम् । **अभ्यास्तानामादिः** । आदिरित्यनुवर्तमाने पुनरादिग्रहणं नित्यार्थम् । अचीति किम् ? दद्यात् । अनिटीति किम् ? जक्षिथ

१-१८९) अनिटयजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः। ये ददति प्रिया वसु। परत्वाच्चित्स्वरमयं बाधते। दधाना इन्द्रे। ३६७४ अनुदात्ते च। (६-१-१९०) अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः। दधासि रत्नं द्रविणं च दाशुषे। ३६७५ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति। (६-१-१९२) भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात्। योऽग्निहोत्रं जुहोति। ममत्तु नः परिज्मा। जजनत्। माता यद्वीरं दधनत्। जागर्षि त्वम्। ३६७६ लिति। (६-१-

---

संबद्धमन्यतरस्यांग्रहणमनुवर्तेत। अचि किम्। दद्यात्। अनिटि किम्। जज्ञिथ। **ये ददतीति**। डुदाञ् दाने लटि झिः। तस्य 'अदभ्यस्तात्' इत्यदादेशः। 'श्नाभ्यस्तयोः–' इत्यालोपः। **चित्स्वरमिति**। 'चितः' इत्यनेन विहितमन्तोदात्तस्वरमित्यर्थः। **दधानेति**। लटः शानजादेशः। **अनुदात्ते च**। न विद्यते उदात्तो यस्मिन्निति बहुव्रीहिस्तदाह **अविद्यमानेत्यादि**। अन्यथा हि शास्त्रीयेऽनुदात्ते गृह्यमाणे मा हि स्म दधादित्यत्र नित्यत्वादन्तरङ्गत्वाद्वा इकारलोपे कृते आद्युदात्तत्वं न स्यात्। बहुव्रीहौ विज्ञाते तु भवति। हिशब्दो 'हि च' इति निघातनिषेधार्थः। **भीह्री**। आद्युदात्तस्यापवादोऽयम्, तत्र मदिर्दिवादिः। दरिद्राजाग्रावदादी। अन्ये तु जुहोत्यादयः। उदाहरणानि—बिभेति जिह्रेति बिभर्ति। 'भृञामित्' इत्यभ्यासस्येत्वम्। **ममत्त्विति**। मदेर्लोट् 'बहुलं छन्दसि' इति शपः श्लुः। **जजनत्, दधन-**

इदं सूत्रं 'जक्षती'त्यत्र झिनिमित्तनिघाते प्राप्ते आद्युदात्तार्थम्। **अनुदात्ते च**। अच्यनिटीति निवृत्तम्। अनुदात्ता इति बहुव्रीहिरित्याह **अविद्यमानेति**। अत एव 'मा हि स्म दधा'दित्यादौ नित्यत्वादिकारलोपे कृतेऽप्ययं स्वरः प्रवर्तत एव। अभ्यस्तानामिति किम्? ऊर्णोति। चकास्तीत्यादावाद्युदात्तार्थमिदम्। ददातीत्यत्राऽन्तरङ्गत्वात्पूर्वं धातुस्वरेऽन्तोदात्ते ततो द्वित्वे शेषनिघातेनोभयोरन्तोदात्तत्वाऽभावेऽपि पर्यायेणोभयोस्तत्त्वप्राप्ताविदम्। स्पष्टा चेयं रीतिः 'परस्मैपदाना'मिति सूत्रे भाष्ये। न च धातोरित्यस्याद्युदात्तप्रकरणपाठेनाद्युदात्तविधायकत्वेऽनुदात्ते चे'ति न कर्तव्यमिति धातोरिति सूत्रस्थभाष्यमसङ्गतम्, त्वदीत्या तस्याद्युदात्तविधायकत्वेप्यस्यावश्यकत्वादिति वाच्यम्, स्थाने द्विर्वचनमाश्रित्य पूर्वपक्षिणा तथोक्तावपि पक्षद्वयेऽपि कर्तव्यत्वाभिप्रायेण 'क्रियते न्यास एवे'ति सिद्धान्त्युक्त्या दोषाऽभावात्। अस्य धातोरित्यत्रान्तग्रहणानुवृत्तिज्ञापकतापरकैयटस्तु चिन्त्य एवेत्यन्यत्र विस्तरः। **भीह्री**।

१९३) प्रत्ययात्पूर्वमुदात्तम् । चिकीर्षकः । ३६७७ आदिर्णमुल्यन्यतर-

दिति । जन जनने, धन धान्ये । आभ्यां लट् तिप् 'इतश्च' इतीकारलोपः 'लेटोऽडाटौ' इत्यट् । दरिदाति । जागर्ति । पिति किम् । दरिद्रति । अत्र परत्वादाकारलोपे कृते इकारस्योदात्तत्वं मा भूत् । ननु पूर्वग्रहणं व्यर्थं प्रत्यये पितीत्येवोक्ते 'तस्मिन्निति निर्दिष्टे' इति पूर्वस्यैव भविष्यति । न च पितः पूर्वमेव कार्यमन्यथा स्यात् पिदन्तं मा भूदित्येवमर्थं तदिति वाच्यम् । कथं पुनः सप्तमीनिर्देशे तदन्तस्य प्रसङ्गः । एतदेव ज्ञापयति सौवर्यः सप्तम्यस्तदन्तसप्तम्य इति । तेन 'उपोत्तमं रिति' रित्प्रत्ययान्ते उपोत्तममुदात्तं भवति। चङ्यन्यतरस्यां चङन्तस्येत्यर्थो न तु रिति परतश्चङि परत इति। नन्वेवं 'चतुरः शसि' इत्यत्रापि शसन्तस्य प्राप्नोति शस्ग्रहणसामर्थ्यान्न भविष्यति। यदि हि 'चतुरः शसि' इत्यनेन शस उदात्तत्वमिष्टं स्यात्तत 'ऊडिदंपदाद्' इत्यस्यानन्तरं चतुरश्चेत्येव ब्रूयात् । तत्रासर्वनामस्थानग्रहणानुवृत्त्या 'षट्त्रिचतुर्भ्यो हलादिः' इति हलादेरुदात्तविधानाच्च शस एव भविष्यति । **लिति** । पूर्वसूत्रात्प्रत्ययात्पूर्वमिति वर्तते । तदाह **प्रत्ययात्पूर्वमिति** । तेन स्वरविधौ सप्तम्यास्तदन्तत्वज्ञापनात्

अत्र 'लसार्वधातुक'मिति मण्डूकप्लुत्या संबध्यते । **ममत्त्विति** । मदी हर्षे इत्यस्य श्यन्विकरणत्वेऽपि छान्दसः शप श्लुः । भ्यादीनां किम् ? ददाति । 'अनुदात्ते चे'ति तु 'मिमीते' इत्यादौ सावकाशम् । तत्र हि माङो ङित्त्वाल्लसार्वधातुकानुदात्तत्वम् । अभ्यस्तानां किम् ? मायति । [सार्वधातुके किम् ? बेभीयात् । यङ्लुगन्तादाशीर्लिङि]। पिति किम् ? जागृतम् । लसार्वधातुक इति स्पष्टार्थम् । ननु प्रत्ययादिति किमर्थम् , भ्यादिभ्यः परस्य पितः प्रत्ययस्यैव सम्भवादिति चेन्न, प्रत्ययात्पूर्व एवोदात्तो यथा स्यात् , सङ्घात उदात्तो माभूदिति । न चोदात्तत्वादीनामज्धर्मत्वेन 'पिती'ति सप्तम्या निर्दिष्टपरिभाषाप्रवृत्त्या अलोऽन्त्यपरिभाषया चाऽन्त्यस्यैव भविष्यतीति वाच्यम्, 'स्वरविधौ सङ्घातः कार्यी'त्यर्थस्यापि ज्ञापनात् । एवञ्च 'अलोन्त्यस्ये'त्यादीनामप्रवृत्तिः । अत एव 'कर्षाऽऽत्वतः' इति सूत्रेऽन्तग्रहणं चरितार्थम् । यद्यप्यनेकोदात्तानां न यौगपद्यम् , युगपद्ग्रहणात् , तथापि पर्यायेण सर्वेषां स्यात् , तदभावार्थं प्रत्ययादिति चरितार्थम्, तेन 'आसीनः' इत्यादौ 'चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेने'ति सिद्धम् । अन्यथा चित्त्वेनाऽन्तोदात्तत्वमनुदात्तत्वञ्चादेरित्यसम्भवाऽभावाद्विप्रतिषेधोऽसङ्गतः स्यादिति दिक् । नन्वेवमपि 'प्रत्यये पिती'त्येवोच्यतां किं पूर्वग्रहणेन ? नचाऽभ्यस्तानां लसार्वधातुके इत्यनुवृत्त्या पितोऽप्रत्ययस्याऽसम्भवेन प्रत्यय इति व्यर्थमिति वाच्यम्, पूर्वोक्तार्थज्ञापनार्थमावश्यकत्वात् । 'प्रत्यय' इत्युक्तौ तु सामर्थ्यान्निर्दिष्टपरिभाषायाः पुनः प्रवृत्त्याऽव्यवहितस्यैव ग्रहणमिति न दोष इति चेन्न,

स्याम्। (६-१-१९४) अभ्यस्तानामादिरुदात्तो वा णमुलि परे। लोलूयं-

लिदन्तस्य स्वरो न शङ्कनीयः। चिकीर्षक इति। चिकीर्षेति। सन्नन्तात्ण्वुल् तस्याकादेशः। सनोऽतो लोपः। ककारेकार उदात्तः। नचाल्लोपस्य स्थानिवत्त्वम्। स्वरविधौ तन्निषेधात्। क्वचित्पुस्तके मौरिकिविधम्। ऐषुकारिभक्तमिति दृश्यते। तत्र 'मौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ' इति 'विषयो देशे' इत्यस्मिन्नर्थे यथाक्रमं मौरिकिशब्दादैषुकारिशब्दाच्च विधल्भक्तलौ ज्ञेयौ। आदिर्णमुलि। अभ्यस्ताना-

'सौवर्यः सप्तम्यस्तदन्तसप्तम्यः' इति ज्ञापनार्थत्वात्। प्रत्ययादिति पञ्चम्योत्तराङ्गविकल-परिभाषाप्रवृत्त्याऽव्यवहितपूर्वस्य कार्यिण एव पूर्वशब्देन ग्रहणान्न दोषः। इदञ्च ज्ञापकस्य विशेषाऽपेक्षत्वान्निर्दिष्टपरिभाषाविषय एव प्रवर्तते। अत एव 'रिक्ते विभाषे'-त्यादौ न दोषः। तत्र हि–पूर्वोत्तरसाहचर्यान्न परिभाषाविषयः। वस्तुतः 'षष्ठ्यर्थे सप्तमी'त्येव ज्ञाप्यते। तदन्तविधिस्तु 'येन विधि'रिति परिभाषया न्यायसिद्धः। 'चतुरः शसी'त्यत्र च यथा नाऽस्याः प्रवृत्तिस्तथा वक्ष्यते। अत्र बहवः–इदं सामान्या-पेक्षम्, तेन 'ञ्नित्यादि'रित्यादावपि प्रवृत्तिः। न चैवं 'गर्गाः' इत्यादौ 'यञञोश्चे'ति लुकि आद्युदात्तत्वप्रसङ्गः, इत्पदघटितेऽनुबन्धनिमित्तस्वरे कर्तव्ये आङ्गत्वाऽभावेऽपि [प्रत्यये परतः पूर्वकार्यत्वाऽभावेऽपि] 'लुमता लुप्ते प्रत्ययलक्षणं नास्ती'त्यर्थस्य 'संज्ञा-यामुपमान'मित्यनेन ज्ञापनान्न दोषः। तद्धि चञ्चेत्यादावाद्युदात्तत्वाय। अन्यथा कनो लुपि प्रत्ययलक्षणेन 'ञ्नित्यादि'रित्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत एव 'अत्रयः' इत्यत्र ढको लुकि न दोषः। वस्तुतः 'अत्रयः' इत्यादौ न दोषः, कार्यिणोऽभावेन प्रत्ययलक्षणाऽप्रवृत्तेः। प्रत्ययलक्षणेन हि तन्निमित्तमन्यस्य कार्यमतिदिश्यते न तु तस्यैव स्थानिवत्त्वं प्रतिपाद्यते, असतः प्रसङ्गाऽभावेन स्थानिवत्त्वबाधात्। अत एव नखभिन्न इत्यादावैसादिकं न। 'मा हि दाता'मित्यादौ 'आदिः सिच' इत्यस्य प्रवृत्तये–'इत्पदघटिते'ति। पथिप्रियो माथिप्रिय इत्यत्र च 'पथिमथोः सर्वनामस्थाने' इत्येत-त्स्वरनिवृत्त्यर्थं 'न लुमताऽङ्गस्ये'ति सूत्रभाष्यपठितम्– 'अत्र लुमता लुप्ते प्रत्ययलक्षणं नेष्यते' इति वचनमेव शरणम्। यदि प्रागुक्तं ज्ञापकं–'क्वचित्स्वरे कर्तव्ये प्रत्ययलक्षणं ने'त्येव, 'क्वचि'दित्युक्त्या च 'आमन्त्रितस्य च' 'सर्वस्य सुपी'त्यादौ न दोष इत्युच्यते तदा न काचिद्दोषशङ्केति वदन्ति। केचित्तु विशेषापेक्षमेतत्–यत्र तदन्तग्रहणसत्त्वा-ऽसत्त्वाभ्यां स्वराश्रयकार्यिभेदस्तत्रैवैतत्प्रवृत्तिरिति। 'भौही'त्यत्र हि पूर्वग्रहणाऽभावे तदन्तस्य कार्यित्वे प्रत्ययान्तानां भ्यादीनामलोन्त्यस्य भवन्नुदात्तः प्रत्यया-ऽन्त्यस्य स्यात्। सप्तम्यर्थपुरस्कारे तु पितमपहाय भ्यादीनामेवोदात्तः स्या-दिति स्पष्टस्तद्भेदः। 'उपोत्तमं रिति' 'चङ्यन्यतरस्या'मित्यत्रापि दारिद्र-

मिति। यद्यपि लोलूयमिति प्रतीकमुपादाय एकाज्सु धातुषु लित्स्वरस्यास्य च

धातुविषये फलभेदः । 'ञ्नित्यादि'रित्यादौ न तद्भेदः, उभयथापि प्रकृतेरादेरेवोदात्तत्वात्, अतस्तत्र परसप्तम्येव। एवञ्च 'गर्गाः' इत्यादौ 'न लुमते'ति निषेधादेव न दोष इति। पथिमथ्यर्थमपि वचनं नावश्यकम्। ननु सूत्रद्वये 'रितः' 'चङ' इति षष्ठीनिर्देश एवास्तु, किं परिभाषयेति चेन्न, लाघवार्थत्वात्। ननु 'चतुरः शसी'त्यत्र फलभेदस्य स्पष्टत्वेन पक्षद्वयेऽपि एतत्परिभाषाप्रवृत्तिर्दुर्वारा। तथा च शस एवोदात्तत्वं स्यादिति चेन्न, 'चतुरः शस' इत्येव वक्तव्ये मध्ये विजातीयसप्तम्यन्तपाठेन तदप्रवृत्तेरित्याहुः इदं चिन्त्यम् 'उपमानं' 'सञ्ज्ञाया'मिति सूत्रस्थभाष्यविरोधात्। किंच 'सर्वस्य सुपी'त्यत्राऽप्येवं सति तदन्तसप्तमी न स्यात्। तथा च 'नलुमते'ति निषेधापत्तौ सर्वस्तोमाऽसिद्धिः। 'चतुरः शसी'त्यस्याऽपि लाघवार्थताया वक्तुं शक्यत्वाच्च। 'न लुमता' इति सूत्रस्थभाष्यन्तु लुमति प्रतिषेधे एकपदस्वरस्योपसङ्ख्यानं सर्वामन्त्रितसिज्लुक्स्वरवर्जम्, प्रयोजनं ञ्निकिर्त्कल्लुक्स्वराः, पथिमथोः सर्वनामस्थाने लुकी'ति वार्तिकव्याख्यानपरम्। 'उपमान'मिति सूत्रस्थन्तु तत्प्रत्याख्यानपरमिति न तयोर्विरोधः। इमानि च वार्तिकानि—'नलुमताङ्गस्येत्यत्राऽङ्गाधिकारः प्रतिनिर्दिश्यते' इति पक्ष इव 'प्रत्यये परतः पूर्वस्य कार्यमात्रे प्रतिषेध' इति पक्षेऽप्यावश्यकानि, सौवरीणां सप्तमीनान्तदन्तसप्तमीत्वात्। 'उत्तरपदत्वे चाऽपदादिविधौ' इतिवत्। 'ञ्निकित्किःस्वरस्याऽनाङ्गत्वात् प्रतिषेधाऽप्राप्ति'रिति कैयटस्तूपलक्षणम्। इह 'किंचिदङ्गाधिकारे लुमता लुप्ते प्रत्ययलक्षणेन भवति, किञ्चिच्चाऽन्यत्र न भवती'ति सूत्रशेषस्थभाष्ये। 'किञ्चिच्चे'तिशब्देनाहृदेदातीत्यत्राऽसुपीति प्रतिषेधो ग्राह्य इति न कश्चिद्भाष्यविरोधः। 'किञ्चिच्चे'ति प्रतीके ञ्निकित्किस्वरा इति कैयट उपलक्षणतया व्याख्येय इति सुधियो विभावयन्तु। लिति। अत्राभ्यस्तानामिति न सम्बध्यते, छलो लित्करणात्। चिकीर्षक इति। अत्र परत्वादल्लोपः। न च स्वरो नित्यः, शब्दान्तरस्य प्राप्त्या तस्याऽनित्यत्वात्। लोपोऽप्यनित्यः, स्वरभिन्नस्य प्राप्तेः। स्वरदीर्घयलोपेषु लोपाऽजादेशस्य स्थानिवत्त्वनिषेधादीकार उदात्तः। आदिर्णमुल्यन्यतरस्याम्। अभ्यस्तानामिति। 'णमुली'त्यस्य 'सौवर्ये' इति न्यायेन तदन्तसप्तमीत्व एतत्पञ्चम्या विपरिणम्यते। अभ्यस्तात्परो यो णमुल् तदन्ते आदिरुदात्त इत्यर्थः। तेन जागरंजागरम्, लोलूयं-लोलूयमित्यादेः सिद्धिः। लोलूयिषं-लोलूयिषमित्यादौ च नातिप्रसङ्गः। लोलूयं-लोलूयमित्यादावल्लोपस्य स्थानिवत्त्वन्तु न, स्वरे तन्निषेधात्। एवञ्च विशेषाऽभावमभिप्रेत्य परसप्तम्येव मूले उक्ता। अभ्यस्तानामिति किम्? कण्डूयंकण्डूयम्। एतेन 'अमैवे'ति सूत्रे 'उच्चैःकार'मित्युदाहरणेऽस्योपन्यासो हरदत्तकृतश्चिन्त्यः।

लोलूयम्। पक्षे व्रित्स्वरः। ३६७८ अचः कर्तृयकि। (६-१-१९५) उपदेशेऽजन्तानां कर्तृयकि परे आदिरुदात्तो वा। लूयते केदारः स्वयमेव। ३६७९ चङ्यन्यतरस्याम्। (६-१-२१८) चङन्ते धातावुपोत्तममुदात्तं वा।

विशेषाभावादनेकाज्ज्ञुदाहृत इति हरदत्तग्रन्थादभ्यस्तेति निवृत्तमिति प्रतीयते तथाप्यार्थिकार्थकथनपरतया नेयम्। णमुलि पर इति। यद्यपि सौवर्यः सप्तम्यस्तदन्तसप्तम्य इति 'भीह्री-' इति सूत्रे व्यवस्थापितत्वाद् णमुलन्तस्यादिरुदात्तो भवतीति सूत्रार्थेन भाव्यं तथापि फले विशेषाभावादेवमुक्तमिति प्रतिभाति। लोलूयं लोलूयमिति। यङन्ताण्णमुल्। 'नित्यवीप्सयोः' इति द्वित्वम्। अथ प्रथमो लोलूयशब्द आद्युदात्तः। लू इति स्वरितः। ततश्चत्वारः प्रचयाः। अचः। इह कीर्यत इत्यादौ इत्वे रपरत्वे च सति अयं स्वर इष्टस्तन्निवारणार्थं 'तास्यनुदात्तेत्-' इति सूत्रे समासैकदेशोऽप्युपदेशशब्द इहानुवर्तते सप्तम्या च विपरिणम्यते। तदाह उपदेशेऽजन्तानामिति। नन्वेवम् 'एकं द्वादशधा जज्ञे' इत्यादावविवान्तर्भूतण्यन्तात्कर्मकर्तृविषयाद् जनेर्लटि जायते स्वयमेवेत्यत्रैव स्वरो न स्यात्। 'ये विभाषा' इत्यात्वे सति उत्तरकालमजन्तत्वेऽपि उपदेशेऽनजन्तत्वादिति चेन्मैवम्। ये इति विषयसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवात्वप्रवृत्तेरित्याहुः। कर्तृयकीति। कर्तृवाचिनि सार्वधातुके विहितो यो यक् तस्मिन् परे। लूयत इति। आदिमध्यौ पर्यायेणोदात्तौ 'तस्यानुदात्तेत्' इति ते इत्यस्यानुदात्तत्वम्। चङ्यन्यतरस्याम्। 'उपोत्तमं रिति' इत्यतः उपोत्तममिति वर्तते तदाह उपोत्तममिति। त्र्यादीनामन्त्यमुत्तमं

अभ्यस्तानामित्यनुवृत्तिपरवृत्तिविरोधात्। यदि तु व्यवस्थितविभाषाश्रयणेनातिप्रसङ्गनिरासमङ्गीकृत्य तदनुवृत्तिरनावश्यकीति तदाशयस्तदा 'शाच्छो'रिति सूत्रस्थेन व्यवस्थितविभाषापरिगणनपरेण भाष्येण विरोधः। लोलूयंलोलूयमिति। आभीक्ष्ण्ये द्वित्वम्। परो लोलूयशब्दोऽनुदात्तः। लो-लू इत्युभयमप्युदात्तम्। न च तत्र कर्तव्येऽल्लोपस्य स्थानिवत्त्वम्, स्वरविधौ तन्निषेधात्। शेषनिघातः। अचः कर्तृयकि। अत्रापि तदन्तसप्तमीत्वे न फले विशेषः। उपदेशेऽजन्तप्रकृतिककर्तृयगन्तस्याऽऽदिरुदात्त इत्यर्थात्। लूयते केदार इति। पक्षे यक्स्वरेण मध्योदात्तम्। उपदेशे किम्? कीर्यते इत्यादावित्वे रपरत्वे चाऽयं स्वरो यथा स्यादिति। इदञ्च 'तास्यनुदात्ते'दिति सूत्रात्समासैकदेशस्याप्युपदेशपदस्यानुवृत्त्या सप्तम्या विपरिणामेन च लब्धम्। न चैवं जनेरन्तर्भावितण्यर्थात्कर्मकर्तरि 'जायते स्वयमेव' इत्यत्र न स्यात् उपदेशेऽजन्तत्वाऽभावादिति वाच्यम्, ये इति विषयसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवाऽऽत्वप्रवृत्तेः। 'उपदेशे' इत्यस्य च यगुपदेशे इत्यर्थ इति दिक्। लू-य इत्यादिमध्यौ

मा हि चीकरताम्। धात्वकार उदात्तः। पक्षान्तरे चङुदात्तः।

इति धातुस्वराः।

अथ प्रातिपदिकस्वराः।

३६८० कर्षात्वतो घञोऽन्त उदात्तः। (६-१-१५९) कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात्। कर्षः। शपा निर्देशात्तुदादेराद्युदात्त एव। कर्षः। पाकः। ३६८१ उञ्छादीनां च। (६-१-१६०) अन्त उदात्तः

तस्य समीपमुपोत्तमम्। मा हि चीकरतामिति। अदुपदेशात्परत्वेन लसार्वधातुकानुदात्तत्वे कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तः। उपोत्तमग्रहणानुवृत्त्या द्वयोर्न। मा हि दधत्। अत्र 'विभाषाधेट्श्व्योः' इति चङ्। इति धातुस्वराः।

कर्षाऽऽत्वतः। 'ञ्नित्यादिर्नित्यम्' इत्यस्यापवादः। आदस्यास्तीति आत्वान्। 'तसौ मत्वर्थे इति भत्वाज्जश्त्वाभावः। कर्षश्चात्वांश्चेति समाहारद्वन्द्वः। कर्ष इति शबन्तस्यानुकरणं न शबन्तस्य। तदाह शपो निर्देशादिति। पाक इति।

पर्यायेणोदात्तौ। चङ्यन्य। 'उपोत्तमं रिति' इत्यत उपोत्तमग्रहणमनुवर्तते। चङुदात्त इति। तिङ् तु अदुपदेशात्परत्वेन 'तास्यनुदात्ते'दित्यनुदात्तः। उपोत्तमं किम्? मा हि दधत्। अत्र चङ एव स्वरः। इति धातुस्वराः।

श्रीः। अथ प्रातिपदिकस्वराः। ते च प्रायेण कृत्तद्धितप्रत्ययबलेनैव ज्ञेयाः, उणादिषु उणादिप्रत्ययैः, अव्युत्पत्तिपक्षे फिट्सूत्रैः, क्वचिद्विशिष्य विधानादित्यूह्यम्। अत एव पुत्रीयतेः क्विपि पुत्रीरित्यादौ सर्वानुदात्तत्वमेव। अत एव 'कर्मण्य'णिति सूत्रे मासशब्दस्य 'नब्विषयस्ये'ति फिट्स्वरमाशङ्क्य 'मनेर्दीर्घश्चे' त्यौणादिकसप्रत्ययान्तत्वादन्तोदात्तता कैयटेनोक्ता। 'मांसमेकः पिंशती'त्यादि लक्ष्यमपि तथैव। आज्यशब्दे तु 'आङ्पूर्वादञ्जेः क्य'बिति पक्षे आद्युदात्तत्वं स्पष्टमेव। यत्पक्षे तु 'नब्विषयस्ये'त्याद्युदात्तत्वं बोध्यम्। कर्षात्वतः। कर्षतेराकारवतश्च परो यो घञ् तदन्तस्येत्यर्थः। 'ञ्नित्यादि'रित्यस्यापवादोऽयम्। वतिकिम्? आदन्तादित्यर्थे युक् आदन्तभक्तत्वाद्दाय इत्यत्रैव स्यान्न तु पाक इत्यादौ। घञाक्षिप्तधातुविशेषणत्वात्तदन्तविधिः। 'स्वरविधौ व्यञ्जनमविद्यमानव'दिति तु नास्ति, स्वरोद्देश्यकविधेरभावात्। युक्तो निर्दिश्यमानपरिभाषया आकारावयवत्वेऽपि आकारान्ताद्धातोर्विहित इत्यर्थः स्यादिति बोध्यम्। यद्यपि निर्दिश्यमानपरिभाषया घञ एवोदात्तत्वम्, तथाप्यन्तग्रहणं 'स्वरविधौ सङ्घातः कार्यो'ति ज्ञापितत्वादादेरन्तस्य च पर्यायेण मा भूदित्यर्थम्। एवञ्च स्वरविधौ निर्दिश्यमानपरिभाषाया अप्यप्रवृत्तिरित्याहुः। उञ्छादी।

स्यात् । उञ्छादिषु युगशब्दो घञन्तोऽगुणो निपात्यते कालविशेषे रथाद्यवयवे च । वैश्वानरः कुशिकेभिर्युगेयुगे । अन्यत्र । योगेयोगे तवस्तरम् । भक्षशब्दो घञन्तः । गावः सोमस्य प्रथमस्य भक्षः । उत्तमशश्वत्तमावपि । उदुत्तमं वरुण । शश्वत्तममीळते । ३६८२ **चतुरः शसि ।** (६-१-१६७) चतुरोऽन्त उदात्तः शसि परे । चतुरः कल्पयन्तः । 'अचि र' (२९९) इति रादेशस्य पूर्वविधौ

पचेर्घञ् । 'चजोः–' इति कुत्वम् । **कालविशेष इति** । कृतद्वापरादौ । **भक्षशब्द इति** । भक्ष अदने चुरादिः । 'अनित्यण्यन्ताश्चुरादयः' इति यदा णिज् नास्ति तदा घञ् । ण्यन्तात्तु 'एरच्' इत्यचि सिद्धम् । एरजण्यन्तानामिति तु नास्तीत्याहुः । **उत्तमशश्वत्तमाविति** । तमबन्तावेतौ । तेन द्रव्यप्रकर्षविवक्षायामामभावः । द्वित्वा० नुदात्तत्वे प्राप्ते पाठः । **चतुरः** । 'चतेरुरन्' नित्त्वादाद्युदात्तत्वे प्राप्तेऽन्तोदात्तार्थमिदम् । ननु चतस्रः पश्येत्यत्र चतसृ अस् इति स्थिते परत्वाद् 'अचि र ऋतः'

उञ्छम्लेच्छजञ्जजल्पा घञन्ताः । **जपव्यधाव**बन्तौ । वध इति पाठस्तु चिन्त्यः, उदात्तनिवृत्तिस्वरेण सिद्धेः । **गरो** विषेऽबन्तोऽन्तोदात्तः, अन्यत्राद्युदात्तः । **वेदवेगवेष्टबन्धाः** । करणे घञन्ताः, भावे आद्युदात्ता एव । 'स्तुयुद्रुवश्छन्दसि' । समासार्थमिदम् । परिष्टुत् , सुयुत् , परिद्रुत् । **वर्त्तनिः स्तोत्रे'** । स्तोत्रे सामनि वर्तमानो वर्त्तनिशब्द उञ्छादिः, अन्यत्र मध्योदात्तः । **श्वभ्रे**–दरः, अन्यत्राऽबन्तत्वादाद्युदात्तः । **साम्बतापौ**–भावगर्हायाम् , अन्यत्राद्युदात्तः । **मन्थभोगदेहा**–घञन्ताः । उञ्छादिराकृतिगण इति बहवः । **घञन्त इति** । णिजभावे । णिचि तु एरचैव सिद्धेः । 'एरजण्यन्ताना'मिति तु नास्ति । **चतुरः शसि** । अत्र 'सौवर्यैः सप्तम्यः' इति न प्रवर्त्तते, अन्यथा 'चतुरः शस' इत्येव वदेत् । **नेहेति** । तकाराऽकारस्य नेत्यर्थः । 'स्वरे ने'ति निषेधस्तु लोपरूपाऽजादेशस्यैव । स्वविधौ स्थानिवत्त्वाऽभावात्तस्यापि न । तस्मादाद्युदात्तैवेति भावः । केचित्तु चतस्रादेशे आद्युदात्तनिपातनसामर्थ्यात् 'चतुरः शसि' इति न प्रवर्त्तते । न च चतसृणामित्यत्र 'षट्त्री'ति विभक्तिस्वरस्यापि बाधापत्तिः, हलादिग्रहणसामर्थ्येन तदबाधात् । तथा हि—षट्त्रिचतुरां बहुवचनविषयत्वाद् द्विवचनैकवचने न स्तः । उपसमस्ते सम्भवेऽपि विहितविशेषणाच्च दोषः । तत्र षड्भ्यो जश्शसोर्लुगेव, अन्या हलादयः । त्रिशब्दे जसि नेदम्, असर्वनामस्थान इत्यधिकारात् , शसि 'एकादेश उदात्तेने'त्यनेन सिद्धम्, अन्या हलादयः । तिसर्यपि 'तिसृभ्यो जसः' इत्यनेन भाव्यम् , 'तिस्रः

स्थानिवत्त्वान्नेह । चतस्रः पश्य । चतेरुरन् । नित्वादाद्युदात्तता । ३६८३ झल्युपोत्तमम् । (६-१-१८०) षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यात् । अध्वर्युभिः पञ्चभिः । नवभिर्वाजैर्नवती च । सप्तभ्यो जायमानः । आदशभिर्विवस्वतः । उपोत्तमं किम्–आ षड्भिर्हूयमानः । त्रिभिः । झलि किम्–नवानां नवतीनाम् । ३६८४ विभाषा भाषायाम् । (६-१-१८१) उक्तविषये । ३६८५ सर्वस्य सुपि । (६-१-१९१) सुपि

इति रेफादेशे तकाराकारस्योदात्तत्वं प्राप्नोति । अत आह **अचि र इति** । **स्थानिवत्त्वादिति** । न च स्वरविधौ स्थानिवत्त्वनिषेधः । 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्' इति नियमात् । **झल्युपोत्तमम्** । 'षट्त्रिचतुर्भ्यो हलादिः' इत्यस्यापवादः । **पञ्चभिरित्यादि** । पञ्चनवसप्तदशशब्दाः कनिनन्ताः । **आ षड्भिरिति** । षट्शब्दः फिट्स्वरेणान्तोदात्तः । तनोतेर्डिः । त्रिः । अयमपि फिट्स्वरेण प्रत्ययस्वरेण वान्तोदात्तः । उभयत्रापि 'षट्त्रिचतुर्भ्यो हलादिः' इति विभक्तेरुदात्तत्वम् । **नवानामिति** । अत्रापि विभक्तिरुदात्ता । **विभाषा** । **उक्तविषय इति** । षट्त्रिचतुर्भ्यः परा या झलादिर्विभक्तिस्तदन्तस्योपोत्तमं भाषायामुदात्तं वा स्यात् । पञ्चभिः सप्तभिः तिसृभिः चतुर्भिः। पक्षे 'षट्त्रिचतुर्भ्यो हलादिः' इत्यन्तोदात्तानि । **सर्वस्य** । सर्वशब्द उञ्छादिष्वन्तोदात्तो निपातितः । सर्वस्य विकारः सार्व इत्यत्र

पश्येत्यत्र 'उदात्तयणः' इत्यनेन भाव्यम् । चतुःशब्दे जसि असर्वनामस्थान इत्यनुवृत्त्या न दोषः । तस्माच्चतस्रः पश्येत्येव व्यावर्त्यम् । यदि निपातस्वरोऽस्य विभक्तिस्वरस्य बाधकः स्याद्धलादिग्रहणमनर्थकं स्यात् । न च 'चतुरः पश्ये'ति तद्व्यावर्त्यम् । 'चतुरः शसी'त्यारम्भसामर्थ्येन तस्य बाधात् । न च गौणे चरितार्थम्, वार्तिकप्रामाण्येन तत्राऽप्रवृत्तेरित्याहुः, तन्न 'तिसृभ्यो जसः' इति सूत्रस्थेन 'उपसमस्तार्थमेके' इति भाष्येण जस्ग्रहणवद्धलादिग्रहणस्याऽपि तदर्थकत्वसूचनात् । वार्तिकव्याख्यानभाष्ये स्थितमपि भगवता दूषितमेव । तस्मादिति परिभाषया न विहितविशेषणसम्भव इति तदाशयः । एवं हलादिग्रहणसार्थक्यं मनसि निधाय ज्ञापकाऽसम्भवं मत्वा 'नैव वा पुनश्चतस्रः पश्येत्यत्र स्वरः प्राप्नोती'त्यादिग्रन्थेन मूलोक्तयुक्त्यैव साधितम् । तस्माद्गौणे 'षट्त्री'त्यादे 'श्चतुरः शसी'त्यादेश्च प्रवृत्तिरस्त्येव सत्यभिधाने इति भाष्यसम्मतमिति ध्येयम् । **झल्युपोत्तमम् । तदन्ते पदे इति** । सौवरीणां सप्तमीनां तदन्तसप्तमीत्वादिति भावः । 'षट्त्री'त्यस्यापवादः । **आ षड्भिरिति** । 'आ' इति भिन्नं पदम् । **विभाषा भाषायाम्** । पक्षे

परे सर्वशब्दस्यादिरुदात्तः स्यात्। सर्वे नन्दन्ति यशसा। ३६८६ **ञ्नित्यादिर्नित्यम्**। (६-१-१९७) ञिदन्तस्य निदन्तस्य चादिरुदात्तः स्यात्। यस्मिन्विश्वानि पौंस्या। पुंसः कर्मणि ब्राह्मणादित्वात् ष्यञ्। सुते दधिष्व नश्चनः। चायतेरसुन् (उ.) चायेरन्ने ह्रस्वश्च इति चकारादसुनो नुडागमश्च। ३६८७ **पथिमथोः सर्वनामस्थाने**। (६-१-१९९) आदिरुदात्तः स्यात्। अयं पन्थाः। सर्वनामस्थाने किम्-ज्योतिष्मतः पथो रक्ष। उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदम्। ३६८८ **अन्तश्च तवै युगपत्**। (६-१-२००) तवैप्रत्यया-

---

'अनुदात्तादेरञ्' इत्यनुदात्तलक्षणोऽञ् यथा स्यात्। श्रवणं तु सर्वत्रानुदात्तस्यैव प्रत्ययलक्षणेनापि सर्वस्वरस्येष्यमाणत्वात्। **ञ्नित्यादि**। 'भोह्री–' इति सूत्रे पूर्वग्रहणेन 'सौवर्यः सप्तम्यस्तदन्तसप्तम्य' इति ज्ञापितत्वात् तदन्तसप्तमीयमित्याह **ञिदन्तस्येति**। **पथिमथोः**। 'गमेरिनिः'। 'उषः कित्'। मन्थः। 'पतेः स्थ च' इतीनिप्रत्ययान्तावेतावन्तोदात्तौ। मन्थः कित्त्वादुपधालोपः। **पन्था इति**। 'पथिमथ्यृभुक्षामात्' 'थो न्थः' **पथ इति**। भस्य टेर्लोपः **उदात्तनिवृत्तिस्वरेणेति**। 'अनुदात्तस्य च यत्रोदात्तलोपः' इति विभक्तिरुदात्ता। **दातवा उ इति**। ददातेः 'कृत्यार्थे तवैकेन्केन्यत्वनः इति तवैप्रत्ययः। ऐकारस्यायादेशः। 'लोपः शाकल्यस्य' इति यलोपः। युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम्। अन्यथा एकवर्जमिति वचनाद्यौगपद्यं

'षट्त्री'त्यन्तोदात्तत्वम्। **सर्वस्य सुपि**। सर्वशब्दश्च गणेऽन्तोदात्तो निपातितः। उञ्छादिपाठाद्वाऽन्तोदात्तः। एवञ्च 'सुपि किम्? सर्वतरः' इति वृत्त्युक्तं चिन्त्यम्, प्रत्ययलक्षणेन तत्राऽपि सुबन्तत्वात्। अत्यन्तस्वार्थिकस्तरबादिस्तु न भाष्यारूढः, अत्र सुपीत्युक्तेः। तत्फलन्तु सर्वस्य विकारः सार्वं इत्यत्राऽनुदात्तादिप्रकृतिकसुबन्तलक्षणाऽञ्सिद्धिः। श्रवणन्त्वनुदात्तस्यैव। प्रत्ययलक्षणेनाऽपि सर्वस्वरस्येष्यमाणत्वात्। सप्तमीनिर्देशस्तु लाघवार्थः, सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात्। 'सर्वस्वरोऽनकच्कस्ये'ति वक्तव्यम्। सर्वके। अत्रान्तोदात्त एव। **ञ्नित्यादि**। 'सौवर्यः' इत्यस्य सामान्यतः प्रवृत्तिमभिप्रेत्याह **ञिदन्तस्येति**। ननु जुगुप्सेत्यादौ धातुसञ्ज्ञातः परत्वान्नित्स्वरे कृते सन्नन्तस्य धातुत्वे सतिशिष्टत्वाद्धातुस्वरः प्राप्नोतीति चेन्न, सनो नित्त्वसामर्थ्येन सतिशिष्टस्यापि बाधेनाद्युदात्तत्वसिद्धेः। न च 'सन्यङो'रित्यादौ विशेषणार्थः सः, अन्यथा 'वत्स' इत्यत्रापि स्यादिति वाच्यम्, धातोरित्यनुवर्त्य सशब्दान्तधातोर्द्वित्वविधानेनाऽदोषात्। **पथिमथोः सर्वे**। पथिमथिशब्दावन्तोदात्तौ। अत्र सौवरीणां सप्तमीनां तदन्तपरत्वेऽपि 'लुमता लुप्ते प्रत्ययलक्षणं

न्तस्याद्यन्तौ युगपदाद्युदात्तौ स्तः । इधंसे दातवा उ । ३६८६ क्षयो निवासे । (६-१-२०१) आद्युदात्तः स्यात् । स्वे क्षये शुचिव्रत । ३६९० जयः करणम् । (६-१-२०२) करणवाची जयशब्द आद्युदात्तः स्यात् । जयत्यनेन जयोऽश्वः । ३६९१ वृषादीनां च । (६-१-२०३) आदिरुदात्तः । आकृतिगणोऽयम् । वाजेभिर्वाजिनीवती । इन्द्रं वाणीः । ३६९२ संज्ञायामुपमानम् । (६-१-२०४) उपमानशब्दः संज्ञायामाद्युदात्तः । चञ्चेव चञ्चा । कनोऽत्र लुप् । एतदेव ज्ञापयति क्वचित्स्वरविधौ प्रत्ययलक्षणं नेति । संज्ञायां किम्-अग्निर्माणवकः । उपमानं किम्-चैत्रः । ३६९३ निष्ठा च द्व्यजनात् । (६-१-२०५) निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो न स्वाकारः । दत्तः । द्व्यच् किम्-चिन्तितः अनात्किम्-त्रातः । संज्ञायामित्यनुवृत्तेर्नेह । कृतम् । हृतम् ।

न स्यात् । क्षयो । निवासेऽभिधेये क्षयशब्द आद्युदात्तः । स्वे क्षये इति । क्षि निवासगत्योः । क्षयन्ति निवसन्ति यस्मिन्नित्यधिकरणे 'पुंसि संज्ञायाम्-' इति घः । निवासे किम् । व्याधेः क्षयः । क्षि क्षये 'एरच्' । कर्तरि षष्ठी । जयः । जयोऽश्व इति । पुंसीति करणे घः । करणे किम् । जयो ब्राह्मणानाम् । भावे 'एरच्' । वृषादीनाम् । वृषु सेचने इगुपधलक्षणः कः । वाजेभिरिति । वजेर्घञ् । 'कर्षात्वतः-' इत्यन्तोदात्ते प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तः । संज्ञायाम् । चञ्चेति । उपमानशब्दोऽयमुपमेयस्य संज्ञा । कनो लुबिति । 'इवे प्रतिकृतौ' इति कनो 'लुम्मनुष्ये' इति लुप् । ननु प्रत्ययलक्षणेन नित्वाद् 'ञ्नित्यादिर्नित्यम्' इत्येव सिद्धमत आह एतदेवेति । निष्ठा । दत्त इति । ददातेः क्तः 'दो दद्घोः' इति दतादेशः । चिन्तित इति । चिति स्मृत्याम् । चुरादिः । कृतं हृतमिति । प्रत्यय-

---

नेष्यते' इति भाष्यम् । तेन पथिप्रिय इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्त एव । सुपन्था इत्यादावपि प्रत्ययलक्षणं नास्त्येव । समासाद्या विभक्तिः सा तु न पथिमथोर्विहितेति न तत्राप्यस्य प्रवृत्तिः । क्षयो निवासे । क्षियन्ति निवसन्त्यस्मिन्नित्यधिकरणे 'पुंसि सञ्ज्ञाया'मिति घः । निवासे किम् ? क्षयश्चो राणामित्यादावेरजन्तत्वादन्तोदात्तत्वमेव । जयोऽश्व इति । तेनैव करणे घः । अन्यत्रैरजन्तोदात्तत्वम् । वृषादीनाञ्च । वृषु सेचने । इगुपधलक्षणः कः । आकृतिगण इति । फिट्सूत्रेषु 'ग्रामादीनाञ्चे'ति पठितं सोऽप्याकृतिगणः । एवञ्चाऽविहितायुदात्तस्य वृषादित्वम्, ग्रामादित्वं वा बोद्धयम् । अन्तोदात्तस्य तृञ्जादित्वम् , घृतादित्वं वा बोद्धयम् । एवञ्च द्वाभ्यामेव सूत्राभ्यां सर्वेष्टसिद्धावितरसूत्रद्वयप्रणयनं कर्तृभेदान्न दोषायेति दिक् । एतदेवेति । एतच्चोपपादितम् । निष्ठा च द्व्यजनात् । आकारभिन्न आदि-

३६६४ शुष्कधृष्टौ । (६-१-२०६) एतावाद्युदात्तौ स्तः असंज्ञार्थमिदम् । अतसं न शुष्कम् । ३६६५ आशितः कर्ता । (६-१-२०७) कर्तृवाची आशितशब्द आद्युदात्तः । कुषस्मिस्फाज आशितम् । ३६६६ रिक्ते विभाषा । (६-१-२०८) रिक्तशब्दे वाऽऽदिरुदात्तः । रिक्तः । संज्ञायां तु 'निष्ठा च द्व्यजनात्' (३६११) इति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन । ३६६७ जुष्टार्पिते च छन्दसि । (६-१-२०९) आद्युदात्ते वा स्तः । ३६६८ नित्यं मन्त्रे (६-१-२१०) एतत्सूत्रं शक्यमकर्तुम् । जुष्टो दमूनाः । षळर आहुरर्पितम् । इत्यादेः पूर्वेणैव सिद्धेः । छन्दसि पाठस्य व्यवस्थिततया

स्वरेणान्तोदात्तावेतौ । असंज्ञार्थमिति । संज्ञायां तु 'निष्ठा च द्व्यजनात्' इत्येव सिद्धम् । शुष्कमिति । शुषेः क्तः तस्य 'शुषः कः' इति कादेशः । आशितः । कर्तृवाचीति । आङ्पूर्वादश भोजनेऽस्मात्कर्तरि क्तो निपात्यते । अपर आह । कर्तेत्यनेन भूतपूर्वगत्या अणौ कर्ता णौ कर्मीभूत एव विवक्षितः । तथा चाशेरण्यन्तस्य प्रयोज्यकर्तरि 'गतिबुद्धिप्रत्यवसानार्थ–' इति कर्मसंज्ञके निष्ठायामाशित इति रूपमिति । रिक्त इति । रिचिर् विरेचने । संज्ञायामित्यादि । 'निष्ठा च द्व्यजनात्' इत्यस्यावकाशः । गुप्तः । अस्य त्ववकाशः असंज्ञायां रिक्तो घट इति । संज्ञायामुभयप्रसङ्गे पूर्वविप्रतिषेधः, रिक्तो नाम कश्चित् । जुष्टार्पिते । जुष्टः । अर्पितः इत्येते शब्दरूपे छन्दसि विषये आद्युदात्ते वा स्तः । जुषी प्रीतिसेवनयोः क्तः । 'श्वीदितो निष्ठायाम्' इतीण्निषेधः । जुष्टः । अर्तेर्णिच् । 'अर्ति–' इत्यादिना पुक् । अर्पितः । नित्यम् । जुष्टार्पिते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते स्तः । पूर्वेणैव सिद्धेरिति । ननु पक्षेऽन्तोदात्तत्वमपि प्राप्नोतीत्याशङ्क्याह छन्दसीत्यादि । न केवलं गतार्थत्व-

---

रित्यर्थः । निष्ठेत्यादि षष्ठ्यर्थे प्रथमा । 'अयाक्' इत्यादावेकादेशस्य बहिरङ्गाऽसिद्धत्वादनादिति प्रतिषेधो न । आशितः क । सकर्मकादप्यशेः कर्तरि क्त उपधादीर्घश्चात्रैव निपात्यते । आङ्पूर्वत्वे क्तमात्रम् । 'आङ्पूर्वादविवक्षितकर्मत्वेनाऽकर्मकत्वात्कर्तरि क्त' इति वृत्तिः । विवक्षाऽविवक्षयोश्च प्रयोगाधीनत्वान्नाऽनिष्टापादनमिति तदाशयः । आङ्पूर्वत्वे 'थाथघ' मित्यस्याप्यपवादोऽयम् । अन्ये तु ण्यन्तात्कर्मण्येवाऽयं क्त इति कर्तेत्यनेन चाऽणौ कर्ता णौ कर्मीभूत एव विवक्षित इत्याहुः । तदुभयमपि भाष्याऽसम्मतम् । रिक्ते विभाषा । पूर्वोत्तरसाहचर्याद्रिक्तशब्दे विद्यमान आदिरित्यर्थः, न तु तत्र परे इत्यर्थः । रिक्त इति । पक्षे प्रत्ययस्वरेणाऽन्तोदात्तः । जुष्टार्पिते । वा स्त इति । पक्षे, भाषायाञ्च प्रत्ययस्वरेणाऽन्तोदात्तौ । 'जुषी प्रीतौ'त्यतः 'श्वीदितो निष्ठाया'मितीट्प्रतिषेधः । अर्तेर्णिच् । 'अर्तिह्री'ति

विपरीतापादनयोगात् । अर्पिताः षष्टिर्न चलाचलासः । इत्यत्रान्तोदात्तदर्शनाच्च । ३६९९ युष्मदस्मदोर्ङसि । ६-१-२११) आदिरुदात्तः स्यात् । नहिषस्तव नो मम । ३७०० ङयि च । (६-१-२१२) तुभ्यं हिन्वानः । मह्यं वातः पवताम् । ३७०१ यतोऽनावः । (६-१-२१३) यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो नावं विना । युञ्जन्त्यस्य काम्या । कर्मेणिङन्तादचो यत् । [अनावः किम्-नवर्ति नाव्यानाम् ।] ३७०२ ईडवन्दवृशंसदुहां ण्यतः । (६-१-२१४) एषां ण्यदन्तानामादिरुदात्तः । ईड्यो नूतनैरुत । आजुह्वान

मात्रं किं त्वारभ्यमाणे सूत्रे दोषोऽप्यस्तीत्याह अर्पिताः षष्टिरित्यादिना । युष्मदस्मदोः । 'युष्यसिभ्यां मदिक्' इति मदिक्प्रत्ययान्तोदात्तौ । ममेति । 'युष्मदस्मद्भ्यां ङसोऽश्' 'तवममौ ङसि' इति मपर्यन्तस्य ममादेशः । शेषे लोपः । 'अतो गुणे' पररूपत्वम् 'एकादेश उदात्तेनोदात्तः' इति विभक्तेरुदात्तत्वे प्राप्ते इदमुच्यते । ङयि च । योगविभागो यथासंख्यनिवृत्त्यर्थः । तुभ्यं मह्यमिति । 'ङे प्रथमयोरम्' । 'तुभ्यमह्यौ ङयि' । यतः 'तित्स्वरितम्' इत्यस्यापवादः । 'निष्ठा च द्व्यजनात्' इत्यतो द्व्यजनुवर्तते । तदाह द्व्यच इति । अत्र 'अनावः' इति निषेधो ज्ञापयति 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति । अन्यथा य आदिर्नकारो नासौ स्वरयोग्यः, यश्च स्वरयोग्य आकारो नासावादिरिति प्रतिषेधोऽनर्थकः स्यात् । अनावः किम् । नावा तार्यं नाव्यम् । 'नौवयोधर्म–' इति यत् । द्व्यच् किम्, चिकीर्ष्यम् । उभयत्रापि तित्स्वरः । ईडवन्द । ईड स्तुतौ, वदि अभिवादनस्तुत्योः, वृङ् संभक्तौ, शंसु स्तुतौ, दुह प्रपूरणे । ण्यतो द्व्यनुबन्धकत्वाद्यद्ग्रहणेन ग्रहणं न प्राप्नोतीति वचनम् । ईड्य

पुक् । नित्यं मन्त्रे । न केवलं गतार्थतामात्रम्, किन्त्वारभ्यमाणे सूत्रे दोषोऽप्यस्तीत्याह अर्पिताः षष्टिरित्यादिना । 'सूत्रविरोधान्न पाठः प्रामादिकः । इदमेव ध्वनयितुं सूत्र'मित्यन्ये । युष्मदस्मदोः 'ङयि चे'ति । योगविभागो यथासङ्ख्यनिवृत्त्यर्थः । 'एकादेश उदात्तेन' इति विभक्तेरुदात्ते प्राप्ते वचनम् । यतोऽना । 'निष्ठा च द्व्यजना'दित्यतो द्व्यज्ग्रहणमनुवर्तते । नौभिन्नाद्विहितो यो यत्, तदन्तस्येत्यर्थः । 'अनाव' इति प्रतिषेधो ज्ञापयति—'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानव'दिति । हलादावादेरचोऽसम्भवात्तद्विषयकशास्त्रसामर्थ्येन हलोऽपि स्थाने उदात्तादिगुणकः कश्चित् स्यादित्यर्थाभिप्रायेण हलः स्वरप्राप्तिः । स्पष्टं चेदं भाष्ये । तित्स्वरितापवादोऽयम् । ईडवन्द । ण्यतो द्व्यनुबन्धकत्वात्पूर्वेणाऽसिद्धिरिति भावः । अयमपि तित्स्वरापवादः । 'अत्र वृङ एव ग्रहण'मिति 'एतिस्तुशासि'ति सूत्रे निरूपितम् ।

इंद्ध्यो वन्यश्च । अंहं नो धेहि वार्यम् । उक्थमिन्द्राय शंस्यम् । ३७०३ विभाषा वेणिन्धानयोः । (६-१-२१५) आदिरुदात्तो वा । इन्धानो अग्निम् । ३७०४ त्यागरागहासकुहश्वठक्रथानाम् । (६-१-२१६) आदिरुदात्तो वा । आद्यास्त्रयो घञन्ताः । त्रयः पचाद्यजन्ताः । ३७०५ मतोः पूर्वमात्संज्ञायां स्त्रियाम् । (६-१-२१९) मतोः पूर्वमाकार उदात्तः स्त्रीनाम्नि ।

इत्यादि । 'ऋहलोः-' इति ण्यत् । वार्यमिति । नन्वत्र 'एतिस्तुशासु-' इत्यादिना विशेषविहितेन क्यपा भाव्यमिति चेत्सत्यम् । क्यब्विधौ वृञ एव ग्रहणं नास्येति मूल एव स्पष्टम् । विभाषा । वेणुशब्दो नित्स्वरेण नित्यमाद्युदात्तः प्राप्तः । 'स्थो णुः' इत्यनुवर्तमाने 'जृवृरिभ्यो निच' इति व्युत्पादनात् । इन्धानशब्दो यदि चानशन्तस्तदा चित्त्वादन्तोदात्तः । यदा शानजन्तस्तदा लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः । 'श्नसोरल्लोपः' इति उदात्तस्य श्नसोऽकारस्य लोपात् सर्वथाप्यप्राप्तमाद्युदात्तत्वं पक्षे विधीयते । त्यागराग । त्यज हानौ । 'चजोः-' इति कुत्वम् । रञ्ज रागे 'घञि च भाव-' इति नलोपः । हसे हसने एषां पक्षे 'कर्षात्वतो घञोऽन्त उदात्तः' इति भवति । त्रयः पचाद्यजन्ता इति । कुह विस्मापने, श्वठ असम्यग्भाषणे, चौरादिकावदन्तौ । क्रथ हिंसायाम् । अत्र प्रत्ययस्वरेणान्तोदात्तत्वं पक्षे भवति । मतोः । मतोः पूर्व अकार इति । आर्थव्याख्यानमेतत् । सूत्रे

विभाषा । वेणुशब्दो नित्वादाद्युदात्तः प्राप्तः । 'स्थो णु'रित्यनुवर्तमाने 'अजिवृरीभ्यो निच' इति व्युत्पादितत्वात् । इन्धाने यदि चानश् तदाऽन्तोदात्तत्वं प्राप्तम्, यदि शानच् तदाऽप्यन्तोदात्तत्वमेव प्राप्तम् । यत्तु श्नसोऽकारस्योदात्तस्य लोपाल्लसार्वधातुकानुदात्तत्वे उदात्तनिवृत्तिस्वरेण शानजन्तो मध्योदात्त इति, तन्न, विदीन्धिखिदिभ्यो लसार्वधातुकानुदात्तत्वप्रतिषेधात् । केचित्त्वस्य वचनस्य तिङन्ते एव प्रवृत्तिः । भाष्ये प्रथमतो लिङित्युक्त्वाऽपि विशेषेणेत्युक्तेर्लिङ्भिन्ने लिङ्सदृशेऽकृदादेशिन्येव प्रवृत्तिप्रतीतेरित्याहुः । यदा वेणुरिव वेणुरिति कनो 'लुम्मनुष्ये' इति लुप्तदा 'सञ्ज्ञायामुपमान'मिति नित्यमाद्युदात्तत्वमिष्यते । त्यागराग । आद्यास्त्रय इति । तत्र 'कर्षात्वतः' इति पक्षेऽन्तोदात्तत्वं बोद्धयम् । अन्त्येषु त्रिषु प्रत्ययस्वरेणान्तोदात्तत्वम् । तत्र कुहश्वठौ चुरादावदन्तौ । मतोः पूर्वम् । पूर्वमिति शब्दस्वरूपापेक्षया नपुंसकस्य आदित्यस्य विशेषणम् । केचित्तु सूत्रे पूर्वशब्दं पुंल्लिङ्गं पठन्ति । 'स्त्रियां सञ्ज्ञाया'मित्यस्य स्त्रियां वर्तमाना या सञ्ज्ञा तस्यां विद्यमान आदित्यर्थः । तदाह स्त्रीनाम्नीति । मत्वन्तं चेत्स्त्रीनाम भवतीत्यर्थः । आत्किम्? इक्षुमती ।

उदुम्बरावती । शरावती । ३७०६ अन्तोऽवत्याः । (६-१-२२०) अवतीशब्दस्यान्त उदात्तः । वेत्रवती । ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् । ३७०७ ईवत्याः । (६-१-२२१) ईवत्यन्तस्यापि प्राग्वत् । अहीवती । मुनीवती ।

इति प्रातिपदिकस्वराः ।

अथ फिट्सूत्राणि ।

प्रथमपादः ।

१ फिषोऽन्त उदात्तः । प्रातिपदिकं फिट् । तस्यान्त उदात्तः स्यात् ।

तु शब्दस्वरूपापेक्षया नपुंसकनिर्देशः । केचित्तु सूत्रे पूर्वशब्दं पुँल्लिङ्गमेव पठन्ति । **शरावतीति** । चातुरर्थिको नद्यां मतुप् 'मादुपधायाः' इति वत्वम् । 'मतौ बह्वचोऽनजिरादीनाम्' शरादीनां च' इति दीर्घत्वम् । **वेत्रवतीति** । मतुप् । वत्वम् । न चात्र वत्वस्यासिद्धत्वादवतीशब्दोऽयं न भवतीति शङ्क्यम् । तस्याश्रयात्सिद्धत्वेनासिद्धत्वाभावात् । अवत्या इति निर्देशादिह न भवति राजवतीति स्वरविधौ व्यञ्जनस्याविद्यमानत्वाश्चायमवतीशब्दः । **अहीवतीति** । पूर्ववद्दीर्घः । संज्ञायामिति वत्वम् ।

इति प्रत्ययस्वराः ।

अथ फिट्सूत्राणि । फिषोऽन्त उदात्तः । फिडिति पूर्वाचार्यप्रसिद्धया

अत्र 'ह्रस्वनुड्भ्यां मतु'बित्येव । सञ्ज्ञायां किम् ? खट्वावती । स्त्रियां किम् ? उदुम्बरावान् । उदाहरणेऽत्र च 'मतौ बह्वचोऽनजिरादीनाम्' 'शरादीनां चे'ति दीर्घः, चातुरर्थिके 'नद्यां मतुप्' । मतोः किम् ? गवादनी । तदभावे पूर्वग्रहणस्याऽप्यभावात्सञ्ज्ञाशब्दसंबन्धिन आकारमात्रस्य स्यादिति । पूर्वग्रहणाश्चेह—सानुमती । अन्यथा स्त्रीनाम्नो मत्वन्तस्येत्यर्थः स्यात् । **अन्तोऽवत्याः** । वत्या—अन्त इति तु नोक्तम्, 'राजवती'त्यत्र माभूदिति । स्वरविधौ नलोपस्याऽसिद्धत्वाच्चाऽवतीशब्दः, किन्तु न्वतीशब्दः । वत्वं त्वाश्रयात्सिद्धम् । **अहीवतीति** । 'सञ्ज्ञाया'मिति वत्वम् । 'शरादीनां चे'ति दीर्घः । योगविभागश्चिन्त्यप्रयोजनः ।

अथ फिट्सूत्राणि । अपाणिनीयान्यप्येतानि 'आद्युदात्तश्च' 'उपसर्गादिति—' 'अवङ् स्फोटायनस्ये'त्यादिसूत्रेषु भाष्यादौ व्यवहृतत्वादविरुद्धत्वाच्च साधुत्वज्ञापकानि भवन्ति । यत्तु पाणिनीयान्येवैतानीति, तन्न, 'वृषादीनाञ्च' 'उञ्छादीनाञ्चे'त्याभ्यामाकृतिगणाभ्यां क्रमेणाद्युदात्तत्वाऽन्तोदात्तत्वयोः सिद्धयोः 'ग्रामादीनाञ्च'

उच्चैः । २ पाटलाऽपालङ्काम्बासागरार्थानाम् । एतदर्थानामन्त उदात्तः । पाटला, फलेरुहा, सुरूपा, पाकलेति पर्यायाः । लघावन्त इति प्राप्ते । अपालङ्क, व्याधिघात, आरेवत, आरग्वधेति पर्यायाः । अम्बार्थः । माता । उनर्वन्नन्ता-नामित्याद्युदात्तत्वे प्राप्ते । सागरः । समुद्रः । ३ गेहार्थानामस्त्रियाम् । गेहम् । नब्विषयस्येति प्राप्ते । अस्त्रियां किम्-शाला । आद्युदात्तोऽयम् । इहैव पर्युदासा-ज्ज्ञापकात् । ४ गुदस्य च । अन्त उदात्तः स्यान्न तु स्त्रियाम् । गुदम् । अस्त्रियां किम्-आन्त्रेभ्यस्ते गुदाभ्यः । स्वाङ्गशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् । तत-

---

प्रातिपदिकमुच्यते । तदाह प्रातिपदिकं फिडिति । ननु कथमपाणिनीयानि सूत्राण्युपन्यस्यन्ते, पाणिनीयसूत्रैर्यः स्वर आयाति स एव प्रमाणम्, तथा च 'शताच्च ठन्यतावशते' इति सूत्रे कैयटः—'नियतकालाश्च स्मृतयो व्यवस्थाहेतवः' इति मुनि-त्रयमतेनाथत्वे 'साध्वसाधुप्रविभागः' इति । नैतत् । अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रीयन्ते भाष्याज्ज्ञापकात् । तथा च 'आद्युदात्तश्च' इति सूत्रे भाष्यं 'प्राति-पदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्ति' इति । तथा तस्मिन्नेव सूत्रे प्रत्यया-द्युदात्तत्वस्यावकाशः । यत्रानुदात्ता प्रकृतिः समत्वं सिमत्वमिति । नहि फिषोऽन्त उदात्तः स्वतत्वसमसिमेत्यादिफिट्सूत्राश्रयणं विना प्रकृतेरन्तोदात्तं सर्वानुदात्तत्वं च संभवतीति दिक् । पाट । पाटलेत्यादय ओषधिविशेषस्य वाचकाः । लघावन्त इति प्राप्त इति । इदं पूर्वेण परेण च संबध्यते । पर्याया इति । वृक्षविशेषस्य वाचकाः सागरसमुद्रयोः 'लघावन्ते-' इति प्राप्ते । गेहा । गेहार्थानामन्त उदात्तः स्यात्स्त्रियां

'घृतादीनाञ्च'त्यनयोर्वैयर्थ्यापत्तेः । मम तु भिन्नकर्तृकत्वान्न दोषः । फिषोऽन्तः । 'फिडि'ति प्रातिपदिकस्य पूर्वाचार्यसञ्ज्ञा । उच्चैर्वृत्त इति । नन्वत्रोदि चेर्डैसिः, त्रयेः सः किदिति व्युत्पादनात्प्रत्ययस्वरेणैवाऽन्तोदात्तत्वसिद्धिरिति चेन्न, अव्युत्पत्ति-पक्षे आवश्यकत्वात् । पाटलापालङ्का । पाटलाऽपालङ्कौ ओषधिविशेषस्य वाचकौ । लघावन्त इति प्राप्ते इति । पूर्वपराऽन्वयीदम् । इदमुपलक्षणम्—क्वचिद् ह्रस्वान्त-स्येत्यादीनामपि दुर्वारत्वादित्याहुः । सागर इत्यादि । अत्रापि 'लघावन्ते, इति प्राप्तम् । आद्युदात्तोऽयमिति । नन्वनेनाऽन्तोदात्तत्वाऽभावेऽपि नियमत आद्यु-दात्तत्वं केन स्यात् , विधायकाऽभावात् , अतोऽनियम इति वक्तुं युक्तमित्यत आह इहैवेति । एषां सूत्राणामाद्यसूत्रबाधकबाधनार्थत्वाद् अस्त्रियामित्येतदभावे स्त्रिया-मप्यनेन बाधकं बाध्येत । बाधकं चाऽनेनैवानुमीयते । तत्र मध्योदात्तत्वस्याऽत्राऽ-सम्भवात्सर्वानुदात्तविधायकस्य च फिट्सूत्रेष्वदर्शनादाद्युदात्तविधायकमेवेति भावः । स्त्रीविषयेति । आद्युदात्तत्वमित्यन्ये । गुदमिति । 'नब्विषयस्ये'ति, 'स्वाङ्ग-

शाप् । ५ घ्यपूर्वस्य स्त्रीविषयस्य । घकारयकारपूर्वो योऽन्त्योऽच् स उदात्तः । अन्तर्गा । स्त्रीविषयवर्णनाम्नामिति प्राप्ते । छाया । माया । जाया । यान्तस्यान्त्यात्पूर्वमित्याद्युदात्तत्वे प्राप्ते । स्त्रीति किम्-बाह्यम् । यञन्तत्वादाद्युदात्तत्वम् । विषयग्रहणं किम्-इभ्या क्षत्रिया । 'यतोऽनावः' (३७०१) इत्याद्युदात्तः इभ्यशब्दः । क्षत्रियशब्दस्तु यान्तस्यान्त्यात्पूर्वमिति मध्योदात्तः ६ खान्तस्याश्मादेः । नखम् । उखा । सुखम् । दुःखम् । नखस्य स्वाङ्गशिटामित्याद्युदात्तत्वे प्राप्ते । उखा नाम भाण्डविशेषः । तस्य कृत्रिमाख्यायुवर्णं कृत्रिमाख्या चेदित्युवर्णस्योदात्तत्वे प्राप्ते । सुखदुःखयोर्नब्विषयस्येति प्राप्ते । अश्मादेः किम्-शिखा । मुखम् । मुखस्य स्वाङ्गशिटामिति नब्विषयस्येति वा आद्युदात्तत्वम् । शिखायास्तु शीङः खो निद्ध्रस्वश्चेति उणादिषु निरवोक्तेरन्तरङ्गत्वाट्टापः प्रागेव स्वाङ्ग-

---

न । गुद् । अगेहार्थमिदम् । घ्यपूर्व । घकारेति । नित्यस्त्रीलिङ्गस्येति शेषः । **प्राप्त इति** । आद्युदात्ते प्राप्त इत्यर्थः । **यञन्तत्वादिति** । 'बहिषष्टिलोपो यञ्च' इति वचनात् । **यतोऽनाव इति** । इभमर्हतीति दण्डादित्वाद्यत् । **यान्तस्यान्त्यादिति** । 'क्षत्राद् घः' इति प्रत्ययस्वरेणापीति वा बोध्यम् । **खान्तस्या** । श् च म् च श्मौ तौ आदी यस्य स श्मादिर्न श्मादिरश्मादिः । यस्य सकारमकारादिभिन्नस्य खशब्दस्यान्तोदात्तः स्यात् । **शीङः खो निद्ध्रस्वश्चेत्यादि** । ननु बहुषूणादिपुस्तकेषु शीङो ह्रस्वश्चेत्येव पठ्यते । 'मुहेः खो मूर्च' इत्यतः खोऽनुवर्तते ह्रस्वविधानसामर्थ्याद् गुणाभाव इति स्वयमप्युणादिष्वेवमेवोक्तम् । तस्मात्पूर्वापरवि-

---

शिटा'मिति वा प्राप्ते । ननु गुदाशब्दस्याऽदन्तत्वाऽभावात्कथं स्वाङ्गत्वस्य प्राप्तिरत आह **अन्तरङ्गमिति** **स्त्रीविषयवर्णेति** । 'स्त्रीविषयवर्णानुपूर्वाणा'मित्यनेनेत्यर्थः । 'स्त्रीविषयवर्णनाम्ना'मिति केषांचित्पाठः । 'लघावन्ते' इत्येवाऽत्र, परत्वात् । अस्य तु 'वृद्धिः इत्युदाहरण'**मित्यन्ये** । **इभ्ये**-दण्डादित्वाद्यत् । **यान्तस्यान्त्यादिति** । इदमुपलक्षणं 'क्षत्राद्धः' इति प्रत्ययस्वरेणाऽपि । नन्वव्युत्पत्तिपक्षेऽेव फिट्सूत्रप्रवृत्तेः 'इभ्या' इति प्रत्युदाहरणमयुक्तमिति चेन्न, अस्मादेव स्त्रीविषयग्रहणाज्ज्ञापकाद्व्युत्पत्तिमार्गप्राप्तस्वरस्यापि फिट्स्वरो बाधक इति वदन्ति । ध्वनितश्चेदम् 'एतिस्तुशास्वि'ति सूत्रे कैयटे । **खान्तस्याश्मादेरिति** । शकारमकारादिभिन्नस्य खशब्दान्तस्याऽन्त उदात्त इत्यर्थः । **शीङः खो निदिति** । इदन्दशपाद्यामुक्तम् । पञ्चपाद्यान्तु 'शीङः खो ह्रस्वश्चे'ति पठितम् । तत्राप्याह **अन्तरङ्गत्वादिति** । स्वरस्य स्वाङ्गत्वापेक्षत्वादन्तरङ्गत्वं चिन्त्यम् । तस्मात् 'स्वाङ्गशिटा'मिति सूत्रेऽन्त-

शिटामिति वा बोध्यम्। ७ हिष्ठवत्सरतिशतथान्तानाम्। एषामन्त उदात्तः स्यात्। अतिशयेन बहुलो बंहिष्ठः। नित्वादाद्युदात्तत्वे प्राप्ते। बंहिष्ठैरश्वैः सुवृता रथेन। यद्बंहिष्ठं नातिविदे इत्यादौ व्यत्ययादाद्युदात्तः। परिवत्सरः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः। सप्ततिः। अशीतिः लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। अम्भूयर्वाना प्रभृथस्यायोः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः। थाथादिसूत्रेण गतार्थमेतत्। ८ दक्षिणस्य साधौ। अन्त उदात्तः स्यात्। साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः। अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः। दक्षिणः सरलोदारपरच्छन्दानुवर्तिष्विति कोशः। ९ स्वाङ्गाख्यायामादिर्वा। इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः। दक्षिणो बाहुः। आख्याग्रहणं किम्—प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति। १० छन्दसि च। अस्वाङ्गार्थमिदम्।

रुद्धोऽयं ग्रन्थ इत्यस्वरसादाह अन्तरङ्गत्वादित्यादि। हिष्ठ। एषामिति। इष्ठ वत्सर ति शत् थ एतदन्तानामित्यर्थः। बंहिष्ठ इति। बहुलशब्दाद् 'अतिशायने तमबिष्ठनौ' इतीष्ठन्। 'प्रियस्थिरस्फिर—' इत्यनेन बहुलस्य बंहिरादेशः। परिवत्सर इति। क्वचित्तु संवत्सर इति पाठस्तत्र 'वसेश्च संपूर्वाच्चित्' इति सरप्रत्ययस्य चित्त्वादपि सिद्धे सप्ततिरित्यादि। 'पंक्तिविंशतित्रिंशत्' इत्यत्र व्युत्पादिता एते। 'लघावन्ते' प्राग्वदिति। इति प्राप्त इत्यर्थः। दक्षिणस्य। अस्यान्त उदात्तः स्यात्प्रावीण्येऽर्थे। वीणायां दक्षिणः। प्रवीण इत्यर्थः। छन्दसि। दक्षिणस्या-

---

ग्रहणात्सर्वनामप्रातिपदिकसञ्ज्ञाकालिकाऽदन्तत्वमादाय तत्प्रवृत्तिरिति बोध्यम्। [एवं पूर्वत्र गुदाशब्देऽपि बोद्धव्यम्]। अस्थ्यादिस्वाङ्गवाचकशङ्खशब्दे 'स्वाङ्गशिटा'मित्याद्युदात्तत्वप्राप्त्या सोप्यत्र प्रत्युदाहरणम्। 'ग्रीवायां बद्धो अपि कक्ष आसनी'त्यादौ ग्रीवाशब्दस्यान्तोदात्तत्वन्तु छान्दसत्वान्निर्वाह्यम्। हिष्ठवत्सर। इत्याहुरिति। अत्राऽरुचिबीजन्तु 'संपूर्वाच्चि'दिति सरप्रत्ययस्य चित्त्वात्सिद्धम्। परिवत्सरस्तूदाहार्य इति। 'अनेनैव सिद्धे तद्व्यर्थमित्याशय' इति तत्त्वम्। अत्र सूत्रे शत्साहचर्यात्तिशब्दः पङ्क्त्यादिसूत्रविहित एव गृह्यते। दक्षिणस्य साधाविति। प्रवीणे इत्यर्थः। 'वीणायां सामसु वा दक्षिण' इत्युदाहरणम्। प्रवीण इत्यर्थः। स्वाङ्गाख्यायामादि। स्वाङ्गेति किम्? दक्षिणो देशः। अत्र सर्वनामत्वादाद्युदात्तत्वम्। न च परत्वादेव तेनाद्युदात्तत्वमत्र भविष्यतीति वाच्यम्, अस्य प्रकरणस्य बाधकबाध-

दात्तिणः। इह पर्यायेणाद्यन्तावुदात्तौ। ११ **कृष्णस्यामृगाख्या चेत्**। अन्त उदात्तः। वर्णानां तणेत्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम्। कृष्णो नो नाव वृषभः। मृगाख्यायां तु कृष्णो रात्र्यै। १२ **वा नामधेयस्य**। कृष्णस्येत्येव। अयं वां कृष्णो अश्विना। कृष्णर्षिः। १३ **शुक्लगौरयोरादिः**। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्तत इति तु युक्तम्। सरो गौरो यथा पिब। इत्यत्रान्तोदात्तदर्शनात्। १४ **अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः**। अङ्गुष्ठस्य स्वाङ्गानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थं आरम्भः। वशाग्रहणं नियमार्थं छन्दस्येवेति। तेन लोके आद्युदात्तेत्याहुः। १५ **पृष्ठस्य च**। छन्दस्यन्त उदात्तः स्याद्वा भाषायाम्। पृष्ठम्। १६ **अर्जुनस्य तृणाख्या चेत्**। उनर्वन्नन्तानामित्याद्युदात्तस्यापवादः। १७ **अर्यस्य स्वाम्याख्या चेत्**। यान्तस्यान्त्यात्पूर्वमिति 'यतो नावः' (३७०१) इति

द्यन्तौ स्यातां वेदे। **कृष्णस्य**। अस्यान्त उदात्तश्छन्दसि न तु मृगाख्यायाम्। **एके इति**। तन्मतेऽस्मिन्सूत्रे नामधेयस्येत्यनुवर्तते। वचनविपरिणामेनान्वयः नामधेययोः। शुक्लगौरयोरादिरुदात्त इत्यर्थः। तेन 'सरो गौरो यथा पिब' इत्यत्रान्तोदात्तत्वमेव नामधेयत्वाभावात्। **अङ्गुष्ठो**। एषामन्तोदात्तश्छन्दसि। **अङ्गुष्ठस्येति**। उपलक्षणमिदम्। बकशब्देऽपि प्राणिनां कुपूर्वमित्याद्युदात्ते प्राप्ते इति बोध्यम्। **वा भाषायाम्। पृष्ठमिति**। पक्षे 'स्वाङ्गशिटाम्' इत्याद्युदात्तत्वम्। **अर्जुनस्य**। अन्त उदात्तस्तृणाख्यायाम्। तृणाख्यायां किम्। अर्जुनो वृक्षः। 'उनर्वन्नन्तानाम्' इत्याद्युदात्तः। **अर्यस्य**। अन्त उदात्तः स्वाम्याख्यायाम्। 'अर्यः स्वामिवैश्ययोः'

नार्थत्वात्। **कृष्णस्य**। अत्र छन्दसीति वर्तते इत्याहुः। अन्तोदात्त इत्येव। आख्येति किम्? कृष्णो मृगः। **वा नामधेय**। अन्तोदात्तत्वं वा। पक्षे आद्युदात्तत्वम्। **शुक्लगौरयोः**। नामधेयस्येति वर्तते। तेनाऽनामधेययोरन्तोदात्तत्वमेव। 'ऋज्रेन्द्रे'-त्युणादिसूत्रनिपातिताऽन्तोदात्तत्वकस्य शुक्रशब्दस्य लत्वे शुक्लशब्दव्युत्पत्तेरिति बोध्यम्। **अङ्गुष्ठोदक**। 'अन्त' इति स्वादिग्रहणानुवृत्तिशङ्कानिराकरणार्थम्। **उदकस्य**-कर्दमादित्वादाद्यद्वितीययोः पर्यायेण प्राप्ते, **बकस्य**-'प्राणिनाञ्च कुपूर्व'-मित्याद्युदात्तत्वे प्राप्ते। **तेन लोके इति**। नियमकरणसामर्थ्यादिति भावः। **वशा**-शब्दश्च वशेः पचाद्यचि टापीति तात्पर्यम्। **पृष्ठस्य च**। 'मृष्ठस्ये'ति पाठान्तरम्। **वा भाषायामिति**। पक्षे 'स्वाङ्गशिटा'मित्याद्युदात्तत्वम्। **स्पृष्टं**—'निष्ठा च द्व्यजना'-

वाद्युदात्ते प्राप्ते वचनम्। **१८ आशाया अदिगाख्या चेत्।** दिगाख्याव्यावृत्त्यर्थमिदम्। अत एव ज्ञापकाद्दिक्पर्यायस्याद्युदात्तता। इन्द्र आशाभ्यस्परि। **१९ नक्षत्राणामाब्विषयाणाम्।** अन्त उदात्तः स्यात्। आश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्तत्वे प्राप्ते वचनम्। **२० न कुपूर्वस्य कृत्तिकाख्या चेत्।** अन्त उदात्तो न। कृत्तिका नक्षत्रम्। केचित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्यिक बहुलिका इत्यआप्यन्तोदात्तो नेत्याहुः। **२१ घृतादीनां च।** अन्त उदात्तः। घृतं मिमिक्षे। आकृतिगणोऽयम्। **२२ ज्येष्ठकनिष्ठयोर्वयसि।** अन्त उदात्तः स्यात्। ज्येष्ठ आह चमसा। कनिष्ठ आह चतुरः। वयसि किम्--ज्येष्ठः। श्रेष्ठः। कनिष्ठोऽल्पकः। इह नित्त्वादाद्युदात्त एव। **२३ बिल्वतिष्ययोः स्वरितो वा।**

इति निपातितोऽयमर्यशब्दः। **आशाया।** अदिगाख्यायामाशाशब्द आद्युदात्त स्यात्। **ज्येष्ठेत्यादि।** 'प्रशस्यस्य श्रः' 'ज्य च' इति प्रशस्यशब्दादिष्ठनि धनवती। ज्यादेशः। श्रवणं श्रवः सोऽस्त्यस्याः सा श्रववती। धनं विद्यते अस्याः सा धनवती। अतिशयिता श्रववती श्रविष्ठा। धनिष्ठा। इष्ठनि 'विन्मतोर्लुक्' इति मतुपो लुक्। **आद्युदात्ते प्राप्त इति।** 'ञ्नित्यादिः' इत्यनेन। **कृत्तिकेति।** 'लघावन्ते' इति आद्युदात्तत्वम्। **घृतमिति।** नब्विषयस्येति प्राप्ते। **ज्येष्ठ इति।** उदाहरणे वृद्धशब्दस्य 'वृद्धस्य च' इतीष्ठनि ज्यादेशः। 'युवाल्पयोः कनन्यतरस्याम्' इति युवन्शब्दस्य कनादेशः। प्रत्युदाहरणे 'प्रशस्यस्य श्रः' 'ज्य च' इति प्रशस्यशब्दस्य ज्यादेशः। अल्पस्य कन्। **नित्त्वादिति।** तथा च नित्स्वरा-

---

दिति तत्। **अर्यस्य स्वाम्या।** वैश्य त्वाद्युदात्त एव। **अत एव ज्ञापकादिति।** 'स्त्रीविषयवर्णे'ति द्वितीयपादस्थसूत्रेणेत्यन्ये। **नक्षत्राणामाब्विषयाणाम्।** स्त्रियाऽऽबन्तानामित्यर्थः। नक्षत्राणां किम्? खट्वा। आब्विषयादि किम्?। अश्विनी। **अविष्ठेत्यादि।** श्रववतीधनवतीशब्दाभ्यामिष्ठनि 'विन्मतो'रिति लुक्। विषयग्रहणं चिन्त्यम्। आबन्ताऽनाबन्तस्य नक्षत्रवाचकस्याऽसत्त्वात्। **न कुपू।** कवर्गपूर्वस्याऽऽब्विषयस्य नक्षत्रस्याऽन्त उदात्तो नेत्यर्थः। कुपूर्वस्येति किम्? बहुला। आख्येति किम्? कृत्तिकासु जाता माणविका कृत्तिका। **अत्रापीति।** अपिना कृत्तिका। 'आर्यिका बहुलिके'ति कृत्तिकापर्यायौ। अत्र पक्षे कृत्तिकेत्यादेः प्रयोजनं मघा विशाखेत्यादि। **आकृतीति।** 'वराह इन्द्र एमुष'मित्यादावन्तोदात्तदर्शनाद्वराहशब्दोऽप्यत्र बोध्यः। **ज्येष्ठकनिष्ठयोः।** वृद्धयुवशब्दयोर्ज्य-कनादेशौ। प्रश-

अनयोरन्तः स्वरितो वा स्यात्। पक्षे उदात्तः।

इति फिट्सूत्रेषु प्रथमः पादः।

द्वितीयः पादः।

२४ अथादिः प्राक् शकटेः। अधिकारोऽयम्। शकटिशकट्योरिति यावत्। २५ ह्रस्वान्तस्य स्त्रीविषयस्य। आदिरुदात्तः स्यात्। बलिः। तनुः। २६ नब्विषयस्यानिसन्तस्य। वनं न वायः। इसन्तस्य तु सर्पिः। नप् नपुंसकम्। २७ तृणधान्यानां च द्व्यषाम्। द्व्यचामित्यर्थः। कुशाः। काशाः। माषाः। तिलाः। बह्वचां तु गोधूमाः। २८ त्रः संख्यायाः। पञ्च। चत्वारः। २९ स्वाङ्गशि-

---

पवादोऽयं योगः। **पक्षे उदात्त इति**। उदात्त इत्यनुवृत्तेः। इति प्रथमः पादः।

नब्विषयस्य। इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात्। **सर्पिरिति**। 'अर्चिशुचि–' इत्यादिना इसिः। **तृण**। तृणवाचिनां धान्यवाचिनां च द्व्यचामादिरुदात्तः स्यात्। अषिति अचः प्राचां संज्ञा। तदाह **द्व्यचामित्यर्थ इति**। **गोधूमा इति**। 'लघावन्ते–' इति मध्योदात्तता। **त्रः संख्या**। नकाररेफान्तायाः

स्याऽल्पशब्दयोस्तावादेशौ यदा तदा प्रत्युदाहरणम्। **पक्षे उदात्त इति**। उदात्तग्रहणानुवृत्तेरिति भावः। **इति प्रथमः पादः**।

अथ द्वितीयः पादः। ह्रस्वान्तस्य स्त्रीविषयस्य। नित्यस्त्रीलिङ्गस्येत्यर्थः। **बलिरिति**। बलिशब्दोऽपि जरया श्लथचर्मणि, तनुश्च शरीरे नित्यस्त्रीलिङ्गः। ह्रस्वेति किम्? नदी। स्त्रीति किम्? मरुवीयुः। विषयेति किम्? लघुः, बहुः। **नब्विषयस्य**। नपुंसकविषयस्य। 'स्त्रिया विषयस्य' 'नपोऽनिसन्तस्य' इति पाठेन विषयपदानुवृत्त्यैव सिद्धे पुनर्विषयपदं लिङ्गव्यत्यय-प्रत्ययलोपान्यतरेण लिङ्गान्तरोपसङ्क्रान्तस्य वा विषयतामात्रेणैतत्प्रवृत्त्यर्थम्, यथा 'मधोस्तृप्ता इवासते' इत्यादौ, यथा वा 'मध्वस्मिन्नस्ति मधुर्मासः' 'मधोर्म च' इति यतो लुग्वार्तिकेन। ध्वनितञ्चेदम् 'ई च द्विवचने' इति सूत्रे भाष्ये। नबिति किम्? मूर्धः। विषयेति किम्? लघुः। **सर्पिरिति**। इसिनन्तज्योतिःशब्दादौ तु नित्वादाद्युदात्तत्वमेव। **तिला इति**। यत्तु 'तिलोमाशब्दौ घृतादिपाठादन्तोदात्ता'विति 'संप्रोदश्च'ेति सूत्रे कैयटः, तच्चिन्त्यम्। 'तिलाश्च मे' इत्यादावाद्युदात्तस्यैव पठ्यमानत्वात्, उमाशब्देऽपि 'मकरवरूढ'त्यनेन विशिष्य पर्यायेणाऽन्तोदात्तविधानात्। **शालिव्रीही**–घृतादित्वादन्तोदात्तौ। तृणेत्यादि किम्? आम्रः। **गोधूमा इति**। अत्र परत्वादेव 'लघावन्ते–' इति मध्योदात्तत्वसिद्धेः, पर्यायेणाद्युदात्तत्वसिद्धेश्चेदं नियम्। **'चणका'**

टाम रन्तानाम् । शिट् सर्वनाम । कयांमयां चुचुकादधि । भोष्ठाविव मधु । विभो विहायाः । ३० प्राणिनां कुपूर्वम् । कवर्गात्पूर्व आदिरुदात्तः । काकः । वृकः । शुकेषु मे । प्राणिनां किम्–क्षीरं सर्पिर्मधूदकम् । ३१ खय्युवर्णं कृत्रिमाख्या चेत् । खयि परे उवर्णमुदात्तं स्यात् । कन्दुकः । ३२ उनर्वन्नन्तानाम् । उन । वरुणं वो रिशादसम् । ऋ । स्वसारं त्वा कृणवै । वन् । पीवानं

संख्याया आदिरुदात्तः । **चतुष्कपाल इति** । चत्वार इत्यत्राम्स्वरेण भाव्यम् । चतुर इत्यत्र,'चतुरः शसि' इति चतुर्भिरित्यत्र 'झल्युपोत्तमम्' इति चतुर्णामित्यत्र 'षट्त्रिचतुर्भ्यः' इत्यनेनेति समास उदाहृतः। 'इगन्तकालकपालभगाल' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तोऽयम् । **स्वाङ्गशिटाम्** । स्वाङ्गवाचिनामदन्तानां सर्वनाम्नामादिरुदात्तः स्यात । **उदकमिति** । छन्दसि 'अङ्गुष्ठोदकबकवशानाम्' इत्यन्तोदात्तः । भाषायां तु कर्दमादित्वादादिर्द्वितीयं चोदात्तम्। **उनर्वन्** । उन ऋ वन्

इत्युचितम् । **त्रः सं** । पक्षेत्यादौ नलोपे कृते पाणिनीये 'अनुदात्तादेर'मित्यादौ एषामिव एतेषु पाणिनीयशास्त्रप्रवृत्तौ बाधकाऽभावान्नलोपस्याऽसिद्धत्वेनैतत्प्रवृत्तिः। सप्ताऽष्टशब्दौ घृतादित्वादन्तोदात्तौ । रस्योदाहरणं–चतुष्कपालः । 'इगन्तकालकपाले'ति पूर्वपदप्रकृतिस्वरेणाऽऽद्युदात्तत्वम् । 'चत्वार' इत्यत्राऽऽम्स्वरेण, शसि 'चतुरः शसी'ति, भिसादौ 'झल्युपोत्तमम्' 'षट्त्री'त्यनेन भाव्यमिति समास उदाहृतः । त्रः किम् ? गणः । सङ्ख्यायाः किम् ? अन्तः । **स्वाङ्ग** । इदञ्च सर्वनामसञ्ज्ञाप्रवृत्तिकाले यददन्तं तत्रैव प्रवर्तते । तेन 'इमं स्तोममर्हत' इत्यादौ न दोषः । सर्वोभाऽन्यशब्दा गणेऽन्तोदात्ता निपात्यन्ते 'तयोरन्यः पि'प्पल'मित्यादौ तथादर्शनात् । 'परो मात्रये'त्यादौ व्यत्ययेनाऽन्तोदात्तत्वम् , 'परं मृत्यो'रित्यादावाद्युदात्तस्यापि दर्शनात् । स्वाङ्गस्यादि किम् ? घटः । अदन्तानां किम् ? बाहू राजन्यः । **प्राणिनाङ्कुपूर्वमिति** । 'तस्य समूहः' इति सूत्रे न्यासहरदत्तयोः 'कुपूर्वाणा'मिति पाठो दृश्यते। कवर्गात् पूर्वे सम्बन्ध्ये आदिरित्यर्थः । सर्वनामकार्यन्तु सौत्रत्वान्न । 'का'वित्येव सिद्धे पूर्वग्रहणं व्यवहितस्यापि ग्रहणार्थम् । तेन 'कुपूर्व'मिति पाठेऽपि चटकादावाद्युदात्तत्वं भवत्येव । **उदकमिति** । कर्दमादिरयम् । क्रित्यादि किम् ? हरिणम् । अन्ये तूत्तरसूत्रवदत्रापि आदिरिति न सम्बध्यते, नपुंसकस्वरसात् , तेन चटकादावनेन मध्योदात्तत्वम् । हरदत्तोक्तपाठस्तु चिन्त्य एवत्याहुः । **खय्युवर्णम्** । कृत्रिमत्यादि किम् ? बन्धुकः । **उनर्वन्नन्तानाम्** । 'पिता माता भ्रातर एनमाहुः' इत्यादौ पितृशब्दे छान्दसत्वा-

मेषम् । ३३ वर्णानां तणतिनितान्तानाम् । आदिरुदात्तः । एतः हरिणः । शितिः । पृश्निः । हरित् । ३४ ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये । अनृत्ये ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः । ३५ अक्षस्यादेवनस्य । आदिरुदात्तः । तस्य नाथः । देवने तु । अक्षैर्मा दीव्यः । ३६ अर्धस्यासमद्योतने । अर्धो ग्रामस्य । समेऽशके तु अर्धं पिप्पल्याः । ३७ पीतद्र्वर्थानाम् । आदिरुदात्तः । पीतद्रुः सरलः । ३८ ग्रामादीनां च । ग्रामः । सोमः । यामः । ३९ लुबन्तस्योपमेयनामधेयस्य । चञ्चेव चञ्चा । स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा । ४० न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् । एषामुपमेयनाम्नादिरुदात्तो न । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः । ४१ राजविशेषस्य यमन्वा चेत् ।

एतदन्तानामादिरुदात्तः स्यात् । **ह्रस्वान्तस्य** । अनृत्किम् । नृशंसः । **अक्षस्य** । अदेवनस्याक्षस्यादिरुदात्तः । **अर्धस्य** । असमद्योतनेऽर्धशब्दस्यादिरुदात्तः । **ग्रामादीनां च** । आदिरुदात्तः । **लुबन्तस्य** । उपमेयवाचिनो लुबन्तस्यादिरुदात्तः । **चञ्चेवेति** । 'इवे प्रतिकृतौ' इति विहितस्य 'लुम्मनुष्ये' इति कनो लुप् । लुबन्तस्य किम् । अग्निर्माणवकः । **न वृक्ष** । पूर्वेण प्राप्तमाद्युदात्तत्वं निषिध्यते । अत्र वृक्षपर्वतविशेषग्रहणात् वृक्ष इवायं वृक्षः । पर्वतः । अत्र पूर्वेणाद्युदात्तत्वं भवत्येव । **राजविशेषस्य** । लुबन्तस्योपमेयनामधेयस्य राजविशेषस्याद्युदात्तः । यमन्वा चेन्नामधेयं

दन्तोदात्तत्वम् । मातुस्त्वम्वार्थत्वात्सिद्धमित्याहुः । **वर्णानान्तणतिनितन्तानाम्** । 'तान्ताना'मिति पाठे त्वकारो व्यर्थ इति चिन्त्यम् । **एत इति** । श्वेतशब्दो घृतादित्वादन्तोदात्तो बोध्यः । **ह्रस्वान्तस्य ह्रस्व** । हलान्तस्य किम् ? वधूः । ह्रस्वं किम् ? प्राज्ञम् । अनृत्किम् ? तृणकम् । ताच्छील्ये किम् ? जडः । बधिरः । कुशलशब्दोऽनेनाऽऽद्युदात्त इत्येके । अन्तोदात्त इत्युज्ज्वलदत्तः । **सरल इति** । वृक्षविशेषसञ्ज्ञात्वेन ताच्छील्यानवगमान्नेह 'ह्रस्वान्तस्ये'त्यस्य प्राप्तिरित्यन्ये । **ग्रामादी** । ग्रामादिराकृतिगणः । **लुबन्तस्योपमेय** । 'सञ्ज्ञायामुपमान'मित्यनेन समानार्थमेतत् । लुबिति किम् ? अग्निर्माणवकः । उपमेयेति किम् ? वरणाः । 'अदूरभवश्चे'त्यणो 'वरणादिभ्यश्चे'ति लुप् । नामेत्यादि किम् ? शुनक इवायं वृकः । देवपथादेराकृतिगणत्वात्कनो लुपि शुनक उपमेये वर्तते, न तु तस्येयं सञ्ज्ञा । **न वृक्षपर्वत** । यद्यपि फिटसूत्रवृत्तौ 'न व्याघ्रमहिषसिंहवृक्षपर्वताना'मिति पठ्यते तथापि वृक्षपर्वतशि विशेषाणामेव ग्रहणमिष्टमिति तद्घटितमेव सूत्रं पठितम् । सर्वत्र विशेषपदान्वयाऽभावबोधनाय व्युत्क्रमः कृतः । **राजविशेषस्य** । अत्रापि 'लुबन्तस्यो-

यमन्वा वृद्धः । आङ्गः उदाहरणम् । अङ्गाः प्रत्युदाहरणम् । ४२ **लघावन्ते द्वयोश्च बह्वषो गुरुः** । अन्ते लघौ, द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः । कल्याणः । कोलाहलः । ४३ **स्त्रीविषयवर्णाक्षुपूर्वाणाम्** । एषां त्रयाणामाद्युदात्तः स्त्रीविषये । मल्लिका । वर्णाः श्येनी । हरिणी । अक्षुशब्दा-

---

भवति । पूर्वेणैव सिद्धे नियमार्थमिदम् । राजविशेषस्य चेद् वृद्धस्यैवेत्याहुः फिड्वृत्तौ तु वृद्धस्य चेद्राजविशेषस्यैवेति नियमो दर्शितः । **आङ्ग इति** । अङ्ग इवायमाङ्गः । **लघावन्ते** । इह आदिरिति न संबध्यते तेनाऽनादेरपि गुरोरुदात्तः । अतएव वृषाकपिशब्दस्य गुरुरुदात्त इति 'वृषाकप्यग्नि–' इति सूत्रे वृत्त्यादिग्रन्थेषु विभावितम् । न च गुरूणां मध्ये य आदिरित्यर्थोऽस्त्विति वाच्यम् । 'अन्यतो ङीष्' इति सूत्रे

पमेये'ति सूत्रमनुवर्तते । एवञ्च तेनैव सिद्धे 'वृद्धस्यैवे'ति नियमार्थम् । तदाह **अङ्गाः प्रत्युदाहरणमिति** । **वृत्तौ** तु 'वृद्धस्य चेद्राजविशेषस्यैवे'ति नियम उक्तस्तच्चिन्त्यम्, पूर्वसूत्रे व्याघ्रग्रहणवैयर्थ्यापत्तेः । 'यमन्वा'शब्दः कृताऽऽदिवृद्धौ रूढः, न च व्याघ्रशब्दस्तथेति न वैयर्थ्यमित्यन्ये । अत्राऽऽङ्ग इत्युदाहरणं चिन्त्यम् । तस्य 'जनपदशब्दा'दित्यञन्तत्वेनाद्युदात्तसिद्धेः । कालिङ्ग इत्युदाहार्यम् । तत्र हि 'द्व्यञ्मगधे'त्यण् । **अन्ये** तु लुबन्तस्येत्याद्यनुवर्त्याऽस्य विधित्वमेवेच्छन्ति । **लघावन्ते** । अत्राऽऽदिशब्दो न सम्बध्यते, तेनाऽनादेरपि गुरोरुदात्तः । अत एव वृषाकपिशब्दोऽनेन मध्योदात्त इति 'वृषाकपी'ति सूत्रे वृत्तावुक्तम्, खण्डिकादिषु उलूकशब्दोऽनेन मध्योदात्त इति कैयटेन चोक्तम् । वराहशब्दस्तु घृतादिरित्युक्तमेव । न च गुरूणां मध्ये य आदिरित्यर्थोऽस्त्विति वाच्यम्, वृषाकप्यादावप्रवृत्त्या वृत्त्यादिविरोधात्, 'अन्यतो ङी'षिति सूत्रे 'सारङ्गकल्माषौ लघावन्ते इत्यनेन मध्योदात्तौ' इति हरदत्तविरोधाच्च । लघावित्यादि किम् ? वातप्रमीः, सभासजननम्, कपाली । नान्तत्वाच्च लघुरन्तोऽत्र । बह्वचः किम् ? देवः । गुरुः किम् ? किसलयम् । **कल्याण इति** । पर्यायेणाऽऽदिमध्यावुदात्तौ । **स्त्रीविषयवर्णाक्षुपू** । क्वचित्फिड्वृत्तौ 'स्त्रीविषयवर्णनाम्नामक्षु' इत्यादिपाठः, सोऽपि मूले 'ध्यपूर्वस्ये'ति सूत्रे दर्शितः । **मल्लिकेति** । अस्य प्राप्तिमात्रेणेदमुदाहरणम्, प्राप्तस्याऽस्य परत्वात् 'मादीनाञ्चे'त्यनेन बाधात् । 'ललना' इत्युदाहार्यम् । न चाऽनेनैव सिद्धे 'ह्रस्वान्तस्य स्त्रीविषयस्ये'ति, 'वर्णानान्तणे'ति च सूत्रं व्यर्थमिति वाच्यम्, अत्र बह्वच इत्यनुवृत्तेर्न दोषः । अत एव 'श्येनी'त्युदाहरणं दत्त्वा 'हरिणी'त्युदाहरणान्तरं दत्तम् । धवलादीन्यप्युदाहरणानि । नीलादयस्त्वन्तोदात्ता एवेति बोध्यम् । अत एव **'पिशङ्गसारङ्गकल्माषा**—लघावन्ते-इति मध्योदात्ता' इति कैयटादिदर्शनादिदं बाधित्वा पूर्वविप्रतिषेधेन पूर्वमेव प्रवर्तते

स्पूर्वोऽस्त्येषां ते अनुपूर्वाः । तरक्षुः । ४४ **शकुनीनां च लघुपूर्वम्** । पूर्वं लघु उदात्तं स्यात् कुक्कुटः । तित्तिरिः । खंजरीटः । ४५ **नर्तुप्राण्याख्यायाम्** । यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः । ४६ **धान्यानां च वृद्धक्षान्तानाम्** । आदिरुदात्तः । कान्तानाम् । श्यामाकाः । षान्तानाम् । माषाः । ४७ **जनपदशब्दानामषान्तानाम्** । आदिरुदात्तः । केकयः ।

सारङ्गकल्माषशब्दौ 'लघावन्त' इत्यादिना मध्योदात्ताविति हरदत्तग्रन्थविरोधादित्याहुः। **कल्याण इति** । पर्यायेणादिमध्यावुदात्तौ । **शकुनीनाम्** । पक्षिवाचिनाम् । **पूर्वमिति** । अन्त्यात्पूर्वमित्यर्थः । अत्राप्याद्दिरिति न संबध्यते पूर्वग्रहणात् । **कुक्कुटेत्यादि** । मध्योदात्तावेतौ । **नर्तु** । ऋतुवाचिनां प्राणिवाचिनां च यथालक्षणप्राप्तमुदात्तत्वं न । **धान्यानाम्** । धान्यवाचिनां वृद्धकषशब्दान्तानां चादिरुदात्तः । **श्यामाकाः । माषा इति** । अत्रोशीनरेत्यनेन तृणधान्यानामित्यनेन चाद्युदात्तत्वस्य सिद्धत्वाद् नैषादका राजमाषा इत्युदाहर्तव्यम् । फिट्सूत्रे तु सूत्रे च-शब्दो न पठितः । वृत्तौ गुरुरुदात्त इति व्याख्यातं न त्वादिरुदात्त इति । नैषादकाः कालाक्षा इत्युदाहृतं च । यत्तु धान्यानामिति किं श्यामाका इत्युदाहृतं तत्र श्यामाके धान्यत्वाभावश्चिन्त्यः । **जनपदा** । जनपदवाचिनामजन्तानामादिरुदात्तः स्यात् । **केकय इति** । अत्र परत्वाद्यान्तस्यान्त्यात्पूर्वमिति स्वरेण भाव्यमतः अङ्गा वङ्गा

इत्याहुः । **अनुशब्दात्पूर्व इति** । 'अन्वादे'रिति वक्तव्ये 'अनुपूर्वाणा'मित्युक्तेः समानाधिकरणो बहुव्रीहिर्नेति भावः । 'अनुपूर्वे'त्यत्र पञ्चमीतत्पुरुषसमासस्तु न, अन्वादिरित्येव सिद्धे पूर्वग्रहणवैयर्थ्यापत्तेः, अनुवर्तमानफिष इत्यनेन अन्वयाऽनापत्तेश्च। **शकुनीनाञ्च** । **पूर्वमिति** । अन्त्यात्पूर्वमित्यर्थः। लघु पूर्वमित्यसमस्तं पदद्वयम् । अत्राप्यादिरिति न संबध्यते, पूर्वग्रहणात् । तेन **कुक्कुटतित्तिरी**—मध्योदात्तौ । कुक्कुटस्य वेदेऽन्तोदात्तपाठस्तु छान्दसः । तित्तिरिर्यजुः-शाखायां मध्योदात्तः पठ्यते। एतेन 'तित्तिरिशब्दोऽन्तोदात्त' इति प्राणिरजतादिसूत्रस्थहरदत्तः परास्तः । लघुपूर्वमिति बहुव्रीहिस्तु न, लघोरिति पञ्चमीनिर्देशेनैव सिद्धे पूर्वग्रहणवैयर्थ्यापत्तेः । 'लघोः पूर्व'मिति तत्पुरुषोऽपि न, सप्तमीनिर्देशेनैव सिद्धेः । **नर्तुप्रा** । ऋतुवाचिनाम्, प्राणिवाचिनाञ्चेत्यर्थः **वसन्त इत्यादि** । अनयोः 'लघावन्ते-' इति निषिद्धोऽन्तोदात्तत्वम् । एवञ्च 'कपोतमयूरशब्दौ लघावन्ते इति मध्योदात्तौ इति प्राणिरजतादिसूत्रस्थहरदत्तश्चिन्त्यः । खण्डिकादिसूत्रे 'उलूको मध्योदात्त' इति कैयटश्च। **धान्यानाम्** । वृद्धसञ्ज्ञकधान्यवाचिककारषकारान्तानामित्यर्थः । **श्यामाका इति** । 'उशीरदाशेरकपालपलालशैवालश्यामाके'ति सूत्रे श्यामाकग्रहणं त्वधान्यवाचकस्य

४८ हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा । हयिति हल्संज्ञा। पललम्। शललम्। हयादीनां किम्—पुकलः । असंयुक्तेति किम्—मल्लः ।
४९ इगन्तानां च द्व्यषाम्। आदिरुदात्तः। कृषिः ।

इति फिट्सूत्रेषु द्वितीयः पादः।

तृतीयः पादः।

५० अथ द्वितीयं प्रागीषात्। ईषान्तस्य हयादेरित्यतः प्राग् द्वितीयाधिकारः। ५१ त्र्यचां प्राङ्मकरात्। मकरवरूडेत्यतः प्राक् त्र्यचामित्यधिकारः। ५२ स्वाङ्गानामकुर्वादीनाम्। कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम्। ललाटम्। कुर्वादीनां तु। कपोलः। रसना।

इत्युदाहर्तव्यमिति वदन्ति। हयादीनाम्। हयादीनामसंयोगपूर्वो यो लशब्दस्तदन्तानामादिरुदात्तः। अन्त्यात्पूर्वं वा। केचित्तु अत्र जनपदानामित्यनुवर्तयन्ति। पञ्चालाः कोसला इत्युदाहृत्य पलालमिति प्रत्युदाहरन्ति च। इग। अत्रापि जनपदानामित्यनुवर्त्य कुरवश्चेदय इत्युदाहृतं कृषिरिति प्रत्युदाहृतम्। 'अक्षैर्मा दीव्यः कृषिमित् कृषस्व' इत्यत्र कृषिशब्दस्यान्तोदात्तत्वात्। इति द्वितीयः पादः।

माकग्रहणार्थम्। अत एव श्यामां कायतीत्यर्थेऽपि श्यामाकशब्द आद्युदात्त इत्याहुः। माषा इत्यस्य 'तृणधान्यानाञ्चे'त्यत्रोदाहृतत्वात् 'शालाका' इत्युदाहरणमुचितम्। हलन्तानामसंभवेनाऽकारविशिष्टस्य ग्रहणम्। धान्येति किम्? आलोकः। वृद्धेति किम्? चणाकाः। त्रेति किम्? गोधूमाः। जनपदश। 'अ'वित्यचः सञ्ज्ञा। केकय इति। यत्तु 'यान्तस्यान्त्यात्पूर्व'मित्यनेन परत्वादत्र भाव्यमिति, तन्न। बाध्यसामान्यचिन्तामाश्रित्य तस्याप्यनेन बाधादित्याहुः। अङ्गाः, वङ्गा इत्यप्युदाहरणम्। जेत्यादि किम्? आम्रः। अज्ञो राजा। अजन्तानां किम्? दरत्। हयादीनाम्। अत्र केचिज्जनपदशब्दानामित्यनुवर्तयन्ति। 'कुरुगार्हे'ति सूत्रस्थहरदत्तस्वरसोऽप्येवम्, तन्मते पञ्चालाः कोसला इत्युदाहार्यम्। [वाशब्देनादेरित्यस्याप्यनुवर्तनादादेरप्युदात्तत्वं भवतीत्येके]। इगन्तानाञ्च द्व्य। अत्र वेत्यनुवर्तते। अत एव 'अक्षैर्मा दीव्य कृषिमित्कृषस्वे'ति पठ्यमानमन्तोदात्तत्वं सङ्गच्छते, छान्दसत्वाद्वा। ये तु जनपदशब्दानामित्यनुवर्त्तयन्ति, तेषां न कश्चिद्दोषः। कुरवः, चेदय इति चोदाहार्यम्। द्व्यचां किम्? वसातयः। इगिति किम्? अङ्गाः। इति द्वितीयः पादः।

अथ तृतीयः। ललाटमिति। 'लघावन्ते—' इत्येतद्बाधित्वा परत्वादिदमेवोचितमित्यभिमानः। कपोल इति। यद्यप्यत्र 'लघावन्ते—' इति मध्योदात्तत्व-

वदनम् । ५३ मादीनां च । मलयः । मकरः । ५४ शादीनां शाकानाम् । शीतन्या । शतपुष्पा । ५५ पान्तानां गुर्वादीनाम् । पादपः आतपः । लघ्वादीनां तु अनूपम् । द्व्यचां तु नीपम् । ५६ युतान्यण्यन्तानाम् । युत । अयुतम् । अनि । धमनिः। अणि । विपणिः । ५७ मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा । एषामादिर्द्वितीयो वोदात्तः । मकरः वरूढ इत्यादि । ५८ छन्दसि च । अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् । ५९ कर्दमादीनां च । आदिर्द्वि-

---

कपोल इति । 'लघावन्ते–' इति मध्योदात्तम् । रसना वदनमिति । 'स्वाङ्गशिटाम्' इत्याद्युदात्तत्वम् । मादी । मलयः । मकर इति । अनयोर्मकरवरूढेति यान्तस्यान्त्यात्पूर्वमिति विशिष्य स्वरविधानान्महेन्द्र इत्युदाहर्तव्यम् । शादीनां शा । शकारादीनां शाकवाचिनां त्र्यचां द्वितीयमुदात्तं स्यात् । केचित्तु सादीनामिति पठित्वा सर्षपा इत्युदाहरन्ति । पान्तानाम् । पशब्दान्तानां गुर्वादीनां त्र्यचां द्वितीयमुदात्तं स्यात् । अनूपे 'अनोरप्रधानकनीयसी'त्यनेनोदात्तत्वम्, नीपे 'नेरनिधाने' इत्यनेनेत्याहुः । युता । युत अनि अणि एतदन्तानां त्र्यचां द्वितीयमुदात्तं स्यात् । इत्यादीति । आदिशब्देन पारावत वितस्ता इक्षु आर्जि द्राक्षा कला उमा काष्ठा

मेवेष्टं तथाप्युदाहरणादिग् बोध्या । मादीनाम् । मलयो मकर इति । मलये 'यान्तस्यान्त्यात्पूर्व'मित्यस्याऽस्य वा प्रवृत्तौ फले न विशेष इत्युदाहृतम् । मकरः—सञ्ज्ञाभूत इहोदाहरणम् । 'मकरवरुढे'त्यत्र तु 'अधिव्यक्तपदार्था ये' इति न्यायेन सञ्ज्ञाभूतस्य न ग्रहणम् । क्वचित्तु 'माकर' इति पाठः । तत्र स्वार्थेऽण् । शादीनाञ्च शाकानाम् । 'संप्रोदश्चे'ति सूत्रे कैयटे तु दन्त्यादिपाठः । इदञ्चाद्युदात्तत्वविधायकम् । अनेन सर्षपशब्दे आद्युदात्तत्वे प्राप्ते 'पान्तानाञ्च गुर्वादीना'मिति मध्योदात्तत्व'मित्युक्तम्, तेन द्वितीयपादान्ते इदं सूत्रमिति ध्वनितम् । फिड्वृत्तौ तु तालव्यादिसूत्रमत्र पादे पठितम् । शतपुष्पेति । क्वचित्कोऽपपाठः, त्र्यच्त्वाऽभावात् । कैयटरीत्या आद्युदात्तविधायकत्वे तु तत्रापि प्रवृत्तिरिति ध्वनयितुमत्र्यजपि उदाहृतमित्याहुः । केचित्तु त्र्यच्पदस्यैकाऽज्द्व्यच्कमेव व्यावर्त्यं वदन्ति । पान्तानां गु । पान्तानां किम् ? गर्दभः । 'लघावन्ते' इति मध्योदात्तोऽयम् । 'न गर्दभ पुरः' इत्यन्तोदात्तं तु छान्दसम् । गुर्वादीनां किम् ? कुणपः । 'कणेः संप्रसारणञ्चे'ति कपन् । अयुतमिति । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते इदम् । द्वितीयो वेति । 'द्वितीय'मित्यधिकारादिति भावः । 'काशीनाना'मिति वक्तव्ये नुडभाव आर्षः । वरूढ इतीति । पारेवतः, वितस्ता, इक्षुः, आर्जिः, द्राक्षाकला, उमा, काष्ठा, पेष्ठा,

तीयं वोदात्तम्। ६० सुगन्धितेजनस्य ते वा। आदिर्द्वितीयं तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः। सुगन्धितेजनाः। ६१ नपः फलान्तानाम्। आदिर्द्वितीयं वोदात्तम्। राजादनफलम्। ६२ यान्तस्यान्त्यात्पूर्वम्। कुलायः। ६३ थान्तस्य च नालघुनी। नाशब्दो लघु च उदात्ते स्तः। सनाथा सभा। ६४ शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च। अन्त्यात्पूर्वमुदात्तं द्वितीयं वा। ६५ सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्। द्वितीयमुदात्तं वा। ६६ ईषान्तस्य हयादेरादिर्वा। हलीषा। लाङ्गलीषा।

पेष्ट्रा। काशीनानामिति वक्तव्ये नुडभाव आर्षः। छन्दसि। छन्दसि मकारादीनामन्येषां चादिर्द्वितीयं वोदात्तम्। काश्यपः। कर्दमः। कुलटा। उदकम्। गान्धारि। सुगन्धि। आदिरिति। सुगन्धितेजनशब्दस्य। नपः फलान्तानाम्। नप् नपुंसकम्। नपः किम् दासीफलो वृक्षः। यान्तस्य। यशब्दान्तस्यान्त्यात्पूर्वमुदात्तं स्यात्। थान्तस्य। केचित्तु 'आन्तस्य च नालघुनी' इति पठित्वा आकारान्तस्य नाशब्दस्य च लघुनी अन्त्यात् पूर्वं उदात्ते स्त इति व्याख्याय नाना दिवा मुधा इत्युदाजहुः। शिशुमारो। शिंशुमार इति पाठान्तरम्। उष्ट्रार। उष्टार इति पाठान्तरम्। सांकाश्य। सांकाश्यकाम्पिल्यशब्दौ 'वुञ्छण्-' इति ण्यान्तौ। दार्वाघाटशब्दो 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' इत्यण्प्रत्ययान्तः। ईषान्तस्य। ईषान्तस्य हलादेरा-

---

काशीनम्। केचित्तु 'मकरवरूटपारेवते'ति, 'काष्ठापेश्रा' इति पठन्ति। कर्दमादिराकृतिगणः। त्रय इति। केचित्तु 'सुगन्धितेजनस्य चे'ति सूत्रं पठन्ति, आदिर्द्वितीयो वेति अनुवर्तयन्ति। अयं क्लीबोऽपि। नपः फलान्तानाम्। नपुंसकस्य फलशब्दान्तस्याऽऽदिर्द्वितीयो वेत्यर्थः। केचित्तु 'ले फो नपः' इति—अस्य स्थाने पठन्ति, नबिति नपुंसकम्, लशब्दे परे क्लीबस्य फशब्द उदात्तः। फलं सफलमित्युदाहरन्ति। अन्ये तु 'फाशब्दस्ये'ति व्याख्याय सफालमित्युदाहरन्ति। कुलाय इति। 'लघावन्ते' इत्यस्य प्रवृत्तावपि न कश्चिद्विशेषः। गव्ययमलयावुदाहार्यौ। कुवलयार्थमन्त्यात्पूर्वग्रहणम्। आन्तस्य ना। आकारान्तस्येत्यर्थः, 'नाना नासा दिवा सुधा' इत्युदाहरणम्। क्वचित्तु 'थान्तस्ये'त्यपि पाठः, थाशब्दान्तस्येत्यर्थः। केचित्तु तन्त्रेण थशब्दोऽपि गृह्यते, तेन सनाथो देवदत्त इति सिद्धमित्याहुः। शिंशुमारोदुम्बर। 'शिशुमारे'ति पाठान्तरम्। उष्ट्रार। उष्टारेति रेफवर्जितमपि पाठान्तरम्। चकारेणाऽन्त्यात्पूर्वमिति, द्वितीयमिति च संबध्यते। सांकाश्यकाम्पिल्य। अत्र सूत्रे मण्डूकप्लुत्याऽऽदिर्वेति वर्तते, तदाह द्वितीयमुदात्तं वेति। अत एव पठ्जिात सूत्रे 'राजन्यसाङ्काश्यकाम्पिल्यनासिक्यदार्वाघाटानामादिर्वाऽन्तो

६७ उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्। एषामादिरुदात्तः स्यात्। ६८ महिष्यषाढयोर्जायेष्टकाख्या चेत्। आदिरुदात्तः। महिषी जाया। अषाढा उपदधाति।

इति फिट्सूत्रेषु तृतीयः पादः।

चतुर्थः पादः।

६९ शकटिशकट्योरक्षरमक्षरं पर्यायेण। उदात्तम्। शकटिः। शकटी। ७० गोष्ठजस्य ब्राह्मणनामधेयस्य। अक्षरमक्षरं पर्यायेणोदात्तम्। गोष्ठजो ब्राह्मणः। अन्यत्र गोष्ठजः पशुः। कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः।

दिरुदात्तो वा स्यात्। उशीर। अत्र श्यामाकग्रहणं चिन्त्यम्। 'धान्यानां च वृद्धक्षान्तानाम्' इत्यनेनैव सिद्धत्वात्। इदमेव ज्ञापयितुं मूले धान्यानामित्यत्र श्यामाक इत्युदाहृतम्। देवरग्रहणमपि चिन्त्यम्। 'लघावन्ते-' इत्यनेनैव सिद्धत्वात्। हृदयग्रहणं 'स्वाङ्गानामकुर्वादीनाम्' इति द्वितीयस्योदात्तत्वं बाधितुमन्येषां 'लघावन्ते-' इति प्राप्ते वचनम्। महिष्य। एतयोरादिरुदात्तः स्याद् यथासंख्यं जायाख्यायामिष्टकाख्यायां च। इति तृतीयः पादः।

वा' इति कैयटेनोक्तम्। अत्राऽन्तशब्देनादेरपेक्षयाऽन्तो=द्वितीय एव, अतो न विरोधः। एवं 'सप्तमी सिद्धे'ति सूत्रे 'एषामन्तः पूर्वं वा' इति काशिकायामपि पूर्वशब्देनाऽऽदिस्तदपेक्षयाऽन्तश्चाऽन्तशब्देन गृह्यते इति बोध्यम्। 'अन्त्यात्पूर्व'मिति तु नाऽनुवर्तते, साङ्काश्यादीनान्त्रयाणाङ्ग्रहणस्य वैयर्थ्यापत्तेः। 'यान्तस्यान्त्या'दित्येव सिद्धेः। उत्तरसूत्रे 'आदिर्वे'ति तु स्पष्टार्थम्। ईषान्तस्य। 'ह'यिति हलां सञ्ज्ञा। पक्षेऽधिकाराद् द्वितीयम्। ईषान्तस्य किम्? मञ्जूषा। हलादेः किम्? अम्बरीषम्। उशीरदाशेर। अत्र हृदयग्रहणं 'स्वाङ्गानामकुर्वादीना'मिति द्वितीयोदात्तत्वं बाधितुम्, देवरग्रहणं 'लघावन्ते-' इत्यस्याऽनित्यत्वज्ञापनार्थम्। केचित्तु वृतादिषु देवरशब्दः पठ्यते, एतच्च पक्षे आद्युदात्तार्थङ्ग्रहणमित्याहुः। अत्र वेति नानुवर्तते इति केचित्। महिष्यषा। 'मे'त्यादि किम्? सिंही असि। जेति किम्? महिषी। अषाढा नक्षत्रम्। इति तृतीयः पादः।

अथ चतुर्थः। शकटिशक। अत्र 'उभे वनस्पत्यादिषु युगप'दित्यादिसूत्रस्थयुगपद्ग्रहणबोधिताऽनेकोदात्तानां युगपत् समावेश इत्यर्थानुवादकं पर्यायेणेति। तत्फलन्तु 'अनुदात्तं पदमेकवर्ज'मित्यादेरनाद्विषयेऽपि प्रवृत्तिः। लिङ्गविशिष्टपरिभाषालभ्यार्थानुवादकं शकटीति। गोष्ठजस्य। ब्राह्मणवाचकस्य गोष्ठजशब्द-

७१ **पारावतस्योपोत्तमवर्जम्**। शेषं क्रमेणोदात्तम्। पारावतः। ७२ **धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्**। एषां चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि। धूम्रजानुः। मुञ्जकेशः। कालवालः। स्थालीपाकः। ७३ **कपिकेशहरिकेशयोश्छन्दसि**। कपिकेशः। हरिकेशः। ७४ **न्यङ्स्वरौ स्वरितौ**। स्पष्टम्। न्यङ्ङुत्तानः। व्यचक्षयत्स्वः। ७५ **न्यर्बुदव्यल्कशयोरादिः**। स्वरितः स्यात्। ७६ **तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः**। स्वरितः स्यात्। तिलानां भवनं क्षेत्रं तिल्यम्। 'यतो नावः' (३७०१) इति प्राप्ते। ७७ **बिल्वभक्ष्यवीर्याणि छन्दसि**। अन्तस्वरितानि। ननो बिल्वस्य उदतिष्ठत्। ७८ **त्वत्त्वसमसिमेत्यनुच्चानि**। स्तरीरुत्वत्। उत त्वः पश्यन्। नभन्तामन्यके समे। सिमस्मै। ७९ **सिमस्याथर्वणेऽन्त उदात्तः**। अथर्वण इति प्रायिकम्। तत्र दृष्टस्येत्येवंपरं वा। तेन वासस्तनुते सिमस्मै' इत्यृग्वेदेऽपि भवत्येव। ८० **निपाता आद्युदात्ताः**। स्वाहा। ८१ **उपसर्गाश्चाभिवर्जम्**। ८२

त्वत्त्व। एतानि सर्वानुदात्तानि। **सिमस्य**। सिमशब्दस्याथर्वणे वेदे उदात्तः। **उपसर्गाश्चाभि**। अभिशब्दं वर्जयित्वा उपसर्गा आद्युदात्ताः स्युः।

स्येत्यर्थः। **पारावत इति**। अत्र 'व'शब्दो नोदात्तः। **कपिकेशह**। भाषायां बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः। तत्र हरि शब्द इनन्तत्वादाद्युदात्तः। कपिरन्तोदात्तः। केचित्तु निरुदकादेराकृतिगणत्वादनयोरन्तोदात्तत्वमाहुः। **न्यङ्स्व**। 'न्यधी चे'ति-पूर्वपदप्रकृतिस्वरे कृते यणि 'उदात्तस्वरितयो'रिति सिद्धे न्यङ्ग्रहणं तदनुवादकम्। **तिल्यशिक्य**। केचित्त्र मर्त्यशब्दं पठन्ति, तदयुक्तम्, 'तं त्वा हवन्त मर्त्याः' इत्यादावाद्युदात्तदर्शनात्। 'तत्रकालकर्मणः' इति सूत्रस्थवार्तिकेन यति 'यतोऽनावः' इत्याद्युदात्तत्वम्। यत्तु धान्यस्थाने धन्यं पठन्ति, तन्न, 'पत्यावैश्वर्ये' इति सूत्रे धान्यमन्तस्वरितमिति वृत्तिमुपादायास्यैव सूत्रस्य हरदत्तेनोपन्यासात्, प्रयुज्यते च— 'धान्यमसि धिनुहि' इति। **बिल्वभक्ष्य**। भाषायां तु भक्ष्यवीर्यौ आद्युदात्तौ। वीरेषु साधुरिति यत्, भक्षयतेर्ण्यन्तादचो यत्। बिल्वः स्वरितान्तोऽन्तोदात्तो वा। केचित्तु 'बिल्व वस्ते'ति पठन्ति। **अनुच्चानीति**। सर्वानुदात्तानीत्यर्थः। अत्र सूत्रे छन्दसीति नानुवर्त्तते, 'आद्युदात्तश्च'ति सूत्रस्थभाष्यप्रामाण्यात्। **निपाता आ**। शुक्लीकरोतीत्यादौ च्व्यन्तानां निपातत्वेऽपि च्वेश्चित्वादन्तोदात्तत्वम्। **उपसर्गाश्चाभिवर्जमिति**। आद्युदात्ता इत्यर्थः। अभिवर्जं किम्? अभ्यभिहि, अभिरामम-

पवादीनामन्तः (एवमादीनामिति पाठान्तरम्) पव। एवम्। नूनम्। सह ते पुत्र सूरिभिः। षष्ठस्य तृतीये 'सहस्य सः' (१००१) इति प्रकरणे सहशब्द आद्युदात्त इति प्राञ्चः। तच्चिन्त्यम्। ८३ **वाचादीनामुभावुदात्तौ।** उभौ-ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय। ८४ **चादयोऽनुदात्ताः।** स्पष्टम्। ८५ **यथेति पादान्ते।** तन्नेमिमृभवो यथा। पादान्ते किम्—यथा नो अदितिः करत्। ८६ **प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः।** पटुपटुः। ८७ **शेषं सर्वमनुदात्तम्।** शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः। प्रग्रायम् दिवेदिवे।

इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः।

यथेति। यथाशब्दः पादान्तेऽनुदात्तः स्यात्। **प्रकारादि।** 'प्रकारे गुणवचनस्य' इत्यादिद्वित्वे पदस्यान्तोदात्तः स्यात्। **पटुपटुरिति।** ननु 'कर्मधारयवदुत्तरेषु' इति कर्मधारयवद्भावादेव 'समासस्य' इत्यन्तोदात्तत्वे सिद्धे कार्थमिदमिति वाच्यम्। तस्य पाणिनीयतपूर्वप्रशरात्वेनादोषात्। **शेषं** प्रकारादिद्वित्वादन्यस्मिन्द्वित्वे परं सर्वमनुदात्तं स्यात्। इति चतुर्थः पादः।

स्यात्। इदं सूत्रं व्यर्थम्, उपसर्गाणां निपातत्वेनैव सिद्धेः। न च कर्मप्रवचनीयानां तदभावज्ञापनायेदम्, तेषामप्याद्युदात्तत्वस्येष्टत्वात्। अभिश्चैवमादिषु पाठ्य इति बहवः। अत एव 'मानो मर्त्ता अभिद्रुह'मिति मन्त्रे 'एवमादीनामन्त' इति वेदभाष्य-कृद्भिरुक्तम्। स्पष्टञ्चेदमुपसर्गसंज्ञासूत्रे भाष्ये। केचित्तु उपसर्गस्यैवाऽभेराद्युदात्तत्व-निषेधो यथा स्यात्, कर्मप्रवचनीयस्य तु निपातत्वाद्भवत्येवेत्येतदर्थमिदं सूत्रमित्याहुः। **पवादीनामन्तः।** अहशश्वच्छब्दौ गणे आद्युदात्तौ निपातौ वा। 'आदहस्वधामनु। काह मित्रावरुणा शश्वदिन्द्र योऽप्रथद्भि'रिति प्रयोगदर्शनात्। **तच्चिन्त्यमिति।** चिन्ताबीजन्तु चिन्त्यम्। सहशब्दस्याऽपि निपातत्वादाद्युदात्तत्वमिति 'सहस्य सः' इति सूत्रे भाकरात्। प्रयुज्यते च 'सह वै देवाना'मिति। 'ते पुत्र सूरिभिः सहे'त्यत्र तु छान्दसमन्तोदात्तत्वमिति केचित्। **'वाचादीनामुभौ'** इति सूत्रे **उदात्तावित्य-**नुवृत्तिप्रदर्शनम्। इह त्रिसूत्र्यामादिशब्दः प्रकारे इत्याहुः। **चादयोऽनु।** निपाता इति वर्तते। नेह—पशुर्नेति। आद्युदात्तत्वापवादोऽयम्। **यथेतिपा।** अनुदात्त इति वर्तते। 'शाक्किन्नं वचो यथा' इत्यादौ छान्दसत्वान्नानुदात्तः। **प्रकारादिद्वि।** 'प्रकारे गुणवचनस्ये'त्यादिद्वित्वे इत्यर्थः। इदं कर्मधारयवद्भावसिद्धाऽन्तोदात्तत्वानुवा-दकम्। **शेषमिति।** प्रकारादिद्विरुक्तादन्यद्द्विरुक्तमित्यर्थ इत्येके। 'अनुदात्तं चे'-

अथ स्वरप्रकरणशेषाः ।

३७०८। आद्युदात्तश्च। (३-१-३) प्रत्यय आद्युदात्त एव स्यात्। अग्निः । कर्तव्यम्। ३७०९ अनुदात्तौ सुप्पितौ। (३-१-४) पूर्वस्यापवादः। यज्ञस्य। न यो युच्छति। शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ। ३७१० चितः। (६-१-१६३) अन्त उदात्तः स्यात्। ॐ चितः सप्रकृतेर्बह्वकजर्थम्। चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः। नभन्तामन्यके समे। यके सरस्वतीमनु। तकत्सुते। ३७११ तद्धितस्य। (६-१-१६४)

अग्निरिति। 'अङ्गेर्नलोपश्च' इति निप्रत्ययः। कर्तव्यमिति। तव्यप्रत्ययः। तव्यतस्तु तित्वात्स्वरितो वक्ष्यते। न च तव्यस्याद्युदात्तत्वे 'उदात्तादनुदात्तस्य' इति स्वरितो भवत्येवेति चेत्सत्यम्। किं त्वयमसिद्धः तित्स्वरस्तु सिद्ध इति प्रवृत्त्यप्रवृत्तिभ्यां महान् विशेषः। तव्यतस्तित्त्वमेव शेषनिघातपरिभाषाया यथोद्देशप्रवृत्तौ ज्ञापकमिति ध्येयम्। युच्छतीति। युच्छ प्रमादे। 'धातोः' इत्यन्तोदात्तः। ततः परः शप् 'उदात्तादनुदात्तस्य' इति स्वरितः। 'स्वरितात्संहितायामनुदात्तानाम्' इति तिपः प्रचयः। चितः। सप्रकृतेरिति। नन्विदं कथं लभ्यमिति चेच्छृणु। चित इत्यवयवावयवादेषा षष्ठी न कार्यिणः। चिद्योऽवयवस्तस्य संबन्धी यः समुदायः स कार्यी अथवा चिदस्यास्ति स चितः। अर्शआदेराकृतिगणत्वादच् प्रत्ययः। षष्ठ्यर्थे प्रथमा। तेन चिद्वतः समुदायस्येत्यर्थः। अत्र च लिङ्गमकचश्चित्करणम्, अन्यथा

त्यस्याऽनुवादकमेतत्। 'अनुदात्तं पदमेकवर्ज'मित्यस्यानुवादकमित्यन्ये। इति शान्तनवेति। इदं 'मात्रोपज्ञ' इति सूत्रे हरदत्तग्रन्थे स्पष्टम्। शन्तनुराचार्यः प्रणेतेति 'द्वारादीनां चे'ति सूत्रे हरदत्तः। इति फिट्सूत्राणि।

अथ प्रत्ययस्वराः। कर्त्तव्यमिति। तव्योऽयम्, तव्यत्तु तित्वात्स्वरितः। यद्यपि तव्यस्यापि आद्युदात्तं शेषनिघाते कृते 'उदात्तादनुदात्तस्ये'ति स्वरितो भवत्येव तथापि तस्याऽसिद्धत्वात्तन्निमित्तकशेषनिघाताऽप्रवृत्त्या, तित्स्वनिमित्तके च तत्प्रवृत्त्या महान् फल विशेषः। युच्छतीति। युछ प्रमादे। प्रचय एकश्रुतिः। चितः सप्रकृतेरिति। अत्राऽर्थेऽकचश्चित्त्वं ज्ञापकम्। अन्यथा तस्यैकाच्त्वात् प्रत्ययाद्युदात्तत्वेनैव सिद्धौ तदर्थं स्यात्। हस्तः प्रमाणमस्य हस्तः। प्रमाणे ल इति लुक्। अत्र चित्स्वरो न, 'अन्तरङ्गानपी'ति न्यायात्। प्रत्ययलक्षणन्तु न, प्रत्ययस्याऽसाधारणरूपाश्रयणाऽभावात्। कुण्डिनच्येऽप्रत्ययस्यापि चितः सत्त्वात्। अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणाऽभावस्य पूर्वमुक्तेश्च। हस्तशब्दश्च 'स्वाङ्गशिटा'मित्याद्युदात्तः।

चितस्तद्धितस्यान्त उदात्तः। पूर्वेण सिद्धे ञित्स्वरबाधनार्थमिदम्। कौञ्जायनाः। ३७१२ कितः। (६-१-१६५) कितस्तद्धितस्यान्त उदात्तः। यदाग्नेयः। ३७१३ तिसृभ्यो जसः। (६-१-१६६) अन्त उदात्तः। तिस्रो द्यावः सवितुः।

तस्यैकाच्त्वादनर्थकं तत्स्यात्। **अन्यके इति**। 'अव्ययसर्वनाम्नाम्-' इत्यकच्, ततः परा टिरुदात्ता। एवं यके तकदित्यत्रापि यत्तच्छब्दादकच्। बहुच उदाहरणं तु बहुपटव इत्यादि ज्ञेयम्। **ञित्स्वरबाधनार्थमिति**। च्फञश्चकारो 'व्रातच्फञो-रस्त्रियाम्' इति विशेषणे चरितार्थः। ञकारो वृद्धौ। तत्रासत्यस्मिन् परत्वाद् ञित्स्वरः स्याद् इति भावः। **कौञ्जायना इति**। कुञ्जस्यापत्यानि बहूनि। 'गोत्रे कुञ्जादि-भ्यश्च्फञ्' 'व्रातच्फञोरस्त्रियाम्' इति ञ्यः। 'ञ्यादयस्तद्राजाः' तद्राजस्य बहुषु लुक्। **आग्नेय इति**। अग्नेर्ढक्। **तिसृ**। अर्थगतं बहुत्वं शब्द आरोप्य बहुवचन-

---

चतुःष्करोतीत्यादौ 'रात्सस्ये'त्यस्याऽसिद्धत्वात्सुजस्यैव। **अन्यके इति**। अकच्। ततः पर उदात्तः। **एवं यके तक**दित्यत्राऽपि बोद्धयम्। **'तद्धितस्य कित'** इत्येकं सूत्रम्, 'गोत्रे कुञ्जादिभ्यः' इति सूत्रे भाष्ये 'योगविभागः कर्त्तव्यः' इत्युक्तेः। तदनुसारेण व्याचष्टे **चितस्तद्धितस्येति**। **ञित्स्वरबाधनेति**। च्फञश्चित्वन्तु 'व्रातच्फञो'रित्यादौ विशेषणाऽर्थं सावकाशम्। अन्यथाऽऽरशायनादपि ञ्यः स्यादिति भावः। ञित्त्वमपि वृद्ध्यर्थं सावकाशम्। ततश्चित्स्वरं बाधित्वा परत्वाञ्ञित्स्वरः प्राप्तोऽनेन बाध्यत इति तात्पर्यम्। **कौञ्जायना इति**। कुञ्जात् च्फञि तदन्ताद् 'व्रातच्फञो'रिति ञ्ये ञ्यादीनान्तद्राजत्वाद्बहुषु लुक्। **कितः**। तद्धितस्येति किम्? चकुः। कित्त्वातिदेशादन्तोदात्तत्वं माभूत्। यत्तु प्रत्युदाहरन्ति–इत्यः। क्यप्। पित्त्वस्य तुकि कित्त्वस्य गुणनिषेधे सावकाशत्वात् पित्स्वरं बाधित्वा परत्वादयं स्यादिति, तन्न, क्यप्चेदन्तोदात्तस्तदा 'व्रजयजोर्भावे क्यबेवे'ति नियमेन वारयितुं शक्यत्वादित्याहुः। ञितः किम्? अविदूसम्। **तिसृभ्यो जसः**। बहुवचनं प्रयोग-भेदेन शब्दबाहुल्यात्, 'ऋन्नेभ्यः–' इतिवत्। यत्तु वार्तिककृतोक्तं 'तिसृभ्योजस्ग्रह-णानर्थक्यमन्यत्रास्याऽप्राप्तेः, बहुवचनविषयत्वादस्यैकवचनद्विवचनयोरभाव एव, शसि 'उदात्तयण' इति सिद्धम्। अन्या हलादयः, तत्र 'षट्त्री'ति, 'झल्युपोत्तम'मिति च 'सिद्ध'मिति तन्न, अतितिस्त्रावित्यादिव्यावृत्तेः फलस्य सत्त्वात्। तदुक्तं भाष्यकृता– 'उपसमस्तार्थमेके जसो ग्रहणमिच्छन्ति–अतितिस्रौ' इति। 'तस्मा'दिति परिभाषा-सत्त्वाद्विहितविशेषणाऽसम्भव इत्याशयः। अनेन पूर्ववार्तिकेन कृतं प्रत्याख्यानम-सङ्गतमिति सूचितम्। अतितिसृशब्दः–'अतेरकृत्पदे' इत्यत्र 'अतेर्धातुलोपे वाच्य'-मित्युक्तेरन्तोदात्तः। तस्य यणि 'उदात्तस्वरितयोः' इत्यनेनौकारः स्वरितः। **तिस्र**

३७१४ सावेकाचस्तृतीयादिर्विभक्तिः । (६-१-१६८) साविति सप्तमी-बहुवचनम् । तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता । वाचा विरूपः । सौ किम्-राज्ञेत्यादौ एकाचोऽपि राजशब्दात्परस्य मा भूत् । राज्ञो नु ते ।

निर्देशः । तिसृभ्यः परस्य जसोऽन्त उदात्तः स्यात् । **तिस्र इति ।** अन्तोदात्त-त्रिशब्दस्य स्थाने तिस्रादेशः स्थानिवद्भावादन्तोदात्तः । 'अनुदात्तौ सुप्पितौ' इति जसनुदात्तः । अत्र 'अचि र ऋतः' इति रेफादेशे कृते 'उदात्तस्वरितयोर्यणः' इति जसः स्वरितत्वं प्राप्तमनेन बाध्यते । **सप्तमीबहुवचनमिति ।** न प्रथमैकवचनम्, व्याख्यानात् । **राज्ञेति ।** सावित्येतस्मिन् सति एकाचः परा तृतीयादिर्विभक्तिरुदात्ता

इति । अन्तोदात्तत्रिशब्दस्यादेशस्तिस्राऽपि तथा, तस्य 'अचि रः–' इति कृते 'उदात्तस्वरितयोर्यणः' इति जसः स्वरितत्वं प्राप्तमनेन बाध्यते । **सावेकाचः ।** सौ परे यदेकाज्रूपं ततः परेत्यर्थः । सौ य एकाच् तस्मात्परेत्यर्थे निष्पन्नेऽर्थवत्परिभाषया प्रकृतेऽर्थवत एव सम्भवाच्च सौ यदर्थविशिष्टमेकाज्रूपं तदर्थविशिष्टात्तदेकाज्रूपात्परा विभक्तिरिति फलितम् । **राज्ञेति ।** राजन्शब्दः कनिनन्तत्वादाद्युदात्तः । न च 'एकाचो विहिता या विभक्ति'रित्यर्थान्न दोषः । विहितविशेषणे प्रमाणाऽभावात् । एकाज्ग्रहणव्यावर्त्यमप्येतदेव । तदभावे हि सौ वर्त्तमानाच्छब्दात्परेत्यर्थः स्यात् । सावित्यस्य द्वाभ्यामित्यादिव्याप्तिर्न स्यात् । सप्तमीबहुवचनमिति किम् ? याता याभ्यामित्यादि । प्रथमैकवचनग्रहणे तु तत्र यानिति रूपम्, संयोगान्तलोपस्याऽसिद्धत्वेन यान्तिति वा । न हि तस्मादत्र शस्विभक्तिः । विकृतिग्रहणेन प्रकृतेरग्रहणात्, आगमसहितग्रहणेन केवलस्याऽग्रहणाच्च । तन्मध्यपतितन्यायोऽपि केवलेन विशिष्टग्रहणं बोधयति, न त्वेतावता प्रकृते इष्टसिद्धिः । न च रूपविवक्षामकृत्वा सौ य एकाच्ततः परेत्यर्थ एवास्त्विति वाच्यम्, दोःशब्दः सौ एकाच्, तस्य दोषन्नादेशे ततः परा विभक्तिरुदात्ता स्यात्, इष्यते तु मध्योदात्तं दोषभ्यामिति । अयं सप्तमीबहुवचनपक्षेऽपि रूपविवक्षाऽभावे दोषः । अस्ति च दोःषु इत्यत्र य एकाच् तस्मात्परा विभक्तिरिति । नन्वेवमपि [सप्तमीबहुवचने दृष्ट] दोःशब्दादेशत्वेन स्थानिवद्भावात्प्रवृत्तिर्दुर्वारा । न चेष्टापत्तिः । तैत्तिरीये 'दोषभ्यां स्वाहा' इति मध्योदात्तस्यैव पाठात् । अत एव 'न गोश्वन्' इति सूत्रे 'शुनः' 'शुना' इत्युदाहरणं सङ्गच्छते । अन्यथा सप्तमीबहुवचने नलोपस्याऽसिद्धत्वेऽपि श्वन्शब्दात्तृतीयादिविभक्तेरभावादसङ्गतिः स्पष्टैव, मम त्वेकदेशविकृतन्यायेन न दोष इति चेन्न, लक्ष्यानुरोधेनावृत्त्या यदेकाज्रूपं तत एकाच एव परेत्यर्थेन वारणात् । 'रथ्ये'त्यादौ तु प्रथमैकवचनग्रहणेऽपि न दोषः,

एकाचः किम्—विभ्रत्ते राजनि स्वे । तृतीयादिः किम्—न ददर्श वाचम् ।

३७१५ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । (६-१-१६९)

नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीया-

---

भवतीत्यर्थो भवति । भवति चायमल्लोपे कृते एकाच । **राज इति** । राजशब्द आद्युदात्त । 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन्नन्तत्वात् । **अन्तोदात्ता** । एकाच इति वर्तते तृतीयादिर्विभक्तिरिति च । नित्यशब्दः स्वर्यते तेन नित्याधिकारगतिर्भवतीत्याहुः । **नित्याधिकारेत्यादि** । अनित्यसमासे किम् । अग्निचित् । 'अग्नौ च' इति क्विप्प्रत्ययः । उपपदसमासः । 'गतिकारकोपपदात्कृत्' इति कृदुत्तरपदप्रकृतिस्वरेण चिच्छब्द उदात्तः । अधिकारग्रहणं किम् । विग्रहाभावमात्रेण यो नित्यसमासस्तत्र पर्युदासो माभूत् । अवाचा 'ब्राह्मणेन । 'बहुव्रीहौ नञ्सुभ्याम्' इत्यन्तोदात्तत्वम् । अत्र विभक्तिर्वैकल्पिक उदात्तो भवत्येव । अन्तोदात्तात्किम् । अवाचा । नञ्समासोऽयं न तु बहुव्रीहिः । तेन 'नञ्सुभ्याम्' इत्यन्तो-

---

प्रथमैकवचनप्रकृतेः स्थाने तृतीयादिप्रकृतेरविधानात् । स्पष्टश्चेदं 'न गोश्वन्' इति सूत्रे, प्रकृते च भाष्ये । किम् च काभ्यां कुलाभ्यामित्यादावेतदप्रवृत्ती रूपविवक्षाफलम् । रूपग्रहणे प्रमाणन्तु सप्तमीबहुवचनग्रहणे 'न गोश्व'न्निति निषेधो ज्ञापक इति भाष्यमेव । स्यादेतत्, स्त्रियाम् 'आभ्या'मित्यादौ 'एभिः' 'एषा'मित्यादौ चाऽन्वादेशे सर्वानुदात्तत्वं न लभ्येत, 'सावेकाचः' इत्यस्य प्राप्तेः । आसु एषु इति हि सौ रूपम् । न च प्रकृतसूत्रस्थकैयटोक्त्या अत्राऽन्तोदात्तत्वमेवेष्टमिति वाच्यम्, 'एभिरग्ने पिबसि त्वमेषा'मित्यादिवैदिकप्रयोगविरोधात्, 'अन्ये त्वि'त्युक्त्या तेनाऽपि तत्राऽरुचिबोधनाच्च । न च विभक्तेरुदात्तत्वे शेषनिघातेन प्रकृतेरनुदात्तत्वे सिद्धे अशादेशस्याऽनुदात्तत्वविधानसामर्थ्यादन्वादेशे विभक्तिस्वरो नेति वाच्यम्, अस्त्रियाम् 'आभ्या'मित्यादौ चारितार्थ्यात् । न ह्यत्र 'सावेकाचः'इति प्राप्नोति । तत्र हि सप्तमीबहुवचने एषु इति रूपं[तत्र ए इति,] न च तादृगिहास्ति, नापि तस्य विकारः । न च स्त्रियाम् 'आसु' इति रूपस्य सत्त्वेन प्रवृत्तिर्दुर्वारा, अर्थभेदात् । न च 'न गोश्वन्' इति निषेधाद् 'एभिः' इत्यादौ न दोष इति वाच्यम्, प्रथमैकवचनेऽवर्णान्तत्वाऽभावात् । न च 'ऊडिद'मित्यस्य दुर्वारत्वेन सर्वानुदात्तत्वं नेष्टमिति वाच्यम्, तत्रान्तोदात्तादित्यनुवृत्त्या तदप्राप्तेः । अत्रैकाचः परेत्यस्यैकाच एव परेत्यर्थः कार्यः । तेन 'चित्सु' 'अग्निचिता' इत्यत्र न । **अन्तोदात्तादु** । नित्यशब्दस्य स्वरितत्वेनाऽधिकारगत्या नित्याधिकारविहितसमास एव गृह्यत इत्यत आह **नित्येत्यादि** । इदञ्च वृत्तिपदमन्यर्थोः स्पष्टम ।

दिर्विभक्तिरुदात्ता वा स्यात् । परमवाचा । **३७१६ अञ्चेश्छन्दस्यसर्वनामस्थानम्** । (६-१-१७०) अञ्चेः परा विभक्तिरुदात्ता । इन्द्रो दधीचः । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तम् । तृतीयादिरित्यनुवर्तमाने असर्वनामस्थान-

---

दात्तत्वं न भवति किं त्वव्ययपूर्वपदप्रकृतिस्वर एव भवतीत्यर्थः । उत्तरपदग्रहणं तु एकाच्त्वेनोत्तरपदं विशेषयितुम् । अन्यथा समासविशेषणं स्यात् । तथा च शुनः ऊर्क् च श्वोर्क् इत्यादावेवायं विधिः स्यात् । एकाच् किम् । राजदृषदा । षष्ठीसमासात् टाप् । **दधीच इति** । दध्यञ्चतीति 'ऋत्विग्–' आदिना क्विन् । 'अनिदिताम्–' इति नलोपः । 'अचः' इत्यकारलोपः । 'चौ' इति दीर्घत्वम् । अत्र 'चौ' इति पूर्व-

---

परमवाचेति । पक्षे वाशब्द उदात्तः । अन्तोदात्तात्किम् ? अवाचा । नञ्तत्पुरुषः । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र । उत्तरपदग्रहणमेकाच्त्वेनान्तोदात्तत्वेन चोत्तरपदं विशेषयितुम् । अन्यथा समासो विशेष्येत, तथा सति शुन ऊर्क्–'श्वोर्जा' इत्यादावेव स्यात् । एकाच्किम् ? राजदृषदा । षष्ठीसमासः । अनित्येत्यादि किम् ? अग्निचिता । उपपदसमासः । कृदुत्तरपदप्रकृतिस्वरेण चिच्छब्द उदात्तः । यत्र तु समासघटकपदमात्रघटितविग्रहाऽभावेनैव नित्यसमासस्तत्र भवत्येवायं विकल्पः । यथा 'अवाचा ब्राह्मणेन' । अविद्यमाना वागस्येति विग्रहः । बहुव्रीहौ 'नञ्सुभ्या'मित्यन्तोदात्तत्वम् । इदञ्च वृत्त्याद्यनुरोधेन व्याख्यातम् । 'उपपदमतिङ्'िति सूत्रे भाष्ये तु विग्रहाऽभावेन यो नित्यसमासस्ततोऽन्यत्रायं विकल्पः । अन्यथा 'उपस्तेन'इत्यादावव्ययीभावेऽप्ययं विकल्पः स्यादित्युक्तम् । एवञ्च बहुव्रीहौ 'अवाचा ब्राह्मणेन' इत्यत्रापि विकल्पो न भवत्येवेति प्रतीयते इति दिक् । **अञ्चेश्छन्दस्य** । 'शसादि'रिति नोक्तम् । नपुंसके शसि मा भूत्, सुटि च यथा स्यादिति । 'अञ्चे'रित्यञ्चेकः क्त्विऽपि नलोपाऽकरणं सौत्रत्वात् । यत्तु सनकारो विवक्षितः, छन्दसि विधिभाषायां 'न गोश्व'न्निति निषेधः, 'अ'ञ्चिति निर्देशेन तस्यापि नलोपाऽभावे एव प्रवृत्तेरिति व्यवस्थेति, तन्न, 'प्रतीचो बाहू'नित्यादिलक्ष्यविरोधात्, 'अनिगन्तोऽञ्चतौ' इति सूत्रस्थाऽऽकारविरोधाच्च । अत्रोत्तरपदादिति वर्तते । तेनोत्तरपदभूताऽञ्चत्यन्तात्परा विभक्तिरित्यर्थः । तेन केवलाऽञ्चतेः क्विपि 'अभ्या'मित्यादौ नाऽस्य प्रवृत्तिरित्याहुः । **दधीच इति** । दध्यञ्चति दध्यङ् । 'ऋत्वि'गित्यादिना क्विन् । **चाविताति** । तथा च तदपवादोऽयमिति भावः । लुप्ताऽकारनकारेऽञ्चतावित्यर्थेन तस्यापि विभक्त्युत्पत्त्युत्तरकालमेव प्रवृत्तेरित्याशयः । न च पूजायां 'दध्यञ्चा' इत्यादाविदं सावकाशम्, तत्र 'न गोश्व'न्निति निषेधेनाऽस्याऽप्रवृत्तेः । न चैवमपि 'दध्यभ्या'मित्यादौ अस्य सावकाशत्वेन 'दधीच' इत्यादौ परत्वाच्चुस्वरो दुर्वार-

ग्रहणं शस्परिग्रहार्थम्। प्रतीचो बाहून्। ३७१७ ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः। (६-१-१७१) एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता। प्रष्ठौहः। प्रष्ठौहा। *ऊठ्युपधाग्रहणं कर्तव्यम्। इह मा भूत्। अक्षद्युवा। अक्षद्युवे। इदम्।

पदान्तोदात्तत्वं प्राप्तम्। **शस्परिग्रहार्थमिति**। शसादिग्रहणं तु न कृतं नपुंसके शसि मा भूत्, सुपि च यथा स्यादिति। **ऊडिदम्**। अत्रैकाच इति वर्तते अन्तोदात्तादिति च। एकाजन्तोदात्तेभ्यः परा सर्वनामस्थानविभक्तिरुदात्ता स्यात्। **प्रष्ठौह इति**। 'छन्दसि सहः'। 'वहश्च' इति ण्विः। 'वाह ऊठ्'। उपपदसमासे प्रष्ठवाहशब्दो 'गतिकारकोपपदात्कृत्' इत्यन्तोदात्तः। अत्र प्रष्ठौह्शब्दस्यानेकाच्त्वेऽपि ऊठ् शब्दस्यैकाच्त्वमेव। **ऊठ्युपधाग्रहणमिति**। उपधाभूत ऊठ् गृह्यते न त्वन्त्य

इति वाच्यम्, शस्परिग्रहार्थाऽसर्वनामस्थानग्रहणसामर्थ्यात्तत्राऽपि प्रवृत्तेः। न च 'पराच' इत्यादौ सावकाशमिदम्, अनिगन्तपूर्वपदे 'चौ' इत्यस्याऽप्रवृत्तेर्वक्ष्यमाणत्वात्, तत्र 'अनिगन्तोऽञ्चतौ' इत्यस्यैवेष्टत्वादिति वाच्यम्, 'अनिगन्तोऽञ्चतौ' इति पूर्वपदप्रकृतिस्वरस्य सतिशिष्टचुस्वरबाधकत्ववदेतस्यापि बाधकत्वेन तत्रैतदप्रवृत्तेरित्याहुः। केचित्त्वत्राऽन्तोदात्तादित्यपि वर्त्तते, अग्रेऽनुवृत्तिदर्शनेनाऽत्रापि तत्सम्बन्धात्। एवञ्चाऽन्तोदात्तोत्तरपदभूताऽञ्चेः परेत्यर्थः। अत एव 'पराचा' इत्यादावप्रसक्तिः। 'अनिगन्तोऽञ्चतौ' इति पूर्वपदप्रकृतिस्वरेणाऽऽद्युदात्तत्वात्, अञ्चेरन्तोदात्तत्वं सामर्थ्याद्विभक्त्युत्पत्तिकालावच्छिन्नं ग्राह्यमित्याहुः। **ऊडिदम्**। अत्रैकाच इति अन्तोदात्तादिति च वर्तते। तत्रैकाज्ग्रहणमूठो न विशेषणम्, अव्यभिचारात्। तद्घटितसमुदायस्य विशेषणत्वेऽपि न क्षतिः। अस्ति हि प्रष्ठौह्शब्दे तद्घटितोऽर्थवान् समुदाय 'ऊ'हिति। एवं पदादंशेऽपि उपात्तानामेव विशेषणम्, न विभक्त्याक्षिप्तप्रकृतेः। अत एव 'ब्राह्मणपदा' इत्यादावन्तोदात्तत्वसिद्धिः। इदमेव ध्वनितुं श्रुत्यादिषु 'जूरा'इत्यनुदाहृत्य 'प्रष्ठौहः' इत्युदाहृतम्। न च 'सावेकाचः' इत्यनेन सिद्धत्वात्तन्नोदाहृतम्, शसि तदप्राप्तेः। एकाच इति किम्? 'अन्यैरेनान्कन्यानामभि'रित्यादौ एनानित्यस्य सर्वानुदात्तत्वं यथा स्यात्। यद्यपि 'प्राग्दिशः' इति सूत्रस्थभाष्यादत्र तृतीयादिग्रहणमनुवर्तते इति प्रतीयते, तथापि तदेकदेशयुक्तिः, तत्रैव भाष्ये 'इत' इत्यत्रैतत्प्रवृत्त्युक्तेः, 'अपो याचामि पुंसः पुत्रानुत्तरायो देवी इतः पिशङ्गदन्द्रसे' इत्यादिलक्ष्यविसंवादाच्च। अन्तोदात्तात्किम्? अन्वादेशे 'आभ्या'मित्यादौ एतन्मा भूत्। 'सावेकाचः' इति तु नात्र, सौ 'एषु' इति रूपात्। **प्रष्ठौह इति**। प्रष्ठवाट्शब्द उपपदसमासेनाऽन्तोदात्तः। **ऊठ्युपधेति**। उपधाभूतस्यैवोठो ग्रहण-

एभिर्नृभिर्नृतमः। अन्वादेशे न। अन्तोदात्तादित्यनुवृत्तेः। न च तत्रान्तोदात्तताप्यस्तीति वाच्यम्। 'इदमोन्वादेशेऽशनुदात्तस्तृतीयादौ' (३५०) इति सूत्रेणानुदात्तस्य अशो विधानात्। प्र ते बभ्रू। आभ्यां गा अनु। 'पद्दन्नोमास्हृन्निश्' (२२८) इति षट् पदादयः। पद्भ्यां भूमिः। दद्भिर्न जिह्वा। अहरहर्जायते मासिमासि। मनश्चिन्मे हृद आ। अप्। अपां फेनेन। पुम्। अभ्रातेव पुंसः। रै। राया वयम्। रायो धर्ता विवस्वतः। दिव्। उप त्वाग्ने दिवेदिवे। ३७१८ अष्टनो दीर्घात् (६-१-१७२) शसादिर्विभक्तिरुदात्ता। अष्टाभिर्दशभिः।

इत्यर्थः। पञ्चमीनिर्देशात्परस्यैव ग्रहणे प्राप्ते वचनम्। तेनाक्षद्युरित्यादौ विभक्तेरायुदात्तत्वं न। अत्र हि अक्षैर्दीव्यतीति क्विप्। अन्तरङ्गत्वादूठ् यण् उपपदसमासत्वात् कृत्स्वरेणान्तोदात्तोऽयम्। अन्वादेशे नेति। अत एव 'सावेकाचः—' इत्यपि स्वरो न। यदि स्यात्तर्ह्यन्तोदात्ताधिकारो व्यर्थः स्यात्। प्र ते बभ्र इति। भिन्ना ऋक् अन्वादेशप्रदर्शनार्थं माभ्यामित्यत्रोक्ता। माभ्यामिति। अत्र पूर्वार्धर्चे बभ्रूशब्देनोक्तयोरिहेदमा परामर्शेऽप्यन्वादेशोऽस्त्येव। अन्वादेशश्च कथितानुकथितमात्रं न त्विदमा कथितस्येदमैवानुकथनमिति भाष्योक्तेः। षट्पदादय इति। न

मित्यर्थः। पञ्चमीनिर्देशादन्त्यस्यैव ग्रहणे प्राप्ते वचनम्। 'स्वरविधौ व्यञ्जनमविद्यमानव'दिति परिभाषा तु अन्तोदात्तानुदात्तादिव्यवहारे एव प्रवर्तते। अत एव 'कर्षात्वतः' इति मतुब्निर्देशश्चरितार्थ इति प्रागेव निरूपितम्। अक्षद्युवेति। अत्र क्विपि विवक्षिते ऊडनुदात्तो निपात्यते। ततो यणि उपपदसमासे कृत्स्वरेणान्तोदात्तोऽयम्। क्विपि परत ऊठि तु अनुनासिकादौ प्रत्यय ऊठ्स्वरः सतिशिष्टः स्यात्। तथा च स्योनशब्दोऽन्तोदात्तो न स्यात्। उदात्तनिपातने चेदमेव भाष्यं प्रमाणम्। अत एव प्रयोगे ऊठ उदात्तत्वश्रुतिः, अन्यथा स्वरितः स्यादित्याहुः। प्र ते बभ्र इति। मा—आभ्यामिति च्छेदः। बभ्रूशब्देनोक्तयोरिदमा परामर्शादत्रान्वादेशोऽस्ति। कथितानुकथनस्यैव तत्त्वात्। षट्पदादय इति। सूत्रोपात्ताः षडित्यर्थः। तेन वार्तिकस्थानामपि ग्रहणे न दोषः। एकाच इत्यनुवृत्त्यैतदर्थलाभः। तेन 'आसनि' 'उदनि' इत्यादि मध्योदात्तमेव। पदाद्यादेशा अन्तोदात्ता निपात्यन्ते। इदं सूत्रं 'लिति' इत्यस्य पूर्वविप्रतिषेधेनाऽनुवृत्त्या वा बाधकम्। तेन 'दत' इत्यत्र विभक्त्युदात्तत्वमेवेति 'प्राग्दिशः' इति सूत्रे भाष्यकैयटयोः स्थितम्। इदमो हिंलि लित्वसामर्थ्याल्लित्स्वर एवेत्याहुः। अष्टनो। अष्टन्शब्दो घृतादित्वादन्तोदात्त इति

३७१९ शतुरनुमो नद्यजादी (६-१-१७३) अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात्। कुर्वती। एवं प्रथमा जानती। कुर्वते। अन्तोदात्तात्किम्–दधती। अभ्यस्तानामादिः (३६७२) इत्याद्युदात्तः। अनुमः किम्–तुदन्ती। एकादेशोऽत्र उदात्तः। अदुपदेशात्परत्वाच्छतुः 'लसार्वधातुक' (३७३०) इति निघातः। ३७२० उदात्त-

---

तु ततः परे, एकार इत्यनुवृत्तेः। अष्टनो। दीर्घान्तादष्टनः परा सर्वनामस्थानविभक्तिरुदात्ता। 'झल्युपोत्तमम्' इत्यस्यापवादः। अष्टन्शब्दो घृतादित्वादन्तोदात्तः। तेन उत्तरार्थमनुवर्तमानस्यान्तोदात्तादित्यस्येहापि नान्वयः। दीर्घात्किम्। अष्टभिः। इह 'झल्युपोत्तमम्' इति स्वरः। ननु चात्रापि 'अष्टन आ विभक्तौ' इत्यनेन भवितव्यं तद्विधौ विकल्पस्याभावादिति चेत्सत्यम्। इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति। नित्ये ह्यात्वे व्यावर्त्याभावाद्दीर्घग्रहणमनर्थकं स्यात्। कृतात्वस्य षट्संज्ञां च ज्ञापयति। अन्यथा ह्यात्वपक्षे सावकाशोऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन। जानतीति। 'ज्ञाजनोर्जा' इति जादेशः। 'श्नाभ्यस्तयोरातः' इति आकारलोपः। अत्र प्रत्ययस्वरेण शत्रन्तमन्तोदात्तम्। कुर्वत इति। 'धिन्विकृण्व्योर च'। तुदन्तीति। तुदादित्वाच्छः। 'आच्छीनद्योः–' इति नुम्। प्रत्युदाहरणे व्यङ्गविकलतां परिहरति एकादेशोऽत्रोदात्त इति। तुदन्तीत्यत्र शे कृते तस्मात्परस्य शतुरदुपदेशात्परत्वाद् 'तास्यनुदात्तेत्–' इति निघाते 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम्। अस्मिन्कर्तव्ये तस्यासिद्धत्वं नास्ति अनुम् इति प्रतिषेधाज्ज्ञापकात्। न ह्येकादेशस्वरेण विना शत्रन्तं सनुम्कमन्तोदात्तं भवति।

षट्सञ्ज्ञासूत्रे भाष्ये ध्वनितम्। तेनोत्तरार्थतयाऽनुवर्त्तमानस्यापि 'अन्तोदात्ता'-दित्यस्य न बाधः। अत एव 'अष्टौ' इत्यत्र 'एकादेश उदात्तेन' इत्यन्तोदात्तत्वसिद्धिः। 'झल्युपोत्तम'मित्यस्याऽपवादोऽयमिति स्पष्टं भाष्ये। [अत एवेदं समासादौ न प्रवर्तते]। दीर्घात्किम्? अष्टभिः। 'झल्युपोत्तम'मिति स्वरः। शतुरनुमो। अनुमिति बहुव्रीहिः। शतुर्लसार्वधातुकेति। न चाऽन्तरङ्गत्वादेकादेशे कृतेऽव्यपवर्गः, अन्तरङ्गपरिभाषाया अनित्यत्वात्। न चैकादेशस्वरोऽस्मिन्स्वरेऽसिद्धः, 'अनुम' इति निषेधेनाऽसिद्धत्वाऽभावात्। न ह्येकादेशस्वरेण विना सनुम्कमन्तोदात्तं भवति। [इदं च सामान्यापेक्षम्। तेनान्तरङ्ग एकादेशस्वरः सिद्धो वाच्य इति सिद्धम्]। 'अनुम' इति च श्रुतत्वाच्छतुरेव विशेषणम्, तेन 'मुञ्चता' इत्यादौ स्वरप्रवृत्तिः। 'अन्तोदात्ता'दिति तु तदन्तस्यैव विशेषणम्। अन्यथा 'तुदती'त्यत्र न स्यात्। अत एव नुम्प्रतिषेधः सार्थकः। अत्र वार्तिकं 'बृहन्महतोरुपसङ्ख्यान'मिति।

यणो हल्पूर्वात्। (६-१-१७४) उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात्। चोदयित्री सूनृतानाम्। एषा नेत्री। अलं देवाय कृण्वते सवित्रे। ३७२१ **नोङ्धात्वोः।** (६-१-१७५) अनयोर्यणः परे शसादय उदात्ता न स्युः। ब्रह्मबन्ध्वा। सेत्पृश्निः सुभ्वे। ३७२२ **ह्रस्वनुड्भ्यां मतुप्।** (६-१-१७६) ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबु-

---

उदात्तयणो। 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति प्राप्ते वचनम्। चोदयित्री नत्री सवित्रे इति तृजन्ता एते। 'चितः' इत्यन्तोदात्तः। हल्पूर्वादिति किम्। बहुतितवा ब्राह्मण्या। स्त्रीलिङ्गोपादानं नाभावनिवृत्त्यर्थम्। 'तनोतेर्डउः सन्वच्च' इति उः। 'चालनी तितउः पुमान्' 'बहोर्नञ्वदुत्तरपदभूम्नि' इति बहुव्रीहिरन्तोदात्तः। तत्र 'उदात्तस्वरितयोः-' इति विभक्तेः स्वरितत्वम्। अस्मिन्सूत्रे नकारग्रहणं च कर्तव्यम्। उदात्तस्थाने यो नकारस्ततोऽपि परस्या नद्या उदात्तत्वं वक्तव्यमित्यर्थः। तेन वाचां पतिः वाक् पत्नीति सिद्धम्। अत्र हि 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरस्य 'न भूवाक्चिद्दिधिषु' इति प्रतिषेधात्समासान्तोदात्तत्वे 'विभाषा सपूर्वस्य' इति नकारे नान्तत्वान् ङीप् अनेनोदात्तः। **नोङ्**। **शसादय इति**। यद्यपि पूर्वसूत्रे नद्यजादीत्यनुवर्तते तथापि ऊङ्धात्वोर्यणः परा नदी न संभवतीति नानुवर्तिता। **ब्रह्मबन्ध्वेति**। ऊङ् प्रत्ययस्वरेणोदात्तः। तेन सह य एकादेशः सोऽप्युदात्तः। तस्मात्परस्योदात्तत्वे प्रतिषिद्धे 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति विभक्तिः स्वरिता। **सुभ्वे इति**। क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य 'ओः सुपि'

बृहती, बृहता। महती। यद्यपि शतृवद्भावेनेद सिद्धं तथापि बृहन्महतोरेवेति नियमार्थमिदम्। तेन पृषता पृषती इत्यादीनां न। ननु 'प्रियमहती'त्यादौ सूत्रेणाऽसिद्धेर्विधानार्थमेव स्यादिति चेन्, न, वार्तिकेऽप्यन्तोदात्तादित्यस्य सम्बन्धेनाऽत्र तस्याऽप्यप्रवृत्तेः। 'अतिमहती'त्यत्र 'अतेरकृत्पदे' इत्यन्तोदात्तत्वाद्भाव्यमेव। विदुष इत्यादौ वसोः स्थानिवत्त्वेन शतृत्वात्ततः परयोर्नदीविभक्त्योरुदात्तः प्राप्तः, स्वरे वस्वादेशे स्थानिवत्त्वप्रतिषेधान्न भवति। **उदात्तयणो**। उदात्तस्वरितयोरित्यस्यापवादः। हल्पूर्वात्किम्? बहुतितवा ब्राह्मण्या। 'बहोर्नञ्व'दिति बहुव्रीहिरन्तोदात्तः। अत्रोदात्तस्वरितयोरिति विभक्तिः स्वरिता। अत्र 'उदात्तस्थानिकनकाराच्चे'ति वक्तव्यम्, वाक्पत्नी। तत्पुरुषः। 'पत्यावैश्वर्ये' इति प्राप्तस्य पूर्वपदप्रकृतिस्वरस्य 'न भूवाक्चिद्दिधिषु' इति निषेधे 'समासस्ये'त्यन्तोदात्तः। **नोङ्धा**। **शसादय इति**। असर्वनामस्थानोपलक्षणम्। नदीग्रहणमसम्भवान्नानुवर्तितम्। **सुभ्वे इति**। कृदुत्त-

दात्तः। यो अब्दिमाँ उदनिमाँ इयर्ति। नुटः। अक्षण्वन्तः कर्णवन्तः सखायः। अन्तोदात्तात्किम्-मा त्वा विदद्दिषुमान्। स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र न। मुरुत्वाँ इन्द्र। नियुत्वाँ वायवा गहि। * रेशब्दाच्च। रेवाँ इद्रे-

इति वतुप्। अब्दिमानिति। आपो दीयन्तेऽस्मिन्निति 'कर्मण्यधिकरणे च' इति किः। उदनिशब्दोऽव्युत्पन्नः। अस्य घृतादित्वादन्तोदात्तत्वं बोध्यम् अन्यथा 'युवान्यणन्तानाम्' इति द्वितीयस्योदात्तत्वं प्रसज्येत। 'मतुवसोरु संबुद्धौ छन्दसि' इति रुः। 'आतोऽटि नित्यम्' इत्यनुनासिकः। अक्षण्वन्त इति। अक्षिशब्दान्मतुप् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति 'छन्दस्यपि दृश्यते' इत्यनङ्। 'अनो नुट्' इत्यस्यासिद्धत्वात्पूर्वं नलोपः। ततो भूतपूर्वगत्या मतुपो नुट्। 'मादुपधायाः—' इति वत्वम्। इषुमानिति। 'धान्ये नित्' इत्यधिकारे 'इषेः किच्च' इति उप्रत्ययान्त आद्युदात्त इषुशब्दः तस्मात्परो मतुबनुदात्त एव। ननु मरुतोऽस्य सन्तीति मरुत्वान्। अत्र मतुबुदात्तत्वं प्राप्नोति। 'मृग्रोरुतिः' इत्युतिप्रत्यये प्रत्ययस्वरेण मरुच्छब्दस्यान्तोदात्तत्वात्। नच तकारेण व्यवधानं, स्वरविधौ व्यञ्जनस्याविद्यमानत्वात्। अत आह स्वरविधाविति। नेष्यत इति। 'समासस्य' इति सूत्रे

परपदप्रकृतिस्वरेण सुभृदुदात्तः। ह्रस्वनुड्भ्याम्। अत्र मतुप्ग्रहणे ज्ञातुपो ग्रहणं नेति 'चौ' इति सूत्रे भाष्ये स्पष्टम्। अब्दिमाँ इति। आपो दीयन्तेऽस्मिन्नित्यधिकरणे किः। उदनिरव्युत्पन्नो घृतादित्वादन्तोदात्तः। 'मतुप उदात्तत्वे पूर्वस्य शेषनिघातः। न च सन्निपातपरिभाषया दोषः, स्वरे तदप्रवृत्तेः कृन्मेजन्तसूत्रे भाष्ये उक्तत्वात्। अक्षण्वन्त इति। 'छन्दस्यपि दृश्यते' इत्यनङुदात्तः। मतुपो 'अनो नुट्'। पूर्वं नस्य लोपः। नुटोऽसिद्धत्वाद् 'मादुपधायाः' इति वत्वम्। इषुमानिति। इषुराद्युदात्तः। ह्रस्वेति किम्? प्रजावान्। ह्रस्वान्तादिति किम्? मरुत्वानिति। 'मृग्रोरुतिः' मरुत्। न च स्वरविधौ व्यञ्जनस्याऽविद्यमानवत्त्वेन ह्रस्वान्तत्वम्। स्वरोद्देश्यकविधावेव तत्प्रवृत्तेरन्तोदात्तात्वोदात्तात्परत्वादिव्यवहारस्यैव तेन लाभात्। अत एव 'कर्षाऽऽत्वतः' इति सूत्रे मतुप् चरितार्थः। अन्यथा 'दायः' 'पाकः' इत्यादावपि व्यञ्जनस्याऽविद्यमानवत्त्वेनाऽऽकारान्तात्परत्वेनैव सिद्धेः तद्वैयर्थ्यं स्पष्टमेव। अत एवाऽत्र नुड्ग्रहणं चरितार्थम्। अत एव स्वरे नलोपस्याऽसिद्धत्ववचनं सार्थकम्। अन्यथाऽसिद्धत्वेऽप्येतत्परिभाषया नस्याऽविद्यमानवत्त्वे तद्वैयर्थ्यं स्पष्टमेव। अत एव 'हल्स्वरप्राप्तौ' इति परिभाषान्तरं स्वरविधायकाऽर्थं भाष्ये पठितम्। तस्यास्तु प्रकृते विषय एव नास्ति। अत्र नुडप्यन्तोदात्तात्पर एव। तेनेह नरोमण्वन्तौ। मनिनन्त-

तः। ३७२३ नामन्यतरस्याम्। (६-१-१७७) मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा। चेतन्ती सुमतीनाम्। ३७२४ ङ्याश्छन्दसि बहुलम्। (६-१-१७८) ङ्याः परो नामुदात्तो वा। देवसेनानामभिभञ्जतीनाम्। वेत्युक्तेर्नेह। जयन्तीनां मरुतो यन्तु। ३७२५ षट्त्रिचतुर्भ्यो हलादिः।

मरुत्वानित्यत्र 'ह्रस्वनुड्भ्यां मतुप्' इति स्वरः प्राप्नोतीति दोषमुद्भाव्य हल्स्वरप्राप्ताविति भाष्योक्तेरिति भावः। **रेवानिति।** रयिरस्यास्तीति मतुप्। 'रयेर्मतौ बहुलम्' इति संप्रसारणं पूर्वरूपत्वम्। 'आद्गुणः' ततो ह्रस्वाभावाद्वचनम्। **नामन्य।** ह्रस्वग्रहणमनुवर्तते मतुब्ग्रहणं च। तद्धि सप्तम्या विपरिणम्यते तेन ह्रस्वो विशेष्यते। तदाह **मतुपि यो ह्रस्व इति। सुमतीनामिति।** सुमतिशब्दो बहुव्रीहिः। 'नञ्सुभ्याम्–' इत्यन्तोदात्तः। मतुपा ह्रस्वविशेषणं किम्। भूतपूर्वेऽपि ह्रस्वे यथा स्वरः स्याद् अग्नीनामित्यादौ, अन्यथा परत्वान्नित्यत्वाच्च दीर्घत्वे कृते ह्रस्वाभावान्न स्यात्। तिसृणामित्यत्र सांप्रतिके ह्रस्वे स्यात्। सांप्रतिकाभावे हि भूतपूर्वगतिर्भवति न तु सत्यपि तस्मिन्। नन्वेवं तिसृणामित्यत्र न स्यात्। मतुपि तिसृभावस्यैवाभावाद् इष्टमेवैतत्संगृहीतम्। अत्र हि 'षट्त्रिचतुर्भ्यो–' 'हलादिः' इति नित्यमेव विभक्तेरुदात्तत्वमिष्यते। **षट्त्रि।** अन्तोदात्तादित्येतन्निवृत्तम्। यद्येतदनुवर्तेत पञ्चानां नवानां चतुर्णामित्यत्र न स्यात्। 'त्रः संख्यायाः' इत्याद्युदात्तत्वात्। क्व तर्हि स्यात्? सप्ता-

---

त्वादाद्युदात्तो रोमन्शब्दः। शिरसः शीर्षन्नादेशोऽन्तोदात्तो निपात्यते। अत एव 'शीर्षण्वा'नित्यादौ भवत्येवैतत्। **रेशब्दाच्चेति।** वार्तिकमेतत्। **रेवानिति।** रयिरस्यास्तीति मतुप्। 'रयेर्मतौ बहुल'मिति संप्रसारणम्, पूर्वत्वम्, आद्गुणः। रेशब्दान्मतुपो वत्वमिष्यते। ह्रस्वाऽभावाद्वचनम्। 'त्रेश्च प्रतिषेधो वक्तव्यः'। त्रिवती। **नामन्य।** ह्रस्वेति, मतुबिति च वर्तते। तत्र व्याख्यानान्मतुपा ह्रस्वो विशेष्यते। प्रथमान्तमपि मतुप्पदं सप्तम्या विपरिणम्यते, तदाह **मतुपीति।** अत एव 'अग्नीना'मित्यादावेतत्प्रवृत्तिः। अन्यथा परत्वान्नित्यत्वाच्च दीर्घे ह्रस्वाऽभावान्न स्यात्। वचनं तु 'तिसृणा'मित्यादौ चरितार्थम्। 'चतसृणा'मिति तु नावकाशः, तस्याद्युदात्तत्वात्। **सुमतीनामिति।** सुमतिशब्दो बहुव्रीहिः 'नञ्सुभ्या'मित्यन्तोदात्तः, पक्षे स्वरितान्तः। सनुट्कग्रहणं किम्? धेन्वाम्। अन्तोदात्तात्किम्? चतसृणाम्। **ङ्याश्छन्दसि।** 'अन्यतरस्या'मित्यनुवर्तमाने बहुलोक्तिरन्तोदात्तादित्यस्य निवृत्त्यर्था। तदाह **वेत्यनुवृत्तेरिति।** बहुलग्रहणरहितपाठेऽपि अत्राऽन्तोदात्तादित्यस्य निवृत्तिर्व्याख्यानाद्बोध्या। तदाह **वेत्युक्तेरिति। जयन्तीनामिति।** आद्युदात्तमेतत्। **षट्त्रि।** हलादिः किम्? चतस्रः पश्य। प्रियत्रीन्पश्येत्यादि।

(६-१-१७६) एभ्यो हलादिर्विभक्तिरुदात्ता । आपद्भिर्हूयमानः । त्रिभिष्ट्वं देव । ३७२६ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः । (६-१-१८२) एभ्यः प्रागुक्तं न । गवां शता । गोभ्यो गातुम् । शुनश्चिच्छेपम् । सौ प्रथमैक-

---

नामष्टानाम् । सप्ताष्टशब्दौ घृतादित्वादन्तोदात्तौ । हलादिः किम् । चतस्रः पश्य । यथैतदिह हलादिग्रहणस्य व्यावर्त्यं तथा 'चतुरः शसि' इत्यत्रैवावोचाम । **न गो ।** साविति यदि सप्तमीबहुवचनग्रहणं स्यात् तेभ्यः केभ्य इत्यत्र न स्यात् तत्किंशब्दयोः सप्तमीबहुवचने परतः त्यदाद्यत्वे कृते 'बहुवचने झल्येत्' इत्येत्वविधानात् । तेषु केषु इत्यत्रावर्णान्तत्वाभावात् । ताभिर्याभिरित्यादावेव स्यात् तासु यास्वित्यत्रावर्णान्तत्वात् । तस्मात्प्रथमैकवचनमित्याह **सौ प्रथमैकवचन इति ।** अनन्तरप्रतिषेधस्यासंभवात् षाष्ठिकस्वरस्य प्रतिषेधो विज्ञायत इत्याह **प्रागुक्तं नेति ।** एवं च वीरवत्तममित्यत्र 'ह्रस्वनुड्भ्यां मतुप्' इति न भवति । 'स्फायितञ्चि—' इत्यादिना रक्चि अन्तोदात्तो वीरशब्दः । **गोभ्य इति ।** 'सावेकाचः' इति प्राप्तम् । **शुनश्चिच्छेप-**

अत्र यद्वक्तव्यं तच्चतुरः शसीत्यत्रोक्तम् । **नगोश्वन् ।** सौत्रत्वाद्द्वन्द्वः, सप्तम्यलुक् च । **एभ्य इति ।** विभक्तेर्मतुपश्चेत्यर्थः । 'मतु'बित्यस्य, विभक्तिरित्यस्य चानुवृत्तेः । एतच्च 'चौ' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । **प्रागुक्तमिति ।** षाष्ठिकस्वर इत्यर्थः । तेन 'आद्युदात्तौ सुप्पितौ' इत्यस्य बाधः । एतच्चाऽनन्तरस्येति न्यायलब्धम् । न च तन्न्यायानुसरणे षष्ठ्यीयस्यैव बाधः स्यादिति वाच्यम् , गवादिषु असम्भवात् । एवं च 'वीरवत्तम'मित्यत्र 'ह्रस्वनुड्भ्या'मिति न भवति, 'देवी' 'कुमारी'त्यादावन्तोदात्तत्वं च सिध्यति । उदात्तनिवृत्तिस्वरेण हि तत्रान्तोदात्तत्वम् । यत्तु तृतीयादिविभक्तेरुदात्तत्वं नेत्येतत्सूत्रं विवृणुते, तन्न, लक्ष्यविरोधात् । एतेन किञ्चित्स्वराणामपि बाधः स्यात् । तथा च 'क्तिनः' इति सूत्रे 'आत्तिक' इत्युदाहरणपरवृत्तिविरोध इत्यपास्तम् । 'अनुदात्तं पद'मित्यस्य तु परिभाषात्वाद्विभक्त्यादिस्वरस्याऽभावाच्च न बाधः । 'ऊडिद'मित्यस्य न निषेधः, पदादेः, रैशब्दस्य च ग्रहणवैयर्थ्यापत्तेः । **गवां शतेति ।** 'सावेकाचः' इति प्राप्तिः । नन्वत्र सप्तमीबहुवचने सावेकाजपं गो इति, न ततः परेयं विभक्तिः । न च स्थानिवद्भावः, 'गोः पूर्व [त्व]णत्वात्वस्वरेषु' इति वार्तिकेन स्वरे कर्तव्ये निषेद्धव्ये वा गोशब्दादेशस्य स्थानिवत्त्वनिषेधेन विधिनिषेधयोरुभयोरप्यप्राप्तेः । अत एव 'सुगुपाल' इत्यत्र 'गोतन्तियवं पाले' इति स्वरो न । एतेन 'सुगुना' 'बहुगुने'ति वृत्तिकारोक्तमपि परास्तम् । एवञ्च सुगुनेत्यादौ निषेधाऽभावे 'अन्तोदात्तादुत्तरपदा'दिति भवत्येवेत्यरुचेरुदाहरणान्तरमाह **गोभ्य**

वचने अवर्णान्तात् । तेभ्यो द्युम्नम् । तेषां पाहि श्रुधी हवम् । ३७२७ दिवो

मिति । अत्र चिदिति पदं संहितापाठे बाहुलकात् शब्दस्य मध्ये प्रक्षिप्यते । पदकाले तु शुनःशेपं चिदिति पठ्यते । 'शेपपुच्छलाङ्गूलेषु शुनः' इत्यलुक् । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । श्वन्शब्दे तेभ्यः तेषामित्यत्र च 'सावेकाचः–' इति प्राप्तं प्रतिषिध्यते । **राडिति** क्विबन्तः । राजा । **अङिति** । अञ्चतिः क्विबन्तः । तस्य सनकारस्य ग्रहणं विषयावधारणार्थम् । यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात् । प्राञ्चा । प्राङ्भ्याम् । 'नाञ्चेः पूजायाम्' इति प्रतिषिध्यते नलोपः । 'अञ्चेश्छन्दस्यसर्वनामस्थानम्' इति प्राप्तं निषिध्यते । गतौ तु विभक्त्युदात्तः स्यादेव । प्राचा प्राचे । **क्रुङिति** । क्विन्नन्तः । क्रुञ्चा । क्रुञ्च कौटिल्याल्पीभावयोः । 'ऋत्विक्–' इत्यादिना क्विन् । तत्रैव सूत्रे क्रुञ्चेति निपातनान्नलोपाभावः । **कृत्** । करोतिः कृन्ततिर्वा

इति । **शुनश्चिच्छेपमिति** । अत्र चिदिति संहितापाठे बाहुलकाच्छुनःशेपशब्दस्य मध्ये प्रक्षिप्यते । पदकाले तु शुनः शेपं चिदिति पठ्यते । 'शेपपुच्छलाङ्गूलेषु' इत्यलुक् । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । सौ नलोपस्याऽसिद्धत्वात् श्वनिति रूपम्, एकदेशविकृतन्यायेन ततः परा विभक्तिरिति 'सावेकाचः–' इति प्राप्तिः । **प्रथमैकवचन इति** । न तु 'सावेकाच–' इतिवत्सुपो ग्रहणम् । यत्तदोः स्त्रियामवर्णान्तत्वेऽपि लिङ्गान्तरे दकारान्तत्वाद् व्याख्यानाच्चेति भावः । तत्र सावित्यवर्णान्तविशेषणम् । सौ यदवर्णान्तं दृष्टं तस्मादित्यर्थः । 'सावेकाचः' इतिवद्रूपविवक्षा त्वत्र न, व्याख्यानात् । एतेन तेभ्य इत्यत्र सौ यदवर्णान्तं रूपं ततः परत्वाऽभावात्कथमत्र निषेधप्राप्तिरिति परास्तम् । सौ यदवर्णान्तं दृष्टं ततोऽनवर्णान्तादपि सिद्धेः । नन्वेवमपि श्वन्ग्रहणं व्यर्थम्, श्वा इति प्रथमैकवचनेऽवर्णान्तत्वादिति चेन्न, नलोपस्याऽसिद्धत्वेनाऽदोषात् । अत एव ज्ञापकात्स्वरनिषेधेऽपि नलोपाऽसिद्धत्वप्रवृत्तिः । अत एव 'पितृमा'नित्यादौ मतुप उदात्तत्वं भवत्येव । न चैवं नपुंसकप्रथमैकवचने 'त'दित्यादौ त्यदाद्यत्वाऽभावेन 'तेभ्यः कुलेभ्यः' इत्यादौ निषेधो न स्यात् । न चेष्टापत्तिः, 'यत्तदोश्च ग्रहणं कर्तव्य'मिति भाष्यमते तत्प्राप्तेः–इति वाच्यम्, सौ यस्य शब्दस्य क्वाऽपि अवर्णान्तत्वं दृष्टं ततः परविभक्तेः सर्वत्र निषेध इत्यर्थात् । वस्तुतस्तु अत्रापि रूपविवक्षाऽस्त्येव, परन्तु तादृशरूपात्परत्वं विभक्त्यादीनां तदुत्पत्तिकालावच्छिन्नं ग्राह्यम् । अत एव 'चौ' इति सूत्रस्थभाष्यविरोधो न । तत्र हि 'वेतस्वा'नित्यत्रास्य प्राप्तिः शङ्किता । अत एव 'कुमारो'त्यादावुदात्तनिवृत्तिस्वरनिषेधसूत्राऽसिद्धवत्सूत्रस्थभाष्यविरोधोऽपि न । 'वीरवत्तमं वीराणा'मित्याद्युदाहरणम् । यत्तदर्थं भाष्यकृता वचनमेवारब्धम् । अत एव

झल् । (६-१-१८३) दिवः परा झलादिर्विभक्तिर्नोदात्ता । द्युभिरक्तुभिः । झलिति किम्-उप त्वामे दिवेदिवे । ३७२८ नृ चान्यतरस्याम् । (६-१-१८४)

क्विबन्तः । कृता कृते **दिवो । झलादिरिति** । नन्वसति सप्तमीनिर्देशे कथं पुनरत्र तदादिविधिः । केवलझलात्मिकाया विभक्तेरभावादेव तदादिविधिः । ननु तर्हि तदन्तविधिरस्तु का पुनर्झलन्ता विभक्तिः । शसादिः सकारान्ता इति चेत्सत्यम् । 'षट्त्रिचतुर्भ्यो हलादिः' इत्यत आदिरिति वर्तते । दिवः परा विभक्तिर्नोदात्ता भवति, कीदृशी यस्या झलादिरिति । **द्युभिरिति** । 'साबेकाचः' इति वा 'ऊडिदम्' इति वा प्राप्तः स्वरः प्रतिषिध्यते । **दिवेदिवे इति** । 'ऊडिदंपदाद्' इति

'केभ्यः', 'काभ्यः' इत्यादौ न निषेध इति भाष्योक्तमेव रमणीयम् । **राट्**-राजा, परमराजा । **अञ्चेः**-अञ्चतिः क्विन्नन्तोऽलुप्तनकारो गृह्यते, यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यादित्यर्थं-प्राञ्चा, प्रत्यञ्चा । आद्ये 'साबेकाचः' इति प्राप्तिः । अञ्च्-शब्दस्य 'अनिगन्तोऽञ्चतौ' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तस्तदेकदेशोऽप्युदात्त एव । [अन्त्यस्तु इगन्तपूर्वपदत्वात्कृत्स्वरेणान्तोदात्तः] तस्य 'अन्तोदात्तादुत्तरपदस्ये'ति प्राप्तिः । यदि तु 'अनिगन्तोऽञ्चतौ' इति सतिशिष्टविभक्तिस्वरस्यापि बाधकम् , तदाऽन्त्यमेवोदाहरणम् । गतौ तु लुप्तनकारत्वाद्विभक्त्युदात्तः स्यादेव । वस्तुतश्चावितिसूत्रस्थभाष्याप्रामाण्यादत्र लुप्तनकारस्यापि ग्रहणम् । प्रतीचो बाहूनित्यादि तु छान्दसमिति बोध्यम् । कुङ्-क्विबन्त एव । **कृदिति**-करोतिः कृन्ततिर्वा क्विबन्तः । **दिवो झल् । द्युभिरिति** । 'ऊडिद'मिति प्राप्तस्य निषेधः । ननु दिव्शब्दः फिट्स्वरेणाऽन्तोदात्तः, वकारस्थानिक उकारो हल्स्थानिकत्वादनुदात्तः, अस्वरको वा, सर्वथाऽप्यन्तोदात्तत्वाऽभावात्कथमत्र प्राप्तिरिति चेन्न, 'दिव उ'दित्यत्रोदात्त उकारो निपात्यते इत्यदोषात् । न चोदात्तनिपातनसामर्थ्याद्विभक्तिस्वराऽप्रवृत्तौ 'दिवो झलि'ति व्यर्थमिति वाच्यम् , 'अहर्विमलद्यु' इत्यादौ अन्तरङ्गप्रकृतिस्वरस्य सतिशिष्टतया बाधेन चारितार्थ्यात् । **दिवेदिव इति** । अत्र 'ऊडिद'मित्येव भवति । **नृ चान्य** । 'साबेकाचः' इत्यस्याऽपवादोऽयम् । अत्र झलीत्यनुवर्तितम् । तत्फलन्तु ना, न्रे, नरि । अत्र सुपि यद्रूपं नृ इति, स्थानिवद्भावेन ततः परत्वात् 'साबेकाच' इत्यस्य प्राप्तिः । [ना न्रे इति तु 'उदात्तयणः' इत्यनेनास्य बाधादपि सिद्धम्] । इदञ्च 'नामन्यतरस्या'मिति सूत्रे भाष्ये स्पष्टम् । वेदे कश्चिन्नरीत्याद्युदात्तं पठ्यमानन्तु छान्दसत्वाद्बोध्यम् । एतेन झलीति नानुवर्तते, 'य एक इच्चर्षणी नॄ'णत्र नरीत्याद्युदात्तस्य दर्शनादित्यपास्तम् । लोके नरीत्यन्तोदात्तस्यैवेष्टत्वात् । न च योगविभागसामर्थ्येन

नुः परा ऋत्वादिर्विभक्तिर्वोदात्ता । नृभिर्येमानः । ३७२९ तित्स्वरितम् । (६-१-१८५) निगदव्याख्यातम् । क्व नूनम् । ३७३० **तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः** । (६-१-१८६) अस्मात्परं लसार्वधातुकमनुदात्तं स्यात् । तासि । कर्ता । कर्तारौ । कर्तारः । प्रत्ययस्वरापवादोऽयम् । अनुदात्तेत् । य आस्ते । ङितः । अभिचष्टे अनृतेभिः । अदुपदेशात् । पुरुभुजाचनस्यतम् । चित्स्वरोऽप्यनेन बाध्यते । वर्धमानं स्वे दमे । तास्यादिभ्यः

विभक्तिरुदात्ता । **तित्स्वरितम्** । **निगदव्याख्यातमिति** । उच्चारणेनैव व्याख्यातमित्यर्थः । **क्वेति** । 'किमोत्' 'तित्स्वरितम्' 'क्वाति' इति किमः क्वादेशः । **तास्यनु** । तास्यादीनां समाहारद्वन्द्वः । उपदेशग्रहणं संभवव्यभिचाराभ्यां ङिदद्भ्यां संबध्यते, न तु तास्यनुदात्तेद्भ्याम् । ङिदिति कर्मधारय उपदिश्यत इत्युपदेशः । तस्याकारेण ङिता च विशेषणात्तदन्तविधिः । तथा च सूत्रार्थः—तासेरनुदात्तेतो ङिदुपदेशादकारान्तोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात् । ह्न्विङौ वर्जयित्वा । **कर्तेत्यादि** । 'लुटः प्रथमस्य डारौरसः' एकवचने डित्त्वाट्टिलोपः । इतरत्र 'रि च' इति सलोपः । **आस्त इति** । इत्यत्रादादित्वाच्छपो लुक् । **ङित इति** । अस्याप्युपदेशविशेषणान्नेह ।

विकल्पे लब्धेऽन्यतरस्याङ्ग्रहणेन व्यवस्थितविभाषात्वबोधनादिष्टसिद्धिरिति वाच्यम्, ऋलीत्यस्याऽसम्बन्धे योगविभागस्य शसि नित्योदात्तत्वविधायकत्वाऽऽशङ्कावारणार्थत्वेनाऽन्यतरस्याङ्ग्रहणस्य चरितार्थत्वात् । भाष्याऽनुक्तव्यवस्थितविभाषाया अप्रामाणिकत्वाच्च । **तित्स्वरितम्** । 'कर्षाऽऽत्वतः' इत्यतोऽन्त इति वर्तते, तित्प्रत्ययस्याऽन्तः स्वरितः स्यादित्यर्थः । क्व नूनम् । तितिकम्? कर्तव्यम् । अन्तः किम्? तव्यतः पर्यायेणाऽऽद्यन्तौ स्वरितौ मा भूताम् । ऋत उत्, उदोष्ठ्यपूर्व, दिव उत्, इदुद्भ्याम्, औदित्यादौ तिति प्रत्ययग्रहणेन न दोषः । **तास्यनुदात्तेत्** । तास्यादीनां समाहारद्वन्द्वः । अत्रोपदेशग्रहणं सम्भवव्यभिचाराभ्यां ङिदद्भ्यामेव सम्बध्यते, न तु तास्यनुदात्तेद्भ्याम् । उपदिश्यत इत्युपदेशः । ङिदिति कर्मधारयः । इत्सञ्ज्ञकङकारेण, अकारेण चोपदिश्यमानस्य विशेषणात्तदन्तविधिः । तेन ङिदन्ताऽकारान्तोपदिश्यमानादित्यर्थः । अदुपदेशादित्यस्य यथाश्रुतत्वे हि हतो हथ इत्यत्रापि स्यात् । **कर्तेति** । लुट् । आत्मनेपदप्रथमस्य डारौरसः, तासिः । एकवचने उदात्तनिवृत्तिस्वरेऽपि इतरयोः फले विशेषः । **ङित इति** । अस्याप्युपदेशविशेषणत्वान्नेह—शृणुतं जरितुर्हवम् । अत्र श्नुरतिदेशेन ङित् । नन्वनुबन्धानामनेकान्तत्वात्कथं चक्षिङोऽपि ङिदन्तत्वमिति चेन्न, अनुबन्धेष्वेकान्तपक्षस्यैव न्याय्यत्वात् । किंच विशेषणसामर्थ्या-

किम्—अभि वृधे गृणीतः । उपदेशग्रहणान्नेह । इतो वृत्राययार्यां । लग्नहणां

शृणुते जरितुर्हवम् । अत्र श्नुरतिदेशेन ङित् । **चनस्यतमिति ।** चनोऽन्नं तदात्मन इच्छन्तमित्यर्थः । क्यच् । लोट्, थसस्तम् शप् स चानुबन्धस्यानेकान्तत्वाददुपदेशः । **चित्स्वरोऽपीति ।** चित्स्वरस्यावकाशः । चलनः । चलनशब्दार्थादकर्मकाद्युच् । अस्यावकाश आस्ते इत्यादौ । वर्धमानमित्यत्र स्वयं निघातश्चित्स्वरं बाधते परत्वादिति भावः । **वर्धमानमिति ।** वृधु वृद्धौ । लटः शानच् । शप्, 'आने मुक्' इति मुक् । न चात्र मुका व्यवधानम् । यद्यकारस्यागमो मुक्, तदाकारोपदेशात् परं लसार्वधातुकमिति सिद्धो निघातः । स्वावयवेन व्यवधानाभावात् । यद्यकारान्तस्याङ्गस्य भक्तो मुक् तदादुपदेशलसार्वधातुकमात्रापेक्षत्वादन्तरङ्गस्वरं प्रत्यकारान्तविशिष्टाङ्गप्रत्ययापेक्षस्य बहिरङ्गस्य मुकोऽसिद्धत्वात्सिद्धो निघातः । **इत**

द्रविष्यति । **चनस्यतमिति ।** चनोऽन्नम्, तदात्मन इच्छतमित्यर्थे क्यच् । लोट्, थसस्तम् । शप् । स च पित्वशित्त्ववैशिष्ट्येनाऽकारोपदेश एव तात्पर्यादकारान्तोपदिश्यमानो भवत्येव । **चित्स्वरोऽपीति ।** परत्वादिति भावः । **वर्द्धमानमिति ।** मुक्तु अकारभक्तत्वाद् 'यदागमाः—' इति न्यायेन न तस्य व्यवधायक इति न दोषः । न च वर्णग्रहणे तदप्रवृत्तिः, 'अकारान्तोपदिश्यमाना'दित्यर्थेनेह वर्णग्रहणाऽभावात् । 'वक्ष्यमाणः' इत्यादावपि अवयवावयवस्य समुदायाऽवयवत्वान्न मुक् स्वस्य व्यवधायक इति बोध्यम् । ननु पच् मि इति स्थिते आद्यश्चादिपूपदेशिवद्भावादन्तौ, शपि, लसार्वधातुकानुदात्तत्वं बाधित्वा नित्यत्वादन्तरङ्गत्वाद्वा 'अतो गुणे' इति कृते व्यपवर्गाऽभावादेतत्स्वराऽप्राप्तिः । अन्तवद्भावस्तूभयत आश्रयणे निषिद्धः । तत्प्रवृत्तावपि व्यपवर्गस्य तेनाऽनतिदेशाच्च, पचत इत्यादौ सावकाशत्वाद् भूतपूर्वगतिर्न युज्यते इति चेन्न, इष्टापत्तेः 'पचन्ति ते वृषभा'नित्यादावाद्युदात्तत्वन्तु छन्दसत्वादित्याहुः । 'स्वरभिन्नस्य प्राप्त्या न नित्यत्वम्, उभयोरपि पूर्वपरोभयापेक्षत्वेन नाऽन्तरङ्गत्वम्, पञ्चमीसमासे 'अचः परस्मि'न्निति स्थानिवद्भावेन व्यपवर्गस्य सुलभत्वाच्चे'त्यन्ये । 'पचावः' इत्यादौ दीर्घे कृतेऽपि उपदेशग्रहणादिदं प्रवर्तते । 'पचे'दित्यादावपि शपः परस्य यासुड्ङितस्य सार्वधातुकस्याऽनुदात्तत्वं भवत्येव । यासुट उदात्तत्वन्तु आशीर्लिङि चिनुयादित्यादौ च सावकाशम् । अदुपदेशादिति तपरकरणात् 'क्रीणाती'त्यादौ लसार्वधातुकानुदात्तत्वं न । 'प्रत्ययाऽप्रत्यययो'रिति परिभाषया नेह—जहि शत्रुमन्तिके । एतत्परिभाषाप्रवृत्तये एवाऽकारान्तोपदिश्यमानादिति व्याख्यातम्, अन्यथा वर्णग्रहणे सा न प्रवर्तेत, छान्दसो वा व्यत्ययस्तत्र । नन्वास्ते इत्यादौ लुप्तं शपं गृहीत्वाऽदुपदेशादिति लसार्वधातुकानुदात्तत्वं सिद्धमिति व्यर्थमनुदात्तेन्ङिद्ग्रहणमिति

किम्—कतीह पचमानाः ! सार्वधातुकं किम्—शिश्ये । ब्वाह्ङोः किम्—हनुते । यदधीते । ❀ विन्दीन्धिखिदिभ्यो नेति वक्तव्यम् । इन्धे राजा । एतच्च 'अनुदात्तस्य च यत्र' (३६२१) इति सूत्रे भाष्ये स्थितम् । ३७३१ आदिः सिचोऽन्यतरस्याम् । (६-१-१८७) सिजन्तस्यादिरुदात्तो वा । यासिष्टं

इति । यद्यपि 'अनुदात्तोपदेश' इत्यनुनासिकलोपे कृते सत्यकारान्तात्परं लसार्वधातुकं भवति तथाप्युपदेशग्रहणान्न भवति । न हि हन्तिरदन्त उपदिश्यते । कतीह पचमाना इति । ताच्छील्यवयोवचनशक्तिषु चानश्, क्वचित्तु 'कतीह निघ्नानाः' इति दृश्यते तत्र निघ्नशब्दादाचारक्विबन्ताच्छान्दसो मुगभावः । तत्तु तास्यादिभ्यः परत्वाभावाच्चिन्त्यम् । शिश्य इति । 'एरनेकाचः—' इति यणादेशः 'लिट् च' इत्यार्धधातुकमेतत् । यदधीत इति । यच्छब्दप्रयोगो 'निपातैर्यद्यदिहन्त—' इति निघातप्रतिषेधार्थः । अत्र प्रत्ययाद्युदात्तत्वमेव । विद विचारणे, इन्धी दीप्तौ, खिद दैन्ये, इति त्रयोऽनुदात्तेतः । तेभ्यः परस्य सार्वधातुकस्यानुदात्तत्वे प्राप्ते आह विन्दी-

---

चेन्न, लुग्विकरणमादायाऽस्याऽप्रवृत्तिज्ञापनार्थन्तत्सत्त्वात् । तेन 'अत्तः' इत्यादि अन्तोदात्तं सिद्धम् । प्रसङ्गात्किञ्चिदुच्यते—'रुणद्धी'त्यादौ श्नमि कृते तन्मध्यपतितन्याय्येन विशिष्टस्य धातुत्वाद्धातुस्वरेणाऽन्तोदात्तत्वमिति 'येन विधि'रिति सूत्रे भाष्ये स्पष्टम् । श्नमो मित्त्वेन परश्चेति परत्वस्य तत्राऽप्रवृत्तौ तत्सन्नियोगशिष्टाद्युदात्तत्वस्यापि तत्राऽप्रवृत्तिरिति शेषनिघातेन तस्याऽनुदात्तत्वे प्राप्ते सतिशिष्टो धातुस्वरस्तत्रेष्टव्य इति तदाशयः । न चैवं 'रुन्द्धः' इत्यत्र पूर्वोक्तरीत्या श्नम उदात्तत्वे वर्ज्यमानस्वरेण तसोऽनुदात्तत्वं स्यादिति वाच्यम् , 'सतिशिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते' इत्युक्तदोषात् । हत इति । 'अनुदात्तोपदेशे'ति नलोपे कृते हन्तिरदन्तः, न तूपदेशे । निघ्नाना इति । निघ्नशब्दान्नामधातोश्चानश् , मुगभावश्छान्दसत्वात् । एतेन तास्यादिभ्यः परत्वाऽभावादिदं चिन्त्यमित्यपास्तम् । 'दीव्यमान' इत्यपि प्रत्युदाहरणम् । न च सतिशिष्टश्यन्स्वरेण चानश्स्वरस्य बाधापत्तिः, विकरणस्वरो लसार्वधातुकस्वरमेव न बाधते, इतरसार्वधातुकस्वरन्तु बाधतेवेति वाच्यम् , 'आत्ममाने खश्चे'ति सूत्रे सार्वधातुकस्वरमात्राऽबाधकत्वस्यैव भाष्ये व्यवस्थापितत्वादिति दिक् । विन्दीन्धि । एभ्यो लिङ्स्तङोऽनुदात्तत्वे प्रतिषिद्धे इन्धीतेत्यादौ प्रत्ययाद्युदात्तत्वेन व्यवस्था । ननु 'तास्यनुदात्ते'दिति सूत्रभाष्ये विदीन्धिखिदिभ्यः परस्यानुदात्तत्वं भवतीत्यर्थो लभ्यते, तत्कथं निषेध आरभ्यत इत्यत आह एतच्चेति । एवञ्च तद्भाष्यविरोधात्प्रकृतसूत्रस्थं भाष्यं प्रौढिवाद इति भावः ।

वर्तिरश्विना । ३७३२ थलि च सेटीडन्तो वा । (६-१-१९६) सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात् । यदा नैते त्रयस्तदा 'लिति' (३६७६) इति प्रत्ययात्पूर्वमुदात्तं स्यात् । लुलविथ । अत्र चत्वारोऽपि पर्यायेणो-

दात्ताः ॥

यादि । एभ्यः परस्य लसार्वधातुकस्यानुदात्तत्वं नेति वक्तव्यमित्यर्थः । यासिष्टमिति । या प्रापणे, लुङ् थसस्तम् । 'च्लि लुङि' 'च्लेः सिच्' 'यमरमनमाताम्–' इतीट्सकौ । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । इदमाद्युदात्तत्वाभावे उदाहरणम् । आद्युदात्तत्वे तूदाहरणान्तरं मृग्यम् । थलि । 'णमुल्यन्यतरस्याम्' इत्यतोऽन्यतरस्यामित्यनुवर्तमाने वाग्रहणं कार्यिविकल्पार्थम् । अन्यतरस्यांग्रहणेन कार्यविकल्पस्य सिद्धत्वात् । तेनेडादयः पर्यायेण कार्यं प्रतिपद्यन्ते । ननु 'तवै चान्तश्च युगपत्–' इत्यादौ युगपद् ग्रहणादिवान्यत्र पर्यायः सिद्धः । सत्यम् । आदेरपि प्राप्त्यर्थं वाग्रहणम् । अन्यथा श्रुतयोरिडन्तयोरेव कार्यित्वं विकल्प्येत । सेटीति किम् । यथा थलि स्वरः । नन्विड्ग्रहणात्सेडेव थल् ग्रहीष्यत इति चेत्सत्यम् । इड्ग्रहणं तु यदेडागमः क्रियते तदा तस्योदात्तार्थं स्यात् । यथा 'कर्तुः क्यङ् सलोपश्च' इत्यत्र सः । ततश्च यथा लुलविथेत्यादौ चतुर्णां पर्यायेणोदात्तविधाने ययिथेत्यादौ चतुर्थाभावेऽपि पर्यायेणो-

आदिः सिचो । प्रत्ययस्वरापवादोऽयम् । परत्वात् 'चितः' इत्येतं बाधते । यासिष्टमिति । पक्षे 'चितः' इति मध्योदात्तम् । एवं 'मा हि कार्ष्टा'मित्यादावेतदभावे प्रत्ययस्वरेणाऽन्तोदात्तत्वम्, सिचश्चित्त्वेन 'अनुदात्तं पद'मिति परिभाषालब्धागमाऽनुदात्तत्वबाधेऽपि सार्वधातुकप्रत्ययाद्युदात्तत्वस्य बाधे मानाऽभावात्, विकरणस्वरस्य सार्वधातुकस्वराऽबाधकत्वाच्चेत्याहुः । 'अनिटः सिचः परस्य पित उपसङ्ख्यानम्' । माहि कार्षम् । [माहिकार्षं] पक्षे आद्युदात्तम्, पक्षेऽन्तोदात्तम् । न च 'मा हि कार्षी'दित्यत्रापि ईटः पिद्धक्तस्याऽयं स्वरः प्राप्नोति । ईटः पूर्वमन्तरङ्गत्वात्स्वरे कृते तत ईटि 'लक्ष्ये लक्षणस्ये'ति न्यायेन पुनरप्रवृत्तेः । अत एवात्र भाष्ये 'मा हि कार्ष'मित्येवोदाहृतम् । 'भाष्योदाहरणस्योपलक्षणत्वाल्लक्ष्यभेदेन न्यायाऽप्रवृत्तेश्च शेषनिघातविषयाऽभावाच्च भवत्येव तत्रापि स्वर' इत्यन्ये । थलि च सेटीड । अत्र 'अच इति वर्तते' इति भाष्ये स्पष्टम् । अजन्तेभ्यो विहितो यस्थल् सेट् तदन्ते पदे इट् अन्ते [आदिश्च] उदात्ता वा स्युरित्यर्थः । पक्षे लित्स्वरः । 'आदिर्णमुली'त्यतोऽन्यतरस्यामित्यनुवर्तमाने वाग्रहणं कार्यिविकल्पार्थं सत्—आदेरपि कार्यं प्रापयतीत्याह आदिर्वेति । अन्यतरस्यामित्यनुवृत्तेः फलमाह यदेति । पर्यायेणेति । न तु युगपत् । 'अन्तश्च तवै' इत्यादौ युगपद्ग्रहणाल्लिङ्गात् । थलि किम् ? लुलुविव । सेटीति किम् ? पपाथ । इड्ग्रहणन्तु यदेडागमस्तदा तस्यो-

दात्तः। ३७३३ उपोत्तमं रिति। (६-१-१६७) रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात्। यदाहवनीये। इति प्रत्ययस्वराः।

समासस्वराः।

३७३४ समासस्य। (६-१-२२३) अन्त उदात्तः स्यात्। यज्ञश्रियम्। ३७३५ बहुव्रीहौ प्रकृत्या पूर्वपदम्। (६-२-१) उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात्। सत्यश्चित्रश्रवस्तमः। उदात्तेत्यादि किम्-सर्वा-

---

दात्तत्रयं भवति एवमिड्भावेऽपि स्यादित्यर्थः। **आहवनीय इति।** बाहुलकादधिकरणेऽनीयर्। प्रीणनार्थात्कर्मणि वा। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः।

इति प्रत्ययस्वराः।

समासस्य। यज्ञश्रियमिति। षष्ठीतत्पुरुषः। श्रीशब्दस्योदात्तत्वे कृते आन्तरतम्यादियङुदात्तः। **बहुव्रीहौ।** इहोदात्तस्वरितग्रहणमनुवर्तमानं तद्वति वर्तते। पूर्वपदसामानाधिकरण्यात्सूत्रे प्रकृत्येतावदुक्तेऽपि स्वरप्रकरणात्प्रकृतिस्वरेणैव प्रकृतिभावो विज्ञायते। पूर्वपदस्य प्रकृतिभावस्तत्स्थयोरुदात्तस्वरितयोः प्रकृतिभावद्वारेणेत्याशयेनाह **उदात्तस्वरितयोगीति। चित्रेति।** श्रूयते इति श्रवः कीर्तिः। चित्रं श्रवो यस्य स चित्रश्रवाः। ततस्तमप् चित्रशब्दः फिट्स्वरेणान्तोदात्तः। ततः

दात्तार्थं स्यात्। ततश्च यथा 'लुलविथे'त्यादौ चतुर्णाम, 'पपिथ' इत्यादौ त्रयाणामेवमिड्भावेऽपि स्यात्, सेड्ग्रहणात्तु सेटयेव भवति। एवञ्च 'पपाथे'त्यत्र लित्स्वर एव। अजन्तेभ्यः किम्? बिभेदिथ। 'पपिथे'त्यादौ परत्वादातो लोपेऽजन्तात्परो नास्तीति **विहित** इत्युक्तम्। **उपोत्तमं रिति।** प्रत्ययस्वरापवादोऽयम्। **आहवनीये** बाहुलकादधिकरणेऽनीयः, प्रीणनार्थात्कर्मणि वा। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः। **इति प्रत्ययस्वराः।**

अथ समासस्वराः। समासस्य। यज्ञश्रियमिति। षष्ठीतत्पुरुषः, श्रीशब्देकारस्योदात्तत्वे आन्तरतम्यादियङ्प्युदात्तः। हल्स्वरप्राप्तौ व्यञ्जनस्याऽविद्यमानवद्भावाद् 'राजदृष'दित्यादौ षकाराऽकार उदात्तः। पर्यायेण नानापदानां स्वरे प्राप्तेऽयमारम्भः। **उदात्तस्वरितयोगीति।** उदात्तस्वरितग्रहणमनुवर्त्तमानं तद्वति वर्त्तते, पूर्वपदसामानाधिकरण्यात्। एवञ्च पूर्वपदस्य प्रकृतिभावस्तत्स्थयोरुदात्तस्वरितयोः प्रकृतिभावद्वारेणेति भावः। यद्वा पूर्वपदस्थेऽपि पूर्वपदशब्दो वर्त्तते। इदं 'कुगती'त्यत्र कैयटे स्पष्टम्। **चित्रश्रव इति।** श्रूयत इति श्रवः-कीर्तिः। चित्रं श्रवो यस्येति चित्रश्रवाः। ततस्तम॰ बहुव्रीहाविति किम्? राजपुरुषः।

मुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव, यथा—समपादः। ३७३६ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः। (६-२-२) सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या। तुल्यश्वेतः। 'कृत्यतुल्याख्या अजात्या' (७४६) इति तत्पुरुषः। किरिणा काणः किरिकाणः। पतयन्मन्दयत्सखम्। मन्दयति मादके द्वन्द्वे। सखेति सप्तमीतत्पुरुषः। शस्त्रीश्यामा। ॐ अव्यये नञ्कु-

---

परस्य 'उदात्तादनुदात्तस्य–' इति स्वरितः। ततः परस्य 'स्वरितात्संहितायामनुदात्तानाम्' इति प्रचयः। समपाद इति। त्वत्त्वसमसिमेत्यनुच्चानीति सर्वानुदात्तः समशब्दः। पादशब्दो 'वृषादीनां च' इत्याद्युदात्तः। अत्र समासान्तोदात्तत्वमेव। तुल्यश्वेत इति। नीवर्णोर्थर्मविष–' इति यति 'यतोऽनावः' इत्याद्युदात्तस्तुल्यशब्दः 'सदृक्श्वेतः सदृशश्वेतः' इति। 'समानान्ययोश्च' इति क्विन्नन्तः सदृक्शब्दः 'गतिकारकोपपदात्कृत्' इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। एवं सदृशशब्दः कञन्तो मध्योदात्तः। किरिणेति। 'कॄगॄशॄकुटिभिदिच्छिदिभ्यश्च' इत्यौणादिक इः स च कित्। 'भुजेः किच्च' इत्यतः किदित्यनुवर्तनात्। तेन किरिगिरिशब्दौ प्रत्ययस्वरेणान्तोदात्तौ। मन्दयत्सखमिति। मदि स्तुत्यादिषु। णयन्ताल्लटः शत्रादेशः। तस्य 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन शबभावात्—'तास्यनुदात्तेन्ङिददुपदेशात्' इति निघातो न। अतः प्रत्ययाद्युदात्तत्वमेव। 'णेरनिटि' इति णिलोपस्तु न। तं प्रति सार्वधातुकत्वाश्रयणात्। न च वैपरीत्यमापादनीयम्। छन्दसि दृष्टानुविधानात्। इत्थं मन्दयच्छब्दोऽन्तोदात्तः। अव्यये। निपातत्वादेव सिद्धे

पूर्वसूत्रन्तु 'समपादः' इत्यत्र उदात्तस्वरितानुक्तपूर्वपदके सावकाशम्। समपाद इति। समशब्दः 'त्वत्त्वसमसिमेत्यनुच्चानी'त्यनुदात्तः। हरदत्तस्तु 'सूञो डम'-बित्याह। पादशब्दो वृषादित्वादाद्युदात्तः। नन्वत्राऽस्मिन्स्वरे सत्यपि समासान्तोदात्तत्वं भविष्यति, 'विश्वविश्व' इत्यादौ तु न, एकपदे द्वयोरुदात्तयोरसमावेशस्योक्तत्वेनाऽसम्भवादिति चेन्न, 'सत्यपि सम्भवे बाधनं भवती'त्यङ्गीकाराददोषः। अन्यथोदात्तस्वरितयोः समावेशाऽभावे ज्ञापकाऽभावान्मनुष्यनाथ इत्यत्रोभयोः समावेशः स्यादित्याहुः। तत्पुरुषे। तुल्यश्वेत इति। तुल्यशब्दो यदन्त आद्युदात्तः। मन्दयत्सखमिति। मन्देर्णयन्ताल्लटः। शत्रादेशः। तस्य छान्दसत्वादार्धधातुकत्वेन शबभावाददुपदेशादिति निघाताऽभावे प्रत्ययाद्युदात्तत्वमेव। णिलोपस्तु न, तं प्रति सार्वधातुकत्वाश्रयणात्। छन्दसि दृष्टानुविधानान्न वैपरीत्यं शङ्क्यम्। इत्थं मन्दयच्छब्दोऽन्तोदात्तः। ततस्तत्पुरुषे द्वन्द्वेऽपि छान्दसत्वादेवाऽत्र चित्स्वराऽभावः। ननु 'परमं कारकं परमं' 'परमेण कारकेण' 'परमे कारके' इत्यर्थे समासेऽतिप्रसङ्गः,

निपातानाम्। अयज्ञो वा एषः। परिगणनं किम्-स्नात्वाकालकः। मुहूर्त-सुखम्। भोज्योष्णम्। ३७३७ वर्णो वर्णेष्वनेते। (६-२-३) वर्णवाचि-

---

नञ्ग्रहणमकरणिरित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थम्। अकरणिरित्यादौ 'आक्रोशे नञ्यनिः' इत्यनिः। किंच तिस्र इत्यत्र 'तिसृभ्यो जसः' इति सतिशिष्टोऽपि विभक्तिस्वरो नञ्स्वरेण बाध्यते। अपि च चत्वारः अनड्वाह इत्यत्र सतिशिष्टोऽप्यामुस्वरो बाध्यते। अव्ययेत्यत्र 'जिदृक्षि-' इत्यादिना धातुना समासं निपात्य इनिः क्रियते, तस्यापि स्वरस्य बाधनार्थं कुग्रहणं चादिषु पाठाभावात्। **स्नात्वेति**। मयूरव्यंसकादिरयम्। नन्वयं तत्रैवान्तोदात्तो निपात्यतामिति चेन्न। सामिकृतं स्वयंधौतमित्यादिवारणाय परिगणनस्यावश्यकत्वात्। अन्यथा तत्रापि पूर्वपदप्रकृतिस्वरः स्यात्। इष्यते तु समासस्येत्यन्तोदात्तः। सामिकृतमित्यादौ 'सामि' 'स्वयं क्तेन' इति समासः। **मुहूर्तसुखमिति**। 'कालाध्वनोः-' इति द्वितीया। 'अत्यन्तसंयोगे च' इति समासः। मुहूर्तशब्दः पृषोदरादिरन्तोदात्तः। **भोज्योष्णमिति**। 'कृत्यतुल्याख्या-' इति समासः। भोज्यशब्दो ण्यदन्तः 'तित्स्वरितम्' इति स्वरितान्तः। **वर्णो वर्णे**। अत्र अनेत इति प्रतिषेधाद्बहुवचननिर्देशाच्च उत्तरपदे स्वरूपग्रहणं

द्वितीयातृतीयासप्तम्यन्तपूर्वपदत्वात्, न हि विशेषणसमासः प्रथमान्तानामेवेति नियमोऽस्तीति चेन्न, लक्षणप्रतिपदोक्तपरिभाषया द्वितीयादिशब्दोच्चारणेन विहितसमासस्यैव ग्रहणात्। **शस्त्रीति**। गौरादिङीषन्तः। **अव्यये नञ्कु**। निपातत्वादेव सिद्धे नञ्ग्रहणम् 'अकरणि'रित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थमित्याहुः। 'अव्यथी'त्यत्र सतिशिष्टप्रत्ययस्वरबाधनार्थम्, अतिस्र इत्यत्र सतिशिष्टविभक्तिस्वरस्य, अचत्वार इत्यत्र सतिशिष्टाऽऽम्स्वरस्य च बाधनार्थमित्येके। भाष्ये त्वेतदर्थं वचनान्येवारब्धानि 'अनुदात्तं पद'मिति सूत्रे। कुग्रहणं चादिषु पाठाऽभावात्। केचित्तु चादिष्वेव कुः पाठ्यः, इह तु न पाठ्यः, एवञ्चाव्ययत्वमपि तस्य सिद्ध्यतीत्याहुः। **स्नात्वेति**। अत्र समासाऽन्तोदात्तत्वमेव। न च मयूरव्यंसकादिष्वेवास्याऽन्तोदात्तत्वं निपात्यतां किमनेनेति वाच्यम्, सामिकृतं स्वयन्धौतमित्यादि वारणाय परिगणनस्यावश्यकत्वादिति कैयटादयः। भाष्यकृता त्वन्तोदात्तनिपातनमाश्रित्य परिगणनं प्रत्याख्यातम्। तस्यायं भावः—'सामिकृतम्', 'स्वयन्धौत'मित्यादौ परिगणनवादिनाऽपि दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वमिष्यत एवेति। **मुहूर्त्तसुखमिति**। 'कालाध्वनो'रिति द्वितीया। **कान्तारातीत**। 'अतीते द्वितीये'ति भाष्यम्, '**वनातीत**' इत्यादौ थाथादिस्वरः, '**ग्रामगमी**'त्यादौ णिनिस्वरः, **खट्वारूढे** 'प्रवृद्धादीनाञ्चेति, तस्मान्मुहूर्तसुखादीन्येवोदाहरणानीति भावः। **भोज्योष्णमिति**।

न्युत्तरपदे एतद्वर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । लोहितकल्माषः । कृष्णशब्दो नक्प्रत्ययान्तः । लोहितशब्द इतन्नन्तः । वर्णः किम्-परमकृष्णः । वर्णेषु किम्-कृष्णतिलाः । अनेते किम्-कृष्णैतः । ३७३८ गाधलवणयोः प्रमाणे । (६-२-४) एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । यावद्गवे दीयते तावदित्यर्थः । अरित्रशब्द इत्रान्तो मध्योदात्तः । प्रमाणमियत्ता परिच्छेदमात्रम्, न पुनरायाम एव । प्रमाणे किम्-परमगाधम् । ३७३९ दायाद्यं

न, तत्साहचर्यात्पूर्वपदेऽपि स्वरूपग्रहणं न तदाह **वर्णवाचिनीत्यादि** । **कृष्णशब्दो नक्प्रत्ययान्त** इति । 'कृषेर्वर्णे–' इति विहितो यो नक् तदन्त इत्यर्थः । कृष्णशब्दः 'कृष्णस्यामृगाख्या चेत्' इत्यन्तोदात्तो वेदे । भाषायां तु 'वर्णानां तणति नितान्तानाम्' इत्याद्युदात्तः । **इतन्नन्त इति** । 'रुहे रश्च लो वा' इति इतन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । **कृष्णतिला इति** । 'वर्णो वर्णेन' इति प्रतिपदोक्तः समास इह गृह्यते, तेनैव सिद्धे वर्णग्रहणं चिन्त्यप्रयोजनम् । **गाध** । **अरित्रगाधमिति** । अरित्रं नौकाष्ठं तस्य गाधं स्पृश्यमानं तलम् , गाध्यत इति गाधः । गाधृ प्रतिष्ठायां कर्मणि घञ् । अर्धर्चादित्वात् क्लीबत्वम् । **गोलवणमिति** । षष्ठीसमासः । गोशब्दो 'गमेर्डोः' इति डोप्रत्ययान्तोऽन्तोदात्तः । **इत्रान्त इति** । 'अर्तिलूधूसूखनसहचर इत्रः' इति विहितः । **मध्योदात्त इति** । प्रत्ययस्वरेण । **इयत्ता परिच्छेदमात्रमिति** । इयत्तायाः परिच्छित्तिरियत्तापरिच्छेदः । क्रियाशब्दोऽत्र प्रमाणशब्दो गृह्यते न पुनरायाममात्रे रूढ इत्यर्थः । **दायाद्यम्** । दातव्यो दायोंशः । दायमादत्ते दायादः । मूलविभुजादित्वात्कः । दायादस्य भावो दायाद्यम् । दायस्य दानं तत्संबन्धो वा । इह तु लक्षणया आदीयमाने दाय एव दायाद्यशब्दो वर्तते दायाद-

---

'कुत्सुत्ये'ति समासः । कृत्यारी लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तते इति कश्चित् । **कृष्णसारङ्ग इति** । कृष्ण-लोहितौ 'वर्णानान्तणे'त्याद्युदात्तौ । वेदे तु 'कृष्णस्याऽमृगाख्या चे'दिति कृष्णोऽन्तोदात्तः । अत्र सूत्रे एवं वर्णग्रहणं व्यर्थम् , 'वर्णो वर्णेने'ति प्रतिपदोक्तसमासग्रहणादित्याहुः । **अरित्रगाधमिति** । अरित्रं–नौकाष्ठम् , तस्य गाधम् । तेन स्पृश्यमानतलमित्यर्थः । षष्ठीसमासा एते । **न पुनरायाम एवेति** । स च तिर्यगूर्ध्वोऽधरो वेत्यन्यत् । **दायाद्यम्** । दीयते स दायोंऽशः, तमादत्ते दायादः, तस्य भावो दायाद्यं=दायस्याऽऽदानम् , तत्संबन्धो वा । प्रकृते तु लक्षणया दायाद्यशब्द आदीयमाने दाये एव वर्तते । यद्वा दायादमर्हतीत्यर्थे दण्डादित्वाद्यत् , स चोपस्थितत्वात्पूर्वपदार्थभूतो दाय एवेति बोध्यम् । 'धनस्य दायादः' इति

दायादे। (६-२-५) तत्पुरुषे प्रकृत्या। धनदायादः। धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः। दायाद्यं किम्-परमदायादः। ३७४० **प्रतिबन्धि चिरकृच्छ्रयोः।** (६-२-६) प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे। गमनचिरम्। व्याहरणकृच्छ्रम्। गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि च प्रतिबन्धि जायते। प्रतिबन्धि किम्-मूत्रकृच्छ्रम्। ३७४१ **पदेऽपदेशे।** (६-२-७) व्याजवाचिनि पदशब्द उत्तरपदे प्रकृत्या तत्पुरुषे। मूत्रपदेन प्रस्थितः। उच्चारपदेन। मूत्रशब्दो घञन्तः। उच्चारशब्दो घञन्तः 'थाथ' (३८७८) आदिस्वरेणान्तोदात्तः। अपदेशे किम्-विष्णुपदम्। ३७४२ **निवाते वातत्राणे।** (६-२-८) निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे

शब्दे परे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं स्यात्। **क्युप्रत्ययान्त इति**। 'कृपृवृजिमन्दिनिधाञः क्युः' इति विहितः। **परमदायाद इति**। अत्र समासान्तोदात्तत्वमेव। **प्रतिबन्धि**। कार्यसिद्धिं प्रतिबध्नातीति प्रतिबन्धि। आवश्यके णिनिः। **गमनचिरम्। व्याहरणकृच्छ्रमिति**। गमनव्याहरणशब्दौ ल्युडन्तौ। तयोर्लित्स्वरः। अत्र विशेषणसमासः। ननु सामानाधिकरण्ये सति विशेषणसमासो भवति। न चेह तदस्ति। गमनशब्दस्य गतिवाचित्वाच्चिरशब्दस्य कालवाचित्वात्। नैष दोषः। चिरकालवाचिनि गमनेऽत्र चिरशब्दो वर्तते, गमनमत्र विशेष्यं तद्विशेषणे तु चिरकृच्छ्रे तत्र विशेष्यस्य पूर्वनिपातनार्थं मयूरव्यंसकादित्वमप्येष्टव्यम्। पूर्वपदस्य प्रतिबन्धिवाचित्वमुपपादयति। **गमनमित्यादि**। कारणवैकल्याद्धि चिरकालभावि गमनं कार्यसिद्धेः प्रतिबन्धि जायते। कृच्छ्रयोगि वा, कृच्छ्रं दुःखं तद्योगि वा कार्यसिद्धेः प्रतिबन्धि जायते। **मूत्रकृच्छ्रमिति**। षष्ठीसमासः। **पदेऽपदेशे**। अपदेशो व्याजः। 'व्याजोऽपदेशो लक्ष्यं च' इत्यमरात्तदाह **व्याजवाचिनीति। उच्चारपदेनेति**। उच्चारः पुरीषक्रिया। **विष्णुपदमिति**।

'स्वामीश्वरे'ति संबन्धसामान्यषष्ठ्यन्तेन समासः। **परमदायाद इति**। अत्र समासान्तोदात्तत्वमेव। **गमनचिरमिति**। विशेषणसमासः, ल्युडन्तस्य भाववाचित्वात्। चिरकृच्छ्रयोः कालकष्टवाचित्वेऽपि प्रकृते चिरकालभाविनि, कृच्छ्रयोगिनि चार्थे चिरकृच्छ्रयोर्वर्तनात्सामानाधिकरण्यम्। एवञ्च चिरकृच्छ्रयोः पूर्वनिपातः प्राप्नोतीत्यतो मयूरव्यंसकादिसमासोऽत्रेत्याहुः। षष्ठीसमास इत्यन्ये। **प्रतिबन्धि जायत इति**। कार्यसिद्धेः प्रतिबन्धकं जायत इत्यर्थः। **प्रतिबन्धिशब्दे**-आवश्यके णिनिः। **मूत्रकृच्छ्रमिति**। षष्ठीसमासोऽयम्। **मूत्रपदेनेति**। मूत्रमिषेणेत्यर्थः। उच्चारः-पुरीषक्रिया। **घञन्त इति**। मूत्रशब्दः 'सिविमव्योष्टेरू च'ेति ष्ट्रन्प्रत्य-

पूर्वपदं प्रकृत्या । कुटीनिवातम् । कुड्यनिवातम् । कुटीशब्दो गौरादिङीषन्तः । कुड्यशब्दो ड्यगन्तः । यगन्त इत्यन्ये । वातत्राणे किम्—राजनिवाते वसति । निवातशब्दोऽयं रूढः पार्श्वे । ३७४३ **शारदेऽनार्तवे ।** (६-२-९) ऋतौ भवमार्तवम् । तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । रज्जुशारदमुदकम् । शारदशब्दो नूतनार्थः । तस्यास्वपदविग्रहः । रज्जोः सद्य उद्धृतम् । रज्जुशब्दः । (उ) **सृजेरसम् च** । इत्याद्युदात्तो व्युत्पादितः । अनार्तवे किम्—उत्तमशारदम् । ३७४४ **अध्वर्युकषाययोर्जातौ ।** (६-२-१०) एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । कठाध्वर्युः । दौवा-

---

षष्ठीसमासः । **निवाते । निवातशब्दे परे वातत्राणवाचिनीति ।** वातत्राणार्थे निवातशब्दे परे इत्यर्थः । वातस्याभावो निवातमित्यव्ययीभावः । निरुद्धो वातोऽस्मिन्निति बहुव्रीहिर्वा । तत्र कुड्यादयो वर्तमानाः समानाधिकरणा निवातशब्देन समस्यन्ते । कुटी एव निवातं कुटीनिवातम् । कुड्य एव निवातं कुड्यनिवातम् । **ड्यगन्त इति ।** कवतेर्ड्यक् डकारस्येत्संज्ञा न भवति । गुणप्रतिषेधार्थीत्ककारानुबन्धात् । **यगन्त इत्यन्ते इति ।** (ते तु कवतेर्ड्यग्निति सूत्रमधीयते) **शारदे । नूतनार्थ इति ।** अव्युत्पन्न इत्यर्थः । **रज्जोः सद्य उद्धृतमिति ।** रज्जुबद्धपत्राधारे रज्जुशब्दः । इदानीमेव कूपादुद्धृतं नूतनं जलमित्यर्थः । **सृजेरसुम् चेति ।** 'स्कन्देः सलोपश्च' इत्यतः सलोप इति वर्तते 'भृमृशीङ्' इत्यत उरिति । 'धान्ये नित्' इत्यतो निदिति । सृजेरुः स्यात्स च नित् धातोरसुगागमः सलोपश्चेत्यर्थः । तत्र सृजेरन्त्यादचः परेऽसुमि सलोपयणादेशेऽसुम्सकारस्य जश्त्वे च रज्जुरिति भवति । **आद्युदात्त इति ।** प्रत्ययस्य नित्वान्नित्स्वरेण । **उत्तमशारदमिति ।** शरद ऋतौ भवं शारदम् । **अध्व । कठाध्वर्युरिति ।** अध्वरं यज्ञं यातीत्यध्वर्युः ऋत्विग्विशेषः । कठेन प्रोक्तं छन्दोऽधीते कठः । कठशब्दादणन्ताद् णिनिप्रत्ययः तस्य लुक् । अध्येत्रणस्तु 'प्रोक्ताल्लुक्' इति लुक् । विशेषण-

---

यान्त इत्यन्ये । **वातत्राणे इति ।** वातत्राणार्थे तत्पुरुष इत्यर्थः । **निवाते इति ।** वाताऽभावो निवातम्, निरुद्धो वातो यस्मिन्निति वा । **कुटीनिवातमिति ।** आद्ये कुड्यादिहेतुकेऽर्थे वर्तमानाः कुड्यादयो निवातशब्देन समानाधिकरणाः, अन्ये तु स्पष्टमेव तत् । **राजनिवाते इति ।** राजपार्श्वे इत्यर्थः । षष्ठीसमासोऽयम् । **रज्जुशारदमिति ।** कर्मधारयः । रज्जुशब्दो रज्जुबद्धपात्रोद्धृते वर्तते । इदानीमेव कूपादुद्धृतम् । नवजलमित्यर्थः । **आद्युदात्त इति ।** 'सृजेरसुम् सलोपश्चे'त्यत्र 'उर्नि'दित्यधिकारात् । **उत्तमशारदमिति ।** शरदि भवमित्यर्थः । **कठाध्वर्यु-**

रिककषायम्। कठशब्दः पचाद्यजन्तः। तस्माद् 'वैशम्पायनान्तेवासिभ्यश्च' (१४८४) इति णिनेः 'कठचरकाल्लुक्' (१४८७) इति लुक्। द्वारि नियुक्त इति ठक्यन्तोदात्तो दौवारिकशब्दः। जातौ किम्-परमाध्वर्युः। ३७४५ **सदृशप्रतिरूपयोः सादृश्ये।** (६-२-११) अनयोः पूर्वं प्रकृत्या। पितृसदृशः। सादृश्ये किम्-परमसदृशः। समासार्थोऽत्र पूज्यमानता न सादृश्यम्। ३७४६ **द्विगौ प्रमाणे।** (६-२-१२) द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम्। प्राच्यसप्तसमः। सप्त समाः प्रमाणमस्य। ॐ **प्रमाणे लोद्विगोर्नित्यम्।** इति मात्रचो लुक्। प्राच्यशब्द आद्युदात्तः। प्राच्यश्चासौ सप्तसमश्च

समासोऽयम्। **दौवारिककषायमिति।** षष्ठीसमासः। **सदृश।** सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या एतयोरुत्तरपदयोः। **पितृसदृश इति।** पितृमातृशब्दावुणादितृजन्तौ चित्स्वरेणान्तोदात्तौ। नन्वत्र 'पूर्वसदृशसमानार्थ-' इति तृतीयासमासे कृते 'तत्पुरुषे तुल्यार्थ-' इत्येव सिद्धम्। न च तुल्यार्थयोगे षष्ठ्या अपि विहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यम्। तत्रानभिधानात्षष्ठीसमासो नेत्यपि सुवचत्वादिति चेन्मैवम्। अलुक्समासानुरोधेन षष्ठीसमासस्वीकारस्यावश्यकत्वात्। तद्यथा। दास्याः सदृशो वृषल्याः सदृश इति। 'षष्ठ्या आक्रोशे-' इत्यलुक्। दासीशब्दो 'दंसेष्टो न आ च' इति दंसेष्टप्रत्ययः नकारस्य चाकारः। प्रत्ययस्वरेण दासशब्द अन्त उदात्तः। टित्त्वान्ङीप्। 'यस्य-' इति लोपः। 'अनुदात्तस्य च यत्र' इति ङीप उदात्तत्वम्। वृषलशब्दाज्जातिलक्षणो ङीष्। उभयत्रापि 'उदात्तयणो हल्पूर्वात्' इति विभक्तिरुदात्ता। नन्वेवं तृतीयासमासविधायके 'पूर्वसदृश-' इति सूत्रे सदृशग्रहणं मास्तु सर्वत्र षष्ठीसमासोऽस्तु इति चेन्मैवम्। यत्र षष्ठ्यर्थो नास्ति तदर्थं सदृशग्रहणम्। विद्यया सदृशो विद्यासदृश इति। अन्यो देवदत्तादिरत्र प्रतियोगी। **प्राच्यशब्द आद्युदात्त इति।** 'द्युप्रागपागुदक्प्रतीचो यत्' इति यदन्तत्वाद्

रिति। कर्मधारयोऽयमवरणविशेषे रूढः। **दौवारिककषायमिति।** रूढिशब्दोऽयम्। कषायोऽर्द्धर्चादिः। **सादृश्ये इति।** सादृश्यवाचिनि तत्पुरुषे इत्यर्थः। पितृशब्दोऽन्तोदात्तः। तृजन्तत्वात्। तृतीयासमासे 'तत्पुरुषे तुल्यार्थे'त्यनेनैव सिद्धे इदं 'दास्याः सदृश' इत्यलुक्समासार्थम्। 'पितृसदृश-' इत्यादौ षष्ठीसमासस्तु अनभिधानान्नेत्यपि वक्तुं शक्यम्। एवञ्च दासीशब्दस्याऽन्तोदात्ततया 'उदात्तयणः' इति विभक्तिरुदात्तेत्यादि 'पूर्वसदृशे'त्यत्र निरूपितम्। **न सादृश्यमिति।** यत्र हि प्रतियोगिविशेषसमर्पणार्थं पूर्वं पदं तत्रैवेदमिति सादृश्यग्रहणसामर्थ्यादाश्रीयत इति भावः।

प्राच्यसप्तसमः । द्विगौ किम्-व्रीहिप्रस्थः । प्रमाणे किम्-परमसप्तसमम् । ३७४७ **गन्तव्यपण्यं वाणिजे ।** (६-२-१३) वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम् । मद्रवाणिजः । गोवाणिजः । सप्तमीसमासः । मद्रशब्दो रक्प्रत्ययान्तः । गन्तव्येति किम्-परमवाणिजः । ३७४८ **मात्रोपज्ञोपक्रमच्छाये नपुंसके ।** (६-२-१४) मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा । भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षाशब्दो 'गुरोश्च हलः' (३२८०) इत्यप्रत्ययान्तः । पाणिन्युपज्ञम् । पाणिनिशब्द आद्युदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यजन्तः । इषुच्छायम् । इषुशब्द आद्युदात्तो

'यतोऽनावः' इत्याद्युदात्तः । **परमसप्तसममिति ।** सप्तानां समानां समाहारः सप्तसमं समाहारद्विगुः । पात्रादित्वात् स्त्रीत्वाभावः । **गन्तव्यपण्यम्** । वणिगेव वाणिजः । प्रज्ञादित्वादण् । **मद्रवाणिज इति** । मद्रेषु गत्वा व्यवहरतीत्यर्थः । **गोवाणिज इति ।** गमेर्डोः । अन्तोदात्तोऽयम् । **सप्तमीसमास इति** । सप्तमीति योगविभागाद् मद्रवाणिजेत्यत्र षष्ठीसमासः । **रक्प्रत्ययान्त इति** । 'स्फायितञ्चि' इति विहितो रक् तदन्तादित्यर्थः । प्रत्ययस्वरेणान्तोदात्तोऽयम् । **मात्रो । तथेति ।** पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः । भिक्षाशब्दोऽप्रत्ययान्तोदात्तः । मात्रशब्दस्तु तुल्यपर्यायो वृत्तिविषये तुल्यप्रमाणे वर्तते भिक्षायास्तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीतत्पुरुषः । तदाह **भिक्षाया इति प्राणिन्युपज्ञमिति** । उपज्ञायत इति उपज्ञा । 'आतश्चोपसर्गे' कर्मण्यङ् । पाणिनिशब्द इञन्तत्वादाद्युदात्तः । तस्य उपज्ञा इति षष्ठीसमासः । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इति नपुंसकता । **नन्दोपक्रममिति** । षष्ठीसमासः । अत्रापि पूर्ववन्नपुंसकता । उपक्रम्यते इति कर्मणि घञ् 'नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधः । **इषुच्छायमिति** । इषूणां छायेति तत्पुरुषः । 'छाया बाहुल्ये' इति नपुंसकता । 'इषः किच्च' इत्युप्रत्ययान्त इषुः तत्र निदधिकारा-

---

परमसप्तसममिति । समाहारे द्विगुः, उपसर्जनत्वाद्ध्रस्वः । पात्रादित्स्त्रीत्वाऽभावः । 'परमसप्तसम' इति त्वपपाठः । **वाणिज इति** । वणिगेव वाणिजः । प्रज्ञादित्वादण् । **सप्तमीसमास इति** । इदं च 'मद्रवाणिजः'इत्यत्र । मद्रेषु गत्वा व्यवहरतीत्यर्थः । न चैवं सप्तमीपूर्वपदप्रकृतिस्वरेणैव सिद्धे गन्तव्यग्रहणमत्र व्यर्थमिति वाच्यम् , 'सुप्सुपे'ति लब्धस्य समासस्य प्रतिपदोक्तत्वाऽभावादिति भावात् । षष्ठीसमासार्थमावश्यकस्यपरत्वात्तत्रापि प्रवृत्तिरित्याशय इत्यन्ये । **मात्रोपज्ञो । नपुंसके इति ।** नपुंसकवाचिनि तत्पुरुषे इत्यर्थः । **तुल्यप्रमाणमिति ।** मात्रशब्दो वृत्तिविषये तुल्यप्रमाणे वर्तते इति भावः । अस्वपदविग्रहः षष्ठीतत्पुरुषः ।

नित्त्वात्। नपुंसके किम्-कुड्यच्छाया। ३७४९ सुखप्रिययोर्हिते। (६-२-१५) एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा। गमनप्रियम्। गमनसुखम्। गमनशब्दे लित्स्वरः। हिते किम्-परमसुखम्। ३७५० प्रीतौ च। (६-२-१६) प्रीतौ गम्यायां प्रागुक्तम्। ब्राह्मणसुखं पायसम्। छात्रप्रियोऽनध्यायः। ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ। प्रीतौ किम्-राजसुखम्। ३७५१ स्वं स्वामिनि। (६-२-१७) स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा। गोस्वामी। स्वं किम्-परमस्वामी। ३७५२ पत्यावैश्वर्ये। (६-२-१८) दमूना गृहपतिर्दमे। ३७५३ न भूवाक्चिद्दिधिषु। (६-२-१९) पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या। भुवः पतिर्भूपतिः। वाक्पतिः।

दाद्युदात्तस्तदाह। इषुशब्द इति। गमनसुखमिति। समानाधिकरणसमासो मयूरव्यंसकादिर्वा। लित्स्वर इति। गमनशब्दो ल्युडन्तः 'लिति' इति सूत्रेणाद्युदात्तः। प्रागुक्तमिति। सुखप्रिययोः परयोस्तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः। योगविभागो यथासंख्यनिवृत्त्यर्थः। ननु 'सुखप्रिययोः' इत्येतावत्पूर्वसूत्रं कृत्वा 'हिते च' इति वक्तव्यम्। तत्राद्ये सूत्रे सुखप्रिययोः प्रीत्यव्यभिचारादेव प्रीतौ गम्यमानायां भविष्यतीति चेत्। सत्यम्। प्रीतिग्रहणं तदतिशयप्रतिपत्त्यर्थम्। ब्राह्मणच्छात्रशब्दाविति। ब्रह्मणोऽपत्यमित्यण्। 'ब्राह्मोऽजातौ' इति जातौ टिलोपाभावेऽणिति प्रकृतिभावः। छात्रशब्दः 'छत्रादिभ्यो णः' इति णप्रत्ययान्तः। पत्या। ऐश्वर्यार्थे पतिशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात् तत्पुरुषे। गृहपतिरिति षष्ठीसमासः। 'गेहे कः' इति कप्रत्ययान्तो गृहशब्दः प्रत्ययस्वरेणान्तोदात्तः। न भू। भ्वादीनां समाहारद्वन्द्वे नपुंसकत्वम्। ह्रस्वत्वम्। एतानीति। भूवाक्चिद्दिधिषु एतानीत्यर्थः। न प्रकृत्येति। पूर्वेण प्राप्तः प्रतिषिध्यते। भूपतिरित्यादि। षष्ठीसमासा एते। तत्र भ्वादयस्त्रयः क्विबन्ताः। दिधिषूशब्दः 'अन्दूदम्भूजम्बूकफेलू-

---

सुखप्रिययोर्हिते। यदायत्यां प्रीतिकरं तद्धितम्। गमनसुखमित्यादि कर्मधारयः। गमनस्य विशेषणत्वात्पूर्वनिपातः, मयूरव्यंसकादित्वाद्वा। प्रीतौ च। सुखप्रिययोः प्रीत्यव्यभिचारादिह यत्प्रीतिग्रहणं तत्प्रीत्यतिशयप्रतिपत्त्यर्थम्। योगविभागो यथासङ्ख्यनिवृत्त्यर्थः। पत्यावैश्वर्ये। ऐश्वर्यवाचिपतिशब्दे उत्तरपदे पूर्वपदं तथेत्यर्थः। गृहपतिरिति। 'गेहे कः' इति कप्रत्ययान्तो गृहशब्दोऽन्तोदात्तः। दमे इति। गृहे इत्यर्थः। ऐश्वर्ये किम्? वृषलीपतिर्विप्रः। तद्भर्तेत्यर्थः। न भूवा। सूत्रे समाहारद्वन्द्वः। भूपतिरित्यादयः षष्ठीतत्पुरुषा अन्तोदात्ताः। त्रयः क्विबन्ताः, अन्त्य

निश्पतिः । दिधिषूपतिः । ३७५४ **वा भुवनम्** । (६-२-२०) उक्तविषये । भुवनपतिः । (उ०) भूसूधूभ्रस्जिभ्यः । इति क्युन्नन्तो भुवनशब्दः । ३७५५ **आशङ्काबाधनेदीयस्सु संभावने** । (६-२-२१) अस्तित्वाध्यवसायः संभावनम् । गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते आबाध्यते निकटतरमिति वा संभाव्यते । संभावने किम्-परमनेदीयः । ३७५६ **पूर्वे भूतपूर्वे** । (६-२-२२) आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्तते । भूतपूर्वे किम्-परमपूर्वः । ३७५७ **सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये** । (६-२-२३) एषु पूर्वं

कान्त्युदिधिषु' इत्युप्रत्ययान्तो निपातितः । सर्वेऽप्यन्तोदात्ताः । **वा भुवनम्** । **उक्तविषये इति** । ऐश्वर्यवाचिनि पतिशब्दे परे भुवनशब्दः पूर्वपदप्रकृतिस्वरः स्यात् । 'पत्यावैश्वर्ये' इति प्राप्ते विकल्पोऽयम् । **भुवनपतिरिति** । भुवनशब्दः क्युन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । **आशङ्काबाध** । आशङ्कबाधनेदीयस्सूत्तरपदेषु संभावनवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । शकि शङ्कायाम् । बाधृ लोडने । आङ्पूर्वाभ्यां कर्मणि घञ् । अतिशयेनान्तिकं नेदीयः । द्वयोरन्तिकयोर्मध्ये एकस्यातिशयविवक्षायामीयसुनि 'अन्तिकबाढयोः-' इति नेदादेशः । गमनाशङ्कादयो विशेषणसमासाः मयूरव्यंसकादयो वा । **अस्तित्वाध्यवसाय इति** । अस्तित्वनिश्चयः । **गमनाशङ्कमिति** । पूर्वपदानि ल्युडन्तानि । तत्र लित्स्वरः । **गमनमाशङ्क्यत इत्यादि** । संभाव्यत इत्यस्य प्रत्येकमन्वयः । गमनमाशङ्क्यते इति संभाव्यते । गमनमाबाध्यत इति संभाव्यते । गमनं निकटतरमिति वा संभाव्यते । **पूर्वे भूतपूर्वे** । भूतपूर्वार्थे पूर्वशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात् । **आढ्यो भूतपूर्व इति** । यः पूर्वमाढ्य आसीत्स एवमुच्यते । **आढ्यपूर्व इति** । अत्र विशेषणसमासो मयूरव्यंसकादिर्वा । आढ्यशब्दः आङ्पूर्वाद् ध्यायतेः 'घञर्थे कविधानम्' इति कर्मणि कः । आतो लोपः । पृषोदरादित्वाद्धस्य ढः थथादिस्वरेणान्तोदात्तः । **परमपूर्व इति** । परमश्चासौ पूर्वश्चेति योऽयं वाक्यार्थः पूज्यमानतालक्षणस्तस्मिन्निह प्रत्युदाहरणे समासः । परमश्चासौ भूतपूर्वश्चेति विग्रहे तूदाहरणमेव । **सविध**

उप्रत्ययान्तः । **वा भुवनम्** । 'पत्यावैश्वर्ये' इति प्राप्ते विकल्पोऽयम् । **अस्तित्वाध्यवसाय इति** । तात्पर्यकोटिकज्ञानमित्यर्थः । **गमनमाशङ्क्यत इति** । 'संभाव्यते' इत्यनेनान्वेति, विशेषणसमासाः सर्वे । लित्स्वरः । **पूर्वे भूतपूर्वे** । भूतपूर्वार्थे पूर्वशब्दे उत्तरपदे इत्यर्थः । **आढ्यपूर्व इति** । आङ्पूर्वाद्ध्यायतेः कः । पृषोदरादित्वाड्ढः । आढ्यशब्दस्याथादिस्वरेणान्तोदात्तः । विशेषणसमासः । सविध-

प्रकृत्या। मद्रसविधम्। गान्धारसनीडम्। काश्मीरसमर्यादम्। मद्रसवेशम्। मद्रसदेशम्। सामीप्ये किम्-सह मर्यादया समर्यादं क्षेत्रम्। चैत्रसमर्यादम्।

३७५८ **विस्पष्टादीनि गुणवचनेषु।** (६-२-२४) विस्पष्टकटुकम्। विस्पष्टशब्दो 'गतिरनन्तरः' (३७८३) इत्याद्युदात्तः। विस्पष्टेति किम्-परमलवणम्। गुणेति किम्-विस्पष्टब्राह्मणः। विस्पष्ट। विचित्र व्यक्त। संपन्न।

सामीप्यार्थेषु सविधादिषूत्तरपदेषु पूर्वपदं प्रकृत्या तत्पुरुषे। **मद्रसविधमिति।** सर्वत्रोदाहरणे षष्ठीसमासः। मद्रः रगन्तेनोदात्तः। गान्धारिः। 'कर्दमादीनां च इत्याद्युदात्तो वा। काश्मीरो 'लघावन्ते–' इति मध्योदात्तः। सविधादीनां सह विधया इत्येवमादिका व्युत्पत्तिरेव केवलम्। समीपवाचिनस्त्वेते समुदायाः। मद्रादीनां सविधं समीपमित्यर्थः। **समर्यादमिति।** 'वोपसर्जनस्य' इति सहस्य सादेशः। चैत्रसमर्यादमिति षष्ठीसमासः। सविधादिषु किम्। मद्रसमीपम्। **विस्पष्टा।** गुणवचनेषु परेषु विस्पष्टादीनि पूर्वपदानि प्रकृत्या स्युः। **विस्पष्टकटुकमिति।** स्पश बाधनस्पर्शनयोरित्यस्य ण्यन्तस्य निष्ठायां 'ना दान्तशान्त–' इति स्पष्टशब्दो निपातितः। तस्य विशब्देन गतिसमासः। विस्पष्टं कटुकमिति विग्रहः। विस्पष्टादीनि शब्दप्रवृत्तिनिमित्तस्य विशेषणानि न द्रव्यस्य। कटुकादिशब्दैर्गुणवदद्रव्यमभिधीयते इति सामानाधिकरण्याभावात्कर्मधारयाभावे सुप्सुपेति समासः। **विचित्रेत्यादि।** चित्र चित्रीकरणे चुरादिण्यन्तादेरच्। विशेषेण चित्रं विचित्रं प्रादिसमासः 'तत्पुरुषे तुल्यार्थ–' इत्यव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः। चिती संज्ञाने निष्ठा। विगतं चित्रमस्य इति विचित्रः। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्याद्युदात्तः। अञ्जू व्यक्त्यादिषु। तस्य विपूर्वस्य निष्ठायां गतिस्वरे 'उदात्तस्वरितयोः–' इति स्वरितादिः। पदेः कर्तरि क्तः। थाथादिस्वरेणान्तोदात्तः। गतिस्वरस्तु न। कर्मणीति तत्र वर्तते। अयं कर्तरि क्तः। 'फलिपाटिनमिमनिजनां कुकपटिनाकिधतश्च' इत्युप्रत्ययान्तः पटुशब्दः। तत्र नित्यधिकारादाद्युदात्तः। पडि गतौ। क्तः प्रत्ययस्वरः। उणादिवृत्तौ तु पण व्यव-

---

सनीड। सामीप्यार्थेष्वेतेषूत्तरपदेष्वित्यर्थः। सविधादयः समीपे रूढाः। **मद्रो** रगन्तोऽन्तोदात्तः। **गान्धारिः**–'कर्दमादीनाञ्चे'त्याद्युदात्तो, मध्योदात्तो वा। **कश्मीरो**–'लघावन्ते–' इत्याद्युदात्तः, मध्योदात्तो वा। सविधादिषु किम्? मद्रसमीपम्। **विस्पष्टादीनि।** गुणवचनेषु परेषु विस्पष्टादीनि प्रकृत्येत्यर्थः। अत्र विस्पष्टादीनि प्रवृत्तिनिमित्तस्य विशेषणानि, न द्रव्यस्य। कटुकादिशब्दैर्गुणवद्द्रव्यमभिधीयत इति सामानाधिकरण्याऽभावात् कर्मधारयाऽभावेऽपि मयूरव्यंसकादित्वात्समासः। तत्र **विस्पष्टे**–गतिस्वरः, **विचित्रे**ऽव्ययस्वरः, **विचित्ते**–बहुव्रीहिस्वरः।

पण्डित । कुशल । चपल । निपुण । ३७५९ अज्याऽवमकन्पापवत्सु भावे कर्मधारये । (६-२-२५) अ ज्य कन् इत्यादेशवति अवमशब्दे पापवाचिनि चोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या । गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्रेत्यादि किम्-गमनशोभनम् । भावे किम्-गम्यतेऽनेनेति गमनम् । गमनं श्रेयो गमनश्रेयः । केति किम्-षष्ठीसमासे मा भूत् । ३७६० कुमारश्च । (६-२-२७) कर्मधारये । कुमारश्रमणा । कुमार-

---

द्वारे स्तुतौ च । अमन्ताङ्डः । पण्डा बुद्धिः सा संजाताऽस्येति तारकादित्वादितच् । एवमुक्तम् । कुशान् लातीति कुशलः । 'आतोऽनुपसर्गे' इति कः कृत्स्वरेणान्तोदात्तः । चुप मन्दायां गतौ । अस्मात् 'चुपेरच्चोपधायाः' इति कलप्रत्ययः । तत्र 'वृषादिभ्यश्चित्' इत्यतश्चिदिति वर्तनादन्तोदात्तः । पुण कर्मणि शुभे । 'इगुपधज्ञाप्रीकिरः कः' । थथादिस्वरेणान्तोदात्तः । अज्या । अज्यकनामादेशानामुत्तरपदत्वासंभवात्सामर्थ्यात्तद्वदुत्तरपदं गृह्यत इत्याह इत्यादेशवतीति । इष्ठेयसुनोः 'प्रशस्यस्य श्रः', 'ज्य च', 'युवाल्पयोः कनन्यतरस्याम्' । गमनश्रेष्ठमित्यादि । मयूरव्यंसकादित्वाद्राजदन्तादित्वाद्वा विशेषणस्य परनिपातः । पापिष्ठमिति । विन्मतोर्लुक् । उदाहरणे नपुंसके भावे क्तः । 'ल्युट् च' इति भावे ल्युट् । तदन्तान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि । गम्यतेऽनेनेति । 'करणाधिकरणयोश्च' इति करणे ल्युट् । केति किमिति । कर्मधारय इति किमर्थमित्यर्थः । कुमारश्च । कुमारशब्दः पूर्वपदं प्रकृतिस्वरं स्यात् । कुमारश्रमणेति । कुमारी श्रमणा कुमारश्रमणा । 'कुमारः श्रमणादिभिः' इति समासः । लिङ्गविशिष्टपरिभाषया कुमारी-

---

व्यक्तौ' गतिस्वरेणाद्युदात्तः, सम्पन्नोऽन्तोदात्तः, पटुर्नित्वादाद्युदात्तः, पण्डितकुशलावन्तोदात्तौ, चपलनिपुणावप्येवम् । अज्याऽवम । अत्र अज्यकनामुत्तरपदत्वाऽसम्भवेन सामर्थ्यात्तद्वतो ग्रहणम् । 'व'दिति तु पापेनैव सम्बध्यते । एवञ्च 'अज्यकनित्यादेशवति, अवमशब्दे, पापशब्दवति चोत्तरपदे' इति पाठः । पाठान्तरन्तु प्रामादिकम् । गमनश्रेष्ठमित्यादौ मयूरव्यंसकादित्वाद्विशेषणस्य परनिपातो, राजदन्तादित्वाद्वा । गमनपापिष्ठमिति । पापवच्छब्दादिष्ठन् । विन्मतोर्लुक् । अन्यथा पापशब्दस्य गुणोपसर्जनद्रव्यवाचित्वाऽभावात्ततः स न स्यादिति बोध्यम् । कुमारश्च । कुमारशब्दः पूर्वपदं तथा कर्मधारये इत्यर्थः । अत्र 'कुमारः श्रमणादिभि'रिति समासस्यैव ग्रहणम् , प्रतिपदोक्तत्वादिति केचित् । अन्ये तु सर्वकर्मधारयग्रहणम् , एवञ्च 'कुमारब्राह्मणः' इत्यादावपि प्रवर्तत इत्याहुः । तत्त्वमीश्वरो

शब्दोऽन्तोदात्तः। ३७६१ आदिः प्रत्येनसि। (६-२-२७) कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये। प्रतिगतमेनोऽस्य प्रत्येनाः। कुमारप्रत्येनाः। ३७६२ पूगेष्वन्यतरस्याम्। (६-२-२८) पूगा गणास्तेषूक्तं वा। कुमारचातकाः। कुमारजीमूताः। आद्युदात्तत्वाभावे 'कुमारश्च' (३७६०) इत्येव भवति। ३७६३ इगन्तकालकपालभगालशरावेषु द्विगौ। (६-२-२९) एषु परेषु पूर्वं प्रकृत्या। पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः। दश मासान् भूतो दशमास्यः। पञ्च मासान् भूतः पञ्चमास्यः। * तमधीष्ट-इत्यधिकारे। * द्विगोर्यप्। पञ्चकपालः। पञ्चभगालः। पञ्चशरावः। (फि०) अः

शब्दस्य समासे पुंवद्भावः। अन्तोदात्त इति। कुमार क्रीडायाम्। पचाद्यच् चित्स्वरः। अत्र 'कुमारः श्रमणादिभिः' इत्यस्यैव ग्रहणं प्रतिपदोक्तत्वात्। केचित्तु सर्वस्यैव कर्मधारयस्य ग्रहणमिच्छन्ति। तथा च कुमारब्राह्मण इत्यत्र पूर्वपदप्रकृतिस्वरत्वं मतभेदेन भवति। आदिः। आदिरिति षष्ठ्यर्थे प्रथमा। पूर्वत्र कुमारशब्दस्य प्रकृतिभावेन यः स्वरः प्राप्तः सोऽत्रादेर्भवतीति सूत्रार्थः। एवं स्थिते फलितमाह कुमारस्यादिरुदात्तः स्यादिति। पूगेषु। गणवाचिन्युत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो वा स्यात्। कुमारचातका इति। चातकादयः पूगशब्दास्तेभ्यः 'पूगाञ्ञ्यो ग्रामणीपूर्वात्' इति ञ्यः। तस्य 'तद्राजस्य बहुषु-' इति लुक्। कुमारश्चेत्येव भवतीति। तत्र प्रतिपदोक्तग्रहणपक्षे समासान्तोदात्तत्वम्। पञ्चारत्निरिति। पञ्चारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः। 'प्रमाणे लो द्विगोर्नित्यम्' इति मात्रचो लुक्। पञ्चसु कपालेषु संस्कृतः, पञ्चसु भगालेषु संस्कृतः, पञ्चसु शरावेषु उद्धृतः पञ्चकपालः, पञ्चभगालः, पञ्चशरावः। तद्धितार्थे द्विगुः। द्विगोर्लु-

---

वेद। आदिः प्रत्ये। आदिरिति षष्ठ्यर्थे प्रथमा, कुमारशब्दः प्रकृतिस्वरेण यत्स्वरकः प्राप्तः स स्वर आदेरिति सूत्रार्थः। फलितमाह कुमारस्यादिरिति। एतेनोदात्ताधिकाराऽभावादिदमसङ्गतमित्यपास्तम्। पूगेष्व। पूगो गणः, तद्वाचिन्युत्तरपदे कर्मधारये कुमारस्याऽऽदिरुदात्तो वेत्यर्थः। कुमारश्चेत्येवेति। प्रतिपदोक्तग्रहणपक्षे समासान्तोदात्तत्वं बोध्यम्। पञ्चारत्निरिति। तद्धितार्थे द्विगुः। 'प्रमाणे लो द्विगोर्नित्य'मिति मात्रचो लोपः। 'पञ्चारत्नयः' इत्यादौ अन्तरङ्गत्वात्पूर्वं स्वरः, पश्चाद्विभक्तिनिमित्तकार्यम्। अकृतव्यूहपरिभाषा तु नास्ति, अनित्या वेत्यसकृदावेदितम्। किं च स्थानिवत्त्वेन निमित्तविनाशाऽभावात्तत्सत्त्वेऽपि न दोषः। न च 'स्वरे ने'ति निषेधः, लोपाऽजादेशस्यैव तेन निषेधात्। कालग्रहणेन कालवाचकानां ग्रहणम्, तदाह दशमास्य इत्यादि। पञ्चकपाल इत्यादि। पञ्चसु कपा-

संख्यायाः। इति पञ्चन्शब्द आद्युदात्तः। इगन्तादिषु किम्-पञ्चाश्वः। द्विगौ किम्-परमाऽरत्निः ३७६४ बह्वन्यतरस्याम्। (६-२-११) बहुशब्दस्तथा वा। बह्वरत्निः। बहुमास्यः। बहुकपालः। बहुशब्दोऽन्तोदात्तः। तस्य यणि सति 'उदात्तस्वरितयोः' (३६५७) इति भवति। ३७६५ दिष्टिवितस्त्योश्च। (६-२-३१) एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ। पञ्चदिष्टिः। पञ्चवितस्तिः। ३७६६ सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्। (६-२-३२) अकालवाचि सप्तम्यन्तं प्रकृत्या सिद्धादिषु। साङ्काश्यसिद्धः। साङ्काश्येति ण्यान्तः। आतपशुष्कः। भ्राष्ट्रपक्वः। भ्राष्ट्रेति ष्ट्रन्नन्तः। चक्रबन्धः। चक्रशब्दोऽन्तोदात्तः। अकालात्किम्-पूर्वाह्णसिद्धः। कृत्स्वरेण बाधितः सप्तमीस्वरः प्रतिप्रसूयते। ३६६७ परिप्रत्युपापा वर्ज्यमानाऽहोरात्रावयवेषु। (६-२-३३)

गनपत्ये' इत्यणो लुक्। **पञ्चाश्वा इति**। पञ्चभिरश्वैः क्रीतः पञ्चाश्वः। आर्हीयष्ठक्। तस्य 'अध्यर्ध–' इति लुक्। **बहु**। बहुशब्दः पूर्वपदं प्रकृतिस्वरं वा इगन्तादिषूत्तरपदेषु द्विगौ। पूर्वेण नित्ये प्राप्ते विकल्पः। **बहुशब्दोऽन्तोदात्त इति**। बंहि वृद्धौ अस्माद् 'लङ्घिबंह्योर्नलोपश्च' इति कुप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः। पक्षे समासान्तोदात्तत्वम्। पूर्ववद्विग्रहप्रत्ययलुक्प्रत्युदाहरणानि योजनीयानि। **दिष्टि**। दिष्टिवितस्ती प्रमाणे, तेनात्र मात्रचो लुक्। अत्रापि पक्षेऽन्तोदात्तत्वं बोध्यम्। **सप्तमी**। **ण्यान्त इति**। वुञ्छणादिषु 'संकाशादिभ्यो ण्यः'। **ष्ट्रन्नन्त इति**। 'भस्जिगमिनमिहनिविशयशां वृद्धिश्च' इति ष्ट्रन्। संयोगादिलोपः 'व्रश्च–' इति षत्वं नित्वादाद्युदात्तः। **अन्तोदात्त इति**। 'कृञः को द्वे च' इति कप्रत्ययान्तः प्रत्ययस्वरेण। **थथादिस्वरेण बाधितः सप्तमीस्वर इति**। सिद्धशुष्कपक्वानां क्तान्तत्वाद् बन्धस्य घञन्तत्वात् थाथादिस्वरेण 'तत्पुरुषे तुल्यार्थ–' इत्यादिना सप्तम्यन्तस्य यः प्रकृतिभावः स परत्वाद्बाधितस्तेन पुनर्विधीयते। क्वचित्तु कृत्स्वरेण बाधित इति पाठः। तत्र कृदन्तस्य यः स्वरस्थाथादिलक्षणस्तेनेत्यर्थः। **परिप्रत्यु**। परिप्रत्युप एते

लेषु, भगालेषु संस्कृत इत्यर्थे 'द्विगोर्लुगनपत्ये' इति लुक्। पञ्चसु शरावेषूद्धृत इति 'तत्रोद्धृत'मित्यणो लुक्। **पञ्चाश्व इति**। पञ्चभिरश्वैः क्रीत इति 'अध्यर्द्धे'ति ठको लुक्। **बह्वन्य**। 'इगन्ते'ति प्राप्ते विभाषेयम्। **स्वरितयोरिति भवतीति**। पक्षेऽन्तोदात्तत्वं बोध्यम्। **पञ्चवितस्तिरिति**। मात्रचो लुक्, द्वयसचो वा। **अकालादिति** पञ्चमी प्रथमार्थे। **ण्यान्त इति**। तेनान्तोदात्त इत्यर्थः। **कृत्स्वरेणेति**। कृन्निमित्तिकेनेत्यर्थः। तथा च थाथादिसूत्रेण बाधित इति फलितम्। त्रयाणां क्तान्तत्वात्, बन्धस्य घञन्तत्वात्। **परिप्रत्युपा**। इत आरभ्य पञ्चसूत्राणि

एते प्रकृत्या वर्ज्यमानवाचिन्यहोरात्रावयववाचिनि चोत्तरपदे । परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । उपपूर्वाह्णम् । उपपूर्वरात्रम् । अपत्रिगर्तम् । उपसर्गा आद्युदात्ताः । बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम् । अपपर्योरेव वर्ज्यमानमुत्तरपदम् । तयोरेव वर्ज्यमानार्थत्वाद् अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्ति । वर्ज्येति किम्—अग्निं प्रति । प्रत्यग्नि । **३७६८ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । (६-२-३४)** राजन्यवाचिनां बहुवचनान्तानामन्धकवृष्णिषु वर्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या । श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनिराद्युदात्तो लक्षणया तदपत्ये वर्तते । राजन्येति किम्—द्वैप्यभैमायनाः ।

प्रकृत्या स्युः । **परित्रिगर्तमिति** । त्रिगर्तं वर्जयित्वेत्यर्थः । 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञा । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः । **प्रतिपूर्वाह्णमिति** । अह्नः पूर्वो भागः पूर्वाह्णः । 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । 'अह्नोऽदन्तात्' इति णत्वम् । पूर्वाह्णं प्रति । 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । **उपपूर्वाह्णमिति** । पूर्वाह्णस्य समीपम् । 'अव्ययं विभक्ति–' इत्यादिना सामीप्येऽव्ययीभावः । **उपपूर्वरात्रमिति** । रात्रेः पूर्वो भागः पूर्वरात्रः । 'अहःसर्वैकदेश' इत्यत्र 'रात्राह्नाहाः–' इति पुंस्त्वम् । पूर्वरात्रस्य समीपमुपपूर्वरात्रम् । **उपसर्गा** । आद्युदात्तानि पूर्वपदानि । **सिद्धत्वादिति** । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्', 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' इत्यनेन । ननु किं पुनः कारणम् । अपपर्योरेव वर्ज्यमान उदाहृतो नेतरयोस्तत्राह **अपपर्योरिति** । तेन त्रिगर्तं वर्जयित्वेत्यर्थे उपत्रिगर्तं प्रतित्रिगर्तमिति न भवति । ननु पूर्वाह्णं पूर्वरात्रं वर्जयित्वेत्यर्थे अपपूर्वाह्णं परिपूर्वाह्णम् अपपूर्वरात्रं परिपूर्वरात्रमिति अहोरात्राद्यवयवा अपपर्योः कस्मान्नोदाह्रियन्ते इत्याशङ्क्याह **अहोरात्रावयवा इति** । **वर्ज्यमाना इति** । वर्ज्यमानग्रहणेनैव सिद्धत्वान्न पृथगुदाहृता इत्यर्थः । **वर्ज्येति किमिति** । वर्ज्यमानाहोरात्रावयवेषु किम् । **अग्निं प्रतीति** । 'लक्षणेनाभिप्रती–' इत्यव्ययीभावः । **श्वाफल्कचैत्रका इति** । श्वाफल्कचैत्रकाभ्यामपत्येऽण् । **शिनिराद्युदात्त इति** । 'वह्रिश्रिश्रुयुद्रुग्लाहात्व-

---

द्वन्द्वाऽव्ययीभावविषयाणि । **परित्रिगर्तमिति** । अत्र पर्यपयोः 'अपपरी वर्जने' इति कर्मप्रवचनीयत्वात्तद्योगे पञ्चमी, 'अपपरिबहि'रित्यव्ययीभावः । **प्रतिपूर्वाह्णमिति** । 'लक्षणेनाभिप्रती–' इति समासः । **उपपूर्वेति** । 'अव्ययं विभक्ती'ति समासः । **वर्ज्यमाना एव तयोरिति** । अतो न पृथगुदाह्रियन्ते इति भावः । **अग्निं प्रतीति** । इति विग्रहे 'प्रत्यग्नि शलभाः पतन्ती'त्यादौ मा भूदित्यर्थः ।

द्वीपे भवा द्वैप्याः। भैमेरपत्यं युवा भैमायनः। अन्धकवृष्णय एते न तु राजन्याः। राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम्। नैते तथा। बहुवचनं किम्-संकर्षणवासुदेवौ। द्वन्द्वे किम्-वृष्णीनां कुमाराः वृष्णिकुमाराः। अन्धकवृष्णिषु किम्-कुरुपञ्चालाः। **३७६९ संख्या।** (६-२-३५) संख्यावाचि पूर्वपदं प्रकृत्या द्वन्द्वे। द्वादश। त्रयोदश। त्रेस्त्रयसादेश आद्युदात्तो निपात्यते। **३७७० आचार्योपसर्जनश्चान्तेवासी।** (६-२-३६) आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या। पाणिनीयरौढीयाः। छस्वरेण मध्योदात्तावेतौ। आचार्योप-

---

रिभ्यो नित्' इति सूत्रेण बाहुलकाच्छीङोऽपि निः तस्य नित्त्वं ह्रस्वत्वं चेति। **द्वैप्या इति।** 'द्विपादनुसमुद्रं यञ्'। **भैमेरपत्यमिति।** भीमस्यापत्यम् 'अत इञ्' तदन्ताद् वृद्धाच्छः। ननु च राज्ञोऽपत्ये जातिग्रहणमिति वचनाद्राजन्यशब्दः क्षत्रियजातिवचनः। ततश्च द्वैप्यभैमायना इत्ययुक्तं प्रत्युदाहरणम्। तेषामपि क्षत्रियत्वादत आह **राजन्यग्रहणमित्यादि।** अन्धकवृष्णीनां क्षत्रियत्वाव्यभिचाराद्राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः। **एकादशेति।** 'संख्याया अल्पीयस्याः-' इत्येकशब्दस्य पूर्वनिपातः। 'आन्महतः-' इत्यत्र आदिति योगविभागात्प्रागेकादशभ्य इति निर्देशाद्वा आत्वम्। 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' इति नित्वादेकशब्द आद्युदात्तः। **द्वादशेति।** 'द्व्यष्टनः संख्यायाः-' इत्यात्वम्। **त्रयोदशेति।** 'त्रेस्त्रयः-' इति त्रय आदेशः। **अन्तोदात्तो निपात्यत इति।** इदं काशिकानुरोधेनोक्तम्। वस्तुतस्तु 'त्रयोदश च मे' इति लक्ष्यानुरोधादाद्युदात्तो निपात्यत इति बोध्यम्। **आचार्योपसर्जन।** आचार्य उपसर्जनं यस्य आचार्योपसर्जनः। **अन्तेवासीति।** अन्ते वसतीत्यन्तेवासी 'शयवासवासिष्वकालात्' इति सप्तम्या अलुक्। सूत्रे षष्ठीबहुवचनस्य स्थाने प्रथमैकवचनम्। तदाह **आचार्योपसर्जनान्तेवासिनां द्वन्द्वे इति।** **पाणिनीयरौढीया इति।** वृद्धाच्छः। रौढिशब्दाद् 'इञश्च'

क्वचित्तु तथैव पाठः। **लक्षणया।** शिनित्वारोपेण। **राजन्यग्रहणमिति।** अन्धकवृष्णीनां राजन्यत्वाऽव्यभिचारादित्यर्थः। **सङ्ख्या।** अत्र सर्वसूत्राद् द्वन्द्व इति वर्तते। **त्रयसादेश आद्युदात्त इति।** 'त्रयो दश च मे' इत्यादावाद्युदात्तपाठादिति भावः। क्वचिद्वृत्तिपुस्तके, मूलपुस्तके चाऽन्तोदात्त इति पाठो दृश्यते। तदा 'त्रयोदश च मे' इत्यादौ छान्दसत्वं बोध्यम्। **आचार्योप।** सूत्रे षष्ठीबहुवचनस्थाने प्रथमैकवचने। **पाणिनीयरौढीया इति।** पाणिने रौढेश्च छात्रा इत्यर्थः। तत्प्रोक्तमधीयते इत्यर्थो वा। पाणिनेर्गोत्रेञन्तत्वाऽभावाद्रौढौ 'न द्व्यचः' इति निषेधाच्च 'इञश्चे'त्यण् न। तेन वृद्धाच्छः। **आचार्योपसर्जनग्रहणम्**-आचार्योपसर्जनान्ते-

सर्जनग्रहणं द्वन्द्वविशेषणम् । सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायेत । तेनेह न । पाणिनीयदेवदत्तौ । आचार्येति किम्–छान्दसवैयाकरणाः । अन्तेवासीति किम्–आपिशलपाणिनीये शास्त्रे । ३७७१ कार्तकौजपादयश्च । (६-२-३७) एषां द्वन्द्वे पूर्वपदं प्रकृत्या । कार्तकौजपौ । कृतस्येदं कुजपस्येदमित्यणन्तावेतौ । सावर्णिमाण्डूकेयौ । ३७७२ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु । (६-२-३८) महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु । महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महा-

---

इत्यणो 'न ह्यचः प्राच्यभरतेषु' इति निषेधात् । **द्वन्द्वविशेषणार्थमिति** । न त्वन्तेवासिविशेषणार्थं, तस्य आचार्योपसर्जनत्वाव्यभिचारात् । किमर्थं पुनर्द्वन्द्वविशेषणं विज्ञायत इत्याह **सकलो द्वन्द्व** । इत्यादि । **छान्दसेति** । 'छन्दोऽधीते' इत्यण् । 'श्रोत्रियंश्छन्दोऽधीते' इति तु न, तत्र वाग्रहणानुवृत्तेः । **आपिशलपाणिनीये इति** । आपिशलस्यापत्यमापिशलिराचार्यः । तेन प्रोक्तमापिशलम् । 'इनश्च' इत्यण् । पाणिनिना प्रोक्तं पाणिनीयम् । वृद्धाच्छः । आपिशलं च पाणिनीयं च आपिशलपाणिनीये । **कार्त** । कुर्भूमिः तत्र जाताः कुजाः तान् पातीति कुजपः । कृतकुजपाभ्यामपत्ये ऋष्यण् । सावर्णिरिञन्तः । माण्डूकेयशब्दो 'ढक् च मण्डूकात्' इति ढगन्तः । **महाव्रीहिरिति** । 'आन्महतः–' इत्यात्वम् । **महेष्वास इति** । अत्रैकारः 'स्वरितो वानुदात्ते पदादौ' इति स्वरितो वा । आदिपदेन महाजाबालः, महाभारतः, महाहैलिहिलः, महारौरवः, महाप्रवृद्धः । महच्छब्दोऽन्तोदात्त

वासिग्रहणम् । **द्वन्द्वविशेषणमिति** । न तु पूर्वपदविशेषणम्, व्याख्यानादिति भावः । तत्फलमाह **सकल इति** । **छान्दसेति** । छन्द अधीयते इत्यर्थः । द्वन्द्वे किम्? आपिशलप्रियः पाणिनीय आपिशलपाणिनीयः । **कार्तकौ** । अत्र गणे विभक्त्यन्तपाठो वचनविवक्षार्थः । कुर्भूमिः, तत्र जाताः कुजाः, तान् पाति कुजपः;कृतस्य कुजपस्य वाऽपत्यमित्यर्थे ऋष्यणन्तावेतौ–कार्तकौजपौ· सावर्णिमाण्डूकेयौ, अवन्त्यश्मकाः, पैलश्यामकर्णेयाः,–अत्र बहुवचनमविवक्षितमिति वृत्तिकृत् । कपिश्यामकर्णेयाः । केचित्तु पैलश्यापर्णेयाः कपिश्यापर्णेया इति पठन्ति । शैतिकाक्षपाञ्चालेयाः । अत्रापि बहुत्वमविवक्षितम् । कटुकवार्चलेयाः । वार्चलेया इत्यन्ये पठन्ति । शाकलशुनकाः, शाकलशाणकाः, शाणकबाभ्रवाः, आर्चाभिमौद्गलाः, कुन्तिसुराष्ट्राः, चीतिसुराष्ट्राः । तण्डवतण्डाः । अविमत्तकामविद्धाः । बाभ्रवशालङ्कायनाः । बाभ्रवदानच्युताः, कठकालापाः, कठकौथुमाः, कौथुमलौगाक्षाः, स्त्रीकुमारम् , मौदपैप्पलादाः, [मौदपैप्पलादाः] । अस्य द्विःपाठः पक्षे समासान्तोदात्तत्वाय । वत्सजरन्तः, सौश्रुत-

हैलिहिलः । महच्छब्दोऽन्तोदात्तः । 'सन्महत्' (७४०) इति प्रतिपदोक्तसमास एवायं स्वरः । नेह । महतो व्रीहिर्महद्व्रीहिः । ३७७३ क्षुल्लकश्च वैश्वदेवे । (६-२-३९) चान्महान् । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु केऽन्तोदात्तः । ३७७४ उष्ट्रः सादिवाम्योः । (६-२-४०) उष्ट्रसादी । उष्ट्रवामी । उषेः ष्ट्रनि उष्ट्रशब्द आद्युदात्तः । ३७७५ गौः सादसादिसारथिषु । (६-२-४१) गोसादः । गोसादिः । गोसारथिः । ३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च । (६-२-४२) एषां सप्तानां समासानां

इति 'वर्तमाने पृषन्महत्–' इत्यत्र तथा निपातनात् । **सन्महदिति** । एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते । ननु प्रवृद्धग्रहणमनर्थकं 'कर्मधारये निष्ठा' इति वक्ष्यमाणेनैव सिद्धत्वात् कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति प्रवृद्धशब्दस्य क्तान्तत्वादिति चेन्न । 'कर्मधारये निष्ठा' इत्यत्रापि लक्षणप्रतिपदोक्तपरिभाषया क्तान्तेन प्रतिपदोक्तो यः समासः श्रेण्यादिस्तस्यैव ग्रहणमित्यर्थः । **क्षुल्लक** । क्षुल्लकमहच्छब्दौ पूर्वपदे प्रकृतिस्वरौ स्तः वैश्वदेवशब्दे परे । **क्षुल्लकेति** । 'आतोऽनुपसर्गे कः' । 'तोर्लि' इति परसवर्णः । **उष्ट्रः** । उष्ट्रः पूर्वपदं प्रकृतिस्वरं स्यात्सादिवाम्योः परतः । **उषेः ष्ट्रनीति** । उष दाहे अस्मात् ष्ट्रनिति वर्तमाने 'उषिखनिभ्यः कित्' इति व्युत्पादितत्वात् । **गौः साद** । गोशब्दः पूर्वपदं क्रमात् सादादिषूत्तरपदेषु । **गोसाद इत्यादि** । सदेर्घञ् । तदन्तेन षष्ठीसमासः । अथवा गां सादयति गोसादः । सदेर्ण्यन्तात्कर्मण्यण् तस्मादेव णिनिः । गोसादी । तत्र सादसादिनोः कृत्स्वरस्यापवाद इत्यर्थः । सारथौ समासस्वरस्य । **कुरु** । इह पण्यकम्बलान्ताः सप्त समासाः । तत्रादितो द्वयोः षष्ठ्याः सौत्रो लुक्, इतरेषां पञ्चानां षष्ठ्याः स्थाने प्रथमैकवचनम् । तदाह **एषामिति** । दासीभाराणामिति

पार्थिवाः, जरामृत्यू , याज्यानुवाक्ये । **वृत्** । **क्षुल्लकश्च** । वृत्तावेषु तत्पुरुष इति नानुवर्तितम् । एवञ्चाऽव्ययीभावाद्यसम्भवेऽपि द्वन्द्वतत्पुरुषसाधारणानीमानि । युक्तं चैतत् । अन्यथा तत्पुरुषप्रकरणमध्ये 'परिप्रत्युपापे'ति पञ्चसूत्री न कृता स्यात् । परन्तु बहुधा तत्पुरुषा एवोदाहरणमिति बोध्यम् । **क्षुल्लकेत्यादी** कर्मधारयौ । **उष्ट्रसादी** कर्मधारयः, षष्ठीसमासो वा । **गोसाद इति** । सदेर्घञन्तेन, ण्यन्तादण्णन्तेन वा समासः । तस्मादेव णिनौ–गोसादी । गोषु सीदति, गाः सादयतीति वा विग्रहः । इगुजादिभ्य इतीणन्तः सादिरत्र गृह्यते इत्यन्ये । **कुरुगार्ह** । **एषां सप्तानामिति** । पञ्चानामिति क्वचित्कोऽपपाठः, **मनोरमा**विरोधात् । सप्तापि

दासीभारादेश्च पूर्वपदं प्रकृत्या। कुरूणां गार्हपतं कुरुगार्हपतम्। उप्रत्ययान्तः कुरुः। * वृजेरिति वाच्यम्। वृजिगार्हपतम्। वृजिराद्युदात्तः। रिक्तो गुरुः रिक्तगुरुः। 'रिक्ते विभाषा' (३६९६) इति रिक्तशब्द आद्युदात्तः। असूता जरती असूतजरती। अश्लीला दृढरूपा अश्लीलदृढरूपा। अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः। श्रीर्यस्यास्ति तत् श्लीलम्। सिध्मादित्वाल्लच्। कपिलकादित्वाल्लत्वम्। पारे वडवेव पारेवडवा। निपातनादिवार्थे समासो विभक्त्यलोपश्च। पारशब्दो घृतादित्वादन्तोदात्तः। तैतिलानां कद्रूः तैतिलकद्रूः। तितिलिनोऽपत्यं छात्रो वा इत्यणन्तः। पण्यशब्दो यदन्तत्वादाद्युदात्तः। * पण्य-

---

बहुवचननिर्देशादाद्यर्थोऽवगम्यते। तदाह दासीभारादेरिति। उप्रत्ययान्त इति। 'कृगोरुच्च' इति व्युत्पादितत्वात्प्रत्ययस्वरेणान्तोदात्तोऽयम्। आद्युदात्त इति। वृजी वर्जने 'इगुपधात्कित्' इतीन्नन्तत्वात्। फिषस्तु 'इगन्तानां च द्व्यषाम्' इत्यादिर्द्वितीयो वोदात्तः। एवं कुरुरपि। रिक्तगुर्वादयस्त्रयः कर्मधारयाः। असूतजरती। अश्लीलदृढरूपेति। असूताश्लीलशब्दौ नञ्समासत्वादाद्युदात्तौ। श्रीर्यस्यास्तीति। श्रीशब्दो लावण्यवचनः। कपिलकादित्वाल्लत्वमिति। 'कृपो रो लः' इत्यत्र कपिलकादीनामुपसंख्यानाल्लत्वम्। लावण्यरहितापि कुब्जत्वादीनामभावात्संस्थानमात्रेण दृढेत्यर्थः। पारेवडवेति। 'पारेमध्ये-' इत्यव्ययीभावस्तु न। तथा सति सूत्रे दीर्घनिर्देशोऽयुक्तः स्याद् वडवायाः पारस्यासंभवाच्च। तितिलिनोऽपत्यमिति। तिलाः सन्त्यस्मिन्निति तिली। तिलशब्दान्मत्वर्थीय इनिः टिलोपः। पृषोदरादित्वात्तिशब्दस्य द्वित्वम्। अत्र यदाऽपत्येऽण् तदा 'नस्तद्धिते' इति टिलोपः। यदा तु छात्रे तदानीम् 'इनण्यनपत्ये' इति प्रकृति-

---

भिन्नानि पदानि, आद्ययोः षष्ठ्याः सौत्रो लुक्। इतरेषां पञ्चानां षष्ठ्याः स्थाने प्रथमैकवचनम्। 'दासीभाराणा'मिति बहुवचननिर्देशादाद्यर्थावगतिरिति भावः। कुप्रत्ययान्त इति। तथा चान्तोदात्त इति भावः। केचित्तु तत्र निदित्यनुवर्त्तयन्ति। तन्न। 'इगन्तानाञ्च द्व्यषा'मित्यनेन कुरौ पर्यायेणोभयोरप्युदात्तत्वस्वीकारेण फलाऽभावादित्याहुः। वृजिरप्येवम्। मूले तु प्रत्ययस्वरमात्रमुक्तम्। रिक्तगुर्वादयः कर्मधारयाः। असूतो नञ्समास आद्युदात्तः। अश्लीलेत्यादि। अश्लीला चासौ दृढरूपा च। लावण्यरहितापि दृढरूपा। कुब्जत्वादिरहितत्वात् संस्थानमात्रेण शोभनेत्यर्थः। निपातनादिति। पारेवडवेवेत्यर्थः। 'पारेमध्ये-' इत्यव्ययीभावस्तु न, सूत्रे दीर्घनिर्देशात्, वडवायाः पाराऽसम्भवाच्च। तितिलिन इति। तिलाः सन्त्यस्य तिली। पृषोदरादित्वात्तिशब्दस्य द्वित्वम्, अपत्ये 'नस्तद्धिते' इति टिलोपः,

कम्बलः संज्ञायामिति वक्तव्यम्। अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव। प्रतिपदोक्तसमासे 'कृत्याः' (२८३१) इत्येष स्वरो विहितः। दास्या भारो दासीभारः। देवहूतिः। यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न विशिष्यवचनं विहितं स सर्वोऽपि दासीभारादिषु द्रष्टव्यः। स राये स पुरंध्याम्। पुरं शरीरं धीयतेऽस्यामिति 'कर्मण्यधिकरणे च' (३२७१) इति किप्रत्ययः। अलुक् छान्दसः। (फि०) 'नब्विषयस्य' इत्याद्युदात्तः पुर-

---

भावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारीत्यनेन टिलोपः। **पण्यशब्दे इति**। 'अवद्यपण्य–' इति यदन्तो 'यतोऽनावः' इत्याद्युदात्तः। **संज्ञायामिति**। नियतप्रमाणकस्य नियतमूल्यस्य कम्बलस्यैषा संज्ञा। **समासान्तोदात्तत्वमेवेति**। ननु पण्यशब्दस्य 'कृत्यप्रत्ययान्तत्वात्' 'तत्पुरुषे तुल्यार्थ–' इत्यादिना पूर्वपदप्रकृतिस्वरेण भाव्यमत आह **प्रतिपदोक्ते हीति**। 'कृत्यतुल्याख्या अजात्या' इति यः कृत्यसमासः प्रतिपदोक्तस्तत्रैव सः। अयं तु 'विशेषणं विशेष्येण–' इति सामान्यलक्षणविहितः कम्बलशब्दस्य जातिवचनत्वात्। न च 'कृत्यतुल्याख्या अजात्या' इत्यस्य वैयर्थ्यं शङ्क्यम्। तद्धि गुणक्रियावाचिनोरनियमेन पूर्वनिपातप्रसक्ते कृत्यान्तस्य पूर्वनिपातार्थं वचनं नतु जातिनिषेधार्थमजात्येति वचनं न्यायसिद्धार्थानुवाद एवेति स्थितम्। **दासीभार इति**। 'दंसेष्टो न आ च' इति टित्त्वान्ङीप् उदात्तनिवृत्तिस्वरेण दासीशब्दोऽन्तोदात्तः। **देवहूतिरिति**। देवः पचाद्यजन्तः।

छात्रार्थे 'सब्रह्मचारी'त्यादिवचनेन टिलोपः। **'पण्यकम्बलः** कर्मधारयः, बहुलग्रहणात्समास' इत्युक्तं समासप्रकरणे। पण्यशब्दो यदन्तत्वादाद्युदात्तः। केचित्तु–ननु द्वितीयाकृत्या इत्येव सिद्धमिति चेन्न, प्रतिपदोक्ते 'कृत्यतुल्याख्ये'ति समासे एव तत्प्रवृत्तेः। इह तु विशेषणसमासः। नन्वजात्येति प्रतिषेधसामर्थ्याद् दुर्लभोऽसाविति चेन्न, अजात्येति न जातिप्रतिषेधार्थम्, किन्तु न्यायसिद्धार्थानुवादकमात्रम्। तत्फलन्तु गुणक्रियावाचिनामनियमेन पूर्वनिपाते प्राप्ते तन्नियमार्थं सूत्रमिति व्युत्पादनम्। स्पष्टञ्चेदं वृत्त्यादावित्याहुः। तन्न। स्वरविधायके 'कृत्यतुल्याख्ये'त्येव वक्तव्ये कृत्यतुल्यार्थयोर्वियोगपाठेनाऽर्थपदघटितपाठेन च तदंशे परिभाषाया अप्रवृत्तेः। अत एव प्रकृतसूत्रे कृत्यप्रत्ययान्तत्वात्पूर्वपदप्रकृतिस्वरे सिद्धे 'पण्यकम्बलः सञ्ज्ञायामेव', 'पण्यकम्बल एवे'ति वा नियमार्थमिदं विशेषणसमास' इति भाष्यकैयटयोरुक्तम्। **सञ्ज्ञायामिति**। नियमार्थमिदन्तदाह **अन्यत्रेति**। प्रतिपदोक्त इत्यादि तु वृत्त्यनुरोधेन। तेन सोऽपि न भवतीति तद्भावः। दास्या भारो दासीभारः। **यस्य तत्पुरुषस्येति**। केचित्तु

शब्दः । ३७७७ चतुर्थी तदर्थे । (६-२-४३) चतुर्थ्यन्तार्थाय यत्तद्वाचिन्यु-त्तरपदे चतुर्थ्यन्तं प्रकृत्या । यूपाय दारु यूपदारु । ३७७८ अर्थे । (६-२-४४) अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् । ३७७९ क्ते च । (६-२-४५) क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या । गोहितम् । ३७८० कर्मधारयेऽनिष्ठा । (६-२-४६) क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिशब्द आद्युदात्तः । पूग-कृताः । पूगशब्दोऽन्तोदात्तः । कर्मधारये किम्—श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठा किम्—कृताकृतम् । ३७८१ अहीने द्वितीया । (६-२-४७) अहीनवाचिनि

यस्य तत्पुरुषस्येत्यादि । एतेन दासीभारादेराकृतिगणत्वं दर्शितम् । चतुर्थी । तस्मै इदं तदर्थं तच्छब्देन चतुर्थ्यन्तस्यार्थ उच्यते । तदाह चतुर्थ्यन्तार्थाय यदिति यूपदार्विति । निदिति दीर्घश्रेत्यनुवर्तमाने 'कुयुभ्यां च' इति पः । नित्वादाद्युदात्तो यूपशब्दः । देवार्थमिति । देवः पचाद्यजन्तः । गोहितमिति । 'चतुर्थी चाशिष्य—' इत्यादिना चतुर्थी । आद्युदात्त इति । श्रिञ् सेवायाम् । वहिश्रियुद्रुग्ला-हात्वरिभ्यो नित्' इति निप्रत्ययस्य नित्वादाद्युदात्तः । पूगशब्द इति । 'मुदिग्रो-र्गग्गौ' बाहुलकात्पूञोऽपि गक् । कृताकृतमिति । 'क्तेन नञ्विशिष्टेनानञ्' इति समासः । अनिष्ठेत्यनुच्यमाने इहैव स्यात् । श्रेण्यादिसमासापेक्षया 'क्तेन नञ्विशिष्टेन' इति समासस्य प्रतिपदोक्तत्वादिति हरदत्तः । अहीने । हीनं त्यक्तं न हीनमहीनम् ।

यस्य समासस्येत्येव वदन्ति । यूपदार्विति । यूपं आद्युदात्तः, 'कुयुभ्यां चे'त्यत्र निदित्यनुवृत्तेः । प्रकृतिविकृतिभाव एवाऽयं स्वर इष्यते, 'अर्थे' 'क्ते च' इत्यनयोरार-म्भात् । तेन 'कुबेरबलि'रित्यत्र न । तदर्थे किम् ? गोसुखम् । देवार्थमिति । देवा-येदमिति विग्रहः, तादर्थ्ये चतुर्थी । क्ते च । प्रतिपदोक्तत्वाद्धितरक्षिताभ्यां समास-स्यैवाऽत्र ग्रहणम् । गोहितमित्यत्र 'हितयोगे चे'ति चतुर्थी । एवङ्गोरक्षितमित्यत्र तादर्थ्ये चतुर्थी । अन्ये तु हितशब्दे नाऽस्य प्रवृत्तिः, अत्रापि तदर्थे इत्यनुवृत्तेः । अत एवाऽस्य सूत्रस्य प्रकृतिविकृतिभाव एव 'चतुर्थी तदर्थे'त्यस्य प्रवृत्तौ ज्ञापकता 'चतुर्थी तदर्थार्थे'ति सूत्रभाष्योक्ता सङ्गच्छते । न ह्यत्र तस्य प्रवृत्तिः, हितयोगे तादर्थ्याऽभावात् । न च 'हिते चे'ति वक्तव्ये 'क्ते चे'ति सामान्यसूत्रं रक्षितार्थमपि सञ्ज्ञापकमिति भाष्याशयः, गुरुत्वादुत्तरार्थं तस्यावश्यकत्वाच्चेत्याहुः । कर्मधारये-ऽनिष्ठा । अत्र प्रतिपदोक्तश्रेण्यादिसमासस्यैव ग्रहणम् । तेन वैदिकपण्डित इत्यत्र न । इदञ्च 'महान्व्रीही'ति सूत्रे भाष्ये स्पष्टम् । कृताऽऽकृतमिति । 'आकृत'-मिति च्छेदः । 'कृतापकृतादीनाञ्चोपसङ्ख्यान'मिति प्रतिपदोक्तः समासः । 'अकृत'-मिति च्छेदस्तु न युक्तः, तस्य क्तान्तोत्तरपदत्वाऽभावेनाऽप्राप्तेः । अहीनवाचि-

समासे क्रान्ते परे द्वितीयान्तं प्रकृत्या । कष्टश्रितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । ग्रामशब्दो निस्स्वरेण । अहीने किम्—कान्तारातीतः । * अनुपसर्ग इति वक्तव्यम् । नेह सुखप्राप्तः । 'थाथ' (३८७८) इत्यस्यापवादोऽयम् । ३७८२ तृतीया कर्मणि । (६-२-४८) कर्मवाचके क्रान्ते परे तृतीयान्तं प्रकृत्या । त्वोतासः । रुद्रहतः । महाराजहतः । रुद्रो रगन्तः । कर्मणि किम्—रथेन यातो रथयातः । ३७८३ गतिरनन्तरः । (६-२-४९) कर्मार्थे क्रान्ते परेऽव्यवहितो गतिः प्रकृत्या । 'थाथ' (३८७८) इत्यस्यापवादः । पुरोहितम् ।

अहीनवाचिनि समास इति । पूर्वपदद्वारेण समासस्याहीनवाचित्वम् । **कष्टश्रित इति ।** 'द्वितीयाश्रिता–' इति समासः । **कष्टशब्द इति ।** क्तान्तत्वात् । **ग्रामशब्द इति ।** 'ग्रसेरा च' इति मन्प्रत्ययान्त आद्युदात्तः । **अनुपसर्ग इति वक्तव्यमिति ।** सूत्रेऽहीनग्रहणमपनीयानुपसर्गग्रहणं कर्तव्यं व्यापकत्वादित्यर्थः । **थाथेत्यस्यापवाद इति ।** तथा च प्रत्युदाहरणे थाथादिस्वर इति भावः । **तृतीया । त्वोतास इति ।** त्वया ऊता रक्षिताः त्वोतासः । 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वादेशे दकारलोपश्छान्दसः । अवतेः क्तः 'ज्वरत्वर–' इत्यूठ् । 'एत्येधत्यूठ्सु' इति वृद्धेरिडागमस्य चाभावश्छान्दसः । तदन्ताज्जसः 'आज्जसेरसुक्' इत्यसुगागमः । पूर्वपदप्रकृतिस्वरे कृते 'एकादेश उदात्तेनोदात्तः' ततः स्वरितप्रचयः । **रगन्त इति ।** 'रोदेर्णिलुक् च' इति विहितः । **महाराजहत इति ।** 'राजाहःसखिभ्यष्टच्' इति टजन्तो महाराजशब्दोऽन्तोदात्तः । **रथेन यात इति ।** गत्यर्थत्वात् कर्तरि क्तः । **पुरोहितमिति ।** 'पूर्वाधरावराणामसिपुरधवश्चैषाम्' इत्यसिप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः पुरःशब्दः । अत्र समासान्तोदात्तत्वम् अव्ययपूर्वपदप्रकृतिस्वरः कृत्स्वरः थाथादिस्वरे इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरो भवति ।

नीति । अविभागवाचिनीत्यर्थः । थाथादिस्वरापवादोऽयम् । **अनुपसर्ग इतीति ।** अनेनैवातीतादिव्यावृत्तिसिद्धावहीन इति व्यर्थमित्याहुः । **तृतीयाक ।** अयमपि थाथादिस्वरापवादः । **त्वोतास इति ।** त्वया ऊताः=रक्षिताः—त्वोतासः । 'प्रत्ययोत्तरपदयोश्चे'ति मपर्यन्तस्य त्वादेशे दकारलोपश्छान्दसः । अवतेः क्तः । 'ज्वरत्वरे'त्यूठ् । 'एत्येधती'ति वृद्धेरिडागमस्य चाऽभावश्छान्दसः । पूर्वपदप्रकृतिस्वरे कृते एकादेश उदात्तेनोदात्त , ततः स्वरितः । **रथयात इति ।** गत्यर्थत्वात्कर्तरि क्तः । **गतिरनन्तरः ।** गतिः क्विजन्तः, पुंल्लिङ्गाऽनन्तरपदसामानाधिकरण्यात् । निपातनादनुनासिकलोप इति हरदत्तः । गतिशब्दस्य तत्सञ्ज्ञकशब्दपरत्वात्र सामानाधिकरण्यानुपपत्तिरिति **कश्चित् । पुरोहितमिति ।** पुरःशब्दोऽसिप्रत्ययस्वरेणा-

अनन्तरः किम्–अभ्युद्धृतः । कारकपूर्वपदस्य तु सतिशिष्टस्य थादिस्वर एव ।

अभ्युद्धृत इति । इह हृतशब्दस्योच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दस्तस्य पुनरभिशब्देन समासः । तस्य 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया उद्धृतशब्दः क्तान्त उत्तरपदम । एवं समासान्तोदात्तत्वे प्राप्ते तद्बाधकाव्ययपूर्वपदप्रकृतिस्वरत्वे तदपवादे कृत्स्वरे तदपवादस्थाथादिस्वरः प्राप्तस्तमपोह्याभेरयं स्वरः स्यात्सोऽनन्तरग्रहणेन वार्यते । नन्वनन्तरग्रहणेनाप्यसौ दुर्वारः कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वेऽभेस्तदानन्तर्यसत्त्वादिति चेन्मैवम् । अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरा गतिराश्रीयते । अभिश्च न तथा । नन्वेवं मा भूदभेः स्वरः, इष्टसिद्धिस्तु कथम् । अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते 'संसृष्टं धनमुभयं समाकृतम्' इति मन्त्रे समाकृतशब्दे आङ स्वरदर्शनात् । न चासौ प्रकृतसूत्रेण सिध्यति । प्रथमसमासे तत्प्रवृत्तावपि द्वितीयासमासे थाथादिस्वरस्य प्राप्तेरुक्तत्वात् । न च तं बाधित्वा गतिस्वरः प्रवर्तत इति वाच्यम् । द्वितीयासमासे उदः पूर्वपदत्वाभावाद् अत्रोच्यते—धातोरनन्तर इति व्याख्यानादेव पूर्वपदत्वं विनापि स्वरोऽयं प्रवर्तते । न हि क्तप्रकृतिभूतं धातुं प्रति पूर्वपदत्वं गतेः सम्भवति । तस्मादभ्युद्धृतं समाकृतमिति तावत्सुस्थम् । ननु दूरादागत इत्यादौ कारकपूर्वेऽपि गतिस्वरः स्याद् इष्यते तु थाथादिस्वरः । अत आह **कारकपूर्वेति** । अयं भावः–अनन्तरशब्दोऽयमनन्तरमपेक्ष्य प्रवर्तते तत्र चानन्तरो गतिरित्युक्ते अनन्तरोऽपि सन्निधानाद्गतिरेव प्रतीयते । ततश्चापूर्वपदार्थमप्यनन्तरग्रहणं गतिद्वयसमवधाने एवानन्तरस्य प्रकृतिस्वरत्वं प्रापयतीति दूरादागतादौ न दोष इति । अथवा 'कारकाद्दत्तश्रुतयोः' इति सूत्रे कारकादिति योगो विभज्यते । क्तग्रहणं गतिग्रहणं चानुवर्तते । कारकात्परं क्तान्तं सगतिकमुत्तरपदमन्तोदात्तं स्यादित्यर्थः । तत्र दूराद्गत इत्यादौ थाथादिसूत्रेणैव सिद्धत्वाद् दूरादागत इत्यादौ 'गतिरनन्तरः' इत्यस्य बाधनार्थमेवेदं

ऽन्तोदात्तः । थाथादिस्वरापवादोऽयम् । **अभ्युद्धृत इति** । इह हृतशब्दस्योच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दः । तस्य पुनरभिशब्देन समासः । अयमेव समासक्रमो भाष्यादिसम्मत इति प्रागेव निरूपितम् । तत्र कृद्ग्रहणपरिभाषया उद्धृतस्य क्तान्तोत्तरपदत्वात् । अपवादक्रमेण समासान्तोदात्तत्वे तद्बाधकाऽव्ययपूर्वपदप्रकृतिस्वरत्वे, तद्बाधककृत्स्वरे, तद्बाधकथाथादिस्वरे प्राप्ते तमपोद्याऽयं प्राप्तः । नन्वनन्तरग्रहणेऽप्यसौ दुर्वारः, कृद्ग्रहणपरिभाषयोद्धृतस्य क्तान्तत्वेऽभेस्तदानन्तर्यस्य सत्त्वादिति चेन्न, अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरो गतिराश्रीयतेऽभिश्च न तथेति न दोषः । नन्वभिस्वराऽभावेऽपि अभ्युद्धृतशब्दस्य

दूरादागतः। ३७८४ तादौ च निति कृत्यतौ। (६-२-५०) तकारादौ निति तुशब्दवर्जिते कृति परेऽनन्तरो गतिः प्रकृत्या। अग्ने रायो नृतमस्य प्रभूतौ। संगतिं गोः। कृत्स्वरापवादः। तादौ किम्—प्रजल्पाकः। निति किम्—प्रकर्ता। तृजन्तः। अतौ किम्—आगन्तुः। ३७८५ तवै चान्तश्च युगपत्। (६-२-

---

सूत्रमिति दिक्। दूरादागत इति। 'स्तोकान्तिक—' इति समासः। 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक्। प्रभूताविति। क्तिन्नयम्। प्रजल्पाक इति। 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्'। आगन्तुरिति। 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्'।

थाथादिस्वरेणान्तोदात्तत्वापत्तिः, इष्यते तूत्तरपदस्य स्वरः, 'संसृष्टं धनमुभयं समाकृत'मित्यादिमन्त्रे समाकृतशब्दे आङः स्वरदर्शनात्। न चासौ प्रकृतसूत्रेण सिद्ध्यति, प्रथमसमासे तत्प्राप्तावपि द्वितीयसमासे थाथादिस्वरप्रवृत्तेरुक्तत्वात्। न च तं बाधित्वा गतिस्वरः प्रवर्त्तते, अभ्युद्धृतशब्दे उदः पूर्वपदत्वाऽभावादिति चेन्न, 'धातोरनन्तर—' इति व्याख्यानादेव, योगविभागेनाऽनन्तरो गतिरपूर्वपदमपि प्रकृत्येति व्याख्यानादेव वा पूर्वपदत्वं विनाऽप्यस्य प्रवृत्तिस्वीकारात्। अन्यथा धातुं प्रति गतित्वेन तं प्रति पूर्वपदत्वाऽसम्भवेन सूत्रार्थाऽप्रवृत्तेः। एवञ्चाभ्युद्धृतमित्यत्रोद एव स्वरः। इदमेवाऽनन्तरग्रहणं कृद्ग्रहणपरिभाषाया ज्ञापकमित्यन्यत्र प्रपञ्चितम्। नन्वेवमपि व्यवहितवारणेन 'धातोरनन्तर--' इति व्याख्यानस्य चारितार्थ्येन कथं सतिशिष्टथाथादिस्वरबाधकत्वमिति चेन्न, 'अहीने द्वितीये'ति सूत्रादनुपसर्गग्रहणमत्राऽनुवर्त्तते। तेनैव 'अभ्युद्धृत'मित्यादौ अभ्यादेर्व्यावृत्तिसिद्धौ अनन्तरग्रहणकल्पान्तरप्राप्तथाथादिस्वरबाधः, एवञ्चात्र तत्सामर्थ्यात्पूर्वपदमित्यपि न सम्बध्यत इत्याहुः। कारकपूर्वस्य त्विति। अयं भावः—'कारकाद्दत्ते'ति सूत्रे कारकादिति योगो विभज्यते। क्तग्रहणं गतिग्रहणञ्चानुवर्त्तते, कारकात्परं क्तान्तं सगतिकमुत्तरपदमन्तोदात्तं स्यादित्यर्थः। एवञ्च 'दूराद्धृत—' इत्यादौ थाथादिस्वरेण कृत्स्वरेण वा सिद्धेरिदं 'दूरादागत' इत्यादावभ्युद्धृतन्यायेन प्राप्तगतिरनन्तर इत्यस्य बाधनार्थम्। एतेनोक्तरीत्या दूरादागत इत्यादौ कारकपूर्वेऽपि गतिस्वरः स्यात्, इष्यते तु थाथादिस्वर इत्यपास्तमिति दिक्। तादौ च नि। कृत्स्वरापवादोऽयम्। तकारादेर्नित्प्रत्ययस्याऽकृतोऽभावाद्गतिग्रहणेन धातोराक्षेपेण तत्प्रकृतिकप्रत्ययस्यैव ग्रहणात् कृल्लाभे कृद्ग्रहणं कृत्सञ्ज्ञाप्रवृत्तिकाले यस्तकारादिस्तद्ग्रहणार्थम्। तेन प्रलपितेत्यादि सिध्यति। स्वरप्रवृत्तिवेलायां तादित्वाऽभावेऽपि पूर्वं तत्सत्त्वात्। 'यस्मिन्विधि'रित्येव सिद्धे आदिग्रहणञ्चिन्त्यप्रयोजनम्। अनन्तर इति। अत्रापि पूर्वसूत्रवदेव व्यवस्था बोध्या।

५१) तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः प्रकृत्या युगपदेतदुभयं स्यात्। अन्वेतवा उ। कृत्स्वरापवादः। ३७८६ **अनिगन्तोऽञ्चतौ वप्रत्यये।** (६-२-५२) अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या। ये पराञ्चस्तान्। अनिगन्त इति किम्-प्रत्यञ्चो यन्तु। कृत्स्वरात्परत्वादयमेव। जहि वृष्ण्यानि

ननु कृतीति व्यर्थम्। तथा हि गतेरयं स्वरो विधीयते, गतिसंज्ञा च धातुमाक्षिपति स च प्रत्ययविशिष्ट एव प्रयोगार्हः। धातोश्च द्वये प्रत्ययाः तिङः कृतश्च। तत्र तिङन्ते पूर्वपदत्वासंभवाद् कृदन्त एव भविष्यतीति चेत्सत्यम्। कृद्ग्रहणं कृत्संज्ञाप्रवृत्तिकालोपलक्षणार्थम्, तेन कृदुपदेशे तादित्वलाभात्प्रजपितेत्यादि सिध्यति। स्वरप्रवृत्तिवेलायां तादित्वाभावेऽपि पूर्वं तत्सत्वात्। आदिग्रहणं शक्यमकर्तुं 'यस्मिन्विधि-' इत्येव सिद्धेः। **तवै चा। अन्त उदात्त इति।** कथं पुनरन्तरेणोदात्तग्रहणमुदात्तो भवतीत्ययमर्थो लभ्यते। शृणु। प्रकृत्येति वर्तते तत्रैवमभिसंबन्धः क्रियते। तवैप्रत्ययान्तस्य यः प्रकृत्याश्रयः स्वरः प्राप्तः सोऽन्तस्य भवतीति, स चोदात्त एवेति, युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम्। **अन्वेतवा उ इति।** 'उपसर्गाश्चाभिवर्जम्' इत्यनुदात्तः। **अनिगन्तेऽञ्चतौ। पराञ्च इति।** 'ऋत्विक्-' इत्यादिना क्विन् स च वकारमात्रं ककारादीनामनुबन्धत्वात्। 'उगिदचाम्-' इति नुम्

आगन्तुरिति। नन्वताविति पर्युदासः क्तिन एवोचितः, 'वृष्णे चोदस्व सुष्टुति'मित्यादौ गतिस्वराऽदर्शनादिति चेन्न, तत्रोपायान्तरस्यैवाऽनुसर्तव्यत्वात्। न ह्यताविति पर्युदासेन तन्निर्वाहः कृदुत्तरप्रकृतिस्वरेण धातोरुदात्तत्वापत्तेः, अन्तोदात्ततायाश्च तत्रेष्टत्वात्। किं चाऽताविति क्तिनः पर्युदासे 'प्रभूतौ सप्तति'मित्यादौ गतिस्वरो न सिद्ध्येत्, तस्मात्तुन एवायं पर्युदासः। यत्तु 'मन्क्तिन्व्याख्यान'त्यादिना सुष्टुत्यादावन्तोदात्तत्वमिति, तन्न, प्रभूतावित्यादिसिद्धये तत्र कारकानुवृत्तेन्र्याय्यत्वात्, वृत्तिकृता दर्शितत्वाच्च। 'वृष्णे चोदस्व सुष्टुति'मित्यादौ तु स्तोत्रकरणीभूताया ऋचः साध्वसिरित्यादिवत्कर्तृत्वविवक्षायां क्तिजन्तत्वान्न दोषः। **तवै चान्त।** कृत्स्वराऽपवादः। **अन्त उदात्त इति।** यद्यप्युदात्तग्रहणं दुर्लभम्, तथापि 'गतिः प्रकृत्या भवती'त्युक्ते उदात्तो बुद्धिमारोहतीति स एवान्तस्य भवतीति भावः। **अनन्तर इति।** अत्रापि पूर्ववदेव व्यवस्था। **अन्वेतवा इति।** अनुरुपसर्गत्वादाद्युदात्तः। **पश्चः इति।** ननु 'अनिगन्तः' इत्युक्तावपि 'प्रत्यञ्च'मित्यादौ यणि अनिगन्तत्वादितरप्रवृत्तिर्दुर्वारा। न च स्थानिवत्त्वम्, पूर्वपदस्य कार्यित्वेनाऽपूर्वविधित्वात्। 'अनिगन्त' इति तु 'प्रतीच' इत्येतद्व्यावृत्त्या चरितार्थमिति चेन्न, 'इगन्तस्य यणादेशे कृतेऽपि प्रतिषेधः' इति वचनेनैव निर्वाहात्। एवञ्च 'प्रत्यञ्चः'इत्यादौ कृदुत्तरपद-

कृदुत्तरपदप्रकृतिस्वरो हि पराचः । वप्रत्यये किम्-उदञ्चनम् । ३७८७ न्यधी च । (६-२-५३) वप्रत्ययान्तेऽञ्चतावनिगन्तावपि न्यधी प्रकृत्या । न्यङ्ङुत्तानः । उदात्तस्वरितयोर्यण इति अञ्चतेरकारः स्वरितः । अध्यङ् । ३७८८ ईषदन्यतरस्याम् । (६-२-५४) ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव । ३७८९ हिरण्यपरिमाणं धने । (६-२-५५) सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनम् । बहुव्रीहावपि परत्वाद्विकल्प एव । हिरण्यं किम्-प्रस्थधनम् । परि-

---

पराशब्द आद्युदात्तः । प्रत्यञ्च इति । कृदुत्तरपदप्रकृतिस्वरः । परत्वादिति । चुस्वरस्यावकाशः । दधीचा । यत्र गतिर्नास्ति । अनिगन्तस्वरस्यावकाशः पराञ्चः । पराच इत्यादावुभयप्रसङ्गे परत्वादनिगन्तस्वर एव भवति । न चायं युक्तो विप्रतिषेधः । चुस्वरः सतिशिष्टः भसंज्ञायामल्लोपे च कृते प्राप्तत्वात् । सत्यम् । नायं विप्रतिषेधः । किं तर्हि इष्टिरेव । चोः 'अनिगन्तेऽञ्चतावप्रत्यये' इत्येव स्वर इष्यत इति हरदत्तः । इहापि मूले परत्वादित्यस्येष्टत्वादित्यर्थः । **न्यधी च** । अत्रापि चुस्वरादयमेव । कृत्स्वरापवादौ योगौ । **ईषदन्य** । ईषच्छब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात् । **अन्तोदात्त इति** । फिट्स्वरेण । एतदभावे समासान्तोदात्तत्वम् । **ईषद्भेद इति** । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । **कृत्स्वर एव भवतीति** । परत्वात् । अथवा ईषद्गुणवचनेनेति प्रतिपदोक्तसमासग्रहणादुपपदसमासेऽस्याप्रवृत्तिरिति । **द्वे सुवर्णे इति** । 'पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश । पलं सुवर्णाश्चत्वारः' इति । **द्विसुवर्णमिति** । पक्षे समासस्वरः । **बहुव्रीहावपीति** । अत्र तत्पुरुषा-

---

प्रकृतिस्वर एव । **परत्वादिति** । चुस्वरावकाशः-'सा कद्रीची' अस्यावकाशः-'ये पराञ्चः', उभयप्रसङ्गे परत्वादयमित्यर्थः । वस्तुतस्तु इष्टत्वादित्यर्थः । एतेनाऽस्मिन् समासस्वरे कृते विभक्तौ 'अचः' इति लोपे कृते सतिशिष्टत्वाच्चुस्वर एव प्राप्नोतीत्यपास्तम्, भाष्यकारेणैव परिहारात् । अत्र 'चुस्वरा'दिति सतिशिष्टस्वरमात्रोपलक्षणमिति केचित् । **उदात्तस्वरितयोरिति** । स्वरसन्धेः पूर्वं पूर्वोत्तरपदनिमित्तकार्यप्रवृत्तेः पूर्वमेतस्मिन्स्वरे यणादेशे अस्य प्रवृत्तिः । अध्यङ्ङित्यत्र 'उदात्तादनुदात्तस्ये'ति स्वरितः, एवम् 'अधीचा' इत्यत्राप्ययमेव स्वरश्चुस्वरात् । कृत्स्वरापवादाविमौ योगौ । **ईषद** । ईषदिति पूर्वपदं वा प्रकृत्येत्यर्थः, पक्षे समासान्तोदात्तः । **कृत्स्वर एवेति** । 'ईषद्गुणवचनेने'ति प्रतिपदोक्तसमासस्यैव ग्रहणादिति भावः । अत एव बहुव्रीहावपीदं न । केचित्तु परत्वात्कृत्स्वर एवेत्यर्थ इत्याहुः । **बहुव्रीहाव-**

मार्यं किम्-काञ्चनधनम्। धने किम्-निष्कमाला। ३७६० **प्रथमोऽचिरोपसंपत्तौ।** (६-२-५६) प्रथमशब्दो वा प्रकृत्याऽभिनवत्वे। प्रथमवैयाकरणः। संप्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः। प्रथमशब्दः प्रथेरमजन्तः। अचिरेति किम्-प्रथमो वैयाकरणः। ३७६१ **कतरकतमौ कर्मधारये।** (६-२-५७) वा प्रकृत्या। कतरकठः। कर्मधारयग्रहणमुत्तरार्थम्। इह तु प्रतिपदोक्तत्वादेव सिद्धम्। ३७६२ **आर्यो ब्राह्मणकुमारयोः।** (६-२-५८) आर्यकुमारः। आर्यब्राह्मणः। आर्यो ण्यदन्तत्वादन्तस्वरितः। आर्यः किम्-परमब्राह्मणः। ब्राह्मणादीति किम्-आर्यक्षत्रियः। कर्मधारय इत्येव। ३७६३ **राजा च।** (६-२-५९) ब्राह्मणकुमारयोः परतो वा प्रकृत्या कर्मधारये। राजब्राह्मणः। राजकुमारः। योगविभाग उत्तरार्थः। ३७६४ **षष्ठी प्रत्येनसि।** (६-२-६०) षष्ठ्यन्तो

धिकाराभावात्। **प्रथमो।** अचिरोपसंपत्तिरचिरोपसंश्लेषः। अभिनवत्वमित्यर्थः। तदाह **अभिनवत्व इति।** **अचीति किमिति।** अचिरोपसंपत्ताविति किमित्यर्थः। **प्रथमवैयाकरण इति।** वैयाकरणानामाद्यः मुख्यो वा यः प्रथमवैयाकरणशब्दः स नित्यमन्तोदात्त एव। **कतर।** एतौ पूर्वपदभूतौ कर्मधारये प्रकृतिस्वरौ वा स्याताम्। कतरकतमौ उतरडतमयोश्चित्त्वादन्तोदात्तौ। **इह त्वित्यादि।** 'कतरकतमौ जातिपरिप्रश्ने' इति प्रतिपदोक्तो यः समासस्तस्यैव ग्रहणम्। स च कर्मधारय एव। तस्मान्नेहार्थः कर्मधारयग्रहणेनेति भावः। **आर्यो ब्राह्मण।** ब्राह्मणकुमारयोरुत्तरपदयोरार्यः पूर्वपदं प्रकृतिस्वरं वा स्यात्कर्मधारये। **अन्तस्वरित इति।** 'तित्स्वरितम्' इत्यनेन। **ब्राह्मणादीति किमिति।** ब्राह्मणकुमारयोरिति किमर्थमित्यर्थः। **राजब्राह्मण इति।** राजशब्दो ब्राह्मणे ताद्धर्म्याद्वर्तत इति सामानाधिकरण्यात्कर्मधारयः। राजशब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः। **उत्तरार्थ इति।** उत्तरो विधिः

पीति। तत्पुरुषाधिकाराऽभावादिति भावः। **प्रथमोऽचिरो।** **अचिरोपसंपत्तिः**—अभिनवत्वम्। **प्रथमवैयाकरण इति।** वैयाकरणानामाद्यो मुख्य इत्यर्थकसमासे प्रथमन्तोदात्त एव। **कतरकतमौ**—डतरडतमयोश्चित्त्वादन्तोदात्तौ। **प्रतिपदोक्तत्वादिति।** 'कतरकतमौ जातौ'ति प्रतिपदोक्तस्यैव ग्रहणादित्यर्थः। **कर्मधारय इत्येवेति।** तेनाऽऽर्यस्य ब्राह्मण इत्यर्थे न दोषः। **राजब्राह्मण इति।** आद्युदात्तो राजन्शब्दः। पक्षेऽन्तोदात्तत्वम्। राजशब्दो ब्राह्मणे ताद्धर्म्याद्वर्तत इति सामानाधिकरण्यम्। षष्ठीसमासेऽन्तोदात्तत्वमेव। योगविभागो यथासङ्ख्यनिवृत्त्यर्थं उत्तरार्थश्च। अत्र लिङ्गविशिष्टपरिभाषा नेति 'ङ्या'प्सूत्रे भाष्ये स्पष्टम्। एवं समासरूपसमुदायग्रहणेऽपि सा न। तेन 'बह्वोर्नञ्व'दिति सूत्रे 'बहु-

राजा प्रत्येनसि परे वा प्रकृत्या। राजप्रत्येनाः। षष्ठी किम्—अन्यत्र न। ३७९५ **क्ते नित्यार्थे।** (६-२-६१) क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या। नित्यप्रहसितः। 'कालाः' (६९०) इति द्वितीयासमासोऽयम्। नित्यशब्दस्त्यबन्त आद्युदात्तः। हसित इति थाथादिस्वरेणान्तोदात्तः। नित्यार्थे किम्—मुहूर्तप्रहसितः। ३७९६ **ग्रामः शिल्पिनि।** (६-२-६२) वा प्रकृत्या। ग्रामनापितः। ग्रामशब्द आद्युदात्तः। ग्रामः किम्—परमनापितः। शिल्पिनि किम्—ग्रामरथ्या। ३७९७ **राजा च प्रशंसायाम्।** (६-२-६३) शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या। राजनापितः। राजकुलालः। प्रशंसायां किम्—राजनापितः। शिल्पिनि किम्—राजहस्ती। ३७९८ **आदिरुदात्तः।** (६-२-६४) अधिकारोऽयम्। ३७९९ **सप्तमीहारिणौ धर्म्येऽहरणे।** (६-२-

---

राजशब्दस्यैव यथा स्यात् अर्थशब्दस्य मा भूत्। यथासंख्याभावोऽपि पृथग्योगकरणस्य प्रयोजनं ज्ञेयम्। **राजप्रत्येना इति।** प्रतिगतमेनः पापं यस्य प्रत्येनाः। राज्ञः प्रत्येनाः। **अन्यत्र नेति।** राजा चासौ प्रत्येनाश्च राजप्रत्येनाः इत्यत्र। **द्वितीयासमासोऽयमिति** द्वितीया पुनरत्यन्तसंयोगे। अथवा 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्'। **त्यबन्त इति।** 'त्यब्नेर्ध्रुवे' इति त्यप्। **मुहूर्तप्रहसित इति।** थाथादिस्वरः। समासस्वरस्य द्वितीयापूर्वपदप्रकृतिस्वरो बाधकस्तस्य थाथादिस्वरः तस्यापि पाक्षिकोऽपवादोऽयम्। **ग्रामः।** ग्राम इति स्वरूपग्रहणम्। शिल्पिनीत्यर्थग्रहणम्। ग्रामशब्दः पूर्वपदप्रकृतिस्वरो वा स्याच्छिल्पिवाचिन्युत्तरपदे। **ग्रामनापित इति।** षष्ठीसमासः। **आद्युदात्त इति।** 'प्रसेरा च' इति मनिन् नित्वादाद्युदात्तः। **राजनापित इति।** कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा। षष्ठीसमासे च राजयोग्यतया तस्य प्रशंसा। स हि कर्मणि प्रवीणत्वाद्राजानं प्रति योग्यो भवति। राजार्थमित्युक्ते प्रशंसा गम्यते। **आदिरुदात्तः।** पूर्वपदमित्यस्येहार्थात्षष्ठ्या विपरिणामः। सर्वत्र चात्र प्रकरणे पूर्वपदविषये षष्ठ्यर्थे प्रथमा। **सप्तमी।** हारी स्वावश्यके णिनिः। जनपदे ग्रामे

गोमती'त्यत्र न। **अन्यत्र नेति।** कर्मधारये इत्यर्थः। **क्ते नित्या।** **नित्यमा**भीक्ष्ण्यम्। **काला इति।** 'अत्यन्तसंयोगे चे'त्यस्योपलक्षणमेतत्। **द्वितीयासमास इति।** **द्वितीयात्यन्तसंयोगे।** द्वितीयापूर्वपदप्रकृतिस्वरापवादथाथादिस्वरस्य पाक्षिकोऽपवादोऽयम्। **ग्रामः शिल्पिनि।** शिल्पिवाचिन्युत्तरपदे इत्यर्थः। **ग्रामनापित इति।** षष्ठीसमासः। **राजनापित इति।** कर्मधारये राजगुणाध्यारोपणोत्तरपदार्थप्रशंसा, षष्ठीसमासे राजयोग्यतया। **अधिकारोऽयमिति।** 'अन्त' इत्यतः प्रागादिरिति,

६५) सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे। देयं यः स्वीकरोति स हारीत्युच्यते । धर्म्यमित्याचारनियतं देयम् । मुकुटेकार्षापणम् । हलेद्विपदिका । 'संज्ञायाम्' (७२१) इति सप्तमीसमासः । 'कारनाम्नि च' (९६८) इत्यलुक् । याज्ञिकाश्वः । वैयाकरणहस्ती । क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां स्वश्वादिरिति । धर्म्ये इति किम्—स्तम्बेरमः । कर्मकरवर्धितकः । अहरणे किम्—वाडवहरणम् । वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्युच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इत्यहरण इति निषेधेन ज्ञाप्यते । तेन वाडवहार्यमिति हारिस्वरः सिध्यति । ३८०० युक्ते च । (६-२-६६) युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोबल्लवः । कर्तव्ये तत्परो युक्तः । ३८०१ विभाषाऽध्यक्षे । (६-२-

कुले वा परम्परयाऽऽयातः सदाचारो धर्मस्तस्मादनपेतं धर्म्यम् । 'धर्मपथ्यर्थ-' इति यत् । तेन च प्राप्यमित्यर्थे 'नौवयोधर्म-' इत्यादिना यत् । आचारवशादवश्यं कर्तव्यमित्यर्थः । हारिण्युदाहरणान्याह **याज्ञिकाश्वेति** । षष्ठीसमासः । **कर्मकरवर्धितक इति** । वर्धितको नाम मूले स्थूलोऽग्रे सूक्ष्म ओदनपिण्डः स कर्मकराय दीयते । अन्यथा कर्म न कुर्यादिति । न त्वयं धर्मः । **वाडवहरणमिति** । क्वचिदयमाचारः । बीजनिषेकानन्तरं वाडवाय शरीरपुष्ट्यर्थं योग्यमशनादि दातव्यं यद्दीयते तद्वाडवहरणमित्युच्यते । अत्रास्मिन् स्वरे निषिद्धे कृत्स्वरे प्राप्तेऽनोभावकर्मवचन इत्युत्तरपदान्तोदात्तत्वम् । ननु परत्वादेवायं स्वरो भविष्यति किं प्रतिषेधेनेत्यत आह **परोऽपीति** । **युक्तवाचिनीति** । युक्तः कर्तव्ये तत्परः तद्वाचिनीत्यर्थः । गोबल्लवः । बल्लवादयः शब्दा गवादीनां पालकवचनाः । **विभाषा** । अध्यक्षशब्दे परे पूर्वपद-

'प्रकृत्या भगाल'मित्यतः प्राग्युदात्त इति चाधिक्रियत इत्यर्थः । **धर्म्यमिति** । **धर्मो** नाम ग्रामजनपदकुलेषु परम्पराऽऽयातः सदाचारः, तस्मादनपेतम्, तेन प्राप्यं वा **धर्म्यम्** । आचारवशादवश्यं कार्यमित्यर्थः । **देयमिति**-प्रकृते व्याख्यानलभ्यम् । हारिण्युदाहरति **याज्ञिकाश्व इति** । षष्ठीसमासाविमौ । 'हारी'त्यावश्यके णिनिः, हृञोऽत्र ग्रहणमर्थः । **वाडवहरणमिति** । हरणशब्दः कर्मसाधनः । **कृत्स्वरो हारिस्वरेणेति** । कृत्स्वराऽपवादः—'अनो भावकर्मवचनः' इति स्वरबाधे कृत्स्वरबाधस्यापि फलितत्वादिति भावः । चित्स्वराद्धारिस्वरः परत्वात्—मातुलगवः, टचश्चित्त्वन्तु 'अतिगवे' इत्यादौ चरितार्थम् । **युक्ते च** । **युक्तः**-समाहितः, युज समाधावित्यस्य रूपम् । **गोवल्लव इति** । तत्परतया गवां पालक इत्यर्थः । कृत्स्वरात्थाथादिस्वराच्च पूर्वविप्रतिषेधेन 'युक्ते चे'ति स्वर एवेष्यते—गोदोहः । गोसङ्ख्यः ।

६७) गवाध्यक्षः । ३८७२ पापं च शिल्पिनि । (६-२-६८) पापनापितः । 'पापाणके-' (७३३) इति प्रतिपदोक्तस्यैव ग्रहणात् षष्ठीसमासे न । ३८७३ **गोत्राऽन्तेवासिमाणवब्राह्मणेषु क्षेपे ।** (६-२-६९) भार्यासौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः । अन्तेवासी । कुमारीदाक्षाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्षयादिभिः प्रोक्तानि शास्त्राण्यधीयते ते एवं क्षिप्यन्ते । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः संपद्यते । गोत्रादिषु किम्-दासीश्रोत्रियः । क्षेपे किम्-परमब्राह्मणः । ३८७४ **अङ्गानि मैरेये ।** (६-२-७०) मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । अङ्गानि किम्-परममैरेयः । मैरेये किम्-पुष्पासवः ।

माद्युदात्तं वा स्यात् । अध्यक्षशब्दोऽपि समासे युक्तवाच्येवेति पूर्वेण नित्ये प्राप्ते विकल्पः । **पापम्** । पापमिति स्वरूपग्रहणं शिल्पिनीत्यर्थग्रहणं व्याख्यानात् । शिल्पिवाचिनि परे पापशब्दः पूर्वपदमाद्युदात्तं वा स्यात् । **गोत्रान्तेवासि** । गोत्रवाचिनि अन्तेवासिवाचिनि चोत्तरपदे माणवब्राह्मणयोश्च परतः क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं स्यात् । **भार्यासौश्रुत इति** । सुश्रृणोतीति सुश्रुत् तस्यापत्यं सौश्रुतः । **भार्याप्रधानतयेति** । भार्याप्रधानः सौश्रुत इति शाकपार्थिवादित्वादुत्तरपदलोपी समास इति दर्शयति । दक्षेण प्रोक्तं दाक्षं तदधीते दाक्षः । **कुमार्यादिलाभकाम इति** । तत्प्रोक्ते ग्रन्थे श्रद्धाभावसत्त्वामपि कुमार्यादिलाभकामः संस्तत्र प्रवर्तते तत एवं क्षिप्यते । पूर्ववत्समासः । **भयब्राह्मण इति** । तृतीयेति योगविभागात्समासः । योऽब्राह्मणः सन् राजदण्डादिभयेन ब्राह्मणाचारं करोति स एवमुच्यते । **अङ्गानि** । अङ्गमारम्भकम् । बहुवचनं स्वरूपविधिनिरासार्थम् । मैरेयशब्दे उत्तरपदे तदर्थारम्भकवाचीनि पूर्वपदान्याद्युदात्तानि स्युः । **मद्यविशेष इति** । सुराव्यतिरिक्तं मद्यं मैरेयमित्यर्थः ।

भक्ताख्या । अन्नवाचि पूर्वपदमाद्युदात्तं स्यात्तदर्थेषूत्तरपदेषु । अत्र बहुवचननिर्देशादेव स्वरूपविधिनिरासे सिद्धे आख्याग्रहणं भक्ष्यविशेषवाचिनां भिक्षादीनां ग्रहणार्थम् । अन्यथा पर्यायाणामन्नादीनां ग्रहणं स्यात् । भिक्षाकंसादयः षष्ठीसमासः ।

'समि ख्यः' इति कः । **विभाषाऽध्यक्षे** । अध्यक्षशब्दो युक्तवाच्येवेति प्राप्तविभाषेयम् । **पापञ्च शि** । शिल्पिवाचके पर इत्यर्थः । **गोत्रान्ते** । आद्ययोरर्थग्रहणम्, अन्त्ययोः शब्दग्रहणम्, अपत्याधिकारादन्यत्र लौकिकगोत्रग्रहणादाह **सुश्रुतोऽपत्यस्येति** । माणवब्राह्मणयोर्गोत्रत्वेन प्रसिद्ध्यभावाद् ग्रहणम् । **ओदनपाणिनीया इति** । ओदनकामत्वेन तेषाङ्क्षेपः । **अङ्गानि मैरेये** । सुराव्यतिरिक्तं मद्यं **मैरेयम्**, तद्वाचके उत्तरपदे तदर्थारम्भकवाचीनि पूर्वपदान्याद्युदात्तानीत्यर्थः ।

३८०५ **भक्ताख्यास्तदर्थेषु ।** (६-२-७१) भक्तमत्रम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः । भक्ताख्याः किम्—समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । तदर्थेषु किम्—भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् । ३८०६ **गोबिडालसिंहसैन्धवेषूपमाने ।** (६-२-७२) धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिवेति विग्रहः । व्याघ्रादिः । गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते । उपमाने किम्–परमसिंहः । ३८०७ **अके जीविकार्थे ।** (६-२-७३) दन्तलेखकः । यस्य दन्तलेखनेन जीविका । 'नित्यं क्रीडा' (७११) इति समासः । अके किम्–रमणीयकर्ता । जीविकार्थे किम्–इक्षुभक्षिकां मे धारयसि । ३८०८ **प्राचां क्रीडायाम् ।** (६-२-७४) प्राग्देशवाचिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यात् । उद्दालकपुष्पभञ्जिका।

तादर्थ्ये चतुर्थीसमासस्तु न भवति प्रकृतिविकार एव तस्येष्टत्वात् । **बहुव्रीहिरिति ।** तत्पुरुषश्चेदन्तोदात्तः । **गोबिडाल ।** उपमानशब्दे प्रत्येकं संबन्धादेकवचनम् । गवादिषूपमानवाचिषूत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात् । **धान्यगव इति ।** अत्रोपमितसमासे 'गोरतद्धितलुकि' इति टच् । अत्र पूर्वपदाद्युदात्तविधानसामर्थ्याट्टचश्चित्स्वरो बाध्यते । उपमानार्थो यो यत्रोदाहरणे यथा संभवति स तथा योजयितव्यः । तत्र दिङ्मात्रं दर्शयति । **गवाकृत्येत्यादि ।** आकृतिः संस्थानम् । सन्निवेशितं व्यवस्थापितम् । एवमन्यत्रापि यत्किंचित्सादृश्यं योजयितव्यम् । **अके ।** जीविकार्थवाचिनि समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् । **दन्तलेखक इति ।** 'ण्वुल्तृचौ' इति ण्वुल् । **प्राचाम् ।** प्राचां क्रीडायामिति श्रुतयोरेवान्वयसंभवान्मतेनेत्यध्याहारो न युज्यत इति तत्राह **प्राग्देशवर्तिनां या क्रीडेति ।** अजीविकार्थमिदम् ।

आसवो–न मद्यम् । **भक्ताख्यास्त ।** भक्तशब्दोऽत्र अदनीयवस्तुमात्रपरः । **भिक्षाकंसादयः**–षष्ठीसमासः । बहुवचनात्स्वरूपविधिनिरासे सिद्धे आख्योक्तिरन्नविशेषस्य भिक्षादेर्ग्रहणार्थेत्याहुः । **क्रियामात्रमिति ।** न द्रव्यमित्यर्थः । **बहुव्रीहिरिति ।** षष्ठीसमासे त्वन्तोदात्तत्वम् । **गोबिडाल ।** उपमानार्थेष्वेषूत्तरपदेषु पूर्वपदमाद्युदात्तमित्यर्थः । **गवाकृत्येति ।** एवं यत्र यथोपमानभावः सम्भवति तत्र तथा योज्यमिति बोद्धव्यम् । **अके जीवि ।** जीविकार्थे समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तमित्यर्थः । कृत्स्वरापवादः । दन्तलेखनादिजीविकायाः समासे प्रवृत्तिनिमित्तत्वात्समासस्य जीविकार्थत्वमित्याह **यस्येति ।** प्रतिपदोक्तत्वाद् 'नित्यं क्रीडे'ति विहितसमासे एवेदम् । अकग्रहणन्तु स्पष्टार्थम् । **प्राचामिति ।** प्राग्देशवर्तिषु

'संज्ञायाम्' (३२८६) इति वुल् । प्राचां किम्—जीवपुत्रप्रचायिका । इय-मुदीचां क्रीडा । क्रीडायां किम्—तव पुष्पप्रचायिका । पर्याये वुल् । ३८०९ **अणि नियुक्ते ।** (६-२-७५) अरणन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । नियुक्तं किम्—काण्डलावः । ३८१० **शिल्पिनि चाऽकृञः ।** (६-२-७६) शिल्पिवाचिनि समासे अरणन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञः परो न भवति । तन्तुवायः । शिल्पिनि किम्—काण्डलावः । अकृञः किम्—कुम्भकारः । ३८११ **संज्ञायां च ।** (६-२-७७) अरणन्ते परे । तन्तुवायो नाम कृमिः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः । ३८१२ **गोतन्तियवं पाले ।** (६-२-७८) गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । गो इति किम्—वत्सपालः । पाले इति किम्—गोरक्षः । ३८१३ **णिनि ।** (६-२-७९)पुष्पहारी । ३८१४ **उपमानं शब्दार्थप्रकृतावेव ।** (६-२-

---

उद्दालकपुष्पभञ्जिकेति । 'नित्यं क्रीडा' इति समासः । **अणि नियुक्ते** । युजिर् योगे इत्यस्य नियुक्त इति रूपम् । नियुक्त अधिकृतः स च कस्मिंश्चित्कर्तव्ये तत्परो न भवतीति नियुक्त इत्यनेन सिध्यति । युँक्त इति सूत्रे हि युज समाधौ दिवादिरात्मनेपदी गृह्यते । समाधिस्तत्परता । अत्र रौधादिकस्य स्वरितेतो ग्रहणम्, योगः संबन्धमात्रम् । **छत्रधार इति** । कर्मण्यण् । **शिल्पि** । नियुक्ते चेत्येव सिद्धे कृञः प्रतिषेधार्थं वचनम् । **तन्तुवाय इति** । 'ह्वावामश्च' इत्यण् । आतो युक् । **संज्ञायाम्** । संज्ञायां विषयेऽणन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् स चेदण् कृञो न भवति । **गोतन्ति** । गोतन्तियवशब्दा आद्युदात्ताः स्युः पालशब्दे परे । **गोपाल इति** । गाः पालयतीति विग्रहः । **तन्तिपाल इति** । तनु विस्तारे क्तिन् । तन्तिर्वत्सानां

लाक्षणिकमित्याह **प्राग्देशवर्तिनामिति** । अजीविकार्थमिदम् । **उद्दालकेत्यादौ** 'नित्यं क्रीडे'ति समासः । **तव पुष्पेति** । षष्ठीसमासः । **नियुक्त इति** । अधिकृत इत्यर्थः । स च कस्मिंश्चित्कर्तव्ये तत्परो न भवतीति 'युक्ते' इत्यनेन न सिद्धयति । **शिल्पिनि चा** । 'युक्ते चे'त्येव सिद्धे कृञः प्रतिषेधार्थं वचनम् । **सञ्ज्ञायाम्** । अत्राऽणीति 'शिल्पिनि चाऽकृञः' इति वर्त्तते । अयुक्तार्थमनियुक्तार्थम्, कृञः प्रतिषेधार्थश्च वचनम् । **गोतन्ति** । पालशब्दे परे एते आद्युदात्ता इत्यर्थः । वत्सानां बन्धनरज्जुस्तन्तिः । **णिनि** । णिन्यन्ते उत्तरपदे पूर्वमाद्युदात्तमित्यर्थः । अत्र सञ्ज्ञाग्रहणमनुवर्त्तते इति 'व्रते' इति सूत्रे भाष्यादौ । तेनाऽश्राद्धभोजीत्यादौ न । अत्र कृत्स्वर एव । उत्तरसूत्रस्थभाष्यात्तु नानुवर्तते इति प्रतीयते । तत्त्वन्त्वत्र ऋषयो विदुः । वस्तुत उत्तरसूत्रेऽपि संज्ञायामित्यस्य संबन्धे न कश्चिद्दोषः । **उपमानम्** ।

८०) उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी। ध्वाङ्क्षरावी। उपमानग्रहणस्य पूर्वयोगस्य च विषयविभागार्थम्। शब्दार्थप्रकृतौ किम्—वृकवञ्ची। प्रकृतिग्रहणं किम्—प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्थो तत्रैव यथा स्यात्। इह मा भूत्। गर्दभोच्चारी। ३८१५ युक्तारोह्यादयश्च। (६-२-८१) आद्युदात्ताः। युक्तारोही। आगतयोधी। क्षीरहोता। ३८१६

बन्धनरज्जुः। णिनि। णिन्नन्ते उत्तरपदे पूर्वपदमाद्युदात्तम्। **उपमानम्**। **उष्ट्रक्रोशीत्यादि**। 'कर्तर्युपमाने' इति णिनिः। **शब्दार्थप्रकृतौ किमिति**। सूत्रं किमर्थमित्यर्थः। **वृकवञ्चीति**। कृत्स्वर एव भवति। **प्रकृतिरेवेत्यादि**। असति प्रकृतिग्रहणे शब्दार्थात्परो णिनिस्तदन्ते उत्तरपदे इत्यर्थो विज्ञायेत। तथा च यत्रापि धातूपसर्गसमुदायाच्छब्दार्थात्परो णिनिस्तत्रापि स्यात्। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया णिन्नन्तोत्तरपदत्वानपायात्। प्रकृतिग्रहणे तु न भवति। योऽत्र धातुर्नासौ शब्दार्थः। यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहित इति भावः। एव किम्? शब्दार्थप्रकृतौ उपमानमेवेत्येवं नियमो मा भूत्। **युक्तारोह्या**। युक्तारोह्यादयः समासा आद्यदात्ताः स्युः। **युक्तारोहीत्यादि**। अत्र णिनीत्येव सिद्धे पूर्वोत्तरपदनियमार्थं सूत्रम्। यत्र युक्तादीन्येव पूर्वपदानि आरोह्यादीन्येवोत्तरपदानि तत्रैव यथा स्यादित्यर्थः। **क्षीरहोतेति**। याजकादित्वात् षष्ठीसमासोऽयम्। समासस्वरापवादे कृत्स्वरे प्राप्ते तदपवादे मन्क्तिन्निति तदपवादोऽ-

---

शब्दार्थकधातुप्रकृतिके एव णिन्यन्ते परे इत्यर्थः। **उष्ट्रक्रोशीति**। उष्ट्र इव क्रोशतीत्याद्यर्थे 'कर्तर्युपमाने' इति णिनिः। एवेति किम्? 'उपमानमेवे'त्येवं नियमो मा भूत्। तथा च 'साध्वध्यायी'त्यादौ पूर्वेणाद्युदात्तता न स्यात्, 'वृकवञ्ची'त्यत्र च स्यादिति बोध्यम्। **युक्तारोह्यादयश्च**। एते समासा एव गणे पठ्यन्ते। **युक्तारोहीति**। एषु 'णिनी'त्येव सिद्धे युक्तादीन्येव पूर्वपदानि आरोह्यादीन्येवोत्तरपदानीत्येवं पूर्वपदोत्तरपदनियमार्थमिदमिति केचित्। असञ्ज्ञार्थमित्यन्ये। **क्षीरहोतेति**। अत्र समासस्वराऽपवादे कृत्स्वरे प्राप्ते, तदपवादे 'मन्क्तिन्'िति प्राप्ते, तदपवादोऽयम्। एकशितिपाच्छब्दोऽत्र पठ्यते। तत्रैकः शितिः पादोऽस्येति त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषः। नन्ववान्तरतत्पुरुषे समासान्तोदात्तत्वं बाधित्वा 'इगन्ते'ति पूर्वपदप्रकृतिस्वरेणाऽऽद्युदात्तत्वं सिद्धमेकशब्दस्य कन्नन्तत्वादिति चेन्न, उत्तरपदे शित्यन्तस्य द्विगुस्वराऽभावज्ञापनार्थत्वात्। तेन द्विशितिपादित्यत्र तिशब्द एवोदात्तः। नन्वेवमपि समासान्तोदात्तत्वं बाधित्वा बहुव्रीहिनिमित्तपूर्वपदप्रकृतिस्वरत्वं भविष्यतीति व्यर्थ एव पाठ इति चेन्न, निमित्तिस्वरबलीयस्त्वस्यापि ज्ञापनात्। फलं तूक्तमेवेति केचित्।

दीर्घकाशतुषभ्राष्ट्रवटं जे । (६-२-८२) कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः । ३८१७ अन्त्यात्पूर्वं बह्वचः । (६-२-८३) बह्वचः पूर्वस्यान्त्यात्पूर्वपदमुदात्तं जे उत्तरपदे । उपसरजः । आमलकीजः । बह्वचः किम्-दग्धजानि तृणानि । ३८१८ ग्रामेऽनिवसन्तः । (६-२-८४) ग्रामे परे पूर्वपदमुदात्तम् । तच्चेन्निवसद्वाचि न । मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः । देवस्वामिकः । अनिवसन्तः किम्-दाक्षिग्रामः । दाक्षिनिवासः । ३८१९ घोषादिषु च । (६-२-८५) दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः । ३८२० छात्र्यादयः शालायाम् । (६-२-८६) छात्रिशाला । व्याडिशाला । यदापि

यम् । **दीर्घकाश** । दीर्घान्तं पूर्वपदं काशादीनि च पूर्वपदानि आद्युदात्तानि स्युर्जे उत्तरपदे । **कुटीज इति** 'सप्तम्यां जनेर्डः' । **उपसरज इति** । स्त्री गवादिषु पुंसां गर्भाधानाय प्रथममुपसरणमुपसरः । 'प्रजने सर्तेः' इत्यप् । तत्र जात उपसरजः । **आमलकीज इति** । 'दीर्घकाश–' इति बाधित्वा परत्वादयं स्वरः । **ग्रामे** । सूत्रे निवसन्त्यस्मिन्निति निपूर्वाद्वसेः 'तॄवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' इति भच् । **मल्लग्राम इति** । षष्ठीसमासः । **दाक्षिग्राम इति** । दाक्षयो निवसन्त्यस्मिन्स उच्यते । **घोषा** । घोषादिषूत्तरपदेषु पूर्वपदमाद्युदात्तम् । अत्र निवसन्त इति केचिदनुवर्तयन्ति । अपरे नानुवर्तयन्ति । तथा च दाक्षीणां घोषो निवासस्थानमित्यर्थे दाक्षिघोषशब्दे आद्युदात्तत्वं न भवति । मतान्तरे भवति । **छात्र्यादयः** ।

परे तु समर्थसूत्रे–'एतच्छब्दपाठेन नेहार्थः । इगन्ते द्विगावित्यस्य बाधकत्वान्न स्वरे दोष' इत्युक्तम् । तेन द्विशितिपादित्यत्रापि द्विशब्दस्वर एवेति लभ्यते । अत एव निमित्तिस्वरबलीयस्त्वं वाचनकमिति **कैयटे**नोक्तम् । सतिशिष्टन्यायसिद्धमिति त्वन्यदित्याहुः । पात्रेसमितादयोऽप्यत्र बोद्धयाः । **अधिकशतवर्ष**शब्दोऽप्यत्र पठनीय' इति समर्थसूत्रे भाष्यम् । अयमाकृतिगणः । **दीर्घकाश** । दीर्घान्तं काशादीनि च जे परे आद्युदात्तानीत्यर्थः । दीर्घादिति किम् ? कुड्यजः । जे किम् ? शमीवृक्षः । कृत्स्वरापवादोऽयम् । **अन्त्यात्पूर्वम्** । आमलकीजः' इत्यत्र 'दीर्घकाशे'ति बाधित्वा परत्वादयमेव स्वरः । **तच्चेदिति** । पूर्वपदं चेदित्यर्थः । **निवसत्** निवासकर्तृ । सूत्रे व्यत्ययेन बहुवचनम् । केचित्त्वधिकरणे औणादिकझजन्तं समासविशेषणमित्याहुः । **मल्लग्रामादौ** षष्ठीसमासः । **दाक्षिग्रामः** । दाक्षयो निवसन्त्यस्मिन्स एवमुच्यते । **घोषादि** । एषु पूर्वपदमाद्युदात्तमित्यर्थः । घोष, कट, पल्वल, ह्रद, बदरी, पिङ्गल, पिशङ्ग, माला, शाला, रक्षा, कूट, शाल्मलि, अश्वत्थ, तृण, शिल्पी, मुनि, प्रेक्षा, अत्राऽनिवसन्त इत्यनुवर्तत इत्येके । नानुवर्तत इत्यन्ये । **छात्र्यादयः** ।

शालान्तः समासो नपुंसकलिङ्गो भवति तदापि 'तत्पुरुषे शालायां नपुंसके (३८१७) इत्येतस्मात्पूर्वविप्रतिषेधेनायमेव स्वरः । छात्रिशालम् । ३८२१ **प्रस्थेऽवृद्धमकर्क्यादीनाम्** । (६-२-८७) प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । अवृद्धं किम्-दाक्षिप्रस्थः । अकेति किम्-कर्कीप्रस्थः । मकरीप्रस्थः । ३८२२ **मालादीनां च** । (६-२-८८) वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः । ३८२३ **अमहन्नवन्नगरेऽनुदीचाम्** । (६-२-८९) नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न । ब्रह्मनगरम् । अमेति किम्-महानगरम् । नवनगरम् । अनुदीचां किम्-कार्तिकनगरम् । ३८२४ **अर्मे चाऽवर्णं द्व्यच् त्र्यच्** । (६-२-९०) अर्मे परे द्व्यच् त्र्यच् पूर्वमवर्णान्तमाद्युदात्तम् । गुप्तार्मम् । कुक्कुटार्मम् । अवर्णं किम्-बृहदर्मम् । द्व्यच् त्र्यच् किम्-कपिञ्जलार्मम् । अमहन्नवमित्येव । महार्मम् । नवार्मम् । ३८२५ **न भूताधिकसञ्जीवमद्राश्मकज्जलम्** । (६-

---

शालाशब्दे परे छात्र्यादय आद्युदात्ताः स्युः । **यदा शालान्त इत्यादि** । 'विभाषा सेनासुरा–' इत्यादिना शालान्तस्य तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तं तत्रास्यावकाशो यो नपुंसकलिङ्गो न भवति । छात्रिशाला । 'तत्पुरुषे शालायामि'त्यस्यावकाशो यश्छात्र्यादिपूर्वो न भवति । प्रभुशालम् । क्षत्रियशालम् । यस्तु छात्र्यादिपूर्वपदो नपुंसकलिङ्गश्च तत्र एकदेशविकृतस्यानन्यत्वादयमपि प्राप्नोति तत्पुरुषे शालायामित्ययं च । तत्र पूर्वविप्रतिषेधादयमेव भवतीति वामनहरदत्तौ । **प्रस्थे** । मालादीनां चेति वचनादवृद्धमिति चच्छेदः । कर्क्यादिप्रतिषेधस्तु नामधेयार्थः स्यात् 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्ये'ति । **अकेति किमिति** । अकर्क्यादीनां किमित्यर्थः । **माला** । प्रस्थे परे मालादीनामादिरुदात्तः स्यात् । **शोणप्रस्थ इति** । 'एङ् प्राचां देशे' इति शोणाशब्दस्य वृद्धत्वम् । **अम** । **महन्नवन्वर्जितं पूर्वपदमिति** । महद्वर्जितं नववर्जितं चेति प्रत्येकं संबन्धः । **महानगरमिति** । 'आन्महतः समानाधिकरण–' इति महत आत्वे कृतेऽवर्णान्तत्वादस्ति प्राप्तिः । **नवार्ममिति** । नवशब्दः प्रत्यप्र-

---

छात्रि, ऐलि, भाण्डि, व्याडि, आपिशलि, आखण्डि, गौमि । **अयमेव स्वर इति** । स्पष्टश्चेदं वृत्तौ । भाष्ये तु नैतद् दृश्यते । **प्रस्थे** । 'मालादीनाञ्चे'ति सूत्रारम्भात्कर्क्यादिपर्युदासाच्चाह **अवृद्धमिति** । प्रत्युदाहरणेऽन्तोदात्तत्वम् । कर्की, मद्री, मकरी, कर्कन्धू, शमी, करीर, कटुक, कवल, बदर । **शौणेति** । शोणेति पाठे 'एङ् प्राचां देशे' इति वृद्धत्वम् । माला, शाला, शोणा, शौणेति वा । द्राक्षा, ध्राक्षा, क्षाक्षा, काञ्ची, एक, काम, [एका कामा क्षामा] । **नवार्ममिति** । नवशब्दः प्रत्यप्रवाची

२-६१) अर्मे परे नैतान्याद्युदात्तानि । भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्राश्मग्रहणं संघातविगृहीतार्थम् । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् । ॐ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् । दिवोदासाय दाशुषे । ३८२६ अन्तः । (६-२-६२) अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् । ३८२७ सर्वं गुणकार्त्स्न्ये । (६-२-६३) सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्वमहान् । सर्वे किम्-परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकार्त्स्न्यं वर्तते । गुणेति किम् सर्वसौवर्णः । कार्त्स्न्ये किम्-सर्वेषां श्वेततरः सर्वश्वेतः । ३८२८ संज्ञायां गिरिनिका-

---

वचनोऽकारान्तः । **संघातविगृहीतार्थमिति** । मद्रशब्दस्य केवलस्य मद्राश्मशब्दस्य संघातस्य च तस्य प्रतिषधार्थः । **मद्राश्मार्ममिति** । 'अनोश्मायःसरसां जातिसंज्ञयोः' इति समासान्ते कृते अवर्णान्तमेतत् । तदेव मद्रार्मम् । मद्राश्मार्ममिति द्वे एवोदाहरणे । प्रायेण अश्मार्ममिति तृतीयमप्युदाहरणं पठ्यते तद्वृत्त्यनुरोधादुक्तम् । अश्मशब्दस्यानकारान्तत्वम् । न च नलोपे कृतेऽवर्णान्तत्वम् । स्वरविधौ नलोपस्यासिद्धत्वात् । अपरे तु मद्राश्मग्रहणं संघातविगृहीतार्थमित्यस्य भाष्येऽदर्शनादसंगतमेतदित्याहुः । **दिवोदासायेति** । 'दिवश्च दासे' इति षष्ठ्या अलुक् । **अन्तः** । अत्रापि प्रकरणे पूर्वपदविषया प्रथमा षष्ठ्यर्थे वेदितव्या । **सर्वं गुण** । गुणकार्त्स्न्ये वर्तमानः सर्वः अन्तोदात्तः, यत्र गुणान्तरस्याभावस्तत्र गुणकार्त्स्न्यं भवति । **सर्वश्वेत इति** । 'पूर्वकालैक-' इत्यादिना कर्मधारयः । अत्र शौक्ल्येन गुणेन सर्वावयवानां व्याप्तिर्गम्यते । **आश्रयव्याप्त्येति** । नतूज्ज्वलत्वेन । **सर्वसौवर्ण इति** । विकारविषयमात्रं कार्त्स्न्यम् । **सर्वश्वेत इति** । 'गुणात्तरेण तरलोपश्च' इति समासः तरप्रत्ययलोपश्च । **कार्त्स्न्ये किमिति** । गुणवाचिन्युत्तरपदे व्यभिचरतीति प्रश्नः । नियमः कर्मधारये न षष्ठीसमास इत्याह **सर्वेषामिति** ।

अकारान्तः । **महार्ममित्यत्राऽऽत्वे** कृते प्राप्तिः । **न भू** । **मद्राश्मस्य** 'अनोऽश्मायः' इति टजन्तत्वादवर्णान्तत्वम् । **सङ्घातेति** । स्वरविधौ नलोपस्याऽसिद्धत्वेनाश्मनोऽवर्णान्तत्वाऽभावादप्राप्तेर्भाष्येऽनुक्तत्वाच्च त्र्युक्तमिदं चिन्त्यम् । 'वृत्तिप्रामाण्यादयमश्मशब्दोऽकारान्तोप्यस्ती' त्यन्ये । **दिवोदासायेति** । 'दिवश्च दासे' इति षष्ठ्या अलुक् । **सर्वश्वेत इति** । श्वेतादिगुणेन सर्वावयवानां व्याप्तिरिति गुणकार्त्स्न्यवृत्तिरत्र सर्वशब्दः । यत्र हि गुणाऽन्तराऽभावस्तत्र गुणकार्त्स्न्यं भवति । '**सर्वमहा**'नित्यत्र सर्वशब्दस्य पूज्यमानार्थत्वाऽभावात् 'पूर्वकालके'त्येव समासः । **आश्रयव्याप्त्येति** । न तूज्ज्वलत्वेनेत्यर्थः । **सर्वसौवर्ण इति** । विकारकार्त्स्न्ये-

ययोः। (६-२-९४) एतयोः परतः पूर्वमन्तोदात्तम्। अञ्जनागिरिः। मौण्डि-निकायः। संज्ञायां किम्-परमगिरिः ब्राह्मणनिकायः। ३८२९ कुमार्यां वयसि। (६-२-९५) पूर्वपदमन्तोदात्तम्। वृद्धकुमारी। कुमारीशब्दः पुंसा सहासंप्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः। तच्च वय इह गृह्यते न कुमारत्वमेव। वयसि किम्-परमकुमारी। ३८३० उदकेऽकेवले। (६-२-९६) अकेवलं मिश्रं तद्वाचिनि समासे

गुणिकात्स्न्र्ये वर्तमानो न गुणकात्स्न्र्ये। सर्वेषामिति गुणसंबन्धे षष्ठी। पटस्य शौक्ल्यमितिवद् गुणवाचिन एव प्रत्ययः। सर्वेषां पटानां द्रव्यान्तराधारश्वेतगुणापेक्षया सातिशयः श्वेतो गुण इत्यर्थः। यदा तु प्रतिपदोक्तत्वात् 'पूर्वकालैक-' इति समासो गृह्यते तदा कात्स्न्र्यग्रहणं मास्तु। अञ्जनागिरिरिति। 'वनगिर्योः संज्ञायाम्' इति दीर्घः। कुमार्याम्। कुमारीशब्दे परे पूर्वपदमन्तोदात्तं स्याद्वयसि वाच्ये। वृद्धकुमारीति। विशेषणसमासः। 'पुंवत्कर्मधारय-' इति पुंवद्भावः। ननु कुमारीशब्दः प्रथमे वयसि वर्तते तथा च 'वयसि प्रथमे' इत्यनेन ङीबत्र विहितः, तस्य कथं चरमवयोवाचिना वृद्धेन सामानाधिकरण्यमत आह कुमारीत्यादि। कुमारीशब्दे द्वयं प्रवृत्तिनिमित्तं 'प्रथमं वयः' 'पुंसा सहासंप्रयोगश्च', तत्राद्यमर्थं त्यक्त्वा द्वितीयमात्रे वर्तते तदा वृद्धादिसामानाधिकरण्यं भवति। तदाह तच्चेति। शब्दान्तराभिधेयमित्यर्थः। न कुमारत्वमेवेति। यदेतत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं तद्वयो न गृह्यत इत्यर्थः। एतच्च वयोग्रहणसामर्थ्याल्लभ्यते। अन्यथा कुमारीशब्दप्रयोगे नियोगतः प्रथमं वयो गम्यत इत्यनर्थकं स्यात्। ननु तर्हि ङीबपि न स्यादिति चेच्छृणु। पूर्वं हि प्रथमं वयः प्रवृत्तिनिमित्तं कृत्वा ङीप् कृतः सोऽन्तरङ्गो वृद्धादिसामानाधिकरण्येऽपि न निवर्तते। परमकुमारीति। अत्र कुमारत्वमेव गम्यते न वयोन्तरमिति भवति प्रत्यु-

भत्र। सर्वेषामिति। गुणिकात्स्न्र्यवृत्तिः सर्वशब्दोऽत्र। 'गुणात्तरेणे'ति समासः। सर्वेषां पटानां मध्ये श्वेतगुणवद्द्रव्यान्तरापेक्षया सातिशयश्वेतगुणवानयमित्यर्थः। द्रव्यान्तराधेयश्वेतापेक्षया सर्वेषां पटानामयं श्वेतो गुणः सातिशय इत्यर्थ इत्यन्ये। अञ्जनागिरिरिति। 'वनगिर्यो'रिति दीर्घः। गिर्यादि किम्? शरवणम्। दूर्वावणम्। दूर्वावनम्। कुमार्यां वयसि। वयसि वर्तमानं पूर्वपदमित्यर्थः। वृद्धकुमारीति। विशेषणसमासः। 'पुंवत्कर्मधारये'ति पुंवत्। असंप्रयोगमात्रेति। तन्मात्रेण कुमारत्वरूपं प्रवृत्तिनिमित्तमुपादायारोप्य प्रयुक्त इत्यर्थः। अत एव कुमारीत्यत्र ङीप्सिद्धिः। तच्च वय इति। वृद्धत्वमित्यर्थः। न कुमारत्वमेवेति। यत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं न तदेव वयो गृह्यत इत्यर्थः। एवञ्च वयसीति

उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । 'स्वरितो वानुदात्ते पदादौ' (३६५६) इति पक्षे स्वरितः । अकेवले किम्–शीतोदकम् । **३८३१ द्विगौ क्रतौ । (६-२-९७)** द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः । द्विगौ किम्–अतिरात्रः । क्रतौ किम्–बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः । **३८३२ सभायां नपुंसके । (६-२-९८)** सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । सभायां किम्–ब्राह्मणसेनम् । नपुंसके किम्–राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् ब्राह्मणकुलम् । **३८३३ पुरे प्राचाम् । (६-२-९९)** देवदत्तपुरम् । नान्दीपुरम् । प्राचां किम्–शिवपुरम् । **३८३४ अरिष्टगौडपूर्वे च । (६-२-१००)** पुरे परे अरिष्टगौडपूर्वसमासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम्–इहापि यथा स्यात् । अरिष्टाश्रितपुरम् ।

दाहरणम् । **उदके** । अकेवल इति पदच्छेदः । अन्यथाऽसंदेहार्थं केवल उदक इत्येव ब्रूयात्तदाह **अकेवलं मिश्रमिति** । द्रव्यान्तरसंपृक्तं मिश्रम् । **गुडोदकमिति** । गुडमिश्रमुदकं गुडोदकम् । शीतोदकमिति कर्मधारयः । **गर्गत्रिरात्रमिति** । षष्ठीसमासः । तिसृणां रात्रीणां समाहारस्त्रिरात्रम् । 'अहःसर्वैकदेश–' इत्यादिनाऽच् समासान्तः । 'संख्यापूर्वं रात्रं क्लीबम्' इति क्लीबत्वम् , एवं सप्तरात्र इति । रात्रिमतिक्रान्त इति प्रादिसमासः । बिल्वसप्तरात्रमित्यत्र बिल्वशब्दो बिल्वहोमे वर्तते तेन सह षष्ठीसमासः । **गोपालसभमिति** । 'अशाला च' इति क्लीबत्वम् । **प्रतिपदोक्तेति** । 'सभा राजा–' इत्यादिविहितम् । **रमणीयसभमिति** । रमणीया सभा यस्येति बहुव्रीहिः । अत्राभिधेयवशान्नपुंसकत्वं न प्रतिपदोक्तम् । **पुरे प्रा** । पुरशब्दे परे प्राचां देशे पूर्वपदमन्तोदात्तं स्यात् । **अरिष्ट** । **पूर्वग्रहणं किमिति** । अरिष्टगौडयोरिति वक्तव्यमिति प्रश्नः । **इहापि यथा स्यादिति** । पूर्वग्रहणे हि सति बहुव्रीहिर्लभ्यते । अरिष्टगौडौ पूर्वौ यस्मिन्समास इति । तेनारिष्टाश्रितपुरं गौडभृत्यपुरमित्यत्रापि पूर्वपदमन्तो-

---

पूर्वपदविशेषणमिति सूचितम् । **स्वरे कृते इति** । 'नेन्द्रस्ये'ति निषेधेन पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमेकादेशाऽभावज्ञापनादिति भावः । **गर्गत्रिरात्रमिति** । सङ्ख्यापूर्वं रात्रं क्लीब'मिति क्लीबता । पुंल्लिङ्गपाठस्तु क्वाचित्कः प्रामादिकः । एवं **बिल्वसप्तरात्रमि**त्येव पाठः । **प्रतिपदोक्तेति** । 'सभा राजे'ति विहितेत्यर्थः । प्रत्युदाहरणे बहुव्रीहिः, ब्राह्मणकुलं विशेष्यम् । **पुरे प्राचाम्** । स्वतन्त्राऽकारान्तपुरशब्दस्य, 'ऋक्पू'रित्यप्रत्ययान्तस्य च ग्रहणम् , अविशेषात् , अप्रत्ययान्तस्यापि परत्वसम्भवात् , नह्यत्रोत्तरपदाधिकारोऽस्तीत्याहुः । **इहापीति** । 'अरिष्टगौडे'त्येव

गौडभृत्यपुरम्। ३८३५ **न हास्तिनफलकमार्देयाः।** (६-२-१०१) पुरे परे नैतान्यन्तोदात्तानि। हास्तिनपुरम्। फलकपुरम्। मार्देयपुरम्। मृदेरपत्यमिति शुभ्रादित्वाड्ढक। ३८३६ **कुसूलकूपकुम्भशालं बिले।** (६-२-१०२) एतान्यन्तोदात्तानि बिले परे। कुसूलबिलम्। कूपबिलम्। कुम्भबिलम्। शालबिलम्। कुसूलादि किम्—सर्पबिलम्। बिलेति किम्—कुसूलस्वामी। ३८३७ **दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु।** (६-२-१०३) दिक्शब्दा अन्तोदात्ता भवन्त्येषु। पूर्वेषुकामशमी। अपरकृष्णमृत्तिका। जनपदे। पूर्वपञ्चालाः। आख्याने। पूर्वयायातम्। पूर्वचानराटम्। शब्दग्रहणं कालवाचिदिक्शब्दस्य परिग्रहार्थम्। ३८३८ **आचार्योपसर्जनश्चाऽन्तेवासिनि।** (६-२-१०६) आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति।

दात्तं भवति। असति तु पूर्वग्रहणे श्रितभृत्यशब्दाभ्यां व्यवहितत्वाच्चारिष्टगौडयोस्तावन्न स्यात्, समुदाययोश्च सूत्रेऽनुपात्तत्वात्। **नहास्ति।** 'पुरे प्राचाम्' इति प्राप्तः प्रतिषिध्यते। **मार्देयपुरमिति।** 'ढे लोपोऽकद्र्वाः' इत्युकारलोपः। **दिक्शब्दाः।** दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि स्युर्ग्रामादिषूत्तरपदेषु। चानराटे स्वरूपग्रहणमितरेष्वर्थग्रहणम्। **पूर्वेषुकामशमी। अपरकृष्णमृत्तिकेति।** 'दिक्संख्ये संज्ञायाम्' इति समासः। **पूर्वपञ्चाला इति।** समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति पञ्चालैकदेशे पञ्चालशब्दः। ततः पूर्वशब्देन सामानाधिकरण्यात् 'पूर्वापरप्रथम—' इत्यादिना कर्मधारयः। **पूर्वयायातमिति।** ययातिमधिकृत्य कृतो ग्रन्थ इत्यणि यायातशब्दः सिद्धः। **शब्दग्रहणमित्यादि।** दिशि दृष्टः शब्द इत्युत्तरपदलोपी समासस्तेन कालवाचिनोऽपि ग्रहणात्पूर्वयायातमित्यादावपि भवति। **आचार्योपसर्जन।** आचार्योपसर्जनग्रहणमन्तेवासिनो विशेषणम्। सप्तम्यर्थे प्रथमा। तदाह **आचार्योपसर्जनान्तेवासिनीति।** आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः स चासावन्ते-

---

सिद्धे पूर्वग्रहणं तदादिसमासग्रहणार्थमिति भावः। अप्राप्तार्थमिदं सूत्रम्। **हास्तिनपुरमिति।** एषु समासान्तोदात्तत्वमेव। **ढगिति।** 'ढे लोपः' इत्युलोपः। **कुसूलकूप।** प्रत्युदाहरणेषु समासान्तोदात्तत्वम्। **दिक्शब्दा ग्राम। चानराटे** स्वरूपग्रहणम्, अन्यत्रार्थग्रहणम्। **पूर्वेष्विति।** एकादेशः स्वरित उदात्तो वा। **पूर्वपञ्चाला इति।** पञ्चालैकदेशे पञ्चालशब्दस्य वृत्त्या पूर्वादिना सामानाधिकरण्यम्, 'पूर्वापरे'ति विशेषणसमासः। **यायातमिति।** ययातिमधिकृत्य कृतमाख्यानमित्यर्थः। 'पूर्वयायात'मित्यादौ पूर्वशब्दस्य दिक्शब्दत्वाऽभावात्कथं प्राप्तिरित्यत आह **शब्दग्रहणमिति।** यदा कदा वा दिशि दृष्ट इत्यर्थलाभादिति भावः। **आचार्योपसर्जे-**

पूर्वपाणिनीयाः । आचार्येति किम्—पूर्वान्तेवासी । अन्तेवासिनि किम्—पूर्वपाणिनीयं शास्त्रम् । ३८३९ **उत्तरपदवृद्धौ सर्वं च** । (६-२-१०५) उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः । अधिकारग्रहणं किम्—सर्वभासः । सर्वकारकः । ३८४० **बहुव्रीहौ विश्वं संज्ञायाम्** । (६-२-१०६) बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मणा विश्वदेव्यावता । आविश्वदेवं सत्पतिम् । बहुव्रीहौ किम्—विश्वे च ते देवाश्च विश्वदेवाः । संज्ञायां किम्—विश्वदेवः । प्रागव्ययीभावाद्बहुव्रीह्यधिकारः । ३८४१ **उदराश्वेषुषु** । (६-२-१०७) संज्ञायामिति वर्तते । वृकोदरः । हर्यश्वः । महेषुः । ३८४२ **क्षेपे** । (६-२-१०८)

वासी च तद्वाचिनि । **पूर्वपाणिनीया इति** । 'पूर्वापरप्रथम–' इति समासः । पाणिनेश्छात्राः पाणिनीयाः । अत्रान्तेवासिनः प्रधानमाचार्यस्तूपसर्जनम् । **पूर्वपाणिनीयं शास्त्रमिति** । पूर्वं चिरंतनमित्यर्थः । **उत्तरपदवृद्धौ** । अत्र वृद्धाविति तावतैव वृद्धिमदुत्तरपदपरिग्रहे सिद्धे उत्तरपदग्रहणात्तदधिकारो लक्ष्यते । उत्तरपदशब्दस्य स्वरितत्वादिहाधिकारप्रतिपत्तिरित्याशयेनाह **उत्तरस्य पदस्येत्यादि** । **सर्वपाञ्चाल इत्यादि** । 'सुसर्वार्धदिक्शब्देभ्य' इति तदन्तविधौ 'अवृद्धादपि बहुवचनविषयात्' इति वुञ् । सुसर्वार्धाज्जनपदस्य 'दिशोऽमद्राणाम्' इत्युत्तरपदवृद्धिः । वृद्धिशब्देन या वृद्धिर्विहिता तद्वत्युत्तरपद इत्युच्यमानेऽपि न निर्वाह इत्याह **सर्वकारक इति** । **बहुव्रीहौ** । संज्ञायामिति बहुव्रीहेर्विशेषणं न विश्वशब्दस्येति । विशेः कन् नित्त्वादाद्युदात्तो विश्वशब्दः । **उदरा** । एषूत्तरपदेषु बहुव्रीहौ संज्ञायां पूर्वपदमन्तोदात्तं स्यात् । अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः । वृकशब्दः 'प्राणिनां कुपूर्वाणाम्' इत्याद्युदात्तः । वृकस्येवोदरमस्य वृकोदरः । **हर्यश्व इति** । हरतेः

नश्चा । सप्तम्यर्थे प्रथमा । अन्तेवासिविशेषणञ्चैतत् । **उत्तरपदस्येत्यधीति** । स्पष्टश्चेदं 'वृद्धिरादै'च्सूत्रे भाष्ये । वृद्धिमात्रस्योत्तरपदस्याऽभावेन सामर्थ्याद् वृद्धिमदुत्तरपदे लब्धे उत्तरपदग्रहणात्तस्य स्वरितत्वाद्वा तदधिकारलाभ इत्याहुः । अस्य वृद्धिशब्देन विहितवृद्धिग्रहणेमाऽपि वारयितुं शक्यत्वादाह **सर्वकारक इति** । **बहुव्रीहौ विश्वं** । 'सञ्ज्ञाया'मिति बहुव्रीहेर्विशेषणम् । कर्मधारये विश्वदेवा इत्यन्तोदात्तम् । **विश्वदेव इति** । असंज्ञायां पूर्वपदप्रकृतिस्वरः । विश्वमित्रविश्वाजिनयोः 'सञ्ज्ञायां मित्राजिनयो'रित्येतद्विप्रतिषेधेन । ऋषौ विश्वामित्रे अयमेव स्वरो भवति, 'ऋषिप्रतिषेधो मित्रे' इति वचनात् । **हर्यश्व इति** । 'नेन्द्रस्य परस्ये'ति

उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम्। घटोदरः। कटुकाश्वः। चलाचलेषुः। अनुदरः इत्यत्र 'नञ्सुभ्याम्' (३८०६) इति भवति विप्रतिषेधेन।

३८४३ नदी बन्धुनि। (६-२-१०९) बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ। गार्गीबन्धुः। नदी किम्-ब्रह्मबन्धुः। ब्रह्मशब्द आद्युदात्तः। बन्धुनि किम्-गार्गीप्रियः।

३८४४ निष्ठोपसर्गपूर्वमन्यतरस्याम्। (६-२-११०) निष्ठान्तं पूर्वपदमन्तोदात्तं वा। प्रधौतपादः। निष्ठा किम्-प्रसेवकमुखः। उपसर्गपूर्वं किम्-शुष्कमुखः।

'सर्वधातुभ्यः-' इति इन्। आद्युदात्तो हरिशब्दः। हरिरश्वोऽस्य हर्यश्वः। यणि कृते 'उदात्तस्वरितयोः-' इति स्वरितः। **महेषुरिति**। महच्छब्दोऽन्तोदात्तः। 'वर्तमाने पृषन्महत्-' इत्यत्र तथा निपातनात्। तथा च पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति त्वन्यार्थं आरम्भोऽपवादत्वादनेनैवान्तोदात्तत्वम्। उदाहरणं तु सुवर्णपुङ्खेषुरिति ज्ञेयम्। सुष्ठु वर्णो येषां ते सुवर्णाः। 'नञ्दुःसुभ्याम्-'इत्यन्तोदात्तम्। सुवर्णाः पुङ्खा येषां ते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वं पुनरिषुशब्दे बहुव्रीहौ पूर्वपदमन्तोदात्तम्। एकादेशस्तु 'स्वरितो वानुदात्ते पदादौ' इति पक्षे स्वरितः। **घटोदर इति**। घटशब्दः पचाद्यजन्तः। कटुकशब्दात्संज्ञायां कन्। 'चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्य' इति पचाद्यजन्तो चलाचलशब्दः। **अनुदर इत्यादि**। अस्यावकाशः। घटोदरः। 'नञ्सुभ्याम्-' इत्यस्यावकाशः। अयशः। सुयशः। एवं स्थिते विप्रतिषेधः। **नदी**। बन्धुनीति शब्दस्वरूपापेक्षया नपुंसकनिर्देशः। 'गर्गादिभ्यो यञ्' इति यञन्ताद्गर्गशब्दात् 'यञश्च' इति ङीप्। **गार्गी**। ञित्स्वरेणाद्युदात्तः। **ब्रह्मबन्धुरिति**। 'बृंहेर्नोऽच्च' इति नकारस्याकारादेशो मनिन्प्रत्ययश्चेति मनिनन्तो ब्रह्मशब्दो नित्स्वरेणाद्युदात्तः। तदाह **ब्रह्मेत्यादि**। **गार्गीप्रिय इति**। अत्र पूर्वपदप्रकृतिस्वर एव। **निष्ठोपसर्ग**। उपसर्गपूर्वं निष्ठान्तं पूर्वपदमन्तोदात्तम्। **प्रधौतपाद इति**। धावु गतिशुद्धयोः क्तः

ज्ञापकात्पूर्वं पूर्वोत्तरपदनिमित्तकार्यमिति स्वरोत्तरं यणादि। तेन 'उदात्तस्वरितयो'-रित्यादिप्रवृत्तिः अत्रापि सञ्ज्ञायामित्यनुवर्तत इत्याहुः। क्षेपे। अक्षेपे सञ्ज्ञात्वाऽभावे पूर्वपदप्रकृतिस्वर एव। **घटोदर इति**। घटशब्दो वृषादित्वादाद्युदात्तः। कटुकशब्दस्तु कन्नन्तत्वात्तथा। चलाचलस्याऽजन्तत्वाच्चलाचलेषुरित्युदाहरणं चिन्त्यम्। एवं महेषुरित्यपि। **अनुदर इत्यत्रेति**। क्षेपे सञ्ज्ञायां चेदम्। अक्षेपेऽपि पूर्वपदप्रकृतिस्वराऽपवादत्वात्तदेव। 'सूदर' इत्यत्र ततोऽपि परत्वाद् 'उत्सर्गत्वान्न'मिति बोध्यम्। **ब्रह्मशब्द इति**। 'नब्विषयस्ये'त्यनेनाद्युदात्तत्वम्, मनिनन्तत्वाद्वा, 'ब्रह्मा देवाना'-मित्यादावन्तोदात्तत्वं तु छान्दसत्वात्। **गार्गीप्रिय इति**। गौरीप्रिय इति तु

३८४५ उत्तरपदादिः । (६-२-१११) उत्तरपदाधिकार आपादान्तम् । आद्यधिकारस्तु 'प्रकृत्या भगालम्' (३८७१) इत्यवधिकः । **३८४६ कर्णो वर्णलक्षणात् । (६-२-११२)** वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शङ्कुकर्णः । कर्णः किम्-श्वेतपादः । वर्ण-लक्षणात्किम्-शोभनकर्णः । **३८४७ संज्ञौपम्ययोश्च । (६-२-११३)** कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये । गोकर्णः । **३८४८ कण्ठपृष्ठग्रीवाजङ्घं च ।**

'चक्षोः शूट्-' इत्यूठ् । 'एत्येधत्यूठ्सु' इति वृद्धिः । प्रधौतशब्दो गतिस्वरेणाद्यु-दात्तः । **प्रसेवकमुख इति** । ण्वुलन्तः प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण लित्वान्मध्योदात्तः । **शुष्कमुख इति** । 'शुष्कधृष्टौ' इति । शुष्कशब्द आद्युदात्तः । **उत्तरपदादि** । उत्तरपदेति पृथक्पदं लुप्तषष्ठीकम् । **कर्णो** । **आद्युदात्त इति** । सिद्धार्थकथनमेतत् । उत्तरपदस्य कर्णशब्दस्यादिरुदात्त इत्यक्षरार्थः । एवं चास्मि-न्प्रकरणे कर्ण इत्यादौ षष्ठ्यर्थे प्रथमेति ज्ञेयम् । **शङ्कुकर्ण इति** । शङ्कुः कर्णो यस्येति विग्रहः । 'सप्तमीविशेषणे-' इति सप्तम्यन्तस्य पूर्वनिपाते प्राप्ते 'गड्वादेः परा सप्तमी' इति परनिपातः । 'कर्णे लक्षणस्य-' इति दीर्घः । पशूनां विभागज्ञानार्थं शङ्कुप्रति-रूपकं कर्णादिषु यच्चिह्नं क्रियते तदिह लक्षणं गृह्यते पृथग्वर्णग्रहणात् । अन्यथा वर्णेनापि लक्ष्यमाणत्वादनर्थकं तत्स्यात् । **श्वेतपाद इति** । श्विता वर्णे पचाद्यच् । **शोभनकर्ण इति** । शुभ शोभार्थे 'अनुदात्तेतश्च हलादेः' इति युच् । प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वर एव भवति । **संज्ञौपम्य** । संज्ञायामौपम्ये च यो बहुव्रीहि-स्तत्र कर्णशब्द उत्तरपदमाद्युदात्तं स्यात् । **कण्ठपृष्ठ** । कण्ठादीनां समाहारद्वन्द्वे नपुंसकह्रस्वत्वम् । कण्ठादीन्युत्तरपदानि संज्ञौपम्ययोराद्युदात्तानि स्युर्बहुव्रीहौ । कण्ठ-पृष्ठौ 'स्वाङ्गशिटाम्' इत्याद्युदात्तौ । ग्रीवाजङ्घयोः स्वाङ्गत्वेऽप्यदन्तत्वाभावादन्तोदात्त-

---

काचित्कोऽपपाठः, गौरीशब्दस्य ङीषन्ततयाऽन्तोदात्तत्वेन विशेषाऽभावात् । **प्रधौत-शब्दो** गतिस्वरेणाद्युदात्तः । प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण लित्वान्मध्यो-दात्तः । शुष्कशब्दः—'शुष्कधृष्टौ' इत्याद्युदात्तः । **उत्तरपदादिः** । 'उत्तरपदे'ति लुप्तषष्ठीकं पृथक्पदम् । **कर्णो वर्ण** । कर्ण इति षष्ठ्यर्थे प्रथमा । उत्तरपदस्य कर्णस्याऽऽदिरुदात्त इति वाच्योऽर्थः, फलितमाह **परः कर्ण इति** । एवमग्रेऽपि बोद्ध्यम् । अत्र लक्षणशब्देन पशूनां विभागज्ञानार्थं दात्रशङ्कुप्रतिरूपकं यत्कर्णा-दिषु चिह्नं क्रियते तदुच्यते, पृथग्वर्णग्रहणात् । तेन 'स्थूलकर्णः' इत्यत्र न । स्थूल-शब्दोऽन्तोदात्तः । **शङ्कुकर्ण इति** । 'कर्णे लक्षणस्ये'ति दीर्घत्वम् । **श्वेतः** पचाद्यजन्तः । **शोभनो** युजन्तः । प्रत्युदाहरणे पूर्वपदप्रकृतिस्वरः । तत्पुरुषे त्वन्तो-

(६-२-११४) संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजङ्घः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजङ्घः । ३८४९ **शृङ्गमवस्थायां च ।** (६-२-११५) शृङ्गशब्दोऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । संज्ञायाम् । ऋष्यशृङ्गः । उपमायाम् । मेषशृङ्गः । अवस्थेति किम्-स्थूलशृङ्गः । ३८५० **नञो जरमरमित्रमृताः ।** (६-२-११६) नञः परा एते आद्युदात्ता बहुव्रीहौ । न मे जरा अजरम् । अमरम् । अमित्रमर्दय । श्रवो देवेष्वमृतम् । नञः किम्-ब्राह्मणमित्रः । जेति किम्-अशत्रुः । ३८५१ **सोर्मनसी अलोमोषसी ।** (६-२-११७) सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तं स्यात् । 'नञ्सुभ्याम्' (३८०६) इत्यस्यापवादः ।

त्वम् । सुग्रीव इत्यत्र परत्वाद् 'नञ्सुभ्याम्' इत्यन्तोदात्तत्वेन भाव्यम् । अस्य तु दशग्रीवादिरवकाशः । यदि तु नेष्यते तर्हि चकारोऽस्यैव विधेः समुच्चयार्थ इति व्याख्येयम् । **नाडीजङ्घ इति** । नाड्याकारे जङ्घे यस्य स नाडीजङ्घः । **नञो जर** । 'नञ्सुभ्याम्' इत्यस्यापवादः जरणं जरः 'ॠदोरप्' । मरणं मरः । अमरम् । अस्मादेव निपातनादप् । ञिमिदा स्नेहने 'अमिचिमिदिशसिभ्यः क्त्रः' । मृङो नपुंसके भावे क्तः । सूत्रे तु शब्दपरत्वात्पुंस्त्वम् । **जेति किमिति** । जरमरमित्रमृतग्रहणं किमर्थमित्यर्थः । **अशत्रुरिति** । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । **सोर्मन** ।

दात्तत्वम् । **कण्ठपृष्ठ** । उत्तरपदान्येतान्याद्युदात्तानीत्यर्थः । **सुग्रीव इति** । यद्यपि परत्वाद् 'नञ्सुभ्याम्', 'उपसर्गात्स्वाङ्ग'मित्युचितं तथापि **'नीलग्रीवः'** इत्युदाहरणं बोद्ध्यम् । 'चेन पुनर्विधानादयं परस्यापि बाधक' इति हरदत्तः । **विशेषोऽवस्थेति** । 'गम्यते' इति शेषः । औपम्ये—गोशृङ्ग इत्युदाहरणम् । **नञो जर** । 'नञ्सुभ्या'मित्यस्यापवादः । जरणं जरः । 'ॠदोरप्' । मरणं मरः । अत एव निपातनादप् । मिदेस्त्रः । मित्रम् । **मृते** 'नपुंसके' इति भावे क्तः । सूत्रे तु शब्दपरत्वात्पुंस्त्वम् । **अमित्रेति** । अयं बहुव्रीहावनेन मध्योदात्तः, नञ्तत्पुरुषे अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः, अमेरित्रचि अन्तोदात्तोऽपि । त्रयोऽपि पुँल्लिङ्गाः, शत्रुवाचकाश्च । 'भृत्राऽमित्रवत्रमेष्वाः पुंसी'त्युक्तेः । न च तत्पुरुषे परवल्लिङ्गतापत्तिरिति वाच्यम्, लिङ्गानुशासनसूत्रे एकशेषेणाऽस्यादि निर्देशान्न दोष इत्याहुः । **हरदत्तस्तु** तत्पुरुषो नपुंसकमेव, आद्युदात्तश्चेत्याह । एवञ्च 'अश्नोतेराशुकर्मणी'त्युणादिसूत्रोक्तमनोरमादिरीत्या ईश्वरीशब्दवदमित्रशब्दोऽपि त्रिप्रकारः । **सोर्मनसी** । **अपवाद इति** ।

सुकर्माणः सुयुजः । स नो वक्षदनिमानः सुवक्ष्मा । शिवा पशुभ्यः सुमनाः सुवर्चाः सुपेशसस्करति । सोः किम्-कृतकर्मा । मनसी किम्-सुराजा । अलोमोषसी किम्-सुलोमा । सूषाः । कपि तु परत्वात् 'कपि पूर्वम्' (३१०७) इति भवति । सुकर्मकः । सुस्रोतस्कः । ३८५२ क्रत्वादयश्च । (६-२-११८) सोः परे आद्युदात्ताः स्युः । साम्राज्याय सुक्रतुः । सुप्रतीकः सुहव्यः । सुप्रतूर्तिमनेहसम् । ३८५३ आद्युदात्तं द्व्यच् छन्दसि । (६-२-११९) यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहावाद्युदात्तम् । अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरेणाश्वरथावाद्युदात्तौ । आद्युदात्तं किम्-या सुबाहुः । द्व्यच् किम्-सुगुरसत्सुहिरण्यः । हिरण्यशब्दस्त्र्यच् । ३८५४ वीरवीर्यौ च । (६-२-

मन् च अस् च मनसी । **सुकर्माण इत्यादि** । यद्यपि आद्युदात्तं 'द्व्यचश्छन्दसि' इत्यनेन सिद्धमिदं तथापि सुप्रथिमेत्यादि बह्वजर्थमच्छन्दोर्थं च सूत्रमिति बोध्यम् । सुप्रथिमेत्यत्र पृथोर्भाव इति पृथ्वादिभ्य इमनिच् । 'र ऋतो हलादेर्लघोः' इति रादेशः । **सुराजेति** राजशब्दः 'कनिन्युवृषि—' इति कनिन्प्रत्ययान्तः । लुनातेर्मनिन् लोम । उष दाहे । 'मिथुनेऽसि'रिति वर्तमाने उषः किन् । उषः । **कपि त्विति** । अस्यावकाशः सुकर्मा । 'कपि पूर्व'मित्यस्यावकाशः । अपवरकः । एवं स्थिते विप्रतिषेधः । **आद्युदात्तम्** । 'नञ्सुभ्याम्' इत्यस्यापवादः । 'अशूप्रुषिलटिकणिखटि' इति क्वन्तोऽश्वशब्दः—'हनिकुषिनीरमिकाशिभ्यः क्थन्' इति क्थन्नन्तो रथशब्दस्तमाह **नित्स्वरेणेति** । **सुबाहुरिति** । 'अर्जिदृशिकम्यमिपशिबाध' इति प्रत्ययस्वरेणान्तोदात्तः । **सुहिरण्य इति** । 'हर्यतेः कन्यन् हिर च' इति कन्यन्नन्तो हिरण्यशब्द आद्युदात्तस्त्र्यच् । **वीरवीर्यौ** । वीरविक्रान्तौ

एवमुत्तरसूत्रत्रयमपि तदपवाद एव । मन् च अस् च-मनसी । **सुकर्माण इति** । यद्यपि 'आद्युदात्तं द्व्यच्छन्दसी'त्यनेनैव सिद्धमिदन्तथापि 'अनिनस्मन्ग्रहणानी'ति न्यायेन सुप्रथिमेत्यादिबह्वजर्थमच्छन्दोऽर्थञ्चेदम् । 'सुषा'दित्यत्रापि स्वरे कर्त्तव्ये बहिरङ्गत्वात्पूर्वत्राऽसिद्धत्वाच्च षत्वस्याऽसिद्धत्वेनाऽसन्तत्वादयं स्वरो भवत्येव । यत्तु 'वस्वादिषु दत्वं सिद्ध'मिति तत्तु 'सौ दीर्घत्वे' इति वाक्यशेषाद्दीर्घविधावेव । 'सुलोमे'त्यादौ 'नञ्सुभ्या'मिति भवति । **क्रत्वादयश्च** । क्रतु, दृशीक, प्रतीक, प्रतूर्ति, हव्य, भव्य, भग-इति क्रत्वादयः । **आद्युदात्तं द्व्यच्** । **बहुव्रीहावाद्युदात्तमिति** । आद्युदात्तमेवेत्यर्थः । सोः किम् ? अरथः । **सुबाहुरिति** । कुप्रत्ययान्तो बाहुशब्दोऽन्तोदात्तः । **हिरण्यशब्द इति** । कन्यन्नन्तोऽयम् । **वीरवीर्यौ** ।

१२०) सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ। सुवीरेण रयिणा। सुवीर्यस्य गोमतः। वीर्यशब्दो यत्प्रत्ययान्तः। तत्र 'यतोऽनावः' (३७०१) इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम्। तत्र हि सति पूर्वेणैव सिद्धं स्यात्। **३८५५ कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे। (६-२-१२१)** उपकूलम्। उपतीरम्। उपतूलम्। उपमूलम्। उपशालम्। उपाक्षम्। सुषमम्। निःषमम्। तिष्ठद्गुप्रभृतिष्वेते। कूलादिग्रहणं किम्-उपकुम्भम्। अव्ययीभावे किम्-परमकूलम्। **३८५६ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ। (६-२-१२२)** द्विकंसः। द्विमन्थः। द्विशूर्पः। द्विपाय्यम्। द्विकाण्डम। द्विगौ किम्-परमकंसः। **३८५७ तत्पुरुषे शालायां नपुंसके।**

चुरादिस्तत्र पचाद्यचि वीरः। 'अचो यत्' वीरेषु साधुरिति वा यत्। वीर्यः। **तत्रेत्यादि**। कथं पुनरेतज्ज्ञापकमित्याह **तत्र हि सतीति**। **कूलतीर इति**। एतान्युत्तरपदान्याद्युदात्तानि स्युरव्ययीभावे। सुषममित्यादौ 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' इति षत्वम्। तस्यासिद्धत्वात्समशब्द एवायम्। **तिष्ठद्गुप्रभृतिष्वेत इति**। तेनाव्ययीभावसंज्ञा। **कंसमन्थ**। एतान्युत्तरपदानि द्विगावाद्युदात्तानि स्युः। **द्विकंस इति**। द्वाभ्यां कंसाभ्यां क्रीत इति तद्धितार्थे समासः। 'कंसाट्टिठन्' इति टिठन् तस्य 'अध्यर्धपूर्व-' इति लुक्। **द्विमन्था इति**। 'आर्हादगोपुच्छ-' इत्यादिना ठक्। शेषं पूर्ववत्। **द्विशूर्प इति**। 'शूर्पादञन्यतरस्याम्'। **द्विपाय्यमिति**। 'पाय्यसान्नाय्य-' इत्यादिना पाय्यशब्दः परिमाणवाची निपातितः। तत्र 'प्राग्वहतेष्ठक्' **द्विकाण्डमिति**। द्वे काण्डे प्रमाणमस्य 'प्रमाणे द्वयसच्-' इति मात्रच् 'प्रमाणे लो

वीरो रक्प्रत्ययान्तः। **आद्युदात्तत्वं नेति**। छन्दसि नेति ज्ञाप्यत इत्यर्थः। तेन भाषायां भवत्येव। तथा च छन्दसि वीर्यशब्दस्तित्स्वरेणान्तस्वरित इति भावः। 'बिल्वभक्ष्यवीर्याणि छन्दसी'ति फिट्सूत्रन्त्वस्यैवानुवादकमिति बोद्धयम्। **कूलतीर**। कूलादीन्युत्तरपदान्याद्युदात्तानि स्युः। **सुषममिति**। अधिसममित्यत्र तु न, प्रतिपदोक्ततिष्ठद्गुसमासघटकस्यैव ग्रहणादिति कश्चित्। उत्तरपदानीति किम्? भूमेः समत्वं समभूमिः। तिष्ठद्ग्वादिः। समासस्वरेणाऽन्तोदात्तः। अत्राऽक्षशब्दोऽकारान्त एव। प्रत्यक्षमित्यादौ टचश्चित्त्वादन्तोदात्तत्वमेवेति कश्चित्। **कंसमन्थ**। एतान्युत्तरपदानि द्विगावाद्युदात्तानीत्यर्थः। **द्विकंसादौ**। क्रमेण टिठन्-ठक्-अञ्-ठञाम् 'अध्यर्द्धे'ति लुक्। **पाय्यं** परिमाणविशेषः। **द्विकाण्डमिति**। अत्र 'प्रमाणे लो द्विगो'रिति मात्रचो लुक्। कंसादीनि किम्? पञ्चमूली। **तत्पुरुषे शाला**। 'आन्त्रिशाल'मित्यादौ 'छात्र्यादयः शालाया'मित्यतः परत्वादयमेव स्वरो

(६-२-१२३) शालाशब्दान्ते तत्पुरुषे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । तत्पुरुषे किम्-दृढशालं ब्राह्मणकुलम् । शालायां किम्-ब्राह्मणसेनम् । नपुंसके किम्-ब्राह्मणशाला । ३८५८ कन्था च । (६-२-१२४) तत्पुरुषे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तम् । सौशमिकन्थम् । आह्वरकन्थम् । नपुंसके किम्-दाक्षिकन्था । ३८५९ आदिश्चिहणादीनाम् । (६-२-१२५) कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । मन्दुरकन्थम् । आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् । ३८६० चेलखेटकटुककाण्डं गर्हायाम् । (६-२-१२६) चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा व्याघ्रादित्वात्समासः । गर्हायां किम्-परमचेलम् । ३८६१ चीरमुपमानम् । (६-२-१२७) वस्त्रं चीरमिव वस्त्रचीरम् ।

द्विगोर्नित्यम्' इति लुक् । ब्राह्मणशालमिति । 'विभाषा सेनासुराच्छाया-' इति नपुंसकता । दृढशालमिति । बहुव्रीहिरयं तत्र पूर्वपदप्रकृतिस्वर एव भवति पूर्वपदं च निष्ठान्तत्वादन्तोदात्तम् । ननु चात्र लक्षणप्रतिपदोक्तपरिभाषयैव न भविष्यति । सत्यम् । उत्तरार्थमावश्यकं तत्पुरुषग्रहणमिहैव क्रियते परिभाषाऽनाश्रयणाय । सौशमिकन्थमिति । शोभनः शमोऽस्य सुशमस्तस्यापत्यं सौशमिस्तस्य कन्था सौशमिकन्थम् । 'संज्ञायां कन्थोशीनरेषु' इति नपुंसकत्वम् । आह्वरकन्थमिति । आङ्पूर्वाद् ह्वयतेः 'आतश्चोपसर्गे' इति कः । आदिश्चिहणादीनाम् । चिनोतेः क्विप् । चित् । हन्तेः पचाद्यच् हनः । चिहण इति निपातनात्तलोपो णत्वं च । मल मल्ल धारणे आभ्यां रः निपातनाल्लस्य दत्वम् । मन्दरः आदिरिति वर्तमान इति पूर्वत्र ह्यादिग्रहणमुत्तरपदाभिसंबद्धम् । इह तु चिहणादीनां पूर्वपदानामाद्युदात्तत्वमिष्यते तदर्थं पुनरादिग्रहणं कर्तव्यम् । पुत्रचेलमिति । चेलं वस्त्रं तद्वत्तुच्छमित्यर्थः । नगरखेटमिति । खेटमिति तृणनाम तद्वद्दुर्बलम् । दधिकटुकमिति । कटु गतस्वादु तद्वत् गतस्वादु । प्रजाकाण्डमिति । काण्डमिति शरनाम । स यथा सत्वरपीडाकरः एवंभूतम् । व्याघ्रादिभिरिति समासः । चीर । उपमानवाचिचीर-

---

भवति । दृढशालमिति । 'विभाषा सेने'ति प्रतिपदोक्तनपुंसकत्वग्रहणादेवाऽस्य व्यावृत्तौ तत्पुरुषग्रहणमुत्तरार्थमिति हरदत्तः । सौशमिकन्थमिति । 'सञ्ज्ञायां कन्थे'ति क्लीबत्वम् । चिहणकन्थमिति । चिहणस्य कन्थेति तत्पुरुषः । चिहण, मडर, मड्डर, वैतुल, पटत्क, वैडालिकर्णि, वैडालिकर्णि, कुक्कुट, चिक्कण, चित्कण । पुत्रचेलमिति । चेलवत्तुच्छ इत्यर्थः । खेटं-तृणम् । कटुकम्-अस्वादु ।

कम्बलचीरम्। उपमानं किम्-परमचीरम्। ३८६२ पललसूपशाकं मिश्रे। (६-२-१२८) घृतपललम्। घृतसूपः। घृतशाकम्। 'भक्ष्येण मिश्रीकरणम्'। (६३७) इति समासः। मिश्रे किम्-परमपललम्। ३८६३ कूलसूदस्थलकर्षाः संज्ञायाम्। (६-२-१२९) आद्युदात्तास्तत्पुरुषे। दाक्षिकूलम्। शाण्डिसूदम्। दाण्डायनस्थलम्। दाक्षिकर्षः। ग्रामसंज्ञा एताः। संज्ञायां किम्-परमकूलम्। ३८६४ अकर्मधारये राज्यम्। (६-२-१३०) कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम्। ब्राह्मणराज्यम्। अकेति किम्-परमराज्यम्। * चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन। कुचेलम्। कुराज्यम्। ३८६५ वर्ग्यादयश्च। (६-२-१३१) अर्जुनवर्ग्यः। वासुदेवपक्ष्यः। अकर्मधारय इत्येव। परमवर्ग्यः। वर्गादिर्दिगाद्यन्तर्गणः। ३८६६ पुत्रः पुम्भ्यः। (६-२-१३२) पुम्शब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे। दाशकिपुत्रः। माहिषपुत्रः। पुत्रः किम्-कौनटिमातुलः। पुम्भ्यः किम्-दाक्षीपुत्रः। ३८६७ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः। (६-२-१३३) एभ्यः पुत्रो नाद्युदात्तः। आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च

शब्द उत्तरपदमाद्युदात्त स्यात्तत्पुरुषे। वस्त्रचीरमिति। पूर्ववद्व्याघ्रादिसमासः। पललसूप। पललादीन्युत्तरपदान्याद्युदात्तानि स्युर्मिश्रे तत्पुरुषे। घृतपललमित्यादि। घृतेन मिश्रं पललमिति विग्रहः। पललं मांसम्। 'पललं क्रव्यमामिषम्' इत्यमरः। कूलसूद। एतान्युत्तरपदान्याद्युदात्तानि स्युः संज्ञायाम्। दाण्डायनस्थलीति। 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति स्थलीशब्दो गृह्यते। 'जानपदकुण्ड-' इत्यनेन ङीप्। चेलराज्यादिस्वरादिति। आदिशब्देन वर्ग्यादिस्वरपरिग्रहः। चेलराज्यादिस्वरस्यावकाशो भार्याचेलं ब्राह्मणराज्यम्। 'तत्पुरुषे तुल्यार्थ-' इत्यादिना विहितस्याव्ययस्वरस्यावकाशो निष्कौशाम्बिः। कुचेलं कुराज्यमित्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः। वर्ग्या। वर्ग्यादीन्युत्तरपदान्याद्युदात्तानि स्युः। कर्मधारये तत्पुरुषे ये दिगादिषु वर्गादयः पठ्यन्ते त एवेह यत्प्रत्ययान्ता वर्ग्यादयो गृह्यन्ते वर्गादिपाठाभावात्तदाह वर्गादिर्दिगाद्यन्तर्गण इति। कौनटिमातुल इति। कुनटस्यापत्यं कौनटिः तस्य मातुलः। आख्याग्रहणादिति। आख्या-

---

काण्डं-शरः। पललसूप। मिश्रे समासार्थे इत्यर्थः। दाण्डायनस्थलमिति। लिङ्गविशिष्टपरिभाषया दाण्डायनस्थलीत्यत्रापि। राज्यशब्दो यगन्तोऽन्तोदात्तः। अव्ययस्वर इति। अव्ययपूर्वपदप्रकृतिस्वर इत्यर्थः। वर्ग्यादिरिति। त एव यत्प्रत्ययान्ता इह वर्ग्यादयः, वर्ग्यादिपाठाऽभावात्। पुत्रः पुम्भ्यः। निषेधकोत्तर-

प्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुः पुत्रः । संयुक्ताः संबन्धिनः । श्यालपुत्रः । ज्ञातयो मातापितृसंबन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । ३८६८ **चूर्णादीन्यप्राणिषष्ठ्याः ।** (६-२-१३४) प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । अप्रेति किम्-मत्स्यचूर्णम् । ३८६९ **षट् च काण्डादीनि ।** (६-२-१३५) अप्राणिषष्ठ्या आद्युदात्तानि । दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । षट् किम्-राजसूदः । अप्रेति किम्-दत्तकाण्डम् । ३८७० **कुण्डं वनम् ।** (६-२-१३६) कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे । दर्भकुण्डम् । कुण्डशब्दोऽत्र सादृश्ये । वने किम्-मृत्कुण्डम् । ३८७१ **प्रकृत्या**

प्रहणमाचार्यादिभिः प्रत्येकं संबध्यते । **होतुः पुत्र इति ।** 'ऋतो विद्यायोनिसंबन्धेभ्यः' इति षष्ठ्या अलुक् । **भ्रातुष्पुत्र इति ।** कस्कादिपाठात्षत्वम् । **वर्णेति ।** वर्ण चूर्ण संकोचे चुरादिश्च । **षट् च ।** अप्राणिभ्यः परा या षष्ठी तदन्तात्पराणि षट् काण्डादीन्याद्युदात्तानि स्युः । चेल खेट कटुक काण्डमिति काण्डशब्दादारभ्य कूल सूद स्थल कर्षाः संज्ञायामिति । कूलान्तानि, काण्ड चीर पलल सूप शाक कूल एतानि काण्डादीनि, तत्र काण्डं गर्हायामित्युक्तमगर्हायामपि भवतीति । 'चीरमुपमानम्' इत्युक्तमनुपमानेऽपि भवति 'पललसूपशाकं मिश्रे' इत्युक्तममिश्रेऽपि भवति कूलं संज्ञायामित्युक्तमसंज्ञायामपि भवति । **अप्रेति किमिति ।** अप्राणिषष्ठ्या इति किमर्थमित्यर्थः । **मृत्कुण्डमिति ।** मृद्भाजनविशेष इत्यर्थः । **प्रकृत्या ।** भगालमित्यर्थ-

---

सूत्रादेव पुंल्लिङ्गशब्दलाभे सिद्धे बहुवचनं स्वष्टार्थम् । **तद्विशेषाणाञ्चेति ।** चात्स्वरूपस्यापि । **सम्बन्धिन इति ।** स्त्रीसम्बन्धिनः श्यालादय इत्यर्थः । **भ्रातुःपुत्र इति ।** 'ऋतो विद्यायोनी'ति षष्ठ्या अलुक् । **'भ्रातृपुत्र'** इति तु क्वाचित्कोऽपपाठः । एवं **होतुःपुत्रे**ऽपि । एषु पुत्रस्वरप्रतिषेधे समासान्तोदात्तत्वम् । **चूर्णादीन्य ।** चूर्ण, करिव, करिष, शाकिन, शाकट, द्राक्षा, तूस्त, कुन्दुम, दलप, चमसी, चक्कन, चोल इति **चूर्णादिः । षट्च काण्डा ।** काण्डस्याऽगर्हार्थश्चीरस्याऽनुपमानार्थम्, पललसूपशाकानाममिश्रार्थम्, कूलस्याऽसंज्ञार्थम् । 'चेलखेटे'ति सूत्रस्थकाण्डशब्दमादाय 'कूलसूदे'ति सूत्रस्थकूलपर्यन्ताः षट्काण्डादयः । **कुण्डशब्दोऽत्रेति ।** सादृश्येन वने वर्तते इत्यर्थः । भाजनविशेषवाचिनः कुण्डशब्दस्य विना सादृश्येन वने वृत्त्यसम्भवादित्याशयः । वनशब्दश्च समूहवाची, प्रसिद्धत्वात् । नोदकवाची । अन्ये तु समूहरूपवनेऽपि मुख्य एव कुण्डशब्दः, पूर्वमते सादृश्यस्य

भगालम्। (६-२-१३७) भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम्। कुम्भीपालम्। मध्योदात्ता एते। प्रकृत्येत्यधिकृतम्। 'अन्तः' (३८७७) इति यावत्। ३८७२ **शितेर्नित्याऽबह्वज्बहुव्रीहावभसत्।** (६-२-१३८) शितेः परं नित्याबह्वच्कं प्रकृत्या। शितिपादः। शित्यंसः। पादशब्दो वृषादित्वादाद्युदात्तः। अंसशब्दः प्रत्ययस्य नित्त्वात्। शितेः किम्—दर्शनीयपादः। अभसत्किम्—शितिभसत्। शितिराद्युदात्तः। पूर्वपदप्रकृतिस्वरापवादोऽयं योगः। ३८७३ **गतिकारकोपपदात्कृत्।** (६-२-१३९) एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे। प्रकारकः। प्रहरणम्। शोणा धृष्णू नृवाहसा। इध्मप्रव्रश्चनः। उपपदात्। उच्चैःकारम्। ईषत्करः। गतीति किम्—

ग्रहणं तदाह **भगालवाचीति**। अत्र व्याख्यानमेव शरणम्। **मध्योदात्ता एते इति**। 'लघावन्ते द्वयोश्च' इति सूत्रात्। **शितेः**। शितेः परं नित्याबह्वच्कं भसत्शब्दवर्जितं बहुव्रीहौ प्रकृतिस्वरं स्यात्। **अंसशब्द इति**। अमेः सन् अंसः। **दर्शनीयपाद इति**। 'बहुव्रीहौ प्रकृत्या' इति पूर्वपदप्रकृतिस्वरः। दर्शनीयशब्दोऽनीयर्प्रत्ययान्तः। 'उपोत्तमं रिति' इत्युपोत्तमोदात्तः। **शितिराद्युदात्त इति**। 'वर्णानां तणतिनितान्तानाम्' इति सूत्रेण। **गतिका**। 'शितेर्नित्याबह्व्' इत्यतो बहुव्रीहिग्रहणं नानुवर्ततेऽस्वरितत्वात्। किं तु 'तत्पुरुषे शालायाम्' इत्यतो व्यवहितमपि तत्पुरुषग्रहणमनुवर्तते। तदाह **तत्पुरुषे इति**। **प्रकारक इति**।

दुरुपपादत्वात्। वनविशेषणेन च भाजनवाचिनः, 'दुर्गाकुण्ड'मित्यादौ विशिष्टाधारजलवाचिनश्च प्रसिद्धस्य निवृत्तिरित्याहुः। उक्तञ्च 'कुण्डाद्युदात्तत्वे तत्समुदायग्रहण'मिति। अत्र भाष्ये तच्छब्देन पूर्वपदार्थः। अपरे तु **तत्समुदाये**त्यस्य वनसमुदायेत्यर्थः। तेन दर्भवनसमुदायो दर्भकुण्डशब्देनोच्यत इत्याहुः। **मृत्कुण्डमिति**। मृद्भाजनविशेष इत्यर्थः। **भगालवाचीति**। अत्र च व्याख्यानमेव शरणम्। **मध्योदात्ता इति**। 'लघावन्ते—' इत्यनेनेति भावः। **शितेर्नित्या**। शितेः परं भसच्छब्दभिन्नं यन्नित्यमबह्वच् उत्तरपदन्तद्बहुव्रीहौ प्रकृतिस्वरमित्यर्थः। **दर्शनीयपाद इति**। दर्शनीयशब्दो ['उपोत्तमं]रिती'त्युपोत्तमोदात्तः। नित्याऽबह्वच्किम्? शितिललाटः। नित्येति किम्? शितिककुत्। 'ककुदस्यावस्थायां लोपः', अन्यत्र शितिककुद इत्येवेति नायं नित्याऽबह्वच्कः। **गतिकारकोप**। इह 'शितेर्नित्याऽबह्वज्बहुव्रीहावभस'दिति पूर्वसूत्रस्थबहुव्रीहिग्रहणं नानुवर्तते, अस्वरितत्वात्। किं तु व्यवहितमपि 'तत्पुरुषे शालायां नपुंसके' इति सूत्रस्थन्तत्पुरुषग्रहणमनुवर्तते। तदाह **तत्पुरुषे इति**। **प्रकारक इति**। 'कुगती'ति समासः। तिःस्वरेणोत्तरपद-

देवस्य कारकः। शेषलक्षणा षष्ठी। कृद्ग्रहणं स्पष्टार्थम्। प्रपचतितरामित्यत्र

'कुगति–' इति समासः। लित्स्वरेण पूर्वप्रत्ययादुदात्तम्। **नृवाहसेति**। नॄन्वहतीति विग्रहः। 'वसणित्' इत्यतो णिदित्यनुवृत्तेऽसुनो णित्वादुपधावृद्धिः। नित्स्वरेणोत्तरपदमाद्युदात्तम्। **इध्मप्रव्रश्चन इति**। प्रवृश्च्यते येनेति करणे ल्युट्। कर्मषष्ठ्यन्तेन इध्मशब्देन समासः। अत्र गतिप्रयुक्ते कृत्स्वरे कृते कारकप्रयुक्तः कृत्स्वरः। **उच्चैःकारमिति**। 'अव्यये यथाभिप्रेत–' इति णमुल्। तत्र हि उच्चैरित्युपपदम्। **ईषत्कार इति**। 'ईषद्दुःसुषु कृच्छ्रा–' इति खल्। उभयथापि लित्स्वरः। **शेषलक्षणा षष्ठीति**। न कर्मलक्षणा। तथा सति कारकमेव देवदत्तः स्यात्। 'तृजकाभ्यां कर्तरि' इति समासप्रतिषेधश्च स्यात्। अत्र कृद्ग्रहणं किमर्थम्। निर्गतः कौशाम्ब्या निष्कौशाम्बिरित्यत्र मा भूत्। नैतदस्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा भवन्ति। नच कौशाम्बीशब्दं प्रति क्रियायोगः, कारकं च क्रियायामेव संभवति। उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते। तदेवं गत्यादिभिरपि क्रियावाच्युत्तरपदमाक्षिप्यते, धातोश्च क्रियावाचित्वम्, तस्माच्च द्वये प्रत्ययाः कृतस्तिङश्च। तत्र तिङन्तेन समासाभावात्कृदन्तमेव संभवति। अनुव्यचलदित्यत्र तु न गतित्वनिबन्धनः समासः, किं तर्हि सुबन्तेन योगविभागात्समासः तस्मान्नार्थः कृद्ग्रहणेनेत्यत आह **कृद्ग्रहणं स्पष्टार्थमिति**। य एवं प्रतिवक्तुमसमर्थस्तं प्रति विस्पष्टार्थं क्रियत इत्यर्थः। ननु विस्पष्टार्थमपि क्रियमाणे कृद्ग्रहणे आमन्ते न प्राप्नोति प्रपचतितरामिति। ततश्च समासस्वरं बाधित्वाऽव्ययस्वर एव स्यादत आह **प्रपचतितरामित्यादि**। इत्येक इत्यस्य कृद्ग्रहणं विस्पष्टार्थमित्यादिना कृत्स्नेन संबन्धः। तदयमर्थः–कृद्ग्रहणं विस्पष्टार्थम्। आमन्ते च

माद्युदात्तम्। **नृवाहसेति**। नॄन्वहत इति विग्रहः। 'वहिधा' इत्यादिना असुन्, 'वसोर्णि'दिति सूत्राण्णिदित्यनुवृत्तेरसुनो णित्वादुपधावृद्धिः। नित्स्वरेणोत्तरपदमाद्युदात्तम्। **इध्मप्रव्रश्चन इति**। करणे ल्युट्, कर्मषष्ठ्या समासः। प्रव्रश्चने गतिप्रयुक्ते कृत्स्वरे कृते, इध्मशब्देन समासे कारकप्रयुक्तः कृत्स्वरः। व्रश्चनो लित्स्वरेणाद्युदात्तः। **उच्चैःकारमिति**। णमुल्विधावुच्चैरित्युपपदम्। **ईषत्कर इति**। 'ईषद्दुःसुषु–' इति खल्। **शेषे षष्ठीति**। तदन्तेन समासः कार्य इत्यर्थः। इदं गत्यंशे अव्ययपूर्वपदप्रकृतिस्वरस्य बाधकम्। कृद्ग्रहणप्रत्याख्याने 'अन्वविन्दते'त्यादौ परत्वात् 'तिङि चे'ति निघाते कृते यद्यपीदं सावकाशम्, तथाऽपि परत्वाद्बाधकं बोध्यम्। कारकोपपदांऽशे तु समासान्तोदात्तत्वापवादः। **कृद्ग्रहणं स्पष्टार्थमिति**। क्रियायोगे गतिसञ्ज्ञाविधानात्, क्रियानिरूपितस्यैव कारकत्वाच्च, धात्व-

तरबाद्यन्तेन समासे कृते आम्। तत्र सतिशिष्टत्वादाम्स्वरो भवतीत्येके। प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये। ३८७४ **उभे वनस्पत्यादिषु युगपत्।**

दोषाभाव इति केचिदाचार्या व्याचक्षते इति। **प्रपचतिदेश्यार्थं त्विति।** आदिशब्देन प्रपचतिकल्पं प्रपचतिदेशीयः प्रपचतिरूपमित्येतेषां त्रयाणां ग्रहणम्। प्रपचतिदेश्यादौ अर्थः प्रयोजनं यस्य तत्तथोक्तम्। अयमभिप्रायः—न विस्पष्टार्थं कृद्ग्रहणम्, अपि तु प्रपचतिदेश्यादौ यत्र सति शिष्टं स्वरान्तरं नास्ति तत्रापि स्वरो मा भूत्तदव्ययपूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं सप्रयोजनमाहुः। अत्र हरदत्तः—इदं तु वक्तव्यम्। प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चादाम् भवन्प्रत्ययग्रहण-परिभाषया पचतितरस्यैव घान्तत्वात्तत एव स्यात्। तत्र को दोषः। सोपसर्गस्य घान्त-स्यैकपद्याभावादाम्। प्रपचतितरां देवदत्तेत्यादावाम एकान्तरमामन्त्रितमनन्तिक इत्येष विधिर्न स्यात् शेषनिघातश्च प्रशब्दस्य न स्याद्भिन्नपदत्वात्। तस्मात्प्रशब्दस्यामन्तेन समासोऽङ्गीकर्तव्यो न तरबन्तेन। तत्र समासत्वात्समुदायस्य प्रातिपदिकत्वे विभक्त्या-वैकपद्यं भवति, स्वरे तु दोषप्रसङ्गात्कृद्ग्रहणमपि वक्तव्यमिति भाष्ये स्थितम्। प्रपच-तिदेश्यादौ का गतिरिति न विद्मः। **उभे। वनस्पतिमिति।** वनशब्दो 'नब्-

---

धिकारं सप्तमीनिर्दिष्टस्यैवोपपदत्वाच्च केवलधातोः प्रयोगाऽभावाच्च कृदन्तक्रियापदाक्षेपे सिद्धे इत्यर्थः। तथा च वार्तिकं-'गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यमन्यस्यो-त्तरपदस्याऽभावा'दिति। न च 'यत्क्रियायुक्ताः प्रादयः' इत्यत्र यस्य क्रियेति षष्ठीसमासे यस्य धातोर्वाच्या क्रियेत्यर्थात्तं प्रतीति वाक्यशेषेऽपि तच्छब्देन धातोरेव ग्रहणे, प्रत्यासत्त्या तस्यैवोत्तरपदत्वे प्रणीरित्यादावेव स्वरः स्यात्, न तु प्रणायक इत्यादा-विति कृन्मात्रसङ्ग्रहाय तदिति वाच्यम्, 'यत्क्रिये'त्यत्र कर्मधारयस्यैव स्वीकारेण 'तं प्रती'त्यत्र वाक्यशेषे निरूपितरीत्या तस्या एव परामर्शेन क्रियारूपमर्थं प्रत्येव गति-त्वात्। तत्र गतिकारकोपपदेषु सर्वत्र विशेष्यभूतक्रियाया वाचकमुत्तरपदं न सम्भव-तीति सामर्थ्यात्साधनादिविशेषणक्रियावाचकमुत्तरपदं गृह्यते इति सर्वत्रेष्टसिद्धिः। न च प्रभवनमित्यादौ केवलक्रियावाच्युत्तरपदसत्त्वेन सामर्थ्यं दुरुपपादम्, लिङ्गाद्यनन्वयि-साध्यरूपार्थस्यैव क्रियाशब्देन ग्रहणात्। पदमत्र शक्तमेव, न परिभाषितम्। तेन कृता सुबुत्पत्तेः प्राक् समासेऽपि न क्षतिः। एवञ्च प्रशब्दस्य पचतितरामित्याद्यामन्तेन समासेऽयं स्वरो भवत्येवेति भाष्ये स्पष्टं सूक्ष्मधियाम्। **एके इति।** अत्राऽरुचिबी-जन्तु तथासति प्रपचतितरशब्दस्य घान्तत्वाऽभावात्तत आनभावे एकदेशादामि तदन्तत्वेन पचतितरामित्यस्यैव प्रातिपदिकत्वे, तत एव सुपि तदन्तस्यैकपदत्वाऽभावाद्-प्रशब्दस्वरः पृथक् श्रूयेत। किंचाऽऽम्प्रपचतितरां देवदत्तेत्यत्र 'आम एकान्तरमा-

(६-२-१४०) एषु पूर्वोत्तरपदे युगपत्प्रकृत्या । वनस्पतिं वन आ । बृहस्पतिं यः । बृहच्छब्दोऽत्राद्युदात्तो निपात्यते । हर्षया शचीपतिम् । शार्ङ्गरवादित्वादा-

---

विषयस्यानसन्तस्य' इत्याद्युदात्तः । पतिशब्दोऽपि 'पातेर्डतिः' इति डतिप्रत्ययान्तः प्रत्ययस्वरेण । पारस्करादित्वात्सुट् । **बृहस्पतिमिति** । 'वर्तमाने पृषन्महत्–' इति अतिप्रत्ययान्तत्वादन्तोदात्तोऽप्यत्राद्युदात्तो निपात्यते । 'तद्बृहतोः करपत्योः–' इति सुट्तलोपौ । **शार्ङ्गरवादित्वादाद्युदात्त इति** । शार्ङ्गरवादित्वादित्वात् ङीनि

मन्त्रित'मिति निषेधो न स्यात् , तस्मादामन्त्रेणैव समासः, तत्र भाष्यप्रामाण्यादयं स्वरो भवत्येव । एवं प्रपचतिदेश्यादावपि । अत्र च नोपपदसमासोऽतिङित्युक्तेः, किंतु 'उदात्तवते'ति वार्तिकेन । तत्र **तिङ्न्त्यस्य** तिङ्घटितेनेत्यर्थः । तदुदाहरणानाम भाष्ये—सहेति योगविभागेनापि साधनात्तत्पुरुषत्वतदभावौ । वैकल्पिकत्वञ्च लक्ष्यानुसारेणेति न 'तिङि चोदात्तवती'ति सूत्रस्थभाष्यविरोधः । **अन्य इति** । अत्रापि भाष्यविरोध एवाऽरुचिबीजम् । तिङन्तसमासेष्वप्ययं स्वरो भवत्येव । यथा-'यो जातः पर्यभूष'दित्यादौ । 'नित्यं क्रीडे'त्यत्र नित्यमिति योगं विभज्य लक्ष्यानुरोधेन क्वचित्पुरुषत्वाङ्गीकारात् । अत एवोदात्तवतेरस्य भाष्ये द्विःपाठः । अत्र यच्छब्दयोगात्तिङन्तस्याऽनिघातः । 'उदात्तवता गतिमता चे'ति तिङन्तस्य गतिसमासः । अव्ययपूर्वपदप्रकृतिस्वरं बाधित्वोत्तरपदप्रकृतिस्वरेणाऽद्स्वरः शिष्यते । यत्र तु तिङन्तोत्तरपदकेऽन्तोदात्तत्वमिष्यते यथा 'यत्रा नरो देवयन्तो युगानि वितन्वते' इत्यादौ, तत्र त्रिचक्रादित्वात्कल्प्यम । अत्यायाहीत्यादौ तु यच्छब्दयोगाऽभावात् 'तिङ्ङतिङ' इति निघाते प्राप्ते 'सहे'ति योगविभागात्समासः । उत्तरपदस्योदात्तशून्यत्वात् , गतिशून्यत्वाच्च गतिप्रयुक्तसमासाऽभावात्तत्पुरुषत्वाऽभावेन नाऽयं स्वरः । उदात्तस्वरितयोगिन एव प्रकृतिभावविधानादस्य तच्छून्यतयाऽपि नाऽयं स्वरः । एवञ्चाऽव्ययपूर्वपदप्रकृतिस्वरेणाऽऽद्युदात्तः । ततोऽतिशब्देन गतिसमासे अनेनोत्तरपदप्रकृतिस्वरे आङ्स्वर एव शिष्यते इति दिक् । **परे तु** कृद्ग्रहणाऽभावे प्रभवनमित्यादौ क्रियाया विशेष्यत्वात्तत्रैव स्यान्न तु प्रणीरित्यादाविति कृद्ग्रहणं कर्तव्यम् । तदुक्तं भाष्ये–'अधिकार्थं कृद्ग्रहणं कर्तव्य'मिति । 'प्रपचतितरा'मित्यादौ त्वव्ययपूर्वपदप्रकृतिस्वरात्परत्वेन 'तिङि चोदात्तवती'त्यस्य प्रवृत्तावेतत्प्रवृत्तौ न फलम् । एतत्प्रवृत्त्यापि तत्राऽन्तोदात्तमेव लभ्यते । 'तिङि चोदात्तवती'ति सूत्रे एतदर्थमेव भाष्ये तिङ्ग्रहणं प्रत्याख्यातम् । अतिप्रसङ्गस्तु प्राग्वदेव परिहार्यः । अत एवाऽत्र सूत्रे 'तस्मात्कृद्ग्रहणं न कर्तव्य'मिति नोक्तमित्याहुः । **वनस्पतिमिति** । वनशब्दो नब्विषयत्वादाद्युदात्तः, पतिशब्दश्च प्रत्ययस्वरेण तथा । **निपात्यत इति** । अन्यथा अतिप्रत्ययान्तत्वादन्तो-

युदात्तः शचीशब्दः। शचीभिर्न इति दर्शनात्। तनूनपादुच्यते। नराशंसं वाजिनम्। निपातनाद्दीर्घः। शुनःशेपम्। ३८७५ **देवताद्वन्द्वे च।** (६-२-१४१) उभे युगपत्प्रकृत्या स्तः। आ य इन्द्रावरुणौ। इन्द्राबृहस्पती वयम्। देवता किम्-प्लक्षन्यग्रोधौ। द्वन्द्वे किम्-अग्निष्टोमः। ३८७६ **नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु।** (६-२-१४२) पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न। इन्द्राग्निभ्यां कं वृषणः। अपृथिवीत्यादौ

कृते नित्वादाद्युदात्तत्वमित्यर्थः। **शचीपतिरिति।** एते षष्ठीसमासाः। **तनूनपादिति।** 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' इति ऊप्रत्ययान्तत्वादन्तोदात्तोऽपि तनूशब्दोऽत्राद्युदात्तः। न पातयतीति नपात्। 'नभ्राण्नपान्नवेदा-' इति सूत्रे आद्युदात्तो नपाच्छब्दो निपात्यते। तन्वाः नपादिति विग्रहः। **नराशंसमिति।** नरा एनं शंसन्तीत्यर्थः। नॄ नये 'ऋदोरप्' शंसेः कर्मणि घञ् द्वावप्याद्युदात्तौ। 'अन्येषामपि-' इति दीर्घः। **शुनःशेपमिति।** शुन इव शेपोऽस्येति बहुव्रीहिः। 'शेपपुच्छलाङ्गूलेषु शुनः' (संज्ञायाम्) इत्यलुक् षष्ठ्याः। श्वन्शब्दः प्रातिपदिकस्वरेण शेपशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तौ। **इन्द्रावरुणाविति।** इन्द्रशब्दः 'ऋज्रेन्द्राग्र-' इति रगन्तः, वरुणशब्दः 'कॄवृदारिभ्य उनन्' इत्युननन्तः। उभौ आद्युदात्तौ। 'देवताद्वन्द्वे च-' इति पूर्वपदस्यानङ्। **इन्द्राबृहस्पती इति।** बृहस्पतिशब्दे वानस्पत्यादित्वाद् द्वावाद्युदात्तौ, तेनेन्द्राबृहस्पती इत्यत्र त्रय आद्युदात्ताः। **अग्निष्टोम इति।** 'अग्नेः स्तुत्स्तोमसोमाः' इति षत्वम्। **इन्द्राग्निभ्या-**

दात्तः स्यादिति भावः। एवमूप्रत्ययान्ततनूशब्दोऽप्याद्युदात्तो निपात्यते, नपाच्छब्दोऽपि 'नभ्रा'डिति सूत्रे आद्युदात्तो निपात्यते। वनस्पत्यादयः षष्ठीतत्पुरुषाः। तनूनपादित्यत्र तन्वाः नपादिति विग्रहः। **नराशंसमिति।** नरशंसशब्दावब्घञन्तत्वादाद्युदात्तौ। नरा एनं शंसन्ति स नराशंसः। **निपातनादिति।** 'अन्येषामपी'ति दीर्घ इत्यन्ये। **शुनःशेप इति।** श्वन्-शेपशब्दौ प्रातिपदिकस्वरनिपातनस्वरान्यतरस्वाङ्गस्वराभ्यामन्तोदात्ताद्युदात्तौ। शण्डामर्कौ। घञन्तत्वादाद्युदात्तौ। द्वन्द्वः। 'अन्येषामपी'ति दीर्घः। तृष्णावरूत्री। तृष्णाशब्दो 'निष्ठा च द्व्य'जित्याद्युदात्तः। 'प्रसितस्कभिते'त्यत्र वरूत्रीशब्द आद्युदात्तो निपात्यते। बभ्रा-विश्ववयसौ अन्तोदात्तौ। मर्मृत्युः-अन्तोदात्तः। वृत्॥ **इन्द्रावरुणाविति।** इन्द्रो रनन्त आद्युदात्तः। वरुणशब्दोऽप्युनन्तत्वात्तथैव। **नोत्तरपद।** **इन्द्राग्निभ्यामिति।** अग्नि-

किम्-द्यावापृथिवी जनयन्। आद्युदात्तो द्यावा निपात्यते। पृथिवीत्यन्तोदात्तः। सोमारुद्रौ। 'रोदेर्णिलुक्च' इति रगन्तो रुद्रशब्दः। इन्द्रापूषणौ। 'श्वन्नुक्षन्पूषन्' इति पूषा अन्तोदात्तो निपात्यते। शुक्रामन्थिनौ। मन्थिन्शब्दस्त्वादन्तोदात्तः। उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्याद् द्वन्द्वविशेषणं मा भूत्। अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम्। ३८७७ अन्तः। (६-२-१४३) अधिकारोऽयम्। ३८७८ थाऽथघञ्क्ताजबित्रकाणाम्। (६-२-१४४) थ अथ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः। प्रभृथस्यायोः। आवसथः। घञ्। प्रभेदः। क्तः। धर्ता वज्री पुरुष्टुतः। पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः। अच्।

मिति। अग्निशब्दः 'अङ्गेर्निर्नलोपश्च–' इति निप्रत्ययान्तोदात्तः। **पृथिवीत्यन्तोदात्त इति**। ङीप्प्रत्ययान्तत्वात्। **सोमारुद्राविति**। 'अर्तिस्तुसुहुसृधृक्षि' तिमन्नन्तत्वादाद्युदात्तः सोमशब्दः। **उत्तरपदग्रहणमित्यादि**। अन्यथास्मिन् प्रकरणे द्वन्द्वः सप्तम्या निर्दिष्टः नोत्तरपदं तत्रानुदात्तादाविति सप्तम्यन्तं द्वन्द्वस्य विशेषणं स्यात्। ततश्चन्द्रासूर्यावित्यादौ प्रतिषेधः स्यात्। चन्द्रशब्दो रगन्तत्वादन्तोदात्तः। सूर्यशब्दः 'राजसूयसूर्य–' इति यदन्तत्वाद् 'यतोऽनावः' इत्याद्युदात्तः। उत्तरपदग्रहणे तस्यैव श्रुतस्यानुदात्तादावित्येतद्विशेषणं भवति। **अनुदात्तादाविति। विधिप्रतिषेधयोरित्यादि**। अन्यथा विधिप्रतिषेधयोः समानविषयत्वाद्विकल्पः प्रसज्येत। इह पृथिव्यादिप्रतिषेधो ज्ञापयति स्वरविधौ व्यञ्जनमविद्यमानवदिति। तेन 'अग्निमीळे–' इत्यादौ स्वरितः सिध्यति। **थाऽथ। प्रभृथस्येति**। 'हनिकुषिनिरमिकाशिभ्यः क्थन्' 'अवे भृञः' इति क्थन् नित्स्वरेणाद्युदात्तत्वे प्राप्ते **आवसथ इति**।

शब्दोऽन्तोदात्तः। **सोमारुद्राविति**। सोम आद्युदात्तो, मनन्तत्वात्, रुद्रो रगन्तत्वादन्तोदात्तः। **'रुद्रसोमा'**विति क्वचित्कोऽपपाठः। **शुक्रामन्थिनाविति**। शुक्रो रगन्तत्वात्, मन्थिन्मत्वर्थीयेनिनाऽन्तोदात्तः। **मा भूदिति**। तथा सति 'सूर्याचन्द्रमसौ' इत्यादाविदं न स्यात्। सूर्यशब्दो यदन्तत्वादाद्युदात्तः, चन्द्रमस्शब्दो दासीभारादित्वान्मध्योदात्तः। **विषयविभागार्थमिति**। न च पृथिव्यादयो विधेर्विषयोऽन्यत्र प्रतिषेध इति विषयविभागः सिद्ध इति वाच्यम्, पूर्वसूत्रे पृथिव्यादिग्रहणेन सिद्धे एतत्सूत्रवैयर्थ्यापत्तेः। अयमेव पृथिव्यादिपर्युदासो ज्ञापयति—'स्वरोद्देश्यके विधौ व्यञ्जनमविद्यमानव'दिति। तेन 'अग्निमीळे' इत्यादौ 'उदात्तादनुदात्तस्ये'ति स्वरितः सिद्ध्यति। **थाऽथघञ्**। कृत्स्वरापवादोऽयम्। प्रभृथे—क्थन्। **आव-**

प्रश्रयः। घप्। प्रलवः। इत्र। प्रलवित्रम्। क। गोवृषः। मूलविभुजादित्वात्कः। गतिकारकोपपदादित्येव सुस्तुतं भवता। ३८७६ **सूपमानात्क्तः।** (६-२-१४५) सोरुपमानाच्च परं क्तान्तमन्तोदात्तम्। अतस्य योनौ सुकृतस्य। शशप्लुतः। ३८८० **संज्ञायामनाचितादीनाम्।** (६-२-१४६) गतिकारकोपपदात् क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा। उपहूतः शाकल्यः। परिजग्धः कौण्डिन्यः। अनेति किम्–आचितम्। आस्थापितम्। ३८८१ **प्रवृद्धादीनां च।** (६-२-१४७) एषां क्तान्तमुत्तरपदमन्तोदात्तम्। प्रवृद्धः।

'उपसर्गे वसेः' इत्यथप्रत्ययान्तः। **पुरुष्टुत इति।** कर्मणि क्तः। पुरुष्विति तृतीया तत्पुरुषे तु 'तृतीया कर्मणि' इति सूत्रेण कर्मणि क्तान्ते उत्तरपदे तृतीयान्तस्य पूर्वपदस्य प्रकृतिस्वरः स्यादिति भावः। **प्रक्षय इति।** 'एरच्'। न च क्षयशब्दस्याच्प्रत्ययान्तत्वात्कृदुत्तरपदप्रकृतिस्वरेणैवान्तोदात्तत्वं सिद्धमिति वाच्यम्। 'क्षयो निवासे' इति क्षयशब्दस्याद्युदात्तत्वात्। **प्रलव इति।** 'ऋदोरप्'। **प्रलवित्रमिति।** 'अर्तिलूधूसूखनसहचर इत्रः'। **गोवृष इति।** गां वर्षत इति विग्रहः। वृषु सेचने 'वृषादीनां च' इत्याद्युदात्तोऽयम्। **सुस्तुतमिति।** 'सुः पूजायाम्' इति कर्मप्रवचनीयः। अव्ययपूर्वपदप्रकृतिस्वर एव। **सूप।** **सुकृतस्येति।** 'गतिरनन्तरः' इति प्राप्ते। **शशप्लुतमिति।** शश इव प्लुतमिति विग्रहः। 'तृतीया कर्मणि' इति प्राप्तम्। **उपहूत इति।** 'ह्वो निष्ठायाम्' यजादित्वात्संप्रसारणम्। **परिजग्ध इति।** अदो जग्धादेशः। उभयत्र 'गतिरनन्तरः' इति प्राप्तम्। **अनेति किमिति।** अनाचितादीनामिति किमर्थमित्यर्थः। **आचितमित्यादि।** चिञ् चयने। ष्ठा गतिनिवृत्तौ। णिजन्तः। आभ्यां

सथ इति। 'उपसर्गे वसे'रित्यर्थः। उपपदोदाहरणमेतत्। **प्रभेदे** घञ्। **पुरुष्विति।** तृतीयातत्पुरुषे तु 'तृतीया कर्मणी'ति पूर्वपदप्रकृतिस्वर एव। **स्तुतो** 'निष्ठा च द्व्यजना'दित्याद्युदात्तः। **क्षयः**–'क्षयो निवासे' इत्याद्युदात्तः। निश्चय इत्यत्रायं स्वरो नेष्यते, किन्तु कृत्स्वर एवेति 'मह्वद–' इति सूत्रे भाष्यम्। **सुस्तुतमिति।** अव्ययपूर्वपदप्रकृतिस्वरोऽत्र। कृष्टपच्या इत्यत्राप्ययं स्वर इष्यत इति 'राजसूये'ति सूत्रे भाष्ये स्थितम्। अत्रोपपदग्रहणानुवृत्तिः समासनिर्देशात्छता नात्यन्तं फलवती, गतिकारकाभ्यां सिद्धत्वात्। **सूपमानात्क्तः।** गतिस्वरापवादोऽयम्। अत्रापि 'गतिकारकोपपदा'दित्येव। नेह–सुस्तुतम्। **शशप्लुत इति।** शश इव प्लुत इत्यर्थः। **सञ्ज्ञायामना।** अयमपि गतिस्वरापवादः। **कुद्दालखात**मित्यादौ 'तृतीया कर्मणी'ति प्राप्तम्। आचितम्, पर्याचितम्, आस्थापितम्, परिगृहीतम्, निरुक्तम्, प्रतिपन्नम्, उपश्लिष्टम्, प्रश्लिष्टम्, उपहितम्, उपस्थितम्।

प्रयुतः। असंज्ञार्थोऽयमारम्भः । आकृतिगणोऽयम्। **३८८२ कारकाद्दत्तश्रुतयोरेवाशिषि। (६-२-१४८)** संज्ञायामन्त उदात्तः। देवदत्तः। विष्णुश्रुतः। कारकात्किम्-संभूतो रामायणः । दत्तश्रुतयोः किम्-देवपालितः। अस्मान्नियमादत्र 'संज्ञायामना' (३८८०) इति न। 'तृतीया कर्मणि' (३७८२) इति तु भवति। एव किम्-कारकावधारणं यथा स्याद् दत्तश्रुतावधारणं मा भूत् अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति। संश्रुतः। आशिषि किम्-देवैः खाता देवखाता। आशिष्येवेत्येवमत्रेष्टो नियमः। तेनानाहतो नदति देवदत्त इत्यत्र न, शङ्खविशेषस्य संज्ञेयम्। 'तृतीया कर्मणि' (३७८२) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति। **३८८३ इत्थम्भूतेन कृतमिति च। (६-२-१४९)**

कर्तरि क्तः। **प्रवृद्धः प्रयुक्त इति**। वृधु वृद्धौ। यु मिश्रणे। **असंज्ञार्थोऽयमारम्भ इति**। संज्ञायां तु 'संज्ञायामनाचितादीनाम्' इत्येव सिद्धम्। **कारकाद्दत्त**। तत्पुरुषे संज्ञायामाशिषि कारकात्परयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तः स्यात्। 'संज्ञायामनाचितादीनाम्' इत्यनेन विहितमन्तोदात्तत्वमनेन नियम्यते। **देवदत्त इत्यादि**। देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः। 'आशिषि लिङ्लोटौ' इति वर्तमाने 'क्तिच्क्तौ च संज्ञायाम्' इति क्तः। 'दो दद्घोः' इति ददादेशः। विष्णुरेनं श्रूयादित्येवं प्रार्थिते विष्णुना श्रुतो विष्णुश्रुतः। क्तप्रत्ययः पूर्ववत्। **संभूतो रामायण इति**। कारकादित्यनुच्यमाने गतिकारकोपपदादिति त्रितयाधिकाराद्यथा कारकान्नियमो भवति तथैव गतेरपि स्यात्। **एव किमिति**। सिद्धेऽधिकारे आरभ्यमाणोऽन्तरेणाप्येवकारं नियमार्थो भविष्यतीति प्रश्नः। **कारकावधारणमित्यादि**। असति ह्येवकारे विपरीतनियमोऽपि स्यात् 'कारकादेव दत्तश्रुतयो'रिति। एवं चाकारकाद्दत्तश्रुतयोर्न स्यात्, इष्यते च। तथा कारकस्यानियतत्वाद्देवपालित इत्यादावन्तोदात्तः स्यात्। अतः कारकावधारणं यथा स्याद्दत्तश्रुतावधारणं मा भूदित्येवमर्थमेवकारग्रहणमित्यर्थः। **देवखातेति**। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। **इत्थम्**। **इत्थंभूतेन कृतमित्येतस्मिन्नर्थे इति**। इत्थं प्रकार-

---

संहिताऽगवि। शृत्। गोरन्यस्य सञ्ज्ञायां संहिताशब्दोऽन्तोदात्तः। **कारकाद्दत्त**। 'सञ्ज्ञायामनाचितादीना'मित्यस्य नियमोऽयम्। **देवदत्त इति**। देवा एनं देयासुरित्यर्थः। विष्णुरेनं श्रूयादिति **विष्णुश्रुतः**। **कारकात्किम्—सम्भूत इति**। कारकादित्यस्याऽभावे त्रितयाधिकाराद्गतेरपि नियमः स्यात्—सम्भूयादिति, **सम्भूत** इति भावः। 'संश्रुतो रामायण' इति पाठस्त्वयुक्तः। आशिषोऽप्रतीतेः। **माभूदिति**। एतेन संश्रुतो विश्रुत इत्यत्र भवत्येवान्तोदात्तत्वम्। आशिषि किम्? अनाशिषि नियमो

इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात्। सुप्तप्रलपितम्। प्रमत्तगीतम्। कृतमिति क्रियासामान्ये करोतिर्नाभूतप्रादुर्भाव एव। तेन प्रलपिताद्यपि कृतं भवति। 'तृतीया कर्मणि' (३८७२) इत्यस्याप-वादः। ३८८४ अनो भावकर्मवचनः। (६-२-१५०) कारकात्परमनप्रत्य-यान्तं भाववचनं कर्मवचनं चान्तोदात्तम्। पयःपानं सुखम्। राजभोजनाः शालयः। अनः किम्-हस्तादायः। भेति किम्-दन्तधावनम्। करणे ल्युट्। कारकात्किम्। निदर्शनम्। ३८८५ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः। (६-२-१५१) कारकात्पराणि एतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे। कृत्स्वरापवादः। रथवर्त्म। पाणिनिकृतिः। छन्दोव्याख्यानम्। राजशयनम्। राजासनम्। अश्वस्थानम्। ब्राह्मणयाजकः। गोक्रीतः। कारका-

---

मापन्न इत्थंभूतस्तेन कृतमित्यर्थे। सुप्तप्रलपितमित्यादि। कथमेतान्युदाहरणानि यावता कृतमित्युच्यते। न च प्रलपितादीनि कृतानि। अभूतप्रादुर्भाव एव हि करोतिर्वर्तते। ततश्च सुप्तकृतं सुप्तभावितम् उन्मत्तभावितमित्यादिकमेवोदाहर्तव्यमित्यत आह कृतमितीति। कृतिसामान्ये करोतिर्वर्तते इति। ततश्च यथा 'क्रियावचनो धातुः' क्रियार्थो क्रियार्थायामि'त्यादौ विशेषाणामपि ग्रहणं भवति तद्वदत्रापि। ननु सुप्तप्रलपितमित्यादौ कारकादिति योगविभागेनैव सिद्धमित्याशङ्क्याह तृतीयेति। तस्य तु योगविभागो न बाधकः, तस्य निर्विषयत्वं स्यात्। अभूतप्रादुर्भाव इति। अभूत-प्रादुर्भावो निष्पादनम्। अनो। 'गतिकारकोपपदात्कृत्' इत्यस्यापवादः। पयःपान-मिति। 'कर्मणि च येन-' इति कर्मण्युपपदे भावे ल्युट्। उपपदसमासः। राजभोजना इति। 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् कर्तरि षष्ठीसमासः। मन्क्तिन्। कृत्स्वरापवादः। क्रीते तु तृतीयाकर्मणीत्यस्य। रथवर्त्मेति। वृतेर-धिकरणे मनिन्। कर्तरि षष्ठ्याः समासः। पाणिनिकृतिरिति। कर्मणि क्तिन्। पूर्ववत्समासः। छन्दोव्याख्यानमिति। व्याख्यानमिति करणे ल्युट्।

मा भूत्। ततश्चेह न स्यात्–देवैः खाता देवखाता। इत्येवमत्रेति। इत्येवमप्यत्रे-त्यर्थः। 'अत्र कारकादिति योगं विभज्य दूरादागत इत्यत्रान्तोदात्तत्वं विधेयं 'गतिर-नन्तरः' इति बाधनार्थ'मित्युक्तम्। कृतं भवतीति। भावे यदा प्रलपितादयस्तदा थाथादिस्वरेणैव सिद्धम्। अनो भाव। कृत्स्वरापवादोऽयम्। पयःपानमिति। 'कर्मणि च येने'ति कर्मण्युपपदे भावे ल्युट्। राजभोजना इति। बाहुलकात्कर्मणि ल्युट्। कृत्स्वरापवाद इति। क्रीते तु 'तृतीया कर्मणी'त्यस्येत्याहुः। व्याख्या-नादिषु करणे ल्युट्। याजकादयो–'याजकादिभिश्चे'ति सूत्रे गणे पठिताः।

स्किम्-प्रभृतौ सङ्गतिम्। अत्र 'तादौ च निति' (३७८४) इति स्वरः। ३८८६ सप्तम्याः पुण्यम्। (६-२-१५२) अन्तोदात्तम्। अध्ययनपुण्यम्। तत्पुरुषे तुल्यार्थेति प्राप्तम्। सप्तम्याः किम्-वेदेन पुण्यं वेदपुण्यम्। ३८८७ ऊनार्थकलहं तृतीयायाः। (६-२-१५३) माषोनम्। माषविकलम्। वाक्कलहः। तृतीयापूर्वपदप्रकृतिस्वरापवादोऽयम्। अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति। धान्यार्थः। ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम्। ३८८८ मिश्रं चानुपसर्गम-

---

शयनासनस्थानेष्वधिकरणे ल्युट्। **ब्राह्मणयाजक इति।** 'याजकादिभिश्च' इति सूत्रे षष्ठीसमासार्थं ये याजकादयस्त एव गृह्यन्ते। **प्रभृतौ संगतिमिति।** 'तादौ च निति कृत्यतौ–' इति पूर्वपदप्रकृतिस्वर एवात्र भवति। **सप्तम्या।** सप्तम्यन्तात्परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं स्यात्तत्पुरुषे। **अध्ययनपुण्यमिति।** अध्ययनेन पुण्यमिति विग्रहः। सप्तमीति योगविभागात्समासः। **ऊनार्थ।** तृतीयान्तात्पराणि ऊनार्थानि कलहश्च एतान्युत्तरपदान्यन्तोदात्तानि स्युः। उदाहरणेषु 'पूर्वसदृश–' इत्यादिना तृतीयासमासः। **केचित्त्वित्यादि।** नन्वेवमूनशब्दस्यापि स्वरूपस्य ग्रहणं प्रसज्येत। ततश्च तदर्थानामन्येषां ग्रहणं न स्यादत आह **ऊनशब्देन त्विति।** अर्थनिर्देशार्थत्वं तु व्याख्यानादवसेयम्। **मिश्रं च।** तृतीयान्तात्परमनु-

---

अध्ययनपुण्यमिति। सुप्सुपेति समासः। पुण्यशब्दस्याऽव्युत्पन्नत्वे आह **तत्पुरुषे तुल्येति।** 'नब्विषयस्ये'त्याद्युदात्तः पुण्यशब्दः। व्युत्पन्नत्वे तु 'यतोऽनावः' इत्याद्युदात्तः, तदा कृत्स्वरापवादोऽयम्। उक्तसमासस्याऽप्रतिपदोक्तत्वादेतदपवादत्वमेव युक्तम्। सप्तमीति योगविभागस्तु भाष्याऽनारूढः। तत्पुरुषे इत्यस्याऽत्राऽसम्बन्ध एव, सामर्थ्यात्। **वेदेन पुण्यं वेदपुण्यमिति।** व्युत्पत्तौ कृत्स्वरः। अव्युत्पत्तौ पूर्वपदप्रकृतिस्वरः। वेदशब्दोऽत्र वृषादित्वादाद्युदात्तः। **ऊनार्थकलहम्।** [ऊनार्थकलहानि] तृतीयान्तात्पराण्येतान्युत्तरपदान्यन्तोदात्तानीत्यर्थः। **तदर्थानामिति।** व्याख्यानादिति भावः। **स्पष्टार्थमिति।** न च धान्यायाऽर्थो धान्यार्थ इत्येतद्व्यावर्त्यम्। 'अर्थे' इति पूर्वपदप्रकृतिस्वरस्य बाधकस्य सत्त्वात्। इदं तृतीयासमासे सावकाशम्। न च समस्य सर्वानुदात्तत्वात्प्रकृतिस्वराऽभावे समर्थमित्येतद्व्यावर्त्यम्, तदभावे समासस्वरेणाऽन्तोदात्तस्येष्यमाणत्वादित्याहुः। **परे त्वत्रो**नशब्देन तदर्थग्रहणे न भाष्यानुग्रहः, माषविकल इत्यस्यान्तोदात्तत्वे च न दृढं मानम्। अत्र 'तृतीयाया' इत्यनेन प्रतिपदोक्तपरिभाषाप्रवृत्त्यभावो ज्ञाप्यते। तेन वाचाकृतः कलह इत्यार्थके वाक्कलहादावन्तोदात्तत्वं भवत्येव। अर्थेति त्वत्र स्वरूप-

सन्धौ । (६-२-१५४) पणबन्धेनैकार्थ्यं सन्धिः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रं किम्-गुडधानाः । अनुपसर्गे किम्-तिलसंमिश्राः मिश्रग्रहणे सोपसर्ग-ग्रहणस्येदमेव ज्ञापकम् । असन्धौ किम्-ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः । ३८८९ नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्था-स्तद्धिताः । (६-२-१५५) संपाद्याद्यर्थतद्धितान्ता नञो गुणप्रतिषेधे वर्त-मानात्परेऽन्तोदात्ताः । कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकम् । न कार्णवेष्ट-किकमकार्णवेष्टकिकम् । छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः । न वत्सेभ्यो हितोऽवत्सीयः । न सन्तापाय प्रभवति असान्तापिकः । नञः किम्-गर्दभरथमर्हति गार्दभरथिकः । द्विगार्दभरथिकः । गुणप्रतिषेधे किम्-गार्दभरथिकादन्योऽगार्द-

---

पसर्गं मिश्रमन्तोदात्तं स्यादसन्धौ । अयमपि 'तत्पुरुषे तुल्यार्थ-' इत्यस्यापवादः । **पणबन्धेनैकार्थ्यमिति** । पणबन्धः परिभाषणम् । यदि मे भवानिदं कुर्यादहमपि भवतः करिष्यामीत्येवंरूपम् । **तिलमिश्रा इति** । 'पूर्वसदृशसमोनार्थ-' इति समासः । **गुडधाना इति** । 'भक्ष्येण मिश्री-' इति समासः । **तिलसंमिश्रा इति** । कथं पुनर्मिश्रशब्दस्य विधीयमानं सोपसर्गेण लभ्यतेऽत आह **मिश्रग्रहणे-त्यादि** । तेन मिश्रलक्षणैरिति विधीयमानः समासः सोपसर्गेणापि सिद्धः । **ब्राह्मणमिश्र इति** । यदि मे भवन्तः कार्यं कुर्युस्तदाहं भवतामुपकारं करिष्यामीत्येवं-रूपेण पणबन्धेन कृत्वा ब्राह्मणैः सह मिलित इत्यर्थः । अपरे तु स्वरूपभेदग्रहणं सन्धिः । ब्राह्मणमिश्र इत्यत्र ब्राह्मणैरेकीभावेऽपि राजा स्वस्वरूपेण गृह्यते । गुडमिश्र इत्यत्र गुडेनैकीभूतस्य स्वरूपभेदो न गृह्यत इत्याहुः । **नञो गुण । कार्णवेष्ट-किकमिति** । 'संपादिनि' इति प्राग्वतेष्ठञ् । **छैदिक इति** । 'छेदादिभ्यो नित्यम्' इति ठक् । **वत्सीय इति** । 'तस्मै हितम्' इति छः । **सान्तापिक इति** । 'तस्मै प्रभवति सन्तापादिभ्यः' इति ठञ् । **नञः किमिति** । प्रतिषेधे प्रायेण नञ एव वृत्तिदर्शनात्प्रश्नः । **विगार्दभरथिक इति** । अव्ययपूर्वपदप्रकृतिस्वर

ग्रहणमेवेत्याहुः । ऊनेत्यादि किम् ? मासपूर्वः । **मिश्रञ्चानुप** । तृतीयान्तादुत्तरपदम-नुपसर्गं मिश्रमन्तोदात्तमित्यर्थः। **पणबन्धेनेति** । 'यदि भवन्त इदं मे कार्यं कुर्युस्तदा-ऽहमपि भवतामुपकारं करिष्यामी'त्येवंरूपेणेत्यर्थः । **मिश्रग्रहणे इति** । अन्यथा प्रतिपदोक्तपरिभाषया 'मिश्रलक्षणे'रिति समासस्यैव ग्रहणे तद्वैयर्थ्यं स्पष्टमेव । **कार्ण-वेष्टकिकमिति** । क्रमेण-'सम्पादिनी'ति ठञ् , 'छेदादिभ्यो नित्य'मिति ठक् , 'तस्मै हित'मिति छः, 'तस्मै प्रभवती'ति ठक् । **विगार्दभरथेति** । 'तदर्हति' इति ठक् । **गार्दभरथिकादन्य इति** । न चाऽस्य , गर्दभरथार्हणकर्तृभिन्न इत्यर्थः,

भरथिकः । गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं संपादित्वादुच्यते । तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । संपेति किम्-पाणिनीयमधीते पाणिनीयः । न पाणिनीयः अपाणिनीयः । तद्धिताः किम्-वोढुमर्हति वोढा । न वोढाऽवोढा । ३८६० ययतोश्चातदर्थे । (६-२-१५६) ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात् । पाशानां समूहः पाश्या । न पाश्या अपाश्या । अदन्त्यम् । अतदर्थे

एवात्र भवति । **गार्दभरथिकादन्य इति** । उदाहरणादस्य विशेषं दर्शयितुं गुणप्रतिषेध इति सूत्रावयवं व्याचष्टे **गुण इति** । **तद्धितार्थे प्रवृत्तिनिमित्तमिति** । तद्धितार्थः संपाद्यादि तस्य यत् प्रवृत्तिनिमित्तम् । **संपादीत्वादिति** । आदिशब्देन तदर्हत्वादेर्ग्रहणं स गुण इत्युच्यते । उक्तं हि—'संसर्गभेदकं यत्स्यात्सव्यापारं प्रतीयते । गुणत्वं परतन्त्रत्वात्तस्य शास्त्रे उदाहृतम् ॥' इति । **वोढेति** । 'अर्हे कृत्यतृचश्च' इति तृच् । धत्वढत्वष्टुत्वढलोपेषु 'सहिवहोरोदवर्णस्य-' इत्योत्वम् । **पाश्येति** ।

तत्रार्थतोऽर्हत्वाऽभावस्यापि बोधनादस्त्येव गुणप्रतिषेधः, यथा घटभिन्न इत्युक्ते घटत्वाऽभाववानिति प्रतीयत इति वाच्यम् । 'न गर्दभरथमर्हती'ति गर्दभरथस्य नञर्हाभ्यां युगपदेकार्थीभावविवक्षायां परत्वात्तद्धिते एकदेशद्वारकसामर्थ्यमाश्रित्य तद्धितान्तेन समासे 'आरोपितं गर्दभरथमर्हती'त्यर्थकेऽतिप्रसङ्गवारणार्थत्वात् । न च प्रत्ययार्थोपसर्जनगर्दभरथस्य नञर्थापेक्षत्वेनाऽसामर्थ्यात्ततस्तद्धितो दुर्लभः, अस्मादेव गुणप्रतिषेधाज्ज्ञापकान्नञर्थसार्थसापेक्षादपि तद्धितोत्पत्तिस्वीकारात् । स्पष्टञ्चेदं 'न नञ्पूर्वात्तत्पुरुषादि'ति सूत्रे भाष्ये । यत्तु कैयटेन—'एतदन्तोदात्तत्वविधानमेवैतदर्थज्ञापक'मित्युक्तम्, तन्न, वत्सेभ्यो न हित' इत्यर्थे प्रधानस्य नञर्थापेक्षत्वेऽप्युपसर्जनवत्सानां तदर्थानपेक्षत्वेन तद्धितोत्पत्तिसाम्राज्ये सूत्रसार्थक्यात् । किं चेदृशेऽर्थेऽपि हितस्य धर्मिण एव प्रत्ययार्थतया तत्र नञर्थाऽन्वयेऽत्यन्ताऽभावार्थकत्वे हिताऽभावः प्रतीयते, न तु हितत्वरूपगुणप्रतिषेधः । भेदार्थकत्वे तु अस्मदीत्यैव गुणप्रतिषेधार्थत्वमुपपाद्यम् । एवञ्च नञर्थानपेक्षवत्सशब्दात्पूर्वं प्रत्यये पश्चान्नञ्समासेऽपि तदुदाहरणं सुलभम् । किं च त्वदुक्तरीत्या प्रत्ययार्थस्य सापेक्षत्वेऽपि प्रकृत्यर्थस्य तस्वाऽभावात् 'सापेक्षादपी'ति भाष्योक्तज्ञाप्याऽसिद्धिः । 'वत्से युगपदुभयान्वयविवक्षे'ति न वक्तुं युक्तम्, तथाहि सति वत्सभिन्नहित इत्येव प्रतीत्या गुणप्रतिषेधाऽनवगमादित्याहुः । अगर्दभरथशब्दात्प्रत्यये तु नञ्पूर्वपदकतद्धितान्तोत्तरपदकसमासाऽभावात्स्वरस्याऽप्राप्तिरेवेति न तद्व्यावृत्तये तत् । **अवोढेति** । 'अर्हे कृत्यतृच' इति तृच् । अत्र नञ्स्वर एव । **ययतोश्चा** । ययतोः किम् ? अपाणिनीयम् । नञः किम् ? विपाश्या ।

किम्-अपाद्यम् । तद्धितः किम्-अदेयम् । गुणप्रतिषेधे किम्-दन्त्यादन्यददन्त्यम् । तदनुबन्धग्रहणे नातदनुबन्धकस्येति । नेह । अवामदेव्यम् । **३८६१ अच्कावशक्तौ ।** (६-२-१५७) अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम् । अपचः । पक्तुं न शक्तः । अविलिखः । अशक्तौ किम्-अपचो दीक्षितः । गुणप्रतिषेधे त्वित्येव । अन्योऽयं पचादपचः । **३८६२ आक्रोशे च ।** (६-२-१५८) नञः परावच्कावन्तोदात्तावाक्रोशे । अपचो जाल्मः । पक्तुं न शक्नोतीत्येवमाक्रोश्यते । अविक्षिपः । **३८६३ संज्ञायाम् ।** (६-२-१५९) नञः परमन्तोदात्तं संज्ञायामाक्रोशे । अदेवदत्तः । **३८६४ कृत्योकेष्णुच्चार्वा-**

समूहे 'पाशादिभ्यो यः' । **अदन्त्यमिति** । 'शरीरावयवाच्च' इति यत् । **अपाद्यमिति** । 'पादार्घाभ्यां च' इति यत् । **अदेयमिति** । डुदाञ् दाने अर्हार्थे अचो यत् । 'ईद्यति' इतीत्वे गुणः । **अवामदेव्यमिति** । वामदेवेन दृष्टमित्यर्थे 'वामदेवाड् ड्यड्ड्यौ–' इति ड्यः । **अपच इति** । पचाद्यच् । **अविलिख इति** । 'इगुपध–' इति कः । 'कृत्योकेष्णुच्चार्वादयश्च–' इति वक्ष्यमाणैः कृत्योकेष्णुभिः साहचर्यादच्कयोः कृतोरिह ग्रहणं तेन कृद्ग्रहणपरिभाषया विलिखशब्दस्य कान्तत्वम् । **अपचो दीक्षित इति** । दीक्षितः शास्त्रविरोधात्र पचति न त्वशक्तत्वेन । **अपचो जाल्म इति** । पक्तुं शक्तोऽपि पक्तुमयं न शक्नोतीत्यनेन प्रकारेण क्षिप्यते । तदाह **पक्तुमित्यादि** । **अदेवदत्त इति** । देवदत्तः सन्यस्तत्कर्म न

तद्धिते किमिति । अत्र तद्धिते इति नानुवर्तते इति मतान्तरम्—'अत्वसन्तस्ये'ति सूत्रे आकरे ध्वनितम् । तत्र हि-ख्यति तदनुबन्धकपरिभाषयाऽस्याऽप्रवृत्तिरित्युक्तम् । **दन्त्यादन्यदिति** । उक्तरीत्या आरोपितदन्तभवमित्यर्थोऽस्य बोद्धयः । उदाहरणे तु दन्तभवभिन्नमिति । दन्तभवत्वाऽभाववदिति यावत् । **अच्का । नञः परमिति** । गुणप्रतिषेधार्थभिन्न इत्यर्थः । **दीक्षित इति** । अस्य हि शास्त्रनिषिद्धः पाको न तु तत्राऽशक्तोऽयम् । **अन्योऽयं पचादिति** । अस्याऽऽरोपितपाककर्तृत्वर्थः पूर्ववत् । उत्तरकृत्योकादिसाहचर्यादत्राऽच्कौ कृतावेव । कृद्ग्रहणादेव गतिकारकपूर्वत्वेऽपि भवति–अप्रपच इति । **नञः पराविति** । गुणप्रतिषेधार्थादित्येव । **पक्तुं नेति** । केचित्तु पक्तुं समर्थोऽपि न पचतीत्येवमाक्रुश्यत इत्याहुः । अत्र 'अच्कौ' इति वृत्त्यनुरोधादनुवर्तितम् । 'नवे'ति सूत्रभाष्ये तु 'अत्राऽच्काविति नानुवर्तते, 'विभाषातृन्नन्ने'त्यपेक्षया आक्रोशे इदमेव पूर्वविप्रतिषेधेन भवती'ति स्थितम् । 'सञ्ज्ञाया'मित्युत्तरसूत्रे गुणप्रतिषेध इति नाऽनुवर्तते इति नाऽत्र पक्षे तद्वैयर्थ्यम् । **अदेवदत्त इति** । देवदत्तः सन् यस्तत्कार्यं न करोति स एवमाक्रुश्यते । **कृत्यो-**

दयश्च। (६-२-१६०) नञः परेऽन्तोदात्ताः स्युः। अकर्तव्यः। उक। अनागामुकः। इष्णुच्। अनलङ्करिष्णुः। इष्णुज्ग्रहणे खिष्णुचो अनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्यात्। अनाढ्यं भविष्णुः। चार्वादिः। अचारुः। असाधुः। (ग) राजाह्नोश्छन्दसि। अराजा। अनहः। भाषायां नञः स्वर एव। ३८९५ विभाषा तृन्नन्नतीक्ष्णशुचिषु। (६-२-१६१) तृन्। अकर्ता। अन्न। अनन्नम्। अतीक्ष्णम्। अशुचि। पक्षे अव्ययस्वरः। ३८९६ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने। (६-२-१६२) एभ्योऽनयोरन्त उदात्तः। इदं प्रथमं यस्य स इदंप्रथमः। एतद्द्वितीयः। तत्पञ्चमः। बहुव्रीहौ किम्-अनेन प्रथम इदंप्रथमः। 'तृतीया' (६९२) इति योगविभा-

---

करोति स एवमाक्षिप्यते। **अनागामुक इति।** 'लषपतपद–' इत्युकञ्। **अनलङ्करिष्णुरिति।** 'अलंकृञ्–' इतीष्णुच्। **इकारादेर्विधानसामर्थ्यादिति।** भवतेरुदात्तत्वात्ततः परस्य खिष्णुच इटैवेकारादित्वे सिद्धे इकारादेर्विधानमिह सामान्यग्रहणार्थमेवेति भावः। **अनाढ्यंभविष्णुरिति।** 'भुवः खिष्णुच्खुकञौ' इति खिष्णुच्। **अचारुरिति।** 'हसति–' इति चरेरुण्। **असाधुरिति।** साध्नोतेः 'कृवापाजि–' इत्युण्। **राजाह्नोः।** चार्वाद्यन्तर्गणसूत्रम्। नञः परयोरेतयोश्छन्दस्यन्तोदात्तत्वम्। **अराजेति।** 'नञस्तत्पुरुषात्–' इति समासान्तनिषेधः। **विभाषा तृन्।** नञ उत्तरपदान्येतान्यन्तोदात्तानि स्युस्तत्पुरुषे। **बहुव्रीहाविदम्। एभ्य इत्यादि।** इदमेतत्तद्भ्यः अनयोः प्रथमपूरणयोः। **इदं प्रथमं यस्येति।**

केष्णुजित्यत्र। गुणप्रतिषेध इति सम्बध्यते। **इकारादेरिति।** इदं खिष्णुज्विधावाकरे स्पष्टम्। चारु, साधु, यौधिक, अनङ्गमेजय, वदान्य, अनकस्मात् 'वर्तमानवर्धमानत्वरमाणध्रियमाणरोचमानाः सञ्ज्ञायाम्'। 'प्रीयमाणक्रियमाणशोभमाना' अपि क्वचित्पठ्यन्ते। 'विकारसदृशे व्यस्तसमस्ते', गृहपति, गृहपतिक। 'राजाह्नोश्छन्दसि'। राजाह्नोरिति गणसूत्रम्। छन्दस्येवैतौ चार्वादी इत्यर्थः। **विभाषा तृन्नन्नतीक्ष्णशु।** नञः पराण्येतान्यन्तोदात्तानीत्यर्थः। गुणप्रतिषेध इत्येव। **पक्षेऽव्ययेति।** एतत्सूत्रं यावत् 'तत्पुरुषे शालायां'मिति सूत्रस्थतत्पुरुषपदानुवृत्तेरिति भावः। वृत्तौ चेदं स्पष्टम्। **बहुव्रीहाविदमे। अनयोरिति।** क्रियागणनवृत्त्योः प्रथमशब्दपूरणप्रत्ययान्तयोरुत्तरपदयोरित्यर्थः। **इदं प्रथममस्येति।** 'गमनमागमनं वे'ति शेषः। **तृतीयेतीति।** एवञ्च तृतीयापूर्वपदप्रकृतिस्वरोऽत्रेति भावः। इदं पदमञ्जर्यां स्पष्टम्। केचित्तु तृतीयेत्यत्र योगविभागस्य भाष्येऽनुक्तत्वात्सुप्सुपेति समासेऽन्तोदात्तत्वमेव। अयमिव प्रथम इदंप्रथमः स इत्युदाहर्तुमुचितम्। प्राथम्यमेव साधारणो धर्म इत्याहुः।

गात्समासः । इदमेतत्तत्परः किम्-यत्प्रथमः । प्रथमपूरणयोः किम्-तानि बहून्यस्य तद्बहुः । क्रियागणने किम् । अयं प्रथमः प्रधानं येषां ते इदंप्रथमाः । प्रथ्यगणनमिदम् । गणने किम्-अयं प्रथमो येषां ते इदंप्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तम् । इदंप्रथमकः । बहुव्रीहा-वित्यधिकारो 'वनं समासे' (३९१२) इत्यतः प्राग्बोध्यः । **३८९७ संख्यायाः स्तनः ।** (६-२-१६३) बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । संख्यायाः किम्-दर्शनीयस्तना । स्तनः किम्-द्विशिराः । **३८९८ विभाषा छन्दसि** (६-२-१६४) द्विस्तनां करोति । **३८९९ संज्ञायां मित्राजिनयोः ।** (६-२-१६५) देवमित्रः । कृष्णाजिनम् । संज्ञायां किम्-प्रियमित्रः । * ऋषि-प्रतिषेधो मित्रे । विश्वामित्र ऋषिः । **३९०० व्यवायिनोऽन्तरम् ।**

निगमनं भोजनं वा । **अनेन प्रथम इदंप्रथम इति** । तृतीयापूर्वपदप्रकृतिस्वर एव भवति । **यत्प्रथम इति** । यत्प्रथमं गमनं यस्य स यत्प्रथमः । **इदंप्रधाना इत्यर्थ इति** । अनेन प्रधानवचनः प्रथमशब्दो न त्वेकत्वसंख्यावचन इति दर्शितम् । तेनात्र गणनाभाव उक्तः । **उत्तरपदस्येत्यादि** । इह समासस्येति प्रकृतम् । उत्तरपदादिरित्यतः प्रभृति उत्तरपदस्येति च तन्त्रम् । इहोत्तरपदं कार्यित्वेनाश्रीयते तेन यदा कबुत्पद्यते तदा कपि परतो यत्पूर्वं प्रथमेति तदन्तोदात्तं भवति न तु कबन्तम् । कप्प्रत्ययो हि समासस्यैवान्तो नोत्तरपदस्य । 'उत्तरपदावयवाः समासान्ता' इति पक्षेऽपि प्रथमपूरणयोरिति विशिष्टरूपग्रहणात् । कपस्तत्रानन्तर्भावादुपात्तयोरेव स्वरः । **संख्यायाः** । संख्यायाः परः स्तनशब्दोऽन्तोदात्तः स्यात् । **दर्शनीयस्त-नेति** । पूर्वपदप्रकृतिस्वरः । दर्शनीयशब्दोऽनीयर्प्रत्ययान्तो रित्स्वरः । **विभाषा** । पूर्वसूत्रोक्तं छन्दसि वा स्यात् । **द्विस्तनामिति** । अन्तोदात्तत्वम् । ('स्वाङ्गाच्चोपसर्ज-नात्' इति ङीष् । **चतुःस्तनेति** । पूर्वपदप्रकृतिस्वरेण 'चतेरुरन्' इति चतुर्-शब्दस्य नित्त्वादाद्युदात्तत्वम् । अत्रान्तोदात्तत्वाभावात् 'स्वाङ्गात्–' इति ङीष् न) । **संज्ञायां मित्रा** । एतयोरुत्तरपदयोरन्त उदात्तः स्याद् बहुव्रीहौ संज्ञायाम् । **विश्वामित्र इति** । 'मित्रे चर्षौ' इति दीर्घः । अत्र 'बहुव्रीहौ विश्वं संज्ञायाम्'

अयं प्रथम इति । देवदत्तादिः । **अयं प्रथम एषामिति** । अयं पाकादिः प्रधानमेषामित्यर्थः । **उत्तरपदस्य कार्यित्वादिति** । समासान्तस्तु समासावयव एवेति भावः । **द्विस्तना चतुःस्तनेति** । 'द्विस्तनी'त्यादौ तु ङीषि सतिशिष्टत्वा-दन्तोदात्तत्वं सिद्धमिति तन्नोदाहृतमित्याहुः । **विभाषा छन्दसि** । पूर्वसूत्रोक्तस्य विभाषा । पक्षे पूर्वपदप्रकृतिस्वरः । **सञ्ज्ञायामिति** । एतयोरुत्तरपदयोरन्त उदात्तो

(६-२-१६६) व्यवधानवाचकात्परमन्तोदात्तम । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः। व्यवायिनः किम्-आत्मान्तरः। अन्यस्वभाव इत्यर्थः। ३६०१ मुखं स्वाङ्गम्। (६-२-१६७) गौरमुखः। स्वाङ्गं किम्-दीर्घमुखा शाला। ३६०२ नाऽव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः। (६-२-१६८) उच्चैर्मुखः। प्राङ्मुखः। गोमुखः। महामुखः। स्थूलमुखः। मुष्टिमुखः। पृथुमुखः। वत्समुखः। पूर्वपदप्रकृतिस्वरोऽत्र। गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते। ३६०३ निष्ठोपमानादन्यतरस्याम्।

इति बाधित्वा परत्वादनेनान्तोदात्तत्वं प्राप्तं प्रतिषिध्यते। अतो 'बहुव्रीहौ विश्वं संज्ञायाम्' इत्यन्तोदात्तत्वं भवति। व्यवायि। उदाहरणे व्यवधानवाचिनोऽन्तरशब्दात् 'तत्करोति-' इति णिचि पचाद्यच्। प्रत्युदाहरणे स्वन्यवाच्यन्तरशब्दः। मुखम्। स्वाङ्गं मुखमुत्तरपदमन्तोदात्तं बहुव्रीहौ। दीर्घमुखा शालेति। मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते। स्वाङ्गमद्रववाचिलक्षणमिह गृह्यते न तु स्वमङ्गं स्वाङ्गमिति व्युत्पत्तिलभ्यम्। अन्यथात्रापि स्यादिति भावः। नाऽव्यय। एभ्यः परो मुखशब्दोऽन्तोदात्तो न स्यात्। पूर्वपदप्रकृतिस्वरोऽत्रेति। एषूदाहरणेषु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति पूर्वपदप्रकृतिस्वरेणान्तोदात्तं पूर्वपदम्। तथाहि 'उदि चेर्डैसिः'। उच्चैः। 'अनिगन्तोऽञ्चतावप्रत्यये' इति प्रशब्द उदात्तः। तत एकादेशस्वरेण प्राक्शब्द उदात्तः 'गमेर्डोसिः'। गौः। 'वर्तमाने पृषत्' इत्यादिना महच्छब्द उदात्तो निपातितः। स्थूलशब्दः 'ऋज्रेन्द्र-' इत्यादावन्तोदात्तो निपातितः। मुषेः क्तिच्। मुष्टिः। 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' इति कुः। पृथुः। 'वृतृवदि-' इत्यादिना सः। वत्सः। उपमानलक्षणो विकल्प इति। निष्ठोपमानादिति प्राप्तः। बाध्यत इति। अस्य प्रतिषेधस्यावकाशो यत्र गवाद्युपमानं न भवति। गौर्मुखमिव यस्य सः। वत्सो मुखमिव यस्येति। सर्वत्रात्र गवाद्युपमेयं नोपमानम्। उत्तरस्य

बहुव्रीहौ सञ्ज्ञायाम्। विश्वामित्र इति। 'मित्रे चर्षौ' इति दीर्घः। अत्र 'बहुव्रीहौ विश्वं सञ्ज्ञाया'मित्येव भवति। अनृषौ तु विश्वमित्रे इदमेव परत्वादित्युक्तम्। व्यवायिनोऽन्तरम्॥ उदाहरणप्रत्युदाहरणयोरन्तरशब्दस्य परनिपातोऽस्मादेव ज्ञापकात्। आत्मान्तर इति। आत्मा=स्वभावोऽन्यो यस्येत्यर्थः। 'अन्यस्वभाव इत्यर्थ' इति युक्तः पाठः। अन्तरं किम्? वस्त्रव्यवधायकः। मुखं स्वाङ्गम्। बहुव्रीहावुत्तरपदभूतमद्रवमित्यादिलक्षणलक्षितस्वाङ्गवाचि मुखमन्तोदात्तमित्यर्थः। पूर्वपदेति। उच्चैरादीनि पूर्वपदान्यन्तोदात्तान्यत्र। उपमानलक्षण इति। 'निष्ठोपमाना'दित्युत्तरसूत्रविहितः। बाध्यत इति। पूर्वविप्रतिषेधादिति भावः। वृत्तौ

(६-२-१६९) निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वान्तोदात्तं बहुव्रीहौ । प्रक्षालितमुखः । पक्षे 'निष्ठोपसर्ग' (३८४४) इति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । उपमानम्—सिंहमुखः । ३९०४ **जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ।** (६-२-१७०) सारङ्गजग्धः । मासजातः । सुखजातः । दुःखजातः । जातिकालेति किम् । पुत्रजातः । अनाच्छादनात्किम् । वस्त्रच्छन्नः । अकृतेति किम्–कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः । **३९०५ वा जाते ।** (६-२-१७१) जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः । दन्तजातः । मासजातः । **३९०६ नञ्सुभ्याम् ।** (६-२-१७२)

विकल्पस्यावकाशो यत्र गवादिपूर्वपदं न भवति । सिंहमुखः । गवादावुपमाने उभयप्रसङ्गेऽयमेव भवति पूर्वविप्रतिषेधेन । **सिंहमुख इति ।** पक्षे पूर्वपदप्रकृतिस्वरः हिंसेः पचाद्यचि सिंहः । पृषोदरादित्वादाद्यन्तविपर्ययः । **जातिकाल ।** जात्यादिभ्यः परं क्तान्तमन्तोदात्तं स्याद् बहुव्रीहौ कृतादीन्वर्जयित्वा आच्छादनवाचकात्परं चेन्न । **सारङ्गजग्ध इति ।** सारङ्गः पक्षिविशेषः स जग्धो भक्षितो येनेति विग्रहः । प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वरः । तत्र पुत्रशब्दोऽन्तोदात्तः । वसेः ष्ट्रन् । वस्त्रशब्द आद्युदात्तः । कुण्डशब्दो 'नब्विषयस्यानिसन्तस्य' इत्याद्युदात्तः । ननूदाहरणेषु प्रत्युदाहरणेषु च 'निष्ठा' इति निष्ठान्तस्य पूर्वनिपातः प्राप्नोति । तत्राहा**ऽस्माज्ज्ञापकादिति ।** इदमेव मनसि विभाव्योक्तं 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति । **दन्तजात इति** पक्षे पूर्वपदप्रकृतिस्वरः । दन्तशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तः । मासशब्दो 'ग्रामादीनां च' इत्याद्युदात्तः । **नञ्सु ।** नञ्सुभ्यां पर-

---

स्पष्टमेतत् । अत्राऽव्ययशब्देनाव्ययीभावस्यापि ग्रहणमिति 'अव्ययीभावश्चे'ति सूत्रस्थभाष्यस्वरसः । **प्रक्षालितेति ।** कृद्ग्रहणपरिभाषयाऽस्य निष्ठान्तत्वम् । तस्यापि वैकल्पिकत्वात्तदभावे आह **पूर्वपदप्रकृतिस्वरत्वेनेति । सिंहमुखे** पक्षे पूर्वपदप्रकृतिस्वरः । **जातिकाल ।** जात्यादिभ्यः परं क्तान्तं बहुव्रीहावन्तोदात्तं कृतादीन्वर्जयित्वा न चेद्वस्त्रार्थात्परं क्तान्तं भवति । **मासजात इति ।** मासो जातो यस्येति विग्रहः । 'कालाः परिमाणिना' इति तत्पुरुषे तु सिद्धमेवाऽन्तोदात्तत्वम् । **पुत्रजात इति ।** पुत्रशब्दोऽन्तोदात्तः । **वस्त्रशब्दस्त्रन्**प्रत्ययान्तत्वादाद्युदात्तः । नब्विषयत्वात्कुण्डमाद्युदात्तम् । **वा जाते ।** पक्षे पूर्वपदप्रकृतिस्वरः । दन्तशब्दः स्वाङ्गत्वादाद्युदात्तः, मासो ग्रामादित्वात्तथा । सुख, दुःख, कृच्छ्र, अस्र, अलीक, प्रतीप करुण, कृपण, तृप्र, सोढ एते सुखादय इति हरदत्तः । 'सुखदुःखगहनकृच्छ्रास्त्र-

बहुव्रीहावुत्तरपदमन्तोदात्तम् । अव्रीहिः । सुमाषः । ३९०७ कपि पूर्वम् । (६-२-१७३) नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे । अब्रह्मबन्धुकः सुकुमारीकः ३९०८ ह्रस्वान्तेऽन्त्यात्पूर्वम् । (६-२-१७४) ह्रस्वान्त उत्तरपदे समासे वान्त्यात्पूर्वमुदात्तं कपि नञ्सुभ्यां परं बहुव्रीहौ । अव्रीहिकः । सुमाषकः । पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रकृतिभेदेन नियमार्थम् । ह्रस्वान्तेऽन्त्यादेव पूर्वपदमुदात्तं न कपि पूर्वमिति । अज्ञकः । कव-

---

मुत्तरपदमन्तोदात्तं स्यात् । समासान्ता उत्तरपदावयवाः । तेनात्तृच इत्यत्र 'ऋक्पूर्-' इत्यप्यकारस्योदात्तत्वं भवति । समासावयवाः समासान्ता इति पक्षे तु अस्मिन् सूत्रे समासस्यैव कार्यित्वमाश्रीयते नोत्तरपदस्य 'कपि पूर्व'मिति ज्ञापकात् । यद्यनेनोत्तरपदस्यान्तोदात्तः स्यात् ततोऽकुमारीक इत्यादावनेनैव सिद्धत्वात्कपिपूर्वमित्यवाच्यं स्यात् । कपि पूर्वम् । पूर्वेण कप एवोदात्तत्वे प्राप्ते ततः पूर्वस्योदात्तत्वं विधीयते 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इति वचनादिह दीर्घान्ता एवोदाहृताः । उदाहरणे 'नद्यृतश्च' इति कप् । ह्रस्वान्ते । ह्रस्वः अन्तो यस्य तदिदं ह्रस्वान्तमिति बहुव्रीहेरन्यपदार्थ उत्तरपदं समासो वा गृह्यत इत्याशयेनाह उत्तरपदे समासे वेति । अत्र कपि पर इति सामान्यवचनात्तद्रहितमुत्तरपदं समासो वा गृह्यते । ननु पूर्वग्रहणमनर्थकं कपि पूर्वमित्यनुवृत्तेरत आह पूर्वमित्यनुवर्तमान इति । प्रकृतिभेदेन वाक्यभेदेन । तत्रैकेन वाक्येन ह्रस्वान्तेऽन्त्यात्पूर्वस्योदात्तत्वं विधीयते । द्वितीयेन तु नियम्यते । ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति । न कपि पूर्वमिति । तेन किं सिद्ध-

---

प्राप्तीकप्रतोपकरणाः । कृशाणसोढौ इमे सुखादयो दश गणे पठिता' इति । श्लोकगणकारः । गणरत्ने तु आस्यशब्दोऽपीह पठ्यत इत्युक्तम् । पूर्वसूत्रे जातातिरिक्तान्तमुदाहर्तुमुचितम् । नञ्सुभ्याम् । उत्तरपदमिति । समासान्तानां समासावयवत्वेऽपि 'कपि पूर्व'मित्यस्मादेव ज्ञापकादुत्तरपदाधिकारेऽप्यत्र सूत्रे समासस्यैव कार्यित्वम् अन्यत्रोत्तरपदस्यैव कार्यित्वं समासान्तरहितस्य । स्पष्टञ्चेदम् 'अन्तः' इति सूत्रे भाष्ये । कपि पूर्वम् । नञ्सुभ्यां परं यदुत्तरपदं तस्य कपि परे पूर्वमुदात्तमित्यर्थः, तदन्तस्य समासस्येत्यर्थो वा । पूर्वसूत्रापवादः । ह्रस्वान्ते । नञ्सुभ्याम्, कपि इति च वर्तते । 'कपि पूर्व'मित्यस्यापवादः । ह्रस्वान्तोत्तरपदकसमासे नञ्सुभ्यां परस्य कपिपूर्वस्योत्तरपदस्याऽन्त्यात्पूर्वमुदात्तमिति सूत्रार्थः । पूर्वग्रहणमिति । पूर्वग्रहणेऽनुवर्तमाने पुनस्तद्ग्रहणमित्यर्थः । एतदर्थमेव पूर्वसूत्रे पूर्वग्रहणम्, अन्यथा 'कपी'त्येव वदेदिति भावः । अज्ञक इति । अन्त्यात्पूर्वं उदात्तभावी नास्तीति एतदभावे 'कपि पूर्व'मिति प्राप्तमनेन नियमेन व्यावर्त्यते । तेन 'नञ्सुभ्या'मिति

न्तस्यैवान्तोदात्तत्वम् । ३९०९ बहोर्नञ्वदुत्तरपदभूम्नि । (६-२-१७५) उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् । बहुव्रीहिकः । बहुमित्रकः । उत्तरपदेति किम्-बहुषु मानोऽस्य स बहुमानः । ३९१० न गुणादयोऽवयवाः । (६-२-१७६) अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ता बहुव्रीहौ । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः । गुणादिराकृतिगणः । अवयवाः किम्- बहुगुणो द्विजः । अध्ययनश्रुतसदाचारादयो गुणाः । ३९११ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु । (६-२-१७७) प्रपृष्ठः । प्रललाटः । ध्रुवमेकरूपम् । उपसर्गात्किम्-दर्शनीयपृष्ठः । स्वाङ्गं किम्-प्रशाखो वृक्षः । ध्रुवं किम्-उद्बाहुः । अपर्शु किम्-विपर्शुः । ३९१२ वनं समासे ।

मत आह **कबन्तस्यैवान्तोदात्तत्वमिति** । नास्ति ज्ञा यस्य अज्ञकः । अत्र यद्येष नियमो न स्यात्तर्हि एतस्याभावे कपि पूर्वमित्ययमेव स्वरः स्यात् । अस्मिंस्तु नियमे सति न भवति । 'नञ्सुभ्याम्' इति कबन्तस्यैव भवति । **बहोर्नञ्** । नञ इव नञ्वत् । अस्मादेव निपातनात्पञ्चमी समर्थाद्वतिः । बहूनां भावो भूमा । 'बहोर्लोपो भू च बहोः' उत्तरपदशब्देन तदर्थो गृह्यते स्वरूपेणोत्तरपदस्य बहुत्वासंभवात् । तदाह **उत्तरपदार्थबहुत्वेति** । **बहुव्रीहिक इत्यादि** । 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इति स्वरः । **बहुमान इति** । पूर्वपदप्रकृतिस्वरः । बहुशब्दस्तु 'लंघिबंह्योर्नलोपश्च' इति कुप्रत्ययान्तोऽन्तोदात्तः । **न गुणा** । **अवयववाचिनो बहोः परे इति** । अवयववाचिन इति गुणादीनां विशेषणम् । **उपस** । स्वाङ्गं प्रति क्रियायोगाभावादुपसर्गग्रहणं प्राद्युपलक्षणम् । प्रादेरुत्तरं ध्रुवं स्वाङ्गवाचि पर्शुवर्जितमन्तोदात्तं स्याद् बहुव्रीहौ । प्रत्युदाहरणे पूर्वपदप्रकृतिस्वरः । दर्शनीयशब्दोऽनीयर्प्रत्ययान्तो रित्स्वरः । **उद्बाहुरिति** । क्रोशतीति शेषः । अत्र क्रोशनसमय एवोद्बाहुत्वं न सर्व-

---

कप एवोदात्तत्वमिति भावः । **बहोर्नञ्वत्** । ननु लाघवाद्बहुः सुवदित्येवास्तु इत्यत आह **बहुमित्र इति** । नञो जरमरमित्रे'त्यस्यातिदेशेन प्रवृत्त्यर्थं तथोक्तमिति भावः । **बहुमाने**—पूर्वपदप्रकृतिस्वरः । बहुः फिट्स्वरेणाऽन्तोदात्तः । **न गुणादयः** । अवयववाचिनो गुणादयो बहोः परा इत्यर्थः । 'बहोर्नञ्व'दिति प्राप्तिः । 'गुण आमन्त्रणे' चुरादिः । पचाद्यच् । **नान्तोदात्ता इति** । नञ्वद्भावप्राप्तस्वरोपलक्षणमेतत् । तेन 'बहुगुणका' इत्यादौ 'कपि पूर्वम्' 'ह्रस्वान्तेऽन्त्यात्पूर्व'मित्यपि नेति बोध्यम् । **उपसर्गात्स्वाङ्गन्ध्रु** । प्रादेरुत्तरं स्वाङ्गवाचि पर्शुशब्दभिन्नोत्तरपदकसमासे ध्रुवार्थबोधके यदुत्तरपदं तदन्तोदात्तं स्याद्बहुव्रीहावित्यर्थः । यद्वा ध्रुवार्थबोधकसमासघटकमित्यर्थकं स्वाङ्गविशेषणमेव । **उद्बाहुरिति** । नहि बाहोर्नित्यमूर्ध्वदिगवस्थानमिति

(६-२-१७८) समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम्। तुल्यादिर्मे प्रवणे। ३९१३ अन्तः। (६-२-१७९) अस्मात्परं वनमन्तोदात्तम्। अन्तर्वणो देशः। अनुपसर्गार्थमिदम्। ३९१४ अन्तश्च। (६-२-१८०) उपसर्गादन्तःशब्दोऽन्तोदात्तः। पर्यन्तः। समन्तः। ३९१५ न निविभ्याम्। (६-२-१८१) न्यन्तः। व्यन्तः। पूर्वपदप्रकृतिस्वरे यणि च कृते 'उदात्तस्वरितयोर्यणः' (३६५७) इति स्वरितः। ३९१६ परेरभितोभावि मण्डलम्। (६-२-१८२) परेः परमभित उभयतो भावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तम्। परिकूलम्। परिमण्डलम्। ३९१७ प्रादस्वाङ्गं संज्ञायाम्।

देवेत्यध्रुवम्। वनं समासे। बहुव्रीहावित्यस्य निवृत्त्यर्थं समासग्रहणम्। प्रवण इति। बहुव्रीहौ तत्पुरुषे च पूर्वपदप्रकृतिस्वरे प्राप्ते। 'प्रनिरन्तः—' इति णत्वम्। अन्तः। अन्तःशब्दात्पञ्चम्याश्छान्दसो लुक्। तदाह अस्मात्परमिति। अन्तःशब्दात्परमित्यर्थः। अन्तर्वण इति। अत्रापि तेनैव णत्वम्। अनुपसर्गार्थमिति। उपसर्गे तु पूर्वेणैव सिद्धम्। न निविभ्याम्। निविभ्यामुत्तरोऽन्तःशब्दो नान्तोदात्तः स्यात्। पूर्वपदप्रकृतिस्वर इति। बहुव्रीहिसमासे 'बहुव्रीहौ प्रकृत्या' इति तत्पुरुषे 'तत्पुरुषे तुल्यार्थ—' इत्यनेन। परेरभितः। परेरुत्तरोऽभिशब्दो भाववाची मण्डलं चान्तोदात्तं स्यात्। अभितोभावीत्यस्यार्थमाह अभितो भावोऽस्यास्तीति। अथवा अभित उभयतो भवति नद्यादौ कूलादिकमित्यभितोभावि। 'सुप्यजातौ' इति णिनिः। परिकूलमिति। बहुव्रीहिः प्रादिसमासोऽव्ययीभावो वा। तत्र बहुव्रीहौ तत्पुरुषे च पूर्वपदप्रकृतिस्वरे प्राप्ते, अव्ययीभावे तु 'परिप्रत्युपापा—' इति, 'कूलतीर—' इति च प्राप्ते परितः कूलमस्य, परिगतं कूलमिति वा कूलात्कूलं वर्जयित्वेत्यर्थ इति। उदकस्याभाव इव विग्रहः। प्राद। प्रादुत्तरमस्वाङ्गवाचि संज्ञा-

---

भावः। तत्पुरुषे त्वव्ययपूर्वपदप्रकृतिस्वर एव। पर्शुः=पार्श्वम्। प्रवण इति। बहुव्रीहौ तत्पुरुषे च पूर्वपदप्रकृतिस्वरः प्राप्तः। 'प्रनिरन्तः' इति णत्वम्। परिवने 'परिप्रत्युपापे'ति प्राप्तम्। उपसर्गात्किम्? शरवणो देशः। बहुव्रीहावित्यस्य निवृत्त्यर्थं समासग्रहणम्। अन्तः। अन्तर्वणमित्यव्ययीभावेऽप्येतदेव। न निविभ्याम्। निविभ्यामुत्तरोऽन्तशब्दो नाऽन्तोदात्त इत्यर्थः। परेरभितोभावि म। अभितः= उभयतो भवत्यवश्यमिति 'सुप्यजातौ' इति णिनिः। नद्यादौ हि कूलायुभयतो भवति। परिकूलमिति। बहुव्रीहिः, प्रादिसमासोऽव्ययीभावो वा। अत्र 'परिप्रत्युपे'ति, 'कूलतीरे'ति वा प्राप्तम्। प्रादस्वाङ्गं स। प्रादुत्तरपदमस्वाङ्गवाचि सञ्ज्ञायामन्तोदात्तं समासमात्रे इत्यर्थः। प्रग्रहादयः प्रगृहादयो वा प्रादिसमासाः, बहुव्रीहयो वा।

(६-२-१८३) प्रगृह्यम्। अस्वाङ्गं किम्-प्रपदम्। ३६१८ निरुदकादीनि च (६-२-१८४) अन्तोदात्तानि। निरुदकम्। निरुपलम्। ३६१९ अभेर्मुखम्। (६-२-१८५) अभिमुखम् 'उपसर्गात्स्वाङ्गम्' (३६११) इति सिद्धे बहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं चेदम्। अभिमुखा शाला। ३६२० अपाच्च। (६-२-१८६) अपमुखम्। योगविभाग उत्तरार्थः। ३६२१ स्फिगपूतवीणाऽञ्जोऽध्वकुक्षिसीरनामनाम च। (६-२-१८७) अपाद्विमान्यन्तोदात्तानि। अपस्फिगम्। अपपूतम्। अपवीणम्। अञ्जस्। अपाञ्जः। अध्वन्। अपाध्वा। 'उपसर्गादध्वनः' (९४६) इत्यस्याभावे इदम्। एतदेव च ज्ञापकं समासान्तानित्यत्वे। अपकुक्षिः। सीरनाम। अपसीरम्। अपहलम्। नाम्। अपनाम। स्फिगपूतकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च। ३६२२

यामन्तोदात्तं स्यात्। **प्रगृह्यमिति**। प्रादिसमासः, बहुव्रीहिर्वा। **प्रपदमिति**। पूर्वपदप्रकृतिस्वरः। **निरुदकमित्यादि**। निर्गतमुदकं यस्मादिति बहुव्रीहिः। निर्गतमुदकमिति प्रादिसमासो वा। उदकस्याभाव इत्यव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम्। **अभे**। अभेरुत्तरपदं मुखमन्तोदात्तं स्यात्। **उपसर्गात्स्वाङ्गमितीति**। मुखं स्वाङ्गमिति तु न भवति 'नाव्ययदिक्शब्द-' इति निषेधात्। **अपाच्च**। अपादुत्तरं मुखमन्तोदात्तं स्यात्समासे। **अपमुखमिति**। प्रादिसमासे बहुव्रीहौ च पूर्वपदप्रकृतिस्वरे प्राप्ते मुखं वर्जयित्वेत्यव्ययीभावेऽपि 'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' इति प्राप्तेऽयमारम्भः। **उत्तरार्थ इति**। उत्तरत्र अपादित्यस्यैवानुवृत्तिर्यथा स्याद् अभेर्मा भूत्। **स्फिगपूत**। नामग्रहणं सीरेणैव संबध्यते न स्फिगादिभिः। स्फिगपूतकुक्षीणां पृथग्ग्रहणादिति हरदत्तः। तेन स्फिगपूतकुक्षयः पर्याया इति निश्चीयते। **उपसर्गादध्वन इत्यस्याभाव इति**। 'उपसर्गादध्वनः' इदं समासान्ताच्प्रत्ययविधायकम्, तदभावे। तस्मिन् सति अच्प्रत्ययस्य चित्त्वादेव सिद्धम्। ननु 'उपसर्गादध्वनः' इत्यनेन नित्योऽज् विधीयते तत्कथमुक्तमित्यस्याभाव इतीत्यत आह **एतदेव च ज्ञापकमिति**। यदि हि नित्यः समासान्तः स्याद् अध्वग्रहणमिहानर्थकं स्यात्, अच्प्रत्ययस्य चित्त्वादन्तोदात्तस्य सिद्धत्वात्। कृतं तु अध्वग्रहणं

निरुदकादिराकृतिगणः। **अभिमुखा शालेति**। प्रादिसमासो, बहुव्रीहिर्वा। **अपाच्च**। मुखमिति वर्त्तते। **अपमुखमिति**। अव्ययीभावेऽपि 'परिप्रत्युपापे'ति प्राप्तम्। **एतदेव चेति**। अन्यथा अचश्चित्त्वादेव सिद्धं स्यादिति भावः। **सीरनामेति**। नामग्रहणं सीरेणैव संबध्यते, न स्फिगादिभिः स्फिगपूतकुक्षीणां पृथग्ग्रहणात्। हरदत्तप्रामाण्यादेषां पर्यायत्वमवगम्यते। व्याख्यानादेवाऽस्य सीरग्रहणेन

अधेरुपरिस्थम्। (६-२-१८८) अध्यारूढो दन्तोऽधिदन्तः। दन्तस्योपरि जातो दन्तः। उपरिस्थं किम्-अधिकरणम्। ३९२३ **अनोरप्रधानकनीयसी।** (६-२-१८९) अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम्। अनुगतो ज्येष्ठोऽनुज्येष्ठः। पूर्वपदार्थप्रधानः प्रादिसमासः। अनुगतः कनीयाननुकनीयान्। उत्तरपदार्थप्रधानः। प्रधानार्थं च कनीयोग्रहणम्। अप्रेति किम्-अनुगतो ज्येष्ठोऽनुज्येष्ठः। ३९२४ **पुरुषश्चाऽन्वादिष्टः।** (६-२-१९०) अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः। अन्वादिष्टः पुरुषोऽनुपुरुषः। अन्वादिष्टः किम्-अनुगतः पुरुषोऽनुपुरुषः। ३९२५ **अतेरकृत्पदे।** (६-२-१९१) अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः। अत्यङ्कुशो नागः। अतिपदा गायत्री। अकृत्पदे किम्-अतिकारः। * **अतेर्धातुलोप इति वाच्यम्।** इह मा भूत्। शोभनो गार्ग्योऽतिगार्ग्यः। इह च स्यात्। अतिक्रान्तः कारक-

---

ज्ञापयति समासान्ता अनित्या इति। **स्फिगपूतकुक्षिग्रहणमिति।** यदा खतानि स्वाङ्गवाचीनि ध्रुवाणि च भवन्ति बहुव्रीहिश्च समासस्तदा 'उपसर्गात्स्वाङ्गम्' इत्येव सिद्धम्। **अधेः।** अधेरुत्तरमुपरिस्थवाचि अन्तोदात्तं स्यात्। उपरि तिष्ठतीत्युपरिस्थम्। 'सुपि स्थः' इति कः। तदेतद्दर्शयति **दन्तस्योपरीति। अधिकरणमिति।** अधिक्रियतेऽस्मिन्नित्यधिकरणं नैतदुपरिस्थवाचि किं त्वधः स्थवाचि। अत्र कृदुत्तरपदप्रकृतिस्वरेणाकार उदात्तः। **अनुज्येष्ठ इति।** उत्तरपदार्थस्याप्राधान्यं दर्शयति **पूर्वपदार्थप्रधानः प्रादिसमासोऽयमिति। प्रधानार्थं च कनीयोग्रहणमिति।** अन्यत्राप्रधानग्रहणेनैव सिद्धत्वात्। अनुगतो ज्येष्ठ इति विग्रहविशेषेण प्रधानवाचित्वं ज्येष्ठशब्दस्य दर्शयति **पुरुष। अन्वादिष्ट इति।** अनु पश्चादादिष्टः कथितः। कस्मिंश्चित्कथिते योऽन्यः कथ्यते सोऽन्वादिष्ट इत्यर्थः। **अतेरकृत्पदे।** अकृच्च पदं च अकृत्पदे। तदाह **अकृदन्तं पदशब्दश्चेति। अत्यङ्कुश इति।** अङ्कुशमतिक्रान्त इति विग्रहः। **अतिकारक इति।** शोभनः कारकः। पूजार्थोऽयमितिः। **अतेर्धातुलोप इति।** अत्यङ्कुशादौ वृत्तिविषयेऽतिशब्दोऽतिक्रान्तार्थवृत्तिरिति क्रमेरप्रयोग एव धातुलोपः। **अतिगार्ग्य इति।** यथान्यासे त्वत्रापि

संबन्ध इति तत्त्वम्। **स्फिगपूतकुक्षिग्रहणमिति।** वीणाग्रहणसहितः पाठोऽपपाठः। **प्रादिसमास इति।** अव्ययीभावे तु समासान्तोदात्तत्वेनाऽपि सिद्धम्। **पुरुषश्चाऽन्वा।** अन्वादिष्टोऽप्रधानशिष्टः। यथा भिक्षामटेत्यादौ। यद्वा कस्मिंश्चित्कथिते योऽन्यः पश्चात्कथ्यते सोऽन्वादिष्टः। **अतेर। अकृदन्तं पदशब्दश्चेति।** अयमाऽर्थो वृत्तौ। भाष्यात्तु अतेरुत्तरपदमन्तोदात्तम्, कृदन्तम्, पदशब्दश्च वर्जयित्वेत्यर्थः

तिकारुकः। ३९२६ **नेरनिधाने।** (६-२-१९२) निधानमप्रकाशता ततोऽन्यदनिधानं प्रकाशनमित्यर्थः। निमूलम्। न्यक्षम्। अनिधाने किम्-निहितो दण्डो निदण्डः। ३९२७ **प्रतेरंश्वादयस्तत्पुरुषे।** (६-२-१९३) प्रतेः परेऽश्वादयोऽन्तोदात्ताः। प्रतिगतोंऽशुः प्रत्यंशुः। प्रतिजनः। प्रतिराजा। समासान्तस्यानित्यत्वान्न टच्। ३९२८ **उपाद्द्व्यजजिनमगौरादयः।** (६-२-१९४) उपात्परं यद् द्व्यच्कमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा। उपदेवः। उपेन्द्रः। उपाजिनम्। अगौरादयः किम्- उपगौरः। उपतैषः। तत्पुरुषे किम्-उपगतः सोमोऽस्य स उपसोमः। ३९२९ **सोरवक्षेपणे।** (६-२-१९५) सुप्रत्यवसितः। सुरत्र पूजायामेव। वाक्यार्थस्त्वत्र निन्दा। असूयया तथाभिधानात्। सोः किम्-कुब्राह्मणः। अवक्षेपणे किम्-सुवृषभम्। ३९३० **विभाषोत्पुच्छे।** (६-२-१९६) तत्पुरुषे। उत्क्रान्तः पुच्छादुत्पुच्छः।

प्राप्नोति गत्यर्थशब्दस्याकृदन्तत्वात्। तस्मादव्याप्त्यतिव्याप्तिपरिहारार्थमकृत्पदे इत्येतदपनीय धातुलोप इति वक्तव्यमित्यर्थः। **नेरनि।** नीशब्दादुत्तरपदमन्तोदात्तं स्यादनिधानेऽर्थे। **निमूलमिति।** निर्गतं मूलमस्य, निर्गतं वा मूलं निर्मूलम्। **निदण्ड इति।** निशब्दो निधानार्थे वर्तते। कथं पुनर्निशब्दस्यायमर्थ इति चेच्छृणु। प्रादयो हि वृत्तिविषये सक्रियं साधनमाहुः। **समासान्तस्यानित्यत्वादिति।** इह राजन्शब्दस्य पाठ एव ज्ञापयति समासान्ता अनित्या इति। अन्यथा 'राजाहःसखिभ्यष्टच्' इति टचश्चित्त्वादेव सिद्धं स्यात्। **सोरव।** सोरुत्तरपदं निन्दायामन्तोदात्तं स्यात्तत्पुरुषे। **सुप्रत्यवसित इति।** 'सुः पूजायाम्' इति कर्मप्रवचनीयस्य सोः 'स्वती पूजायाम्' इति समासः। तेन सुप्रत्यवसिते षत्वादिविधिर्न शङ्कनीयः। ननु यदि सुशब्दोऽत्र पूजायां वर्तते कथं तर्हि क्षेपो गम्यत इत्याह **वाक्यार्थस्त्विति।** कथमित्याह **असूययेति।** यस्त्वनर्थे उपस्थिते सुखायमान आस्ते तं प्रत्येवमुक्ते क्षेपो गम्यते। **विभाषोत्।** उच्छब्दात्परः पुच्छशब्दः अन्तोदात्तो

प्रतीयते। **नेरनि।** निशब्दादुत्तरपदमन्तोदात्तं स्यादनिधानेऽर्थे। **निमूलमिति।** निर्गतं मूलमस्येति, निर्गतं मूलमिति वाऽर्थः। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम्। **निदण्ड इति।** निशब्दोऽत्र निधानार्थं ब्रवीति। प्रादयो हि वृत्तिविषये सक्रियं साधनमाहुः। **अनित्यत्वादिति।** अंश्वादिषु राजन्शब्दपाठ एवाऽत्र ज्ञापको बोध्यः। अंशु, जन, राजन्, उष्ट्र, खेटक, अजिर, आर्द्रा, श्रवण, कृत्तिका, अर्ध, पुर। वृत्। **उपाद्द्व्य।** गौर, तैष, तैल, लेट, लोट, जिह्वा, कृष्णा, कन्या, गुध, कल्प, पाद। वृत्। **उपगौर इति।** अव्ययपूर्वपदस्वरः। बहुव्रीहावप्येवम्।

यदा तु पुच्छमुदस्यति उत्पुच्छयते 'एरच्' (३२३१) उत्पुच्छस्तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम्। सेयमुभयत्र विभाषा। तत्पुरुषे किम्—उदस्तं पुच्छं येन स उत्पुच्छः। ३९३१ **द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ।** (६-२-१९७) आभ्यां परेष्वेष्वन्तोदात्तो वा। द्विपाच्चतुष्पाच्च रथाय। त्रिपादूर्ध्वः। द्विदन्। त्रिमूर्धानं सप्तरश्मिम्। मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः। तस्यैतत्प्रयोजनमसत्यपि समासान्ते अन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकमनित्यः समासान्तो भवतीति। यद्यपि च समासान्तः क्रियते

वा स्यात्तत्पुरुषे। **सेयमुभयत्र विभाषेति।** आद्यायां तु व्युत्पत्तौ अव्ययपूर्वपदप्रकृतिस्वरेण बाधितत्वात्समासस्यान्तोदात्तत्वमप्राप्तम्। द्वितीयायां तु व्युत्पत्तौ थाथादिस्वरेण नित्यमन्तोदात्तत्वं प्राप्तमिति कृत्वोभयत्र विभाषा। **द्वित्रिभ्याम्।** पादिति कृताकारलोपो गृह्यते। ददिति कृतददादेशो दन्तशब्दः। **आभ्यामिति।** द्वित्रिभ्याम्। **द्विपादिति।** द्वौ पादौ यस्येति द्विपात्। 'संख्यासुपूर्वस्य' इति पादशब्दस्याकारलोपः। **द्विदन्निति।** 'वयसि दन्तस्य दतृ'। **मूर्धन्नित्यकृतसमासान्त एव मूर्धन्शब्द इति।** एतच्च मूर्धस्विति निर्देशादेवावसीयते। अन्यथा मूर्धस्विति निर्देश्यं स्यात्। किमर्थं पुनरकृतसमासान्त एव निर्दिष्ट इत्यत आह **तस्येति।** यद्यकृतसमासान्तस्योपादानं तर्हि यदा समासान्तः क्रियते तदा न प्राप्नोति तस्य शब्दान्तरत्वादित्यत आह **यद्यपीति।** इह हि बहुव्रीहिः कार्यित्वेनोपात्तो न मूर्धन्शब्दः।

सोरव। सोरुत्तरपदमन्तोदात्तं निन्दायां तत्पुरुषे इत्यर्थः। **पूजायामेवेति।** एवञ्च कर्मप्रवचनीयत्वेन गतित्वाऽभावात्थाथादिस्वरोऽत्र नास्ति। **निन्देति।** अनर्थे उपस्थिते यः सुखायमान आस्ते तं प्रतीदं वाक्यमसूयया प्रयुज्यते। **कुब्राह्मण इति।** 'नञ्कुनिपातानां'मिति ईषदर्थे चरितार्थम्। **विभाषोत्पु।** तत्पुरुषरूपेऽपि उत्पुच्छशब्दे यदुत्तरपदं तदन्तोदात्तं वेत्यर्थः। **उत्क्रान्तः पुच्छादिति।** अत्राऽव्ययपूर्वपदप्रकृतिस्वरः प्राप्तः। **यदा त्विति।** केचित्त्वस्य लाक्षणिकत्वादत्र न ग्रहणम्। किञ्चाऽयमुत्पुच्छो न तत्पुरुषः, किं तु तदवयवकः, नापि तद्घटकः पुच्छशब्द उत्तरपदमित्याहुः। **मूर्धन्नित्यकृतेति।** केचित्तु "अत एव बहुव्रीहिग्रहणं चरितार्थम्। अन्यथा मूर्द्धन्स्वित्येव वदेत्। बहुव्रीहिभिन्नस्य समासान्तविरहादेव वारयिष्यते। न च द्विदन्त इति बहुव्रीहौ वयोवाचकत्वाऽभावाद्दत्रादेशाऽभावे शसादौ 'पद्दन्—' इति ददादेशे प्रवृत्त्यर्थं बहुव्रीहिग्रहणस्यावश्यकत्वेन समासान्तनिर्देशे गौरवम्। किं च समासान्तनिर्देशेऽत्र प्रवृत्तिर्न सुलभा। कृतसमासान्तसाहचर्येण दत्रादेशस्यैव ग्रहणापत्तेः। अत एव द्वयोर्दन्ता इति विग्रहे 'द्विदतः पश्ये'त्यादौ षष्ठीतत्पुरुषे न प्रवृत्तिरिति वाच्यम्,

तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव । द्विमूर्धः । त्रिमूर्धः । द्वित्रिभ्यां किम्-कल्याणमूर्धा । बहुव्रीहौ किम्-द्वयोर्मूर्धा द्विमूर्धा । ३६३२ सक्थं चाऽक्रान्तात् । (६-२-१९८) गौरसक्थः । श्लक्ष्णसक्थः । अक्रान्तात्किम्—चक्रसक्थः । समासान्तस्य षचश्चित्त्वान्नित्य-मेवान्तोदात्तत्वं भवति । ३६३३ परादिश्छन्दसि बहुलम् । (६-२-१९९) छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा । अजिसक्थमालभेत । अत्र वार्तिकम्-

---

तदेकदेशत्वाच्चेति । तस्य बहुव्रीहेरेकदेशः समासान्तस्तस्य भावस्तत्त्वं तस्मादिति स एवार्थः । तदेकदेशित्वादिति पाठे तु स बहुव्रीहिरेकदेशी अवयवी यस्य स तदेक-देशी समासान्तस्तद्भावस्तत्त्वं तस्मादिति स एवार्थः । तदेवं बहुव्रीहेः कार्यत्वात्तदेक-देशत्वाच्च समासान्तस्येति । यदा समासान्तः क्रियते तदाप्ययं विधिर्भवत्येव । द्विमूर्ध इति 'द्वित्रिभ्यां ष मूर्ध्नः' इति षः । कल्याणमूर्धेति । पूर्वपदप्रकृतिस्वर एवात्र भवति । कल्याणशब्दो 'लघावन्ते–' इत्यादिना मध्योदात्तः । सक्थं च । 'बहुव्रीहौ सक्थ्यक्ष्णोः–' इति षजन्तः सक्थशब्दः उत्तरपदमन्तोदात्तं वा स्यात् स चेत् क्रशब्दान्तात्परो न भवति । चित्त्वान्नित्यमन्तोदात्तत्वे प्राप्तेऽयं विकल्पः । गौरसक्थ इति । पक्षे पूर्वपदप्रकृतिस्वरः । 'शुक्लगौरयोरादिः' इति गौरस्याद्यन्तावुदात्तौ । तेनात्र त्रैस्वर्यम् । श्लक्ष्णसक्थ इति । 'कृत्यशूभ्यां क्स्नः' 'श्लिषेरच्चोपधायाः' इति श्लक्ष्णशब्दोऽन्तोदात्तः । षचश्चित्त्वादिति । एतेन चित्स्वरस्यापवादः । प्राप्तविभाषेयमिति दर्शयति परादिश्छन्दसि । परशब्देनात्र सक्थशब्द एव । तस्यैव पूर्वसूत्रे सन्निहितत्वात्तदाह परस्य सक्थशब्दस्येति । ननु तर्हि परग्रह-णमनर्थकम् । प्रकृतो हि सक्थशब्दोऽनुवर्तते । नैतदस्ति । बहुव्रीहेरपि प्रकृतत्वात्त-स्याद्युदात्तत्वं शङ्क्येत । 'विभाषोत्पुच्छ–' इत्यतो विभाषेति वर्तमाने बहुलग्रहणं

यथान्यासे हि पूर्वोत्तरसाहचर्येण विभक्त्यनिमित्तददादेशस्यैव ग्रहणात् , शसादिनिमित्त-कस्य बहिरङ्गत्वेनाऽसिद्धत्वाच्च, भाष्योक्तप्रकृत्यन्तरस्वपक्षेऽत्र तदप्राप्तेश्च । एवञ्च बहुव्रीहिग्रहणमपि समासान्ताऽनित्यत्वे ज्ञापक'मित्याहुः । बहुव्रीहिकार्यत्वादिति । 'अस्य स्वरस्ये'ति शेषः । तदेकदेशत्वाच्चेति । 'समासान्तस्ये'ति शेषः । समा-सान्तोदात्तत्वम्=एतत्सूत्रविहितम् । पक्षे भवत्येवेति । अत्र च सूत्रे समासस्यैव कार्यित्वमिति सिद्धान्तः । सक्थञ्चा । 'बहुव्रीहौ सक्थि' इति षजन्तः सक्थशब्दोऽ-न्तोदात्तो वा स्यात्, क्रशब्दान्तात्परश्चेन्न भवतीत्यर्थः । चित्त्वान्नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । 'नञ्दुःसुभ्यः' इत्यजन्तस्तु न गृह्यते, व्याख्यानादित्याहुः । पक्षे पूर्वपदप्रकृतिस्वरः । 'शुक्लगौरयोरादि'रिति गौरः पर्यायेणाऽऽद्यन्तोदात्तः । परादि-

* परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते। पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः । इति । परादिः । सुविजाता उरुक्षयां । परान्तः । नियेन मुष्टिहत्यया । यस्त्रिचक्रः । पूर्वान्तः । विश्वायुर्धेहि ।

इति समासस्वराः ।

बह्वर्थप्रदर्शनार्थम् । बहुलग्रहणस्यार्थं श्लोकेन दर्शयति परादिश्चेति । उरुक्षयेति । उरूणां क्षयो निवास इति विग्रहः । 'क्षयो निवासे' इति क्षयशब्द आद्युदात्तः । 'समासस्य' इत्यन्तोदात्तं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तत्थाथादिस्वरेण बाधितम् । अतो बाहुलकेनोत्तरपदाद्युदात्तत्वम् । एतच्च 'क्षि निवासगत्योः' इति धातोर्बाहुलकादधिकरणे 'एरच्' इति माधवेनोक्तम् । वस्तुतस्तु घप्रत्ययान्तः क्षयशब्द इति हरदत्तोक्तरीत्या थाथादिस्वरस्येहाप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैव सिद्धम् । 'परादिश्च' इत्यस्योदाहरणं तु 'चोदयित्री सूनृतानाम्' इति बोध्यम् । ऊन परिहाणे । चुरादिष्वदन्तः णिच् क्विप् सुतरामूनयत्यप्रियमिति सून् तदृतं च सूनृतम् । 'अयस्मयादीनि–' इति भत्वान्नलोपो न । मुष्टिहत्ययेति । मुष्ट्या हननं मुष्टिहत्या 'हनस्त च' इति सुबन्ते उपपदे क्यप् । कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः । त्रिचक्र इति । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः प्राप्तः । विश्वायुरिति । विश्वमायुर्यस्मिन्निति बहुव्रीहिः । विश्वशब्दः कन्प्रत्ययान्तः पूर्वपदप्रकृतिस्वरेणाद्युदात्तः प्राप्तः

इति स्वरसुबोधिन्यां समासस्वरप्रकरणम् ।

श्छन्दसि । इदञ्च समासमात्रे । परादिश्चेत्यस्योदाहरणम्–उरुक्षया इति । उरूणां= बहूनां क्षयावित्यर्थः । क्षयशब्दः 'क्षयो निवासे' इत्याद्युदात्तः । 'समासस्ये'त्यन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तम्, तत् थाथादिस्वरेण बाधितमतो बाहुलकेनोत्तरपदाद्युदात्तत्वमिति वेदभाष्ये स्थितम् । इदञ्च 'क्षि निवासगत्यो'रित्यतो बाहुलकादधिकरणे एरजन्तः क्षयशब्द' इत्यभिप्रायेण । यदि तु क्षयशब्दो घाऽन्तस्तदा थाथादिस्वराऽप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैवेदं सिद्धम् । अस्योदाहरणन्तु 'चोदयित्री सूनृताना'मिति । सूपूर्वादूनयतेः क्विप् । सुतरामूनयत्यप्रियमिति सून्=प्रियम्, तच्च तदृतञ्चेति सूनृतम् । 'अयस्मयादीनी'ति भत्वान्नलोपो न । परान्तोदाहरणं–मुष्टिहत्ययेति । मुष्ट्या हननं मुष्टिहत्या । 'हनस्त चे'ति क्यप् । कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः । त्रिचक्रे–बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरे प्राप्ते पराऽन्त उदात्तः । पूर्वान्तत्वे–विश्वायुरिति । विश्वमायुर्यस्मिन्धने इति बहुव्रीहिरयम् । विश्वशब्दः क्वन्नन्तत्वादाद्युदात्तः । तस्य पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं प्राप्तम् ।

अथ तिङन्तस्वराः।

३९३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः। (८-१-२७)

तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः। पचति गोत्रम्। पचतिपचति गोत्रम्। एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः। कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम्। तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनाद्यत्रैव कार्यं ज्ञेयम्। गोत्रादीनि किम्-पचति

तिङो। पचति गोत्रमिति। गोत्रं स्वकुलं पीडयतीत्यर्थः। एवं हि कुत्सा भवति। आभीक्ष्ण्ये उदाहरणमाह **पचतिपचति गोत्रमिति।** अनेकार्थत्वात्पचिः करोत्यर्थे वर्तते। विवाहादौ गोत्रं पुनः पुनः सुखीकरोतीत्यर्थः। 'नित्यवीप्सयोः' इति द्वित्वम्। ननु किं कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणम्, एतयोरर्थयोर्गोत्रादीनि भवन्ति। तानि च तिङः पराण्यनुदात्तानि भवन्ति, आहोस्विदनुदात्तविशेषणं तिङः पराणि गोत्रादीन्यनुदात्तानि भवन्त्येतयोरर्थयोरिति। अस्मिन्विचारे निर्णयमाह **कुत्सनाभीक्ष्ण्यग्रहणमिति।** अयं चार्थो योगविभागाल्लभ्यते। तिङो गोत्रादीनीत्येको योगोऽनुदात्तविधानार्थः। कुत्सनाभीक्ष्ण्ययोरिति द्वितीयो योगो गोत्रादीनीत्येव। परिभाषेयम्। इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव प्राह्याणि। तेन किं सिद्धं भवतीत्यत आह **तेनेति। अन्यत्रा·**

'व्यत्ययो बहुल'मित्यनेनैव सिद्धे 'परादि'रिति सूत्रम्, 'त्रिचक्रादीनां छन्दस्यन्तोदात्तत्व'मिति वार्तिकं च न कार्यमित्यर्थः। यद्वा वाग्रहणेऽनुवर्तमाने बहुलग्रहणमेतदर्थलाभार्थं कृतमित्यर्थः। यतो व्यत्ययो बहुलपदार्थ इति भावः। बहुलग्रहणादेव 'पुरः सो अस्तु' इत्यादौ शित्स्वराऽप्रवृत्तिः, 'अस्थन्वन्तं यदनस्था बिभर्ती'त्यत्र 'भीह्री'त्यस्य च स्वरस्याऽप्रवृत्तिरित्यादूह्यम्। **इति समासस्वराः।**

अथ तिङन्तस्वराः। पचति गोत्रमिति। गोत्रं=स्वकुलं पीडयतीत्यर्थः। एवं हि कुत्सा भवति। **पचतिपचति गोत्रमिति।** अनेकार्थत्वात्करोत्यर्थे पचिः। विवाहादौ गोत्रं पुनः पुनः सुखाकरोतीत्यर्थः। **पाठविशेषणमिति।** योगविभागः कार्यः। 'कुत्सनाऽऽभीक्ष्ण्ययो'रिति। 'गोत्रादिनी'ति वर्तते। परिभाषेयम्। यानि कुत्सनाभीक्ष्ण्यविषयाणि तान्येवात्र शास्त्रे गोत्रादीनीत्यर्थः। यत्र गोत्रादिपदघटितवाक्यस्य कस्यचित् कुत्सा बोध्यते क्रियागतमाभीक्ष्ण्यं वा, तानीति यावत्। **अन्यत्रापीति।** 'चनचिदिवे'त्यादौ। गोत्र, ब्रुव, प्रवचन, प्रहसन, प्रयतन, पवन, यजन, प्रकथन, प्रत्यायन, प्रचक्षण, विचक्षण, अवचक्षण, स्वाध्याय, भूयिष्ठा वा नाम। नामस्येतद्वा निहन्यते इत्यर्थोऽस्य। वृत्। तिङः किम्? कुत्सितम्गोत्रम्।

पापम्। कुरुसेति किम्—खनति गोत्रम्। समेत्य कूपम्। ३६३५ **तिङ्ङतिङः।** (८-१-२८) अतिङन्तात्पदात्परं तिङन्तं निहन्यते। अग्निमीळे। ३६३६ **न लुट्।** (८-१-२९) लुडन्तं न निहन्यते। श्वः कर्ता। श्वः कर्तारौ। ३६३७ **निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्।** (८-१-३०) एतैर्निपातैर्युक्तं न निहन्यते। यदग्ने स्यामहं त्वम्। युवा यदीकृथः। कुविदङ्ग

पीति। 'चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः' इत्यत्र। **पचति पापमिति।** पापमिति क्रियाविशेषणम्। **खनति गोत्रम्। समेत्य कूपमिति।** गोत्रं कुलं समुदितं भूत्वा कूपं खनतीत्यर्थः। **तिङः।** अनुदात्तं सर्वमिति वर्तते। तदाह **निहन्यत इति।** सर्वानुदात्तो निघात इति वैयाकरणानां व्यवहारः। अतिङ इति किम्। पचति भवति। एककर्तृका पचिक्रिया भवतीत्यर्थः। नन्वतिङ्ग्रहणं व्यर्थं 'समानवाक्ये निघातयुष्मदस्मदादेशाः' इत्युक्तत्वात्। एकस्मिंश्च वाक्ये तिङन्तद्वयाभावादिति चेत्सत्यम्। सूत्रकारेण समानवाक्याधिकारो न कृत इत्यतिङ्ग्रहणमकारि। भाष्ये तु अतिङ्ग्रहणं प्रत्याख्यातम्। **न लुट्।** इत आरभ्य निषेधसूत्राणि। **श्वःकर्ता। श्वःकर्ताराविति।** तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे कृते तासिरुदात्तः। एकवचने टिलोपे कृते उदात्तनिवृत्तिस्वरेण डा उदात्तः। **निपातैः।** यदित्यादीनां यत्रेत्यन्तानां द्वन्द्वे तृतीयायाः सौत्रो लुक्, न तु युक्तशब्देन समासः। निपातैरिति विशेषणस्यानन्वयापत्तेस्तदाह **एतैर्निपातैरिति।** यद् यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र एतैरित्यर्थः। 'यद्यदार्थे च हेतौ च विचारे यदि चेच्चणः। हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः। कच्चित्प्रश्ने नेत् निषेधे प्रशंसायां कुविस्मृतम्। यत्रेत्याधारे तत्र मूले कुविदुदाहृतः'। अन्येऽप्यूह्याः। तत्रग्रहणं साक्षात्संबन्धप्रति-

---

खनतीति। गोत्रं समेत्य कूपङ्खनतीत्यर्थः। **तिङ्ङतिङः।** 'पदस्य' 'पदात्' 'अनुदात्तं सर्वमपादादा'वित्याधिकारादत्र प्रकरणे निहन्यते=सर्वानुदात्तं क्रियते इत्यर्थः। यथाऽत्र सर्वस्यानुदात्तता तथा निरूपितं युष्मदस्मत्प्रकरणे। 'उदात्तस्वरितगुणविशिष्टमेव निहन्यते नान्य'दिति 'स्वरितो वाऽनुदात्ते' इति सूत्रस्थभाष्यस्वरसः। अतिङ इति किम्? पचति भवति। पाको भवतीत्यर्थः। वस्तुतोऽतिङ्ग्रहणं व्यर्थम्। समानवाक्याधिकारस्य वार्तिकोक्तस्यावश्यकत्वात्। 'एकतिङ् हि तत्र वाक्य'मिति भाष्ये स्पष्टम्। अपादादौ किम्? तन्त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। **निपातैर्यद्यदि।** यदादियत्रान्तानां द्वन्द्वे तृतीयायाः सौत्रो लुक्, न तु युक्तशब्देन समासः, निपातैरिति विशेषणस्याऽनन्वयापत्तेः। यदादयो निपातत्वादाद्युदात्ताः। सर्वनाम्नो यच्छब्दस्य न तु ग्रहणम्, यत्रयदोः पृथग्ग्रहणात्। **यद्यदार्थे च हेतौ च, विचारे**

आसन्। अर्चिंत्तिभिश्चकृमा कच्चित्। पुत्रासो यत्र पितरो भवन्ति । ३९३८ **नह प्रत्यारम्भे।** (८-१-३१) नहेत्यनेन युक्तं तिङन्तं नानुदात्तम्। प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः। नह भोक्ष्यसे। प्रत्यारम्भे किम्-नह वैतस्मिँ-

---

पादनार्थम् । **यदङ्ग स्यामिति।** अस्तेर्लिङि अम् । **चकृमा कच्चिदिति।** चकृमेति लिट्। प्रत्ययस्वरेणान्तोदात्तम् । कच्चिदयं निपातसमुदायः पदकाले कत् चिदिति विच्छिद्य पाठात्। निपातैः किम्। यत्कूजति शकटम्। एतीति यत्। इणः शतरि रूपम् 'इणो यण्' इति यण्। ननु प्रतिपदोक्तत्वात् यदादिभिः साहचर्याच्च निपातस्यैव यच्छब्दस्य ग्रहणं स्यादिति चेत्सत्यम्। एतदेव ज्ञापयति अस्मिन्प्रकरणे नेदमुभयं व्यवस्थापकमिति। तेन 'यावद्यथाभ्याम्' इत्यत्र 'यत्तदेतेभ्यः परिमाणे वतुप्' इति व्युत्पादितस्यापि लाक्षणिकस्यनिपातस्यापि ग्रहणं भवति। 'यावत् स्तोतृभ्योऽरदो गृणानाः' इति। अत्रादर इत्यट्स्वरेणाद्युदात्तम्। युक्तग्रहणं किम्। अन्यान्विते मा भूत्। 'यत्र क्व च ते मनो यज्ञं दधत उत्तरम्' इह यत्रेत्यस्योत्तरमित्यनेन साक्षात्संबन्धः। दध धारणे। अनुदात्तेत्। **नह प्रत्या।** नहशब्दो निपातसमुदायो

यदिच्चेत्यणः। **हन्त** हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः । **कच्चित्**प्रश्ने, निषेधे **नेत्** , प्रशंसायां **कुवित्**स्मृतः। नेन्निषेधे, यत्रेत्याधारे। हन्त करोति। 'हन्ताऽहं पृथिवीमिमां निदधानि हवे हवा'—इत्यादौ दधानीत्यादेर्निघातश्छान्दसः। एतेन 'हन्तो नु किमाससे' इत्यादिव्याख्यातम् । हन्तो इत्यखण्डो वा निपातो बोध्यः। तथैव पदकारैः पाठात्। 'नेदेवमायुनजन्नत्र देवाः'। युनजन्निति युजेर्लेटि रूपम् । अन्यश्चेन्नाभिगच्छति। अत्र नवाभ्यां विच्छिद्य इच्छब्दस्य पदकाले पाठान्निपातसमुदायावेतौ। चणिति चेदर्थे णित्। अन्यत्र त्वणित्। इन्द्रश्च मृळयाति नः । इन्द्रश्चेदस्मान् सुखयेदित्यर्थः। **कच्चिद्**दिति निपातसमुदायः प्रश्ने । यथा—चकृमा कच्चिदिति । यद्यप्यत्र एतैरेव परभूतैर्योगे नियमो नाऽन्यैरित्यर्थक-'यद्धितुपर'मिति नियमान्निषेधो न प्राप्नोति, तथापि छान्दसत्वेनाऽत्र नियमाऽप्रवृत्तिरित्याहुः। निपातैः किम्? यत् कूजति शकटम्। इणः शतरि इणो यणि रूपम्। ननु प्रतिपदोक्तत्वात्, यदादिभिर्निपातैः साहचर्याच्च निपात एव ग्रहीष्यते? सत्यम्। अत्र प्रकरणे कश्चिन्न्यायाऽप्रवृत्तिज्ञापनार्थत्वात्। तेन 'यावद्यथाभ्या'मिति सूत्रे वत्वन्तस्याऽव्ययस्य च यावच्छब्दस्य ग्रहणमिति स्पष्टमाकर। युक्तग्रहणं किम्? अन्यत्र साक्षादन्वितैरेतैः परम्परासंबन्धे मा भूदिति। यथा—'यत्र क्व च ते मनो दक्षं दधस उत्तरम्'। यत्रेत्यस्योत्तरमित्यनेन साक्षात् संबन्धः। दध धारणे। अनुदात्तेत्। **नहप्र।** नहेति निपातसमुदायो निषेधे वर्तते। **प्रतिषेधयुक्त इति।** पूर्वं भुङ्क्ष्वेत्युक्ते कर्तव्यतयोपन्यस्तस्य भोजनादेरव-

लोके दक्षिणमिच्छन्ति । ३६३६ सत्यं प्रश्ने (८-१-३२)। सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने । सत्यं भोक्ष्यसे । प्रश्ने किम्-सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम। ३६४० अङ्गाऽप्रातिलोम्ये (८-१-३३) अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम्। अङ्ग कुरु। अप्रातिलोम्ये किम्-अङ्ग कूजसि वृषल । इदानीं ज्ञास्यसि जाल्म । अनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवति । ३६४१ हि च (८-१-३४) । हियुक्तं तिङन्तं नानुदात्तम् । आ हि ष्मा याति । आ हि रुहन्तम् । ३६४२ छन्दस्यनेकमपि साकाङ्क्षम् (८-१-३५) । हीत्यनेन युक्तं

निषेधे वर्तते । नह भोक्ष्यस इति । अदुपदेशात्परत्वात्स इत्यस्य निघातः। स्यप्रत्ययस्वरेण मध्योदात्तं पदम् । पूर्वं भुङ्क्ष्वेत्युक्ते पुनः क्रोधेनापहासेन वा पुनः पुनः प्रतिषेध उक्ते पृच्छति भोजनं करिष्यति स एवमुच्यते । नह वै तस्मिन्निति । तस्मिन्शब्दः फिट्स्वरेणाद्युदात्तः । लोकशब्दः पचाद्यजन्तत्वादन्तोदात्तः । दक्षिणशब्दः 'स्वाङ्गशिष्टामदन्तानाम्' इति शिट्त्वादाद्युदात्तः । सत्यं भोक्ष्यस इति । इदं मध्योदात्तम् । अङ्गा । प्रातिलोम्यं प्रतिकूलकारित्वं ततोऽन्यदभिमतकारित्वमप्रातिलोम्यम् । एवं चानुलोम्य इति वक्तव्यम् । अङ्गशब्द उदाहरणेऽनुज्ञार्थो प्रत्युदाहरणे त्वमर्थे । अङ्ग कुर्विति । करोतेर्लोण्मध्यमपुरुषैकवचनं सिप् तस्य 'सेर्ह्यपिच्च' इति हिरादेशः । 'तनादिकृञ्भ्य उः' 'सार्वधातुक' इति करोतेर्गुणः । 'अत उत्सार्वधातुके' इत्युत्वम् 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुक् । कुर्वित्युप्रत्ययस्वरेणान्तोदात्तम्। हि च । अत्राप्यप्रातिलोम्य इति संबध्यते । आ हि ष्मेति । स्मशब्दो निपातोऽपि चादित्वादनुदात्तः । दीर्घत्वं च छान्दसम् । प्रातिलोम्ये तु हि कूज वृषल । उदाहरणे हिशब्दोऽवधारणे हेतौ वा । स च प्रत्युदाहरणे त्वमर्थे । छन्दस्य । अनेकमपीति । अपिशब्दादेकम् । तत्रानेकमुदाहरति

ज्ञानेऽवज्ञातुरुपालिप्सया पुनः क्रोधेनोपहासेन वा यत्र प्रतिषेधयुक्तं पृच्छ्यते स प्रत्यारम्भ इत्यर्थः । भोक्ष्यसे इति । स्यस्वरेण मध्योदात्तम् । अदुपदेशात्परत्वात् 'से' इत्यस्य निघातः । सत्यं भोक्ष्यसे इति । सत्यशब्दः 'सत्यादशपथे' इत्यन्तोदात्तो निपात्यत इत्याहुः । अङ्गाप्रा । अङ्गेति लुप्ततृतीयाकम् । अप्रातिलोम्यमानुकूल्यम् । अङ्गेति आमन्त्रितत्वादाद्युदात्तम् । 'अन्तोदात्तमिदमव्ययम् , 'इन्द्रो अङ्ग'त्यादौ तथादर्शना'दित्यन्ये । अङ्ग कूजतीति । अत्राऽङ्गेत्यमर्षे, कूजतीत्याद्युदात्तम् । हि च । आनुकूल्ये इत्येव । नेह 'हि कूज वृषल'। अत्राऽमर्षे हिशब्दः । उदाहरणेऽवधारणे। स्मशब्दो निपातत्वादाद्युदात्तः । छान्दसे दीर्घत्वषत्वे । छन्दस्यनेकमपि । अपिना

साकाङ्क्षमनेकमपि नानुदात्तम् । अनृतं हि मत्तो वदति पाप्मा चैनं युनाति । तिङन्तद्वयमपि न निहन्यते । ३६४३ यावद्यथाभ्याम् (८-१-३६) । आभ्यां युक्तं तिङन्तं नानुदात्तम् । यथा चित्रकयवमावतम् । ३६४४ **पूजायां नानन्तरम्** (८-१-३७) । यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नानुदात्तम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । पूजायां किम्–यावद्भुङ्क्ते । अनन्तरं किम्–यावद्देवदत्तः पचति शोभनम् । पूर्वेणात्र निघातः प्रतिषिध्यते । ३६४५ **उपसर्गव्यपेतं च** (८-१-३८) । पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधानार्थं वचनम् । यावत्प्रपचति शोभनम् । अनन्तरमित्येव ।

अनृतं हीति । हिर्यत इत्यर्थे । यस्मादयं मत्तोऽनृतं वदति ततः पाप्मा । पापमेनं युनाति अनृतवदनदोषेण युज्यत इति तात्पर्यार्थः । एकस्योदाहरणम् । अग्निर्हि पूर्वमुदजयत्तमिन्द्रोऽनुदजयत् । अत्र एकमजयदित्याद्युदात्तम् । परं निहतम् । अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति । अत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वचनम् । तत्र छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था । **यावद्यथा** । इयं तृतीया न पञ्चमीत्याह **आभ्यां युक्तमिति** । तेन परभूतयोरपि भवति । देवदत्तः पचति यावदिति यावच्छब्दो निपातश्चानिपातश्च गृह्यते 'निपातैर्यद्यदि' इत्यत्र ज्ञापितत्वात् । आद्यः साकल्ये, द्वितीयः परिमाणोपाधिको वतुप्रत्ययान्तः । यथाशब्दो योग्यतादिषु । **आवतमिति** । अवतेर्लोण्मध्यमपुरुषद्विवचनम् । यावच्छब्दोदाहरणं तु यावद् भुङ्क्ते देवदत्तः । पचति यावदिति । 'यावत्स्तोतृभ्योऽरदो गृणानाः' इति रद विलेखने लङि सिपि अट् अट्स्वरेणाद्युदात्तः । **पूजायाम्** । **नानुदात्तमिति** । अनुदात्त एव भवतीत्यर्थः । **यावद्देवदत्त इति** । पूर्वेणात्र निघातप्रतिषेधो व्यवाये यदि भवति उपसर्गेणैवेति नियमादत्रातिप्रसङ्गाभावेऽनन्तरग्रहणं शक्यमकर्तुम् । **उपसर्ग** । यावद्यथाभ्यां युक्तमनन्तरमुपसर्गेण व्यवहितं तिङन्तं पूजायां विषये नानुदात्तं स्यात् ।

एकमपि । **अनृतं हीति** । हिर्यत इत्यर्थे । यतोऽयं मत्तोऽनृतं वदति अतः पाप्मा=पाप चैनं न युनाति=न व्याप्नोतीत्यर्थः । अनृतवदनदोषेण न युज्यत इत्यर्थः । युञ् बन्धने इत्यस्य रूपं–युनातीति । अग्निर्हि पूर्वमुदजयत्तमिन्द्रोऽनूदजयत् । अत्रैकमाद्युदात्तमपरं निहतम् । अत्र हेतुहेतुमद्भावद्योतको हिरित्यनेकमपि तिङन्तं हियुक्तम् । तत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदेकस्य, क्वचिदनेकस्येत्येतदर्थमिदम् । छन्दसि दृष्टानुविधानाद्यथा प्रयोगं व्यवस्था । **यावद्यथा** । यावदिति निपाताऽनिपातयोरपि ग्रहणमित्युक्तम् । आद्यः साकल्ये, द्वितीयः परिमाणोपाधिको वतुबन्तः । यथा–

यावद्देवदत्तः प्रपचति शोभनम्। ३६४६ तुपश्यपश्यताऽहैः पूजायाम्। (८-१-३९)। एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम्। आदह स्वधामनु पुनर्गर्भत्वमेरिरे। ३६४७ अहो च (८-१-४०)। एतद्योगे नानुदात्तं पूजायाम्। अहो देवदत्तः पचति शोभनम्। ३६४८ शेषे विभाषा (८-१-४१) अहो इत्यनेन युक्तं तिङन्तं वानुदात्तं पूजायाम्। अहो कटं करिष्यति। ३६४९ पुरा च परीप्सायाम् (८-१-४२)। पुरेत्यनेन युक्तं वानुदात्तं त्वरायाम्।

अनन्तरमित्येवेति। तच्चानन्तर्यं सोपसर्गस्य न तिङन्तमात्रस्य। प्रपचतीति। प्रशब्द आद्युदात्तः। तुपश्य। तुप्रभृतीनि पूजाविषयाणि। उदाहरणानि तु माणवको भुङ्क्ते पश्य माणवको भुङ्क्ते। माणवकस्तु भुङ्क्ते इति आश्चर्ये तुशब्द इति भोजनस्य पूजा गम्यते। एवमन्यत्रापि। पूजायां किम्। पश्य मृगो धावति। तत्त्वकथनमेतत्। ननु 'पूजायां नानन्तरम्' इत्यतः पूजायामिति वर्तमाने पूजाग्रहणं व्यर्थमिति चेन्मैवम्। पूजाग्रहणं निघातप्रतिषेधार्थम्। तद्धि पूजाग्रहणं प्रतिषेधेन संबद्धम्। ततश्च तदनुवृत्ता विहापि न लुडित्यादिके विषये प्रतिषेधस्य प्रतिषेधः स्यात्, मा भूदेवं निघातस्यैव यथा स्यादित्येतदर्थं पूजाग्रहणम्। किं चानन्तरमित्येवं तदभूत् इह त्वविशेषेणोच्यते। अहो च। अहो देवदत्तः पचति शोभनमित्युदाहरणम्। पृथग्योगकरणमुत्तरार्थम्। उत्तरो अहोयोग एव यथा स्यात्तुप्रभृतिभिर्योगे मा भूदिति। शेषे। पूर्वं पूजायामित्युक्तत्वात्ततोऽन्यः शेष इत्याह पूजायामिति। अहो कटं करिष्यतीति। पक्षेऽस्य प्रत्ययस्वरः। अनाश्चर्यभूतमेव वस्तु असूयया आश्चर्यवत्प्रतिपाद्यते न पूजा। शेषग्रहणं स्पष्टार्थम्। योगविभागसामर्थ्यादिति। 'यावत्पुरा–' इति भविष्यति लट्। विद्योतनादावध्ययनं धर्मशास्त्रप्रतिषिद्धम्। अतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यते। पक्षे द्योतत इति धातुस्वरेणाद्युदात्तम्। 'तास्यनुदात्त–'

योग्यतादिषु। भ्यामिति तृतीया। तु पश्य। पूजायामिति वर्त्तमाने पुनः पूजाग्रहणमनन्तरग्रहणस्य, निघातनिषेधस्य चानुवृत्तिनिवृत्त्यर्थम्। निषेधाऽनुवृत्तौ हि 'निपातैर्यद्यदीत्यस्य प्रतिषेधः सम्भाव्येत। पूजायां किम्? पश्य मृगो धावति। तत्त्वकथनमेतत्। अहेत्यस्योदाहरणमाह आदहेति। त्वादिनान्तु 'तु माणवको भुङ्क्ते शोभन'मित्याद्यूह्यम्। अहो च। पृथग्योगकरणमुत्तरार्थम्। अहो देवदत्तः करोति शोभनम्। अत्रापि पूजायामित्येव। शेषे विभाषा। पूर्वं पूजायामित्युक्तेरपूजा शेषः। अहो कटमिति। पक्षे स्यप्रत्ययस्वरः। अनाश्चर्यभूतमेव वस्तु असूयता आश्चर्यवत्प्रतिपाद्यते, न पूजा। शेषग्रहणं स्पष्टार्थम्। पूर्वत्र चानुकृष्टत्वादेव पूजायामित्यस्य निवृत्तेः, योगविभागसामर्थ्याच्च। तेन पूजायां नित्यम्, तदभावे विकल्प इति व्यवस्थोपपत्तेः।

अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामित्यत्र पुराशब्दः । परीप्सायां किम्—न तेन स्म पुराधीयते । चिरातीतेऽत्र पुरा । **३६५० नन्वित्यनुज्ञैषणायाम् (८-१-४३)** । नन्वित्यनेन युक्तं तिङन्तं नानुदात्तमनुज्ञाप्रार्थनायाम् । ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । अन्विति किम्-अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतत् । **३६५१ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् (८-१-४४)** । क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम् । किं द्विजः पचत्याहोस्विद्गच्छति । क्रियेति

इति लसार्वधातुकनिघातः । **न तेन स्म पुराधीयत इति** । 'लट् स्मे' इति भूते लट् । अत्र भूतस्याध्ययनस्य चिरकालप्रवृत्तत्वं गम्यते न त्वरा । **नन्वि** । किंचित्कर्तुं स्वयमेवोद्यतस्य एवं क्रियतामित्यभ्युपगमोऽनुज्ञा । तस्याः एषणा प्रार्थनाऽनुज्ञैषणा । अनुज्ञाप्रार्थनेत्यर्थः । तदाह **अनुज्ञाप्रार्थनायामिति** । उदाहरणे वर्तमानसामीप्ये लट् । प्रत्युदाहरणे 'ननौ पृष्टप्रतिवचने' इति भूते लट् । **अन्विति किमिति** । अनुज्ञैषणायामिति किमित्यर्थः । 'अत्राऽप्रातिलोम्ये' इत्यादिवदितिकरणं विनापि सिद्धे एकनिपातोऽयमिति प्रदर्शनार्थमितिशब्दः । अन्यथा द्वयोर्निपातयोर्ग्रहणं संभाव्येत । **किं क्रिया । अप्रतिषिद्धमिति** । अप्रतिषिद्धार्थमित्यर्थः । **किं द्विजः पचति आहोस्विद्गच्छतीति** । आहोस्विदेको निपात आद्युदात्तः । अत्र केचित्

पुरा च । परीप्सा त्वरा । **निकटेति** । विद्योतनादावध्ययनं प्रतिषिद्धमतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यते । पक्षे द्योतते इत्याद्युदात्तः । पुराशब्दोऽत्र निपात एव, पूर्वोत्तरसाहचर्यात् । परीप्सेत्यस्य प्रत्युदाहरणमाह **न तेन स्मेति** । 'लट् स्मे' इति भूते लट् । भूतस्याऽध्ययनस्य चिरकालप्रवृत्तत्वं गम्यते न त्वरा । **नन्वित्यनुज्ञै** । किंचित्कर्तुमुद्यतस्यैवंक्रियतामित्यभ्युपगमाऽनुज्ञा, तस्याः प्रार्थना अनुज्ञैषणा । **ननु गच्छामि भोरि**त्युदाहरणे वर्तमानसामीप्ये लट् । गमनं प्रति मामाज्ञापयेति गम्यते । पृष्टप्रतिवचनाऽभावात् 'ननौ पृष्टप्रतिवचने' इत्यस्य न प्राप्तिः । नन्वित्यस्यैकनिपातत्वं ज्ञापयितुमिति शब्दः सूत्रे । **किङ्क्रियाप्रश्नेऽनुप** । 'कि' मिति लुप्ततृतीयान्तम् । क्रियाप्रश्न इति किमो विशेषणम् , अनुपसर्गमित्यादि तिङो विशेषणम् , **अप्रतिषिद्धमि**त्यप्रतिषिद्धार्थकं तिङन्तविशेषणम् । 'किम् देवदत्तः पचति आहोस्वित्पठती'त्यादावुभयोः संशयविषयत्वादुभयोरपि किमा युक्तत्वेन निघातनिषेध इति केचित् । हरदत्तस्तूभयोः संशयविषयत्वेऽपि किम्शब्देन स्वसन्निहितक्रियाविषय एव प्रश्नो द्योत्यते, क्रियान्तरविषयस्त्वाहोस्विदित्यनेन, तस्मात्तस्यैव निघातप्रतिषेध इत्याह । क्रियाप्रश्ने किम् ? कारकप्रश्ने मा भूत्—किम् भक्तं पचति

किम्-साधनप्रश्ने मा भूत्। किं भक्तं पचत्यपूपान्वा। प्रश्ने किम्-किं पठति। क्षेपोऽयम्। अनुपसर्गं किम्। किं प्रपचति उत प्रकरोति। अप्रतिषिद्धं किम्-किं द्विजो न पचति। ३६५२ लोपे विभाषा (८-१-४५)। किमोऽप्रयोगे उक्तं वा। देवदत्तः पचत्याहोस्वित्पठति। ३६५३ एहि मन्ये प्रहासे लृट् (८-१-४६)। एहि मन्ये इत्यनेन युक्तं लृडन्तं नानुदात्तं क्रीडायाम्। एहि मन्ये भक्तं भोक्ष्यसे, भुक्तं तत्त्वतिथिभिः। प्रहासे किम्-एहि मन्यसे ओदनं भोक्ष्ये

पूर्वं कियुक्तं तत्र निहन्यते उत्तरं तु न कियुक्तमिति निहन्यत एवेति। अन्ये तु यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योग इति उभयत्रापि निषेधेन भाव्यमिति। अत्र हरदत्तः—ये त्वाहुः पूर्वं कियुक्तमिति, ते मन्यन्ते—अस्तु द्वयोः संशयविषयत्वं किंशब्देन तु श्रुतक्रियाविषय एव प्रश्नो द्योत्यते। क्रियान्तरविषयस्तु प्रश्नः आहोस्विदित्यनेन। क्रियाप्रश्न इति चोच्यते। तस्मात्तस्यैव निघातप्रतिषेध इति। प्रश्ने किम्। किं देवदत्तः पठति। क्षेपे किंशब्दः। क्वचित्पुस्तके किमधीयत इति प्रत्युदाहरणं दृश्यते तन्नादर्तव्यं सोपसृष्टत्वात्। **लोपे**। 'किंक्रियाप्रश्न-' इति सूत्रमनुवर्तते। तथा चायमर्थः—क्रियाप्रश्ने यः किंशब्दः तस्य लोपे तदर्थेन युक्तमनुपसर्गमप्रतिषिद्धं च तिङन्तं वानुदात्तं स्यात्। सूत्रेण किमो लोपस्याविधानादर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विवक्षितः। **देवदत्तः पचति आहोस्वित्पठतीति**। अत्र पक्षे निघातः। पक्षे धातुस्वरेणाद्युदात्तता। किंशब्दाप्रयोगादप्राप्तविभाषेयम्। यद्वा तस्याप्रयोगेऽपि अर्थेन योगात्प्राप्तविभाषा पूर्वसूत्रस्थानि प्रत्युदाहरणानि किंशब्दं त्यक्त्वात्र योजनीयानि। **एहि**। **एहि मन्य इत्यनेन युक्तमिति**। समुदायाभिप्रायमेकवचनम्। अन्यथा आख्याते द्वे, आङ् चापर इति बहुवचनप्रसङ्गः। **एहि मन्ये भक्तं भोक्ष्यस इति**। मन्यसे भोक्ष्ये इत्यर्थे 'प्रहासे च मन्योपपदे-' इत्यादिना मन्ये भोक्ष्यस इति पुरुषव्यत्ययः। इदं च

आहोस्विदपूपानिति। 'प्रश्ने किम्? किंपठती'ति पाठः। **'किमधीते'** इत्यपपाठः, उपसृष्टत्वात्। **किं द्विज इति**। द्विजस्याऽपचनं हि प्रतिषिद्धम्। इदन्तु युक्तमुदाहरणं-किम् संन्यासी पचति। केचित्तु प्रतिषिद्धं प्रतिषेधस्तदप्रतियोग्यर्थकं तिङन्तमित्यर्थः, तदा मूलोक्तमेवोदाहरणमित्याहुः। **लोपे वि**। किमर्थयोगेऽपि किमोऽप्रयोगे इत्यर्थः। अर्थाध्याहारवाद इदम्। पक्षे निघातः। पक्षे आद्युदात्तम्-पचतीत्यादि। किंशब्दाऽप्रयोगादप्राप्तविभाषेयम्। केचित्तु तदर्थयोगस्य सत्त्वात्प्राप्तविभाषैवेत्याहुः। 'क्रियाप्रश्ने' इत्यादि सर्वमिहाप्यनुवर्तते। **एहि मन्ये प्रहास**। उदाहरणे 'प्रहासे च मन्योपपदे' इति पुरुषव्यत्ययः। **एहि मन्यसे इति**। सूत्रे 'एहि मन्ये' इति

इति सुष्ठु मन्यसे । 'गत्यर्थलोटा लृट्' (३९५८) इत्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहि मन्ये युक्ते प्रहास एव नान्यत्र । एहि मन्यसे ओदनं भोक्ष्ये ।

३९५४ जात्वपूर्वम् । (८-१-४७) अविद्यमानपूर्वं यज्जातु तेन युक्तं नानुदात्तम् । जातु भोक्ष्यसे । अपूर्वं किम्—कटं जातु करिष्यसि । ३९५५ **किंवृत्तं च चिदुत्तरम्** । (८-१-४८) अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम् ।

वृत्तिकारमतरीत्या प्रत्युदाहरणम् । तन्मते उत्तमोपादानं स्वातन्त्र्यात् । भाष्ये तु एहि मन्ये रथेन यास्यसीति प्रत्युदाहृतम् । तत्रायमर्थः—त्वं रथेन यास्यसीत्यहं मन्य एहीति । **गत्यर्थलोटा लृडित्यनेनैव सिद्ध इति** । आङ्पूर्वादिणो लोट् सिपो हिः । अत्र एहीत्यस्य गत्यर्थत्वाद् गत्यर्थलोटेति सिद्धमित्यर्थः । एहीत्यत्र आङः परत्वादिहीत्यत्र निघातः । **मन्ये इति** । मन ज्ञाने अनुदात्तेत् । श्यन्नन्तत्वादाद्युदात्तत्वम् । 'तास्यनुदात्तेत्—' इति अदुपदेशात्परत्वादिडनुदात्तः । **जात्व** । अपूर्वमित्येतज्जातुशब्दस्यैव विशेषणं न तिङन्तस्य । 'आहो उताहो' इति सूत्रे अनन्तरग्रहणाज्ज्ञापकात् । अन्यथा तत्राप्यपूर्वमित्यनुवृत्तेरेव केवलतिङन्तस्यानन्तर्यं लभ्यते इति किं तेन । ननु शेषे विभाषा वक्ष्यति । तत्र शेषग्रहणात्यर्थं तत्स्यात् शेषे विभाषा कश्च शेषः सान्तरं शेष इति अन्तरेणाप्यनन्तरग्रहणं प्रकृतः शेषः कथम् । अपूर्वमिति प्रकृतं सपूर्वः शेष इति तदेतत्सकलमभिप्रेत्याह **अविद्यमानपूर्वं यज्जात्विति । जातु भोक्ष्यस इति** । अदुपदेशात्परत्वात्से इत्यस्य निघातः । मध्योदात्तं पदम् जातुशब्दो निपातत्वादाद्युदात्तः । कटं जातु करिष्यसीति कटशब्दः फिट्स्वादन्तोदात्तः । **किंवृत्तम्** । वृत्तमित्यधिकरणे क्तः । किमो वृत्तं किंवृत्तम् । 'अधिकरणवाचिनश्च' इति कर्तरि षष्ठी । 'अधिकरणवाचिना च' इति समासनिषेधे प्राप्तेऽस्मादेव निपातनात्समासः । इह 'जात्वपूर्वम्' इत्यतोऽपूर्वमिति वर्तते । तद्व्याचष्टे **अविद्यमानपूर्वमिति** । यदि किंशब्दो वर्तते तत्सर्वं गृह्यते तर्हि किमोयः किंतरा-

---

'प्रहासे चे'ति सूत्रविहितलडनुवाद एव । धातुमात्रं विवक्षितमिति भावः । इदञ्च वृत्तौ स्पष्टम् । भाष्यात्तु उत्तमोऽपि विवक्षितः । 'एहि मन्ये रथेन यास्यसी'ति प्रत्युदाहरणम् । एहि त्वं रथेन यास्यसीत्यहं मन्ये इत्यर्थ इति प्रतीयते । **गत्यर्थेति**—। एहीत्यस्य गत्यर्थत्वादिति भावः । **जात्वपूर्वम्** । तृतीयास्थाने व्यत्ययेन प्रथमा उभयत्र । **अविद्यमानपूर्वमिति** जातुविशेषणं, न तिङन्तस्य, 'आहोउताहो' सूत्रेऽनन्तरग्रहणादिति वक्ष्यते । **किंवृत्तञ्च चि । चिदुत्तरमिति** । बहुव्रीहिः—किंवृत्तविशेषणम् । प्रथमा पूर्ववत् । पूर्वसूत्रादपूर्वमिति वर्तते, तेन 'देवदत्तः किंचि-

कश्चिद् भुङ्क्ते । कतरश्चित् । कतमश्चिद्वा । चिदुत्तरं किम्—को भुङ्क्ते । अपूर्वमित्येव । रामः किंचित्पठति । ३९५६ **आहो उताहो चाऽनन्तरम्** । (८-१-४९) आहो उताहो इत्याभ्यां युक्तं तिङन्तं नानुदात्तम् । आहो उताहो वा भुङ्क्ते । अनन्तरमित्येव । शेषे विभाषां वक्ष्यति । अपूर्वेति किम्-देव आहो भुङ्क्ते । ३९५७ **शेषे विभाषा** । (८-१-५०) आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम् । आहो देवः पचति । ३९५८ **गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्** । (८-१-५१) गत्यर्थानां लोटा युक्तं तिङन्तं नानुदात्तम् , यत्रैव कारके लोट् तत्रैव लृडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यस्येनम् । उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थे किम्—पच देव ओदनं भोक्ष्यसेऽन्नम् । लोटा किम्—आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम् । लृट्

मित्यादेरपि प्रसंगः स्यादिति मत्वा परिसंचष्टे **विभक्त्यन्तमित्यादि** । **शेषे वि** । अनन्तरापेक्षं शेषत्वमित्याह **व्यवहितमिति** । **पचतीति** । पक्षे धातुस्वरेणाद्युदात्तम् । **गत्यर्थ** । गतिरर्थो येषामिति विग्रहः । गत्यर्थलोटा युक्तमिति । योगः पुनरर्थद्वारको निमित्तनिमित्तीभावः । लोडन्तवाच्यं हि निमित्तं लृडन्तवाच्यस्य न चेत्कारकम् । सर्वान्यदित्यस्य व्याख्यानमाह **यत्रैव कारके लोडित्यादि** । कर्तरि कर्मणि वा । **आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनमिति** । आद्युदात्तः गच्छदेवदत्तशब्दयोः पदात्परत्वान्निघातः । ग्रामशब्दो 'ग्रसेरा च' इति मन्नन्त आद्युदात्तः । **द्रक्ष्यसीति** । प्रत्ययस्वरेण मध्योदात्तम् । **उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्त इति** । वहेः प्रापणार्थत्वेऽपि गतिर्गम्यत इति गत्यर्थत्वम् । उह्यन्तामित्यत्र देवदत्तरामयोः कर्त्रोर्भेदेऽपि लकारवाच्यस्य शालेः कर्मणः अभेदात् ।

त्पचती'त्यादौ न । **विभक्त्यन्तमित्यादि** । [न तु किमीय इत्यादि] । व्याख्यानमेवाऽत्र शरणम् । किमा वृत्तं=निष्पन्नमित्यर्थः । चिच्छब्दश्चादिगणेऽनुदात्तो निपात्यते । **आहो उताहो** । अपूर्वं किम् ? 'अयमाहो भुङ्क्ते । **वक्ष्यतीति** । सान्तरं हि तत्र शेषः । तथा च तत्र शेषग्रहणस्यर्थमनन्तरग्रहणमिति भावः । नन्वपूर्वमित्यनुवर्तनात्तस्य च तिङन्तविशेषणत्वात्सपूर्वं तिङन्तं शेषीभविष्यतीति किमन्तरग्रहणेनेति चेन्न, इदमेव ज्ञापयति—'अपूर्वमिति न तिङन्तविशेषण'मिति स्पष्टं भाष्ये । **शेषे विभाषा** । अपूर्वमित्येव । तेन 'अयमाहो देवो वर्षती'त्यत्र निहतमेव । **गत्यर्थलोटा** । अत्र **सर्वेति** । लुप्तविभक्तिकं कारकविशेषणम् । कारकपदेन प्रत्यासत्त्या लकारवाच्यं कर्तृकर्मरूपमेव कारकं गृह्यते । स्पष्टञ्चेदं भाष्ये । तदाह **यत्रैवेति** । अस्य फलमाह **उह्यन्तां देवदत्तेनेति** । अत्र यद्यपि कर्तृभेदोऽस्ति तथा-

किम्-आगच्छ देव ग्रामं पश्यस्येनम्। न चेदिति किम्-आगच्छ देव ग्रामम्, पिता ते ओदनं भोक्ष्यते। सर्वं किम्-आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातनिषेधो यथा स्यात्। यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते। ३९५९ लोट् च। (८-१-५२) लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम्। आगच्छ देव ग्रामं पश्य। गत्यर्थेति किम्-पच देवौदनं भुङ्क्ष्वैनम्। लोट् किम्-आगच्छ देव ग्रामं पश्यसि। न चेत्कारकं सर्वान्यदित्येव। आगच्छ देव ग्रामं, पश्यत्वेनं रामः। सर्वग्रहणमिह स्यादेव। आगच्छ देव ग्रामं त्वं चाहं च पश्यावः। योगविभाग उत्तरार्थः। ३९६० विभाषितं सोपसर्गमनु-

---

आगच्छेरिति। लिङयं न लोट्। **द्रक्ष्यसीति।** वर्तमानसामीप्ये लट्। **आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यत इति।** कारकशब्देन सूत्रे कारकव्यक्तिरेवाश्रीयते तेन कर्तृत्वाभेदेऽपि व्यक्तिभेदात्कारकभेदः। **त्वं चाहं च द्रक्ष्याव एनमिति।** अक्रियमाणे सर्वग्रहणे यत्र वाच्यं न भिद्यते तत्रैव भवितव्यमिह च भिद्यते वाच्यम्। एकत्रैकमन्यत्र द्वयमिति निघातप्रतिषेधो न स्यात्, क्रियमाणे तु सर्वग्रहणे लोड्वाच्यकारकापेक्षया लृड्वाच्यकारकाधिक्येऽपि निघातप्रतिषेधः सिद्धः। **लोट् च।** लुट्ग्रहणं विहाय 'गत्यर्थलोटा-' इति संपूर्णं सूत्रमनुवर्तते। तदाह **गत्यर्थेत्यादि आगच्छेति।** गत्यर्थलोटा युक्तं पश्येति तु निहतमेव। **योगविभाग उत्तरार्थ इति।** उत्तरो विकल्पो लोट एव यथा स्यात्, लृटो मा भूद् इति। **विभाषितम्।** पूर्वसूत्रं सर्वमनुवर्तते। प्राप्तविभाषा चेयम्। गत्यर्थलोटा युक्तं लोडन्तं सोपसर्गमुत्तमभिन्नं विभाषा नानुदात्तं स्याद् न चेत्कारकं सर्वा-

---

ऽपि लवाच्यकर्मभेदो नास्तीति भवत्येव प्रतिषेधः। एवम् 'आगच्छ देव ग्रामं, रामं द्रक्ष्यसी'त्यादौ कर्मभेदेऽपि लवाच्यकर्त्रैक्याद्भवत्येव। **पचौदनमिति।** अत्र लृडन्तं निहतमेव। **पिता ते ओदनमिति।** आगमने देवः कर्ता, ग्रामः कर्म, भोजने तत्पिता कर्ता, ओदनः कर्मेति कारकभेदः। **त्वञ्चाहञ्चेति।** लोड्वाच्यकारकापेक्षया यत्र लृड्वाच्यं कारकं किंचिदधिकं भवति तत्राप्ययं प्रतिषेधो यथा स्यादित्यर्थं सर्वग्रहणम्। प्रकृते एकस्याऽन्यत्वेऽपि सर्वं नाऽन्यदिति भावः। एवं लोड्वाच्यकारकापेक्षया लृड्वाच्यं कारकं यदा न्यूनं भवति, लोड्वाच्यमधिकं भवति 'आगच्छतं देवदत्तयज्ञदत्तौ। देवदत्त ओदनं भोक्ष्यते' इति,-अत्रापि प्रतिषेधो भवत्येव। सर्वशब्दस्वारस्येन लृट्सर्वकारके एव लोट्सम्बन्धितदपेक्षयाऽन्यत्वाऽभावस्य निमित्तत्वप्रतीतेरित्याहुः। **लोट् च। न चेत्कारकमिति।** गत्यर्थलोड्वाच्यकारकापेक्षया उदाहरणभूतलोड्वाच्यकारकं सर्वमेदन्यन्न भवतीत्यर्थः। **विभाषितं सोपसर्गमनु।**

समम्। (८-१-५३) लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वानुदात्तम्। आगच्छ देव ग्रामं प्रविश। सोपसर्गं किम्-आगच्छ देव ग्रामं पश्य। अनुत्तमं किम्-आगच्छानि देव ग्रामं प्रविशानि। ३९६१ हन्त च। (८-१-५४) हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम्। हन्त प्रविश। सोपसर्गमित्येव। हन्त कुरु। 'निपातैर्यद्यदि' (३९३७) इति निघातप्रतिषेधः। अनुत्तमं किम्-हन्त प्रभुञ्जावहै। ३९६२ आम एकान्तरमामन्त्रितमनन्तिके। (८-१-५५) आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम्। आम् पचसि देवदत्त ३। एकान्तरं किम्-आम् प्रपचसि देवदत्त ३। आमन्त्रितं किम्-आम् ; पचति देवदत्तः। अनन्तिके किम्-आम् पचसि देवदत्त। ३९६३ यद्धितुपरं छन्दसि। (८-

---

न्यत्। **सोपसर्गमिति**। उपसर्गेण सह। उपसर्गे विद्यमान इत्यर्थः। सहशब्दो विद्यमानार्थो, न तुल्ययोगे। न ह्युपसर्गस्य निघातप्रसङ्गोऽस्ति। **आगच्छ देव ग्रामं प्रविशेति**। अत्र विशेति पक्षे निहतं पक्षे शप्रत्ययस्वरेणान्तोदात्तम्। यदान्तोदात्तं तदा 'तिङि चोदात्तवति-' इति गतेर्निघातः। **पश्य। प्रविशानीति**। उभयत्रापि पूर्वेण नित्यमेव निघातः। प्रत्युदाहरणानि पूर्वसूत्रोक्तान्येव प्रशब्दपूर्वाणि योज्यानि। **हन्त च**। पूर्वसूत्रमनुवर्तते लोड्ग्रहणं च। तदाह **हन्तेत्यनेनेत्यादि**। प्राप्तविभाषेयम् 'निपातैर्यद्यदि-' इति निघातनिषेधस्य सिद्धत्वात्। **प्रभुञ्जावहा इति**। भुजेर्लोट् 'भुजोऽनवने' इत्यात्मनेपदं च, हिः टेरेत्वं श्नम्। 'आडुत्तमस्य पिच्च' 'एत ऐ' अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वम्। विकरणस्वरः। **आमः**। अन्तरयतीत्यन्तरं व्यवधायकम्। एकमन्तरं यस्य तदेकान्तरम्। उदाहरणे निघाते प्रतिषिद्धे षाष्ठमाद्युदात्तत्वम्। **अनन्तिक इति किमिति**। अत्र केचिदनन्तिकं दूरं तस्यैव

अनुत्तममित्यस्य उत्तमपुरुषभिन्नमित्यर्थः। न चेत्कारकं सर्वान्यदित्येव। पक्षे निहतम्, पक्षे त्रैस्वर्यम्। प्रत्युदाहरणे पूर्वेण नित्यं निघातप्रतिषेधः। **हन्त च**। 'विभाषितमिति सम्पूर्णसूत्रम्, 'लोडि'ति च वर्त्तते। गत्यर्थलोटेत्यादि निवृत्तम्, अस्याऽपि विकल्पेन निषेधविधायकत्वात्। 'निपातैर्यद्यदी'ति नित्यनिषेधप्राप्तिः प्राप्तविभाषेयम्। **हन्त प्रविशेति**। पक्षेऽन्तोदात्तम्। पक्षे निहतम्। **प्रभुञ्जावहै इति**। 'भुजोऽनवने' इत्यात्मनेपदम्। अत्रापि 'निपातैर्यद्यदी'ति नित्यं निघातप्रतिषेधः। **आम एकान्तर**। अनन्तिकशब्देनाऽसन्निहितमदूरं चोच्यते, अत एवोदाहरणे प्लुतैकश्रुती न। आमन्त्रितत्वादाद्युदात्तं पदम्। 'आम्भो देवदत्ते'त्यत्र 'नामन्त्रिते' इत्यविद्यमानवत्त्वनिषेधादेकान्तरत्वं बोध्यम्। **आमप्रपचसीति**। अत्र निघातो भवत्येव। आमः किम्? शाकं पचति देवदत्त। **आम्पचसि देवदत्तेति**। अत्राऽन्तिकत्वा-

१-५६) तिङन्तं नानुदात्तम्। उदसृजो यदङ्गिरः। उशन्ति हि। आख्यास्यामि तु ते। 'निपातैर्यद्' (३९३७) इति 'हि च' (३९४१) तुपश्य इति च सिद्धे नियमार्थमिदम् एतैरेव परभूतैर्योगे नान्यैरिति। आये स्वारोहावैहि। एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति। ३९६४ चनचिदिवगोत्रादितद्धिताम्रेडितेष्व-

सामर्थ्यादेकश्रुतेर्निघातस्य च प्रतिषेधः। यदि निघातमात्रनिषेधोऽयं तदा निघातस्यैकश्रुत्या बाधितत्वादिदं सूत्रं व्यर्थं स्यादिति सामर्थ्यादेव चैतन्निषेधं प्रति एकश्रुतेरसिद्धत्वाभावः। प्लुतोदात्तस्तु न प्रतिषिध्यत इत्याहुः। अपरे तु अनन्तिक इत्यनेन यत्र दूरं न च संनिकृष्टं तदुच्यते न दूरमेव। अन्यथा दूरमित्येव वदेत्। तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति अदूरत्वात्प्लुतोदात्तोऽपि नोदाहर्तव्य इति। यद्धितु। उदसृज इति। तुदादेः सृजेर्लङि सिप्यट्। उशन्ति हीति। वश कान्तौ। अदादिः। लटि 'झोन्तः'। ग्रह्यादित्वात्संप्रसारणम्। नान्यैरिति। यदिहन्तेत्यादिभिरित्यर्थः। आये स्वारोहावैहीति। रुहेर्लोट्। वस् शप्। 'आडुत्तमस्य पिच्च' 'लोटो लङ्वत्' इति लङ्वद्भावात् 'नित्यं ङितः' इति सलोपः। आङ्पूर्वादिणो लोट्। सिपो हिः। एहि। तेन परभूतेन युक्तस्य रोहावेत्यस्य 'लोट् च' इति प्राप्तो निघातप्रतिषेधो नियमान्निवर्त्यते। तेन स्वशब्दाश्रयो निघातो बोध्यः। स्वाशब्दे 'रो रि' इति लोपः। 'ढ्रलोपे–' इति दीर्घः। स्वो रोहावेति पाठे तु छान्दसत्वादुत्वम्। चनचि।

नैकश्रुतिः, किन्तु निघात एव। भाष्येऽनन्तिकं=दूरमिति पक्षान्तरमप्युक्तम्। तत्र सामर्थ्यादेकश्रुतेर्बाधः। अन्यथा निघातस्यैकश्रुत्या बाधितत्वादिदं व्यर्थमेव स्यात्। अत एवैकश्रुतेरसिद्धत्वाऽभावोऽपि बोध्यः। प्रकरणाच्च निघातस्याऽपि बाधः। अन्यथैकश्रुतिप्रकरण एव 'नाऽऽम एकान्तर'मिति ब्रूयात्। प्लुतोदात्तस्य तु नाऽयं प्रतिषेधः, 'आम एकान्तरे ऐकश्रुत्यप्रतिषेधः' इति वार्तिकात्। मूलेऽपि 'अनन्तिकं=दूरम्, तत्र विहितमैकश्रुत्यं न, 'निघातनिषेधप्रकरणे पाठाद् वचनसामर्थ्यान्निघातोऽपि ने'त्येव पाठः। 'प्लुतश्च ने'त्यपपाठः। अस्य वार्तिकोक्तपक्षस्य 'नैव वा पुनरत्रैकश्रुतिः प्राप्नोति' इत्यादिना भाष्यकृता प्रत्याख्यानाद् अत्र सूत्रे आद्यः पक्ष एव ज्यायान्। एवञ्चैतदुदाहरणविषये प्लुतो नैवेति भाष्यप्रदीपोद्द्योते निरूपितम्। यद्धितुपरम्। इदं बहुव्रीहिणा तिङो विशेषणम्। नान्यैरिति। यदिहन्तेत्यादिभिरित्यर्थः। निघातो भवतीति। न तु 'लोट् चे'ति प्राप्तो निषेधो भवतीत्यर्थः। अत्र सूत्रे रुहेर्गत्यर्थत्वस्य भाष्ये उक्तत्वेन तद्योगादेहीत्यस्य प्राप्तो निघातनिषेधो 'विभाषितं सोपसर्ग'मित्युक्तेर्न भवतीत्याहुः। भाष्ये तु छान्दसत्वेन समाहितम्। चनचिदि। अत्र गतिग्रहणेन उपसर्गग्रहणम्। तेन 'शुक्लीकरोति चने'त्यत्र करोतिशब्दोऽनिहत

गतेः । (८-१-५७) एषु षट्सु परतस्तिङन्तं नानुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । अगतेः किम्—देवः प्रपचति चन । **३९६५ चादिषु च ।** (८-१-५८) चवाहाहैवेषु तिङन्तं नानुदात्तम् । देवः पचति च खादति च । अगतेरित्येव । देवः प्रपचति च । प्रखादति च । प्रथमस्य 'चवायोगे' (३९६६) इति निघातः प्रतिषिध्यते । द्वितीयं तु निहन्यत एव । **३९६६ चवायोगे प्रथमा ।** (८-१-५९) चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता । गाश्च चारयति वीणां वा वादयति । इतो वा सातिमीमहे । उत्तरवाक्ययोरनुषज्यमानीयतिङन्तापेक्षयेयं

एष्विति । चन चित् इव गोत्रादि तद्धित आम्रेडित एष्वित्यर्थः । इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोरेव गृह्यन्ते इति तिङो गोत्रादीत्यत्रैवोक्तम् । **पचतिकल्पमिति ।** तत्रानुदात्त एव तद्धितो प्राह्यः । अन्यत्र तद्धितस्वरेण तिङन्तस्वरो बाध्यते । अयं पचतिदेश्यः । **चादिषु च ।** 'न चवाहाहैवयुक्ते' इति सूत्रे निर्दिष्टाश्चादयोऽत्र गृह्यन्ते संनिकृष्टत्वात्, न तु 'चादयोऽसत्त्वे' इति सूत्रनिर्दिष्टाः विप्रकृष्टत्वात् । तदेतदाह **चवाहाहैवेषु परेष्विति । पचति च खादति चेति ।** उभयत्र खादतीत्यस्य निघातप्रसङ्ग एव नास्ति नानावाक्यत्वात् । चवायोगो हि समुच्चये विकल्पे वा सति भवति स चानेकस्य धर्म इति कृत्वोदाहृतम् । **चवा । प्रथमेति ।** स्त्रीलिङ्गस्य निर्वाहमाह **प्रथमातिङ्विभक्तिरिति ।** प्रथममुच्चारिता तिङ्विभक्तिरित्यर्थः । अगतेरिति प्रथमसूत्रे चानुकृष्टत्वादिह नानुवर्तते । **उत्तरवाक्ययोरिति ।** 'दिवो वा पार्थिवादधि' । 'इन्द्रं महो वा रजसः' इत्येतयोरित्यर्थः । ननु श्रुतस्यैव तिङन्तस्योत्तरत्रानुषङ्गः तत्कथं प्राथम्यमिति चेत्, अनुषक्तस्याप्यौपाधिकं भेदं पुरस्कृत्य प्राथम्याश्रयणेन निघातनिषेधस्य छन्दसि बहुशो दृष्टत्वात् । एतच्चेहैव मन्त्रे नियमेन

एष्विति स्पष्टं भाष्ये । कुत्सनाभीक्ष्ण्ययोरेव गोत्रादीनि । नेह—सुखीकरोति गोत्रम् । अत्र निघात एव । **चादिषु च ।** 'न चवाहे'ति सूत्रनिर्दिष्टाश्चादय एव गृह्यन्ते, सन्निकृष्टत्वात्, तदाह **चवेत्यादि ।** उदाहरणे खादतीत्यस्य न निघातप्रसङ्गः, नानावाक्यत्वात् । समुच्चयविकल्पयोरनेकधर्मत्वात्परं तदुक्तिः । **चवायोग इति ।** 'चवायोगे प्रथमा' इत्युत्तरसूत्रेणेत्यर्थः । इदञ्च वृत्तौ स्पष्टम् । चानुकृष्टत्वादत्राऽगतेरिति नानुवर्तते इति तदाशयः । 'चनचिदिवे'त्यत्र कैयटस्तु 'चवायोगे इति—अत्राप्यनुवर्तते' इत्याह **चवायो । प्रथमेत्यस्य** प्रथमोच्चारितेत्यर्थः । योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधार्थम् । तद्ध्वनयन्नुदाहरति **गाश्च चारयतीति ।** नियमोऽयं—'प्रथमैव नान्ये'ति । **इतो वा सातिमिति ।** अस्य 'दिवो वा पार्थि-

प्राथमिकी। योगे किम्-पूर्वभूतयोरपि योगे निघातार्थम्। प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत्। **३६६७ हेति क्षियायाम्।** (८-१-६०) इत्युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता धर्मव्यतिक्रमे। स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति ३। 'क्षियाशी' (३६१३) इति प्लुतः। **३६६८ अहेति विनियोगे च।** (८-१-६१) अहयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता नानाप्रयोगे नियोगे क्षियायां च। त्वमह ग्रामं गच्छ। क्षियायाम्। स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति। **३६६९ चाहलोप एवेत्यवधारणम्।** (८-१-६२) च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु। ग्राममरण्यं च गच्छत्वित्यर्थः। देव एव ग्रामं गच्छतु। रम एवारण्यं गच्छतु। ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः। इहाहलोपः। स च केवलार्थः। अवधारणं किम्—देव क्व भोक्ष्यसे।

मुष्टिहत्ययेति च मन्त्रे वेदभाष्ये स्पष्टम्। **हेति।** **स्वयं ह रथेन यातीति।** उपाध्याये पदातौ गच्छति सति शिष्यस्य रथेन गमनं प्रतिषिद्धमित्याचारभेदः। **अहेति।** अनेकस्मिन्प्रयोजने प्रेषणं विनियोगः। तदाह **नानाप्रयोजने नियोगे इति।** अनेकप्रयोजनो नियोगः प्रेषणम्। उदाहरणे पूर्वत्र प्रैषे प्लुतः, उत्तरत्र क्षियायाम्। **चाहलोप।** अवधारणार्थैवशब्दप्रयोगे सति प्रथमं तिङन्तं नानुदात्तम्। सूत्रेण चाहलोपस्याविधानाद् अर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विवक्षितः। चशब्दः समुच्चयार्थः। अहशब्दः केवलार्थः। समानकर्तृकेऽहलोपः। उदाहरणे चलोपं दर्शयति **ग्राममरण्यं चेति।** **क्व भोक्ष्यस इति।**

वादधि' 'इन्द्रं महो वा रजसः' इत्युत्तरवाक्ये इन्द्रं प्रति सातिं=धनदानम् अधि=आधिक्येन ईमहे=याचामहे। वैदिकनिघण्टौ याच्ञाकर्मसु ईमह इति पाठात्। कस्माल्लोकादित्याकाङ्क्षायामाह–**इतः**=अस्माल्लोकात्पार्थिवाद्वा दिवो वा महो=महतः प्रौढात्, रजसः=रजकाद् अन्तरिक्षलोकाद्वेति मन्त्रार्थः। ननु श्रुतस्यैव तिङन्तस्योत्तरत्रानुषङ्गात्कथं प्रथममेतदिति चेत्, अनुषक्तस्यापि औपाधिकभेदं पुरस्कृत्य प्राथम्याश्रयणेन निघातनिषेधस्य छन्दसि बहुशो दृष्टत्वात्। एतच्च वेदभाष्ये स्पष्टम्। **हेति क्षि।** धर्मोल्लङ्घनं–**क्षिया।** उदाहरणे द्वितीयस्य निघातो भवत्येव ह्योगाऽभावादिति बोद्धव्यम्। **अहेति विनि।** अनेकस्मिन् प्रयोजने प्रेषणं **विनियोगः।** अस्योदाहरणे पूर्ववन्निघातप्रतिषेधः, प्लुतश्च बोध्यः। **चाहलोपे।** लोपेऽत्राऽप्रयोग एव, शास्त्रेण लोपविधानाऽभावात्। अर्थप्रकरणादिना गम्यमानत्वाच्चाऽप्रयोगः। चः समुच्चये, अहशब्दः केवलार्थः। समानकर्तृके चशब्दस्य लोपः।

न कश्चिदित्यर्थः । अनवक्लृप्तावेव । **३६७० चादिलोपे विभाषा ।** (८-१-६३) चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता । चलोपे । इन्द्र वाजेषु नोऽव । शुक्ला व्रीहयो भवन्ति । श्वेता गा आज्याय दुहन्ति । वालोपे । व्रीहिभिर्यजेत । यवैर्यजेत । **३६७१ वैवावेति च छन्दसि ।** (८-१-६४) अहर्वै देवानामासीत् । अयं वाव हस्त आसीत् । **३६७२ एकान्याभ्यां समर्थाभ्याम् ।** (८-१-६५) आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता छन्दसि । अजामेको जिन्वति । अजामेका रक्षति । तयोरन्यः पिप्पलं स्वाद्वत्ति । समर्थाभ्यां किम्-एको देवानुपातिष्ठत् । एक इति संख्यापरं नान्यार्थम् । **३६७३ यद्वृत्तान्नित्यम् ।** (८-१-६६) यत्र पदे यच्छब्दस्ततः परं तिङन्तं

अनवक्लृप्तावयमेवशब्दः । 'एवे चानियोगे' इति पररूपम् । **चादि । वाजेष्विति ।** अवेति तिङन्तस्येह निघातः । निघाताभावस्य तूदाहरणान्तरं मृग्यम् । ननु पूर्वसूत्रे समानकर्तृके चलोप इत्युक्तम् । इह तु कर्तृभेदात् कथं चलोप इति चेत् । अवधारणार्थे एवशब्दप्रयोगे समानकर्तृके चलोप इति नियमो न तु सर्वत्रेत्यस्त्यत्र चलोपः । **व्रीहिभिर्यजेतेति** । पक्षे आद्युदात्तम् । द्वितीयं तु निहतमेव । एवं शेषेष्वपि यथादर्शनमुदाहरणम् । **वैवाव** । आभ्यां युक्तं प्रथमं तिङन्तमनुदात्तं वा स्यात् छन्दसि । वै स्फुटार्थे समार्थे च । वाव प्रसिद्धौ स्फुटार्थे च । **एकान्या** । समौ तुल्यावर्थौ ययोस्तौ समर्थौ । शकन्ध्वादित्वात्पररूपम् । **जिन्वतीति** । जिविः प्रीणनार्थः । इदित्वान्नुम् । लट् तिप् शप् । **अजामेकां रक्षतीति** । अन्यां प्रीणयति अन्यां रक्षतीत्यर्थः । **एक इति संख्यापरमिति** । एकशब्दस्यानेकार्थत्वात् । तथा चोक्तम्—'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥' इति । ननु साहचर्यादन्यार्थक एवैकशब्दो ग्रहीष्यत इति चेत्सत्यम् । न साहचर्यमत्र प्रकरणे व्यवस्थापकमिति 'निपातैर्यद्यदिहन्त'इत्यत्रैवावोचाम । **यद्वृ** ।

नानाकर्तृके त्वहशब्दस्य । **एवेत्या**दवधारणार्थकैवशब्दप्रयोगे सतीत्यर्थः । **अवक्लृप्ताविति** । असम्भावनायामित्यर्थः । न कश्चिद्भोक्ष्यसे न कश्चिदध्येष्यसे इत्यर्थः । **इन्द्र वाजेष्विति** । अवेति तिङन्तस्येह निघातः । निघाताऽभावस्य तूदाहरणान्तरं बोद्धव्यम् । **शुक्ला व्रीहय इति** । समानकर्तृके चलोप इति नियमोऽवधारणार्थैवशब्दप्रयोगे न तु सर्वत्रेत्यस्ति चलोपः । पक्षे निहतं, पक्षे आद्युदात्तम् । **वैवावेति** । वै स्फुटार्थेऽक्षमायाञ्च । 'वाव' इति प्रसिद्धौ, स्फुटार्थे च **एकान्याभ्याम्** । **समर्थाभ्यां**=समानार्थाभ्यामित्यर्थः । **अजामेकामिति** । अन्यामित्यर्थः । जिविः—प्रीणनार्थः । अत्र प्रकरणे कश्चित्साहचर्याऽनाश्रयणज्ञापनार्थं समर्थग्रहणम् ।

नानुदात्तम्। यो भुङ्क्ते यदध्यङ्वायुर्वाति । अत्र व्यवहिते कार्यमिष्यते।
३९७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः। (८-१-६७) पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम्। काष्ठाध्यापकः। * मलोपश्च वक्तव्यः। दारुणाध्यापकः। अज्ञाताध्यापकः। समासान्तोदात्तत्वापवादः। एतत्समासे इष्यते। नेह दारुणमध्यापक इति वृत्तिमतम्। पूजनादित्येव पूजितग्रहणे

यदध्यङ्ङिति। यद् अञ्चतीति क्विन्। 'विष्वग्देवयोश्च–' इति टेरद्र्यादेशः। कथं पुनः पञ्चमीनिर्देश सति यदध्यङ् वायुर्वाति इत्यादौ व्यवधाने भवत्यत आह अत्र व्यवहिते कार्यमिष्यत इति। अत्र च ज्ञापकमुत्तरसूत्रे मूल एव स्फुटीभविष्यति। पूजनात्। 'काष्ठादिभ्यः–' इति वार्तिकं दृष्टं तदनुरोधेन पूजनादिति बहुवचनस्थान एकवचनमिति व्याचष्टे पूजनेभ्यः काष्ठादिभ्य इति। उत्तरसूत्रे तिङ्ग्रहणादिदं सुबन्तविषयकम्। काष्ठाध्यापक इति। काष्ठादयोऽद्भुतपर्यायाः सन्तः पूजनवचना भवन्ति, समासविषयकं सूत्रमिदम्। उदाहरणे मयूरव्यंसकादित्वात्समासः। मलोपश्च वक्तव्य इति। दारुणमध्यापक इति। समासे कृते विभक्तेर्लुकि स्वाभाविकी मकारनिवृत्तिरित्यनेन वचनेनान्वाख्यायते इति वृत्तिन्यासकारयोर्मतम्। तदेतदाह इति वृत्तिमतमिति। भाष्यवार्तिककैयटास्तु असमास एव क्रिया-

---

यद्वृत्ता। तयद्वृत्तमिति, न तु डतरडतमविभक्त्यन्तमेवेत्याग्रहः। इदञ्च भाष्ये ध्वनितम्। अत्र व्यवहिते इति। तेन 'यो जात एव पर्यभूष'दित्यादौ निघातप्रतिषेधः सिद्ध्यति। अत्र मानन्तु 'पूजनात्पूजित'मिति सूत्रे पूजितग्रहणम्। तद्धि 'काष्ठाध्यापकः' इत्यादौ अनुदात्तताविधानाय। तत्र 'काष्ठादिभ्यः' इति वार्तिकम्। तत्र पूजनादित्येव प्रत्यासत्त्या ससम्बन्धिकतया च पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरप्रतिपत्त्यर्थं सदिह प्रकरणे पञ्चमीनिर्देशेऽप्यानन्तर्यं नाश्रीयत इति ज्ञापयतीत्याहुः। 'यथेच्छप्रवृत्तौ वेति वाच्यम्'। यत्र क्वचन युजते। [यत्र क्वचन यजते]। अत्र पक्षे निहतम्, पक्षे आद्युदात्तम्। पूजनात्पू। अत्र वृत्तिकृत्–'काष्ठादिभ्य' इति सूत्रे पपाठ, तदभ्रमात्। काष्ठादिगणपाठेन सूत्रकारेणाऽपि ज्ञापितमेतत्। काष्ठादयोऽद्भुतपर्यायाः पूजनवचना भवन्ति। उत्तरसूत्रे तिङ्ग्रहणादिदं सुबन्तविषयम्। अत्र वृत्तिन्यासादयः–'समासविषयमेतत्। काष्ठदारुणादीनां प्रवृत्तिनिमित्तभूताश्चर्याभिव्यक्त्यादिविशेषणत्वेऽसमानाधिकरणत्वात्समासाऽप्राप्तौ मयूरव्यंसकादित्वात्समासः। तन्निमित्तविभक्तेर्लुकि काष्ठाध्यापकादिसिद्धि'रित्याहुः। भाष्यकारास्तु असमासे एव क्रियाविशेषणीभूतानां दारुणमित्यादीनां मलोपो निपात्यते। युक्तञ्चैतत्। समासाधिकाराऽभावात्, मयूरव्यंसकादित्वे प्रमाणाऽभावाच्च। अत एव, 'मलोपो वक्तव्यः'

सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम्। एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयत इति। ३९७५ सगतिरपि तिङ्। (८-१-६८) पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम्। यत्काष्ठं प्रपचति। 'तिङ्ङतिङः' (३९१९) इति निघातस्य 'निपातैर्यद्' (३९३७) इति निषेधे प्राप्ते विधिरयम्। सगतिग्रहणाच्च गतिरपि निहन्यते। * गतिग्रहणे उपसर्गग्रहणमिष्यते। नेह। यत्काष्ठं शुक्लीकरोति। ३९७६ कुत्सने च सुप्यगोत्रादौ। (८-१-६९) कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः। पचति

विशेषणीभूतानां दारुणमित्यादीनामसमास एवास्य सूत्रस्य प्रवृत्तिमिच्छन्ति। मयूरव्यंसकादित्वे नास्ति प्रमाणम्। हरदत्तोऽप्याह—यदि समासे एवेदमभिमतमभविष्यत्तदा समास इत्येवावक्ष्यत्। युक्तं चैतत्। न ह्यत्र समासाधिकारोऽस्ति येन समासे स्यात्। अस्मिन् पक्षे मलोपवचनं च सार्थकम्। **पूजनादित्येव पूजितग्रहणे सिद्ध इति।** पूजनस्य पूजितापेक्षत्वादिति भावः। **अनन्तरपूजितलाभार्थमिति।** 'पूजनात्पूजितम्' इति सूत्रे सामान्यगतमानन्तर्यविशेषणं विज्ञायत इति भावः। कथं पुनः पञ्चमीनिर्देशे व्यवहितस्य प्रसङ्ग इत्याह **एतदेवेति।** ज्ञापकफलं तु 'यद्वृत्तान्नित्यम्' इत्युक्तम्। **सगति। यत्काष्ठं प्रपचतीति।** ये मलोपश्चेत्यनेन वाक्ये मलोपमाहुस्तेऽपि तिङन्ते परतो नैव लोपमिच्छन्ति। **सगतिग्रहणाच्च गतिरपि निहन्यत इति।** तुल्ययोगे अत्र सहशब्दः। यत्र तुल्ययोगे सहशब्दस्तत्र द्वयोरपि कार्ययोगो भवति। तद्यथा सपुत्रो भोज्यतामित्युक्ते पुत्रोऽपि भोज्यते। अपिग्रहणं यत्र गतिर्न युज्यते तत्र केवलस्यापि तिङन्तस्य यथा स्याद् गतिप्रयोगे

इति वार्तिककृता आरब्धम्। एवञ्च दारुणमित्यादयः प्रयोगा असाधव एव, भाष्यविरुद्धत्वादिति ध्येयम्। पूजनात्किम्? दारुणाध्यापकः। दारुणसञ्ज्ञक इत्यर्थः। काष्ठादिभ्यः किम्? शोभनाध्यापकः। **सगतिरपि।** अपिनाऽगतिः। तदाह **तिङन्तमिति।** 'न लु'डित्यादिनिषेधापवादः। **सगतिरिति।** तुल्ययोगे सहशब्दः। तेन गतेरपि निघातमाहुः। तिङ्ग्रहणं पूर्वसूत्रस्याऽतिङ्विषयत्वलाभार्थम्। अत्राऽपि गतिग्रहणेनोपसर्गस्यैव ग्रहणमिति 'चनचि'दिति सूत्रे भाष्ये स्पष्टम्। तेन 'यत्काष्ठा शुक्लीकरोती'त्यादौ 'निपातैर्यद्यदी'ति प्रतिषेध एव। **यत्काष्ठं प्रपचतीति।** 'यत्काष्ठं प्रपचती'त्यपपाठः, भाष्यविरोधात्, काष्ठा इत्याकारान्तस्यैव गणे पाठाच्च। काष्ठेति ह्रस्वं पठतां तु भाष्यविरोध एव। काष्ठा, दारुण, अज्ञात, पुत्र, वेश, अनाज्ञात, अनुज्ञात, अपुत्र, अयुत, अद्भुत, अनुक्त, भृश, घोर, सुख, परम, सु, अति। वृत्। **कुत्सने च सु।** 'पदा'दिति निवृत्तम्। कुत्सनार्थे सुबन्ते परे

पूति । प्रपचति पूति । पचति मिथ्या । कुत्सने किम्-प्रपचति शोभनम् । सुपि किम्-पचति क्लिश्नाति । अगोत्रादौ किम्-पचति गोत्रम् । * क्रियाकुत्सन **इति वाच्यम्** । कर्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः । * **पूतिश्चानुबन्ध इति वाच्यम्** । तेनायं चकारानुबन्धत्वादन्तोदात्तः । * **वा बह्वर्थमनुदात्तमिति वाच्यम्** । पचन्ति पूति । ३६७७ **गतिर्गतौ** । (८-१-७०) अनुदात्तः । अभ्युद्धरति । गतिः किम्-दत्तः पचति । गतौ किम्-आमन्द्रैरिन्द्र

तु द्वयोः सद्रैव भवति तिङ्ग्रहणं पूर्वयोगस्यातिङ्विषयत्वज्ञापनार्थम् । **कुत्सने** । पदादिति निवृत्तम् । **पचति क्लिश्नातीति** । कथमत्र समानवाक्यत्वस्य सामर्थ्यस्य वाऽभावादेवाप्राप्तेः । सुपीति स्पष्टार्थम् । कर्तुः कुत्सने मा भूत् । **पचति पूतिर्देवदत्त इति** । कर्तृत्वमात्रं कुत्स्यते अस्येदमयुक्तमिति । क्रिया तु शोभनैव पूतिश्चानुबन्ध इत्यर्थः । तिबन्तपूतिशब्द आद्युदात्तः । वशेस्तिबिति तिप् बाहुलकात्पूञो भवति तस्मादेव गुणाभावः । तस्य निघातनिमित्तस्यान्तोदात्तत्वं यथा स्यादिति चित्त्वमुपसंख्यायते । **वा बह्वर्थमिति** । बहुवचनान्तं तिङन्तं वानुदात्तं स्यात् । यदा तिङन्तस्य निघातस्तदा पूतिरन्तोदात्तः । अन्यदा त्वाद्युदात्तः । **आमन्द्रैरिति** । अत्र याहीत्येतत्प्रति क्रियायोगादाङित्येष

इत्यर्थः । अयं विधिः परत्वात्प्रतिषेधान् बाधते । **यत्पचतः पूतीत्यादि** । पूतीति क्रियाविशेषणत्वान्नपुंसत्वम् । **पचति क्लिश्नातीति** । पाकक्रियाकर्तृकक्लेश इत्यर्थः । पूञः, पूयीधातोर्वा बाहुलकादौणादिके तिपि तत एव गुणाऽभावे आद्युदात्तत्वं पूतिशब्दस्य प्राप्नोतीत्यत आह **पूतिश्चानुबन्ध इति** । चकारानुबन्ध इत्यर्थः । इदञ्च निघातसंनियोगशिष्टम् । तेन यदा निघातस्तदाऽन्तोदात्तम्, अन्यदा त्वाद्युदात्तमेवेति बोध्यम् । **वा बह्वर्थमिति** । बहुवचनान्तं तिङन्तमित्यर्थः । **गतिर्गतौ** । अयम् 'उपसर्गाः' इत्याद्युदात्तत्वापवादः । गतौ परेऽनुपसर्गस्य गतेरनभिधानेन प्रयोगाऽभावादुपसर्गे इति वक्तव्ये गतिग्रहणं लाघवार्थमुत्तरार्थञ्च । यद्यप्ययमभौ सावकाशस्तथापि 'अभिर्गतौ' इति वक्तव्ये गतिग्रहणात्सर्वत्रापि प्रवर्त्तते, एतावतैव तदपवादत्वव्यवहार इत्याहुः । **अभ्युद्धरतीति** । अत्रोच्छब्दे यणि अभेर्निघातेऽनिघाते वा विशेषाऽभावेऽपि प्रवृत्तिमात्रेणोदाहृतम् । 'अभिसंहरति' इति मुख्यं फलम् । **गतौ किमिति** । गतेः शुद्धे तिङन्ते प्रयोगः, गतियुक्ते वा, कृदन्ते वा । तत्र कृदन्तं सगतावगतौ च कृत्स्वर-थाथादिस्वर-गतिस्वरेषु कृतेषु शेषनिघातेन गतेर्निघातस्याऽभावात् 'तिङि चोदात्तवती'ति तिङ्युदात्तवत्येवेति नियमादनुदात्तवति तिङन्ते तदप्रसङ्गादुदात्तवति तेनैव सिद्धेश्च पारिशेष्याद्गतावेव भविष्यतीति प्रश्नः । आ

हरिभिर्याहि मयूररोमभिः। ३६७८ तिङि चोदात्तवति। (८-१-७१) गतिरनुदात्तः। यत्प्रपचति। तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्। अन्यथा हि

गतिः। **तिङि**। उदात्तवति तिङन्ते परे गतिर्निहन्यते। 'निपाता आद्युदात्ताः' इत्यस्यापवादः। **यत्प्रपचतीति**। 'निपातैर्यद्यदि–' इति निघातप्रतिषेधात्तिङन्तमुदात्तवत्। ननु तिङ्ग्रहणं व्यर्थम्। न च तिङन्ते यथा स्यात् मन्द्रशब्दे मा भूत् आमन्द्रैरिन्द्र हरिभिर्याहि' इति मन्द्रशब्दो रक्प्रत्ययान्तोन्तोदात्त इति वाच्यम्। 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः' इति वचनात् स्वसंबन्धिनमाङ्ि पतीति क्रियावाचिन्येवोदात्तवति भविष्यति। न च कृदन्तेऽतिप्रसङ्गः। तत्र कृत्स्वरथाथादिस्वरगतिस्वरेषु कृतेषु शेषनिघातेन गतिर्निहन्यत एव। तस्मान्नार्थस्तिङ्ग्रहणेनेत्याशङ्क्याह **तिङ्ग्रहणमिति**। परिमाणमियत्ता। परिमाणार्थत्वमेव स्पष्टयति **अन्यथा हीति**। अक्रियमाणे तिङ्ग्रहणे धातुरेव क्रियावाचित्वाद्गतिसंज्ञानिमित्तमिति तत्रैवोदात्तवति निघातः स्याद् न प्रत्यये, तिङ्ग्रहणे कृते तु यं धातुं

मन्द्रैरिति। 'ते प्राग्धातोः' इत्यस्य प्रयोगनियमार्थमिदम्। प्रयोगनियमपक्षमभिप्रेत्यैव 'छन्दसि परेऽपि' 'व्यवहिताश्चे'त्यारब्धम्। यदा तु भाष्यरीत्या सञ्ज्ञानियमार्थत्वमभिप्रेत्य तत्प्रत्याख्यायते तदा गताविति व्यर्थम्। आङो गतित्वाऽभावादेवाऽप्राप्तेः। मन्द्रशब्दस्तु रूढिशब्दत्वान्न क्रियावाची। आमन्द्रैरित्यत्र न दोषः, अगतित्वात्। यत्क्रियायुक्तास्तं प्रति गतिसञ्ज्ञा। न चाऽत्राऽऽङो मन्द्रं प्रति क्रियायोगः। किं तर्हि? याहिशब्दं प्रती'ति भाष्यस्याप्ययमेवार्थः–यत्क्रियान्वयस्तत्क्रियाव्यवहितत्वान्न गतित्वम्, मन्द्रस्तु न क्रियावाचीति। यत्तु कैयटादयः—'ननु परनिमित्तानुपादाने यत्क्रियायुक्ता इति कथं लभ्यते? उच्यते। पदस्येत्यधिकारात्पदविधित्वात्समर्थपरिभाषोपस्थानादेतद्विशेषलाभ' इति। तत्तुच्छम्। अस्मदुक्तरीत्या भाष्यस्य सामञ्जस्यात्, एकार्थीभावे एव परिभाषाप्रवृत्तेश्च, युष्मदस्मदादेशनिघातविधौ परिभाषाऽप्रवृत्तेः समर्थसूत्रे भाष्ये उक्तत्वाच्च। न च मन्द्रादिकरणकेन्द्रकर्तृकं यानमाङा विशेष्यते इति समुदायं क्रियाविशेषवाचिनं प्रति गतित्वमस्त्येव। अत एवाऽभ्युद्धरतीत्यादावभेर्गतित्वमिति वाच्यम्, धातूपसर्गयोः संबन्धस्यान्तरङ्गत्वेन साधनान्वयात्पूर्वमेव तदन्वयः। अत एव 'उपास्यते गुरुः' इत्यादेः सकर्मकत्वमिति भाष्य एव स्पष्टम्। **तिङि चो**। 'निपाता आद्युदात्ताः' इत्यस्यापवादोऽयम्। अनुपसर्गस्यापि गतेर्धात्वव्यवहितस्य सत्त्वात्। उदाहरणे 'निपातैर्यद्यदी'ति निघातप्रतिषेधादुदात्तत्वं तिङन्तस्य। 'यच्छुक्लीकरोती'त्यत्र च्वेश्चित्त्वेऽपि चित्स्वरो येननाप्राप्तिन्यायेन निपाताद्युदात्तत्वमेव बाधते न त्वेनमिति अत्र शुक्लीशब्दस्य निघातः। नन्वामन्द्रैरित्यत्र

यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात् प्रत्यये न स्यात्। उदात्तवति किम्-प्रपचति।

इति तिङन्तस्वराः।

स्वरसंचारप्रकारः।

अथ वैदिकवाक्येषु स्वरसंचारप्रकारः कथ्यते। अग्निमीळे इति प्रथमा ऋक्। तत्राग्निशब्दोऽव्युत्पत्तिपक्षे (फि०) 'फिषः' इत्यन्तोदात्त इति माधवः। वस्तुतस्तु घृतादित्वात्। व्युत्पत्तौ तु निप्रत्ययस्वरेण। अम् सुप्त्वादनुदात्तः। 'अमि पूर्वः' (१९४) इत्येकादेशस्तु 'एकादेश उदात्तेन' (३६५८) इत्युदात्तः। ईळे। 'तिङ्ङतिङः' (३९३९) इति निघातः। संहितायां 'उदात्तादनुदात्तस्य'

प्रति गतित्वं तद्घटके तिङन्ते उदात्तवति परे इत्यर्थो जायते, तेन यत्प्रकरोतीत्यादौ धातोः शेषनिघातेनानुदात्तत्वेऽपि तिङन्तस्य उप्रत्ययस्वरेण मध्योदात्तत्वाद्गतेर्निघातः सिद्ध इत्याहुः। **प्रपचतीति**। 'तिङ्ङतिङः' इति निघातः।

इति सुबोधिन्यां तिङन्तस्वराः।

ईळे इति। ईड स्तुतौ लडुत्तमैकवचनम्। इट् टेरेत्वं द्वयोश्चास्य स्वरयो-

---

रकप्रत्ययान्ते मन्द्रशब्दे परे आङो निघातनिवृत्त्यर्थन्तदित्यत आह **यत्क्रियेति**। एवञ्च तिङ्ग्रहणाऽभावेऽपि गत्याश्रितक्रियावाचकस्योदात्तवतीति विशेषणादपि तन्नि-वृत्तिः सिद्धेति भावः। तत्र दोषमाह **धातावेवेति**। यस्य वाच्यरूपया क्रियया युक्तास्तं धातुं प्रत्येव गतित्वादिति भावः। एवञ्च 'यत् पचती'त्यादावेव स्यान्न तु 'यत् प्रकरोती'त्यादौ। तिङ्ग्रहणे तु सति यं धातुं प्रति गतित्वं तद्घटिते तिङन्ते परे इत्यर्थः सम्पद्यते इति न दोषः। अत्र तिङ्शब्देन क्रियाप्रधानं लक्ष्यते। तेन 'उपपदमति'ङिति सूत्रस्थाऽस्मदुक्तरीत्या 'प्रपचतितरा'मित्यत्राऽसमासे उदात्तवत्या-मन्ते गतेर्निघातः सिद्धः। तिङन्तं तु तत्र नोदात्तम्, आमुस्वरेण शेषनिघातात्। ध्वनि-तश्चेदं भाष्ये। एते निघातास्तत्प्रतिषेधाश्च पदकाले विच्छिद्य पाठेऽपि भवन्ति, संहिता-धिकाराऽभावादित्याहुः। **इति लघुशब्देन्दुशेखरे तिङन्तस्वराः**।

अथ स्वरसञ्चारप्रक्रिया। वस्तुतस्त्विति। 'इगन्तानाञ्च द्व्यषा'-मित्यस्य 'फिषः' इत्यपवादस्य सत्त्वादिति भावः। **संहितायान्त्विति**। 'तयो-र्य्वावची'ति सूत्रस्थसंहिताग्रहणस्याऽऽशास्त्रसमाप्तेरधिकारात्, स्वरितविधेश्च तदन्तर्भावादिति भावः। अयमेव संहिताधिकारो ज्ञापयति-'एतदधिकारबहिर्भूतानां कालव्यवायेऽपि प्रवृत्तिः'। अन्यथाऽसंहितायां कालव्यवायादेव न भविष्यति, किं

(३६६०) इतीकारः स्वरितः । 'स्वरितात्संहितायाम्' (३६६८) इति के इत्यस्य प्रचयापरपर्याया एकश्रुतिः । पुरःशब्दोऽन्तोदात्तः । 'पूर्वाधरावराणाम्' (१९७२) इत्यसिप्रत्ययस्वरात् । हितशब्दोऽपि धाञो निष्ठायां 'दधातेर्हिः' (३०७६) इति हादेशे प्रत्ययस्वरेणान्तोदात्तः । 'पुरोऽव्ययम्' (७६८) इति संज्ञायां 'कुगति' (७६१) इति समासे समासान्तोदात्ते 'तत्पुरुषे तुल्यार्थ' (३७३६) इत्यव्यय-पूर्वपदप्रकृतिस्वरे 'गतिकारकोपपदात्कृत्' (३८७३) इति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते 'गतिरनन्तरः' (३७८२) इति पूर्वपद-प्रकृतिस्वरः । पुरःशब्दोकारस्य संहितायां प्रचये प्राप्ते 'उदात्तस्वरितपरस्य सन्न-तरः' (३६६९) इत्यनुदात्ततरः । यज्ञस्य । नङः प्रत्ययस्वरः । विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम् । देवम् । पचाद्यच् । फिट्स्वरेण प्रत्ययस्वरेण वान्तोदात्तः । ऋत्विक्शब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । होतृशब्दस्तृ-

रिति प्रातिशाख्येन ळः । **यज्ञस्येति** । 'यजयाच-' इति यजेर्नङ् विभक्तेः सुप्त्वा-दनुदात्तत्वे स्वरितत्वमिति । **स्वरितत्वमिति** । स्वरितो वानुदात्त इत्यनेन ।

तदाधिकारपाठेन ? तेन पदकालेऽपि 'ईळे' इत्यादीनां निघातः, 'अग्नाविष्णू' इत्यादावव-ग्रहे आनङादयः, पदविभागे च वत्नसादयः सिद्ध्यन्ति । अशक्त्यादिना कालव्यवायेऽपि नसादयः । व्यवधानञ्च मात्राकालेन, न तदधिकेनेत्यादि निरूपितम् । संहिताधिकारस्थन्तु यणादिकं स्वरितप्रचयादिकञ्च नेति बोध्यम् । नन्वेवं पुरः–हितमित्यवग्रहे हिशब्दस्य स्वरितत्वं बह्वृचैः पठ्यमानं न सिध्येत् , संहिताधिकारस्थत्वेन कालव्यवायेऽप्रवृत्तेरिति चेन्न, 'यथा सन्धीयमानानामनेकीभवतां स्वरः । उपदिष्टस्तथा विद्यादक्षराणा-मवग्रहे' इति प्रातिशाख्ये विशिष्य विधानात् । **अनेकीभवतां**=प्रश्लेषमाप्नुवतां पुनः सन्धीयमानानामेकीक्रियमाणानां **यथा**=येन प्रकारेण स्वर उपदिष्टः शास्त्रे, तं स्वरमक्षराणामवग्रहेऽपि तथैव कुर्यादित्यर्थः । नन्वेवमुपगन्तवै अन्वेतवाउ इत्यादीनाम-वग्रहे उत्तरखण्डाद्यवर्णस्य प्रचयः स्यादिति चेन्न, 'पद्यादींस्तु ह्युदात्तानामसंहितवदु-त्तरान्' इति विशेषवचनात् । **पद्यं**=पदार्थं ह्युदात्तानां पदानामुत्तरान् पदाद्यादीन् स्वरविधावसंहितवज्जानीयादित्यर्थः । एवं रत्नधातमम् , अललाभवन्तीरित्यादीनां क्रमकाले इतिशब्दोत्तरभागे प्रचयो न प्रवर्त्तते । 'परिग्रहे त्वनार्षान्तात्तेनैवैकाक्षरी-कृतात् । परेषां न्याससमाचारं व्याळिस्तौ चेत्स्वरौ परौ' इति वचनात् । परिग्रहो वेष्टक उच्यते । अनार्षशब्देन तथाभूत इतिकरणः, स च द्व्यक्षर आद्युदात्तः, पदा-भ्यासस्य मध्ये वर्त्तमानः पूर्वपदान्तमादिना स्पृशति, द्वितीयपदादिमन्तिमेन स्पृशति

प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। रत्नशब्दो (फि०) 'नब्विषयस्य' इत्याद्युदात्तः। रत्नानि दधातीति रत्नधाः। समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः। तमपः पित्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्रमुन्नेयम्॥

इति स्वरसंचारः।

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम्।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः॥ १॥

इति सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितविरचितायां वैदिकस्वरप्रक्रिया॥

ऋत्विगिति। ऋतावुपपदे यजेः क्विन् ऋत्विगित्यनेन 'वचिस्वपि–' इति संप्रसारणम्। **नब्विषयस्येति**। इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्त इति सूत्रार्थः।

इति स्वरसंचारः।

इति श्रीमन्मौनिकुलतिलकायमानश्रीगोवर्धनभट्टात्मजरघुनाथात्मजेन जयकृष्णेन कृतायां सुबोधिन्याख्यायां सिद्धान्तकौमुदीव्याख्यायां वैदिकस्वरप्रक्रिया।

तदाऽयं विकारः **पदसन्धिरुक्तः**। स च व्यञ्जनादिः स्वरादिर्वा भवति। यदि व्यञ्जनादिस्तदा प्रचये प्राप्तेऽयमपवादः। अनार्षादितिकरणात्परेषामक्षराणां न्यासमुदात्तमाचार्यं व्यालिराचार्यो मन्यते। यदा तु स्वरादिर्भवति तेन स्वरादिना एकाक्षरीकृतात्परेषां न्यासमिति तुल्यम्। तौ उदात्तस्वरितौ चेत्स्वरौ परौ भवत इत्यर्थः। **अनार्षान्तादित्यस्योदाहरणं**–रत्नधातममिति रत्नधातमम्। **तेनैवैकाक्षरीकृतादित्यस्योदाहरणम्**–अललाभवन्तीरित्यललाभवन्तीः। अलला इति शब्दानुकरणमिति तद्भाष्यकृत इति सर्वेष्टसिद्धिः।

शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया॥ १॥
शब्देन्दुशेखरः सोऽयं फणिभाष्योक्तिभूषितः।
सतां हृत्कमलेष्वास्तां यावच्चन्द्रदिवाकरौ॥ २॥

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागेशभट्टरचिते लघुशब्देन्दुशेखराख्ये सिद्धान्तकौमुदीव्याख्याने उत्तरार्द्धं समाप्तम्।

समाप्तोऽयं लघुशब्देन्दुशेखराख्यो ग्रन्थः।

भैरवमिश्रकृतव्याख्यासंवलिता

सिद्धान्तकौमुदी ।

लिङ्गानुशासनम् । ७१ ।

स्त्र्यधिकारः ।

१ लिङ्गम् । २ स्त्री । अधिकारसूत्रे एते । ३ ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः । ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्रादिपञ्चकस्यैव ङीब्निषेधेन कर्त्रीत्यादेर्ङीपा ईकारान्तत्वात् । तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् । ४ अन्यू-

---

श्रीः । मूले—**अधिकारसूत्रे एते इति**। उभयोरधिकारसूत्रत्वेऽपि 'लिङ्ग'-मित्याशास्त्रसमाप्तिः, द्वितीयस्तु 'ताराधारा-' इति यावदिति विवेकः । अत्रापि लिङ्गं शास्त्रीयं प्रागुक्तमेव विवक्षितम् । तच्चार्थनिष्ठं तच्छब्दप्रतिपाद्यम् । तत्रायं विशेषः । शब्दशक्तिस्वभावेन कस्यचित्सर्वलिङ्गप्रतिपादकता, कस्यचिदेकलिङ्गप्रतिपादकता, कस्यचिद्द्विलिङ्गयुक्तार्थप्रतिपादकता चेति । यद्यपि शब्दानामर्थानां चानन्त्यात्प्रातिस्विकरूपेण तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव संभवति न त्वस्मदादीनामज्ञानाम्, तथाप्यस्मदाद्युद्देशेन शास्त्रप्रवृत्तेर्यथा लघुनोपायेनास्मदादीनां ज्ञानं संभवे-त्तथाह **ऋकारान्ता इत्यादिना** । 'स्त्री'ति पदमेषु सूत्रेषु संबध्यते । तच्च भावप्रधान-निर्देशेन स्त्रीत्वपरम् । तस्य लिङ्गपदेन बहुव्रीहिसमासे 'स्त्रीलिङ्गा' इति सामानाधि-करण्येन व्यवहारः । मात्रादिशब्दानां विशेषत उपादानात्पञ्चेति लब्धम् । अवधारण-स्य तु यथा लाभस्तं प्रकारमाह **स्वस्रादिपञ्चकस्यैवेति** । **ङीब्निषेधेनेति** । 'न षट्स्वस्रादिभ्यः' इति सूत्रेण ङीपो निषेधेन । **कर्त्रीत्यादेरिति** । अनेन कर्तृपदेन यौगिकाः शब्दा ऋकारान्ताः परिग्राह्याः । रूढस्य क्रोष्टृप्रभृतिशब्दस्यादिना परि-ग्रहः । न च सप्तैवेति वक्तव्ये पञ्चैवेति नियमानुपपत्तिरिति वाच्यम्, आदेशत्वाना-क्रान्ताः पञ्चैवेत्यर्थात् । यद्यपि भाष्यसंमते 'तृज्वत्क्रोष्टुः' इत्यादित्रिसूत्र्याः प्रयोग-नियमार्थत्वपक्षे स्त्रियां प्रवर्तमानस्य क्रोष्टृशब्दस्यादेशत्वानाक्रान्तत्वम्, तथापि परिनिष्ठिते शब्देऽयमीकारान्त एव प्रयुज्यत इति भावः । 'उणादयो बहुलम्' इति संगृहीतसाधुत्वकानां व्युत्पन्नत्वं शास्त्रान्तरे प्रसिद्धमिति तदभिप्रायेणाह **अन्यू**

प्रत्ययान्तो धातुः । अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः । चमूः । प्रत्ययग्रहणं किम्-देपयतेः क्विप् धूः । त्रिशेष्यलिङ्गः । **५ अशनिभरण्यरणयः पुंसि च** । इयमयं वा अशनिः **६ मिन्यन्तः** । मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः । ग्लानिः । **७ वह्निवृष्ण्यग्नयः पुंसि** । पूर्वस्यापवादः । **८ श्रोणियोन्यूर्मयः पुंसि च** । इयमयं वा श्रोणिः । **९ क्तिन्नन्तः** । स्पष्टम् । कृतिरित्यादि । **१० ईकारान्तश्च** । ईप्रत्ययान्तः स्त्री स्यात् । लक्ष्मीः । **११ ऊङाबन्तश्च** । कुरूः । विद्या । **१२ य्वन्तमेकाक्षरम्** । श्रीः । भूः । एकाक्षरं किम्-पृथुश्रीः । **१३ विंशत्यादिरानवतेः** । इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । **१४ दुन्दुभिरक्षेषु** । इयं दुन्दुभिः । अक्षेषु किम्-अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः । **१५ नाभिरक्षत्रिये** । इयं नाभिः । **१६ उभावप्यन्यत्र पुंसि** । दुन्दुभिर्नाभिश्चोक्त-

---

इत्यादि । अवनिः । 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' इत्यनिः । **चमूरिति** । 'कृषिचमितनिधनिसर्जिभ्य ऊः' इत्यूः । धूः । अत्र वकारस्य 'च्छ्वोः–' इत्यूठ् । **अशनिभर** । पूर्वसूत्रापवादोऽयम् । **मिन्यन्तः** । भूमिः । 'नियो मिः' इत्यतो मिरित्यनुवर्त्य विहितो 'भुवः कित्' इति निः । ग्लानिः । 'वह्निश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' इति निः । वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह **वह्निवृष्णि** । वृष्णिः । 'सृवृषिभ्यां कित्' इति निः । अग्निः । 'अङ्गेर्नलोपश्च' इति निः । **श्रोणियोन्यू** । श्रोणिः । योनिः । 'वह्निश्रि–' इति निः । ऊर्मिः । 'अर्तेरूच्च' इति निः । **ईकारान्तश्च** । अत्र ईकारः प्रत्यय एव पूर्वोत्तरसाहचर्यात् । **लक्ष्मीरिति** । अत्र 'लक्षेर्मुट् च' इति सूत्रे 'अवितृस्तृतन्त्रिभ्य ईः' इत्यत ईरित्यस्यानुवृत्त्या तेनेकारः प्रत्ययः । एवमव्यादिधातुभ्य ईकारप्रत्ययेऽपि स्त्रीत्वम् । तद्यथा अवीर्नारी रजस्वला, तरीर्नौस्तरी धूमः, तन्त्रीर्वीणादेर्गुणः । नच 'यापोः किद्द्वे च' इति सूत्रविहितेकारान्तस्यापि स्त्रीत्वापत्तिरिति वाच्यम् । पुंस्त्वाधिकारोक्तेन 'दोपधः' 'दोपधः' इत्याभ्यां परत्वाद्बाधात् । यूप इत्यादौ प्रथमस्य, समय इत्यादौ द्वितीयस्य चारितार्थ्यात् । एवं च पपीययीशब्दयोः पुंस्त्वेऽपि न क्षतिः । **ऊङाबन्तश्च** । 'ऊङुतः' इत्यूङ् । आब्ग्रहणेन टाप्डाप्चापां ग्रहणम् । **य्वन्तमेकाक्षरम्** । ईकारोऽत्र प्रत्ययः ऊकारसाहचर्यात् । **विंशत्यादिरानवतेरिति** । विंशत्यादयः 'पङ्क्तिविंशति–' इति सूत्रनिर्दिष्टाः । **दुन्दुभिरक्षेषु** । अक्षेषु बोधनीयेषु यः प्रयुज्यत इत्यर्थः । **नाभिरक्षत्रिये** । क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् । **इयं नाभिरिति** । पुरुषावयवे इदम् । **उभावप्यन्यत्र पुंसि** । इदं स्पष्टार्थम् ,

विषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः । कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलै-रुपाहितश्रीण्युपनीविनाभिभिरिति भारविः । उच्यते । दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात्पुंस्त्वमपीह साधु । अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामद इति मेदिनी । रभसोऽप्याह—मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति । एवमेवंविधेऽन्यत्रापि बोध्यम् । १७ तलन्तः । अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता । १८ भूमिविद्युत्सरिल्लतावनिताभिधानानि । भूमिर्भूः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् । १९ यादो नपुंसकम् । यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात् । (भाःस्रक्स्रग्दिगुष्णिगुपानहः । एते स्त्रियां स्युः । इयं भा इत्यादि । २१ स्थूणोर्णे नपुंसके च । एते स्त्रियां क्लीबे च स्तः । स्थूणा । स्थूणम् । ऊर्णा । ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोम । २२ गृहशशाभ्यां क्लीबे । नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । शशोर्णं शशलोमनीत्यमरः । २३ प्रावृड्विप्रड्रुड्विड्त्विषः । एते स्त्रियां स्युः । २४ दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः । एते स्त्रियां

पूर्वसूत्रयोः 'अन्येष्वक्षत्रिये' इत्यभिधानेन सिद्धेः । **कथं तर्हीति** । अत्र यत्कोमलैरिति तदनुपपन्नम् । स्त्रीलिङ्गनाभिशब्दाविशेषणत्वात् । **सामान्य इति** । लिङ्गविशेषाविवक्षया नपुंसकं कोमलैरिति प्रसाध्य तस्य नाभिशब्दार्थविशेषणत्वं स्वीकार्यम् । विशेष्यप्रतिपादकस्य यथा पुंस्त्वं तथास्यापि भविष्यतीत्याशयेन समाधानान्तरमाह **वस्तुतस्त्विति** । 'चक्रमध्यक्षत्रिययोः' इत्यत्र चक्रमध्यं च क्षत्रियश्चेति द्वन्द्वः । अत एव 'प्राण्यङ्गके द्वयोः' इति संगच्छते । **तलन्तः** । 'तस्य भावस्त्वतलौ' इति सूत्रविहिततल्प्रत्ययान्तः स्त्रियां स्यात् । **भूमिविद्युदिति** । अत्राभिधानशब्दो भूम्यादिशब्दे शक्यतावच्छेदकधर्मावच्छिन्नशक्तपरत्वेन प्रमेयशब्दव्यावृत्तिः । एवमन्यत्रापि बोध्यम् । **यादो नपुंसकम्** । पूर्वस्यापवादः । **स्थूणोर्णे नपुंसके च** । चकारेण स्त्रियामित्यस्यानुकर्षणार्थमस्यात्र लेखः । **प्रावृडिति** । स्त्रीशब्दस्य पूर्वत्र चानुकृष्टत्वेऽपि 'स्वरितेनाधिकारः' इत्यस्याधिकः कार इति व्याख्यानस्यापि प्रसिद्धत्वादत्र संबन्धः । **दर्विविदि** । दर्विशब्दो 'वृदभ्यां विन्' इति विन्नन्तः, 'सर्वतोऽ-

स्युः। पक्षे ङीप्। दर्वी। दर्विरित्यादि। २५ तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः। एते प्राग्वत्। इयं तिथिरित्यादि। अमरस्त्वाह तिथयो द्वयोरिति। तथा च भारविः। तस्य भुवि बहुतिथास्तिथय इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्रीहर्षश्च। निखिलानिशि पौर्णिमातिथीनिति। २६ शष्कुलिराजिकुट्यशनिवर्तिभ्रूकुटित्रुटिवलिपङ्क्तयः। एतेऽपि स्त्रियां स्युः। इयं शष्कुलिः। २७ प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः। इयं प्रतिपदित्यादि। उषा उच्छन्ती। उषाः प्रातरधिष्ठात्री देवता। २८ आशीर्धूःपूर्गीर्द्वारः। इयमाशीरित्यादि। २९ अप्सुमनस्समासिकतावर्षाणां बहुत्वं च। अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च। आप इमाः। स्त्रियः सुमनसः पुष्पम्। सुमना मालती जातिः। देववाची तु पुंस्येव। सुपर्वाणः सुमनसः। बहुत्वं प्रायिकम्। एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्यप्रयोगात्। 'समांसमां विजायते १८१५' इत्यत्र समायां समायामिति भाष्याच्च। 'विभाषाग्रापेर्' (२३७६) इति सूत्रे अग्रासातां सुमनसाविति वृत्तिव्याख्याया हरदत्तोऽप्येवम्। ३० स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः। इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक्। ३१ तुटिसीमासंबध्याः। इयं तुटिः। सीमा। संबध्या। ३२ चुल्लिवेणिखार्यश्च। स्पष्टम्। ३३ ताराधाराज्योत्स्नादयश्च ३४ शलाका स्त्रियां नित्यम्। नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति॥ इति स्त्र्यधिकारः।

पुँल्लिङ्गाधिकारः।

३५ पुमान्। अधिकारोऽयम्। ३६ घञबन्तः। पाकः। त्यागः। करः। गरः। भावार्थ एवेदम्। नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां,

---

क्तिन्नर्थादित्येके' इति विकल्पेन ङीप् दर्वी इति। **तिथिनाडि।** एते प्राग्वदिति। स्त्रियां स्युरित्यर्थः। **पुंस्येवेति।** देवासुरात्मेत्यनेन पुंस्त्वबोधकेन परत्वाद्बाधादिति भावः। **भाष्यप्रयोगादिति।** तेन भाष्येण 'अप्सुमनः' इति सूत्रनिर्दिष्टानां बहुत्वं प्रायिकमिति विकल्पेनान्यत्र बहुत्वाभावेऽपि न क्षतिः। **क्वचिद्व्यभिचारमिति।** तेन तिथिशब्दस्य पूर्वत्र यथा पुंस्त्वं प्रदर्शितं तथान्येषामन्यलिङ्गत्वेऽपि साधुत्वमिति सूचयति॥ इति लिङ्गानुशासने स्त्र्यधिकारः॥

भावार्थ एवेति। भावे यो घञ् तदन्तस्य पुंस्त्वमित्युक्तम्। एतल्लाभप्रकार-

स्त्रीत्वविशिष्टे तु क्तिआदिभिर्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम् । संबन्धमनुवर्तिष्यत इति । ३७ घाजन्तश्च । विस्तरः । गोचरः । चयः जय इत्यादि । ३८ भयलिङ्गभगपदानि नपुंसके । एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम् । ३९ नङन्तः । नङ्प्रत्ययान्तः पुंसि स्यात् । यज्ञः । यत्नः । ४० याच्ञा स्त्रियाम् । पूर्वस्यापवादः । ४१ क्यन्तो घुः । किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम्-दानम् । घुः किम्-जज्ञिर्बीजम् । ४२ इषुधिः स्त्री च । इषुधिशब्दः स्त्रियां पुंसि च । पूर्वस्यापवादः । ४३ देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि । एतानि पुंसि स्युः । देवाः सुराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रोऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दम इत्यादि । ४४ त्रिविष्टपत्रिभुवने नपुंसके । स्पष्टम् । तृतीयं विष्टपं त्रिविष्टपम् । स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः । ४५ द्यौः स्त्रियाम् । द्योदिवोरन्यतरस्योपादानमिदम् । ४६ इषुबाहू स्त्रियां च । चात्पुंसि । ४७ बाणकाण्डौ नपुंसके च । चात्पुंसि । त्रिविष्टपेत्यादिचतुःसूत्री देवासुरेत्यस्यापवादः । ४८ नान्तः । अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः मन्व्यच्कोऽकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् । ४९ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः । ५० अभ्रं नपुंसकम् । पूर्वस्यापवादः । ५१ उकारान्तः । अयं पुंसि स्यात् । प्रभुः । इक्षुः । इक्षुर्हदविलासिन्यां

माह नपुंसकेत्यादि । भयलिङ्गेत्यादि । पूर्वस्यापवादोऽयम् । क्यन्तो घुः । किप्रत्ययोऽन्तः परो यस्मात्तादृशो घुसंज्ञको धातुस्तद्घटितः पुमानित्यर्थः । देवासुरा । अत्र पङ्कशब्दान्तद्वन्द्वं कृत्वा तस्य षष्ठीसमासोऽभिधानशब्देन कर्तव्यः, अभिधानशब्दः करणल्युडन्तो वाचकशब्दपरः, तेन देवादिशब्दवाच्यतावच्छेदकेत्यादि पूर्ववद्बोध्यम् । शब्दस्वरूपापेक्षया च नपुंसकत्वम् । त्रिविष्टप । स्वर्गाभिधानत्वात्पुंस्त्वे प्राप्तेऽयमारम्भ इति । अत एवाहामरसिंहः 'क्लीबे त्रिविष्टपम्' इति । द्यौः स्त्रियाम् । अस्य स्वर्गाभिधानत्वात्पुंस्त्वस्य पूर्वेण प्राप्तेरयमारम्भः । इषुबाहू । शरभुजपर्यायाविमौ । बाणकाण्डौ । शराभिधानोऽयम् । नान्त इति । नान्तप्रत्ययान्त इत्यर्थः । अभ्रं नपुंसकमिति । मेघाभिधानविषये पूर्व-

नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयव इति मेदिनी। करेणुरिभ्यां स्त्री नेभे इत्यमरः। एवंजातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च। लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति। एवमन्यत्रापि। **५२ धेनु-रज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्। ५३ समासे रज्जुः पुंसि च।** कर्कटरज्ज्वा। कर्कटरज्जुना। **श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके। ५५ वसु चार्थवाचि।** अर्थवाचीति किम्—वसुर्मयूखाग्निधनाधिपेषु। **५६ मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।** चात्पुंसि। अयं मद्गुः। इदं मद्गु। **५७ रुत्वन्तः।** मेरुः। सेतुः। **५८ दारुकशेरुजतु-वस्तुमस्तूनि नपुंसके।** रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु। **५९ सक्तुर्नपुंसके च।** चात्पुंसि। सक्तुः। सक्तु। **६० प्राग्ररश्मेरका-रान्तः।** रश्मिर्दिवसाभिधानमिति वक्ष्यति। प्रागेतस्मादकारान्त इत्यधिक्रियते। **६१ कोपधः।** कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः। **६२ चिबु-कशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।** पूर्वसूत्रापवादः। **६३ कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कव-र्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च।** चात्पुंसि। अयं कण्टकः। इदं कण्टकमित्यादि। **६४ टोपधः।** टोपधोऽकारान्तः पुंसि स्यात्। घटः। पटः। **६५ किरीटमुकुटललाटवट-वीटशृङ्गाटकराटलोष्टानि नपुंसके।** किरीटमित्यादि। **६६ कुटकूटकपट-कपाटकर्पटनटनिकटकीटकटानि नपुंसके च।** चात्पुंसि। कुटः कुट-मित्यादि। **६७ णोपधः।** णोपधोऽकारान्तः पुंसि स्यात्। गुणः। गणः। पाषाणः। **६८ ऋणलवणपर्णतोरणरणोष्णानि नपुंसके।** पूर्वसूत्रापवादः। **६९ कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च।** चात्पुंसि। **७० थोपधः।** रथः। **७१ काष्ठपृष्ठसिक्थोक्थानि नपुंसके।** इदं काष्ठमित्यादि। **७२ काष्ठा दिगर्था स्त्रियाम्।** इमाः काष्ठाः। ७३

स्यापवाद इत्यर्थः। **लिङ्गशेषविधिरिति।** लिङ्गस्य शेषोऽवशेषस्तस्य विधिः व्यापी काण्डत्रयस्य विधिर्व्यापी काण्डत्रयस्य व्यापको यदि विशेषशास्त्रेण बाधितो न स्यादित्यर्थः। **नपुंसके चेति।** चात्पुंसि। **वसु चार्थवाचि।** अर्थवाची वसु-शब्दो नपुंसके च द्रष्टव्यः। **रुत्वन्तः।** उकारो नकारेत्संज्ञकः। मेरुः। सेतुरित्यत्र सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन् इति तुन्। सूर्यवाचकः प्रथमः। **दारु-कशेरु।** जत्वादित्वादुप्रत्ययान्ता एते। कंसं चाप्राणिनि। कंसमिति शब्दस्य

तीर्थप्रोथयूथगाथानि नपुंसके च । चात्पुंसि । अयं तीर्थः । इदं तीर्थम् । ७४ नोपधः । अदन्तः पुंसि । इनः । फेनः । ७५ जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । पूर्वस्यापवादः । ७६ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च । चात्पुंसि । अयं मानः । इदं मानम् । ७७ पोपधः । अदन्तः पुंसि । यूपः । दीपः । ७८ पापरूपोडुपतल्पशिल्पपुष्पसमीपान्तरीपाणि नपुंसके । इदं पापमित्यादि । ७९ शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । अयं शूर्पः । इदं शूर्पमित्यादि । ८० भोपधः । स्तम्भः । ८१ तलभं नपुंसकम् । पूर्वस्यापवादः । ८२ जृम्भं नपुंसके च । जृम्भम् । जृम्भः । ८३ मोपधः । सोमः । भीमः । ८४ रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके । इदं रुक्ममित्यादि । ८५ संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च । चात्पुंसि । अयं संग्रामः । इदं संग्रामम् । ८६ योपधः । समयः । हयः । ८७ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके । स्पष्टम् । ८८ गोमयकषायमलयान्वयाव्ययानि नपुंसके च । गोमयः । गोमयम् । ८९ रोपधः । क्षुरः । अङ्कुरः । ९० द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जरजरठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके । इदं द्वारमित्यादि । ९१ शुक्रमदेवतायाम् । इदं शुक्रं रेतः । ९२ चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च । चात्पुंसि । चक्रः । चक्रमित्यादि । ९३ षोपधः । वृषः । वृषः । ९४ शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके । ९५ यूषकरीषमिषविषवर्षाणि नपुंसके च । चात्पुंसि । अयं यूषः । इदं यूषमित्यादि । ९६ सोपधः । वत्सः । वायसः । महानसः । ९७ पनसबिसबुससाहसानि नपुंसके । ९८ चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च । इदं चमसम् । अयं चमस इत्यादि । ९९ कंसं

निर्देशात् 'नपुंसके च' इत्यस्य संबन्धः । अप्राणिनि वाच्ये कंसशब्द इत्यर्थः ।

चाप्राणिनि। कंसोऽस्त्री पानभाजनम्। प्राणिनि तु कंसो नाम कश्चिद्राजा। **१०० रश्मिदिवसाभिधानानि।** एतानि पुंसि स्युः। रश्मिर्मयूखः दिवसो घस्रः। **१०१ दीधितिः स्त्रियाम्।** पूर्वस्यापवादः। **१०२ दिनाहनी नपुंसके।** अयमप्यपवादः **१०३ मानाभिधानानि।** एतानि पुंसि स्युः। कुडवः प्रस्थः। **१०४ द्रोणाढकौ नपुंसके च।** इदं द्रोणम्। अयं द्रोणः। **१०५ खारीमानिके स्त्रियाम्।** इयं खारी। इयं मानिका। **१०६ दाराक्षतलाजासूनां बहुत्वं च।** इमे दाराः। **१०७ नाड्यपजनोपपदानि व्रणाङ्गपदानि।** यथासंख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि स्युः। अयं नाडीव्रणः। अपाङ्गः। जनपदः। व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम्। **१०८ मरुद्गरुत्तरदृत्विजः।** अयं मरुत्। **१०९ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः।** एते पुंसि स्युः। अयमृषिः। **११० ध्वजगजमुञ्जपुञ्जाः।** एते पुंसि। **१११ हस्तकुन्तान्तव्रातवातदूतधूतसूतचूतमुहूर्ताः।** एते पुंसि। अमरस्तु मुहूर्तोऽस्त्रियामित्याह। **११२ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः।** अयं षण्डः। **११३ वंशांशपुरोडाशाः।** अयं वंशः। पुरो दाश्यते पुरोडाशः। कर्मणि घञ्। भवव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्ठन्' (१४७६) इति विकारप्रकरणे 'व्रीहेः पुरोडाशे' (१२२८) इति च निपातनादस्मत्कृतसूत्र एव निपातनाद्वा दस्य डत्वम्। पुरोडाशभुजामिष्टमिति माघः। **११४ ह्रदकन्दकुन्दबुद्बुदशब्दाः।** अयं ह्रदः। **११५ अर्धपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः।** अयमर्धः। **११६ पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धमृदङ्गसङ्गसमुद्गपुङ्खाः।** अयं पल्लवः इत्यादि। **११७ सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः।** एते पुंसि। अयं सारथिः।

इति पुंलिङ्गाधिकारः।

दिनाहनी। दिवसाभिधानविधौ। **खारीमानिके।** मानाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भः। **बहुत्वं चेति।** चकारः पुंस्त्वस्य समुच्चायकः। **नाड्यपजनोपपदानि व्रणाङ्गपदानि।** अत्रोपपदशब्दः पूर्वपदपरो न तु 'तत्रोपपदम्–' इति तत्संज्ञकपरः। तस्य प्राप्त्यभावात्। **क्लीबत्वनिवृत्त्यर्थमिति।** नपुंसकाधिकारे 'मुखनयन' इत्यादिवक्ष्यमाणसूत्रेण विवराभिधानत्वेन क्लीबत्वं प्राप्तं तन्निवृत्त्यर्थमित्यर्थः। **अमरस्त्विति।** एवं च तन्मतेऽर्धर्चादिष्वयं द्रष्टव्यः।

इति लिङ्गानुशासने पुँल्लिङ्गाधिकारः।

नपुंसकाधिकारः।

११८ नपुंसकम्। अधिकारोऽयम्। ११९ भावे ल्युडन्तः। हसनम्। भावे किम्-पचनोऽग्निः। इध्मप्रव्रश्चनः कुठारः। १२० निष्ठा च। भावे या निष्ठा तदन्तं क्लीबं स्यात्। हसितम्। गीतम्। १२१ त्वष्यञौ तद्धितौ। शुक्लत्वम्। शौक्ल्यम्। ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्। चातुरी। सामग्र्यम्। सामग्री। औचित्यम्। औचिती। कर्मणि च ब्राह्मणादिगुणवचनेभ्यः। ब्राह्मणस्य कर्म ब्राह्मण्यम्। १२३ यद्यढग्यगञणवुञ्छाश्च भावकर्मणि। एतदन्तानि क्लीबानि। 'स्तेनाद्यन्नलोपश्च' (१७९०)। स्तेयम्। 'सख्युर्यः' (१७९१)। सख्यम्। 'कपिज्ञात्योर्ढक्' (१७९२)। कापेयम्। 'पत्यन्तपुरोहितादिभ्यो यक्' (१७९३)। आधिपत्यम्। 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' (१७९४)। औष्ट्रम्। 'हायनान्तयुवादिभ्योऽण्' (१७९५)। द्वैहायनम्। 'द्वन्द्वमनोज्ञादिभ्यो वुञ्' (१७९८)। पितापुत्रकम्। 'होत्राभ्यश्छः' (१८००)। अच्छावाकीयम्। 'अव्ययीभावः' (६९९)। अधिस्त्रि। १२४ द्वन्द्वैकत्वम्। पाणिपादम्। १२५ अभाषायां हेमन्तशिशिरावहोरात्रे च। स्पष्टम्। १२६ अनञ्कर्मधारयस्तत्पुरुषः। अधिकारोऽयम्। १२७ अनल्पे छाया। शरच्छायम्। १२८ राजाऽमनुष्यपूर्वा सभा। इनसभमित्यादि। १२९ सुरासेनाच्छायाशालानिशा स्त्रियां च।

भावे ल्युडन्तः। इदं च सूत्रं यद्यपि 'नपुंसके भावे क्तः' 'ल्युट् च' इत्यनेन गतार्थं तथापि स्पष्टार्थमुपात्तम्। एवमन्तग्रहणं चेति बोध्यम्। इध्मप्रव्रश्चन इति। अत्र करणे ल्युट्। निष्ठा च। अत्र निष्ठपदं क्तस्य बोधकम्। इदमपि सूत्रं 'नपुंसके भावे क्तः' इत्यनेन गतार्थम्। प्रत्ययग्रहणे तदन्तस्य ग्रहणम्। त्वष्यञौ तद्धितौ। भावे इत्यनुवर्तते। यद्यपि 'तस्य भावः–' इति सूत्रे भावशब्दः प्रकृतिजन्यबोधीयप्रकारताश्रयधर्मपरः। 'भावे ल्युडन्तः' इत्यत्र तु भावशब्दो भावनाबोधक इति भेदस्तथापीह भावशब्दः शब्दाधिकारेणान्यार्थको द्रष्टव्यः। कर्मणि च। चाद्भावे। त्वष्यञावित्याद्यनुवर्तते। स्तेनाद्यन्नलोपश्चेति। यद्यपीदं सूत्रं प्राग्व्याख्यातमेव तथापीतः प्रभृति कथितनपुंसकत्वस्पष्टप्रतिपत्त्यर्थमिहोपादानमिति बोध्यम्। द्वन्द्वैकत्वमिति। 'द्वन्द्वश्च प्राणितूर्य–' इत्यादिना येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नपुंसकत्वाभिधायका बोध्या इत्यर्थः। अभाषायामिति। इदमपि सूत्रं 'हेमन्तशिशिरावहोरात्रे च छन्दसि' इति सूत्रे छन्दसीत्युपादानेन गतार्थम्। हेमन्तशिशिरावित्यत्र तु निर्देशादेव पुंस्त्वप्रतिपादकता बोध्या। स्त्रियां चेति। चेन

१३० परवत्। अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात्। राजाङ्काहाः पुंसि। १३१ अपथपुण्याहे नपुंसके। १३२ संख्यापूर्वा रात्रिः। त्रिरात्रम्। संख्यापूर्वेति किम्-सर्वरात्रः। १३३ द्विगुः स्त्रियां च। व्यवस्थया। पञ्चमूली। त्रिभुवनम्। १३४ इसुसन्तः। हविः। धनुः। १३५ अर्चिः स्त्रियां च। इसन्तत्वेऽपि अर्चिः। स्त्रियां नपुंसके च स्यात्। इयमिदं वा अर्चिः। १३६ छर्दिः स्त्रियामेव। इयं छर्दिः। छद्यतेऽनेनेति छादेश्चुरादिण्यन्तादर्चिशुची-स्यादिना इस्। इस्मन्नित्यादिना ह्रस्वः। पटलं छदिरित्यमरः। तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः। १३७ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि। एतेषामभिधायकानि क्लीबे स्युः। मुखमाननम्। नयनं लोचनम्। लोहं कालम्। वनं गहनम्। मांसमामिषम्। रुधिरं रक्तम्। कार्मुकं शरासनम्। विवरं बिलम्। जलं वारि। हलं लाङ्गलम्। धनं द्रविणम्। अन्नमशनम्। अस्यापवादानाह त्रिसूत्र्या। १३८ सीरार्थौदनाः पुंसि। १३९ वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च। वक्त्रो वक्त्रम्। नेत्रो नेत्रम्। अरण्योऽरण्यम्। गाण्डीवो गाण्डीवम्। १४० अटवी स्त्रियाम्। १४१ लोपधः। कुलम्। कूलम्। स्थलम्। १४२ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि। अयं तूलः। १४३ शीलमूलमङ्गलसालकमलतलमुसलकुण्डल-

---

नपुंसकमित्यनुकर्षः। 'विभाषा सेना-' इति विभाषापदोपादानेनेदमपि गतार्थम्। **परवदिति**। 'परवल्लिङ्गं-' इति सूत्रोक्तत इत्यर्थः। परवदिति सूत्रस्य स्मारकमिह परवदिति, नत्विदमपूर्वम्। तत्पुरुष इति द्वन्द्वस्याप्युपलक्षणम्। **संख्यापूर्वा रात्रिः**। 'संख्यापूर्वं रात्रं क्लीबम्' इत्यस्यानुवादः। **द्विगुः स्त्रियां चेति**। चान्नपुंसकमिति संबध्यते। इदमपि 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' 'पात्राद्यन्तस्य न' इत्यनेन गतार्थम्। अतएवाह **व्यवस्थयेति**। **इसुसन्तः**। 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः', 'जनेरुसिः' एतयोरुपात्तावेतौ। **छर्दिः स्त्रियामेवेति**। यद्यपि छर्दिरित्यस्येसन्तत्वेन नपुंसकत्वे प्राप्ते विशेषोपादानेन स्त्रियामित्यनेनैव नित्यस्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः, तथापि 'पटलं छदिः' इत्यमरग्रन्थदर्शनेन साहचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः। अत एव वक्ष्यति **अमरव्याख्यातार इति**। **अस्येति** 'मुखनयन-' इति सूत्रस्य। **सीरार्थौदनाः**। सीरशब्दो हलाभिधानः। अर्थशब्दस्तु धनशब्दस्य पर्यायः। ओदनशब्दोऽन्नवाची। भिस्साभिस्सटाशब्दौ तु दग्धान्नपराविति तयोः क्लीबत्वेऽपि न क्षतिरिति। **अटवी**

पललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च । चात् क्लीबे। शीलं शील इत्यादि । १४४ शतादिः संख्या । शतम् । सहस्रम् । शतादि-रिति किम्—एको द्वौ बहवः । संख्येति किम्-शतश्रृङ्गो नाम पर्वतः । १४५ शतायुतप्रयुताः पुंसि च । अयं शतः । इदं शतमित्यादि । १४६ लक्षा कोटिः स्त्रियाम् । इयं लक्षा । इयं कोटिः । या लक्षा नियुतं च तादित्यमरात् क्लीबे-ऽपि लक्षम् । १४७ शङ्कुः पुंसि । १४८ सहस्रः कचित् । अयं सहस्रः । इदं सहस्रम् । १४९ मन्नन्तद्व्यच्कोऽकर्तरि । मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यान्न तु कर्तरि । वर्म । चर्म । द्व्यच्कः किम्—अणिमा । महिमा । अकर्तरि किम्—ददाति इति दामा । १५० ब्रह्मन् । पुंसि च । अयं ब्रह्मा । इदं ब्रह्म । १५१ नामरोमणी नपुंसके । 'मन्नन्तद्व्यच्क' इत्यस्यायं प्रपञ्चः । १५२ असन्तो द्व्यच्कः । यशः । मनः । तपः । द्व्यच्कः किम्—चन्द्रमाः । १५३ अप्सराः स्त्रियाम् । एता अप्सरसः । प्रायेणायं बहुवचनान्तः । १५४ त्रान्तः । पत्रम् । छत्रम् । १५५ यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । १५६ भृत्रामित्र-

---

स्त्रियाम् । अयं वनाभिधानः । संख्येति । संख्यावाचीत्यर्थः । शतायुत । अयं शतशब्दोऽनन्तवाची । 'शतादिः–' इति पूर्वसूत्रापवादोऽयम् । लक्षाकोटी । एतयो-रपि संख्यावाचकत्वान्नपुंसकत्वे प्राप्ते इदम् । क्लीबेऽपीति । एवं चायमर्धर्चादिषु द्रष्टव्यः । शङ्कुः पुंसि । अस्य शङ्कुशब्दस्य संख्याविशेषवाचकत्वात् 'शतादिः संख्या' इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । सहस्रः कचिदिति । कचिदिति अर्थ-विशेष इत्यर्थः । 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यत्रानन्तवाची । नचात्र सहस्रशब्दस्यानन्तपरत्वे संख्यापरत्वाभावेन सहस्रपादित्यत्र 'संख्यासुपूर्वस्य' इति पाद-शब्दान्त्यलोपो न स्यादिति वाच्यम् । नियतविषयपरिच्छेदकत्वरूपसंख्यात्वाभावेऽपि यथाकथंचित्संख्यायाः प्रतीतिरिति लोपः । वस्तुतश्छान्दसो लोप इति सूचितम् । मन्नन्तद्व्यच्कः । अत्र मन्प्रत्ययः श्रूयमाणनकारान्तः 'सर्वधातुभ्यो मनिन्' इति विहितः । चर्म वर्मेति । चरादिधातोर्मनिन्प्रत्ययः । बाहुलकादिड्भावः । अणिमादौ स्त्रिट् । दामेत्यत्रापि 'सर्वधातुभ्यो मनिन्' इत्यनेनैव मनिन् , परं त्वयं विशेषः । उणादिप्रत्य-यान्तानां संज्ञाशब्दपरत्वेन यादृशी व्युत्पत्तिर्यत्रोचिता सा कल्पनीयेति कर्तर्यपि प्रत्ययः संभवतीति । ब्रह्मेति । 'बृंहेर्नोच्च' इति मनिन्प्रत्ययः । असन्तो द्व्यच्कः । 'सर्वधातुभ्योऽसुन्' इति विहितोऽसुन् । तस्यासुनो येष्वनुवृत्तिस्तदन्ता अपि बोध्याः । 'चन्देर्मो डित्' इति विहितासुन्प्रत्ययान्तश्चन्द्रमस् शब्दोऽप्यसुन्नन्तः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । एवमप्सरःशब्दोऽपि । त्रान्तः । त्रप्रत्ययान्तो नपुंसकः

छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि । अयं भृत्रः । न मित्रममित्रः । तस्य मित्राण्यमित्रास्ते इति माघः । स्याताममित्रौ मित्रे चेति च । यत्तु द्विषोऽमित्र इति सूत्रे हरदत्तेनोक्तम् । अमेर्द्विषदिति औणादिक इत्रच् । अमेरमित्रम् । मित्रस्य व्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासेऽप्येवम् । परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरमिति तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि नञो जरमरमित्रमृता इति । षाष्ठसूत्रास्मरणमूलकमिति दिक् । १५७ पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च । १५८ बलकुसुमशुल्बपत्तनरणाभिधानानि । बलं वीर्यम् । १५९ पद्मकमलोत्पलानि पुंसि च । पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः । अमरोऽप्याह वा पुंसि पद्मं नलिनमिति । एवं चार्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेवेति वृत्तिग्रन्थो मतान्तरेण नेयः । १६० आहवसंग्रामौ पुंसि । १६१ आजिः स्त्रियामेव । १६२ फलजातिः । फलजातिवाची शब्दो नपुंसकं स्यात् । आमलकम् । आम्रम् । १६३ वृक्षजातिः स्त्रियामेव । कचिदेवेदम् । हरीतकी । १६४ वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः । एते क्लीबाः स्युः । १६५ नव-

---

स्यात् । 'सर्वधातुभ्यष्ट्रन्' इति त्रन्प्रत्ययो नकारानुबन्धक इति । यात्रामात्रा । 'हुयाम–' इति विहितत्रन्प्रत्ययोऽपिग्रहणेन गृह्यत इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । एवकारो न्यायसिद्धबाध्यबाधकभावानुवादकः । भृत्रामित्र । पूर्वस्यापवादः । यत्त्विति । दोषान्तरमित्यन्ता तदुक्तिः । मध्योदात्तः मकारेकारस्य प्रत्ययाद्युदात्तत्वेन मध्योदात्त इति तद्भावः । चिन्त्य इति । चित्त्वस्य सत्त्वात् । नन्वमित्रशब्दो नेत्रन्तः किन्तु 'अमिचिमि–' इति धातुविहितक्त्रान्तमित्रशब्देन नञः समासे सति सिद्ध इत्याह नञ्समासेऽप्येवमिति । अन्तोदात्त इत्यर्थः । परवल्लिङ्गतेति । एवं सति नपुंसकत्वं स्यात् । हरदत्तोक्तं दूषयति तत्प्रकृतेत्यादिना । नञो जरमरेति । यदि तु न मित्रम् अमित्र इति नञ्समासस्तदा न 'नञो जरमरमित्र–' इत्यस्य प्राप्तिस्तस्य बहुव्रीहिसमासे प्रवृत्तेरिति बोध्यम् । कुसुमाभिधायित्वेति । वस्तुतः कुसुमाभिधायित्वेऽपीत्यर्थः । यदि तु कुसुमविशेषाभिधायकोऽयं न तु कुसुमशब्दशक्यतावच्छेदकावच्छिन्नशक्त इति विभाव्यते तदा त्वपूर्वमेवोभयलिङ्गत्वाभिधानमिति । मतान्तरेण जलजशब्दस्य जलजातकुसुमान्तराभिधायकत्वमित्यभिप्रायकमतान्तरेणेत्यर्थः । आहवसंग्रामौ पुंसि । एतयोर्युद्धाभिधायकत्वान्नपुंसकत्वे प्राप्ते । एवमाजिशब्दोऽपि । फलजातिरिति । फलोपादानाद् वृक्षपरस्यामलकीशब्दस्य क्लीबत्वेऽपि न क्षतिः । हरीतकीति । हरीतक्याः फलानि हरीतक्यः । 'हरीतक्या-

नीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि ।
१६६ श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि । एतानि क्लीबे स्युः । १६७ दैवं पुंसि च । दैवम् । दैवः ।
१६८ धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि । इदं धान्यमित्यादि । १६९ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि । १७० अक्षमिन्द्रिये । इन्द्रिये किम्—रथाङ्गादौ मा भूत् ।

इति नपुंसकाधिकारः ।

स्त्रीपुंसाधिकारः ।

१७१ स्त्रीपुंसयोः । अधिकारोऽयम् । १७२ गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः । इयं वा गौः । १७३ मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः । इयमयं वा मृत्युः । १७४ गुणवचनमुकारान्तं नपुंसकं च । त्रिलिङ्गमित्यर्थः । पटु । पटुः । पट्वी । १७५ अपत्यार्थतद्धिते । औपगवः । औपगवी । इति स्त्रीपुंसाधिकारः ।

पुंनपुंसकाधिकारः ।

१७६ पुंनपुंसकयोः । अधिकारोऽयम् । १७७ घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः । अयं घृतः । इदं घृतम् । १७८ शृङ्गार्धनिदाघोद्यमशल्यदृढाः । अयं शृङ्गः । इदं शृङ्गम् । १७९ व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः । अयं व्रजः । इदं व्रजम् । १८० कबन्धौषधायुधान्ताः । स्पष्टम् । १८१ दण्डमण्डखण्डशमसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः । एते पुंनपुंसकयोः स्युः । कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले । इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च 'जानपद–' (२००) इति सूत्रेणायोविकारे ङीषि कुशी । दारुणि तु टाप् ।

दिषु व्यक्तिः' इति क्लीबत्वाभिधानात् । रथाङ्गादाविति । आदिना देवनाक्षपरिग्रहः ।

इति लिङ्गानुशासने नपुंसकाधिकारः ।

स्त्रीपुंसयोः । अधिकारोऽयम् । नपुंसकं चेति । चात्स्त्रीपुंसयोः ।

इति लिङ्गानुशासने स्त्रीपुंसाधिकारः ।

शलाकावाचीति । सा च शलाका काष्ठादिनिर्मिता । तत्र मानमाह

कुशा वानस्पत्याः स्थ ता मा पातेति श्रुतिः । 'अतः कृकमि–' (११०) इति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च । हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्द इति । तत्र शारीरकभाष्येऽप्येवम् । एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते भाष्यच्छन्द इत्याद्प्रक्षेपादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः । १८२ गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च ।

इति पुंनपुंसकाधिकारः ।

१८३ अविशिष्टलिङ्गम् । १८४ अव्ययं कतियुष्मदः । १८५ ष्णान्ता संख्या । शिष्टा परवत् । एकः पुरुषः । एका स्त्री । एकं कुलम् । १८६ गुणवचनं च । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् । १८७ कृत्याश्च । १८८ करणाधिकरणयोर्ल्युट् च । १८९ सर्वादीनि सर्वनामानि । स्पष्टार्थेयं त्रिसूची ।

इति लिङ्गानुशासनं समाप्तम् ।

इति श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी संपूर्णा ॥

तथा चेति । इति पुंनपुंसकाधिकारः ।

अविशिष्टलिङ्गम् । तत्तल्लिङ्गवाचकताप्रयुक्तकार्यविशेषशून्यम् । **शिष्टा इति** । पूर्वोक्तशब्दान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवन्तः । **परवदिति** । विशेष्यवदित्यर्थः । **गुणवचनं च** । परवदित्यनुवर्तते । **कृत्याश्च** । कृत्यप्रत्ययान्ताः परवद्बोध्याः । **सर्वादीनि सर्वनामानि** । सर्वनामसंज्ञकानि सर्वादीनि परवद्बोध्यानि । **स्पष्टार्थेति** । लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानसिद्धत्वात् । अत एव 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भगवता भाष्यकृतोक्तम् । तेन यौगिकेषु शब्देषु लोकव्युत्पत्तिरेव लिङ्गाभिधाने प्रमाणमिति सिद्धम् ।

इति लिङ्गानुशासनविवरणम् ।

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलसंचारिविमलतरानवद्यसद्यशःपार्वणपीयूषभानुगस्त्यकुलवंशावतंसश्रीमद्ध्रुवदेवमिश्रात्मजभैरवमिश्रप्रणीतं लिङ्गानुशासनव्याख्यानं संपूर्णम् ।

संपूर्णा चेयं सिद्धान्तकौमुदी ।

श्रीः ।

सिद्धान्तकौमुदीपरिशिष्टानि ।

अथ पाणिनीयशिक्षा १

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥
अनुस्वारो विसर्गश्च ≍क≍पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥ १ ॥
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १० ॥ २ ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥
उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ ।

स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३ ॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥
यद्योभावप्रसंधानमुकारादिपरं पदम्।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १५ ॥ ३ ॥
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।
औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥
कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७ ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
एऐ तु कण्ठ्यतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥
अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृता ॥ २० ॥ ४ ॥
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥
अनुस्वारयमानां च नासिकास्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वरानन्तु।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः ॥ २४ ॥
व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५ ॥ ५ ॥
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६ ॥
रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७ ॥

हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।
नासिकायां तथार्धं च रङ्गस्यैवं द्विमात्रता ॥ २८ ॥
हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन् ।
मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम् ॥ २९ ॥
मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् ।
सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ॥ ३० ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥ ६ ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३ ॥
शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥ ३४ ॥
उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥३५॥
प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥ ३६ ॥
तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥३७॥ ७ ॥
अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥
अमोनुनासिका नह्रौ नादिनो हझषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥ ३९ ॥
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ।
दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि ॥ ४० ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥ ८ ॥
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ।

उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥
उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम्।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम्।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥ ४५ ॥
अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं
वीर्यं नीचस्वरितम् ॥ ४६ ॥
हविषां मध्योदात्तं स्वरिति स्वरितम्।
बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥४७॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४८ ॥ ९ ॥
चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९ ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ५२
अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्।
अक्षताऽशस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३ ॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५४ ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५५ ॥ १० ॥
शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६ ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५७ ॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥
त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते
दिवीति दिवीति ॥ ६० ॥ ११ ॥

अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा गीत्यचोस्पृष्टोदात्तं चापस्तु शंकर एकादश ।

इति पाणिनीयशिक्षा समाप्ता ॥

अथ गणपाठः ।

प्रथमोऽध्यायः ।

२१३ सर्वादीनि सर्वनामानि । (१-१-२७) सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ।

इति सर्वादिः ॥ १ ॥

४४७ स्वरादिनिपातमव्ययम् । (१-१-३७) स्वर् अन्तर् प्रातर् । **अन्तोदात्ताः** । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [अन्तिकात्] पृथक् । **आद्युदात्ताः** । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [शश्वत्] जोषम् तूष्णीम् बहिस् [अधस्] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [हे है] इद्धा अद्धा सामि । **अन्तोदात्ताः** । वत् [५ । १ । ११५] ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस् । **आद्युदात्ताः** । अन्तरा । **अन्तोदात्तः** । अन्तरेण [मक्] ज्योक् [योक् नक्] कम् शम् सना सहसा [श्रद्धा अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । क्त्वातोसुन्कसुनः । कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् [सत्रम् समम्] नमस् हिरुक् ।

तसिलादयस्तद्धित एधाच्पर्यन्ताः [५ । ३ । ७—४६] शस्तसी कृत्वसुच् सुच् आस्थालौ । च्व्यर्थाश्च । [अथ] अम् आम् प्रताम् प्रतान् प्रशान् । **आकृतिगणोऽयम्** । तेनान्येऽपि । तथाहि माङ् श्रम् कामम् [प्रकामम्] भूयस् परम् साक्षात् साचि (साचि) सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् सन्ततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु (अमिथु) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् (अम्भस्) अम्नर् (अम्भर्) स्थाने वरम् दुष्ठु बलात् शु अर्वाक् शुदि वदि इत्यादि । तसिलादयः प्राक्पाशपः [६ । ३ । ३६] शस्प्रभृतयः प्राक्समासान्तेभ्यः [५ । ४ ।४२—६८] मान्तः कृत्वोर्थः । तसिवती । नानाञाविति ॥

इति स्वरादिः ॥ २ ॥

२० चादयोऽसत्त्वे (१-४-५७) । च वा ह अह एव एवम् नूनम् शश्वत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै न्वै रै [रे] श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ लृ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा (वध्वा) धिक् हाहा हेहै (हहे) पाट् प्याट् आहो उताहो हो अहो नो (नौ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत [सम् वशम् शिकम् दिकम्] सनुकं छंवट् (छंबट्) शङ्के शुकम् खम् सनात् सनुतर् नहिकम् सत्यम् ऋतम् श्रद्धा इद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे [है] आहोस्वित् शम् कम् खम् दिष्ट्या पशु नट् सह [आनुषट्] आनुषक् अङ्ग फट् ताजक् भाजक् अये अरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् सीम् सिम् सिम् सि वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः । **आकृतिगणोऽयम्** । **इति चादयः ॥३॥**

२१ प्रादयः (१-४-५८) । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप । **इति प्रादयः ॥४॥**

७६२ ऊर्यादिच्विडाचश्च (१-४-६१) । ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला संशकला ध्वंसकला भ्रंसकला गुलुगुधा सजूस् फल फली विक्ली आक्ली आलोष्ठी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मशा मस्मसा मसमसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा बन्धा प्रादुस् श्रत् अविस् । **इत्यूर्यादयः ॥५॥**

७७५ **साक्षात्प्रभृतीनि च (१-४-७४)**। साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने प्रसहने प्रतपने प्रादुस् नमस् । **आकृतिगणोऽयम् । इति । साक्षात्प्रभृतयः ॥६॥**

इति प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

६७१ **तिष्ठद्गुप्रभृतीनि च (२-१-१७)** तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् [प्रौढम्] पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् [अपरदक्षिणम्] संप्रति असंप्रति । इच्प्रत्ययः समासान्तः । [५।४।१२७।५।४।१२८] ॥ **इति तिष्ठद्गुप्रभृतयः ॥७॥**

७१७ **सप्तमी शौण्डैः (२-१-४०)**। शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण । **इति शौण्डादयः ॥८॥**

७२५ **पात्रेसमितादयश्च (२-१-४८)** पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकबकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटु गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा । **आकृतिगणोऽयम् ।**

इति पात्रेसमितादयः ॥ ९ ॥

७३५ **उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । (२-१-५६)** व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव । **इति व्याघ्रादयः ॥ १० ॥ आकृतिगणोऽयम्** । तेन । मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ ५ ॥

७३८ **श्रेण्यादयः कृतादिभिः । (२-१-५९)** (१) श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देव मुण्डभूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [विशिष्ट] पटु पण्डित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः ॥ ११ ॥** (२) कृत मित मत भूत उक्त [युक्त] समाज्ञात

समाम्नात समाख्यात संभावित [संसेवित] अवधारित अवकल्पित निराकृत उपकृत उपाकृत [दृष्ट कलित दलित उदाहृत विश्रुत उदित] । **आकृतिगणोऽयम्** ।

इति कृतादयः ॥ १२ ॥

७३६ ***शाकपार्थिवादीनामुपसंख्यानम्*** । (२-१-६०) शाकपार्थिव कुतपसौश्रुत अजातौल्वलि । **आकृतिगणोऽयम्** । कृताकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ।

इति शाकपार्थिवादयः ॥ १३ ॥

७५२ **कुमारः श्रमणादिभिः** । (२-१-७०) श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः ॥ १४ ॥**

७५४ **मयूरव्यंसकादयश्च** । (२-१-७२) मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य (हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । एहीडादयोऽन्यपदार्थे । एहीडम् एहियवं च एहिवाणिजा क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा (उद्धरचूडा) आहरचेला आहरवसना [आ हरसेना] आहरवनिता (आहरविनता) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [नखप्रचम्] निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः । जहिजोडम् । जहिस्तम्बम् । जहिस्तम्बः । [उज्जहिस्तम्बम्) । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभृज्जता खादतमोदता खादतचमता । खादताचमता । आहरनिवपा । आहरनिष्किरा । आवपनिष्किरा । उत्पचविपचा भिन्धिलवणा । कृन्धिविचक्षणा पचलवणा पचप्रकूटा । **आकृतिगणोऽयम्** । तेन । अकुतोभयः । काम्दिशीकः । कान्देशीकः । आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् अवश्यकार्यम् ।

इति मयूरव्यंसकादयः ॥ १५ ॥

७०३ **याजकादिभिश्च** । (२-२-९) याजक पूजक परिचारक परिवेषक परिषेचक स्नापक अध्यापक उत्साह उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक ।

इति याजकादयः ॥ १६ ॥

६०२ **राजदन्तादिषु परम्** । (२-२-३१) राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोप्तम् उप्तगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरग्वायनि । आरग्वायनबन्धकी । चित्ररथबाह्लीकम् । अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् । गोजवाजम् । गोपालिधानपूलासम् । गोपालधानीपूलासम् । पूलासककारण्डम् । पूलासककुरण्डम् । स्थूलासम् । स्थूलपूलासम् । उशीरबीजम् । [जिज्ञास्थि] सिञ्जास्थम् । सिञ्जाश्वत्थम । चित्रास्वाती । चित्रस्वाती । भार्यापती दंपती जंपती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरोबिजु । शिरोबीजम् । शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ ।

इति राजदन्तादयः ॥ १७ ॥

६०० **वाहिताग्न्यादिषु** । (२-२-३७) आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [मद्यपीत] ऊढभार्य गतार्थ । **आकृतिगणोऽयम्** । तेन गडुकण्ठ अस्युद्यत (असुद्यत) दण्डपाणिप्रभृतयोऽपि ।

इत्याहिताग्न्यादयः ॥ १८ ॥

७५१ **कडाराः कर्मधारये** । (२-२-३८) कडार गडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गुल (पिङ्गल) तड तनु [जठर] बधिर मठर कञ्ज बर्बर । **इति कडारादयः ॥ १९ ॥**

५८४ ***नौकाकान्नशुकशृगालवर्जेषु*** । (२-३-१७) नौ काक अन्न शुक शृगाल । **इति नावादयः ॥ २० ॥**

५६१ **प्रकृत्यादिभ्य उपसंख्यानम्** । (२-३-१८) प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र । **इति प्रकृत्यादयः ॥ २१ ॥**

६१५ **गवाश्वप्रभृतीनि च** । (२-४-११) गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत् मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् [तृणोलपम्] दासीदासम् कुटीकुटम् भागवतीभागवतम् । **इति गवाश्वप्रभृतीनि ॥ २२ ॥**

६१८ **न दधिपयआदीनि** । (२-४-१४) दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिव्राट्-

कौशिकौ) प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी [श्रद्धातपसी मेधातपसी] अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे ।

इति दधिपयआदीनि ॥ २३ ॥

८१६ अर्धर्चाः पुंसि च । (२-४-३१) अर्धर्च गोमय कषाय कार्षापण कुतप कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारबाण (वारवाण) प्रोथ कपित्थ [शुष्क] शाल शील शुक्ल (शुल्क) शीधु कवच रेणु [ऋण] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड [खल] मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक [कर्पट] शिखर कल्क (वल्कल) नटमस्तक (नाटमस्तक) वलय कुसुम तृण पङ्क कुण्डल किरीट [कुमुद] अर्बुद अङ्कुश तिमिर आश्रय भूषण इक्कस (इष्वास) मुकुल वसन्त तटाक (तडाग) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [विशाल] चषाल (चखाल) खण्ड दर विटप [रण बल मक] मृणाल हस्त आर्द्र हल [सूत्र] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [छल] पुर (पुरा) राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल (कुक्कुट) कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य [बाल] छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [स्तन स्वर] संगम निष्क क्षेम शूक छत्रपवित्र [यौवन कलह] मालक (पालक) मूषिक [मण्डल वल्कल] कुज (कुञ्ज) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन (लोमश) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल ।

इत्यर्धर्चादिः ॥ २४ ॥

१०८४ पैलादिभ्यश्च । (२-४-५९) पैल शालङ्कि सात्यकि सात्यकामि राहवि रावणि औदञ्चि औदवजि औदमेघि औदव्रजि (औदमज्जि औदभृज्जि) दैवस्थानि पैङ्गलोदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्राहमानि औजिहानि औदशुद्धि तद्राजाच्चाणः (तद्राज) । आकृतिगणोऽयम् । इति पैलादिः ॥२५॥

१०८६ न तौल्वलिभ्यः । (२-४-६१) तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमित्रि (दैवमति) दैवयज्ञि

चाफट्टकि बैल्वकि वैकि (वैङ्कि) आनुहारति (आनुराहति) पौष्करसादि आनुरोहति आनुति प्रादोहनि नैमिश्रि प्राडाहति बान्धकि वैशीति आसिनासि आहिंसि आसुरी नैमिषि आसिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति ।

इति तौल्वल्यादिः ॥ २६ ॥

११४६ यस्कादिभ्यो गोत्रे (२-४-६३) यस्क लह्य दुह्य अयस्थूण (अयःस्थूण) तृणकर्ण सदामत्त कम्बलहार बहिर्योग पर्णाढक कर्णाढक पिण्डीजङ्घ बकसक्थ (बकसकथ) विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जङ्घारथ उत्कास कटुक मथक (मन्थक) पुष्करट् (पुष्करसद्) विषपुट उपरिमेखल क्रोष्टुकमान (क्रोष्टुमान) क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षुक भलन्दन भडिल भण्डिल भडित । एते यस्कादयः ॥ २७ ॥

११४६ न गोपवनादिभ्यः । (२-२-६७) गोपवन शैग्रु (शिग्रु) बिन्दु भाजन अश्वावतान श्यामाक (श्योनाक) श्यामक श्यापर्ण । बिदाद्यन्तर्गणोऽयम् । (४-१-१०४) इति गोपवनादिः ॥ २८ ॥

११५० तिककितवादिभ्यो द्वन्द्वे । (२-४-६८) तिककितवाः वङ्करभण्डीरथाः उपकलमकाः पफकनरकाः बकनखगुदपरिणद्धाः उब्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः अग्निवेशदशेरुकाः ।

एते तिककितवादयः ॥ २६ ॥

११५१ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । (२-४-६६) उपक लमक भ्राष्ट्रक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गडुक उदङ्क सुधायुक अबन्धक पिङ्गलक पिष्टक सुपिष्ट (सुपिष्ठ) मयूरकर्ण खरीजङ्घ शलाथल पतञ्जल पदञ्जल कठेरणि कुषीतक कशकृत्स्न (काशकृत्स्न) निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिलक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपजग्ध प्रतान अनभिहित कमक वराटक लेखाभ्र कमन्दक पिञ्जलक वर्णक मसूरकर्ण मदाघ कवन्तक कमन्तक कदामत्त दामकण्ठ । एते उपकादयः ॥ ३० ॥

इति द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

२६६७ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः । (३-१-१२) भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्चत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् । एते भृशादयः ॥ ३१ ॥

२६६८ **लोहितादिडाज्भ्यः क्यष्** । (३-१-१३) लोहित चरित नील फेन मद्र हरित दास मन्द । **लोहितादिराकृतिगणः** ॥ ३२ ॥

२६७४ **सुखादिभ्यः कर्तृवेदनायाम्**। (३-१-१८) सुख दुःख तृप्त कृच्छ्र अस्र आस्र अलीक प्रतीप करुण कृपण सोढ। **इत्येतानि सुखादीनि** ॥३३॥

२६७८ **कण्ड्वादिभ्यो यक्** । (३-१-२७) कण्डूञ् मन्तु हृणीङ् वल्गु असु [मनस्] महीङ् लोट् लेट् इरस् इरज् इरञ् उवस् उषस् वेट् मेधा कुषुभ (नमस्) मगध तन्तस् पम्पस् (पपस्) सुख दुःख [भिक्ष चरण चरम अवर] सपर अरर (अरर्) भिषज् भिष्णुज् [अपर आर] इषुध वरण चुरण तुरण भुरण गद्गद एला केला खेला [वेला शेला] लिट् लाट [लेखा लेख] रेखा द्रवस् तिरस् अगद उरस् तरण (तरिण) पयस् संभूयस् सम्बर। **आकृतिगणोऽयम्** ।

इति कण्ड्वादिः ॥ ३४ ॥

२८९६ **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** । (३-१-१३४) नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः । सहितपिदमः संज्ञायाम् । सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः [शत्रुदमनः] **इति नन्द्यादिः** ॥ ३५ ॥ ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्दी । रक्षश्रवपशां नौ । निरक्षी निश्रावी निवापी निशायी । याचृव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी । अचामचित्तकर्तृकाणाम् । अकारी अहारी अविनायी [विशायी विषायी] विशयी विषयी देशे । विशयी विषयी देशः । अभिभावी भूते । अपराधी उपरोधी परिभवी परिभावी । **इति ग्रहादिः** ॥ ३६ ॥ पच वच वप वद चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गाहट् सरट् देवट् [दोषट्] जर (रज) मर (मद) क्षम (क्षप) सेव मेष कोप (कोष) मेध नर्त व्रण दर्श सर्प [दम्भ दर्प] जारभर श्वपच ।

पचादिराकृतिगणः ॥ ३७ ॥

२९१९ **कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्** । (३-२-५) मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिध्र । **आकृतिगणोऽयम्** ।

इति मूलविभुजादयः ॥ ३८ ॥

पार्श्वादिषूपसंख्यानम् । (३-२-१५) पार्श्व उदर पृष्ठ उत्तान अवमूर्धन् ।

इति पार्श्वादिः ॥ ३९ ॥

३१७१ भविष्यति गम्यादयः । (३-३-३) गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतियोगी । एते गम्यादयः ॥४०॥

३२८१ षिद्भिदादिभ्योऽङ् । (३-३-१०४) भिदा विदारणे । छिदा द्वैधीकरणे । विदा । क्षिपा । गुहा गिर्योषध्योः । श्रद्धा मेधा गोधा । आरा शस्त्र्याम् । हारा । कारा बन्धने । क्षिया । तारा ज्योतिषि । धारा प्रपातने । रेखा चूडा पीडा वपा वसा मृजा । कृपेः संप्रसारणं च । कृपा । इति भिदादिः ॥ ४१ ॥

२२३३ संपदादिभ्यः क्विप् । (वा) (३-३-१०८) संपद् विपद् आपद् प्रतिपद् परिषद् । एते संपदादयः ॥ ४२ ॥

३१७३ भीमादयोऽपादाने । (३-४-७४) भीम भीष्म भयानक वहचर (वहचरु) प्रस्कन्दन प्रतपन (प्रपतन) समुद्र स्रुव स्रुक् वृष्टि (दृष्टि) रक्षः संकसुक (शङ्कुसुक) मूर्ख खलति । आकृतिगणोऽयम् । इति भीमादिः ॥ ४३ ॥ इति तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

४५४ अजाद्यतष्टाप् । (४-१-४) अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापहाणा (पूर्वापहाणा) अपरापहाणा । संभस्त्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा । मध्यमा पुंयोगेऽपि । मूलान्नञः । दंष्ट्रा । एतेऽजादयः ॥ ४४ ॥

३०८ न षट्स्वस्रादिभ्यः (४-१-१०) स्वसृ दुहितृ ननान्दृ यातृ मातृ तिसृ चतसृ । इति स्वस्रादिः ॥ ४५ ॥

४६२ नित्यं सपत्न्यादिषु । (४-१-३५) समान एक वीर पिण्ड श्व (शिरी) भ्रातृ भद्र पुत्र । दासाच्छन्दसि । इति समानादिः ॥ ४६ ॥

४६८ षिद्गौरादिभ्यश्च । (४-१-४१) गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य [पुट तूण] द्रुण द्रोण हरिण कोकण (काकण) पटर उणक [आमल] आमलक कुवल बिम्ब बदर फर्करक (कर्करक) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल षाण्डश आढक आनन्द आश्वत्थ सृपाट आखक (आपच्चिक) शष्कुल सूर्य (सूर्म) शूर्प सूप यूष (पूष) यूथ सूप मेथ वल्लक धातक सल्लक माल्लक मालत साल्वक वेतस वृस (वृस) अतस [उभय] भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुही

अनड्वाही । एषणः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि आद्गाहमानि गौतम (गोतम) [पारक] अयस्थूण (अयःस्थूण) भौरिकि भौलिकि भौलिङ्गि यान मेध आलम्बि आलजि आलब्धि आलच्चि केवाल आपक आरट नट टोट नोट मूलाट शातन [पोतन] पातन पाठन (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहिणी [सेचन] सुमङ्गलात्संज्ञायाम् । अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड [षण्ड] उर्द गुर्द शम सूद औड (आर्द) ह्रद (हृद) पाण्ड [भाण्डल] भाण्ड [लोहाण्ड] कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत् [सोम] सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । विकल निष्कल पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह । **इति गौरादिः ॥ ४७ ॥**

५०३ **बह्वादिभ्यश्च** (४-१-४५) बहु पद्धति अञ्चति अङ्कति अंहति शकटि (शकति)। शक्तिः शस्त्रे। शारि वारि राति राधि [शाधि] अहि कपि यष्टि मुनि । इतः प्राण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज चन्द्रभागान्नद्याम् (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद । **आकृतिगणोऽयम्** । तेन भग गल राग इत्यादि ।
इति बह्वादयः ॥ ४८ ॥

५२७ शार्ङ्गरवाद्यञो ङीन् । (४-१-७३) शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण बैद गौतम कामण्डलेय ब्राह्मणकृतेय [आनिचेय] आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काव्य (काव्य) शैव्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड । भोगवद्गौरिमतोः संज्ञायां घादिषु [६-३-४३] नित्यं ह्रस्वार्थम् । नृनरयोर्वृद्धिश्च । **इति शार्ङ्गरवादिः ॥४६॥**

१२०० **कौड्यादिभ्यश्च** । (४-१-८०) कौडि लाडि व्याडि आपिशलि आपक्षिति चौपयत चैटयत (वैटयत) सैकयत बैल्वयत सौधातकि । सूत युवत्याम् । भोज क्षत्रिये । यौतकि कौटि भौरिकि भौलिकि [शाल्मलि] शालास्थलि कापिष्ठलि गौकक्ष्य । **इति कौड्यादिः ॥ ५० ॥**

१०७४ **अश्वपत्यादिभ्यश्च** । (४-१-८४) अश्वपति [ज्ञानपति] शतपति धनपति गणपति [स्थानपति यज्ञपति] राष्ट्रपति कुलपति गृहपति [पशुपति] धान्यपति धन्वपति [बन्धुपति धर्मपति] सभापति प्राणपति क्षेत्रपति ।
इत्यश्वपत्यादिः ॥ ५१ ॥

१०७८ उत्सादिभ्योऽञ् । (४-१-८६) उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन । वष्कयासे । पृथिवी [धेनु] पङ्क्ति जगति त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण । उदस्थान देशे । पृषदंश भल्लकीय रथंतर मध्यंदिन बृहत् महत् सत्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव ग्रीष्मादच्छन्दसि । **इत्युत्सादिः** ॥ ५२ ॥

१०६६ बाह्वादिभ्यश्च । (४-१-६६) बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपनिन्दु [उपबिन्दु] वृषली वृकला चूडा बलाका मूषिका कुशला भगला (छगला) ध्रुवका [धुवका] सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् [भद्रशर्मन्] सुशर्मन् कुनामन् (सुनामन) पञ्चन् सप्तन् अष्टन् । अमितौजसः सलोपश्च । सुधावत् उदञ्चु शिरस् माष शराविन् मरीचि क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम (उदङ्क) उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च । **आकृतिगणोऽयम्** । तेन सात्वकिः जाङ्घिः ऐन्दशर्मिः आजधेनविः इत्यादि ।

इति बाह्वादयः ॥५३ ॥

१०६६ गोत्रे कुञ्जादिभ्यश्च्फञ् । (४-१-६८) कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन शठ शाक शुण्डा शुभ विपाश स्कन्द स्कम्भ ।

इति कुञ्जादिः ॥ ५४ ॥

११०१ नडादिभ्यः फक् । (४-१-६६) नड चर (वर बक मुञ्ज इतिक इतिश उपक (एक) लमक शलङ्कु शलङ्कं च । सप्तल वाजप्य तिक । अग्निशर्मन्वृषगणे । प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल (कातर) कातल काश्यप (कुश्यप) काश्य काव्य (काव्य) अज अमुष्य (अमुष्म) कृष्णरणौ ब्राह्मणवासिष्ठे । अमित्र लिगु चित्र कुमार क्रोष्टु क्रोष्टं च । लोह दुर्ग स्तम्भ शिंशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलंधर अध्वर युगंधर हंसक दण्डिन् हस्तिन् [पिण्ड] पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक बदर अश्वल खरप लङ्क इन्ध अस्र कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप । **इति नडादिः ॥ ५५ ॥**

११०६ अनृष्यानन्तर्ये बिदादिभ्योऽञ् । (४-१-१०४) बिद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प (किंदर्भ) विश्वानर ऋष्टिषेण (ऋष्टिषेण) ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक (शुनक्) धेनु गोपवन शिग्रु बिन्दु [भोगक] भाजन (शमिक) अश्वावतान श्यामाक

श्यामक (श्यावलि) श्यापर्णे हरित किंदास बह्यस्क अर्कजूष (अर्कलूष) बध्योग विष्णुवृद्ध प्रतिबोध रचित (रथीतर) रथन्तर गविष्ठिर निषाद (शबर अलस) मठर (मृडाकु) सपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्दृ । परस्त्री परशुं च।

इति बिदादिः ॥ ५६ ॥

११०७ गर्गादिभ्यो यञ् । (४-१-१०५) गर्ग वत्स। वाजासे। संकृति अज व्याघ्रपात् विदभृत् प्राचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक एक धूम अवट मनस् धनंजय वृक्ष विश्वावसु जरमाण लोहित शंसित बभ्रु वल्गु मण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायीसूनु कथक कन्थक ऋक्ष तृक्ष (वृक्ष) [तनु] तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनडुह् कण्व शकल गोकक्ष अगस्त्य कण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वर्णक (चणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज्) [भिष्णज] भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलु बृहदग्नि [सुलोहिन्] सुलाभिन् उक्थ कुटीगु ।

इति गर्गादिः ॥ ५७ ॥

१११३ अश्वादिभ्यः फञ् । (४-१-११०) अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर (खजूर) [खजार वस्त] पिजूर भडिल भण्डिल भडित भण्डित [प्रकृत रामोद] क्षान्त [काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र श्रविष्ठ] पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट शप आत्रेये । जन जड खड ग्रीष्म अर्हकित विशंप विशाल गिरि चपल चुप दासक वैल्य (बैल्व) प्राच्य [धर्म्य] आनडुह्य । पुंसि जाते । अर्जुन [प्रहृत] सुमनस् दुर्मनस् मन (मनन) [प्रान्त] ध्वन । आत्रेय भरद्वाजे । भरद्वाज आत्रेये । उत्स आतव कितव [वद धन्य पाद] शिव खदिर । इत्यश्वादिः ॥ ५८ ॥

१११५ शिवादिभ्योऽण् । (४-१-११२) शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ् (ककुभा) अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोद कपिञ्जल (कुपिञ्जल) खञ्जन वतण्ड तृणकर्ण क्षीरहद जलहद परिल (पथिक) पिष्ट हैहय [पार्षिका] गोपिका कपिलिका जटिलिका बधिरिका मञ्जीरक मजिरक वृष्णिक खञ्जार खञ्जाल [कर्मार] रेख लेख आलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष (पिटक विटप) पिटाक

तृत्ताक नभक ऊर्णनाभ चरत्कारु (पृथा उत्क्षेप) पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्ठ मसुरकर्ण मयूरकर्ण [खर्जूरकर्ण] कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश मस्क लह्य द्रुह्य अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी । द्व्यचो नद्याः । त्रिवेणी त्रिवणं च । **इति शिवादिः । आकृतिगणः ॥ ५६ ॥**

११२६ शुभ्रादिभ्यश्च । (४-१-१२३) शुभ्र विष्ट पुर (विष्टपुर) ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू (लेखाभ्र) विकसा (विकास) रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजबस्ति शकंधि विमातृ विधवा शुक विश देवतर शकुनि शुक्र उग्र शातल (शतल) बन्धकी सृकण्डु विस्रि अतिथि गोदन्त कुशाम्ब मकष्टु शाताहर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव प्रवाहण भरत (भारत) भरम मृकण्डु कर्पूर इतर अन्यतर आलीढ सुदन्त सुदक्ष सुवक्षस् सुदामन् कद्रु तुद अकशाय कुमारिका कुठारिका किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खड्डर कुबेरिका अशोका गन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् (अनुदृष्टि) जरतिन् बलीवर्दिन् विप्र बीज जीव श्वन् अश्मन् अश्व अजिर । **इति शुभ्रादिः । आकृतिगणः ॥६०॥**

११३१ कल्याण्यादीनामिनङ् च । (४-१-१२६) कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति (अनुसृष्टि) जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री । **इति कल्याण्यादिः ॥ ६१ ॥**

११४३ गृष्ट्यादिभ्यश्च । (४-१-१३६) गृष्टि हृष्टि बलि हलि विधि कुद्रि अजबस्ति मित्रयु । **इति गृष्ट्यादिः ॥ ६२ ॥**

११६६ रेवत्यादिभ्यष्ठक् । (४-१-१४६) रेवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष (ककुदाक्ष) चामरग्राह । **इति रेवत्यादिः ॥ ६३ ॥**

११७५ कुर्वादिभ्यो ण्यः । (४-१-१५१) कुरु गर्गर मङ्गुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति (विमति) कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाला एजि वातकि दामोष्णीषि गणकारि कैशोरि कुट शालाका (शलाका) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यंकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कर्तृ हर्तृ इन पिण्डी तक्षन् । वामरथस्य कण्वादिवत्स्वरवर्जम् ।

इति कुर्वादिः ॥ ६४ ॥

११७८ तिकादिभ्यः फिञ् । (४-१-१५४) तिक कितव संज्ञाबाल-शिख (संज्ञा बाला शिखा) उरस् शाठ्य सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गौकक्ष्य (गौकक्ष्य) कुरु देवरथ तैतल औरस कौरव्य भौरिकि भौलिकि चौपयत चैटयत शीकयत क्षैतयत वाजवत् चन्द्रमस शुभ गङ्गा वरेण्य सुपामन् आरब्ध वाह्यक स्वल्पक वृष लोमक उदन्य यज्ञ । **इति तिकादिः ॥ ६५ ॥**

११८२ वाकिनादीनां कुक्च । (४-१-१५८) वाकिन गौधेर कार्कश काक लंका । चर्मिवर्मिणोर्नलोपश्च । **इति वाकिनादिः ॥६६॥**

११९४ कम्बोजाल्लुक् । (४-१-१७५) कम्बोज चोल केरल शक यवन । **इति कम्बोजादिः ॥ ६७ ॥**

११९७ न प्राच्यभर्गादियौधेयादिभ्यः । (४-१-१७८) भर्ग करूश केकय कश्मीर साल्व सुस्थाल उरस् कौरव्य । **इति भर्गादिः ॥ ६८ ॥** यौधेय शौकेय शौभ्रेय ज्यावाणेय धौर्तेय धार्तेय त्रिगर्त भरत उशीनर ।

इति यौधेयादिः ॥ ६९ ॥

१२४४ भिक्षादिभ्योऽण् । (४-२-३८) भिक्षा गर्भिणी क्षेत्र करीष अङ्गार (अङ्गार) चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा भूत विषय श्रोत्र । **इति भिक्षादिः ॥ ७० ॥**

१२५४ खण्डिकादिभ्यश्च । (४-२-४५) खण्डिका वडवा । क्षुद्र-कमालवात् (क्षुद्रकमालवात्) सेना । संज्ञायाम् । भिक्षुक शुक उलूक श्वन् अहन् युगवरत्रा (युगवरत्र) हलबन्धा (हलबन्ध) । **इति खण्डिकादिः ॥७१॥**

१२५८ पाशादिभ्यो यः । (४-२-४९) पाश तृण धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन । **इति पाशादिः ॥७२॥**

१२६० * खलादिभ्य इनिर्वक्तव्यः * । (४-२-५१) खल डाक कुटुम्ब शाक कुण्डलिनी । **इति खलादिराकृतिगणः ॥७३॥**

१२६२ राजन्यादिभ्यो वुञ् । (४-२-५३) राजन्य आनृत बाभ्रव्य शालङ्कायन दैवयातव (दैवयात) [अव्रीड वरत्रा] जालंधरायण (राजायन) तेलु आत्मकामेय अम्बरीषपुत्र वसाति बैल्ववन शैलूष उदुम्बर तीव्र बैल्वल आर्जुना-यन संप्रिय दक्षि ऊर्णनाभ । **इति राजन्यादिराकृतिगणः ॥७४॥**

१२६३ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ (४-२-५४) भौरिकी भौलिकी चौपयत चौटयत (चैटयत) काणेय वाणिजक वालिकाज्य (वालिकाज्य) सैकयत वैकयत । **इति भौरिक्यादिः ॥७५॥** ऐषुकारि सारस्यायन

(सारसायन) चान्द्रायण द्व्याक्षायण त्र्याक्षायण औडायन जौलायन खाडायन दासमित्रि दासमित्रायण शौद्रायण दाक्षायण शापण्डायन (शायण्डायन) तार्क्ष्यायण शौभ्रायण सौवीर (सौवीरायण) शपण्ड (शयण्ड) शौण्ड शयाण्डि (शयाण्ड) वैश्वमानव वैश्वधेनव (वैश्वधेनव) नड तुण्डदेव विश्वदेव (सापिण्डि)

इत्यैषुकार्यादिः ॥ ७६ ॥

१२७० क्रतूक्थादिसूत्रान्ताट्ठक् । (४-२-६०) उक्थ लोकायत न्यास न्याय पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर श्लक्ष्ण (श्लक्ष्ण) संहिता पदक्रम संघट (संघट्ट) वृत्ति परिषद् संग्रह गण [गुण] आयुर्वेद (आयुर्वेद) । इत्युक्थादिः ॥ ७७ ॥

१२७१ क्रमादिभ्यो वुन् । (४-२-६१) क्रम पद शिक्षा मीमांसा सामन् ।

इति क्रमादिः ॥ ७८ ॥

१२७३ वसन्तादिभ्यष्ठक् । (४-२-६३) वसन्त ग्रीष्म वर्षा शरद् शरत् हेमन्त शिशिर प्रथम गुण चरम अनुगुण अथर्वन् आथर्वण ।

इति वसन्तादिः ॥ ७९ ॥

१२८७ संकलादिभ्यश्च । (४-२-७५) संकल पुष्कल उत्तम उडुप उद्वेप उत्पुट कुम्भ निधान सुदक्ष सुदत्त सुभूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका (पूतिक) पूलास कूलास पलाश निवेश (गवेश) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण (वरुण) बहुल सद्योज अभिषिक्त गोभृत् राजभृत् भल्ल मल्ल माल ।

इति संकलादिः ॥ ८० ॥

१२८९ सुवास्त्वादिभ्योऽण् । (४-२-७७) सुवास्तु (सुवस्तु) वर्णु भण्डु खण्डु सेवालिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण कृष्णकर्ण [कर्क] कर्कन्धुमती गोह अहिसक्थ । इति सुवास्त्वादिः ॥ ८१ ॥

१२९२ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः । (४-२-८०) (१) अरीहण (अह्रीरण) द्रुघण द्रुहण भलग (भगल) उलन्द किरण सांपरायण क्रौष्ट्रायन (क्रौष्ट्रायण) औष्ट्रायण त्रैगर्तायन मैत्रायण भास्त्रायण वैमतायण (वैमतायन) गौमतायन सौमतायन सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण (कौन्द्रायण) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश उद्दण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न (कशकृत्स्न) जाम्बवत् शिंशपा रैवत (रेवत) बिल्व सुयज्ञ शिरीष

बधिर जम्बु खदिर सुशर्मन् (सशर्मन्) दलतृ भलन्दन खण्डु कलन (कनल) यज्ञदत्त । इत्यरीहणादिः ॥ ८२ ॥ (२) कृशाश्व अरिष्ट आरिश्म वेश्मन् विशाल लोमश रोमश लोमक रोमक शबल कूट वर्चल सुवर्चल सुकर सूकर प्रातर (प्रतर) सदृश पुरग पुराग सुख धूम अजिन विनत अवनत कुविद्यास (कुविद्यास) पराशर अरुस् अयस् मौद्गल्याकर (मौद्गल्य युकर) । इति कृशाश्वादिः ॥ ८३ ॥ (३) ऋश्य (ऋष्य) न्यग्रोध शर निलीन [निवास निवात] निधान निबन्धन (निबन्ध) [विबद्ध] परिगूढ [उपगूढ] असनी सित मत् वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह (अनडुह्) अरडु परिवंश वेणु वीरण खण्ड दण्ड परिवृत्त कर्दम अंशु । इत्यृश्यादिः ॥ ८४ ॥ (४) कुमुद शर्करा न्यग्रोध इक्कट संकट कंकट गर्त बीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ बल्वज यवास कूप विकङ्कत दशग्राम । इति कुमुदादिः ॥ ८५ ॥ (५) काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुहा बिस तृण कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल । इति काशादिः ॥ ८६ ॥ (६) तृण नड मूल वन पर्ण वर्ण वराण बिल पुल फल अर्जुन अर्ण सुवर्ण बल चरण बुस । इति तृणादिः ॥ ८७ ॥ (७) प्रेक्षा फलका (हलका) बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट संकट कट कूप बुक पुक पुट मह परिवाप यवाष ध्रुवका गर्त कूपक हिरण्य । इति प्रेक्षादिः ॥ ८८ ॥ (८) अश्मन् यूथ ऊष मीन मद दर्भ वृन्द गुद खण्ड नग शिखा कोट पाम कन्द कान्द कुल गह्व गुड कुण्डल पीन गुह इत्यश्मादिः ॥ ८९ ॥ (९) सखि अग्निदत्त वायुदत्त सखिदत्त [गोपिल] भल्लपाल (भल्ल पाल) चक्र चक्रवाक छगल अशोक करवीर वासव वीर पूर वज्र कुशीरक शीहर (सीहर) सरक सरस समर समल सुरस रोह तमाल कदल सप्तल । इति सख्यादिः ॥ ९० ॥ संकाश कपिल कश्मीर [समीर] सूरसेन सरक सूर । सुपन्थिन्पन्थ च । यूप (यूथ) अंश अङ्ग नासा पलित अनु नाश अश्मन् कूट मलिन दश कुम्भ शीर्ष चिरन्त (विरत) समल सीर पञ्जर मन्थ नल रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका। इति संकाशादिः ॥ ९१ ॥ (११) बल चुल नल दल वट लकुल उरल पुल (पुल) मूल उलडुल (उल डुल) वन कुल । इति बलादिः ॥ ९२ ॥ (१२) पक्ष तुक्ष तुष कुण्ड अण्ड कम्बलिका वलिक चित्र अस्ति । सुपथिन् पन्थ च । कुम्भ सीरक सरक सकल सरस समल अतिश्वन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक (सिंहक) अङ्कुश सुवर्णक हंसक हिंसक कुत्स बिल खिल यमल हस्त कला सकर्णक । इति पक्षादिः ॥ ९३ ॥ (१३) कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद

आनडुह्य पाञ्चजन्य स्फिग (स्फिज्) कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत् (आण्डीवत) जव जैत्र आकन (अनक) इति कर्णादिः ॥ ६४ ॥ (१४) सुतंगम मुनिचित विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक (खडिक) शुक विप्र बीजावापिन् (बीजवापिन्) अर्जुन श्वन् अजिर जीव खण्डिन कर्ण विग्रह। इति सुतंगमादिः ॥ ६५ ॥ (१५) प्रगदिन् मगदिन् मददिन् कविल खण्डित गदित चूडार मन्दार कोविदार । इति प्रगद्यादिः ॥ ६६ ॥ (१६) वराह पलाश (पलाश) शिरिष (शिरीष) पिनद्ध निबद्ध बलाह स्थूल विदग्ध [विजग्ध] विभग्न [निमग्न] बाहु खदिर शर्करा । इति वराहादिः ॥ ६७ ॥ (१७) कुमुद गोमय रथकार दशग्राम अश्वत्थ शाल्मलि [शिरीष] मुनिस्थल कुण्डल कूट मधुकर्ण घासकुन्द शुचिकर्ण । इति कुमुदादिः ॥ ६८ ॥

१३०१ वरणादिभ्यश्च । (४-२-८२) वरणा शृङ्गी शाल्मलि शुण्डि शयाण्डी पर्णी ताम्रपर्णी गोद आलिङ्ग्यायन जालपदी (जानपदी) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी ।

इति वरणादिः ॥९९॥

१३०५ मध्वादिभ्यश्च । (४-२-८६) मधु बिस स्थाणु वेणु कर्कन्धु शमी करीर हिम किशरा शर्याण मरुत् वार्दाली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुप्य तक्षशिला कड वट वेट ।

इति मध्वादिः ॥ १०० ॥

१३०६ उत्करादिभ्यश्छः । (४-२-९०) उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण स्वलाजिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद्र भस्त्रा शाल जन्या अजिर चर्मन् उत्क्रोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल संपर अर्क गर्त अग्नि वैराणक इडा अरण्य निशान्त पर्ण नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रणार्ह इन्द्रवृक्ष नितान्तवृक्ष (नितान्ताश्वृक्ष) आर्द्रवृक्ष । इत्युत्करादिः ॥ १०१ ॥

१३१० नडादीनां कुक्च । (४-२-९१) नड प्लक्ष बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण । क्रुञ्चा ह्रस्वत्वं च । तक्षन्नलोपश्च ।

इति नडादिः ॥ १०२ ॥

१३१५ कत्र्यादिभ्यो ढकञ् । (४-२-९५) कत्रि उम्भि पुष्कर

पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम । कुड्यायाः यलोपश्च । इति कड्यादिः ॥ १०३ ॥

१३१७ नद्यादिभ्यो ढक् । (४-२-९७) नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी (वनकोशाम्बी) काशपरी काशफारी (काशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वा दार्वा सेतकी । वडवाया वृषे ।

इति नद्यादिः ॥ १०४ ॥

१३३१ प्रस्थोत्तरपदपलद्यादिकोपधादण् । (४-२-११०) पलदी परिषद् रोमक वाह्लीक कलकीट बहुकीट जालकीट कमलकीट कमलकीकर कमलभिदा गोष्ठी नैकती परिखा शूरसेन गोमती पटच्चर उदपान यकृल्लोम ।

इति पलद्यादिः ॥ १०५ ॥

१३४० काश्यादिभ्यष्ठञ्ञिठौ । (४-२-११६) काशि चेदि (वेदि) सांयाति संवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुनामन हिरण्य करण गोवासन भारङ्गी अरिंदम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र साधमित्र । (सधमित्र) आपदादिपूर्वपदात्कालान्तात् । आपद् ऊर्ध्व तत् । इति काश्यादिः ॥१०६॥

१३५६ धूमादिभ्यश्च । (४-२-१२७) धूम षडण्ड शशादन अर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रुकस्थली समुद्रस्थली दाण्डायनस्थली राजस्थली विदेह राजगृह सात्रासाह शष्प मित्रवर्ध्र (मित्रवर्ध) भक्षाली मद्रकूल आजीकूल द्व्याहव (द्याहाव) त्र्यहव (त्र्याहव) संस्फाय बर्बर वर्ज्य गर्त आनर्त माठर पाथेय घोष पल्ली आराज्ञी धार्तराज्ञी आवय तीर्थ । कूलात्सौवीरेषु । समुद्रान्नावि मनुष्ये च । कुक्षि अन्तरीप द्वीप अरुण उज्जयनी पट्टार दक्षिणापथ साकेत । इति धूमादिः ॥ १०७ ॥

१३५७ कच्छादिभ्यश्च । (४-२-१३३) कच्छ सिन्धु वर्णु गन्धार मधुमत् कम्बोज कश्मीर साल्व कुरु अनुषण्ड द्वीप अनूप अजवाह विजापक कलूतर रङ्कु । इति कच्छादिः ॥ १०८ ॥

१३६२ गहादिभ्यश्च । (४-२-१३८) गह अन्तस्थ सम विषम मध्य । मध्यंदिन चरणे उत्तम अङ्ग वङ्ग मगध पूर्वपक्ष अपरपक्ष अधमशाख उत्तमशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अवस्यन्दन कामप्रस्थ शाडिकाडायनि (खाडायन) काठेरणि लावेरणि सौमित्रि शैशिरि आसुत दैवशर्मि श्रौति आर्हिंसि आमित्रि व्याडि वैजि आध्यश्वि आनृशसि (आनृशंसि) शौङ्गि

आग्निशर्मि भौजि वाराटकि वाल्मिकि (वाल्मीकि) क्षेमवृद्धि आश्वत्थि औद्‌गाहमानि ऐकबिन्दवि दन्ताग्र हंस तत्वग्र (तन्त्वग्र) उत्तर अन्तर (अनन्तर) मुखपार्श्वत-सोर्लोपः । जनपरयोः कुक्च देवस्य च । वेणुकादिभ्यश्छण् । **इति गहादिः । आकृतिगणः** ॥ १०६ ॥

१३८७ संधिवेलाद्यृतुनक्षत्रेभ्योऽण् । (४-३-१६) संधिवेला संध्या अमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत् । संवत्सरात्फल-पर्वणोः । **इति संधिवेलादिः** ॥ ११० ॥

१४२६ दिगादिभ्यो यत् । (४-३-५४) दिश वर्ग पूग गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ । उदकात्संज्ञायाम् । ज्ञाय (न्याय) वंश वेश काल आकाश ।

इति दिगादिः ॥ १११ ॥

❀ परिमुखादिभ्यश्च❀ (४-३-५६) परिमुख परिहनु पर्योष्ठ पर्युलूखल परिसीर उपसीर उपस्थूण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुसीत अधुसाय अनुसीर अनुमाष अनुयव अनुयूप अनुवंश प्रतिशाख ।

इति परिमुखादिः ॥ ११२ ॥

१४३७ * अध्यात्मादिभ्यश्च ❀ । (४-३-६०) अध्यात्म अधिदेव अधिभूत इहलोक परलोक । **इत्यध्यात्मादिः । आकृतिगणः** ॥ ११३ ॥

१४५२ ऋगयनादिभ्यः । (४-३-७३) ऋगयन पदव्याख्यान छन्दोमान छन्दोभाषा छन्दोविचिति न्याय पुनरुक्त निरुक्त व्याकरण निगम वास्तुविद्या क्षत्रविद्या अङ्गविद्या विद्या उत्पाद उत्पात उद्याव संवत्सर मुहूर्त उपनिषद् निमित्त शिक्षा भिक्षा । **इत्यृगयनादिः** ॥ ११४ ॥

१४५५ शुण्डिकादिभ्योऽण् । (४-३-७६) शुण्डिक कृकण कृपण स्थण्डिल उदपान उपल तीर्थ भूमि तृण पर्ण । **इति शुण्डिकादिः** ॥ ११५ ॥

१४७२ शण्डिकादिभ्यो ञ्यः । (४-३-९२) शण्डिक सर्वसेन सर्वकेश शक शट रक शङ्ख बोध । **इति शण्डिकादिः** ॥ ११६ ॥

१४७३ सिन्धुतक्षशिलादिभ्योऽणञौ । (४-३-९३) सिन्धु वर्णु मधुमत् कम्बोज साल्व कश्मीर गन्धार किष्किन्धा उरसा दरद (दरद्) गन्दिका **इति सिन्ध्वादिः** ॥ ११७ ॥ तक्षशिला वत्सोद्धरण कैर्मेदुर ग्रामणी छगल क्रोष्टुकर्ण सिंहकर्ण संकुचित किंनर काण्डधार पर्वत अवसान बर्बर कंस ।

इति तक्षशिलादिः ॥ ११८ ॥

१४८६ **शौनकादिभ्यश्छन्दसि ।** (४-३-१०६) शौनक वाजसनेय शार्ङ्गरव शापेय शाष्पेय खाडायन स्तम्भ स्कन्ध देवदर्शन रज्जुभार रज्जुकण्ठ कठशाठ कषाय तल दण्ड पुरुषासक अश्वपेज । **इति शौनकादिः ॥ ११९ ॥**

१४९८ **कुलालादिभ्यो वुञ् ।** (४-३-११८) कुलाल वरुड चाण्डाल निषाद कर्मार सेना सिरिन्ध्र (सिरिध्रि) सैरिन्ध्र देवराज पर्षत् (परिषत्) वधू मधु रुरु रुद्र अनडुह् ब्रह्मन् कुम्भकार श्वपाक । **इति कुलालादिः ॥ १२० ॥**

१५११ **रैवतिकादिभ्यश्छः ।** (४-३-१३१) रैवतिक स्वापिशि क्षैमवृद्धि गौरग्रीव (गौरग्रीवि) औदमेघि औदवापि बैजवापि । **इति रैवतिकादिः ॥ १२१ ॥**

१५१६ **बिल्वादिभ्योऽण् ।** (४-३-१३६) बिल्व व्रीहि काण्ड मुद्ग मसूर गोधूम इक्षु वेणु गवेधुका कार्पासी पाटली कर्कन्धू कुटीर । **इति बिल्वादिः ॥ १२२ ॥**

१५२१ **पलाशादिभ्यो वा ।** (४-३-१४१) पलाश खदिर शिंशपा स्पन्दन पूलाक करीर शिरीष यवास विकङ्कत । **इति पलाशादिः ॥ १२३ ॥**

१५२४ **नित्यं वृद्धशरादिभ्यः ।** (४-३-१४४) शर दर्भ मृद् (मृत्) कुटी तृण सोम बल्वज । **इति शरादिः ॥ १२४ ॥**

१५३० **तालादिभ्योऽण् ।** (४-३-१५२) तालाद्धनुषि । बार्हिण इन्द्रालिश इन्द्रादश इन्द्राशिष इन्द्रायुध चय श्यामाक पीयुक्षा । **इति तालादिः ॥ १२५ ॥**

१५३२ **प्राणिरजतादिभ्योऽञ् ।** (४-३-१५४) रजत सीस लोह उदुम्बर नीप दारु रोहितक बिभीतक पीतदारु तीव्रदारु त्रिकण्टक कण्टकार ।

इति रजतादिः ॥ १२६ ॥

१५४२ **प्लक्षादिभ्योऽण् ।** (४-३-१६४) प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु बृहती । **इति प्लक्षादिः ॥ १२७ ॥**

१५४६ **हरीतक्यादिभ्यश्च ।** (४-३-१६७) हरीतकी कोशातकी नखरजनी शष्कण्डी दाडी दोडी श्वेतपाकी अर्जुनपाकी द्राक्षा काला ध्वाङ्क्षा गर्गरीका कण्टकारिका पिप्पली चिम्पा (चिम्बा) शेफालिका । **इति हरीतक्यादिः १२८**

१५४८ *** माशब्दादिभ्य उपसंख्यानम् * ।** (४-४-१) माशब्दः नित्यशब्दः कार्यशब्दः । **इति माशब्दादिः ॥ १२९ ॥**

१५४९ *** आहौ प्रभूतादिभ्यः *** (४-४-१) प्रभूत पर्याप्त ।

इति प्रभूतादिः ॥ १३० ॥

१५४९ *** पृच्छतौ सुस्नातादिभ्यः *** (४-४-१) सुस्नात सुखरात्रि सुखशयन । **इति सुस्नातादिः ॥ १३१ ॥**

१५४६ * गच्छतौ परदारादिभ्यः * (४-४-१) परदार गुरुतल्प।
इति परदारादिः ॥ १३२ ॥

१५५८ पर्पादिभ्यः ष्ठन् । (४-४-१०) पर्प अश्व अश्वत्थ रथ जाल न्यास व्याल । पादः पञ्च । इति पर्पादिः ॥ १३३ ॥

१५६२ वेतनादिभ्यो जीवति । (४-४-१२) वेतन वाहन अर्धवाहन धनुर्दण्ड जाल वेश उपवेश प्रेषण उपवस्ति सुख शय्या शक्ति उपनिषद् उपदेश स्फिज् (स्फिज) पाद उपस्थ उपस्थान उपहस्त । इति वेतनादिभ्यः ॥ १३४ ॥

१५६५ हरत्युत्सङ्गादिभ्यः । (४-४-१५) उत्सङ्ग उडुप उत्पुत उत्पन्न उत्पुट पिटक पिटाक । इत्युत्सङ्गादिः ॥ १३५ ॥

१५६६ भस्त्रादिभ्यः ष्ठन् । (४-४-१६) भस्त्रा भरट भरण शीर्षभ. शीर्षभार अंसभार अंसेभार । इति भस्त्रादिः ॥ १३६ ॥

१५६९ निर्वृत्तेऽक्षद्यूतादिभ्यः । (४-४-१९) अक्षद्यूत [जानुप्रहृत] जङ्घाप्रहृत जङ्घाप्रहृत पादस्वेदन कण्टकमर्दन गतानुगत गतागत यातोपयात अनुगत ।
इत्यक्षद्यूतादिः ॥ १३७ ॥

१५९८ अण्महिष्यादिभ्यः । (४-४-४८) महिषी प्रजापति प्रजावती प्रलेपिका विलेपिका अनुलेपिका पुरोहिता मणिपाली अनुवारक [अनुचारक] होतृ यजमान । इति महिष्यादिः ॥ १३८ ॥

१६०३ किसरादिभ्यः ष्ठन् । (४-४-५३) किसर नरद नलद स्थागल तगर गुग्गुलु उशीर हरिद्रा हरिद्रु पर्णी (पर्णी) । इति किसरादिः ॥ १३९ ॥

१६१२ छत्रादिभ्यो णः । (४-४-६२) छत्र शिक्षा प्ररोहस्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा विशिका भक्षा उदस्थान पुरोडा विक्षा चुक्षा मन्द्र । इति छत्रादिः ॥१४०॥

१६५१ प्रतिजनादिभ्यः खञ् । (४-४-९९) प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन । इति प्रतिजनादिः ॥ १४१ ॥

१६५४ कथादिभ्यष्ठक् । (४-४-१०२) कथा विकथा विश्वकथा संकथा वितण्डा कुष्ठविद् (कुष्ठविद्) जनवाद जनेवाद जनोवाद वृत्ति संग्रह गुण-गण आयुर्वेद । इति कथादिः ॥ १४२ ॥

१६५५ गुडादिभ्यष्ठञ् । (४-४-१०३) गुड कुल्माष सक्तु अपूप

माषौदन इक्षु वेणु सङ्ग्राम संघात संक्राम संवाह प्रवास निवास उपवास।
इति गुणादिः ॥ १४३ ॥ इति चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

१६५२ उगवादिभ्यो यत्। (५-१-२) गो हविस् अक्षर विष बर्हिस् अष्टका स्वदा युग मेधा स्रुच्। नाभि नभं च। शुनः संप्रसारणं वा च दीर्घत्वं, तत्संनियोगेन चान्तोदात्तत्वम्। ऊधसोऽनङ् च। कूप खद दर खर असुर अध्वन् (अध्वन) क्षर वेद बीज दीस (दीप्त)। इति गवादिः ॥ १४४ ॥

१६६४ विभाषा हविरपूपादिभ्यः। (५-१-४) अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक इर्गल अर्गल। अन्नविकारेभ्यश्च। यूप स्थूणा दीप अश्व पत्र।

इत्यपूपादिः ॥ १४५ ॥

१६८२ असमासे निष्कादिभ्यः। (५-१-२०) निष्क पण पाद माष वाह द्रोण षष्टि। इति निष्कादिः ॥ १४६ ॥

१७०५ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्। (५-१-३९) अश्व अश्मन् गण ऊर्णा (उर्म) उमा भङ्गा (गङ्गा) वर्षा वसु। इत्यश्वादिः ॥१४७॥

१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः (५-१-५०) वंश कुटज बल्वज मूल स्थूणा (स्थूण) अक्ष अश्मन् अश्व श्लक्ष्ण इक्षु खट्वा।

इति वंशादिः ॥ १४८ ॥

१७२६ छेदादिभ्यो नित्यम्। (५-१-६४) छेद भेद द्रोह दोह नर्ति (नर्त) कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष। विराग विरङ्गं च। इति छेदादिः ॥ १४९ ॥

१७३१ दण्डादिभ्यो यत्। (५-१-६६) दण्ड मुसल मधुपर्क कशा अर्घ मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग। इति दण्डादिः॥१५०॥

१७५८ * महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् *
(५-१-९४) महानाम्नी आदित्यव्रत गोदान। इति महानाम्न्यादिः ॥ १५१ ॥

१७६१ * अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः *। (५-१-९४)
अवान्तरदीक्षा तिलव्रत देवव्रत। इत्यवान्तरदीक्षादिः ॥ १५२ ॥

१७६१ व्युष्टादिभ्योऽण्। (५-१-९७) व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम संघात। इति व्युष्टादिः ॥ १५३ ॥

अग्निपदादिभ्य उपसंख्यानम् अग्निपद पीलुपद (पीलुमूल) प्रवास उपवास।

इत्यग्निपदादिराकृतिगणः ॥ १५४ ॥

१७६५ तस्मै प्रभवति संतापादिभ्यः। (५-१-१०१) संताप संनाह संग्राम संयोग संपराय संवेशन संपेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघात संवेष संवास समोदन सक्तु। मांसौदनाद्विगृहीतादपि।

इति संतापादिः ॥ १५५ ॥

१७६६ * अतोरण् प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् *। (५-१-१०५) उपवस्तृ प्राशितृ चूडा श्रद्धा। इत्युपवस्त्रादिः ॥१५६॥

१७७४ अनुप्रवचनादिभ्यश्छः। (५-१-१११) अनुप्रवचन उत्थापन उपस्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण। इत्यनुप्रवचनादिः ॥१५७॥

१७७४ * स्वर्गादिभ्यो यद्वक्तव्यः *। (५-१-१११) स्वर्ग यशस् आयुस् काम धन। इति स्वर्गादिः ॥ १५८ ॥

२७६ * पुण्याहवाचनादिभ्यो लुग्वक्तव्यः * (५-१-१११) पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन। इति पुण्याहवाचनादिः ॥ १५९ ॥

१७८४ पृथ्वादिभ्य इमनिज्वा। (५-१-१२२) पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु।

इति पृथ्वादिः ॥ १६० ॥

१७८७ वर्णदृढादिभ्यः ष्यञ्च। (५-१-१२३) दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ट लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर। वेर्यातलातमतिमनःशारदानाम् समो मतिमनसोः। जवन।

इति दृढादिः ॥१६१॥

१७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च। (५-१-१२४) ब्राह्मण वाडव माणव। अर्हतो नुम्च। चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निश्न बालिश अलस दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात। सर्ववेदादिभ्यः स्वार्थे। चतुर्वेदस्योभयपदवृद्धिश्च। शौटीर। आकृतिगणोऽयम्।

इति ब्राह्मणादिः ॥ १६२ ॥

१६६३ * चतुर्वेदादिभ्य उभयपदवृद्धिश्च * (५-१-१२४)
चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर संनिधि समीप उपमा सुख तदर्थ इतिह मणिक । इति चतुर्वेदादिः ॥१६३॥

१७६३ पत्यन्तपुरोहितादिभ्यो यक् । (५-१-१२८) पुरोहित । राजासे । ग्रामिक पिण्डिक सुहित बालमन्द (बालमन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शिलिक सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुत्रिक अविक छत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्तिक सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाकर नागर चूडिक ।

इति पुरोहितादिः ॥ १६४ ॥

१७६४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । (५-१-१२६)
उद्गातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू सुभग मन्त्रे । इत्युद्गात्रादिः ॥ १६५ ॥

१७६५ हायनान्तयुवादिभ्योऽण् । (५-१-१३०) युवन् स्थविर होतृ यजमान । पुरुषासे । भ्रातृ कुतुक श्रमण (श्रवण) कटुक कमण्डलु कुस्त्री सुस्त्री दुःस्त्री सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सब्रह्म-चारिन् अनृशंस । हृदयासे । कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ । श्रोत्रियस्य यलोपश्च । इति युवादिः ॥ १६६ ॥

१७६८ द्वन्द्वमनोज्ञादिभ्यश्च । (५-१-१३३) मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्व-देव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल ग्रामण्ड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल अवश्यपुत्र अमुष्यपुत्र अमुष्यकुल सारपुत्र शतपुत्र ।

इति मनोज्ञादिः ॥ १६७ ॥

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । (५-२-२४)
पीलु कर्कन्धू (कर्कन्धु) शमी करीर बल (कुवल) बदर अश्वत्थ खदिर । इति पील्वादिः ॥१६८॥ कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ । इति कर्णादिः ॥ १६९ ॥

१८३७ तदस्य संजातं तारकादिभ्य इतच् । (५-२-३६)
तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक (स्तवक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक

वर्णक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध् सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल बकुल श्वभ्र आराल कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज । गर्भादप्राणिनि ।

इति तारकादिराकृतिगणः ॥ १७० ॥

१८६१ विमुक्तादिभ्योऽण् । (५-२-६१) विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पत्नीवत् वसुमत् महीयस् सत्वत् बर्हवत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् । **इति विमुक्तादिः ॥१७१॥**

१८६२ गोषदादिभ्यो वुन् (५-२-६२) गोषद (गोषद्) इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः । कृष्णोऽस्याखरेष्ठः देवींधिया (देवींधिय) रक्षोहण युञ्जान अञ्जन प्रसूत प्रभूत प्रतूर्त कृशानु (कृशाकु) । **इति गोषदादिः ॥१७२॥**

१८६४ आकर्षादिभ्यः कन् । (५-२-६४) आकर्ष (आकष) *त्सरु पिशाच पिचण्ड अशनि अश्मन निचय चय विजय जय आचय नय पाद दीप*-ह्रद ह्राद ह्लाद गद्गद शकुनि । **इत्याकर्षादिः ॥१७३॥**

१८८८ इष्टादिभ्यश्च । (५-२-८८) इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित सङ्कलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित । **इतीष्टादिः ॥ १७४ ॥**

१८९५ रसादिभ्यश्च । (५-२-९५) रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव । गुणात् एकाचः । **इति रसादिः ॥ १७५ ॥**

१९०४ सिध्मादिभ्यश्च । (५-२-९७) सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव पांसु पार्श्व पर्शु हनु सक्तु मास (मांस) पार्ष्णिधमन्योर्दीर्घश्च । वातदन्तबलललाटानामूङ् च । जटाघटाकटाकालाः क्षेपे । पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीत श्याम पिङ्ग पित्त पुष्क पृथु मृदु मञ्जु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धारा वर्ष्मन् पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड । क्षुद्रजन्तूपतापयोश्च । **इति सिध्मादिः ॥ १७६ ॥**

१९०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः । (५-२-१००) लोमन् रोमन् बभ्रु हरि गिरि कर्क कपि मुनि तरु । **इति लोमादिः ॥ १७७ ॥**

पामन् वामन् वेमन् हेमन् श्लेष्मन् कद्रु (कद्रू) बलि सामन् ऊष्मन् कृमि । अङ्गात्कल्याणे । शाकीपलालीदद्रूणां ह्रस्वत्वं च । विष्वगित्युत्तरपदलोपश्चाकृतसंधेः । लक्ष्म्या अच्च । **इति पामादिः ॥ १७८ ॥** पिच्छा उरस् ध्रुवक ध्रुवक । जटाघटाकालाः क्षेपे । वर्ण उदक पङ्क प्रज्ञा । **इति पिच्छादिः ॥ १७९ ॥**

१९१० * ज्योत्स्नादिभ्य उपसंख्यानम् * (५-२-१०३) ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका । **इति ज्योत्स्नादिः ॥ १८० ॥**

१९२३ व्रीह्यादिभ्यश्च । (५-२-११६) व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी । शीर्षान्नञः । **इति व्रीह्यादिः ॥ १८१ ॥**

१९२४ तुन्दादिभ्य इलच्च । (५-२-११७) तुन्द उदर पिचण्ड यव व्रीहि । स्वाङ्गाद्विवृद्धौ । **इति तुन्दादिः ॥ १८२ ॥**

१९३३ अर्शआदिभ्योऽच् (५-२-१२७) अर्शस उरस् तुन्द चतुर कलित जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण । स्वाङ्गाद्धीनात् । वर्णात् ।

इत्यर्शआदिराकृतिगणः ॥ १८३ ॥

१९३७ सुखादिभ्यश्च । (५-२-१३१) सुख दुःख तृप्र (तृप्र) कृच्छ्र अस्र (आस्र) आस्र अलीक कठिण सोढ प्रतीप शील हल । माला क्षेपे । कृपण प्रणाय (प्रणय) दल कक्ष । **इति सुखादिः ॥ १८४ ॥**

१९४१ पुष्करादिभ्यो देशे । (५-२-१३५) पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास (प्रवास) हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल कल्लोल पयस् । **इति पुष्करादिः ॥ १८५ ॥**

१९४२ बलादिभ्यो मतुबन्यतरस्याम् । (५-२-१३६) बल उत्साह उद्भास उद्वास उद्दास शिखा कुल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध । **इति बलादिः ॥ १८६ ॥**

१९६३ * इशिग्रहणाद्भवदादियोग एव * । (५-३-१४) भवान् दीर्घायुः देवानांप्रियः आयुष्मान् । **इति भवदादिः ॥ १८७ ॥**

२०५५ देवपथादिभ्यश्च । (५-३-१००) देवपथ (हंसपथ वारिपथ रथपथ) स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वामरज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य । **इति देवपथादिराकृतिगणः १८८**

२०२८ शाखादिभ्यो यः । (५-३-१०३) शाखा मुख जघन शृङ्ग

मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र (शाण) शरण।
इति शाखादिः॥ १८६॥

२०६२ शर्करादिभ्योऽण्। (५-३-१०७) शर्करा कपालिका कपाटिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन् गोपुच्छ नराची नकुल सिकता। इति शर्करादिः॥ १९०॥

२०६६ अङ्गुल्यादिभ्यष्ठक्। (५-३-१०८) अङ्गुली भरुज बभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश।
इत्यङ्गुल्यादिः॥ १९१॥

२०६९ दामन्यादित्रिगर्तषष्ठाच्छः। (५-३-११६) दामनी औलपि बैजवापि औदकि औदङ्कि अच्युतन्ति (आच्युतन्ति) अच्युतदन्ति (आच्युतदन्ति) शाकुन्तकि आकिदन्ति (आक्रिदन्ति) औडवि काकदन्तकि शात्रुंतपि सार्वसेनि बिन्दु बैन्दवि तुलभ मौञ्जायन काकन्दि सावित्रीपुत्र। इति दामन्यादिः॥ १९२॥

२०७० पर्श्वादियौधेयादिभ्योऽणञौ। (५-३-११७) पर्शु असुर रक्षस् वाह्लीक वयस् वसु मरुत् सत्वत् दशार्ह पिशाच अशनि कार्षापण। इति पर्श्वादिः॥ १९३॥ यौधेय कौशेय शौक्रेय शौभ्रेय धार्तेय घार्तेय ज्याबाणेय त्रिगर्त भरत उशीनर। इति यौधेयादिः॥ १९४॥

२०७५ स्थूलादिभ्यः प्रकारवचने कन्। (५-४-३) स्थूल अणु माषेषु (माष इषु) कृष्ण तिलेषु। यव व्रीहिषु। इक्षु तिल। पाद्यकालावदातसुरायाम्। गोमूत्र आच्छादने। सुराया अहौ। जीर्णशालिषु। पत्रमूल समस्तो व्यस्तश्च। कुमारीपुत्र कुमारीश्वशुर मणि। इति स्थूलादिः॥ १९५॥

२०९७ यावादिभ्यः कन्। (५-४-२९) याव मणि अस्थि तालु जानु सान्द्र पीत स्तम्ब। ऋतौ उष्णशीते। पशौ लूनविपाते। अणु निपुणे। पुत्र कृत्रिमे। स्नात वेदसमाप्तौ। शून्य रिक्ते। दान कुत्सिते। तनु सूत्रे। ईयसश्च। ज्ञात अज्ञात। कुमारीक्रीडनकानि च (कुमारक्रीडनकानि च)। इति यावादिः॥ १९६॥

२१०२ विनयादिभ्यष्ठक्। (५-४-३४) विनय समय। उपायो ह्रस्वत्वं च। संप्रति संगति कथंचित् अकस्मात् समाचार उपचार समाय (समयाचार) व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय। इति विनयादिः॥ १९७॥

२१०६ प्रज्ञादिभ्यश्च। (५-४-३८) प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन षोडन् विद्या मनस्। श्रोत्र शरीरे। जुह्वत्। कृष्ण मृगे। चिकीर्षत्। चोर शत्रु योध चक्षुस् वसु [एनस्] मरुत् क्रुञ्च सत्वत् दशार्ह वयस्

[व्याकृत] असुर रक्षस् पिशाच अशनि कार्षापण देवता बन्धु।

इति प्रज्ञादिः ॥ १६८ ॥

२१११ * आद्यादिभ्य उपसंख्यानम् * (५-४-४४) आदि मध्य अन्त पृष्ठ पार्श्व। इत्याद्यादिराकृतिगणः ॥ १६६ ॥

८७७ अव्ययीभावे शरत्प्रभृतिभ्यः। (५-४-१०७) शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विद् सद् दिश् दृश् विश् चतुर् त्यद् तद् यद् एतद् कियत्। जराया जरस् च। प्रतिपरसमनुभ्योऽक्ष्णः। पथिन्। इति शरदादिः ॥ २०० ॥

८६७ द्विदण्डयादिभ्यश्च। (५-४-१२८) द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदी प्रोष्ठपदी आच्यपदी (आढ्यपदी) सपदि निकुच्यकर्णि संहतपुच्छि अन्तेवासी। इति द्विदण्ड्यादिः २०१

८७७ पादस्य लोपोऽहस्त्यादिभ्यः। (५-४-१०७) हस्तिन् कुद्दाल [अश्व कशिक कुरुत कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महिला दासी गणिका कुसूल। इति हस्त्यादिः ॥ २०२ ॥

८७८ कुम्भपदीषु च। (५-४-१३६) कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोणपदी) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी। इति कुम्भपद्यादिः ॥ २०३ ॥

८७६ उरःप्रभृतिभ्यः कप्। (५-४-१५१) उरस् सर्पिस् उपानह पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः अर्थान्नञः।

इत्युरःप्रभृतयः ॥ २०४ ॥

षष्ठोऽध्यायः

७६ * शकन्ध्वादिषु पररूपं वाच्यम् * (६-१-६४) शकन्धुः कर्कन्धुः कुलटा। सीमन्तः केशवेशे। हलीषा मनीषा लाङ्गलीषा पतञ्जलिः। सारङ्गः पशुपक्षिणोः। इति शकन्ध्वादिः ॥ २०५ ॥

१०७१ पारस्करप्रभृतीनि च संज्ञायाम्। (६-१-१५७) पारस्करो देशः। कारस्करो वृक्षः। रथस्या (रथस्या) नदी। किष्कुः प्रमाणम्। किष्किन्धा गुहा। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। प्रात्सुम्पती गवि कर्तरि।

इति पारस्करादिः ॥ २०६ ॥

३६८१ उञ्छादीनां च । (६-१-१६०) उञ्छ म्लेच्छ जञ्ज तल्प (जल्प) जप वध । युग कालविशेषे रथाद्युपकरणे च । गरो दूष्ये (गरो दूष्ये) अवन्तः वेदवेगवेष्टबन्धाः करणे । स्तुयुद्रुवश्छन्दसि । वर्तनि स्तोत्रे । श्वभ्रे दरः । साम्बतापौ भाावगर्हायाम् । उत्तमशश्वत्तमौ सर्वत्र । भक्षमन्थभोगमन्थाः देहाः ।

इत्युञ्छादिः ॥ २०७॥

३६९१ वृषादीनां च । (६-१-२०३) वृषः जनः ज्वरः ग्रहः हयः मयः गयः तायः तयः चयः अमः वेदः सूदः अंशः गुहा । शमरणौ संज्ञायां संमतौ भावकर्मणोः । मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः । इति वृषादिराकृतिगणः । अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥ २०८ ॥

३७५८ विस्पष्टादीनि गुणवचनेषु । (६-२-२४) विस्पष्ट विचित्र विचित्त व्यक्त संपन्न पटु पण्डित कुशल चपल निपुण । इति विस्पष्टादिः ॥२०९॥

३७७१ कार्तकौजपादयश्च । (६-२-३७) कार्तकौजपौ सावर्णिमाण्डूकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये ।

इति कार्तकौजपादिः ॥ २१० ॥

३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलोदासीभाराणां च । (६-२-४२) दासीभारः देवहूतिः देवभीतिः देवलातिः वसुनीतिः (वसूनितिः) ओषधिः चन्द्रमाः ।

इति दासीभारादिराकृतिगणः ॥ २११ ॥

३८१५ युक्तारोह्यादयश्च । (६-२-८१) युक्तारोही आनतरोही आगतयोधी आगतवञ्ची आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनीभर्ता ग्रामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकशितिपाद् । पात्रेसमितादयश्च । इति युक्तारोह्यादिराकृतिगणः ॥ २१२ ॥

३८१९ घोषादिषु च । (६-२-८५) घोष घट (कट) वल्लभ ह्रद बदरी पिङ्गल (पिङ्गली) पिशङ्ग माला रक्षा शाला (कूट्) कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि प्रेक्षाक (प्रेक्षा) । इति घोषादिः ॥ २१३ ॥

३८२० छात्र्यादयः शालायाम् । (६-२-८६) छात्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमी । इति छात्र्यादिः ॥ २१४ ॥

३८२१ प्रस्थेऽवृद्धमकर्क्यादीनाम् । (६-२-८७) कर्कि (कर्की) मघ्री मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुवल (कवल) बदरी । इति कर्क्यादिः ॥ २१५ ॥

३८२२ मालादीनां च (६-२-८८) । माला शाला शोणा (शोण) द्राक्षा क्षौमा क्षामा काञ्ची एक काम । इति मालादिः ॥ २१६ ॥

३८५२ क्रत्वादयश्च (६-२-११८) । क्रतु दृशीक प्रतीक प्रतूर्ति हव्य भव्य भग । इति क्रत्वादिः ॥ २१७ ॥

३८५६ आदिश्चिहणादीनाम् । (६-२-१२५) । चिहण मदुर मद्गुर बैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण । इति चिहणादिः ॥ २१८ ॥

३८६५ वर्ग्यादयश्च । (६-२-१३१) । दिगादिषु वर्ग्यादयस्त एव कृतयदन्ताः । इति वर्ग्यादयः ॥ २१९ ॥

३८६८ चूर्णादीन्यप्राणिषष्ठ्याः । (६-२-१३४) चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल । इति चूर्णादिः ॥२२०॥

३८६९ षट् च काण्डादीनि । (६-२-१३५) । काण्ड चीर पलल सूप शाक कूल । इति काण्डादिः ॥ २२१ ॥

३८७४ उभे वनस्पत्यादिषु युगपत् । (६-२-१४०) । वनस्पतिः बृहस्पतिः शचीपतिः तनूनपात् नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्युः ॥ इति वनस्पत्यादिः ॥ २२२ ॥

३८८० संज्ञायामनाचितादीनाम् । (६-२-१४६) । आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्रश्लिष्ट उपहित उपस्थित संहितागवि । इत्याचितादिः ॥ २२३ ॥

३८८१ प्रवृद्धादीनां च । (६-२-१४७) प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुता सूष्णवः । आकर्षे अवहितः अवहितो भोगेषु । खट्वारूढः । कविशस्तः । इति प्रवृद्धादिः ॥२२४॥ आकृतिगणोऽयम् । तेन । प्रवृद्धं यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादि ।

३८९४ कृत्योकेष्णुच्चार्वादयश्च । (६-२-१६०) चारु साधु यौधिक (यौधकि) अनङ्गमेजय वदान्य अकस्मात् वर्तमानवर्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायाम् । विकारसदृशे । व्यस्तसमस्ते । गृहपति गृहपतिक । राजाह्नोश्छन्दसि । इति चार्वादिः ॥ २२५ ॥

३९१० न गुणादयोऽवयवाः । (६-२-१७६) गुण अक्षर अध्याय सूक्त छन्दोमान । इति गुणादिराकृतिगणः ॥ २२६ ॥

३६१८ निरुदकादीनि च । (६-२-१८४) निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः । **इति निरुदकादिराकृतिगणः२२७**

३६२७ प्रतेरंश्वादयस्तत्पुरुषे । (६-२-१९३) अंशु जन [राजन्] उष्ट्र खेटक अजिर आर्द्रा श्रवण कृत्तिका अर्धपुर । **इत्यंश्वादिः ॥ २२८ ॥**

३६२८ उपाद्द्व्यजजिनमगौरादयः । (६-२-१९४) गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद । **इति गौरादिः ॥ २२९ ॥**

६२९ * त्रिचक्रादीनां छन्दस्युपसंख्यानम् * । (६-२-१२९) त्रिचक्र त्रिवृत् त्रिवङ्कर । **इति त्रिचक्रादिराकृतिगणः ॥ २३० ॥**

८३१ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । (६-३-३४) प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा (स्वा) कान्ता [क्षान्ता] समा चपला दुहिता वामा अबला तनया।

इति प्रियादिः ॥ २३१ ॥

८३६ तसिलादिष्वाकृत्वसुचः (६-३-३५) तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दार्हिल् तिल् थ्यन्।

इति तसिलादयः ॥ २३२ ॥

९३६ * कुक्कुट्यादीनामण्डादिषु * । (६-३-४२) कुक्कुटी मृगी काकी । अण्ड पद शाव भ्रकुंस भृकुटी । **इति कुक्कुट्यादिरण्डादिश्च। ॥ २३३ ॥ २३४ ॥**

१०३४ पृषोदरादीनि यथोपदिष्टम् । (६-३-१०९) पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर ।

इति पृषोदरादिराकृतिगणः ॥ २३५ ॥

१०३८ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् (६-३-११७) कोटर मिश्रक सिध्रक पुरग सारिक (शारिक) **इति कोटरादिः ॥ २३६ ॥** किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट । **इति किंशुलुकादिः॥२३७॥**

१०४१ मतौ बह्वचोऽनजिरादीनाम् । (६-३-११९) अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक । **इत्यजिरादिः ॥ २३८ ॥**

१०४२ शरादीनां च । (६-३-१२०) शर वंश धूम अहि कपि मणि मुनि शुचि हनु । **इति शरादिः ॥ २३९ ॥**

१०४२ * अपील्वादीनामिति वक्तव्यम् * (६-३-१२१) पीलु दारु रुचि चारु गम् कम् । **इति पील्वादिः ॥ २४० ॥**

१३११ बिल्वकादिभ्यश्छस्य लुक्। (६-४-१५३) बिल्वक वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत क्रुञ्चा तक्षन्। **नडाद्यन्तर्गणो बिल्वादिः।** छविधानार्थं ये नडादयस्ते यदा छसंनियोगे कृतकुगागमास्ते **बिल्वकादयः ॥२४१॥**

इति षष्ठोऽध्यायः।

सप्तमोऽध्यायः।

स्नात्व्यादयश्च। (७-१-४९) स्नात्वी पीत्वी। **इति स्नात्व्यादिराकृतिगणः ॥ २४२ ॥**

१३८६ द्वारादीनां च। (७-३-४) द्वार स्वर स्वग्राम स्वाध्याय व्यल्कश स्वस्ति स्वर् स्फयकृत् स्वादु मृदु श्वस् श्वन् स्व। **इति द्वारादिः ॥२४३॥**

१५४६ स्वागतादीनां च। (७-३-७) स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड व्यवहार स्वपति स्वपिति। **इति स्वागतादिः ॥ २४४ ॥**

१४३८ अनुशतिकादीनां च। (७-३-२०) अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य [अस्यहत्य] अस्यहेति वध्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री। राजपुरुषात्ष्यञि। सूत्रनड। **इत्यनुशतिकादिराकृतिगणोऽयम् ॥ २२५ ॥** तेन। अभिगम अधिभूत अधिदेव चतुर्विद्या इत्यादयोऽप्यन्ये विज्ञेयाः।

४६४ * क्षिपकादीनां चोपसंख्यानम् * (७-३-४५) क्षिपका ध्रुवका चरका सेवका करका चटका अवका लहका अलका कन्यका ध्रुवका एडका।

इति क्षिपकादिराकृतिगणः ॥१४६॥

१८६४ न्यङ्क्वादीनां च। (७-३-५३) न्यङ्कु मद्गु भृगु दूरेपाक वलेपाक चणेपाक दूरेपाका फलेपाका दूरेपाकु फलपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक। संज्ञायां मेघनिदाघावदाघार्घाः। न्यग्रोध वीरुत्।

इति न्यङ्क्वादिः ॥ १४७ ॥

१५७१, १५८२ * काणादीनां चेति वक्तव्यम् *। (७-४-३) कण रण भण श्रण लुप हेठ ह्वायि वाणि (चाणि) लोटि (लोठि) लोपि।

इति कणादिः ॥ १४८ ॥ इति सप्तमोऽध्यायः।

अष्टमोऽध्यायः ।

३६३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । (८-१-२७) गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्ययन प्रपञ्च प्राय न्याय प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ (भूयिष्ट) वानाम ॥ **इति गोत्रादिः ॥ २४९ ॥**

३६७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः । (८-१-६७) काष्ठ दारुण अमातापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति । **इति काष्ठादिः ॥ २५० ॥**

१८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः । (८-२-९) यव दल्मि ऊर्मि (उर्मि) भूमि कृमि कुञ्चा वशा द्राक्षा ध्राक्षा ध्रजि ध्रजि ध्वजि निजि सिजि सञ्जि हरित् ककुद् मरुत् गरुत् इक्षु द्रु मधु । **इति यवादिराकृतिगणः ॥२५१॥**

२३५० * कपिलकादीनां संज्ञाच्छन्दसोर्वेति वाच्यम् * (८-२-१८) कपिलक निर्विलीक लोमानि पांसुल कल्प शुक्ल कपिलिका तर्पिलिका तर्पिलि । **आकृतिगणोऽयम् । इति कपिलकादिः ॥ २५२ ॥**

१७१ * अहरादीनां पत्यादिषु वा रेफः * (८-२-७०) अहर् गीर् धुर् । **इत्यहरादिः ॥२५३॥** पति गण पुत्र । **इति पत्यादिः ॥२५४॥**

१४४ कस्कादिषु च । (८-३-४८) कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः साद्यस्कः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् बर्हिष्पलम् (बर्हिष्पलम्) यजुष्पात्रम् अयस्कान्तः तमस्काण्डः अयस्काण्डः मेदस्पिण्डः भास्करः अहस्करः । **इति कस्कादिराकृतिगणः ॥ २५५ ॥**

१०२२ सुषामादिषु च । (८-३-९८) सुषामा निःषामा दुःषामा । सुषेधः निषेधः (निःषेधः) दुःषेध सुषंधिः निःषंधिः दुःषंधिः सुष्ठु दुष्ठु । गौरिषक्थः संज्ञायाम् । प्रतिष्णिका जलाषाहम् (जलाषाडम्) नौषेचनम् दुन्दुभिषेवणम् (दुन्दुभिषेचनम्) । एति संज्ञायामगात् । नक्षत्राद्वा । हरिषेणः । रोहिणीषेणः ।

इति सुषामादिराकृतिगणः ॥ २५६ ॥

२१६८ न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् । (८-३-११०) सवने सवने । सूते सूते । सोमे सोमे । सवनमुखे सवनमुखे । किंसम् किंसम् । (किंसः किंसः) अनुसवनमनुसवनम् । गोसनिं गोसनिम् । अश्वसनिमश्वसनिम् । **पाठान्तरम्** । सवने सवने । सवनमुखे सवनमुखे । अनुसवनमनुसवनम् । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे सोमे । सुते सुते । संवत्सरे संवत्सरे । बिसम् बिसम् । किसम् किसम् । मुसलम् मुसलम् । गोसनिम् अश्वसनिम् । **इति सवनादिः ॥२५७॥**

१०५१ * इरिकादिभ्यः प्रतिषेधो वक्तव्यः* (८-४-६) इरिका मिरिका तिमिरा । इतीरिकादिराकृतिगणः ॥२५८॥

१०५६ * वाप्रकरणे गिरिनद्यादीनां वोपसंख्यानम्*(८-४-१०) गिरिनदी गिरिनख गिरिनद्ध गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्यमान माषोन आर्गयन । इति गिरिनद्यादिराकृतिगणः ॥ २५९ ॥

१०५५ *युवादेर्न* । युवन् पक्व अहन् । इति युवादिः । आर्ययूना क्षत्रिययूना प्रपक्वानि परिपक्वानि दीर्घाह्नी । आकृतिगणोऽयम् । २६० ॥

७११ क्षुभ्नादिषु च । (८-४-३९) । क्षुभ्ना नृनमन नन्दिन् नन्दन नगर । एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति । हरिनन्दी हरिनन्दनः गिरिनगरम् । नृतिर्यङि प्रयोजयन्ति । नरीनृत्यते । नर्तन गहन नन्दन निवेश निवास अग्नि अनूप । एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्तनम् परिगहनम् परिनन्दनम् शरनिवेशः शरनिवासः शराग्निः दर्भानूपः । 'आचार्यादणत्वं च'। आचार्यभोगीनः । आकृतिगणोऽयम् । पाठान्तरम् । क्षुभ्ना तृप्नु नृनमन नरनगर नन्दन । यङ्नृती । गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । 'इरिकादीनि वनोत्तरपदानि संज्ञायाम्' । इरिका तिमिर समीर कुबेर हरि कर्मार । इति क्षुभ्नादिः । २६१ ॥

इत्यष्टमोऽध्यायः ।

इति श्रीपाणिनिमुनिप्रणीतो गणपाठः समाप्तः ।

अकाराद्यनुक्रमेण

कृदन्तप्रभृति समाप्तिपर्यन्तायाः कौमुद्याः सूत्रसूचिका

पृष्ठम् सूत्रम्

अ

३११ अकर्तरि च ३ । ३ । १९
५७२ अकर्मधारये ६ । २ । १३०
५५६ अके जीविकार्थे ६ । २ । ७३
३२७ अक्षेषु ग्लहः ३ । ३ । ७०
३२९ अगारैकदेशे ३ । ३ । ७९
४४१ अग्नीत्प्रेषणे ८ । २ । ९२
८१ अग्नौ चेः ३ । २ । ९१
२८ अग्नौ परिचा ३ । १ । १३१
४०२ अग्राद्यत् ४ । ४ । ११६
४२३ अङ्कितश्च ६ । ४ । १०३
४१६ अङ्ग इत्यादौ ६ । १ । ११९
४४२ अङ्गयुक्तं तिङा ८ । २ । ९६
५५५ अङ्गानि मैरेये ६ । २ । ७०
६०३ अङ्गाप्रातिलोम्ये ८ । १ । ३३
१०६ अच उपसर्गात् ७ । ४ । ४७
४८२ अचः कर्तृय ६ । १ । १९५
८ अचो यत् ३ । १ । ९७
५८६ अच्कावशक्तौ ६ । २ । १५७
१४ अजर्यं संगतं ३ । १ । १०५
२३ अजिव्रज्योश्च ७ । ३ । ६०
९३ अञ्चेः पूजायाम् ७ । २ । ५३
५१२ अञ्चेश्छन्द ६ । १ । १७०
८७ अञ्चोऽनपादा ८ । २ । ४८

पृष्ठम् सूत्रम्

५५७ अणि नियुक्ते ६ । २ । ७५
३११ अण्कर्मणि च ३ । ३ । १२
३२२ अणिनुणः ५ । ४ । १५
५६५ अतेरकृत्पदे ६ । २ । १९१
१०८ अदो जग्धिर्ल्यं २ । ४ । ३६
६८ अदोऽनन्ने ३ । २ । ६८
४०६ अद्भिः संस्कृ ४ । ४ । १३४
३७० अधिकरणे ३ । ४ । ४१
५१ अधिकरणे शेतेः ३ । २ । १५
५६५ अधेरुपरिस्थं ६ । २ । १८८
३४७ अध्यायन्यायो ३ । ३ । १२२
५३१ अध्वर्युकषाययो ६ । २ । १०
४४५ अनन्त्यस्यापि ८ । २ । १०५
४११ अनसन्तान्नपुं ५ । ४ । १०३
५५० अनिगन्तोऽञ्च ६ । २ । ५२
४७६ अनुदात्तं च ८ । १ । ३
४५४ अनुदात्तं पद ६ । १ । १५८
४४२ अनुदात्तं प्रश्ना ८ । २ । १००
४५८ अनुदात्तस्य च ६ । १ । १६१
४७८ अनुदात्ते च ६ । १ । १९०
४१७ अनुदात्ते च ६ । १ । १२०
१२५ अनुदात्तेतश्च ३ । २ । १४९
५०८ अनुदात्तौ सुप्पि ३ । १ । ४
९० अनुपसर्गात्फुल्ल ८ । २ । ५५

पृष्ठम्	सूत्रम्
३८	अनुपसर्गाल्लि ३ । १ । १३८
४३७	अनो नुट् ८ । २ । १६
५८२	अनो भाव ६ । २ । १५०
५९५	अनोरप्रधान ६ । २ । १८९
८२	अनौ कर्मणि ३ । २ । १००
५६१	अन्तः ६ । २ । ९२
५७९	अन्तः ६ । २ । १४३
५९३	अन्तः ६ । २ । १७९
७०	अन्तः ८ । ४ । २०
३४६	अन्तरदेशे ८ । ४ । २४
३२९	अन्तर्घनो देशे ३ । ३ । ७८
५९३	अन्तश्च ६ । २ । १८०
४८६	अन्तश्च तवै ६ । १ । २००
६२	अन्तात्यन्ताध्व ३ । २ । ४८
५११	अन्तोदात्तादु ६ । १ । १६९
४९१	अन्तोऽवत्याः ६ । १ । १२०
५५९	अन्त्यात्पूर्वं बहु ६ । २ । ८३
३६६	अन्यथैवंकथ ३ । ४ । २७
१३५	अन्येभ्योऽपि ३ । २ । १७८
३९२	अन्येभ्योऽपि ३ । ३ । १३०
६९	अन्येभ्योऽपि ३ । २ । ७५
४२१	अन्येषामपि ६ । ३ । १३७
८२	अन्येष्वपि द ३ । २ । १०१
३७८	अन्वच्यानुलो ३ । ४ । ६४
३७४	अपगुरो णमुलि ६ । १ । ५३
३३०	अपघनोऽङ्गम् ३ । ३ । ८१
१०४	अपचितश्च ७ । २ । ३०
४३०	अपरिह्वृताश्च ७ । २ । ३२
४१३	अपस्पृधेथामा ६ । १ । ३६
५९४	अपाच्च ६ । २ । १८६
३७४	अपादाने परी ३ । ४ । ५२
६३	अपे क्लेशतमसोः ३ । २ । ५०
१२४	अपे च लषः ३ । २ । १४४
३३७	अ प्रत्ययात् ३ । ३ । १०२
३१८	अभिलिसःस्तनः ८ । ३ । ८६
३२२	अभिविधौ भाव ३ । ३ । ४४
५९४	अभेर्मुखम् ६ । २ । १८५
१०२	अभेश्चाविदूर्ये ७ । २ । २५
४७७	अभ्यस्ताना ६ । १ । १८९
३८७	अभ्युत्सादया ३ । १ । ४२
६४	अमनुष्यकर्तृके ३ । २ । ५३
५६०	अमहन्नवन्नगरे ६ । २ । ८९
२१	अमावस्यद ३ । १ । १२२
४११	अमु च च्छन्द ५ । ४ । १२
४२६	अमो मश् ७ । १ । ४०
४३९	अम्नरूधरवरि ८ । २ । ७०
४७	अम्बाम्बगोभूमि ८ । ३ । ९७
३४६	अयनं च ८ । ४ । २५
३८२	अयस्मयादीनि १ । ४ । २०
५६३	अरिष्टगौडपूर्वे ६ । २ । १००
५५	अरुर्द्विषदजन्त ६ । ३ । ६७
१३७	अर्तिलूधूसू ३ । २ । १८४
५४६	अर्थे ६ । २ । ४४
१०१	अर्देः संनिविभ्यः ७ । २ । २४
५६०	अर्मे चावर्णं ६ । २ । ९०
१३	अर्यः स्वामि ३ । १ । १०३
५०	अर्हः ३ । २ । १२
१२०	अर्हः प्रशंसा ३ । २ । १३३
१२१	अलंकृञ्निरा ३ । २ । १३६
३५१	अलंखल्वोः ४ । ३ । १८

पृष्ठम्	सूत्रम्
३६६	अवचत्ते च ३ । ४ । १५
१२	अवद्यपण्यव ३ । १ । १०१
४१७	अवपथासि च ६ । १ । १२१
३६०	अवयाः श्वेतवाः ८ । २ । ६७
३२४	अवे ग्रहो वर्षप्रति ३ । ३ । ५१
३४७	अवे तृस्त्रोर्घञ् ३ । ३ । १२०
३६०	अवे यजः ३ । २ । ७२
३१४	अवोदैधौद्मप्रश्र ६ । ४ । २६
३१८	अवोदोर्नियः ३ । ३ । २६
३७६	अव्ययेऽयथा ३ । ४ । ५६
४१५	अव्यादवद्या ६ । १ । ११६
४३४	अश्वाघस्यात् ७ । ४ । ३७
४०४	अश्विमानण् ४ । ४ । १२६
५१४	अष्टनो दीर्घा ६ । १ । १७२
४०४	असुरस्य स्वं ४ । ४ । १२३
५८	असूर्यललाटयोः ३ । २ । ३६
३७६	अस्यतितृषोः ३ । ४ । ५७
५४६	अहीने द्वितीया ६ । २ । ४७
६१४	अहेति विनियोगे ८ । १ । ६१
६०२	अहो च ८ । १ । ४०
	आ
५८६	आक्रोशे च ६ । २ । १५८
३४४	आक्रोशे नञ्य ३ । ३ । ११२
३२२	आक्रोशेऽवन्यो ३ । ३ । ४५
१२०	आ केस्तच्छी ३ । २ । १३४
५०	आङि ताच्छी ३ । २ । ११
३२८	आङि युद्धे ३ । ३ । ७३
४१७	आङोऽनुना ६ । १ । १२६
१०	आङो यि ७ । १ । ६५
५६४	आचार्योपसर्ज ६ । २ । १०४
५४१	आचार्योपसर्जन ६ । २ । ३६
४२६	आज्जसेरसुक् ७ । १ । ५०
६५	आढ्यसुभगस्थू ३ । २ । ५६
३६४	आत ऐ ३ । ४ । ९५
३७	आतश्चोपसर्गे ३ । १ । १३६
३३६	आतश्चोपसर्गे ३ । ३ । १०६
४४६	आतोऽटि नित्यम् ८ । ३ । ३
४५	आतोऽनुपसर्गे कः ३ । २ । ३
३६१	आतो मनिन्क ३ । २ । ७४
३५०	आतो युच् ३ । ३ । १२८
७५	आत्ममाने खश्च ३ । २ । ८३
५३८	आदिः प्रत्येनसि ६ । २ । २७
५२४	आदिः सिचो ६ । १ । १८७
६५	आदिकर्मणि क्तः ३ । ४ । ७१
६०	आदितश्च ७ । २ । १६
५५३	आदिरुदात्तः ६ । २ । ६४
४७६	आदिर्णमुल्य ६ । १ । १६४
५७१	आदिश्चिहणा ६ । २ । १२५
१३१	आदृगमहन ३ । २ । १७१
५६६	आद्युदात्तं ६ । २ । ११६
५०८	आद्युदात्तश्च ३ । १ । ३
२६	आनाय्योऽनि ३ । १ । १२७
११६	आने मुक् ७ । २ । ८२
४१६	आपो जुषाणो ६ । १ । ११८
३६३	आभीक्ष्ण्ये णमु ३ । ४ । २२
६११	आम एकान्तर ८ । १ । ५५
४६०	आमन्त्रितस्य ६ । १ । १६८
४६०	आमन्त्रितस्य च ८ । १ । १६
४४१	आम्रेडितं भर्त्से ८ । २ । ६५
५५२	आर्यो ब्राह्मण ६ । २ । ५८

पृष्ठम् सूत्रम्

३५० आवश्यकाध ३ । ३ । १७०

५३५ आशङ्काबाध ६ । २ । २१

४८८ आशितः ६ । १ । २०७

६१ आशिते भुवः ३ । २ । ४५

४३ आशिषि च ३ । १ । १५०

६३ आशिषि हनः ३ । २ । ४६

२५ आसुयुवपिर ३ । १ । १२६

६०६ आहो उताहो ८ । १ । ४६

इ

४२० इकः सुञि ६ । ३ । १३४

५३८ इगन्तकालक ६ । २ । २६

३७ इगुपधज्ञाप्री ३ । १ । १३५

३१६ इच्च ३ । ३ । २१

११६ इच्धार्योः ३ । २ । १३०

७६ इच एकाचो ६ । ३ । ६८

३३६ इच्छा ३ । ३ । १०१

७ इजादेः सनुमः ८ । ४ । ३२

४२१ इडाया वा ८ । ३ । ५४

१२६ इणनशिजिसर्ति ३ । २ । १६३

६३ इरिनष्ठायाम् ७ । २ । ४७

३६३ इतश्च लोपः ३ । ४ । ६७

५८१ इत्थंभूतेन कृत ६ । २ । १४६

४२८ इदन्तो मसि ७ । १ । ४६

३८३ इन्धिभवतिभ्यां १ । २ । ६

४२२ इरयो रे ६ । ४ । ७६

४२६ इष्टीनमिति च ७ । १ । ४८

७० इस्मन्त्रन्क्विषु ६ । ४ । ६७

ई

१७ ई च खनः ३ । १ । १११

४३० ई च द्विवचने ७ । १ । ७७

४८६ ईडवन्दवृशंस ६ । १ । २१४

११८ ईदासः ७ । २ । ८३

६ ईयति ६ । ४ । ६५

४६१ ईवत्याः ६ । १ । २२१

३६८ ईश्वरे तोसुन्कसु ३ । ४ । १३

५५१ ईषदन्यतरस्यां ६ । २ । ५४

३४८ ईषद्दुःसुषु कृ ३ । ३ । १२६

उ

५८ उग्रंपश्येरंमद ३ । २ । ३७

४७१ उच्चैस्तरां वा १ । २ । ३५

४८३ उञ्छादीनां च ६ । १ । १६०

३०७ उणादयो बहुलम् ३ । ३ । १

५६५ उत्तरपदवृद्धौ ६ । २ । १०५

२६७ उत्तरपदादिः ६ । २ । १११

५६२ उदकेऽकेवले ६ । २ । ६६

३४७ उदङ्कोऽनुदके ३ । ३ । १२३

५६५ उदराश्वेषुषु ६ । २ । १०७

५१५ उदात्तयणो ह ६ । १ । १७४

४७४ उदात्तस्वरित १ । २ । ४०

४६३ उदात्तस्वरितयो ८ । २ । ४

४६७ उदात्तादनुदात्त ८ । ४ । ६६

५७ उदि कूले रुजि ३ । २ । ३१

३१६ उदि ग्रहः ३ । ३ । ३५

३५७ उदितो वा ७ । २ । ५६

३२३ उदि श्रयति ३ । ३ । ४६

३५२ उदीचां माङो ३ । ४ । १६

६६ उदुपधाद्भावादि १ । २ । २१

३२६ उद्घनोऽत्याधान ३ । ३ । ८०

३१८ उन्न्योर्ग्रः ३ । ३ । २६

३३० उपघ्न आश्रये ३ । ३ । ८५

पृष्ठम् सूत्रम्
३७१ उपदंशस्तृतीया ३ । ४ । ४७
५५७ उपमानं शब्दार्थ ६ । २ । ८०
३६१ उपमाने कर्मणि ३ । ४ । ४५
४४४ उपरिस्विदासी ८ । २ । १०२
३६४ उपसंवादाशङ्क ३ । ४ । ८
६०४ उपसर्गव्यपेतं ८ । १ । ३८
४०८ उपसर्गाच्छन्द ५ । १ । ११८
३४६ उपसर्गास्खल्घ ७ । १ । ६७
५६२ उपसर्गास्स्वाङ्गं ६ । २ । १७७
३१२ उपसर्गे घोः किः ३ । ३ । ९२
८२ उपसर्गे च संज्ञा ३ । २ । ९९
३२६ उपसर्गेऽदः ३ । ३ । ५९
३१८ उपसर्गे रुवः ३ । ३ । २२
१३ उपसर्या काल्य ३ । १ । १०४
११ उपात्प्रशंसायाम् ७ । १ । ६६
५९६ उपाद्द्व्यजजिन ६ । २ । १९४
११५ उपेयिवाननाश्वा ३ । २ । १०९
५२६ उपोत्तमं रिति ६ । १ । १९७
४४८ उभयपर्सुं ८ । ३ । ८
५७६ उभे वनस्पत्या ६ । २ । १४०
५४३ उष्ट्रः सादिवाम्यो ६ । २ । ४०
ऊ
५१३ ऊडिदंपदाद्य ६ । १ । १७१
३३५ ऊतियूतिजूति ३ । ३ । ९७
५८३ ऊनार्थकलहं ६ । २ । १५३
३७१ ऊर्ध्वे शुषिपूरोः ३ । ४ । ४४
ऋ
४२० ऋचि तुनुघ ६ । ३ । १३३
९२ ऋणमाधमर्ण्ये ८ । २ । ६०
४११ ऋतश्छन्दसि ५ । ४ । १५८
४२४ ऋत्व्यवा ६ । ४ । १७५
१६ ऋदुपधाच्चा ३ । १ । ११०
ॠ
३२५ ॠदोरप् ३ । ३ । ५७
ए
४६८ एकश्रुति दूरा १ । २ । ३३
४६४ एकादेश उदात्ते ८ । २ । ५
६१५ एकान्याभ्यां ८ । १ । ६५
४४४ एचोऽप्रगृह्य ८ । २ । १०७
५५ एजेः खश् ३ । २ । २८
१५ एतिस्तुशा ३ । १ । १०९
३२४ एरच् ३ । ३ । ५६
६०७ एहिमन्ये प्रहासे ८ । १ । ४६
ओ
२४ ओक उचः ७ । ३ । ६४
४०६ ओजसोऽहनि ४ । ४ । १३०
८६ ओदितश्च ८ । २ । ४५
४३६ ओमभ्यादाने ८ । २ । ८७
२५ ओरावश्यके ३ । १ । १२५
४२० ओषधेश्च ६ । ३ । १३२
क
४५० कः करत्करति ८ । ३ । ५०
५७० कंसमन्थशूर्प ६ । २ । १२२
५६७ कण्ठपृष्ठग्रीवा ६ । २ । ११४
५५२ कतरकतमौ ६ । २ । ५७
४०० कद्रुकमण्डल्वो ४ । १ । ७१
५७१ कन्था च ६ । २ । १२४
५६१ कपि पूर्वम् ६ । २ । १७३
१०६ कपिष्ठलो गोत्रे ८ । ३ । ९१
३४६ करणाधिकर ३ । ३ । ११७

पृष्ठम् सूत्रम्
७८ करणे यजः ३ । २ । ८५
३३० करणेऽयोविद्रुषु ३ । ३ । ८२
३६६ करणे हनः ३ । ४ । ३७
५६७ कर्णो वर्ण ६ । २ । ११२
४ कर्तरि कृत् ३ । ४ । ६७
१३७ कर्तरि चर्षि ३ । २ । १८६
६६ कर्तरि भुवः ३ । २ । ५७
७५ कर्तर्युपमाने ३ । २ । ७९
३४६ कर्तृकर्मणोश्च ३ । ३ । १२७
३७१ कर्त्रोर्जीवपुरुष ३ । ४ । ४३
३४५ कर्मणि च ३ । ३ । ११६
३६७ कर्मणि दृशि ३ । ४ । २९
५४ कर्मणि भृतौ ३ । २ । २२
७८ कर्मणि हनः ३ । २ । ८६
८१ कर्मणीनि विक्रि ३ । २ । ९३
८१ कर्मण्यग्न्या ३ । २ । ९२
४४ कर्मण्यण् ३ । २ । १
३३२ कर्मण्यधिकरणे ३ । ३ । ९३
३६५ कर्मण्याक्रोशे ३ । ४ । २५
५४६ कर्मधारयेऽनि ६ । २ । ४६
३२१ कर्मव्यतिहारे ३ । ३ । ४३
४८३ कर्षाऽऽत्व ६ । १ । १५९
४३४ कव्यध्वरपृतन ७ । ४ । ३९
३८६ कव्यपुरीष ३ । २ । ६५
३७१ कषादिषु यथा ३ । ४ । ४६
५८१ कारकाद्दत्तश्रु ६ । २ । १४८
५४२ कार्तकौजपाद ६ । २ । ३७
३१० कालसमय ३ । ३ । १६७
५०६ कितः ६ । १ । १६५
६०६ किंक्रियाप्रश्ने ८ । १ । ४४

पृष्ठम् सूत्रम्
६०८ किंवृत्तं च ८ । १ । ४८
५७३ कुण्डं वनम् ६ । २ । १३६
६१७ कुत्सने च सुप्य ८ । १ । ६९
६४ कुमारशीर्षयो ३ । २ । ५१
५३७ कुमारश्च ६ । २ । २६
५६२ कुमार्यां वयसि ६ । २ । ९५
५४२ कुरुगार्हपत ६ । २ । ४२
५६४ कुसूलकूप ६ । २ । १०२
५७० कूलतीरतूल ६ । २ । १२१
५७२ कूलसूदस्थल ६ । २ । १२९
१०१ कृच्छ्रगहनयोः ७ । २ । २२
३२६ कृञः श च ३ । ३ । १००
५२ कृञो हेतुता ३ । २ । २०
२ कृत्यचः ८ । ४ । २९
८ कृत्यल्युटो बहु ३ । ३ । ११३
४ कृत्याः ३ । १ । ९५
३६८ कृत्यार्थे तवैके ३ । ४ । १४
३५० कृत्याश्च ३ । ३ । १७१
५८६ कृत्योकेष्णुच्चा ६ । २ । १६०
३८८ कृमृदृरुहिभ्यः ३ । १ । ५९
४३५ कृपेश्छन्दसि ७ । ४ । ६४
३१९ कॄ धान्ये । ३ । ३ । ३०
८३ क्तक्तवतू निष्ठा १ । १ । २६
३५१ क्तिच्क्तौ च ३ । ३ । १७४
५४६ क्ते च ६ । २ । ४५
५५३ क्ते नित्यार्थे ६ । २ । ६१
११० क्तोऽधिकरणे ३ । ४ । ७६
४२४ क्त्वापि च्छन्द ७ । १ । ३८
३५४ क्त्वि स्कन्दि ६ । ४ । ३१
४२८ क्त्वो यक् ७ । १ । ४७

पृष्ठम् सूत्रम्

१३१ क्याच्छन्दसि ३ । २ । १७०
२७ क्रतौ कुण्डपा ३ । १ । १३०
५६६ क्रत्वादयश्च ६ । २ । ११८
३५७ क्रमश्च क्त्वि ६ । ४ । १८
६८ क्रव्ये च ३ । २ । ६९
१२६ क्रुधमण्डार्थेभ्यः ३ । २ । १५१
६४ क्लिशः क्त्वानिष्ठ ७ । २ । ५०
३२६ क्वणो वीणायां च ३ । ३ । ६५
११२ क्वसुश्च ३ । २ । १०७
६६ क्विप्च ३ । २ । ७६
४८७ क्षयो निवासे ६ । १ । २०१
८६ क्षायो मः ८ । २ । ५३
३६२ क्षियः ६ । ४ । ५९
४४४ क्षियाशीःप्रैषेषु ८ । २ । १०४
८४ क्षियो दीर्घात् ८ । २ । ४६
६८ क्षुब्धस्वान्त ७ । २ । १८
५४३ क्षुल्लकश्च वैश्वदेवे ६ । २ । ३९
५६५ क्षेपे ६ । २ । १०८
६१ क्षेमप्रियमद्रेऽण्च ३ । २ । ४४

ख

४०६ खच ४ । ४ । १३२
६० खचि ह्रस्वः ६ । ४ । ९४
३४८ खनो घ च ३ । ३ । १२५
५६ खित्यनव्ययस्य ६ । ३ । ६६
४१३ खिदेश्छन्दसि ६ । १ । ५२

ग

५७४ गतिकारकोप ६ । २ । १३९
५४७ गतिरनन्तरः ६ । २ । ४९
६१८ गतिर्गतौ ८ । १ । ७०
६०६ गत्यर्थलोटा ८ । १ । ५१

पृष्ठम् सूत्रम्

१०६ गत्यर्थाकर्मक ३ । ४ । ७२
१२६ गत्वरश्च ३ । २ । १६४
११ गदमदचर ३ । १ । १००
५३३ गन्तव्यपण्यं ६ । २ । १३
७१ गमः क्वौ ६ । ४ । ४०
६२ गमश्च ३ । २ । ४७
४३ गस्थकन् ३ । १ । १४६
५२६ गाधलवणयोः प्रमा ६ । २ । ४
४६ गापोष्टक् ३ । २ । ८
३८७ गुपेश्छन्दसि ३ । १ । ५०
३३८ गुरोश्च हलः ३ । ३ । १०३
४२ गेहे कः ३ । १ । १४४
४२६ गोः पादान्ते ७ । १ । ५७
३४६ गोचरसंचर ३ । ३ । ११९
५२७ गोतन्तियवं ६ । २ । ७८
५५५ गोत्रान्तेवासि ६ । २ । ६९
५२६ गोबिडालसिंह ६ । २ । ७२
५४३ गोः सादसादि ६ । २ । ४१
४३० ग्रसितस्कभित ७ । २ । ३२
३२५ ग्रहवृदृनिश्चिगमः ३ । ३ । ५८
५५३ ग्रामः शिल्पिनि ६ । २ । ६२
५५६ ग्रामेऽनिवसन्त ६ । २ । ८४
१२२ ग्लाजिस्थश्च ३ । २ । १३९

घ

४०२ घच्छौ च ४ । ४ । ११७
३२६ घञपोश्च २ । ४ । ३८
३१३ घञि च भाव ६ । ४ । २७
४२२ घसिभसोर्हलि ६ । ४ । १००
१०१ घुषिरविशब्दने ७ । २ । २३
४३२ घोर्लोपो लेटि ७ । ३ । ७०

पृष्ठम् सूत्रम्

५५६ घोषादिषु च ६ । २ । ८५

क्ङ

४८८ क्यि च ६ । १ । २१२

५१८ क्याच्छन्दसि ६ । १ । १७८

च

४८२ चक्यन्यतर ६ । १ । २१८

१८ चजोः कु घिण्ण्य ७ । ३ । ५२

४८४ चतुरः शसि ६ । १ । १६७

५४६ चतुर्थी तदर्थे ६ । २ । ४३

३८४ चतुर्थ्यर्थे बहुलं २ । ३ । ६२

६१२ चनचिदिवगोत्रा ८ । १ । ५७

५१ चरेष्टः ३ । २ । १६

३६८ चर्मोदरयोः पूरेः ३ । ४ । ३१

११५ चलनशब्दार्था ३ । २ । १४८

६११ चवायोगे प्रथमा ८ । १ । ५९

६१५ चादिलोपे विभा ८ । १ । ६३

६१२ चादिषु च ८ । १ । ५८

४१२ चायः की ६ । १ । ३५

६१४ चाहलोप एवे ८ । १ ६२

५०८ चितः ६ । १ । १६३

२८ चित्याग्निचित्ये ३ । १ । १३२

४४३ चिदिति चोप ८ । २ । १०१

३३६ चिन्तिपूजि ३ । ३ । १०५

५७१ चीरमुपमानं ६ । २ । १२७

५७३ चूर्णादीन्यप्रा ६ । २ । १३४

५७१ चेलखेटकटु ६ । १ १२६

३६८ चेले क्नोपेः ३ । ४ । ३३

४५६ चौ ६ । १ । २२२

छ

३६२ छन्दसि गत्यर्थे ३ । ३ । १२६

४०८ छन्दसि घस् ५ । १ । १०६

४०८ छन्दसि च ५ । १ । ६७

४११ छन्दसि च ५ । ४ । १४२

४१६ छन्दसि च ६ । ३ । १२६

४०१ छन्दसि ठञ् ४ । ३ । १९

३८८ छन्दसि निष्ट ३ । १ । १२३

३८३ छन्दसि परेऽपि १ । ४ । ८१

३८० छन्दसि पुनर्व १ । २ । ६१

११२ छन्दसि लिट् ३ । २ । १०५

३६३ छन्दसि लुङ् ३ । ४ । ६

३८६ छन्दसि वनसन ३ । २ । २७

४४६ छन्दसि वाप्रा ८ । ३ । ४९

३६४ छन्दसि शायज ३ । १ । ८४

३८६ छन्दसि सहः ३ । २ । ६३

४३७ छन्दसीरः ८ । २ । १५

६०३ छन्दस्यनेकम ८ । १ । ३५

४२१ छन्दस्यपि दृश्य । ६ । ४ । ७३

४२६ छन्दस्यपि दृश्य ७ । १ । ७६

४२१ छन्दस्युभयथा ३ । ४ । ११७

३६७ छन्दस्युभयथा ६ । ४ । ५

४२२ छन्दस्युभयथा ६ । ४ । ८६

४५३ छन्दस्यृदवग्रहा ८ । ४ । २६

३१६ छन्दोनाम्नि च ३ । ३ । ३४

३१६ छन्दोनाम्नि च ८ । ३ । ९४

५५६ छात्र्यादयः ६ । २ । ८६

३४६ छादेर्घेऽद्व्युप ६ । ४ । ९६

ज

३६० जनसनखन ३ । २ । ६७

४२१ जनिता मन्त्रे ६ । ४ । ५३

४८७ जयः करणम् ६ । १ । २०२

पृष्ठम् सूत्रम्

१२८ जल्पभिक्षकुट्ट ३ । २ । १५५

३५८ जहातेश्च क्त्वि ७ । ४ । ४३

१३० जागुरूकः ३ । २ । १६५

२६८ जाग्रोऽविचिण्णल् ७ । ३ । ८५

५६० जातिकालसु ६ । २ । १७०

६०८ जात्वपूर्वम् ८ । १ । ४७

३५७ जान्तनशां ६ । ४ । ३२

३४७ जालमानायः ३ । ३ । १२४

१२८ जिदृक्षिविश्री ३ । २ । १५७

११२ जीर्यतेरतृन् ३ । २ । १०४

१२६ जुचङ्क्रम्य ३ । २ । १५०

४८८ जुष्टार्पिते च ६ । १ । २०९

३५७ जृव्रश्च्योः क्त्वि ७ । २ । ५५

३६२ ज्यश्च ६ । १ । ४२

४० ज्वलितिकस ३ । १ । १४०

झ

४८५ झल्युपोत्तमम् ६ । १ । १८०

ञ

१११ ञीतः क्तः ३ । २ । १८७

४८६ ञ्नित्यादिर्नित्यं ६ । १ । १९७

ट

३३२ ट्वितोऽथुच् ३ । ३ । ८९

ड

३३१ ड्वितः क्त्रिः ३ । ३ । ८८

ढ

४८१ ढश्छन्दसि ४ । ४ । १०६

ण

३२१ णचः स्त्रियामञ् । ५ । ४ । १४

५५७ णिनि ६ । २ । ७९

पृष्ठम् सूत्रम्

१०२ णेरध्ययने वृत्तम् ७ । २ । २६

५ णेर्विभाषा ८ । ४ । ३०

१२१ णेश्छन्दसि ३ । २ । १३७

२४ ण्य आवश्यके ७ । ३ । ६५

३४० ण्यासश्रन्थो ३ । ३ । १०७

४३ ण्युट् च ३ । १ । १४७

३१ ण्वुल्तृचौ ३ । १ । १३३

त

५२७ तत्पुरुषे तुल्यार्थ ६ । २ । २

५७० तत्पुरुषे शाला ६ । २ । १२३

५०८ तद्धितस्य ६ । १ । १६४

४०४ तद्धानासामुप ४ । ४ । १२५

४२२ तनिपत्योश्छन्द ६ । ४ । ९९

४२८ तप्तनप्तनथनाश्च ७ । १ । ४५

४ तयोरेव कृत्यक्त ३ । ४ । ७०

४१० तयोर्दार्हिलौ च ५ । ३ । २०

४४६ तयोर्य्वावचि ८ । २ । १०८

५४९ तवै चान्तश्च ६ । २ । ५१

४ तव्यत्तव्यानीयरः ३ । १ । ९६

४२७ तस्य तात् ७ । १ । ४४

११९ ताच्छील्यवयो ३ । २ । १२९

५४९ तादौ च निति ६ । २ । ५०

३०८ ताभ्यामन्यत्रो ३ । ४ । ७५

५२२ तास्यनुदात्ते ६ । १ । १८६

६१९ तिङि चोदात्तव ८ । १ । ७१

६०० तिङो गोत्रादीनि ८ । १ । २७

६०१ तिङ्ङतिङः ८ । १ । २८

९० ति च ७ । ४ । ८९

१३६ तितुत्रतथसि ७ । २ । ९

पृष्ठम् सूत्रम्
५२२ तित्स्वरितम् ६ । १ । १८५
३७६ तिर्यच्यपवर्गे ३ । ४ । ६०
५०९ तिसृभ्यो जसः ६ । १ । १६६
४०२ तुभ्राद्धन् ४ । ४ । ११५
४१२ तुजादीनां दीर्घो ६ । १ । ७
४८ तुन्दशोकयोः ३ । २ । ५
६०५ तुपश्यपश्यताहैः ८ । १ । ३९
३९७ तुमर्थे सेसेनसे ३ । ४ । ९
३०८ तुमुन्ण्वुलौ क्रिया ३ । ३ । १०
३७८ तूष्णीमि भुवः ३ । ४ । ६३
५४७ तृतीया कर्मणि ६ । २ । ४८
३८३ तृतीया च होः २ । ३ । ३
२२१ तृन् ३ । २ । १३५
२५६ तृषिमृषिकृशेः १ । २ । २५
११८ तौ सत् ३ । २ । १२७
४९० त्यागरागहास ६ । १ । २१६
१२२ त्रसिगृधिधृषि ३ । २ । १४०

थ

४०९ थट् च छन्दसि ५ । २ । ५०
५२५ थलि च सेटि ६ । १ । १९६
५७९ थाथघञ्क्ताज ६ । २ । १४४
४१० था हेतौ च ५ । ३ । २६

द

३९ ददातिदधात्यो ३ । १ । १३९
१०५ दधातेर्हिः ७ । ४ । ४२
१०७ दस्ति ६ । ३ । १२४
४३५ दाधर्तिदर्धर्ति ७ । ४ । ६५
१२९ दाधेट्सिशदस ३ । २ । १५९
१३६ दाम्नीशसयुयुज ३ । २ । १८२

पृष्ठम् सूत्रम्
५२९ दायाद्यं दायादे ६ । २ । ५
३०८ दाशगोघ्नौ संप्र ३ । ४ । ७३
४४८ दाश्वान्साह्वान्मी ६ । १ । १२
५६४ दिवश्छन्दसा माम ६ । २ । १०३
५२ दिवाविभानिशा ३ । २ । २१
५२० दिवो झल् ६ । १ । १८३
८९ दिवोऽविजिगीषा ८ । २ । ४९
५३९ दिष्टिवितस्त्योश्च ६ । २ । ३१
२७९ दीर्घ इणः किति ७ । ४ । ६९
५५९ दीर्घकाशतुष ६ । २ । ८२
४०० दीर्घजिह्वी च ४ । १ । ५९
४४९ दीर्घादटि समानपा ८ । ३ । ९
४१ दुन्योरनुपसर्गे ३ । १ । १४२
४३३ दुरस्युर्द्रविणस्यु ७ । ४ । ३६
६९ दुहः कब्घश्च ३ । २ । ७०
४०२ दूतस्य भाग ४ । ४ । १२०
४३० दृक्स्ववस्स्वतव ७ । १ । ८३
१०० दृढः स्थूलबलयोः ७ । २ । २०
८१ दृशेः क्वनिप् ३ । २ । ९४
३९८ दृशे विख्ये च ३ । ४ । ११
५७८ देवताद्वन्द्वे च ६ । २ । १४१
४७४ देवब्रह्मणोरनुदा १ । २ । ३८
४३४ देवसुम्नयोर्यजुषि ७ । ४ । ३८
१२५ देविकुशोश्चोपस ३ । २ । १४७
१०६ दो दद्घोः ७ । ४ । ४६
१०५ द्यतिस्यतिमास्था ७ । ४ । ४०
८६ द्रवमूर्तिस्पर्शयोः ६ । १ । २४
५६३ द्विगौ क्रतौ ६ । २ । ९७
५३२ द्विगौ प्रमाणे ६ । २ । १२

पृष्ठम् सूत्रम्
३८४ द्वितीया ब्राह्मणे २ । ३ । ६०
३७४ द्वितीयायां च ३ । ४ । ५३
५६७ द्वित्रिभ्यां पाद् ६ । २ । १९७
५६ द्विषत्परयोस्तापेः ३ । २ । ३९
१२० द्विषोऽमित्रे ३ । २ । १३१
४०१ द्व्यचश्छन्दसि ४ । ३ । १५०
४२० द्व्यचोऽतस्तिङः ६ । ३ । १३५
घ
१३६ धः कर्मणि ष्ट्रन् ३ । २ । १८१
१ धातोः ३ । १ । ९१
४७६ धातोः ६ । १ । १६२
९९ धृषिशसी वैयात्ये ७ । २ । १९
४२७ ध्वमो ध्वात् ७ । १ । ४२
न
३२१ न कर्मव्यतिहारे ७ । ३ । ६
३५१ न क्तिचि दीर्घश्च ६ । ४ । ३९
३५५ न क्त्वा सेट् १ । २ । १८
२२ न क्रादेः ७ । ३ । ५९
४०७ नक्षत्राद्घः ४ । ४ । १४१
५९३ न गुणादयो ६ । २ । १७६
५१९ न गोश्वन्सावव ६ । १ । १८२
४३३ न च्छन्दस्यपुत्र ७ । ४ । ३५
५८४ नञो गुणप्रति ६ । २ । १५५
५६८ नञो जरमर ६ । २ । ११६
५९० नञ्सुभ्याम् ६ । २ । १७२
५६६ नदी बन्धुनि ६ । २ । १०९
९१ न ध्याख्यापॄ ८ । २ । ५७
५९३ न निविभ्याम् ६ । २ । १८१
३४ नन्दिग्रहिपचा ३ । १ । १३४
६०६ नन्वित्यनुज्ञैषणा ८ । १ । ४३

१११ नपुंसके भावे ३ । ३ । ११४
८ न माभूपूकमि ८ । ४ । ३४
५६० न भूताधिकसं ६ । २ । ९१
५३४ न भूवाक्चिद्दिधि ६ । २ । १९
१३० नमिकम्पिस्म्य ३ । २ । १६७
१२६ न यः ३ । २ । १५२
१८५ न यद्यनाकाङ्क्षे ३ । ४ । २३
३६४ न रपरसृपिसृ ८ । ३ । ११०
६०१ न लुट् ८ । १ । २९
३६० न ल्यपि ६ । ४ । ६९
५४ न शब्दश्लोक ३ । २ । २३
४५३ नश्च धातुस्थो ८ । ४ । २७
३४८ नसत्तनिषत्ता ८ । २ । ६१
३४९ न सुदुर्भ्यां ७ । १ । ६८
४७३ न सुब्रह्मण्यायां १ । २ । ३७
६०२ नह प्रत्यारम्भे ८ । १ । ३१
५६४ न हास्तिनफ ६ । २ । १०१
५७२ नाचार्यराज ६ । २ । १३३
५७ नाडीमुष्ट्योश्च ३ । २ । ३०
४३८ नाद्घस्य ८ । २ । १७
३७७ नाधार्थप्रत्यये ३ । ४ । ६२
५१८ नामन्यतर ६ । १ । १७७
३७६ नाम्न्यादिशि ३ । ४ । ५८
५८९ नाव्ययदिक् ६ । २ । १६८
५६ नासिकास्तनयोः ३ । २ । २९
४४१ निगृह्यानुयोगे ८ । २ । ९४
३३० निघो निमितम् ३ । ३ । ८७
४०० नित्यं छन्दसि ४ । १ । ४६
४३३ नित्यं छन्दसि ७ । ४ । ८
३२७ नित्यं पणः ३ । ३ । ६६

पृष्ठम् सूत्रम्

४८८ नित्यं मन्त्रे ६ । १ । २१०
१०९ निनदीभ्यां ८ । ३ । ८९
१२४ निन्दहिंसक्लि ३ । २ । १४२
४२० निपातस्य ६ । ३ । १३६
६०१ निपातैर्यद्यदि ८ । १ । ३०
३२९ निपानमाहावः ३ । ३ । ७४
३६९ निमूलसमूलयोः ३ । ४ । ३४
३१८ निरभ्योः पूल्वोः ३ । ३ । २८
५९४ निरुदकादीनि ६ । २ । १८४
८९ निर्वाणोऽवाते ८ । २ । ५०
५३० निवाते वातत्राणे ६ । २ । ८
३२० निवासचिति ३ । ३ । ४१
४५२ निव्यभिभ्यो ८ । ३ । ११९
८३ निष्ठा ३ । २ । १०२
४८७ निष्ठा च ६ । १ । २०५
९६ निष्ठायां सेटि ६ । ४ । ५२
८३ निष्ठायामण्यदर्थे ६ । ४ । ६०
९४ निष्ठा शीङ्स्वि १ । २ । १९
५८९ निष्ठोपमाना ६ । २ । १६९
५६६ निष्ठोपसर्गपूर्व ६ । २ । ११०
९१ नुदविदोन्दत्रा ८ । २ । ५६
५२१ नृ चान्यतरस्यां ६ । १ । १८४
६९ नेड्वशि कृति ७ । २ । ८
४२४ नेतराच्छन्द ७ । १ । २६
५९६ नेरनिधाने ३ । २ । १९२
५१६ नोङ्धात्वोः ६ । १ । १७५
५७८ नोत्तरपदेऽनु ६ । २ १४२
४०१ नोत्वद्वर्ध्रबिल्वा ४ । ३ । १५१
४६७ नोदात्तस्वरितो ८ । ४ । ६७
३८७ नोनयतिध्वनय ३ । १ । ५१
३५५ नोपधात्यफान्ता १ । २ । २३
३२६ नौ गदनदपठ ३ । ३ । ६४
३२६ नौ ण च ३ । ३ । ६०
३२३ नौ वृ धान्ये ३ । ३ । ४८
१९ न्यङ्क्वादीनां ७ । ३ । ५३
५५१ न्यधी च ६ । २ । ५३

प

८९ पचो वः ८ । २ । ५२
४५० पञ्चम्याः पराव ८ । ३ । ५१
८२ पञ्चम्यामजातौ ३ । २ । ९८
५३४ पत्यावैश्वर्ये ६ । २ । १८
४१९ पथि च च्छ ६ । ३ । १०८
४८६ पथिमथोः ६ । १ । १९९
३१२ पदरुजविश ३ । ३ । १६
२१ पदास्वैरिबा ३ । १ । ११९
५३० पदेऽपदेशे ६ । २ । ७
५९८ परादिश्छ ६ । २ । १९९
३२० परावनुपात्यय ३ । ३ । ३८
३५३ परावरयोगे च ३ । ४ । २०
३७५ परिक्लिश्यमाने ३ । ४ । ५५
३१९ परिन्योर्नीणो ३ । ३ । ३७
५३९ परिप्रत्युपापा ६ । २ । ३३
३१५ परिमाणा ३ । ३ । २०
५८ परिमाणे पचः ३ । २ । ३३
८८ परिस्कन्दः ८ । ३ । ७५
५९३ परेरभितो ६ । २ । १८२
३३० परेश्च घाङ्कयोः ८ । २ । २२
३३० परौ घः ३ । ३ । ८४

पृष्ठम् सूत्रम्
३२४ परौ भुवोऽव ३ । ३ । ५५
३१३ परौ यज्ञे ३ । ३ । ४७
३१० पर्याप्तिवचनेष्व ३ । ४ । ६६
३४३ पर्यायार्हर्णो ३ । ३ । १११
५७२ पललसूप ६ । २ । १२८
४१० पश्च पश्चा च ५ । ३ । ३३
३७ पाघ्राध्माधेट् ३ । १ । १३७
६५ पाणिघताडघौ ३ । २ । ५५
४५० पातौ च ८ । ३ । ५२
४०२ पाथोनदी ४ । ४ । १११
५५५ पापं च शिल्पि ६ । २ । ६८
२७ पाय्यसान्ना ३ । १ । १२९
४१८ पितरामातरा ६ । ३ । ३३
३४६ पुंसि संज्ञायां ३ । ३ । ११८
५७२ पुत्रः पुम्भ्यः ६ । २ । १३२
६०५ पुरा च परी ८ । १ । ४२
५९५ पुरुषश्चान्वा ६ । २ । १९०
५६३ पुरे प्राचाम् ६ । २ । ९९
५२ पुरोऽग्रतोऽग्रेषु ३ । २ । १८
१३७ पुवः संज्ञा ३ । २ । १८५
२० पुष्यसिद्ध्यौ ३ । १ । ११६
६० पूःसर्वयोर्दारिस ३ । २ । ४१
५३८ पूगेष्वन्यतर ६ । २ । २८
९४ पूङः क्त्वा च १ । २ । २२
९४ पूङश्च ७ । २ । ५१
११९ पूञ्यजोः ३ । २ । १२८
६१६ पूजनात्पूजितम ८ । १ । ६७
६०४ पूजायां नान ८ । १ । ३७
४४२ पूर्वं तु भाषा ८ । २ । ९८

पृष्ठम् सूत्रम्
४५१ पूर्वपदात् ८ । ३ । १०६
५२ पूर्वे कर्तरि ३ । २ । १९
५३५ पूर्वे भूतपूर्वे ६ । २ । २२
४०६ पूर्वैः कृतमिन ४ । ४ । १३३
१० पोरदुपधात् ३ । १ । ९८
१०४ प्यायः पी ६ । १ । २८
४१५ प्रकृत्यान्तः पा ६ । १ । ११५
५७३ प्रकृत्या भगालं ६ । २ । १३७
३२८ प्रजने सर्तेः ३ । ३ । ७१
१२८ प्रजोरिनिः ३ । २ । १५६
४४० प्रणवष्टेः ८ । २ । ८९
२६ प्रणाय्योऽसंम ३ । १ । १२८
५३० प्रतिबन्धि चिर ६ । २ । ६
४४३ प्रतिश्रवणे च ८ । २ । ९९
८९ प्रतिस्तब्धनिस्त ८ । ३ । ११४
५९६ प्रतेरंश्वादय ६ । २ । १९३
८७ प्रतेश्च ६ । १ । २५
४१० प्रत्नपूर्वविश्व ५ । ३ । १११
२० प्रत्यपिभ्यां ३ । १ । ११८
३१९ प्रथने वावशब्दे ३ । ३ । ३३
५५२ प्रथमोऽचिरोप ६ । २ । ५६
१०० प्रभौ परिवृढः ७ । २ । २१
३२७ प्रमदसंमदौ हर्षे ३ । ३ । ६८
३७४ प्रमाणे च ३ । ४ । ५१
२३ प्रयाजानयाजौ ७ । ३ । ६२
३९८ प्रयै रोहिष्यै ३ । ४ । १०
२५ प्रयोज्यनियो ७ । ३ । ६८
५८० प्रवृद्धादीनां च ६ । २ । १४७
४७ प्रष्ठोऽग्रगामिनि ८ । ३ । ९२

पृष्ठम् सूत्रम्

४३७ प्रसमुपोदः पादपू ८ । १ । ६
९० प्रत्योऽन्यतर ८ । २ । ५४
५६० प्रस्थेऽवृद्धमक ६ । २ । ८७
५५६ प्राचां क्रीडायाम् ६ । २ । ७४
५६३ प्रादस्वाङ्गं ६ । २ । १८३
५९ प्रियवशे वदः ३ । २ । ३८
५३४ प्रीतौ च ६ । २ । १६
४३ प्रुसृल्वः सम ३ । १ । १४९
४८ प्रे दाज्ञः ३ । २ । ६
३१८ प्रे द्रुस्तुस्रुवः ३ । ३ । २७
३२४ प्रे वणिजाम् ३ । ३ । ५२
१२४ प्रे लपसृद्रुमथ ३ । २ । १४५
३२३ प्रे लिप्सायाम् ३ । ३ । ४६
३१९ प्रे स्त्रोऽयज्ञे ३ । ३ । ३२
४४५ प्लुतावैच इदु ८ । २ । १०६

फ

५५ फलेग्रहिरात्मं ३ । २ । २६

ब

४०३ बर्हिषि दत्तम् ४ । ४ । ११९
४११ बहुप्रजाश्छन्द ५ । ४ । १२३
३८४ बहुलं छन्दसि २ । ४ । ३९
३८५ बहुलं छन्दसि २ । ४ । ७३
३८५ बहुलं छन्दसि २ । ४ । ७६
३९१ बहुलं छन्दसि ३ । २ । ८८
४०१ बहुलं छन्दसि ५ । २ । १२२
४१२ बहुलं छन्दसि ६ । १ । ३४
४२४ बहुलं छन्दसि ७ । १ । ८
४२४ बहुलं छन्दसि ७ । १ । १०
४३० बहुलं छन्दसि ७ । १ । १०३
४३२ बहुलं छन्दसि ७ । ३ । ९७
४३७ बहुलं छन्दसि ७ । ४ । ७८
४२१ बहुलं छन्दस्य ६ । ४ । ७५
७५ बहुलमाभीक्ष्ण्ये ३ । २ । ८१
५८७ बहुव्रीहाविद ६ । २ । १६२
५२६ बहुव्रीहौ प्रकृत्या ६ । २ । १
५६५ बहुव्रीहौ विश्वं ६ । २ । १०६
५९२ बहोर्नञ्वदुत्त ६ । २ । १७५
५३९ बह्वन्यतरस्याम् ६ । २ । ३०
७८ ब्रह्मभ्रूणवृत्रेषु ३ । २ । ८७
४४० ब्रूहिप्रेष्यश्रौष ८ । २ । ९१

भ

५५६ भक्ताख्यास्तद ६ । २ । ७१
६८ भजो ण्विः ३ । २ । ६२
१२९ भञ्जभासमिदो ३ । २ । १६१
४१५ भय्यप्रवय्ये च ६ । १ । ८३
३०८ भविष्यति गम्याद ३ । ३ । ३
४०२ भवे छन्दसि ४ । ४ । ११०
२८ भव्यगेयप्रवच ३ । ४ । ६८
३९९ भावलक्षणे स्थे ३ । ४ । १६
३११ भाववचनाश्च ३ । ३ । ११
३१३ भावे ३ । ३ । १८
४०७ भावे च ४ । ४ । १४४
३२९ भावेऽनुपसर्ग ३ । ३ । ७५
११४ भाषायां सद ३ । २ । १०८
५१ भिक्षासेनादाये ३ । २ । १७
९२ भित्तं शकलम् ८ । २ । ५९
५१ भिद्योद्ध्यौ ३ । १ । ११५
१३३ भियः क्रुक्लुक ३ । २ । १७४

पृष्ठम् सूत्रम्

३०८ भीमादयोऽपा ३ । ४ । ७४
४७८ भीह्रीभृहुमद ६ । १ । १९२
२३ भुजन्युब्जौ पा ७ । ३ । ६१
१३५ भुवः संज्ञान्त ३ । २ । १७९
१२२ भुवश्च ३ । २ । १३८
४०० भुवश्च ४ । १ । ४७
४३६ भुवश्च महाव्या ८ । २ । ७१
१५ भुवो भावे ३ । १ । १०७
७८ भूते ३ । २ । ८४
३०७ भूतेऽपि दृश्यन्ते ३ । ३ । २
१७ भृञोऽसंज्ञाया ३ । १ । ११२
२५ भोज्यं भक्ष्य ७ । ३ । ६९
१३३ भ्राजभासधु ३ । २ । १७७

म

१११ मतिबुद्धिपूजा ३ । २ । १८८
४४८ मतुवसो रु ८ । ३ । १
४६० मतोः पूर्वमा ६ । १ । २१९
४०६ मतौ च ४ । ४ । १३६
४०५ मत्वर्थे मासत ४ । ४ । १२८
३२७ मदोऽनुपसर्गे ३ । ३ । ६७
४०७ मधोः ४ । ४ । १३९
४०६ मधोर्ञ च ४ । ४ । १२९
७५ मनः ३ । २ । ८२
५८२ मन्क्तिन्व्या ६ । २ । १५१
३८५ मन्त्रे घसह्वरण २ । ४ । ८०
३९२ मन्त्रे वृषेषपच ३ । ३ । ९६
३६१ मन्त्रे श्वेतवहो ३ । २ । ७१
४२३ मन्त्रेष्वाङ्या ६ । ४ । १४१
४२० मन्त्रे सोमाश्वे ६ । ३ । १३१

पृष्ठम् सूत्रम्

३५२ मयतेरिदन्य ६ । ४ । ७०
४०७ मये च ४ । ४ । १३८
५४२ महान्व्रीह्य ६ । २ । ३८
५३३ मात्रोपज्ञोपक्रम ६ । २ । १४
४०४ मायाशामण् ४ । ४ । १२४
५६० मालादीनां च ६ । २ । ८८
५८ मितनखे च ३ । २ । ३४
५८३ मिश्रं चानुपस ६ । २ । १५४
४१२ मीनातेर्निगमे ७ । ३ । ८१
५८६ मुखं स्वाङ्गम् ६ । २ । १६७
३२६ मूर्तौ घनः ३ । ३ । ७७
१८ मृजेर्विभाषा ३ । १ । ११३
३५५ मृडमृदगुध १ । २ । ७
६६ मृषस्तितिक्षायाम् १ । २ । २०
६१ मेघर्तिभयेषु ३ । २ । ४३

य

१३० यजजपदशां ३ । २ । १६६
४२७ यजध्वैनमिति ७ । १ । ४३
३३२ यजयाचयत ३ । ३ । ९०
२४ यजयाचरुच ७ । ३ । ६६
४१६ यजुष्युरः ६ । १ । ११७
४५१ यजुष्येकेषाम् ८ । ३ । १०४
३८४ यजेश्च करणे २ । ३ । ६३
४६८ यज्ञकर्मण्य १ । २ । ३४
३१६ यजे समि स्तुवः ३ । ३ । ३१
४८९ यतोऽनावः ६ । १ । २१३
३६७ यथातथयोरसू ३ । ४ । २८
६११ यद्वितुपरं छन्द ८ । १ । ५६
६१५ यद्वृत्तान्नित्यम् ८ । १ । ६६

पृष्ठम् सूत्रम्

६२६ यमः समुपनिवि ३ । ३ । ६३
५८५ ययतोश्चातद ६ । २ । १५६
१३३ यश्च यङः ३ । २ । १७६
८८ यस्य विभाषा ७ । २ । १५
४४० याज्यान्तः ८ । २ । ६०
३६८ यावति विन्दजी ३ । ४ । ३०
६०४ यावद्यथाभ्यां ८ । १ । ३६
५५८ युक्तारोह्यादय ६ । २ । ८१
५५४ युक्ते च ६ । २ । ६६
२१ युग्यं च पत्रे ३ । १ । १२१
४२१ युप्लुवोर्दीर्घश्छ ६ । ४ । ५८
४५१ युष्मत्ततक्षु ८ । ३ । १०३
४८६ युष्मदस्मदो ६ । १ । २११
४३६ ये यज्ञकर्मणि ८ । २ । ८८

र

४०३ रक्षोयातूनां ४ । ४ । १२१
८४ रदाभ्यां निष्ठा ८ । २ । ४२
३२४ रश्मौ च ३ । ३ । ५३
८१ राजनि युधिकृ ३ । २ । ९५
५४० राजन्यबहुवच ६ । २ । ३४
१६ राजसूयसूर्य ३ । १ । ११४
५५२ राजा च ६ । २ । ५६
५५३ राजा च प्रशं ६ । २ । ६३
३६६ रात्रेश्चाजसौ ४ । १ । ३१
४८८ रिक्ते विभाषा ६ । १ । २०८
१०३ रुष्यमत्वर ७ । २ । २८
४०३ रेवतीजगती ४ । ४ । १२२
३४० रोगाख्यायां ३ । ३ । १०८

ल

११७ लक्षणहेत्वोः ३ । २ । १२६
६४ लक्षणे जाया ३ । २ । ५२
११६ लटः शतृशा ३ । २ । १२४
१२७ लषपतपद ३ । २ । १५४
३६३ लिङर्थे लेट् ३ । ४ । ७
३६३ लिङ्याशिष्यङ् ३ । १ । ८६
११२ लिटः कान ३ । २ । १०
४७८ लिति ६ । १ । १९३
६४ लुभो विमोहने ७ । २ । ५४
११८ लुटः सद्वा ३ । ३ । १४
३६३ लेटोऽडाटौ ३ । ४ । ९४
६१० लोट् च ८ । १ । ५२
४२७ लोपस्त आत्मने ७ । १ । ४१
६०७ लोपे विभाषा ८ । १ । ४५
३६२ ल्यपि च ६ । १ । ४१
३६१ ल्यपि लघुपूर्वात् ६ । ४ । ५६
३४५ ल्युट् च ३ । ३ । ११५
८५ ल्वादिभ्य ८ । २ । ४४

व

२५ वचोऽशब्द ७ । ३ । ६७
३५५ वञ्चिलुञ्च्यृत १ । २ । २४
२४ वञ्चेर्गतौ ७ । ३ । ६३
४०८ वत्सरान्ता ५ । १ । ६१
१४ वदः सुपि ३ । १ । १०६
५६२ वनं समासे ६ । २ । १७८
५० वयसि च ३ । २ । १०
४०५ वयस्यासु ४ । ४ । १२७
५७२ वर्यादयश्च ६ । २ । १३१
५२८ वर्णो वर्णेष्वनेते ६ । २ । ३
३६८ वर्षप्रमाण ३ । ४ । ३२
६३ वसतिक्षुधोरिट् ७ । २ । ५२

पृष्ठम् सूत्रम्

४०१ वसन्ताच्च ४ । ३ । २०
४०७ वसोः समूहे ४ । ४ । १४०
११३ वस्वेकाजाद्घ ७ । २ । ६७
३८६ वहश्च ३ । २ । ६४
५७ वहाभ्रे लिहः ३ । २ । ३२
१३ वश्यं करणं ३ । १ । १०२
१०६ वाऽऽक्रोशदैन्य ६ । ४ । ६१
६० वाचंयमपुरन्द ६ । ३ । ६९
६० वाचि यमो ३ । २ । ४०
४२३ वा छन्दसि ३ । ४ । ८८
४१४ वा छन्दसि ६ । १ । १०६
२६० वा जाते ६ । २ । १७१
१०३ वा दान्तशा ७ । २ । २७
७ वा निंसनिक्षनि ८ । ४ । ३३
५३५ वा भुवनम् ६ । २ । २०
३४६ वा यौ २ । ४ । ५७
३५९ वा ल्यपि ६ । ४ । ३८
४२१ वा षपूर्वस्य ६ । ४ । ९
२ वाऽसरूपोऽस्त्रि ३ । १ । ९४
१०९ विकुशमिपरि ८ । ३ । ९६
४४२ विचार्यमाणा ८ । २ । ९७
३९१ विजुपे छन्द ३ । २ । ७३
६९ विड्वनोरनुना ६ । ४ । ४१
९२ वित्तो भोगप्रत्य ८ । २ । ५८
१२९ विदिभिदि ३ । २ । १६२
११८ विदेः शतुर्वसुः ७ । १ । ३६
५८ विध्वरुषोस्तुदः ३ । २ । ३५
१३० विन्दुरिच्छुः ३ । २ । १६९
२० विपूयविनी ३ । १ । ११७

पृष्ठम् सूत्रम्

१३६ विप्रसंभ्यो ३ । २ । १८०
४२३ विभाषर्जोश्छ ६ । ४ । १६२
२१ विभाषा कृ ३ । १ । १२०
३४३ विभाषाख्या ३ । ३ । ११०
११६ विभाषा गम ७ । २ । ६८
४१ विभाषा ग्रहः ३ । १ । १४३
३६४ विभाषाग्रेप्रथम ३ । ४ । २४
३२४ विभाषाकि रु ३ । ३ । ५०
४७१ विभाषा छन्द १ । २ । ३६
५८८ विभाषा छन्द ६ । २ । १६४
४३४ विभाषा छन्द ७ । ४ । ४४
५८७ विभाषा तृन्न ६ । २ । १६१
५५४ विभाषाध्यक्षे ६ । २ । ६७
३६१ विभाषाऽऽपः ६ । ४ । ५७
३६२ विभाषा परे ६ । १ । ४४
४४१ विभाषा पृष्टप्रति ८ । २ । ९३
९५ विभाषा भावा ७ । २ । १७
४८५ विभाषा भाषा ६ । १ । १८१
८७ विभाषाभ्यव ६ । १ । २६
४९० विभाषा वेण्वि ६ । १ । २१५
६१० विभाषितं सोप ८ । १ । ५३
५९६ विभाषोत्पु ६ । २ । १९६
३८१ विशाखयोश्च १ । २ । ६२
३७५ विशिपतिपदि ३ । ४ । ५६
५३६ विस्पष्टादीनि ६ । २ । २४
५६९ वीरवीर्यौ ६ । २ । १२०
४११ वृकज्येष्ठाभ्यां ५ । ४ । ४१
३१५ वृक्षासनयोर्वि ८ । ३ । ९३
३१४ वृणोतेराच्छा ३ । ३ । ५४

पृष्ठम् सूत्रम्

४८७ वृषादीनां च ६ । १ । २०३
४०२ वेशन्तहिम ४ । ४ । ११२
४०६ वेशोयशआदे ४ । ४ । १३१
३६४ वैतोऽन्यत्र ३ । ४ । ९६
६१५ वैवावेति च ८ । १ । ६४
१२४ वो कषलस ३ । २ । १४३
३१८ वौ क्षुश्रुवः ३ । ३ । २५
३६५ व्यत्ययो बहु ३ । १ । ८५
३२६ व्यधजपोरनु ३ । ३ । ६१
३८३ व्यवहिताश्च १ । ४ । ८२
५८८ व्यवायिनोऽ ६ । २ । १६६
३६२ व्यश्च ६ । १ । ४३
३२० व्युपयोः शेतेः ३ । ३ । ३९
३३५ व्रजयजोर्भावे ३ । ३ । ९८
७५ व्रते ३ । २ । ८०

श

३१० शकधृषज्ञा ३ । ४ । ६५
३६८ शकि णमुल्कमु ३ । ४ । १२
११ शकिसहोश्च ३ । १ । ९९
६४ शक्तौ हस्ति ३ । २ । ५४
५१५ शतुरनुमो ६ । १ । १७३
४२१ शमिता यज्ञे ६ । ४ । ५४
१२२ शमित्यष्टाभ्यो ३ । २ । १४१
५० शमि धातोः ३ । २ । १४
१०५ शाच्छोरन्य ७ । ४ । ४१
५३१ शारदेऽनार्तवे ६ । २ । ९
५७४ शितेर्नित्या ६ । २ । १३८
५५७ शिल्पिनि चाकृञः ६ । २ । ७६
४२ शिल्पिनि ष्वुन् ३ । १ । १४५

पृष्ठम् सूत्रम्

४०७ शिवशमरि ४ । ४ । १४३
४१४ शीर्षश्छन्दसि ६ । १ । ६०
८९ शुषः कः ८ । २ । ५१
३६९ शुष्कचूर्णरूक्षेषु ३ । ४ । ३५
४८८ शुष्कधृष्टौ ६ । १ । २०६
५६८ शृङ्गमवस्था ६ । २ । ११५
१०२ शृतं पाके ६ । १ । २७
१३२ शृवन्द्योरारुः ३ । २ । १७३
४१४ शेश्छन्दसि ६ । १ । ७०
६०५ शेषे विभाषा ८ । १ । ४१
६०८ शेष विभाषा ८ । १ । ५०
४० श्याद्व्यधास्रु ३ । १ । १४१
८६ श्योऽस्पर्शे ८ । २ । ४७
५३७ श्रज्यावमक ६ । २ । २५
३१८ श्रिणीभुवोऽनु ३ । ३ । २४
४२९ श्रीग्रामण्योश्छ ७ । १ । ५६
४२३ श्रुश्शृणुपॄकृवृ ६ । ४ । १०२
९१ श्वीदितो निष्ठा ७ । २ । १४

ष

५७३ षट् च काण्डा ६ । २ । १३५
५१८ षट्त्रिचतु ६ । १ । १७९
३५९ षत्वतुकोरसिद्धः ६ । १ । ८६
५५२ षष्ठी प्रत्येनसि ६ । २ । ६०
३८१ षष्ठीयुक्तश्छन्दसि १ । ४ । ९
४५० षष्ठ्याः पतिपुत्र ८ । ३ । ५३
३५० षात्पदान्तात् ८ । ४ । ३५
३३८ षिद्भिदादिभ्यो ३ । ३ । १०४

स

३९४ स उत्तमस्य ३ । ४ । ९८

पृष्ठम् सूत्रम्

८५ संयोगादेरातो ८ । २ । ४३
५६८ सञ्ज्ञथं चाक्षा ६ । २ । १६८
६१७ सगतिरपि तिङ् ८ । १ । ६८
४०२ सगर्भसयूथ ४ । ४ । ११४
५४१ संख्या ६ । २ । ३५
५८८ संख्यायाः स्त ६ । २ । १६३
३२१ संघे चानौत्तरा ३ । ३ । ४२
३३१ संघोद्धौ गण ३ । ३ । ८६
३४२ संज्ञायाम् ३ । ३ । १०६
३७१ संज्ञायाम् ३ । ४ । ४२
५८६ संज्ञायाम् ६ । २ । १५६
३३६ संज्ञायां समज ३ । ३ । ६६
५६१ संज्ञायां गिरि ६ । २ । ६४
५५७ संज्ञायां च ६ । २ । ७७
५८० संज्ञायामना ६ । २ । १४६
४८७ संज्ञायामुपमा ६ । १ । २०४
६२ संज्ञायां भृतृ ३ । २ । ४६
५८८ संज्ञायां मित्रा ६ । २ । १६५
५६६ संज्ञौपम्ययोश्च ६ । २ । ११३
६०३ सत्यं प्रश्ने ८ । १ । ३२
६७ सत्सूद्विषद्रुहदुह ३ । २ । ६१
५३२ सदृशप्रतिरूपयोः ६ । २ । ११
४१६ सधमादस्थयो ६ । ३ । ९६
३५१ सनः क्तिचि ६ । ४ । ४५
१३० सनाशंसभिक्ष ३ । २ । १६८
४३२ सनिंससनिवां ७ । २ । ६६
४५२ सनोतेरनः ८ । ३ । १०८
४०७ सप्तनोऽञ्छन्द ५ । १ । ६१
५३६ सप्तमी सिद्धशु ६ । २ । ३२

५५३ सप्तमीहारिणौ ६ । २ । ६५
५८३ सप्तम्याः पुण्यं ६ । २ । १५२
३७३ सप्तम्यां चोपपी ३ । ४ । ४६
८२ सप्तम्यां जनेर्डः ३ । २ । ९७
५६३ सभायां नपुंसके ६ । २ । ९८
३५३ समानकर्तृकयोः ३ । ४ । २१
३०६ समानकर्तृकेषु ३ । ३ । १५८
३७३ समासत्तौ ३ । ४ । ५०
५२६ समासस्य ६ । १ । २२३
३५८ समासेऽनञ्पूर्वे ७ । १ । ३७
४८ समि ख्यः ३ । २ । ७
३१६ समि मुष्टौ ३ । ३ । ३६
३१८ समियुद्रुदुवः ३ । ३ । २३
३२७ समुदोरजः पशुषु ३ । ३ । ६९
४०३ समुद्राभ्राद्घः ४ । ४ । ११८
३६६ समूलाकृतजीवेषु ३ । ४ । ३६
४०८ संपरिपूर्वात्ख च ५ । १ । ९२
१२३ संपृचानुरुधा ३ । २ । १४२
११७ संबोधने च ३ । २ । १२५
६१ सर्वकूलाभ्रकरी ३ । २ । ४२
५६१ सर्वं गुणकार्त्स्न्ये ६ । २ । ९३
४०७ सर्वदेवात्तातिल् ४ । ४ । १४२
४८५ सर्वस्य सुपि ६ । १ । १९१
५३५ सविधसनीड ६ । २ । २३
४३७ ससूवेति निगमे ७ । ४ । ७४
४०६ सहस्रेण संमि ४ । ४ । १३५
४५२ सहेः पृतनर्ता ८ । ३ । १०९
८२ सहे च ३ । २ । ९६
४१७ साढ्यै साढ्वा ६ । ३ । ११३

पृष्ठम् सूत्रम्

४६१ सामान्यवचनं ८ । १ । ७४
५१० सावेकाचस्तृती ६ । १ । १६८
३९३ सिब्बहुलं लेटि ३ । ४ । ३४
७९ सुकर्मपापमन्त्र ३ । २ । ८९
५१४ सुखप्रिययोर्हिते ६ । २ । १५
४५२ सुञः ८ । ३ । १०७
१२० सुञो यज्ञसंयो ३ । २ । १३२
४३४ सुधितवसुधित ७ । ४ । ४५
४२५ सुपां सुलुक्पूर्व ७ । १ । ३९
४६ सुपि स्थः ३ । २ । ४
७३ सुप्यजातौ ३ । २ । ७८
४६१ सुबामन्त्रिते परा २ । १ । २
११२ सुयजोर्ङ्वनिप् ३ । २ । १०
१०५ सूत्रं प्रतिष्णातम् ८ । ३ । ९०
१२७ सूददीपदीक्षश्च ३ । २ । १५३
५८० सूपमानात्क्तः ६ । २ । १४५
१२९ सृघस्यदः कम ३ । २ । १६०
३९९ सृपितृदोः कसुन् ३ । ४ । १७
३१२ सृ स्थिरे ३ । ३ । १७
४०६ सोममर्हति यः ४ । ४ । १३७
८० सोमे सुञः ३ । २ । ९०
४३० सोमे ह्वरितः ७ । २ । ३३
५९६ सोरवक्षेपणे ६ । २ । १९५
५६८ सोर्मनसी अलो ६ । २ । ११७
५० स्तम्बकर्णयोः ३ । २ । १३
५४ स्तम्बशकृतोरि ३ । २ । २४
३३० स्तम्बे क च ३ । ३ । ८३
४५१ स्तुतस्तोमयोः ८ । ३ । १०५
८९ स्त्यः प्रपूर्वस्य ६ । १ । २३

पृष्ठम् सूत्रम्

३३३ स्त्रियां क्तिन् ३ । ३ । ९४
७२ स्थः क च ३ । २ । ७७
३३४ स्थागापापचो ३ । ३ । ९५
१३३ स्थेशभासपिस ३ । २ । १७५
४२९ स्नात्व्यादयश्च ७ । १ । ४९
३७० स्नेहने पिषः ३ । ४ । ३८
१२८ स्पृहिगृहिपति ३ । २ । १५८
९३ स्फायः स्फी ६ । १ । २२
५९५ स्फिगपूत ६ । २ । १८७
३१३ स्फुरतिस्फुलत्योः ६ । १ । ४७
३१४ स्यदो जवे ६ । ४ । २८
४१८ स्यश्छन्दसि ६ । १ । १३३
४०२ स्रोतसो विभा ४ । ४ । ११३
५३४ स्वं स्वामिनि ६ । २ । १७
४४९ स्वतवान्पायौ ८ । ३ । ११
३२६ स्वनहसोर्वा ३ । ३ । ६२
४७७ स्वपादिर्हिंसा ६ । १ । १८८
१३२ स्वपितृषोर्नजि ३ । २ । १७२
३३२ स्वपो नन् ३ । ३ । ९१
४४४ स्वरितमाम्रेडि ८ । २ । १०३
४७४ स्वरितात्संहिता १ । २ । ३९
४६५ स्वरितो वानुदात्ते ८ । २ । ६
३७७ स्वाङ्गे तस्प्रत्यये ३ । ४ । ६१
३७४ स्वाङ्गेऽध्रुवे ३ । ४ । ५४
३६५ स्वादुमि णमुल् ३ । ४ । २६
३७० स्वे पुषः ३ । ४ । ४०

ह

३२९ हनश्च वधः ३ । ३ । ७६
१५ हनस्त च ३ । १ । १०८

पृष्ठम् सूत्रम्

६११ हन्त च ८ । १ । ५४
४६ हरतेरनुद्यमनेऽच् ३ । २ । ९
५५ हरतेर्दृतिनाथयोः ३ । २ । २५
६४७ हलश्च ३ । ३ । १२१
६ हलश्चेजुपधात् ८ । ४ । ३१
१३७ हलसूकरयोः ३ । २ । १८३
३८६ हव्येऽनन्तःपादं ३ । २ । ६६
४३ हश्च व्रीहि ३ । १ । १४८
३२० हस्तादाने चेर ३ । ३ । ४०
३७० हस्ते वर्तिग्रहोः ३ । ४ । ३९
३७३ हिंसार्थानां च ३ । ४ । ४८
६०३ हि च ८ । १ । ३४
५५१ हिरण्यपरिमाणं ६ । २ । ५५
१०४ हृषेर्लोमसु ७ । २ । २९
६१४ हेति क्षियायाम् ८ । १ । ६०
३८५ हेमन्तशिशिरा २ । ४ । २८
४०१ हेमन्ताच्च ४ । ३ । २१
५१६ ह्रस्वनुड्भ्यां ६ । १ । १७६
१५ ह्रस्वस्य पिति ६ । १ । ७१
४०८ ह्रस्वाच्चन्द्रोत्तर ६ । १ । १५१
५६१ ह्रस्वान्तेऽन्त्या ६ । २ । १७४
४३० ह्रु ह्वरेश्छन्दसि ७ । २ । ३१
१०५ ह्लादो निष्ठायाम् ६ । ४ । ९५
३२८ ह्वः संप्रसारणं च ३ । ३ । ७२
४५ ह्वावामश्च ३ । २ । २

कृदन्तप्रभृति समाप्तिपर्यन्तायाः कौमुद्याः वार्तिकसूचिका

वार्तिकम्	सूत्राङ्काः
अ	
अक्षरसमूहे छन्दस	३४८६
अग्रग्रामाभ्यां नयतेर्णो	२९७५
अजेः क्यपि वीभावो	३२७६
अतद्धित इति	३६५२
अतेर्धातुलोप इति	३९२५
अनव्ययीभावस्य त्विष्य	३६५६
अनुपसर्ग इति	३७८१
अन्यत्रापि दृश्यत	२९६५
अपादाने स्त्रियामुप	३१९१
अमुष्येत्यन्तः	३६६६
अवहाराधारा	३३०१
अव्ययानां,च	३६५६
अव्ययीभावस्य	,,
अव्यये नञ्कु	३७३६
असावित्यन्तः	३६६६
असि अकेऽने च	२९०७
आ	
आख्याजयारामुप	३५६१
आङ्पूर्वस्या	३०७२
आङ्पूर्वादञ्जेः	२८५८
आदिकर्मणि निष्ठा	३०५२
आद्युदात्त	३८२५
आमन्त्रिते छन्दसि	३६२६
आविष्ट्यस्योप	३४४९
आशासः कौ	२९८४
इ	
इकृष्यादिभ्यः	३२८५

वार्तिकम्	सूत्राङ्काः
इक्श्तिपौ धातुनिर्देशे	३२८५
इग्विपादिभ्यः	,,
इणजादिभ्यः	,,
इन्धेश्छन्दोविषयत्वा	३३६३
इयाडियाजीकाराणामुप	३५६१
इषेरनिच्छार्थस्य	३२८४
ई	
ईच्चित्तमिभ्यां	२६१३
ईद्धिनः	३६०२
ईषा अक्षादीनां	३५२५
उ	
उत्तानादिषु	२६२६
उत्फुल्लसंफुल्ल	३०३७
उभयसंज्ञान्य	३३६०
उरसो लोपश्च	२६६५
ऊ	
ऊ च गमादीनामिति	२६८६
ऊपधाग्रहणं	३७१७
ऊर्णोतेर्नुवद्भावो	३०१५
ऋ	
ऋचि त्रेरुत्तरपदादि	३५१०
ऋत्व्यादिभ्यः	३२७२
ऋषिप्रतिषेधो	३८६६
ए	
एमन्नादिषु छन्दसि	३५१६
एरजधिकारे	३४१६
क	
कप्रकरणे मूल	२६१६
कर्तृकर्मणोश्च्व्यर्थे	३३०८

वार्तिकम्	सूत्राङ्काः
कर्मणि शमि च	२६६६
कविधौ सर्वत्र	२६१५
किंयत्तद्बहुषु कृञो	२६३५
कुत्सितग्रहणं	३००३
केलिमर उपसंख्यानम्	२८३४
क्रमेः कर्तर्यात्मनेपद	२८६५
क्विब्वचिप्रच्छ्यायतस्तु	३१५८
क्सोऽपि वाच्यः	२६७४
ख	
खश्च डिद्वा वाच्यः	२६५३
खनेर्डडरेकेकवका	३३०४
ख्शाञः शस्य	२८४०
ग	
गतिग्रहणे	३६१५
गमादीनामिति	२६८६
गमेः सुपि वाच्यः	२६५३
गवादिषु विन्देः	२६००
गिरौ डश्छन्दसि	२६२०
गुग्गुलुमधु	३४४६
घञर्थे कविधानम्	३२३४
घटीखारीखरी	२६४५
घट्टिवन्दिविदि	३२८४
घ्रः संज्ञायां न	२८६६
च	
चरिचलिपतिवदीनाम्	१८६६
चेराङ्कि चागुरौ	२८४८
चायतेः क्विनि	३२७२
चारौ वा	२६६६

वार्तिकम्	सूत्राङ्काः
चितः सप्रकृते	३७१०
चेलराज्य	३८६४
छ	
छन्दसि क्रियाम्	३५२८
छन्दसीति वक्त	२८६६
छन्दसीवनिपौ	३४६८
छन्दस्यघशब्दा	३४१६
छन्दोविन्प्रकरणे	३४६८
ज	
जसादिषु छन्दसि वा	३५८६
जागर्तेरकारो	३२७८
जुहोतेर्दीर्घश्च	३१५८
झ	
झलादाविति	३३३०
ड	
डे च विहायसो	२६६५
ण	
णयत्प्रकरणे त्यजे	२८८२
णयत्प्रकरणे लपि	२८८५
णयन्तभादीनामुप	२८४०
त	
तकिशसिचति	२८४३
तनोतेरुपसंख्यानम्	२६०२
तन्वादीनां छन्दसि	३५४८
तमधीष्टो	३७६३
तितुत्रेष्वग्रहादीनाम्	३२८०
तेन तत्र न भवेद्विनियम्यम्	२८४८
त्यजेश्च	२८८२
द	
दंशेश्छन्दस्युप	३११६

वार्तिकम्	सूत्राङ्काः
दारजारौ कर्तरि	३१६०
दुग्वोर्दीर्घश्च	३०१८
दृशेश्च	३०६६
द्युतिगमिजुहो	३१५८
द्विगोर्यप्	३७६३
द्वित्वप्रकरणे	३२३४
ध	
धात्वर्थनिर्देशे	३२८५
ध्यायतेः संप्रसा	३१९८
न	
नभोऽङ्गिरो मनुषां	३३८६
निमिमीलियां	३३०५
निर्विण्णस्योपसं	२८३५
निष्ठादेशः षत्व	३०२५
निष्ठायामनिट इति	२८६३
निष्ठायां सेट इति	३२८०
नृतिखनिरञ्जिभ्यः	२६०७
नौ लिम्पेर्वाच्यः	२६००
प	
पण्यकम्बलः	३७७६
परादिश्च परान्तश्च	३६३३
परिचर्यापरि	३२७८
परेर्वा	३२८४
पाटेर्णिलुक्चोक्च	२८६६
पाणौ सृजेर्ण्यद्वाच्यः	२८७४
पार्श्वादिषूप	२६२६
पावकादीनां छन्दसि	३५८३
पिबतेः सुराशीध्वोरिति	२६२२
पूञ एवेह	२८४०

वार्तिकम्	सूत्राङ्काः
पूञो विनाशे	३०१८
पुतिधानुबन्ध	३६७९
पूर्वाह्णच्चेति	३९५९
प्रमाणे लो	३७४९
प्रशान्ताभिपूजित	३९२९
ब	
बहुलं छन्दसीति	३५८९
ब्रह्मणि वदः	२६८८
भ	
भगे च दारेः	२६५८
भयादीनामुप	३२३१
भाषायां धाञ्कृ	३१५१
भाषायां शासि	३३०६
भूरिदावस्तुट्	३९०२
म	
मलोपश्च	३६७४
माङ्याक्रोशे	३३०१
मासश्छन्दसीति	३४६४
मितद्र्वादिभ्यः	३१९०
मुद्गलाच्छन्दसि	३४४७
य	
युष्मदस्मदोः	३४६१
र	
रयेर्मतौ बहुलम्	३५१०
राजश्च उपसं	२६७२
रादिफः	३२८५
व	
वन उपसंख्यानम्	३९२६
वर्णात्कारः	३२८५

वार्तिकम्	सूत्राङ्काः
वसिरण्योरुप	३२३४
वसेस्तव्यत्कर्तरि	२८१४
वातशुनीतिल	२६४२
वा नामधेयस्य	३९९९
वा बह्वर्थमनु	३६७९
वालमूललघ्व (उ. सू.)	२६
विधीन्धिखिदि	३७३०
विंशतेश्चेति	३४६१
विस्मितप्रति	३०७०
विहायसो विह	२६५३
वृजेरिति	३७७९
वृषण्वस्वश्वयोः	३३८६
व्याधिमत्स्यबलेषु	३१८३
व्रीहिवत्सयोरिति	२६३८
श	
शकिम्लाम्ला	२६२३
शल्बकरयोभ्यः	३०५९
शंसिदुहिगुहि	२८५८
शीङो वाच्यः	३१३८
शॄ वायुवर्णे	३१६१
श्रदन्तरोरुप	३३८३
श्रूयजीषिस्तुभ्यः	३२७२
श्वेतवहादीनां	३४१४
ष	
षष्ठ्यर्थे चतुर्थीति	३३६९
षष्ठ्यामन्त्रित	३९५९
स	
संपदादिभ्यः	३२७२
सति शिष्टस्वर	३९५०

वार्तिकम्	सूत्राङ्काः	वार्तिकम्	सूत्राङ्काः
समवपूर्वाच्च	२८७४	स्तने धेटो	२९४४
समस्य बहुलम्	२८६१	स्यान्तस्योपोत्तमं च	३६६६
समानान्ययोश्चेति	२९७४	स्ववःस्वतवसो	३५९४
सर्वत्रपत्रयोरुप	२९६५	ह	
साधुकारिण्युप	२९८८	हनो वा वध्व	२८४३
सासहिवावहि	३१५१	हन्तेर्घत्वं च	२८९६
सिनोतेर्ग्रासकर्म	३०१८	हस्तिसूचकयोरिति	२९२७
सुखुरोरधिकरणे	२९६५	हिरण्य इति	३४०७
सूत्रे च धार्येऽर्थे	२९२३	ह्वमहोर्भश्छ	३४३२
सोपसर्गस्य न	३०७२	हृदय्या आप उप	३५१७

कृदन्तप्रभृति समासिपर्यन्तायाः कौमुद्याः परिभाषासूचिका

परिभाषा	सूत्राङ्काः	परिभाषा	सूत्राङ्काः
५५ अन्तरङ्गानपि विधीन्	३३३४	८ नानुबन्धकृतमसारूप्यम्	२८४४
८४ तदनुबन्धकग्रहणे	२८६१		

अथ उणादिसूत्रसूचिका

सूत्राङ्काः सूत्रम्	सूत्राङ्काः सूत्रम्	सूत्राङ्काः सूत्रम्
७६ अगारे णिच	३१८ अजिवृरीभ्यो नि	६७९ अदि भुवो डुतच्
५५१ अग्नयादयश्च	२०६ अजेरज च	५०५ अदिशदिभूशु
६७५ अङ्गतेरखिरिच	५७० अज्यतिभ्यां च	५५५ अदेर्ध च
४१४ अग्निमदिमन्दि	५०१ अञ्जेः को वा	६४५ अदेर्नुम्धौ च
४९० अग्नेर्नलोपश्च	६५५ अञ्च्वजियुजि	२६२ अदेर्मुट् च
५७८ अच इः	३६९ अजिघृसिभ्यः	५०८ अदेर्मिनिश्च
७०९ अच् तस्य जग्ग	८ अणश्च	४५७ अनिहृषिभ्यां
३४१ अजियमिशीङ्	८६ अणो डश्च	३३२ अनुङ् नदेश्च
३२७ अजियुधूनीभ्यो	१२६ अण्डन्कृसृभृवृञ	९३ अन्दूदृम्भूजम्बू
५३ अजिरशिशिरशि	३९७ अत्यविचमितमि	६४४ अभे च

सूत्राङ्काः सूत्रम्

५४५ अन्येभ्योऽपि दृ
२५ अपदुःसुषु स्थः
५३८ अब्दादयश्च
६०३ अभिचिमिदिश
१७५ अमितम्योर्दीर्घ
३८५ अमिनक्षियजिव
४९९ अमेरतिः
४६ अमेर्दीर्घश्च
६१३ अमेर्द्विषति चित्
६५२ अमेर्हुक्च
७३८ अमेस्तुट् च
६९९ अमेस्सन्
४६५ अम्बरीषः
२६५ अर्चिशुचिहुसृ
२७ अर्जिदृशिकम्यमि
४६८ अर्जेर्ऋज च
३३८ अर्जेर्णिलुक्
४१२ अर्तिकमिभ्रमि
४३२ अर्तिगृभ्यां भन्
२७४ अर्तिपृवपियजि
२५६ अर्तिसृधृधम्य
१३७ अर्तिस्तुसुहु
२०६ अर्तेः किदिच्च
६६५ अर्तेः क्युरुच्च
५१६ अर्तेररुः
६३४ अर्तेरुच्च
४८४ अर्तेरूच्च
१४५ अर्तेर्गुणः शुट् च
३८२ अर्तेर्निच्च

सूत्राङ्काः सूत्रम्

१६५ अर्तेर्निरि
३४ अर्तेश्च
६८५ अर्तेश्च
७१ अर्तेश्च तुः
१७५ अर्देर्दीर्घश्च
७३१ अर्भकपृथुक
४६५ अलीकादयश्च
११६ अवतेष्टिलोपश्च
७३२ अवद्यावमाधमा
४३८ अवितृस्तृतन्त्रि
४२ अविमह्योष्टिषच्
१४१ अविसिविसिशु
१६० अवे भृञः
६१२ अशित्रादिभ्य
५७२ अशिपणाय्यो
५८६ अशिशकिभ्यां
१४६ अशूप्रुषिलटिक
३५० अशेः सरः
२३३ अशेरश च
५२ अशेर्णित्
३४५ अशेर्देवने
६३० अशेर्देवने युः
४३६ अशेर्णित्
३३७ अशेर्लशश्च
४८६ अश्नोते रश्च
७३५ अश्नोतेराशु
७०७ अश्नादयश्च
४३४ असिसञ्जिभ्यां
४२ असेरुन्

सूत्राङ्काः सूत्रम्

४४७ आङि णित्
२०३ आङि पणिपनि
२६० आङि शुषेः सन
५७७ आङि श्रिहनिभ्यां
३३ आङ्परयोः खनि
३६३ आणको लूधू
८० आतृकन्वृद्धिश्च
३६२ आनकः शीङ्भि
६४७ आपः कर्माख्या
७४ आप्नोतेर्ह्रस्वश्च
२१७ आप्नोतेर्ह्रस्वश्च
६१४ आः समिण्निक
५५६ इगुपधात् कित्
६३७ इण आगसि
६५१ इण ॰ाणोऽपरा
६६१ इण आसिः
४३३ इणः कित्
४२६ इणस्तशन्तशसु
३२३ इणभीकापाश
१५० इणशीभ्यां वन्
२८२ इणसिञ्जिदीङुष्य
५६६ इन्देः कमिर्नलो
५१ इषिमदिमुदिखि
१४२ इषियुधीन्धिदसि
४३७ इषेः क्सुः
४२८ इष्यशिभ्यां तक
१३ ईषेः किच्च
४६१ ईषेः किद्ध्रस्वश्च
१९७ उदके च

सूत्राङ्काः सूत्रम्

६४३ उदके थुट् च
६३६ उदके नुट् च
६४६ उदके नुम्भौ च
६६० उदि चेर्डैसिः
६६७ उदि दृणातेर
५२८ उधर्तेश्चित्
३४८ उन्दिगुधिकुषि
१२ उन्देरिच्चादेः
२३४ उन्देर्नलोपश्च
३६६ उपसर्गे वसेः
६३१ उब्जेर्बले बलो
४८१ उलूकादयश्च
५३५ उल्बादयश्च
३६४ उल्मुकदर्विहोमि
६७३ उषः कित्
४२२ उषिकुटिदलिक
१६१ उषिकुषिगर्ति
६०१ उषिखनिभ्यां
७१८ ऊर्जि दृणाते
७२५ ऊर्णोतेर्डः
३० ऊर्णोतेर्नुलोपश्च
४११ ऋच्छेररः
७२६ ऋजेः कीकन्
४६२ ऋजेश्च
१८६ ऋज्रेन्द्राग्रवज्र
२४४ ऋञ्जिवृधिमन्दि
४४२ ऋतन्यञ्जिवन्य
६२ ऋतेरम्च
४०३ ऋषिवृषिभ्यां

सूत्राङ्काः सूत्रम्

३४७ ऋषेर्जातौ
५१३ ऋहनिभ्यामूष
२७५ एतेर्णिच्च
१३० एतेस्तुट् च
७८ एधिवह्योश्चतुः
४१७ कञ्जिमृजिभ्यां
३५७ कटिकुषिभ्यां
६४ कठिचकिभ्यामो
१०३ कणेष्ठः
५२३ कदेर्णित्पच्छिणि
१५४ कनिन्युवृषित
३३१ कन्युच्क्षिपेश्च
४२४ कपश्याकवर्मण
६६ कपिगडिगण्डि
६२ कबेरोतच्पश्च
७२ कमिमनिजनि
४१८ कमेः किदुच्चोप
५५ कमेः पश्च
१०० कमेरठः
४४५ कर्लश्च
१०४ कलस्तृपश्च
५२४ कलिकर्द्योरमः
७०४ कलिगलिभ्यां
४७२ कशेर्मुट् च
४५६ कषिदूषिभ्यामी
८४ कषेश्छश्च
५६७ कायतेर्डिमिः
५० किलेर्बुक् च
६५ किशोरादयश्च

सूत्राङ्काः सूत्रम्

४ किंजरयोः श्रिणः
५२० कुटः किच्च
५८३ कुडिकम्प्योर्न
६२६ कुडिकुषिभ्यां
५२५ कुणिपुल्योः कि
५२६ कुपेर्वा वश्च
५६ कुम्बेर्नलोपश्च
३०७ कुयुभ्यां च
२२ कुर्भ्रश्च
४१३ कुवः करन्
५३१ कुवश्चट् दीर्घश्च
६२७ कुषेर्लश्च
५४६ कुसेरुम्भोमेदे
५२२ कृकदिकडिक
६ कृके वचः कश्च
२४ कृग्रोरुच्च
४७३ कृञ उच्च
५६८ कृञः उदीचां
७७ कृञः कतुः
७२३ कृञः पासः
७१३ कृञादिभ्यः सं
४२७ कृतिभिदिलति
१६ कृतेराद्यन्तवि
३८६ कृतेर्नुम् च
१७८ कृतेश्छः कूच
२६७ कृत्यशूभ्यां
७१६ कृदरादयश्च
३२० कृदाधाराचिक
३५३ कृधूमदिभ्यः

सूत्राङ्काः सूत्रम्

१ कृवापाजिमिस्व
४६६ कृविघृष्विछवि
८१ कृषिचमितनि
२६१ कृषेरादेश्च
२८४ कृषेर्वर्णे
१९६ कृषेर्वृद्धिश्चोदी
५६६ कृषेर्वृद्धिश्छन्द
३१० कृहनिभ्यां
१५८ कृहृभ्यामेणुः
१५३ कृगृशृदृभ्यो वः
५८२ कृगृशृपृकुटि
२७९ कृगृशृवृञ्चतिभ्यः
६२४ कृतृकृपिभ्यः
४६६ कृतृभ्यामीषन्
२३९ कृपृवृजिमन्दि
२९० कृपृजृसिद्रुपन्य
३१३ कृदारिभ्यः
४७० कृशपृकटिपटि
४०२ कृशृशलिकलि
८८ के श्र एरक्
५५४ कोररन्
७२१ क्रमिगमिक्षमि
५६१ क्रमितमिशति
२०२ क्रिय इकन्
७११ क्लिशेरन्लो लो
७३४ क्लिशेरीच्चोप
४२३ क्वणेः संप्रसारणं
११२ क्वादिभ्यः कित्
२१५ क्विब्वचिप्रच्छि

सूत्राङ्काः सूत्रम्

१५० क्नुशिल्पिसंज्ञ
७४३ क्षमेरुपधालोप
२६४ क्षिपेः किच्च
३३५ क्षुधिपिशिमिथि
४५३ खजेराकः
५७६ खनिकष्यज्य
२६ खरुशङ्कुपीयु
५३० खर्जिपिञ्जादिभ्यः
३९२ खलतिः
३०८ खष्पशिल्पशष्प
४१५ गडेः कड च
३८६ गडेरादेश्च कः
५१८ गडेश्च
१२४ गण्शकुनौ
६६६ गतिकारकोप
१२० गन्गम्यद्योः
४७५ गभीरगम्भीरौ
६०८ गमेरा च
४४६ गमेरिनिः
२३९ गमेर्गश्च
२२५ गमेर्डोः
३११ गमेः सन्वच्च
२१२ गर्वेरत उच्च
१६७ गश्चोदि
२८६ गादाभ्यामिष्णु
५६५ गिर उडच्
६०६ गुधृवीपचिवचि
६८० गुधेरूमः
५६ गुपादिभ्यः कित्

सूत्राङ्काः सूत्रम्

३४६ गृधिपण्योर्दकौ
१४० ग्रसेरा च
७४५ ग्रहेरनिः
१४७ ग्रीष्मः
९५ ग्रो मुट् च
२२८ ग्लानुदिभ्यां डौः
१४६ घर्मः
४७४ घसेः किच्च
४९२ घृणिपृश्निपार्ष्णि
१७१ चकिरम्योरुच्चो
२७६ चक्षेः शिच्च
६७२ चक्षेर्बहुलं शिच्च
४५८ चड्डणः कड्डणश्च
७३६ चतेरुरन्
६५८ चन्देरादेश्च छः
६६७ चन्द्रे मो डित्
६११ चरेर्वृत्ते
७८७ चरेश्च
७३ चायः किः
६३६ चायतेरन्ने ह्रस्व
२२० चिक् च
६१५ चितेः कणः कश्च
७१४ चीकयतेराद्य
१०८ चुपेरच्चोपधायाः
३०४ च्युवः किच्च
२२३ च्छित्वरच्छयम्
२ छन्दसीणः
२४३ छन्दस्यसानच्
१२१ छापूखडिभ्यः

सूत्राङ्काः सूत्रम्

२८१ छित्वरछत्वरधी
११० छो गुग्घ्रस्वश्च
५४२ जञ्वादयश्च
५३९ जनिघसिभ्यामि
५४४ जनिदाच्युसृवृम
५८८ जनिमृङ्भ्यामि
७१६ जनेररष्ठ च
२७२ जनेरुसिः
५५० जनेर्यक्
७०८ जनेष्टन् लोपश्च
७२४ जनेस्तु रश्च
२३१ जसिसहोरुरिन्
१९२ जहातेर्द्वे च
३१६ जहातेर्द्वेऽन्तलो
१३८ जहातेः सन्वदा
७२७ जीर्यतेः क्रिनश्च
७९ जीवेरातुः
४०६ जृविशिभ्यां झच्
१६३ जॄवृभ्यामूथन्
४९४ जॄशॄस्तॄजागृभ्यः
३७१ जमूट् चोदात्तः
१८१ जोरी च
१११ झमन्ताड्डः
६९८ ञित्वनेर्मुट् स
८२ णित्कसिपद्यर्तेः
३६८ तनिमृङ्भ्यां
२२१ तनोतेरनश्च वः
७३० तनोतेर्डउः स
३५५ तन्यृषिभ्यां

सूत्राङ्काः सूत्रम्

११५ तमिविशिवि
७४४ तरतेर्ड्रिः
११७ तरत्यादिभ्यश्च
२११ तलिपुलिभ्यां
४८ तवेर्णिद्वा
९८ ताडेर्णिलुक्च
२९८ तिजेर्दीर्घश्च
१६९ तिथपृष्ठगूथ
४१९ तुषारादयश्च
३३९ तृणाख्यायां
२५० तृन्तृचौ शंसि
२९२ तृषिशुषिरसि
६८६ तृहेः क्नो हलो
४०८ तृभूवहिवसि
१२९ त्यजितनियजि
८९ त्रो दुट् च
५ त्रो रश्च लः
३३४ त्रो रश्च लो वा
७२६ दधातेर्यन्नुट्
६७४ दमेरुनसिः
२२७ दमेर्डोसिः
९० दरिद्रातेर्यालो
४८७ दलिमः
६८९ दंशेश्च
६८८ दंसेष्टटनौ
७३९ दंहोर्गो लोपो
६०९ दादिभ्यश्च
३१२ दाभाभ्यां नुः
३७७ दिधिषाय्यः

सूत्राङ्काः सूत्रम्

४०१ दिवः कित्
२२६ दिवेर्ऋः
६०० दिवेर्द्युच्
४९५ दिवो द्वे दी
४२० दीङो नुट् च
३७० दुतनिभ्यां
१७७ दुरीणो लोपश्च
१२८ दृणातेः पुग्घ्र
६२३ दृणातेर्ह्रस्वश्च
३ दृसनिजनिच
४३१ दृदलिभ्यां भः
६५४ देशे ह च
२६७ द्युतेरिसिन्नादेश्च
२०८ द्रुदक्षिभ्यामि
९ धान्ये नित्
२८६ धापवस्यज्य
२९० धृषेर्धिष् च
२९१ धेट इच्च
३१४ धेट इच्च
१९३ ध्मो धम च
५५४ ध्याप्योः संप्र
२५५ नभि च नन्देः
१२६ नञि जहातेः
८७ नञि लम्बेर्न
४९ नञि व्यथेः
६६३ नञि हन एह
३६७ नञ्याप इट्
२५२ नप्तृनेष्टृत्वष्टृ
२५७ नयतेर्डिच्च

सूत्राङ्काः सूत्रम्

६५० नहेर्दिवि भश्च
७०१ नेहद्वलोपश्च
५६५ नहो भश्च
५६० नामन्सीमन्व्यो
१७ नावञ्चेः
१७४ निन्देर्नलोपश्च
४८३ नियो मिः
१६६ निशीथगोपीथा
६६५ नुवो धुट् च
६१ नृतिशृध्योः
६६१ नौ दीर्घश्च
५७५ नौ व्यो यलो
५२७ नौ षञ्जेर्घथिन्
३२५ नौ सदेर्डिच्च
२८० नौ सदेः
३२४ नौ हः
७० पः किच्च
४७७ पच एलिमच्
१८८ पचिनशोर्णु
७१५ पचिमच्योरि
६५६ पचिवच्चिभ्यां
२२८ पणेरिज्यादश्च
४५२ पतस्थ च
५८ पतिकठिकुठि
१६४ पतिचण्डिभ्या
११६ पतेरञ्चपक्षिणि
५०६ पतेरत्रिन
३५४ पते रश्च लः
६२२ पदिप्रथिभ्यां

सूत्राङ्काः सूत्रम्

३६६ पयसि च
४५० परमे कित्
२१७ परौ व्रजेः षः
३८३ पर्जन्यः
३६० पर्देर्निस्संप्रसार
१६४ पातृतुदिवदि
६८३ पातेरतिः
४६७ पातेर्डतिः
३१७ पातेर्डुम्सुन्
६४२ पातेर्बले जुट्
५७१ पादे च
३०३ पानीविषिभ्यः
१३३ पारयतेरजिः
४५५ पिनाकादयश्च
२७१ पिबतेस्थुक्
३७५ पिशेः किच्च
५१६ पीयेरूषन्
५१४ पुरः कुषन्
६७० पुरसि च
६७१ पुरूरवाः
६०४ पुवो ह्रस्वश्च
४४४ पुषः कित्
६६३ पूञो यण्णुग्घ्र
३६१ पृषिरञ्जिभ्या
५१५ पृनहिकालिभ्य
२३ पृभिदिव्यधि
५५६ प्र ईरशदोस्तुट्
२८ प्रथिम्रदिभ्रस्जां
७४६ प्रथेरमच्

सूत्राङ्काः सूत्रम्

१३४ प्रथेः कित्संप्रसा
१४८ प्रथेः षिवन्संप्र
१६६ प्राङ्कि पणिकषः
७३७ प्राततेररन्
३२६ प्रीयुक्रणिभ्या
४४६ प्रे स्थः
५७४ प्रे हरतेः कूपे
४३५ प्लुषिकुषिशुषि
३४३ प्लुषेरच्चोपधायाः
४६० फर्फरीकादयश्च
१८ फलिपाटिनमि
७१२ फलेरितजादेश्च
३३६ फलेर्गुक् च
२८३ फेनमीनौ
२८५ बन्धेर्ब्रधिबुधी
४५४ बलाकादयश्च
१८० बहुलमन्यत्रापि
१६५ बहुलमन्यत्रापि
२०७ बहुलमन्यत्रापि
२३६ बहुलमन्यत्रापि
२५१ बहुलमन्यत्रापि
२७८ बहुलमन्यत्रापि
११८ बिडादिभ्यः
२६६ बृंहेर्नलोपश्च
५८५ बृंहेर्नोऽच्च
४१० भन्देर्नलोपश्च
६३ भातेर्डवतुः
१८६ भियः क्रुकन्
१३५ भियः षुग्ह्रस्वश्च

सूत्राङ्काः सूत्रम्

१४५ भियः षुग्वा
३०१ भुजिमृङ्भ्यां
५८१ भुजः किच्च
४४८ भुवश्च
२६६ भुवः कित्
४८५ भुवः कित्
३३० भुवो झिच्
६५६ भूरञ्जिभ्यां कित्
६३० भूवादिगृभ्यो
२३८ भूसूधूभ्रस्जि
२३० भृञ ऊच्च
१२२ भृञः किन्नुट् च
३६४ भृञश्चित्
३६० भृमृदृशियजिप
७ भृमृशीतृचरि
२२६ भ्रमेश्च डूः
५६० भ्रमेः संप्रसारणं
५६६ भ्रस्जिगमिनमि
७४८ मङ्गेरलच्
४१ मद्गुरादयश्च
५६२ मनेरुच्च
३४४ मनेर्दीर्घश्च
२७३ मनेर्धश्छन्दसि
४५१ मन्थः
३८ मन्दिवाशिमथि
७२८ मव्यतेर्यलोपो
६८१ मसेरूरन्
४३ मसेश्च
५१७ मस्जेर्नुम् च

सूत्राङ्काः सूत्रम्

३१ महति ह्रस्वश्च
२१४ महेरिनण्च
७०३ माङ ऊखो मय्
५४६ माछाससिभ्यो
५७ मिथिलादयश्च
५६१ मिथुने मनिः
६६२ मिथुनेऽसिः
५४१ मिपिभ्यां रुः
६७ मीनातेरूरन्
४० मुकुरदर्दुरौ
१२५ मुदिग्रोर्गग्गौ
२०० मुषेर्दीर्घश्च
२७७ मुहेः किच्च
७०० मुहेः खो मूच
६१ मूलेरादयः
५४८ मूशकयविभ्यः
५१० मृकणिभ्यामी
४७६ मृकणिभ्यामूको
३७ मृगय्वादयश्च
६४ मृग्रोरुतिः
८२ मृजेर्गुणश्च
१०७ मृजेष्टिलोपश्च
४६४ मृडः कीकच्क
३०० यजिमनिशुन्धि
२५५ यतेर्वृद्धिश्च
४३६ यापोः किद्द्वे च
१४३ युजिरुचितिजां
२४७ युधिबुधिदृशि
१३६ युष्यसिभ्यां

सूत्राङ्काः सूत्रम्

२१ यो द्वे च
२३७ रञ्जेः क्युन्
६२६ रपेरत एच्च
२६ रपरिश्चोपधायाः
१६१ रमे रश्च लो वा
५०३ रमेर्नित्
१०१ रमेर्वृद्धिश्च
६५३ रमेश्च
२६४ रमेस्त च
३८० राजेरन्यः
२२४ रातेर्डैः
५०७ राशदिभ्यां
४०५ राशिवल्लिभ्यां च
२६५ रास्नासास्नास्थू
६३८ रिचेर्धने घिच्च
६१८ रुचिभुजिभ्यां
६२५ रुचिवचिकुचि
३६५ रुदिविदिभ्यां
५४३ रुशातिभ्यां कुन्
४०४ रुषेर्निल्लुष् च
४०७ रुहिनन्दिजीवि
३७४ रुहे रश्च लो वा
४७ रुहेर्वृद्धिश्च
२१३ रुहेश्च
६४८ रूपे जुट् च
१७६ रोदेर्णिलुक् च
२८७ लङ्घेरट् च
४४० लङ्घेर्मुट् च
२६ लङ्घिबंह्योर्नलोप

सूत्राङ्काः सूत्रम्

१३२ लङ्केर्नलोपश्च
७११ लीरीकोर्हस्वः
३७२ लोष्टपलितौ
५०६ वङ्क्र्यादयश्च
७१७ वचिमनिभ्यां
२१९ वञ्चेर्गश्च
३८४ वदेरान्यः
२८८ वनेरिच्चोप
४०० वयश्च
६६८ वयसि धाञः
५६३ वर्णेर्बलिश्चा
२४१ वर्तमाने पृषद्
५३९ वलिमलितनि
४८० वलेरूकः
१९ वलेर्गुक् च
६७८ वशेः कनसिः
२२९ वशेः कित्
४७१ वशेः कित्
५६४ वसिवपियजि
६५७ वसेर्णित्
३५१ वसेश्च
६१९ वसेस्तिः
७९ वसेस्तुन्
२६८ वसौ रुचेः
३९९ वहियुभ्यां णित्
५०० वहिवस्यर्तिभ्या
४९१ वहिश्रिश्रुयुद्रुग्ल
६६० वहिहाधाञ्भ्यः
८१ वहो धश्च

सूत्राङ्काः सूत्रम्

४४१ वातप्रमीः
५७३ वातेर्डिच्च
६८४ वातेर्नित्
१८४ वाविन्धेः
४२५ विटपपिष्टपविशि
६७७ विदिभुजिभ्यां
६६४ विधाञो वेध च
४७६ विषाविहा
३१९ विषेः किच्च
४८८ वीज्याज्वरिभ्यो
४३० वीपतिभ्यां तनन्
६४० वृङ्शीङ्भ्यां
२०२ वृजेः किच्च
३७८ वृञ एण्यः
३८७ वृञश्चित्
६८७ वृन्लुटितनि
३५९ वृतेर्द्विश्च
२६३ वृतेश्च
५८० वृतेश्छन्दसि
४२६ वृतेस्तिकन्
४९३ वृदृभ्यां विन्
१८५ वृधिवपिभ्यां रन्
१९८ वृश्चिकृष्योः कि
१०६ वृषादिभ्यश्चित्
५४० वृहोः षुग्दुकौ च
३४२ वृतॄवदिहनिक
५८९ वेञः सर्वत्र
३९८ वेञस्तुट् च
५१२ वेञो डिच्च

सूत्राङ्काः सूत्रम्

२१० वेपितुह्योर्हस्व
१७२ वौ कसेः
६२१ वौ तसेः
३९ व्यथेः संप्रसार
७४१ व्याङि घ्रातेश्च
६३५ व्याधौ शुट् च
२० शः कित्सन्वच्च
५२१ शकादिभ्योऽटन्
१०९ शकिशम्योर्नित्
३२९ शकेरुनोन्तोन्त्यु
४९८ शकेर्ऋतिन्
३५ शते च
६० शदेस्त च
१०५ शपेर्वश्च
९९ शमेर्ढः
५३४ शमेर्बन्
१०२ शमेः खः
४८२ शलिमण्डिभ्या
४४ शावशेराप्तौ
५३७ शाशपिभ्यां
४७८ शीङो धुक्लक
७०२ शीङो ह्रस्वश्च
५५३ शीङ्कुशिरुहि
३९३ शीङ्शपिरुग
३२२ शुकवल्कोल्काः
१७६ शुचेर्दश्च
१८३ शुसिचिमीनां
४१९ शृङ्गारभृङ्गारौ
१२३ शृणातेर्ह्रस्वश्च

सूत्राङ्काः सूत्रम्

१२ शॄदॄभसोऽदिः
४६७ शॄपॄभ्यां किच्च
४५९ शॄपॄवॄभ्यां द्वे
३८१ शॄरम्योश्च
१० शॄस्वॄनिहित्र
१५२ शेवयह्वजिह्वा
७०६ श्मनि श्रयते
२०४ श्यास्त्याह्वञ
४४३ श्रः करन्
५६७ श्रः शकुनौ
६३३ श्रयतेः स्वाङ्गे
३७६ श्रुदक्षिस्पृहि
२९९ श्लिषेरच्चोप
३२ श्लिषेः कश्च
१०५ श्वन्नुक्षन्पूषन्
५११ श्वयतेरिचत्
२४९ श्वितेर्दश्च
६३२ श्वेः संप्रसारणं
३५२ सपूर्वाच्चित्
१५५ सप्यशूभ्यां
५०६ समाने ख्यः
१८७ समि कस उ
१६८ समीणः
५३२ समीणः
२४६ सम्यानच्स्तुवः
१३१ सर्तेरटिः
४२१ सर्तेरपः षुक्च
६७६ सर्तेरप्पूर्वादसिः
३०२ सर्तेरयुः

सूत्राङ्काः सूत्रम्

५२९ सर्तेर्णिच्च
१६२ सर्तेर्णित्
३५८ सर्तेर्दुक्च
४६३ सर्तेर्नुम्च
५९८ सर्वधातुभ्यः
५५७ सर्वधातुभ्य
५८४ सर्वधातुभ्यो
६२८ सर्वधातुभ्योऽ
१५१ सर्वनिघृष्वरि
५४ सलिकल्यनिम
२५८ सव्ये स्थश्छ
२४२ संश्चतृपद्वेहत्
२७० सहो धश्च
५९२ सातिभ्यां म
५७४ सानसिवर्णसि
६२० सावसेः,
७४० सिचेः संज्ञायाम्
६९ सितनिगमिम
६०२ सिविमुच्योष्टे
५३३ सिवेष्टेरू च
२८९ सिवेष्टेर्यू च
२९३ सुञो दीर्घश्च
२५३ सुव्यसेर्वृन्
२३२ सुयुरुवृञो युच्
३१५ सुवः कित्
३८८ सुविदेः कत्रः
३०६ सुशॄभ्यां निच्च
१८२ सुसूधागृधिभ्यः
५०४ सृकः किः

सूत्राङ्काः सूत्रम्

३१६ सूचेः स्मन्
१५ सृजेरसुम्च
३६१ सृयुवचिभ्यो
११९ सृवृभोर्वृद्धिश्च
३२१ सृवृभूशुषि
४८९ सृवृषिभ्यां कित्
६९२ सौ रमे क्तो
१४ स्कन्देः सलोप
६४९ स्कन्देश्चस्वाङ्गे
३०९ स्तनिहृषिपुषि
३७९ स्तुवः क्सेय्य
३०५ स्तुवो दीर्घश्च
६०५ स्त्यायतेर्ड्रट्
६८२ स्थः किच्च
५३६ स्थः स्तोऽम्बज
११३ स्थाचतिमृजेरा
३१७ स्थो णुः
५५२ स्नामदिपद्यर्ति
२४६ स्नुमस्चिकृत्यृषि
७०५ स्पृशेः श्वणशुनौ
१७० स्फायितञ्चिव
६८ स्यन्देः संप्रसा
११ स्यन्देः संप्रसा
३२६ स्यमेरीट् च
२०१ स्यमेः संप्रसार
६९४ स्रंसेः शिः कुट्
६४१ स्रुरीभ्यां तुट्
२२१ स्रुवः कः
१५९ स्रुनिकुषिनीरमि

सूत्राङ्काः सूत्रम्

५६३ हनिमशिभ्यां
१५४ हनो वध च
७०२ हन्तेरच् घुर च
५०२ हन्तेरंह च
४०६ हन्तेर्मुट् हि च
७२० हन्तेर्घुश्चाच
१४४ हन्तेर्हि च

सूत्राङ्काः सूत्रम्

७१० हन्तेः शरीराव
३४ हरिमितयोर्द्रुवः
७२२ हर्यते कन्यन्हि
२६६ हसिमृग्रिण्वामि
६६६ हिंसिरीरश्चीरचौ
६०७ हुयामाश्रुभसि
२४८ हुर्छेः ग्नो लुक्

सूत्राङ्काः सूत्रम्

२१९ हुवः श्लुवच्च
५५८ हृपिषिरुहिवृति
५८७ हृमृधृसृतृशृ
३७३ हृश्याभ्यामितन्
९६ हृषेरुलच्
९७ हृसृरुहियुषिभ्य
३६५ हियः कुग्रश्च
३२८ हियो रश्च लो

अथ फिट्सूत्रसूचिका

सूत्राङ्काः सूत्रम्

३५ अक्षस्याऽदेवनस्य
१४ अङ्गुष्ठोदकबक
५० अथ द्वितीयं
२४ अथादिः प्राक्श
१६ अर्जुनस्य तृणा
३६ अर्धस्याऽसम
१७ अर्यस्य स्वाम्या
१८ आशाया अदिगा
४९ इगन्तानां च
६६ ईषन्तस्य हया
३२ उनर्वन्नन्तानाम्
८१ उपसर्गाश्चाभिव
६७ उशीरदाशेरकेश
८२ एवादीनामन्तः
७३ कपिकेशहरि
५९ कर्दमादीनां च
११ कृष्णस्यामृगाख्या
३१ खय्युवर्णं कृत्रिमा

सूत्राङ्काः सूत्रम्

६ खान्तस्याश्मादेः
४ गुदस्य च
३ गेहार्थानामस्त्रिया
७० गोष्ठजस्य ब्राह्मण
३८ ग्रामादीनां च
२१ घृतादीनां च
८४ चादयोऽनुदात्ताः
१० छन्दसि च
५८ छन्दसि च
४७ जनपदशब्दा
२२ ज्येष्ठकनिष्ठयो
७६ तिल्यशिक्यमर्त्य
२७ तृणधान्यानां च
५१ त्र्यचां प्राङ्मक
७८ त्वत्त्वसमसिमे
६३ थान्तस्य च
८ दक्षिणस्य साधौ
४६ धान्यानां च

सूत्राङ्काः सूत्रम्

७२ धूम्रजानु
५ ध्यपूर्वस्य स्त्रीविष
२० न कुपूर्वस्य
१९ नक्षत्राणामाब्विष
६१ नपः फलान्तानां
६२ नब्विषयस्यानिस
४५ नर्तुप्राण्याख्यायां
४० न वृक्षपर्वत
८० निपाता आद्युदा
७४ न्यङ्स्वरौ स्वरि
७५ न्यर्बुदव्यल्कश
२८ त्रः संख्यायाः
२ पाटलापालङ्का
५५ पान्तानां गुर्वादी
७१ पारावतस्योपो
३७ पीतद्र्वर्थानाम्
१५ पृष्ठस्य च
८६ प्रकारादिद्विरुक्तौ

सूत्राङ्काः सूत्रम्

३० प्राणिनां कुपूर्वम्
१ फिषोऽन्त उदात्तः
७ बंहिष्ठवत्सर
२३ बिल्वतिष्ययोः
७७ बिल्वभक्ष्यवीर्या
५७ मकरवरूढ
६८ महिष्याषाढयोः
४३ मादीनां च
८५ यथेति पादान्ते
६२ यान्तस्यान्त्या
५६ युतान्यण्यन्ता

सूत्राङ्काः सूत्रम्

४१ राजविशेषस्य
४२ लथावन्ते द्व
३६ लुबन्तस्योपमे
३३ वर्णानां तणति
८३ वावादीनामु
१२ वा नामधेयस्य
६६ शकटिशकट्यो
४४ शकुनीनां च
५४ शादीनां शाका
६४ शिशुमारोदुम्बर
१३ शुक्लगौरयोरादि

सूत्राङ्काः सूत्रम्

८७ शेषं सर्वमनुदा
६५ सांकाश्यकाम्पि
७६ सिमस्याथर्वणे
६० सुगन्धितेजनस्य
४३ स्त्रीविषयवर्ण
२६ स्वाङ्गशिटाम
६ स्वाङ्गाख्यायाम्
५२ स्वाङ्गानामकुर्वा
४८ ह्वयादीनामसंयु
२५ ह्रस्वान्तस्य स्त्री
३४ ह्रस्वान्तस्य ह

अथ लिङ्गानुशासनसूत्रसूचिका

सूत्राङ्काः सूत्रम्

१६६ अक्षमिन्द्रिये
१४० अटवी स्त्रियाम्
१२६ अनञ्कर्मधारयस्त०
१२७ अनल्पे छाया
४ अन्यूप्रत्ययान्तो धातुः
१७३ अपत्यार्थस्तद्धिते
१३१ अपथपुण्याहे नपुंसके
१५२ अप्सराः स्त्रियाम्
२६ अप्सुमनस्समासि०
१२२ अभाषायां हेमन्त०
९० अभ्रं नपुंसकम्
१३५ अर्चिः स्त्रियां च
११९ अर्धपथिमध्यृभुक्षि
१८२ अविशिष्टलिङ्गम्
१८३ अव्ययं कतियुष्मद०

सूत्राङ्काः सूत्रम्

९ अशनिभरण्य०
१५१ असन्तो द्व्यच्कः
१६० आजिः स्त्रियामेव
२८ आशीर्धूःपूर्गीर्द्वारः
१५६ आहवसंग्रामौ पुंसि
४२ इषुधिः स्त्री च
४८ इषुबाहू स्त्रियां च
१३४ इसुसन्त
१० ईकारान्तश्च
५१ उकारान्तः
१६ उभावप्यन्यत्र पुंसि
११ ऊङाबन्तश्च
६८ ऋणलवणतोरण०
१०६ ऋषिराशिदृति०
६३ कण्टकानीकसरक०

सूत्राङ्काः सूत्रम्

१७६ कबन्धौषधायुधान्ताः
१८८ करणाधिकरणयोल्युंट् च
१२२ कर्मणि च ब्राह्मणा०
६६ कंसं चाप्राणिनि
७१ काष्ठपृष्ठसिक्थो०
७२ काष्ठा दिगर्था स्त्रियाम्
६६ कार्षापणस्वर्णसुवर्ण०
६५ किरीटमुकुटललाट०
८७ किसलयहृदयेन्द्रिय०
६६ कुटकूटमुकुट०
१८७ कृत्याश्च
६१ कोपधः
६ क्तिन्नन्तः
५१ क्यन्तो घुः
४६ क्रतुपुरुषकपोल०
१०५ खारीमानिके स्त्रियाम्
१७३ गुणवचनमुकारान्तं०
१८६ गुणवचनं च
१८१ गृहमेहदेहपट्टपटहा०
२२ गृहशशाभ्यां क्लीबे
१७१ गोमणियष्टिमुष्टि०
८८ गोमयकषाय०
३६ घञबन्तः
३७ घाजन्तश्च
१७६ घृतमुस्तक्ष्वेलितै०
६२ चक्रवज्रान्धकार०
६८ चमसांसरसनि०
६२ चिबुककुशाङ्कु०
३२ चुक्षिवेणिखार्यश्च

सूत्राङ्काः सूत्रम्

१३६ छदिः स्त्रियामेव
७५ जघनाजिनतुहिन०
८२ जृम्भं नपुंसके च
६४ टोपधः
६७ णोपधः
१७ तलन्तः
८१ तलभं नपुंसकम्
३३ ताराधाराज्योत्स्नादयश्च
२५ तिथिनाडिरुचिवीचि०
७३ तीर्थप्रोथयूथगाथा०
१४२ तूलोपलताल०
३१ त्रुटिसीमासंबध्याः
१५३ त्रान्तः
४४ त्रिविष्टपत्रिभुवने नपुंसक
१२१ त्वष्यणौ तद्धितौ
७० थोपधः
१८० दण्डमण्डखण्डशव०
२४ दर्विविदिवेदिखनि०
१०६ दाराक्षतलाजासूना०
५८ दारुकसेरुजतुवस्तु०
१०२ दिनाहनी नपुंसके
१०१ दीधितिः स्त्रियाम्
१४ दुन्दुभिरक्षेषु
४३ देवासुरात्मस्वर्गगिरि०
१६६ दैवं पुंसि च
४५ द्यौः स्त्रियाम्
१०४ द्रोणाढकौ नपुंसके च
१६८ द्वन्द्वबर्हदुःखबडिश०
१२४ द्वन्द्वैकत्वम्

सूत्राङ्काः सूत्रम्

९० द्वाराग्रस्फारतकवक०
१३३ द्विगुः स्त्रियां च
१६७ धान्याज्यसस्य०
५२ धेनुरज्जुकुहुसर०
११० ध्वजगजमुञ्जपुञ्जाः
३६ नन्तः
११८ नपुंसकम्
१६४ नवनीतावतानानृता०
१०७ नाडघपजनो०
४८ नान्तः
१५ नाभिरसंज्ञायै
१५० नामरोमणी नपुंसके
१२० निष्ठा च
७४ नोपधः
१५६ पत्रपात्रपवित्र०
१५८ पद्मकमलोत्पलानि०
६७ पनसबिसबुससाहसानि०
१३० परवत्
११६ पल्लवपल्वल०
७८ पापरूपोडुपतल्प०
३५ पुमान्
१७५ पुंनपुंसकयोः
७७ पोपधः
८१ प्रतिपदापद्विपत्संप०
६० प्रावृण्मेरकारान्तः
२३ प्रावृड्विप्रुट्रुट्०
१६१ फलजातिः
१५७ बलकुसुमशुल्य०
४७ बाणकाण्डौ नपुंसके च

सूत्राङ्काः सूत्रम्

१४९ ब्रह्मन् पुंसि च
३८ भयलिङ्गभगपदानि०
११९ भावे ल्युडन्तः
२० भास्सक्स्रग्दि०
१८ भूमिविद्युत्सरि०
१५५ मूत्राऽमित्रच्छात्र०
८० मोपधः
९६ मद्गुमधुसीधुशीधुसानु०
१०८ मरुद्गरुत्तरद्दत्विजम्
३ नप्तृदुहितृस्व०
७६ मानाभिधान०
१०३ मानाभिधानानि
६ मिन्यन्तः
१३७ मुखनयनलोहवन०
१७२ मृत्युसीधुकर्कन्धु०
८३ मोपधः
१२३ यथढयगणएवुञ्छारच०
४० याच्ञा स्त्रियाम्
१५४ यात्रामात्राभस्त्रा०
१९ यादो नपुंसकम्
९५ यूषकरीषमिषविष०
८६ योपधः
१२ य्वन्तमेकाक्षरम्
१०० रश्मिदिवसाभिधानानि
१२८ राजामनुष्यपूर्वा सभा
८४ रुक्मसिध्मयुध्मेध्म०
५७ रुवन्तः
८१ रोपधः
१४६ लक्षा कोटिः स्त्रियाम्

सूत्राङ्काः	सूत्रम्
१	लिङ्गम्
११६	वज्रनेत्रारण्यगाण्डीवानि
११३	वंशांशपुरोडाशाः
५९	वसु चार्थवाचि
७	वह्निवृष्ण्यग्नयः पुंसि
१६३	वियज्जगत्सकृत्शकन्०
१३	विंशत्यादिरा नवतेः
१६२	वृक्षजातिः स्त्रियामेव
१७८	व्रजकुञ्जकुथकूर्च०
१४७	शङ्कुः पुंसि
१४४	शतादिः संख्या
१४५	शतायुतप्रयुताः पुंसि च
३४	शलाका स्त्रियां नित्यम्
२६	शष्कुलिराजिकुट्य०
६४	शिरीषर्जीषाम्बरीष०
१८५	शिष्टा परवत्
१४३	शीलमूलमङ्गलसाल०
६१	शुक्रमदेवतायाम्
७६	शूर्पकुतपकुणप०
१७७	शृङ्गार्घनिदाघोद्यम०
५४	श्मश्रुजानुवसुस्वाद्वश्रु०
१६५	श्राद्धकुलिशदैवपीठ०
८	श्रोणियोन्यूर्मयः पुंसि
११२	षण्डमण्डकरण्ड०
६३	षोपधः
१८४	ष्णान्ता संख्या
५६	सक्तुर्नपुंसके च
१३२	संख्यापूर्वा रात्रिः
८५	संग्रामदाडिमकुसुम०
५३	समासे रज्जुः पुंसि च
१८७	सर्वादीनि सर्वनामानि
११७	सारथ्यतिथिकुक्षि०
१३८	सीरार्थौदनाः पुंसि च
१२६	सुरासेनाच्छायाशा०
६६	सोपधः
२	स्त्री
१७०	स्त्रीपुंसयोः
२१	स्थूणोर्णे नपुंसके च
३०	स्रक्त्वग्ज्योग्वा०
१११	हस्तकुन्तान्तव्रात
११४	हृदकन्दकुन्द

समाप्ता

बृहद् अनुवादचन्द्रिका

ले० श्रीचक्रधर नौटियाल 'हंस', एम. ए., एल. टी.

'अनुवादचन्द्रिका' के यशस्वी लेखक श्रीचक्रधर नौटियाल 'हंस' शास्त्री जी ने वस्तुतः उस अभाव की पूर्ति की है जिसका अनुभव संस्कृत-प्रेमी वर्षों से कर रहे थे। अनुवाद-चन्द्रिका में सुपाठ्य सामग्री का सम्पादन एवं संकलन निःसन्देह अतीव रोचक ढंग से किया गया था, किन्तु प्रौढ़ छात्रों एवं उच्च कक्षाओं के छात्रों की आवश्यकता पूर्ति उससे नहीं हो पाती थी। उस अभाव की पूर्ति 'बृहद् अनुवादचन्द्रिका' ने की है।

बृहद् अनुवादचन्द्रिका में व्याकरण के नियमों का आधार पाणिनीय सूत्रों पर रखा गया है और उपयुक्त व्याकरण जैसे — सन्धि-कारक-समास-क्रिया, कृदन्त-तद्धित-स्त्रीप्रत्यय प्रकरणों के अतिरिक्त उसमें संस्कृत के मुहावरे, लोकोक्तियाँ, पत्र-लेखन-प्रकार, संस्कृत व्यावहारिक शब्द-संग्रह, वृत्त-परिचय, अशुद्धिप्रदर्शन, संस्कृत परीक्षाओं के अनुवादसम्बन्धी प्रश्न-पत्र और निबन्ध-रत्नमाला का समावेश किया गया है। इन विषयों के अतिरिक्त इसमें लगभग १२५ शब्दों के सातों विभक्तियों के रूप, २०० धातुओं के दसों लकारों के रूप तथा ५०० धातुओं के संक्षिप्त रूप दिये गये हैं। साथ ही साथ सोपसर्ग धातुओं के उदाहरण महाकवियों की सुप्रसिद्ध रचनाओं से उद्धृत किये गये हैं। अनुवादार्थ गद्य-पद्य संग्रह में महा-कवियों की अमर रचनाओं से उद्धरण दिये गये हैं, जिनके पारायण से सहृदय उन कवियों की कविताओं के रसास्वादन का आनन्द भी ले सकते हैं। इस प्रकार पुस्तक को परमोपयोगी बनाने का भरसक प्रयत्न किया गया है।

पुस्तक की एक और विशेषता यह है कि इसमें व्याकरण तथा अनुवाद की प्रारम्भिक शृंखला टूटने नहीं पाई है। इससे अल्प ज्ञान वाले तथा प्रौढ़ ज्ञान वाले दोनों ही प्रकार के छात्र लाभान्वित हो सकते हैं। एक ओर इससे विद्यालयीन, उच्चतर माध्यमिक एवं महाविद्यालयीन त्रिवर्षीय परीक्षा के तथा प्राज्ञ, प्रथमा आदि कक्षाओं के छात्र लाभ उठा सकते हैं, तो दूसरी ओर एम. ए., शास्त्री तथा आचार्य आदि कक्षाओं के छात्र भी लाभ उठा सकते हैं। अनुवाद के अभ्यासार्थ प्रदेशों के विभिन्न शिक्षा-संस्थानों — हाई स्कूल बोर्ड, महाविद्यालयों एवं विश्वविद्यालयों की परीक्षाओं — के प्रश्न-पत्र भी सहायक टिप्पणियों के साथ दिये गये हैं और पुस्तक के अन्त में निबन्धरत्नमाला में उच्च कक्षाओं के लिए परमोपयोगी विषयों पर १६ निबन्ध दिये गये हैं।

मूल्य : रु० २२

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना